


॥ अथ श्रीमहाभारते कर्णपर्व प्रारभ्यते ॥



[illegible] ॥ नरनारायणौवत्वाप्राचीनाचार्यवर्त्मना कर्णपर्वार्थविद्योतीभावदीपोवितन्यते ॥ १ ॥ ननुविराटादिपर्वचतुष्टयेतात्पर्येणक्रमेणार्थ[illegible]नामर्थ:सेवयानीत्याकपटपूर्वे[illegible]
[illegible]गुरुवधेनचसिध्यतीत्युक्तं तावतैवार्थनिरूपणंसमाप्तं अतःपरंकाममोक्षावेवनिरूपणीयावितिकर्णपर्वादित्रयंनारंभणीयमितिचेत्सत्यं यथाधर्मार्थौनिरूपितौएवंधर्माभासोर्थाभास[illegible]
[illegible]परिहाराय एवंमधर्मानर्थौअधर्माभासानर्थाभासौचनिरूपणीयौहानायोपादानायच तदर्थमुत्तरग्रंथःकाममोक्षयोःप्रागावश्यकः तत्रचोरेभ्यःकार्पटिकमार्गमुपदिशतःसत्यवादिनःसत्यवदनंधर्माभासः
एवंअविचार्यघ्राणचक्षुर्पराक्षसंघतोव्याधस्यहिंस्रत्वमधर्माभासः तथाशोकहेतुनाकुलक्षयेणप्राप्तोऽर्थोऽर्थाभासः सुप्तानांहननमधर्मः तत्कृतोश्वत्थाम्नोऽभिभवोनर्थः शरणागतस्वसैनिकत्राणार्थमन्यायेनापि

श्रीकृष्णायनमः ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं ॥ देवींसरस्वतींचैवततोजयमुदीरयेत् ॥ १ ॥ वैशंपायनउवाच ततोद्रोणेहतेराजन्दुर्योधनमुखानृपाः ॥ भृशमुद्विग्नमनसोद्रोणपुत्रमुपागमन् ॥ १ ॥ तेद्रोणमनुशोचंतःकश्मलाभिहतौजसः ॥ पर्युपासंतशोकार्तास्ततःशारद्वतीसुतं ॥ २ ॥ तेमुहूर्तंसमाश्वस्यहेतुभिःशास्त्रसंमितैः ॥ राञ्यागमेमहीपालाःस्वानिवेश्मानिभेजिरे ॥ ३ ॥ तेवेश्मस्वपिकौरव्यपृथ्वीशानाप्नुवन्सुखं ॥ चिंतयंतःक्षयंतीव्रंदुःखशोकसमन्विताः ॥ ४ ॥ विशेषतःसूतपुत्रोराजाचैवसुयोधनः ॥ दुःशासनश्चशकुनिःसौबलश्चमहाबलः ॥ ५ ॥ उषितास्तेनिशांतांतुदुर्योधननिवेशने ॥ चिंतयंतःपरिक्लेशान्पांडवानांमहात्मनां ॥ ६ ॥ यत्तद्द्यूतेपरिक्लिष्टाकृष्णाचानायितासभां ॥ तत्स्मरंतोनुशोचंतोभृशमुद्विग्नचेतसः ॥ ७ ॥ तथातुसंचिंतयंतस्तान्क्लेशान्द्यूतकारितान् ॥ दुःखेनक्षणदाराजन्जग्मुरब्दशतोपमा ॥ ८ ॥ ततःप्रभातेविमलेस्थितादिष्टस्यशासने ॥ चक्रुरावश्यकंसर्वेविधिदृष्टेनकर्मणा ॥ ९ ॥ तेकृत्वावश्यकार्याणिसमाश्वास्यचभारत ॥ योगमाज्ञापयामासुर्युद्धायचविनिर्ययुः ॥ १० ॥ कर्णंसेनापतिंकृत्वाकृतकौतुकमंगलाः ॥ पूजयित्वाद्विजश्रेष्ठान्दधिपात्रघृताक्षतैः ॥ ११ ॥ गोभिरश्वैश्चनिष्कैश्चवासोभिश्चमहाधनैः ॥ वंद्यमानाजयाशीर्भिःसूतमागधबंदिभिः ॥ १२ ॥ तथैवपांडवाराजन्कृतपूर्वाह्णिकक्रियाः ॥ शिबिरान्निर्ययुस्तूर्णंयुद्धायकृतनिश्चयाः ॥ १३ ॥

कृतोब्रह्मवधोनइतरब्रह्मवधवदनर्थःअपित्वनर्थाभासएव नचतेनब्रह्महाभवेदित्याततायिवधेदोषाभावस्मरणात् इत्येषामर्थानांनिरूपणार्थ[illegible]
संदर्भः आख्यायिकातुसुखप्रतिपत्त्यर्था तस्मादिदमपिपर्वत्रयमावश्यकमेव ततोद्रोणेहतेराजन्निति ॥ १ ॥ कश्मलाभिहतौजसःतीव्रशोकाभिघातजंव्यामोहेननिरस्तसामर्थ्याः शारद्वतीसुतंद्रौणिं ॥ २ ॥
[illegible]श्वस्यसावधानाभूत्वा राञ्यागमेप्रदोषकाले ॥ ३ ॥ पृथ्वीशाःराजानः क्षयंभूतंभाविनंचचिंतयंतःपरामृशंतः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ क्लेशान्कचग्रहणादीन् क्षणदारात्रिः ॥ ८ ॥ आवश्यकंनित्यकृत्यं ॥ ९ ॥
[illegible] ॥ १० ॥ ११ ॥ निष्कैःसुवर्णहारैः महाधनैःबहुमूल्यैःवंद्यमानाःस्तूयमानाः सूताःवंशानुक्रमविदः मागधाःपाणिस्वनिकाः बंदिनःस्तुतिपाठकाः ॥ १२ ॥ १३ ॥

॥ १४ ॥ १५ ॥ वृषःकर्णःप्रख्यतं अनादरवती ॥ १६ ॥ १७ ॥ १८ ॥ १९॥ सममन्यतसम्यगवधृतवान् ॥ २० ॥ दुर्मरंदुःखेनापिमर्तुमशक्यंस्वेच्छया ॥ २१ ॥ २२ ॥ तन्मरणंदुष्करंमन्ये ॥ २३ ॥
॥ २४ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेप्रथमोध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ हतेइति ॥ १ ॥ क्षयंगृहं ॥ २ ॥ ३ ॥ हाकष्टमितिखेदातिशयसूचकंवा

ततःप्रववृतेयुद्धंतुमुलंलोमहर्षणं ॥ कुरूणांपांडवानांचपरस्परजयैषिणां ॥ १४ ॥ तयोर्द्वौदिवसौयुद्धंकुरुपांडवसेनयोः ॥ कर्णेसेनापतौराजन्बभूवाद्भुतदर्शनं ॥ १५ ॥ ततःशत्रुक्षयंकृत्वासुमहांतंरणेवृषः ॥ पश्यतांधार्त्तराष्ट्राणांफाल्गुनेननिपातितः ॥ १६ ॥ ततस्तुसंजयःसर्वंगत्वानागपुरंद्रुतं ॥ आचष्टधृतराष्ट्राययद्वृत्तंकुरुजांगले ॥ १७ ॥ जनमेजयउवाच आपगेयंहतंश्रुत्वाद्रोणंचापिमहारथं ॥ आजगामपरामार्त्तिंवृद्धोराजांबिकासुतः ॥ १८ ॥ सश्रुत्वानिहतंकर्णंदुर्योधनहितैषिणं ॥ कथंद्विजवरप्राणानधारयतदुःखितः ॥ १९ ॥ यस्मिन्जयाशांपुत्राणांसममन्यतपार्थिवः ॥ तस्मिन्हतेसकौरव्यःकथंप्राणानधारयत् ॥ २० ॥ दुर्मरंतदहंमन्येनृणांकृच्छ्रेपिवर्त्ततां ॥ यत्रकर्णंहतंश्रुत्वानात्यजज्जीवितंनृपः ॥ २१ ॥ तथाशांतनवंवृद्धंब्रह्मन्बाह्लीकमेवच ॥ द्रोणंचसोमदत्तंचभूरिश्रवसमेवच ॥ २२ ॥ तथैवचान्यान्सुहृदःपुत्रान्पौत्रांश्चपातितान् ॥ श्रुत्वायन्नाजहात्प्राणांस्तन्मन्येदुष्करंद्विज ॥ २३ ॥ एतन्मेसर्वमाचक्ष्वविस्तरेणमहामुने ॥ नहितृप्यामिपूर्वेषांशृण्वानश्चरितंमहत् ॥ २४ ॥ इतिश्रीमहाभारतेकर्णपर्वणिजनमेजयवाक्यंनामप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ ७ ॥

वैशंपायनउवाच हतेकर्णेमहाराजनिशिगावल्गणिस्तदा ॥ दीनोययौनागपुरमश्वैर्वातसमैर्जवे ॥ १ ॥ सहास्तिनपुरंगत्वाभृशमुद्विग्नचेतनः ॥ जगामधृतराष्ट्रस्यक्षयंप्रक्षीणबांधवं ॥ २ ॥ सतमुद्वीक्ष्यराजानंकश्मलाभिहतौजसं ॥ ववंदेप्रांजलिर्भूत्वामूर्ध्नापादौनृपस्यह ॥ ३ ॥ संपूज्यचयथान्यायंधृतराष्ट्रंमहीपतिं ॥ हाकष्टमितिचोक्त्वासततोवचनमाददे ॥ ४ ॥ संजयोहंक्षितिपतेकच्चिदास्तेसुखंभवान् ॥ स्वदोषैरापदंप्राप्यकच्चिन्नाद्यविमुह्यसि ॥ ५ ॥ हितान्युक्तानिविदुरद्रोणगांगेयकेशवैः ॥ अगृहीतान्यनुस्मृत्यकच्चिन्नकुरुषेव्यथां ॥ ६ ॥ रामनारदकण्वाद्यैर्हितमुक्तंसभातले ॥ नगृहीतमनुस्मृत्यकच्चिन्नकुरुषेव्यथां ॥ ७ ॥ सुहृदस्त्वद्धितेयुक्तान्भीष्मद्रोणमुखान्परैः ॥ निहतान्युधिसंस्मृत्यकच्चिन्नकुरुषेव्यथां ॥ ८ ॥ तमेवंवादिनंराजासूतपुत्रंकृतांजलिं ॥ सुदीर्घमथनिःश्वस्यदुःखार्त्तइदमब्रवीत् ॥ ९ ॥ धृतराष्ट्रउवाच आपगेयेहतेशूरेदिव्यास्त्रवतिसंजय ॥ द्रोणेचपरमेष्वासेभृशंमेव्यथितंमनः ॥ १० ॥

कयमुक्त्वापश्चाद्वचनंवक्तव्यमाददे ॥ ४ ॥ आस्तेतिष्ठति ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

दर्शितानां[illegible] बसुसंज्ञक[illegible]संभूतः ॥ ११ ॥ १२ ॥ भार्गवः रामः यस्मै भीष्माय धनुर्वेदे उपाकृतः [illegible] शिष्य[illegible] ॥ १३ ॥ [illegible] ॥ १४ ॥ [illegible] ॥ १५ ॥
[illegible] मुक्त[illegible] अमुक्त[illegible] यंत्रमुक्तं गोलादि मुक्तामुक्तं सोपसंहारमस्त्रं ॥ १६ ॥ १७ ॥ मयितेसतिकिमकुर्वतेत्युत्तरेणसंबंधः ॥ १८ ॥ निमग्नानपिप्लवमानान्जीवितेसत्याचेष्टांकुर्वाणान्कृत्यु

[illegible]तयातांसहस्राणिदर्शितानांदशैवतु॥ अहन्यहनितेजस्वीनिजघ्नेवसुसंभवः ॥ ११ ॥ तंहतंयज्ञसेनस्यपुत्रेणेहशिखंडिना॥ पांडवेयाभिगुप्तेनश्रुत्वामेव्यथितंमनः॥ १२ ॥ भार्गवःप्रददौयस्मैपरमास्त्रंमहाहवे॥ साक्षाद्रामेणयोबाल्येधनुर्वेदउपाकृतः ॥ १३ ॥ यस्यप्रसादात्कौंतेयाराजपुत्रामहारथाः॥ महारथत्वंसंप्राप्तास्तथान्येवसुधाधिपाः॥ १४ ॥ तंद्रोणंनिहतंश्रुत्वाधृष्टद्युम्नेनसंयुगे॥ सत्यसंधंमहेष्वासंभृशंमेव्यथितंमनः॥ १५॥ ययोर्लोकेपुमानस्त्रेनसमोस्तिचतुर्विधे॥ तौद्रोणभीष्मौश्रुत्वातुहतौमेव्यथितंमनः ॥ १६॥ त्रैलोक्येयस्यचास्त्रेषुनपुमान्विद्यतेसमः॥ तंद्रोणंनिहतंश्रुत्वाकिमकुर्वतमामकाः॥ १७॥ संशप्तकानांचबलेपांडवेनमहात्मना॥ धनंजयेनविक्रम्यगमितेयमसादनं॥ नारायणास्त्रेचहतेद्रोणपुत्रे[illegible]धीमतः॥१८॥विप्रद्रुतेष्वनीकेषुकिमकुर्वतमामकाः॥ विप्रद्रुतानहंमन्येनिमग्नान्शोकसागरे॥ १९ ॥ प्लवमानान्हतेद्रोणेसन्ननौकानिवार्णवे॥दुर्योधनस्यकर्णस्यभोजस्यकृतवर्मणः ॥ २० ॥ मद्रराजस्यशल्यस्यद्रौणेश्चैवकृपस्यच॥मत्पुत्रस्यचशेषस्यतथान्येषांचसंजय॥२१॥विप्रद्रुतेष्वनीकेषुमुखवर्णोभवत्कथं॥एतत्सर्वंयथावृत्तंतथागावल्गणेमम॥२२॥आचक्ष्वपांडवेयानांमामकानांचविक्रमं॥ संजयउवाच तवापराधाद्यद्वृत्तंकौरवेयेषुमारिष ॥ २३ ॥ तच्छ्रुत्वामाव्यथांकार्षीर्दिष्टेनव्यथतेबुधः ॥ यस्मादभावीभावीवाभवेदर्थोनरंप्रति॥ अप्राप्तौतस्यवाप्राप्तौनकश्चिद्व्यथतेबुधः॥ २४॥ धृतराष्ट्रउवाच नव्यथाभ्यधिकाकाचिद्विद्यतेममसंजय॥ दिष्टमेतत्पुरामन्येकथयस्वयथेच्छकं॥२५॥ इतिश्रीम०कर्णपर्वणिधृतराष्ट्रसंजयसंवादेद्वितीयोऽध्यायः॥२॥ ॥७॥ संजयउवाच॰ हतेद्रोणेमहेष्वासेतवपुत्रामहारथाः॥ बभूवुरस्वस्थमुखाविषण्णागतचेतसः॥ १ ॥ अवाङ्मुखाःशस्त्रभृतःसर्वएवविशांपते ॥ अवेक्षमाणाःशोकार्त्तानाभ्यभाषन्परस्परं॥ २ ॥ तान्दृष्ट्वाव्यथिताकारान्सैन्यानितवभारत॥ ऊर्ध्वमेवनिरैक्षंतदुःखत्रस्तान्यनेकशः॥३॥

[illegible]संबंधः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ दिष्टेदैवोपात्तेते अभाविनःसुखस्याप्राप्तौभाविनोदुःखस्यप्राप्तौवाबुधोनव्यथते तद्विपर्ययेवानंदत्यतीत्यर्थः ॥ २४ ॥ दिष्टंअवश्यंभावि ॥ २५ ॥
इतिकर्णप॰ नै॰ भारतभावदीपेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ ९ ॥ हतेइति अस्वस्थमुखाःदीनवदनाः ॥ १ ॥ २ ॥ ऊर्ध्वंऊर्ध्वगमनमेवनत्वधोवस्थानं ॥ ३ ॥

॥ ४ ॥ हतस्योर्णा इतोः रिष्टसूचकउत्कएवंबद्धानांबंधशैथिल्यंमपीत्याएं तानीति दिविस्थितानिपतमानानिनक्षत्राणीवअधोमुखान्यदृश्यंतेत्यर्थः॥५॥ स्तिमितंलब्धं यतोगतसत्वंउद्विग्नचित्तं ॥ ६ ॥ ७॥ वध्यंतिवध्यंते परैरितिशेषः ॥ ८ ॥ किमत्रचित्रं क्षणंपांडवैर्जितंचेन्नैतदाश्चर्यं ॥ ९ ॥ अस्माकमसंकुज्जयोजातइत्याह पश्यध्वमित्यादिना ॥ १० ॥ ११ ॥ तान्द्रोणपर्वप्रसिद्धां ॥ १२ ॥ १३ ॥ द्रविणं

शस्त्राण्येषांतुराजेंद्रशोणितात्कानिसर्वशः ॥ प्राभ्रश्यंतकराग्रेभ्योदृष्ट्वाद्रोणंहतंयुधि ॥ ४ ॥ तानिबद्धान्यरिष्टानिलंबमानानिभारत ॥ अदृश्यंतमहाराजनक्षत्राणिपथादिवि ॥ ५ ॥ तथातुस्तिमितंदृष्ट्वागतसत्वमवस्थितं ॥ बलंतवमहाराजराजादुर्योधनोब्रवीत् ॥ ६ ॥ भवतांबाहुवीर्यंहिसमाश्रित्यमयायुधि ॥ पांडवेयाः समाहूतायुद्धंचेदंप्रवर्त्तितं ॥ ७॥ तदिदंनिहतेद्रोणेविषण्णमिवलक्ष्यते ॥ युध्यमानाश्चसमरेयोधावध्यंतिसर्वशः ॥ ८ ॥ जयोवापिवधोवापियुध्यमानस्यसंयुगे ॥ भवेत्किमत्रचित्रंवैयुध्यध्वंसर्वतोमुखाः ॥ ९ ॥ पश्यध्वंचमहात्मानंकर्णंवैकर्त्तनंयुधि ॥ प्रचरंतंमहेष्वासंदिव्यैरस्त्रैर्महाबलं ॥ १० ॥ यस्यवैयुधिसंत्रासात् कुंतीपुत्रोधनंजयः ॥ निवर्त्ततेसदामंदःसिंहात्क्षुद्रमृगोयथा ॥ ११ ॥ येननागायुतप्राणोभीमसेनोमहाबलः ॥ मानुषेणैवयुद्धेनतामवस्थांप्रवेशितः ॥ १२ ॥ येनदिव्यास्त्रविच्छूरोमायावीसघटोत्कचः ॥ अमोघयारणेशक्त्यानिहतोभैरवंनदन् ॥ १३ ॥ तस्यदुर्वारवीर्यस्यसत्यसंधस्यधीमतः ॥ बाह्वोर्द्रविणमक्षय्यमद्रक्ष्यथसंयुगे ॥ १४ ॥ द्रोणपुत्रस्यविक्रांतंराधेयस्यैवचोभयोः ॥ पश्यंतुपांडुपुत्रास्तेविष्णुवासवयोरिव ॥ १५ ॥ सर्वएवभवंतश्चशक्ताःप्रत्येकशोपिवा ॥ पांडुपुत्रान्रणेहंतुंससैन्यान्किमुसंहताः ॥ वीर्यवंतःकृतास्त्राश्चद्रक्ष्यथाद्यपरस्परं ॥ १६ ॥ सं[illegible]उवाच एवमुक्त्वाततःकर्णंचक्रेसेनापतिंतदा ॥ तवपुत्रोमहावीर्योभ्रातृभिःसहितोनघ ॥ १७ ॥ सैनापत्यमथावाप्यकर्णोराजन्महारथः ॥ सिंहनादंविनद्योच्चैःप्रायुध्यतरणोत्कटः ॥ १८ ॥ ससृंजयानांसर्वेषांपांचालानांचमारिष ॥ केकयानांविदेहानांचकारकदनंमहत् ॥ १९ ॥ तस्येषुधाराःशतशःप्रादुरासञ्छरासनात् ॥ अग्रेपुंखेषुसंसक्तायथाभ्रमरपंक्तयः ॥ २० ॥ सपीडयित्वापांचालान्पांडवांश्चतरस्विनः ॥ हत्वासहस्रशोयोधानर्जुनेननिपातितः ॥ २१ ॥ इतिश्रीमहाभा० कर्णप० संजयवाक्यंनामतृतीयोध्यायः ॥ ३ ॥ ॥ ४ ॥ वैशंपायनउवाच एतच्छ्रुत्वामहाराजधृतराष्ट्रोंबिकासुतः ॥ शोकस्यांतमपश्यन्वैहतंमेनेसुयोधनं ॥ १ ॥

बाह्वोः ॥ १४ ॥ १५ ॥ द्रक्ष्यथदर्शयिष्यथ ॥ १६ ॥ ॥ १७ ॥ १८ ॥ १९ ॥ अग्रेपुंखेषुसंसक्ताः प्रेर्यमाणस्यशरस्याग्रेणपुंखेषुप्रेरितेषुपुंखेनसंसक्ताइषुधाराःपूर्वोत्तरेषुसंधानादविच्छिन्नप्रवाहाइत्यर्थः ॥ २० ॥ पीडयित्वाहत्वेत्यनेकक्रियाकर्तृत्वंपृथक्समासः अन्योन्योपि[illegible]हतिवर्तमानसाम्यद्वयं इरिपहृ[illegible]प्रानपि पीडयन्निघ्नन्निति वार्थः ॥ २१ ॥ इतिकर्णपर्वणिनैल० भारतभा० तृतीयोऽध्यायः ॥ ३ ॥ ॥ ४ ॥ एतदिति ॥ १ ॥

विह्वलः चलनासमर्थः काष्ठवत्पतितः ॥ २ ॥ ३ ॥ ४ ॥ अंतःपुराणिस्त्रियः ॥ ५ ॥ ६ ॥ कदल्यइववेपमानाआसन्नितिशेषः ॥ ७ ॥ ८ ॥ दृष्ट्वामनसैवात्मप्रत्ययेनदुःखवतोज्ञात्वा ॥ ९ ॥ १० ॥ ११ ॥
॥ १२ ॥ जीवन्नरोभद्रशतानिपश्येदितिमनसिनिधायाह यत्त्वयेति ॥ १३ ॥ जयेइति इष्टवियोगमात्रेणदशरथाविर्मृतः अस्यतुजयेनैराश्यमधिकंमरणकारणमस्तीतिभावः उक्तांसंक्षेपेण पुनर्ब्रूहिविस्तरेण

विह्वलःपतितोभूमौनष्टचेताइवद्विपः ॥ तस्मिन्निपतितेभूमौविह्वलेराजसत्तमे ॥ २ ॥ आर्त्तनादोमहानासीत्स्त्रीणांभरतसत्तम ॥ सशब्दःपृथिवींकृत्स्नांपूरयामाससर्वशः ॥ ३ ॥ शोकार्णवेमहाघोरेनिमग्नाभरतस्त्रियः ॥ रुरुदुर्दुःखशोकार्त्ताभृशमुद्विग्नचेतसः ॥ ४ ॥ राजानंचसमासाद्यगांधारीभरतर्षभ ॥ निःसंज्ञापतिताभूमौसर्वाण्यंतःपुराणिच ॥ ५ ॥ ततस्ताःसंजयोराजन्समाश्वासयदातुराः ॥ मुह्यमानाःसुबहुशोमुंचंत्योवारिनेत्रजं ॥ ६ ॥ समाश्वस्तास्त्रियस्तास्तुवेपमानामुहुर्मुहुः ॥ कदल्यइववातेनधूयमानाःसमंततः ॥ ७ ॥ राजानंविदुरश्चापिप्रज्ञाचक्षुषमीश्वरं ॥ आश्वासयामासतदासिंचंस्तोयेनकौरवं ॥ ८ ॥ सलब्ध्वाशनकैःसंज्ञांताश्चदृष्ट्वास्त्रियोनृप ॥ उन्मत्तइवराजेंद्रस्थितस्तूष्णींविशांपते ॥ ९ ॥ ततोध्यात्वाचिरंकालंनिःश्वस्यचपुनःपुनः ॥ स्वान्पुत्रान्गर्हयामासबहुमेनेचपांडवान् ॥ १० ॥ गर्हयंश्चात्मनोबुद्धिंशकुनेःसौबलस्यच ॥ ध्यात्वातुसुचिरंकालंवेपमानोमुहुर्मुहुः ॥ ११ ॥ संस्तभ्यचमनोभूयोराजाधैर्यसमन्वितः ॥ पुनर्गावल्गणिंसूतंपर्यपृच्छतसंजयं ॥ १२ ॥ यत्त्वयाकथितंवाक्यंश्रुतंसंजयतन्मया ॥ कच्चिद्दुर्योधनःसूतनगतोवैयमक्षयं ॥ १३ ॥ जयेनिराशःपुत्रोमेसततंजयकामुकः ॥ ब्रूहिसंजयतत्त्वेनपुनरुक्तांकथामिमां ॥ १४ ॥ एवमुक्तोऽब्रवीत्सूतोराजानंजनमेजय ॥ हतोवैकर्त्तनोराजन्सहपुत्रैर्महारथः ॥ १५ ॥ भ्रातृभिश्चमहेष्वासैःसूतपुत्रैस्तनुत्यजैः ॥ दुःशासनश्चनिहतःपांडवेनयशस्विना ॥ पीतंचरुधिरंकोपाद्भीमसेनेनसंयुगे ॥ १६ ॥ इतिश्रीम०क०प०धृतराष्ट्रशोकोनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ५ ॥ वैशंपायनउवाच इतिश्रुत्वामहाराजधृतराष्ट्रोंऽबिकासुतः ॥ अब्रवीत्संजयंसूतंशोकसंविग्नमानसः ॥ १ ॥ दुष्प्रणीतेनमेतातपुत्रस्यादीर्घजीविनः ॥ हतंवैकर्त्तनंश्रुत्वाशोकोमर्माणिकृंतति ॥ २ ॥ तस्यमेसंशयंछिंधिदुःखपारंतितीर्षतः ॥ कुरूणांसृंजयानांचकेचजीवंतिकेमृताः ॥ ३ ॥ संजयउवाच हतःशांतनवोराजन्दुराधर्षःप्रतापवान् ॥ हत्वापांडवयोधानामर्बुदंदशभिर्दिनैः ॥ ४ ॥ तथाद्रोणोमहेष्वासःपांचालानांरथव्रजान् ॥ निहत्ययुधिदुर्धर्षःपश्चाद्रुक्मरथोहतः ॥ ५ ॥

॥ १४ ॥ १५ ॥ १६ ॥ इतिक०नै०भा०चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ५ ॥ इतीति ॥ १ ॥ दुष्प्रणीतेनदुर्नयेन अदीर्घजीविनोऽल्पायुषः मयैवदुर्नीत्यापुत्रोमरणोन्मुखःकृतइतिभावः ॥ २ ॥ ३ ॥ हत्वानिघ्नन् ॥ ४ ॥ निहत्यैवदुर्धर्षइत्यन्वयः जातइतिशेषः ॥ ५ ॥

हतशेषस्यभीष्मेणद्रोणेनचमहात्मना ॥ अर्धंनिहत्यसैन्यस्यकर्णोवैकर्त्तनोहतः ॥ ६ ॥ विविंशतिर्महाराजराजपुत्रोमहाबलः ॥ आनर्त्तयोधान्शतशोनिहत्य निहतोरणे ॥ ७॥ तथापुत्रोविकर्णस्तेक्षत्रव्रतमनुस्मरन् ॥ क्षीणवाहायुधःशूरःस्थितोभिमुखतःपरान् ॥ ८ ॥ घोररूपान्परिक्लेशान्दुर्योधनकृतान्बहून् ॥ प्रतिज्ञांस्मरताचैवभीमसेनेनपातितः ॥ ९ ॥ विंदानुविंदावावंत्यौराजपुत्रौमहारथौ ॥ कृत्वात्वसुकरंकर्मगतौवैवस्वतक्षयं ॥ १० ॥ सिंधुराष्ट्रमुखानीहदशराष्ट्राणियानिह ॥ वशेतिष्ठंतिवीरस्ययःस्थितस्तवशासने ॥ ११ ॥ अक्षौहिणीर्दशैकांचविनिर्जित्यशितैःशरैः ॥ अर्जुनेनहतोराजन्महावीर्योजयद्रथः ॥ १२ ॥ तथा दुर्योधनसुतस्तरस्वीयुद्धदुर्मदः ॥ वर्त्तमानःपितुःशास्त्रेसौभद्रेणनिपातितः ॥ १३ ॥ तथादौःशासनिःशूरोबाहुशालीरणोत्कटः ॥ द्रौपदेयेनसंगम्यगमितोयमसादनं ॥ १४॥ किरातानामधिपतिःसागरानूपवासिनां ॥ देवराजस्यधर्मात्माप्रियोबहुमतःसखा ॥ १५॥ भगदत्तोमहीपालःक्षत्रधर्मरतःसदा ॥ धनंजयेनविक्रम्यगमितोयमसादनं ॥ १६ ॥ तथाकौरवदायादोन्यस्तशस्त्रोमहायशाः ॥ हतोभूरिश्रवाराजन्शूरःसात्यकिनायुधि ॥ १७ ॥ श्रुतायुरपिचांबष्ठःक्षत्रियाणांधुरंधरः ॥ चरन्नभीतवत्संख्येनिहतःसव्यसाचिना ॥ १८ ॥ तवपुत्रःसदामर्षीकृतास्त्रोयुद्धदुर्मदः ॥ दुःशासनोमहाराजभीमसेनेनपातितः ॥ १९ ॥ यस्यराजन्गजानीकंबहुसाहस्रमद्भुतं ॥ सुदक्षिणःससंग्रामेनिहतःसव्यसाचिना ॥ २० ॥ कोसलानामधिपतिर्हत्वाबहुमतान्परान् ॥ सौभद्रेणेहविक्रम्यगमितोयमसादनं ॥ २१ ॥ बहुशोयोधयित्वातुभीमसेनंमहारथं ॥ चित्रसेनस्तवसुतोभीमसेनेनपातितः ॥ २२ ॥ मद्रराजात्मजःशूरःपरेषांभयवर्द्धनः ॥ असिचर्मधरःश्रीमान्सौभद्रेणनिपातितः ॥ २३ ॥ समःकर्णस्यसमरेयःसकर्णस्यपश्यतः ॥ वृषसेनोमहातेजाःशीघ्रास्त्रोदृढविक्रमः ॥ २४ ॥ अभिमन्योर्वधंश्रुत्वाप्रतिज्ञामपिचात्मनः ॥ धनंजयेनविक्रम्यगमितोयमसादनं ॥ २५ ॥ नित्यंप्रसक्तवैरोयःपांडवैःपृथिवीपतिः ॥ विश्राव्यवैरंपार्थेनश्रुतायुःसंनिपातितः ॥ २६ ॥ शल्यपुत्रस्तुविक्रांतःसहदेवेनमारिष ॥ हतोरुक्मरथोराजन्भ्रातामातुलजोयुधि ॥ २७ ॥ राजाभगीरथोवृद्धोबृहत्क्षत्रश्चकेकयः ॥ पराक्रमंतौविक्रांतौनिहतौवीर्यवत्तरौ ॥ २८ ॥ भगदत्तसुतोराजन्कृतप्रज्ञोमहाबलः ॥ श्येनवच्चरतासंख्येनकुलेननिपातितः ॥ २९ ॥ पितामहस्तवतथाबाह्लीकःसहबाह्लिकैः ॥ निहतोभीमसेनेनमहाबलपराक्रमः ॥ ३० ॥ जयत्सेनस्तथाराजन्जारासंधिर्महाबलः ॥ मागधोनिहतःसंख्येसौभद्रेणमहात्मना ॥ ३१ ॥

॥ ३२॥३३॥३४॥३५॥३६॥३७॥३८॥ अपावृत्तकवीराः अपगतआवृत्तकंकुत्सितंसंग्रामात्परावर्तनंयेषांतेसंशप्तकसहचरागोपालकाः ॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥ खरबंधुरयानवान्खरंतीं

पुत्रस्तेदुर्मुखोराजन्दुःसहश्चमहारथः ॥ गदयाभीमसेनेननिहतौशूरमानिनौ ॥ ३२ ॥ दुर्मर्षणोदुर्विषहोदुर्जयश्चमहारथः ॥ कृत्वात्वसुकरंकर्मगतावैवस्वतक्षयं ॥ ३३ ॥ उभौकलिंगवृषकौभ्रातरौयुद्धदुर्मदौ ॥ कृत्वाचासुकरंकर्मगतौवैवस्वतक्षयं ॥ ३४ ॥ सचिवोवृषवर्मातेशूरःपरमवीर्यवान् ॥ भीमसेनेनविक्रम्य गमितोयमसादनं ॥ ३५ ॥ तथैवपौरवोराजानागायुतबलोमहान् ॥ समरेपांडुपुत्रेणनिहतःसव्यसाचिना ॥ ३६ ॥ वसातयोमहाराजद्विसाहस्राःप्रहारिणः ॥ शूरसेनाश्चविक्रांताःसर्वेयुधिनिपातिताः ॥ ३७ ॥ अभीषाहाःकवचिनःप्रहरंतोरणोत्कटाः ॥ शिबयश्चरथोदाराःकालिंगसहिताहताः ॥ ३८ ॥ गोकुलेनित्यसंवृद्धायुद्धेपरमकोपनाः ॥ तेऽपावृत्तकवीराश्चनिहताःसव्यसाचिना ॥ ३९ ॥ श्रेणयोबहुसाहस्राःसंशप्तकगणाश्चये ॥ तेसर्वेपार्थमासाद्यगतावैवस्वतक्षयं ॥ ४० ॥ स्यालौतवमहाराजराजानौवृषकाचलौ ॥ त्वदर्थमतिविक्रांतौनिहतौसव्यसाचिना ॥ ४१ ॥ उग्रकर्मामहेष्वासोनामतःकर्मतस्तथा ॥ शाल्वराजोमहाबाहुर्भीमसेनेनपातितः ॥ ४२ ॥ ओघवांश्चमहाराजबृहंतःसहितौरणे ॥ पराक्रमंतौमित्रार्थेगतौवैवस्वतक्षयं ॥ ४३ ॥ तथैवरथिनांश्रेष्ठःक्षेमधूर्तिर्विशांपते ॥ निहतोगदयाराजन्भीमसेनेनसंयुगे ॥ ४४ ॥ तथाराजन्महेष्वासोजलसंधोमहाबलः ॥ सुमहत्कदनंकृत्वाहतःसात्यकिनारणे ॥ ४५ ॥ अलंबुषोराक्षसेंद्रःखरबंधुरयानवान् ॥ घटोत्कचेनविक्रम्यगमितोयमसादनं ॥ ४६ ॥ राधेयःसूतपुत्रश्चभ्रातरश्चमहारथाः ॥ केकयाःसर्वशश्चापिनिहताःसव्यसाचिना ॥ ४७ ॥ मालवामद्रकाश्चैवद्राविडाश्चोग्रकर्मिणः ॥ यौधेयाश्चललित्थाश्चक्षुद्रकाश्चाप्युशीनराः ॥ ४८ ॥ मावेल्लकास्तुंडिकेराःसावित्रीपुत्रकाश्चये ॥ प्राच्योदीच्याःप्रतीच्याश्चदाक्षिणात्याश्चमारिष ॥ ४९ ॥ पत्तीनांनिहताःसंघाहयानांप्रयुतानिच ॥ रथव्रजाश्चनिहताहताश्चवरवारणाः ॥ ५० ॥ सध्वजाःसायुधाःशूराःसवर्मांबरभूषणाः ॥ कालेनमहतायत्ताःकुलैर्येचवर्धिताः ॥ ५१ ॥ तेहताःसमरेराजन्पार्थेनाक्लिष्टकर्मणा ॥ अन्येतथामितबलाःपरस्परवधैषिणः ॥ ५२ ॥ एतेचान्येचबहवोराजानःसगणारणे ॥ हताःसहस्रशोराजन्यन्मांत्वंपरिपृच्छसि ॥ ५३ ॥ एवमेषक्षयोवृत्तःकर्णार्जुनसमागमे ॥ महेंद्रेणयथावृत्रोयथारामेणरावणः ॥ ५४ ॥ यथाकृष्णेननरकोमुरुश्चनरकारिणा ॥ कार्तवीर्यश्चरामेणभार्गवेणयथाहतः ॥ ५५ ॥ सज्ञातिबांधवःशूरःसमरेयुद्धदुर्मदः ॥ रणेकृत्वामहद्युद्धंघोरंत्रैलोक्यमोहनं ॥ ५६ ॥

खरंबंधुरंरम्यंयानंविमानंयस्य खरैर्गर्दभैर्बंधुरंयानमस्यास्तीतिवा गर्दभसंयुतरथवान्वा ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ कृष्णेननरकारिणानरकोमुरुश्चयथेत्यन्वयः ॥ ५५ ॥ ५६ ॥

कर्णस्तथाहतइत्यनुकर्षति॥५७॥५८॥५९॥६०॥ इति०क०नै०भा० भा० पंचमोऽध्यायः॥५॥ ॥७॥ आख्याताइति॥१॥२॥३॥४॥५॥६॥७॥ षड्भिःद्रोणद्रौणिशल्यकर्णकृपकृतवर्मभिः परमकैरथैः

यथास्कंदेनमहिषोयथारुद्रेणचांधकः॥ तथार्जुनेनसहतोद्वैरथेयुद्धदुर्मदः॥ ५७ ॥ सामात्यबांधवोराजन्कर्णःप्रहरतांवरः॥ जयाशाधार्त्तराष्ट्राणांवैरस्यच मुखंयतः॥५८॥ तीर्णस्तत्पांडवोराजन्यत्पुरानावबुध्यसे॥ उच्यमानोमहाराजबंधुभिर्हितकांक्षिभिः॥५९॥ तदिदंसमनुप्राप्तंव्यसनंसुमहात्ययं॥ पुत्राणांरा ज्यकामानांत्वयाराजन्हितैषिणा॥ अहितान्येवचीर्णानितेषांतत्फलमागतं॥६०॥ इतिश्रीमहाभा०कर्णप०संजयवाक्यंपंचमोऽध्यायः॥५॥ ॥७॥ धृतराष्ट्रउवाच आख्यातामामकास्तातनिहतायुधिपांडवैः॥ हतांश्चपांडवेयानांमामकैर्ब्रूहिसंजय॥१॥ संजयउवाच कुंतयोयुधिविक्रांतामहास त्वामहाबलाः॥ सानुबंधाःसहामात्यागांगेयेननिपातिताः॥ २ ॥ नारायणाबलभद्राःशूराश्चशतशोपरे॥ अनुरक्ताश्चवीरेणभीष्मेणयुधिपातिताः॥ ३॥ समःकिरीटिनासंख्येवीर्येणचबलेनच॥ सत्यजित्सत्यसंधेनद्रोणेननिहतोयुधि॥ ४॥ पांचालानांमहेष्वासाःसर्वेयुद्धविशारदाः॥ द्रोणेनसहसंगम्यगतावैव स्वतक्षयं॥५॥ तथाविराटद्रुपदौवृद्धौसहसुतौनृपौ॥ पराक्रमंतौमित्रार्थेद्रोणेननिहतौरणे॥ ६ ॥ योबालएवसमरेसंमितःसव्यसाचिना॥ केशवेनचदुर्धर्षो बलदेवेनवाविभो॥ ७॥ परेषांकदनंकृत्वामहारथविशारदः॥ परिवार्यमहामात्रैःषड्भिःपरमकैरथैः॥८॥ अशक्नुवद्भिर्बीभत्सुमभिमन्युर्निपातितः॥ कृतंतं विरथंवीरंक्षत्रधर्मेव्यवस्थितं॥९॥ दौःशासनिर्महाराजसौभद्रंहतवान्रणे॥ सपत्नानांनिहंताचमहत्यासेनयावृतः॥ १० ॥ अंबष्ठस्यसुतःश्रीमान्मित्रहेतोः पराक्रमन्॥ आसाद्यलक्ष्मणंवीरंदुर्योधनसुतंरणे॥ ११ ॥ सुमहत्कदनंकृत्वागतोवैवस्वतक्षयं॥ बृहंतःसुमहेष्वासःकृतास्त्रोयुद्धदुर्मदः॥ १२॥ दुःशासनेन विक्रम्यगमितोयमसादनं॥ मणिमान्दंडधारश्चराजानौयुद्धदुर्मदौ॥ १३ ॥ पराक्रमंतौमित्रार्थेद्रोणेनयुधिपातितौ॥ अंशुमान्भोजराजस्तुसहसैन्योमहा रथः॥१४॥ भारद्वाजेनविक्रम्यगमितोयमसादनं॥ सामुद्रश्चित्रसेनश्चसहपुत्रेणभारत॥ १५॥ समुद्रसेनेनबलाद्गमितोयमसादनं॥ अनूपवासीनीलश्चव्या घ्रदत्तश्चवीर्यवान्॥ १६॥ अश्वत्थाम्नाविकर्णेनगमितौयमसादनं॥ चित्रायुधश्चित्रयोधीकृत्वाचकदनंमहत्॥१७॥ चित्रमार्गेणविक्रम्यविकर्णेनहतोमृधे॥ वृकोदरसमोयुद्धेवृतःकैकययोधिभिः॥ १८॥ कैकेयेनचविक्रम्यभ्राताभ्रात्रानिपातितः॥ जनमेजयोगदायोधीपार्वतीयःप्रतापवान्॥ १९॥

महामात्रैःमुख्यैः अशक्नुवद्भिरेकैकश्येन हंतुमितिशेषः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२॥ १३ ॥ १४॥ १५ ॥ १६॥ १७॥ १८॥ १९॥

दुर्मुखोमहाराजंस्तवपुत्रेणपातितः ॥ रोचमानौनरव्याघ्रौरोचमानौग्रहाविव ॥ २० ॥ द्रोणेनयुगपद्राजन्दिवंसंप्रापितौशरैः ॥ नृपाश्चप्रतियुध्यंतःपराक्रांता विशांपते ॥ २१ ॥ कृत्वानसुकरंकर्मगतावैवस्वतक्षयं ॥ पुरुजित्कुंतिभोजश्चमातुलौसव्यसाचिनः ॥ २२ ॥ संग्रामनिर्जितांल्लोकान्गमितौद्रोणसायकैः ॥ अभिभूःकाशिराजश्चकाशिकैर्बहुभिर्वृतः ॥ २३ ॥ वसुदानस्यपुत्रेणन्यासितोदेहमाहवे ॥ अमितौजायुधामन्युरुत्तमौजाश्चवीर्यवान् ॥ २४ ॥ निहत्यशत शःशूरान्समदीयैर्निपातिताः ॥ मित्रवर्माचपांचाल्यःक्षत्रधर्माचभारत ॥ २५ ॥ द्रोणेनपरमेष्वासौगमितौयमसादनं ॥ शिखंडितनयोयुद्धेक्षत्रदेवोयुधांप तिः ॥ २६ ॥ लक्ष्मणेनहतोराजंस्तवपौत्रेणभारत ॥ सुचित्रश्चित्रवर्माचपितापुत्रौमहारथौ ॥ २७ ॥ प्रचरंतौमहावीरौद्रोणेननिहतौरणे ॥ वार्धक्षेमिर्महारा जसंमुद्रपर्वणि ॥ २८ ॥ आयुधक्षयमासाद्यप्रशांतिंपरमांगतः ॥ सेनाबिंदुसुतःश्रेष्ठःशस्त्रवान्प्रवरोयुधि ॥ २९ ॥ बाह्लिकेनमहाराजकौरवेंद्रेणपातितः ॥ धृष्टकेतुर्महाराजचेदीनांप्रवरोरथः ॥ ३० ॥ कृत्वानसुकरंकर्मगतोवैवस्वतक्षयं ॥ तथासत्यधृतिर्वीरःकृत्वाकदनमाहवे ॥ ३१ ॥ पांडवार्थेपराक्रांतोगमितो यमसादनं ॥ सेनाबिंदुःकुरुश्रेष्ठःकृत्वाकदनमाहवे ॥ ३२ ॥ पुत्रस्तुशिशुपालस्यसुकेतुःपृथिवीपतिः ॥ निहत्यशात्रवान्संख्येद्रोणेननिहतोयुधि ॥ ३३ ॥ त थासत्यधृतिर्वीरोमदिराश्वश्चवीर्यवान् ॥ सूर्यदत्तश्चविक्रांतोनिहतोद्रोणसायकैः ॥ ३४ ॥ श्रेणिमांश्चमहाराजयुध्यमानःपराक्रमी ॥ कृत्वानसुकरंकर्मगतो वैवस्वतक्षयं ॥ ३५ ॥ तथैवयुधिविक्रांतोमागधःपरमास्त्रवित् ॥ भीष्मेणनिहतोराजन्शेतेपरवीरहा ॥ ३६ ॥ विराटपुत्रःशंखस्तुउत्तरश्चमहारथः ॥ कुर्वंतौ सुमहत्कर्मगतौवैवस्वतक्षयं ॥ ३७ ॥ वसुदानश्चकदनंकुर्वाणोतीवसंयुगे ॥ भारद्वाजेनविक्रम्यगमितोयमसादनं ॥ ३८ ॥ एतेचान्येचबहवःपांडवानांमहा रथाः ॥ हताद्रोणेनविक्रम्ययन्मांत्वंपरिपृच्छसि ॥ ३९ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंजयवाक्येषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ धृतराष्ट्रउवाच मामकस्यास्यसैन्यस्यहतोत्सेकस्यसंजय ॥ अवशेषंनपश्यामिककुदेमृदितेसति ॥ १ ॥

मामकस्येति हतोत्सेकस्य ... ककुदे ...

अशक्तिरुक्ते ॥ २ ॥ शतंशतानांइत्यत्राकं आर्षोविभक्तिव्यत्ययः कुंजराणामयुतेनतुल्यंबाह्वोर्बलंयस्यतस्यापिवधंनक्ष्यामीतितिअपितुमृष्यास्येव मृत्युरेवैकोऽस्य ... आयबलेन ...
ववधंकुर्वतांपरेषांकर्णवधस्यैषत्करत्वादितिभावः ॥ ३ ॥ ४ ॥ मृताःमृतप्रायाः ॥ ५ ॥ चित्राणिअनेकनानायुधप्रसवंक्षमाणि शुभ्राणिदीप्तिमंति चतुर्विधानिदृढदूरसूक्ष्मशब्दवेधीनि विहितानिधनुर्वेदोवि
तानि चित्रशुभ्रदिव्याविहितान्येववाचतुर्विधानि अत्रविहितानिकृत्रिमाणीतिप्रांचः अस्त्रांतरनिवर्त्यमाग्नेयादि नतिमात्रनिवर्त्यंनारायणास्त्रादि प्रयोकैकनिवर्त्यंब्रह्मशिरआदि सर्वथाप्यनिवर्त्यंपाशुपतादि

तौहिवीरौमहेष्वासौमदर्थेकुरुसत्तमौ॥भीष्मद्रोणौहतौश्रुत्वानार्थोवैजीवितेऽस्ति॥२॥नचशोचामिराधेयंहतमाहवशोभनं॥यस्यबाह्वोर्बलंतुल्यंकुंजराणां
शतंशतं॥३॥हतप्रवरसैन्यंमेयथाशंससिसंजय॥अहतानपिमेशंसकेत्रजीवंतिकेचन॥४॥एतेषुहिमृतेष्वद्ययेत्वयापरिकीर्त्तिताः॥येपिजीवंतितेसर्वेमृताइति
मतिर्मम॥५॥ संजयउवाच यस्मिन्महास्त्राणिसमर्पितानिचित्राणिशुभ्राणिचतुर्विधानि॥दिव्यानिराजन्विहितानिचैवद्रोणेनवीरेद्विजसत्तमेन॥६॥म
हारथःकृतिमान्क्षिप्रहस्तोदृढायुधोदृढमुष्टिर्दृढेषुः॥सवीर्यवान्द्रोणपुत्रस्तरस्वीव्यवस्थितोयोद्धुकामस्त्वदर्थे॥७॥आनर्त्तवासीहृदिकात्मजोसौमहारथःसा
त्वतानांवरिष्ठः॥स्वयंभोजःकृतवर्माकृतास्त्रोव्यवस्थितोयोद्धुकामस्त्वदर्थे॥ ८ ॥आर्त्तायनिःसमरेदुष्प्रकंप्यःसेनाग्रणीःप्रथमस्तावकानां॥यःस्वस्रीयान्पां
डवेयान्विसृज्यसत्यांवाचंस्वांचिकीर्षुस्तरस्वी ॥ ९ ॥ तेजोवधंसूतपुत्रस्यसंख्येप्रतिश्रुत्याजातशत्रोःपुरस्तात् ॥ दुराधर्षःशक्रसमानवीर्यःशल्यःस्थितोयोद्धु
कामस्त्वदर्थे॥ १० ॥ आजानेयैःसैंधवैःपार्वतीयैर्नदीजकांबोजवनायुजैश्च ॥गांधारराजःस्वबलेनयुक्तोव्यवस्थितोयोद्धुकामस्त्वदर्थे ॥ ११ ॥ शारद्वतोगौ
तमश्चापिराजन्महाबाहुर्बहुचित्रास्त्रयोधी ॥ धनुश्चित्रंसुमहद्भारसाहंव्यवस्थितोयोद्धुकामःप्रगृह्य ॥ १२ ॥ महारथःकेकयराजपुत्रःसदश्वयुक्तंचपताकिनं
च॥रथंसमारुह्यकुरुप्रवीरव्यवस्थितोयोद्धुकामस्त्वदर्थे॥ १३ ॥ तथासुतस्तेज्वलनार्कवर्णरथंसमास्थायकुरुप्रवीरः॥व्यवस्थितःपुरुमित्रोनरेंद्रव्यभ्रेसूर्यो
भ्राजमानोयथाखे॥ १४ ॥दुर्योधनोनागकुलस्यमध्येव्यवस्थितःसिंहइवावभासे॥ रथेनजांबूनदभूषणेनव्यवस्थितःसमरेयोत्स्यमानः॥ १५॥ सराजम
ध्येपुरुषप्रवीरोराजजांबूनदचित्रवर्मा॥पद्मप्रभोवह्निरिवाल्पधूमोमेघांतरेसूर्यइवप्रकाशः ॥ १६ ॥

एवंचतुर्विधानिवीरेविहितानिसमर्पितानि ॥ ६ ॥ कृतिमान्अवंध्ययत्नः ॥ ७ ॥ ८ ॥ आर्त्तायनिःशल्यः स्वस्रीयान्भागिनेयान् ज्यायोरेवभागिनेयत्वेपिलिंगसमवायात्सर्वेषांभागिनेयत्वं ॥ ९ ॥ १० ॥
॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

॥ १७ ॥ ... ॥ १८ ॥ १९ नागपत्तिप्रयायीनागैःपत्ति... प्रयातुंशीलमस्य नामरथप्रयायीतिपाठांतरं ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ सैन्याःसेनामर्हंतितेराजानः यथायथंपक्षद्वये ... इतिअनेनप्रश्नद्वयव... नेनव्यक्तंस्पष्टमभिगच्छामिजानामि अर्थाभिपत्तिः फलोपपत्तिः तेनजयोस्मदीयानांनास्तीतिनिश्चिनोमीतिभावः॥ २४ ॥

तथासुषेणोप्यसिचर्मपाणिस्तवात्मजः सत्यसेनश्चवीरः॥ व्यवस्थितौचित्रसेनेनसार्धंहृष्टात्मानौसमरेयोद्धुकामौ॥ १७॥ ह्रीनिषेवोभारतराजपुत्रउग्रायुधःक्षणभोजीसुदर्शः॥ जारासंधिःप्रथमश्चादृढश्चचित्रायुधःश्रुतवर्माजयश्च॥ १८॥ शलश्चसत्यव्रतदुःशलौचव्यवस्थिताःसहसैन्यानराग्र्याः॥ कैतव्यानामधिपःशूरमानीरणेरणेशत्रुहाराजपुत्रः॥ १९॥ रथीहयीनागपत्तिप्रयायीव्यवस्थितोयोद्धुकामस्त्वदर्थे॥ वीरःश्रुतायुश्चधृतायुधश्चचित्रांगदश्चित्रसेनश्चवीरः॥ २०॥ व्यवस्थितायोद्धुकामानराग्र्याःप्रहारिणोमानिनःसत्यसंधाः॥ कर्णात्मजःसत्यसंधोमहात्माव्यवस्थितःसमरेयोद्धुकामः॥ २१॥ अथापरौकर्णसुतौवरास्त्रौव्यवस्थितौलघुहस्तौनरेंद्र॥ महद्बलंदुर्भिदमल्पवीर्यैःसमन्वितौयोद्धुकामौत्वदर्थे॥ २२॥ एतैश्चमुख्यैरपरैश्चराजन्योधप्रवीरैरमितप्रभावैः॥ व्यवस्थितोनागकुलस्यमध्येयथामहेंद्रःकुरुराजोजयाय॥ २३॥ धृतराष्ट्रउवाच आख्याताजीवमानायेपरेसैन्यायथायथं॥ इतीदमवगच्छामिव्यक्तमर्थाभिपत्तितः॥ २४॥ वैशंपायनउवाच एवंब्रुवन्नेवतदाधृतराष्ट्रोंबिकासुतः॥ हतप्रवीरंविध्वस्तंकिंचिच्छेषंस्वकंबलं॥ २५॥ श्रुत्वाव्यामोहमागच्छच्छोकव्याकुलितेंद्रियः॥ मुह्यमानोब्रवीच्चापिमुहूर्तंतिष्ठसंजय॥ २६॥ व्याकुलंमेमनस्तातश्रुत्वासुमहदप्रियं॥ मनोमुह्यतिचांगानिनचशक्नोमिधारितुं॥ २७॥ इत्येवमुक्त्वावचनंधृतराष्ट्रोंबिकासुतः॥ भ्रांतचित्तस्ततःसोथबभूवजगतीपतिः॥ २८॥ इतिश्रीमहाभा० कर्णप० संजयवाक्यंनामसप्तमोऽध्यायः॥ ७॥

जनमेजयउवाच श्रुत्वाकर्णंहतंयुद्धेपुत्रांश्चैवनिपातितान्॥ नरेंद्रःकिंचिदाश्वस्तोद्विजश्रेष्ठकिमब्रवीत्॥ १॥ प्राप्तवान्परमंदुःखंपुत्रव्यसनजंमहत्॥ तस्मिन्यदुक्तवान्कालेतन्ममाचक्ष्वपृच्छतः॥ २॥ वैशंपायनउवाच श्रुत्वाकर्णस्यनिधनमश्रद्धेयमिवाद्भुतं॥ भूतसंमोहनंभीममेरोःसंसर्पणंयथा॥ ३॥ चित्तमोहमिवायुक्तंभार्गवस्यमहामतेः॥ पराजयमिवेंद्रस्यद्विषद्भ्योभीमकर्मणः॥ ४॥ दिवःप्रपतनंभानोरुर्व्यामिवमहाद्युतेः॥ संशोषणमिवाचिंत्यंसमुद्रस्याक्षयांभसः॥ ५॥ महीवियद्दिगंबूनांसर्वनाशमिवाद्भुतं॥ कर्मणोरिववैफल्यमुभयोःपुण्यपापयोः॥ ६॥

॥ ५ ॥ ६ ॥ अमानि... ॥ २७ ॥ २८ ॥ इ० कर्णप० नै० भा० सप्तमोऽध्यायः ॥ ७ ॥ ॥ ८ ॥ श्रुत्वेति ॥ १ ॥ २ ॥ ३ ॥ भार्गवस्य... ॥ ४ ॥ ५ ॥ ६ ॥

अर्जुनवधसंचिंत्यमनस्योलोभ्यबुद्धकृत्वजमतथैन्यवंनासीतिसुंचिंत्यनिश्चित्यविललापेतिसुत्रीयेणसंबंधः ॥ ७ ॥ प्राणिनांअवध्याःकर्णादयोऽन्येषांतुल्यानामंत्वादस्यवीर्यवत्वात् इतिअर्थवैकल्येन विनाशनंस्यादपीतिहेतोराशयेचेतसिघूयमानइवविस्रस्तांगःयथाभ्राष्ट्रेधम्यमानःपाषाणादिःशीर्यतेतद्वद्विशीर्णइत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ ननिवर्त्ततेइतिछेदः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

संचिंत्यनिपुणंबुद्ध्याधृतराष्ट्रोजनेश्वरः ॥ नेदमस्तीतिसंचिंत्यकर्णस्यसमरेवधं ॥ ७ ॥ प्राणिनामेवमन्येषांस्यादपीतिविनाशनं ॥ शोकाग्निनादह्यमानोधम्यमानइवाशये ॥ ८ ॥ विस्रस्तांगःश्वसन्दीनोहाहेत्युक्त्वासुदुःखितः ॥ विललापमहाराजधृतराष्ट्रोंबिकासुतः ॥ ९ ॥ धृतराष्ट्रउवाच संजयाधिरथिर्वीरःसिंहद्विरदविक्रमः ॥ वृषभप्रतिमस्कंधोवृषभाक्षगतिश्चरन् ॥ १० ॥ वृषभोवृषभस्येवयोयुद्धेननिवर्त्तते ॥ शत्रोरपिमहेंद्रस्यवज्रसंहननोयुवा ॥ ११ ॥ यस्यज्यातलशब्देनशरवृष्टिरवेणच ॥ रथाश्वनरमातंगानावतिष्ठंतिसंयुगे ॥ १२ ॥ यमाश्रित्यमहाबाहुंद्विषांजयकांक्षया ॥ दुर्योधनोकरोद्वैरंपांडुपुत्रैर्महारथैः ॥ १३ ॥ सकथंरथिनांश्रेष्ठःकर्णःपार्थेनसंयुगे ॥ निहतःपुरुषव्याघ्रःप्रसह्यासह्यविक्रमः ॥ १४ ॥ योनामन्यतवैनित्यमच्युतंचधनंजयं ॥ नवृष्णीन्सहितानन्यान्स्वबाहुबलदर्पितः ॥ १५ ॥ शार्ङ्गगांडीवधन्वानौसहितावपराजितौ ॥ अहंदिव्याद्रथादेकःपातयिष्यामिसंयुगे ॥ १६ ॥ इतियःसततंमंदमवोचल्लोभमोहितं ॥ दुर्योधनमवाचीनंराज्यकामुकमातुरं ॥ १७ ॥ योजयत्सर्वकांबोजानावंत्यान्केकयैःसह ॥ गांधारान्मद्रकान्मत्स्यांस्त्रिगर्त्तांस्तंगणान्शकान् ॥ १८ ॥ पांचालांश्चविदेहांश्चकुलिंदान्काशिकोसलान् ॥ सुह्मानंगांश्चवंगांश्चनिषादान्पुंड्रचीरकान् ॥ १९ ॥ वत्सान्कलिंगांस्तरलानश्मकानृषिकानपि ॥ जित्वैतान्समरेवीरश्चक्रेबलिभृतःपुरा ॥ २० ॥ शरव्रातैःसुनिशितैःसुतीक्ष्णैःकंकपत्रिभिः ॥ दुर्योधनस्यवृद्ध्यर्थंराधेयोरथिनांवरः ॥ २१ ॥ दिव्यास्त्रविन्महातेजाःकर्णोवैकर्त्तनोवृषः ॥ सेनागोपश्चसकथंशत्रुभिःपरमास्त्रवित् ॥ २२ ॥ घातितःपांडवैःशूरैःसमरेवीर्यशालिभिः ॥ वृषोमहेंद्रोदेवेषुवृषःकर्णोनरेष्वपि ॥ २३ ॥ तृतीयमन्यंलोकेषुवृषंनैवानुशुश्रुम ॥ उच्चैःश्रवावरोश्वानांराज्ञांवैश्रवणोवरः ॥ २४ ॥ वरोमहेंद्रोदेवानांकर्णःप्रहरतांवरः ॥ योजितःपार्थिवैःशूरैःसमर्थैर्वीर्यशालिभिः ॥ २५ ॥ दुर्योधनस्यवृद्ध्यर्थंकृत्स्नामुर्वीमथाजयत् ॥ यंलब्ध्वामागधोराजासांत्वमानोथसौहृदैः ॥ २६ ॥ अरोचयत्पार्थिवंक्षत्रमृतेयादवकौरवान् ॥ तंश्रुत्वानिहतंकर्णंद्वैरथेसव्यसाचिना ॥ २७ ॥

अवाचीनंचिंतयाऽधोमुखं ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ जलवर्षित्वादेवेषुमहेंद्रोवृषः धनवर्षित्वान्मनुष्येषुकर्णोवृषः ॥ २३ ॥ तृतीयमन्यंलोकेषुवृषंनैवानुशुश्रुम ॥ २४ ॥ अजितइतिछेदः योजितोनिर्जितोजितोवायेनेतिवा ॥ २५ ॥ यमिति मागधोप्यस्यैववलेनबलवानितिभावः ॥ २६ ॥ २७ ॥

॥ २८ ॥ अप्लुवःनौकाहीनः ॥२९॥३०॥३१॥ इतिकर्णप॰नैल॰भारतभा॰अष्टमोऽध्यायः॥८॥ ॥९॥ श्रियेति॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ दुःखात्भी

शोकार्णवेनिमग्नोहंभिन्नानौरिवसागरे ॥ तंवृषंनिहतंश्रुत्वाद्वैरथेरथिनांवरं॥ २८॥शोकार्णवेनिमग्नोहमप्लुवःसागरेयथा ॥ ईदृशैर्यद्यहंदुःखैर्नविनश्यामिसंजय ॥ २९॥ वज्राद्दृढतरंमन्येहृदयंममदुर्भिदं ॥ ज्ञातिसंबंधिमित्राणामिमंश्रुत्वापराभवं ॥३०॥ कोमदन्यःपुमाँल्लोकेनजह्यात्सूतजीवितं ॥ विषमग्निंप्रपातंचपर्वताग्रादहंवृणे॥ नहिशक्ष्यामिदुःखानिसोढुंकष्टानिसंजय ॥३१॥ इ॰म॰भा॰कर्णप॰धृतराष्ट्रवाक्येऽष्टमोऽध्यायः ॥८॥ ॥९॥ संजयउवाच श्रियाकुलेनयशसातपसाचश्रुतेनच॥त्वामद्यसंतोमन्यंतेययातिमिवनाहुषं॥१॥ श्रुतेमहर्षिप्रतिमःकृतकृत्योसिपार्थिव ॥पर्यवस्थापयात्मानंमाविषादेमनःकृथाः ॥२॥ धृतराष्ट्रउवाच दैवमेवपरंमन्येधिक्पौरुषमनर्थकं॥यत्रशालप्रतीकाशःकर्णोहन्यतसंयुगे॥३॥हत्वायुधिष्ठिरानीकंपांचालानांरथव्रजान्॥प्रताप्यशरवर्षेणदिशःसर्वामहारथः ॥ ४ ॥ मोहयित्वारणेपार्थान्वज्रहस्तइवासुरान् ॥ सकथंनिहतःशेतेवायुरुग्णइवद्रुमः ॥ ५ ॥ शोकस्यांतंनपश्यामिपारंजलनिधेरिव ॥ चिंतामेवर्धतेतीवमुमूर्षाचापिजायते ॥ ६ ॥ कर्णस्यनिधनंश्रुत्वाविजयंफाल्गुनस्यच ॥ अश्रद्धेयमहंमन्येवधंकर्णस्यसंजय ॥ ७ ॥ वज्रसारमयंनूनंहृदयंदुर्भिदंमम ॥ यच्छ्रुत्वापुरुषव्याघ्रंहतंकर्णंनदीर्यते ॥ ८ ॥ आयुर्नूनंसुदीर्घंमेविहितंदैवतैःपुरा ॥ यत्रकर्णंहतंश्रुत्वाजीवामीहसुदुःखितः ॥ ९ ॥ धिग्जीवितमिदंचैवसुहृद्धीनस्यसंजय ॥ अद्यचाहंदशामेतांगतःसंजयगर्हितां ॥१०॥ कृपणंवर्तयिष्यामिशोच्यःसर्वस्यमंदधीः ॥ अहमेवपुराभूत्वासर्वलोकस्यसत्कृतः ॥ ११ ॥ परिभूतःकथंसूतपरैःशक्ष्यामिजीवितुं ॥ दुःखात्सुदुःखव्यसनंप्राप्तवानस्मिसंजय॥ १२ ॥ भीष्मद्रोणवधेनैवकर्णस्यचमहात्मनः ॥ नावशेषंप्रपश्यामिसूतपुत्रेहतेयुधि ॥ १३ ॥ सहिपारंमहानासीत्पुत्राणांममसंजय ॥ युद्धेहिनिहतःशूरोविसृजन्सायकान्बहून् ॥ १४ ॥ कोहिमेजीवितेनार्थस्तमृतेपुरुषर्षभं ॥ रथादाधिरथिर्नूनंन्यपतत्सायकार्दितः ॥ १५ ॥ पर्वतस्येवशिखरंवज्रपाताद्विदारितं ॥ सशेतेपृथिवींनूनंशोभयन्रुधिरोक्षितः ॥ १६ ॥ मातंगइवमत्तेनद्विपेंद्रेणाभिपातितः ॥ योबलंधार्तराष्ट्राणांपांडवानांयतोभयं ॥ १७ ॥ सोर्जुनेनहतःकर्णःप्रतिमानंधनुष्मतां ॥ सहिवीरोमहेष्वासोमित्राणामभयंकरः ॥ १८ ॥

ष्मद्रोणवधजात् दुःखंचव्यसनंचतदुभयं दुःखंकर्णवधजं व्यसनंशेषनाशजं ॥ १२ ॥ तदेवाहभीष्मेत्यादिना ॥ १३ ॥ पार्यंपारप्रदंनौकास्थानीयं ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ प्रतिमानंवज्रभूतं ॥ १८ ॥

यथा पंगोरगमनं दरिद्रस्य कामश्च एवं दुर्योधनस्याकूतमभिप्रायो दुर्घटः तृषितस्य विप्रुषो जलबिंदवो यथा तृष्णोपशमाय न भवंति एवं दुर्योधनचेष्टितमपीष्टसिद्ध्यर्थं नपर्याप्तमित्यर्थः ॥ १९ ॥ २० ॥ दीनपौरुषः नष्टपराक्रमः ॥ २१ ॥ २२ ॥ अन्ये क्षुद्राः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ताड्यमानाः ताडयंतः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ अप्रतियुध्यंतं शिखंडिनं प्रति

॥ ७ ॥ शेतेविनिहतोवीरोदेवेंद्रेणइवाचलः ॥ पंगोरिवाध्वगमनंदरिद्रस्येवकामितं ॥ १९ ॥ दुर्योधनस्यचाकूतंतृषितस्येवविप्रुषः ॥ अन्यथाचिंतितंकार्यमन्यथातत्तु जायते ॥ २० ॥ अहोनुबलवद्दैवंकालश्चदुरतिक्रमः ॥ पलायमानःकृपणोदीनात्मादीनपौरुषः ॥ २१ ॥ कच्चिद्विनिहतःसूतपुत्रोदुःशासनोमम ॥ कच्चिन्नदीनाचरितंकृतवांस्तातसंयुगे ॥ २२ ॥ कच्चिन्ननिहतःशूरोयथाऽन्येक्षत्रियर्षभाः ॥ युधिष्ठिरस्यवचनंमायुध्यस्वेतिसर्वदा ॥ २३ ॥ दुर्योधनोनाभ्यगृह्णन्मूढःपथ्यमिवौषधं ॥ शरतल्पेशयानेनभीष्मेणसुमहात्मना ॥ २४ ॥ पानीयंयाचितःपार्थःसोविध्यन्मेदिनीतलं ॥ जलस्यधारांजनितांदृष्ट्वापांडुसुतेनच ॥ २५ ॥ अब्रवीत्समहाबाहुस्तातसंशाम्यपांडवैः ॥ प्रशमाद्धिभवेच्छांतिर्मदंतंयुद्धमस्तुवः ॥ २६ ॥ भ्रातृभावेनपृथिवींभुंक्ष्वपांडुसुतैःसह ॥ अकुर्वन्वचनंतस्यनूनंशोचतिपुत्रकः ॥ २७ ॥ तदिदंसमनुप्राप्तंवचनंदीर्घदर्शिनः ॥ अहंतुनिहतामात्योहतपुत्रश्चसंजय ॥ २८ ॥ द्यूततःकृच्छ्रमापन्नोलूनपक्षइवद्विजः ॥ यथाहिशकुनिंगृह्यछित्वापक्षौचसंजय ॥ २९ ॥ विसर्जयंतिसंहृष्टास्ताड्यमानाःकुमारकाः ॥ लूनपक्षतयातस्यगमनंनोपपद्यते ॥ ३० ॥ तथाहमपिसंप्राप्तोलूनपक्षइवद्विजः ॥ क्षीणःसर्वार्थहीनश्चनिर्ज्ञातिर्बंधुवर्जितः ॥ कांदिशंप्रतिपत्स्यामिदीनःशत्रुवशंगतः ॥ ३१ ॥ वैशंपायनउवाच इत्येवंधृतराष्ट्रोथविलप्यबहुदुःखितः ॥ प्रोवाचसंजयंभूयःशोकव्याकुलमानसः ॥ ३२ ॥ धृतराष्ट्रउवाच योजयत्सर्वकांबोजानंबष्ठान्केकयैःसह ॥ गांधारांश्चविदेहांश्चजित्वाकार्यार्थमाहवे ॥ ३३ ॥ दुर्योधनस्यवृद्ध्यर्थंयोजयत्पृथिवींप्रभुः ॥ सजितःपांडवैःशूरैःसमरेबाहुशालिभिः ॥ ३४ ॥ तस्मिन्हतेमहेष्वासेकर्णेयुधिकिरीटिना ॥ केवीराःपर्यतिष्ठंततन्ममाचक्ष्वसंजय ॥ ३५ ॥ कच्चिन्नैकःपरित्यक्तःपांडवैर्निहतोरणे ॥ उक्तंत्वयापुरातातयथावीरोनिपातितः ॥ ३६ ॥ भीष्ममप्रतियुध्यंतंशिखंडीसायकोत्तमैः ॥ पातयामाससमरेसर्वशस्त्रभृतांवरं ॥ ३७ ॥ तथाद्रौपदिनाद्रोणोन्यस्तसर्वायुधोयुधि ॥ युक्तयोगोमहेष्वासःशरैर्बहुभिराचितः ॥ ३८ ॥ निहतःखड्गमुद्यम्यधृष्टद्युम्नेनसंजय ॥ अंतरेणहतावेतौछलेनचविशेषतः ॥ ३९ ॥ अश्रौषमहमेतद्वैभीष्मद्रोणौनिपातितौ ॥ भीष्मद्रोणौहिसमरेनहन्यादृजभृत्स्वयं ॥ ४० ॥ ॥ ७ ॥

युद्धमनंगीकुर्वाणं ॥ ३७ ॥ द्रौपदिना द्रुपदपुत्रेण धृष्टद्युम्नेन ॥ ३८ ॥ ३९ ॥ ४० ॥

॥४१॥४२॥ कुंडलाभ्यांसकवचाभ्यामर्थे तादर्थ्ये चतुर्थी ॥४३॥ अवमन्येअवमेने॥४४॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥ रथेति रथभंगाद्यभावेतस्यमृत्युर्नभवेदितिभावः ॥५२॥५३॥५४॥५५॥

न्यायेनयुध्यमानौहितद्वैसत्यंब्रवीमिते॥ कर्णस्त्वस्यंतमस्त्राणिदिव्यानिचबहूनिच ॥४१॥ कथमिंद्रोपमंवीरंमृत्युर्युद्धेसमस्पृशत् ॥ यस्यविद्युत्प्रभांशक्तिंदिव्यां
कनकभूषणां ॥४२॥ प्रायच्छद्द्विषतांहंत्रींकुंडलाभ्यांपुरंदरः॥यस्यसर्पमुखोदिव्यःशरःकांचनभूषणः ॥ ४३॥ अशेतनिहतःपत्रींचंदनेष्वरिसूदनः॥ भीष्मद्रो
णमुखान्वीरान्योवमन्येमहारथान् ॥४४॥ जामदग्न्यान्महाघोरंब्राह्ममस्त्रमशिक्षत ॥ यश्चद्रोणमुखान्दृष्ट्वाविमुखानर्दितान्शरैः॥४५॥ सौभद्रस्यमहाबाहु
र्व्यधमत्कार्मुकंशितैः॥ यश्चनागायुतप्राणंवज्ररंहसमच्युतं॥४६॥विरथंसहसाकृत्वाभीमसेनमथाहसत्॥सहदेवंचनिर्जित्यशरैःसन्नतपर्वभिः॥४७॥ कृपया
विरथंकृत्वानाहनद्धर्मवित्तया॥ यश्चमायासहस्राणिविकुर्वाणंजयैषिणं॥ ४८॥ घटोत्कचंराक्षसेंद्रंशक्रशक्त्यानिजघ्निवान्॥ एतांश्चदिवसान्यस्ययुद्धेभीतो
धनंजयः॥४९॥ नागमद्वैरथंवीरःसकथंनिहतोरणे॥ संशप्तकानांयोधायेआह्वयंतसदान्यतः॥५०॥ एतान्हत्वाहनिष्यामिपश्चाद्वैकर्तनंरणे॥ इतिव्यपदिशन्पा
र्थोवर्जयन्सूतजंरणे॥५१॥ सकथंनिहतोवीरःपार्थेनपरवीरहा॥ रथभंगोनचेत्तस्यधनुर्वानव्यशीर्यत॥५२॥ नचेदस्त्राणिनिर्णेशुःसकथंनिहतःपरैः ॥ कोहि
शक्तोरणेकर्णंविधुन्वानंमहद्धनुः॥५३॥ विमुंचंतंशरान्घोरान्दिव्यान्यस्त्राणिचाहवे॥ जेतुंपुरुषशार्दूलंशार्दूलमिववेगिनं॥५४॥ ध्रुवंतस्यधनुश्छिन्नंरथोवा
पिमहींगतः॥ अस्त्राणिवाप्रनष्टानियथाशंससिमेहतं॥५५॥ नह्यन्यदपिपश्यामिकारणंतस्यनाशने॥ नहन्मिफाल्गुनंयावत्तावत्पादौनधावये॥ ५६॥ इति
यस्यमहाघोरंव्रतमासीन्महात्मनः॥ यस्यभीतोरणेनिद्रांधर्मराजोयुधिष्ठिरः॥५७॥ त्रयोदशसमानित्यंनाभजत्पुरुषर्षभः॥ यस्यवीर्यवतोवीर्यमुपाश्रित्य
महात्मनः॥५८॥ मम्पुत्रःसभांभार्यांपांडूनांनीतवान्बलात्॥ तत्रापिचसभामध्येपांडवानांचपश्यतां॥५९॥ दासभार्येतिपांचालीमब्रवीत्कुरुसन्निधौ॥
नसंतिपतयःकृष्णेसर्वेषंढतिलैःसमाः॥६०॥ उपतिष्ठस्वभर्त्तारमन्यंवावरवर्णिनि॥इत्येवंयःपुरावाचोरूक्षाःसंश्रावयन्रुषा॥६१॥सभायांसूतजःकृष्णांसक
थंनिहतःपरैः॥यदिभीष्मोरणश्लाघीद्रोणोवायुधिदुर्मदः॥६२॥नहनिष्यतिकौंतेयान्पक्षपातात्सुयोधन॥सर्वान्नेवहनिष्यामिव्येतुतेमानसोज्वरः॥६३॥किंक
रिष्यतिगांडीवमक्षय्यौचमहेषुधी॥ स्निग्धचंदनदिग्धस्यमच्छरस्याभिधावतः॥ ६४॥ सनूनमृषभस्कंधोह्यर्जुनेनकथंहतः॥ यश्चगांडीवमुक्तानांस्पर्शमुग्र
मचिंतयन्॥६५॥अपतिर्ह्यसिकृष्णेतिब्रुवन्पार्थानवैक्षत॥ यस्यनासीद्भयंपार्थैःसपुत्रैःसजनार्दनैः॥६६॥ ॥ ५६॥५७॥५८॥५९॥६०॥६१॥६२॥६३॥६४॥६५॥६६॥

॥ ६७ ॥ प्रतीपमभिमुखेन अभिधावद्भिः सर्वदिग्भ्यः समागतैः ॥ ६८ ॥ आधिरथेः अधिरथपुत्रस्य सोमसूर्ययोरिह चन्द्रमसः प्रकर्षेण भातीति योगात्प्रभा ओषधिः तेषां त्रयाणामंशुभिर्मयूखैः ॥ ६९ ॥ मंदो दुर्योध

स्वबाहुबलमाश्रित्यमुहूर्त्तमपिसंजय ॥ तस्यनाहंवधंमन्येदेवैरपिसवासवैः ॥ ६७ ॥ प्रतीपमभिधावद्भिः किंपुनस्तातपांडवैः ॥ नहिज्यांसंस्पृशानस्यतलत्रेवापि गृह्णतः ॥ ६८ ॥ पुमानाधिरथेःस्थातुंकश्चित्प्रमुखतोर्हति ॥ अपिस्यान्मेदिनीहीनासोमसूर्यप्रभांशुभिः ॥ ६९ ॥ नवधः पुरुषेंद्रस्यसंयुगेष्वपलायिनः ॥ येनमंदः सहायेनभ्रात्रादुःशासनेनच ॥ ७० ॥ वासुदेवस्यदुर्बुद्धिःप्रत्याख्यानमरोचत ॥ सनूनंवृषभस्कंधंकर्णंदृष्ट्वानिपातितं ॥ ७१ ॥ दुःशासनंचनिहतंमन्येशोचतिपुत्रकः ॥ हतंवैकर्त्तनंश्रुत्वाद्वैरथेसव्यसाचिना ॥ ७२ ॥ जयतःपांडवान्दृष्ट्वाकिंस्विद्दुर्योधनोब्रवीत् ॥ दुर्मर्षणंहतंदृष्ट्वावृषसेनंचसंयुगे ॥ ७३ ॥ प्रभग्नंचबलंदृष्ट्वावध्यमानंमहारथैः ॥ पराङ्मुखांश्चराज्ञस्तुपलायनपरायणान् ॥ ७४ ॥ विद्रुतान्रथिनोदृष्ट्वामन्येशोचतिपुत्रकः ॥ अनेयश्चाभिमानीचदुर्बुद्धिरजितेंद्रियः ॥ ७५ ॥ हतोत्साहंबलंदृष्ट्वाकिंस्विद्दुर्योधनोब्रवीत् ॥ स्वयंवैरंमहत्कृत्वावार्यमाणःसुहृद्गणैः ॥ ७६ ॥ प्रधनेहबभूयिष्ठैःकिंस्विद्दुर्योधनोब्रवीत् ॥ भ्रातरंनिहतंदृष्ट्वाभीमसेनेनसंयुगे ॥ ७७ ॥ रुधिरेपीयमानेचकिंस्विद्दुर्योधनोब्रवीत् ॥ सहगांधारराजेनसभायांयदभाषत ॥ ७८ ॥ कर्णोर्जुनंरणेहंताहतेतस्मिन्किमब्रवीत् ॥ द्यूतंकृत्वापुराहृष्टोवंचयित्वाचपांडवान् ॥ ७९ ॥ शकुनिःसौबलस्तातहतेकर्णेकिमब्रवीत् ॥ कृतवर्मामहेष्वासःसात्वतानांमहारथः ॥ ८० ॥ हतंवैकर्त्तनंदृष्ट्वाहार्दिक्यःकिमभाषत ॥ ब्राह्मणाःक्षत्रियावैश्यायस्यशिक्षामुपासते ॥ ८१ ॥ धनुर्वेदंचिकीर्षंतोद्रोणपुत्रस्यधीमतः ॥ युवारूपेणसंपन्नोदर्शनीयोमहायशाः ॥ ८२ ॥ अश्वत्थामाहतेकर्णेकिमभाषतसंजय ॥ आचार्योयोधनुर्वेदेगौतमोरथसत्तमः ॥ ८३ ॥ कृपःशारद्वतस्तातहतेकर्णेकिमब्रवीत् ॥ मद्रराजोमहेष्वासःशल्यःसमितिशोभनः ॥ ८४ ॥ दृष्ट्वाविनिहतंकर्णंसारथ्येरथिनांवरः ॥ किमभाषतसौवीरोमद्राणामधिपोबली ॥ ८५ ॥ दृष्ट्वाविनिहतंसर्वेयोधावारणदुर्जयाः ॥ येचकेचनराजानःपृथिव्यांयोद्धुमागताः ॥ वैकर्तनंहतंदृष्ट्वाकान्यभाषंतसंजय ॥ ८६ ॥ द्रोणेतुनिहतेवीरेरथव्याघ्रेनरर्षभे ॥ केवामुखमनीकानामासन्संजयभागशः ॥ ८७ ॥ मद्रराजःकथंशल्योनियुक्तोरथिनांवरः ॥ वैकर्त्तनस्यसारथ्येतन्ममाचक्ष्वसंजय ॥ ८८ ॥

नः ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ प्राङ्मुखानितिपाठेनिवर्तितमुखान् प्रत्यङ्मुखाःकौरवाःयदिपलायंतेतदाप्राङ्मुखाएवभवंतीत्यर्थः ॥ ७४ ॥ अनेयःअशिक्षणीयः यतोभिमानीविद्वत्त्वाभिमानी अतएव दुर्बुद्धिः हितमजानन् ॥ ७५ ॥ ७६ ॥ प्रधनेरणे ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ कानिवाक्यानीतिशेषः ॥ ८६ ॥ ८७ ॥ ८८ ॥

॥८९॥१॥प्रत्युदीयुः... ॥९१॥१२॥हतोत्सेधस्य [illegible] ॥९३॥९४॥९५॥९६॥९७॥ इतिकर्णप० नै० भा० नवमोऽध्यायः॥९॥ ॥१॥ हतेद्रोणेहति॥१॥२॥ [illegible]
॥३॥४॥ [illegible] व्यायच्छद्भिः यतमानैः प्रत्यहारं प्रत्यवहारं प्रत्याहारमितिवापाठः॥५॥६॥ पर्यंकेष्वेववरासनेषु ॥७॥ साम्नाप्रियवचसा परमवल्गुना ॥ [illegible] ॥८॥ कार्यंतरं [illegible]

केरक्षन्दक्षिणंचक्रंसूतपुत्रस्ययुध्यतः॥ वामंचक्रंररक्षुर्वाकेवावीरस्यपृष्ठतः॥ ८९ ॥ केकर्णनजहुःशूराःकेक्षुद्राःप्राद्रवंस्ततः ॥ कथंचवःसमेतानांहतःकर्णो महारथः॥ ९० ॥ पांडवाश्चस्वयंशूराःप्रत्युदीयुर्महारथाः ॥ सृजंतःशरवर्षाणिवारिधाराइवांबुदाः ॥ ९१ ॥ सचसर्पमुखोदिव्योमहेषुप्रवरस्तदा ॥ व्यर्थःकथं समभवत्तन्ममाचक्ष्वसंजय॥ ९२ ॥ मामकस्यास्यसैन्यस्यहतोत्सेधस्यसंजय॥ अवशेषंनपश्यामिककुदेमृदितेसति ॥ ९३ ॥ तौहिवीरौमहेष्वासौमदर्थेत्य क्तजीवितौ॥ भीष्मद्रोणौहतौश्रुत्वाकोन्वर्थोजीवितेनमे ॥ ९४ ॥ पुनःपुनर्नमृष्यामिहतंकर्णंचपांडवैः ॥ यस्यबाह्वोर्बलंतुल्यंकुंजराणांशतंशतैः ॥ ९५ ॥ द्रोणे हतेचयद्वृत्तंकौरवाणांपरैःसह॥ संग्रामेनरवीराणांतन्ममाचक्ष्वसंजय ॥ ९६ ॥ यथाकर्णश्चकौंतेयैःसहयुद्धमयोजयत् ॥ तथाचद्विषतांहंतारणेशांतस्तदुच्य तां॥९७॥ इतिश्रीमहाभारतेकर्णपर्वणिधृतराष्ट्रप्रश्नेनवमोध्यायः॥९॥ ॥१॥ संजयउवाच हतेद्रोणेमहेष्वासेतस्मिन्नहनिभारत॥ कृतेचमोघसंकल्पे द्रोणपुत्रेमहारथे ॥१॥ द्रवमाणेमहाराजकौरवाणांबलार्णवे॥ व्यूह्यपार्थःस्वकंसैन्यमतिष्ठद्भ्रातृभिर्वृतः॥ २॥तमवस्थितमाज्ञायपुत्रस्तेभरतर्षभ॥विद्रुतंस्वबलं दृष्ट्वापौरुषेणन्यवारयत्॥ ३॥ स्वमनीकमवस्थाप्यबाहुवीर्यमुपाश्रितः॥ युध्वाचसुचिरंकालंपांडवैःसहभारत॥ ४॥ लब्धलक्षैःपरैर्हृष्टैर्व्यायच्छद्भिश्चिरंतदा॥ संध्याकालंसमासाद्यप्रत्यहारमकारयत्॥५॥ कृत्वाऽवहारंसैन्यानांप्रविश्यशिबिरंस्वकं॥ कुरवःसुहितंमंत्रंमंत्रयांचक्रिरेमिथः॥ ६॥ पर्यंकेषुपरार्ध्येषुस्पर्ध्या स्तरणवत्सुच॥ वरासनेषूपविष्टाःसुखशय्यास्विवामराः ॥ ७॥ ततोदुर्योधनोराजासाम्नापरमवल्गुना ॥ तानाभाष्यमहेष्वासान्प्राप्तकालमभाषत॥८॥मतं मतिमतांश्रेष्ठाःसर्वेप्रब्रूतमाचिरं॥ एवंगतेतुकिंकार्यंकिंचकार्यतरंनृपाः॥ ९॥ संजयउवाच एवमुक्तेनरेंद्रेणनरसिंहायुयुत्सवः॥ चक्रुर्नानाविधाश्चेष्टाः सिंहासनगतास्तदा॥ १०॥ तेषांनिशाम्येंगितानियुद्धेप्राणाञ्जुहूषतां ॥ समुद्वीक्ष्यमुखंराज्ञोबालार्कसमवर्चसं॥ ११ ॥ आचार्यपुत्रोमेधावीवाक्यज्ञोवाक्य मावदे॥ रागोयोगस्तथादाक्ष्यंनयश्चेत्यर्थसाधकाः ॥ १२ ॥ उपायाःपंडितैःप्रोक्तास्तेतुदैवमुपाश्रिताः ॥ लोकप्रवीरायेऽस्माकंदेवकल्पामहारथाः॥ १३॥

[illegible] ॥९॥ चेष्टाः [illegible] ॥१०॥ निशाम्य [illegible] वर्चसं [illegible] ॥११॥ [illegible] ॥१२॥१३॥

॥ नीतिर्नीतिशास्त्रंतस्याविदिः सुनीतैः सुनीतैर्देवमनुलोम्यते अनुकूलंक्रियते नकेवलंरागमपेक्ष्यैवास्यप्रावल्यमपितुदैवापेक्षयापिसुप्रणीतारस्मादयः सत्कृतादयश्चेत्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ बहुमतींबहुमतांवलवतीं आशि ... वान् ॥ १८ ॥ १९ ॥ शुभंवचः श्रुत्वामनः समवस्थाप्यसमाधायाब्रवीदितिद्वयोःसंबंधः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ ताभ्यांसकाशात्द्रविणवत्तरः बलवत्तरः ॥ २४ ॥ २५ ॥ २६ ॥

नीतिमंतस्तथायुक्तादक्षारक्ताश्चतेहताः ॥ नत्वेवकार्यंनैराश्यमस्माभिर्विजयंप्रति ॥ १४ ॥ सुनीतैरिहसर्वार्थैर्दैवमप्यनुलोम्यते ॥ तेवयंप्रवरंनृणांसर्वैर्गुणगणैर्युतं ॥ १५ ॥ कर्णमेवाभिषेक्ष्यामःसैनापत्येनभारत ॥ कर्णंसेनापतिंकृत्वाप्रमथिष्यामहेरिपून् ॥ १६ ॥ एषह्यतिबलःशूरःकृतास्त्रोयुद्धदुर्मदः ॥ वैवस्वतइवासह्यःशक्तोजेतुंरणेरिपून् ॥ १७ ॥ एतदाचार्यतनयाच्छ्रुत्वाराजंस्तवात्मजः ॥ आशांबहुमतींचक्रेकर्णंप्रतिसवैतदा ॥ १८ ॥ हतेभीष्मेचद्रोणेचकर्णोजेष्यतिपांडवान् ॥ तामाशांहृदयेकृत्वासमाश्वस्यचभारत ॥ १९ ॥ ततोदुर्योधनःप्रीतःप्रियंश्रुत्वास्यतद्वचः ॥ प्रीतिसत्कारसंयुक्तंतथ्यमात्महितंशुभं ॥ २० ॥ स्वंमनःसमवस्थाप्यबाहुवीर्यमुपाश्रितः ॥ दुर्योधनोमहाराजराधेयमिदमब्रवीत् ॥ २१ ॥ कर्णजानामितेवीर्यंसौहृदंपरमंमयि ॥ तथापित्वांमहाबाहोप्रवक्ष्यामिहितंवचः ॥ २२ ॥ श्रुत्वायथेष्टंचकुरुवीरयत्तवरोचते ॥ भवान्प्राज्ञतमोनित्यंममचैवपरागतिः ॥ २३ ॥ भीष्मद्रोणावतिरथौहतौसेनापतीमम ॥ सेनापतिर्भवानस्तुताभ्यांद्रविणवत्तरः ॥ २४ ॥ वृद्धौचतौमहेष्वासौसापेक्षौचधनंजये ॥ मानितौचमयावीरौराधेयवचनात्तव ॥ २५ ॥ पितामहत्वंसंप्रेक्ष्यपांडुपुत्रामहारणे ॥ रक्षितास्तातभीष्मेणदिवसानिदशैवतु ॥ २६ ॥ न्यस्तशस्त्रेचभवतिहतोभीष्मःपितामहः ॥ शिखंडिनंपुरस्कृत्यफाल्गुनेनमहाहवे ॥ २७ ॥ हतेतस्मिन्महेष्वासेशरतल्पगतेतया ॥ त्वयोक्तेपुरुषव्याघ्रद्रोणोह्यासीत्पुरःसरः ॥ २८ ॥ तेनापिरक्षिताःपार्थाःशिष्यत्वादितिमेमतिः ॥ सचापिनिहतोवृद्धोधृष्टद्युम्नेनसत्वरं ॥ २९ ॥ निहताभ्यांप्रधानाभ्यांताभ्यांनमितविक्रम ॥ त्वत्समंसमरेयोधंनान्यंपश्यामिचिंतयन् ॥ ३० ॥ भवानेवतुनःशक्तोविजयायनसंशयः ॥ पूर्वंमध्येचपश्चाच्चतथैवविहितंहितं ॥ ३१ ॥ सभवान्धुर्यवत्संख्येधुरमुद्वोढुमर्हति ॥ अभिषेचयसैनान्येस्वयमात्मानमात्मना ॥ ३२ ॥ देवतानांयथास्कंदःसेनानीःप्रभुरव्ययः ॥ तथाभवानिमांसेनांधार्त्तराष्ट्रींबिभर्तुवै ॥ ३३ ॥ जहिशत्रुगणान्सर्वान्महेंद्रोदानवानिव ॥ अवस्थितंरणेदृष्ट्वापांडवास्त्वांमहारथाः ॥ ३४ ॥ द्रविष्यंतिसपांचालाविष्णुंदृष्ट्वेवदानवाः ॥ तस्मात्त्वंपुरुषव्याघ्रप्रकर्षैतांमहाचमूं ॥ ३५ ॥ भवत्यवस्थितेयत्तेपांडवामंदचेतसः ॥ द्रविष्यंतिसहामात्याःपांचालाःसृंजयाश्चह ॥ ३६ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ताभ्यामपिनमितःसम्यक्ज्ञातोविक्रमोयस्य ॥ ३० ॥ विहितंत्वयेतिशेषः ॥ ३१ ॥ सैनान्येसेनानीत्वेसैनापत्ये ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

॥ ३७ ॥ ३८ ॥ कर्णमेवंतदाब्रवीत् दुर्योधनइतिशेषः नसंयुयुत्सतियुद्धेच्छामपिनकरिष्यतिकिंपुनर्युद्धमितिभावः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ शातकुंभमयैःसौवर्णैर्माहेयैर्मृण्मयैर्मृत्कुंभैः ॥ ४४ ॥

यथाह्यभ्युदितःसूर्यःप्रतपन्स्वेनतेजसा ॥ व्यपोहतितमस्तीव्रंतथाशत्रून्प्रतापय ॥ ३७ ॥ संजयउवाच आशाबलवतीराजन्पुत्रस्यतवयाभवत् ॥ हते भीष्मेचद्रोणेचकर्णोजेष्यतिपांडवान् ॥ ३८ ॥ तामाशांहृदयेकृत्वाकर्णमेवंतदाब्रवीत् ॥ सूतपुत्रनतेपार्थःस्थित्वाग्रेसंयुयुत्सति ॥ ३९ ॥ कर्णउवाच उक्त मेतन्मयापूर्वंगांधारेतवसन्निधौ ॥ जेष्यामिपांडवान्सर्वान्सपुत्रान्सजनार्दनान् ॥ ४० ॥ सेनापतिर्भविष्यामितवाहंनात्रसंशयः ॥ स्थिरोभवमहाराजजितान्विद्धिचपांडवान् ॥ ४१ ॥ संजयउवाच एवमुक्तोमहाराजततोदुर्योधनोनृपः ॥ उत्तस्थौराजभिःसार्द्धंदेवैरिवशतक्रतुः ॥ ४२ ॥ सैनापत्येनसत्कर्तुंकर्णं स्कंदमिवामराः ॥ ततोभिषिषिचुःकर्णंविधिदृष्टेनकर्मणा ॥ ४३ ॥ दुर्योधनमुखाराजन्राजानोविजयैषिणः ॥ शातकुंभमयैःकुंभैर्माहेयैश्चाभिमंत्रितैः ॥ ४४ ॥ तोयपूर्णैर्विषाणैश्चद्विपखड्गमहर्षभैः ॥ मणिमुक्तायुतैश्चान्यैःपुण्यगंधैस्तथौषधैः ॥ ४५ ॥ औदुंबरेसुखासीनमासनेक्षौमसंवृते ॥ शास्त्रदृष्टेनविधिनासंभारैश्च सुसंभृतैः ॥ ४६ ॥ ब्राह्मणाःक्षत्रियावैश्यास्तथाशूद्राश्चसंमताः ॥ तुष्टुवुस्तंमहात्मानमभिषिक्तंवरासने ॥ ४७ ॥ ततोभिषिक्तेराजेंद्रनिष्कैर्गोभिर्धनेनच ॥ वाच यामासविप्राग्र्यान्राधेयःपरवीरहा ॥ ४८ ॥ जयपार्थान्सगोविंदान्सानुगांस्तान्महामृधे ॥ इतितंवंदिनःप्राहुर्द्विजाश्चपुरुषर्षभं ॥ ४९ ॥ जहिपार्थान्सपांचालान्राधेयविजयायनः ॥ उद्यन्निवसदाभानुस्तमांस्युग्रैर्गभस्तिभिः ॥ ५० ॥ नह्यलंत्वद्विसृष्टानांशराणांवैसकेशवाः ॥ उलूकाःसूर्यरश्मीनांज्वलतामिवदर्शने ॥ ५१ ॥ नहिपार्थाःसपांचालाःस्थातुंशक्तास्तवाग्रतः ॥ आत्तशस्त्रस्यसमरेमहेंद्रस्येवदानवाः ॥ ५२ ॥ अभिषिक्तस्तुराधेयःप्रभयासोमितप्रभः ॥ अत्यरिच्यतरूपेणदिवाकरइवापरः ॥ ५३ ॥ सैनापत्येतुराधेयमभिषिच्यसुतस्तव ॥ अमन्यततदात्मानंकृतार्थंकालचोदितः ॥ ५४ ॥ कर्णोपिराजन्संप्राप्यसैनापत्यमरिंदमः ॥ योगमाज्ञापयामाससूर्यस्योदयनंप्रति ॥ ५५ ॥ तवपुत्रैर्वृतःकर्णःशुशुभेतत्रभारत ॥ देवैरिवयथास्कंदःसंग्रामेतारकामये ॥ ५६ ॥ इतिश्रीम० कर्णप० कर्णाभिषेकेदशमोध्यायः ॥ १० ॥ ॥ ९ ॥ धृतराष्ट्रउवाच सैनापत्यंतुसंप्राप्यकर्णोवैकर्त्तनस्तदा ॥ तथोक्तश्चस्वयंराज्ञास्निग्धंभ्रातृसमंवचः ॥ १ ॥

विषाणैःद्विपस्यगजस्यदंतमयैःपात्रैः खड्गस्यगंडकस्य महर्षभस्यगवयस्यचशृंगैः विषाणंदंतशृंगयोरितिविश्वः द्विपखड्गमहर्षभीयैरितितद्धितलोपआर्षः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ [illegible]नेपितारंकिंपुतस्तत्र्योदश्यर्थः ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ इतिकर्णपर्वणिनैलकंठीये भारतभावदीपे दशमोऽध्यायः ॥ १० ॥ ॥ ९ ॥ [illegible] सैनेति ॥ १ ॥

॥ १ ॥ नंदितूर्यमानंदवाद्यं ॥ ३ ॥ ४ ॥ कल्प्यतांसंनह्यमानानां वरूथिनां सन्नह्यतांनराणांसन्नह्यमानानामंगजादीनांच शब्दोवक्ष्यतेऽनुवृत्तिद्वयोःसंबंधः ॥ ५ ॥ ६ ॥ श्वेतेत्यादिविशेषणद्वयंरथेनेत्यस्य ॥ ७ ॥

घोरमहाप्यसेनानामादित्येऽभ्युदितेतदा ॥ अकरोत्किंमहाप्राज्ञस्तन्ममाचक्ष्वसंजय॥ २ ॥ संजयउवाच कर्णस्यमतमाज्ञायपुत्रास्तेभरतर्षभ॥ योगमाज्ञापयामासुर्नंदितूर्यपुरःसरं॥ ३॥ महत्यपररात्रेचतवसैन्यस्यमारिष॥ योगोयोगेतिसहसाप्रादुरासीन्महास्वनः॥ ४॥ कल्प्यतांनागमुख्यानांरथानांच वरूथिनां॥ संनह्यतांनराणांचवाजिनांचविशांपते ॥ ५ ॥ क्रोशतांचैवयोधानांत्वरितानांपरस्परं ॥ बभूवतुमुलःशब्दोदिवस्पृक्सुमहांस्ततः॥ ६॥ ततःश्वेतपताकेनबलाकावर्णवाजिना ॥ हेमपृष्ठेनधनुषानागकक्षेणकेतुना ॥ ७ ॥ तूणीरशतपूर्णेनसगदेनवरूथिना॥शतघ्नीकिंकिणीशक्तिशूलतोमरधारिणा ॥ ८ ॥ कार्मुकैरुपपन्नेनविमलादित्यवर्चसा॥ रथेनाभिपताकेनसूतपुत्रोऽभ्यदृश्यत ॥ ९ ॥ ध्मापयन्वारिजंराजन्हेमजालविभूषितं॥ विधुन्वानोमहच्चापंकार्तस्वरविभूषितं॥ १०॥ दृष्ट्वाकर्णमहेष्वासंरथस्थंरथिनांवरं॥ भानुमंतमिवोद्यंतंतमोनिघ्नन्दुरासदं ॥ ११ ॥ नभीष्मव्यसनंकेचिन्नापिद्रोणस्यमारिष॥ नान्येषांपुरुषव्याघ्रमेनिरेतत्रकौरवाः॥ १२॥ ततस्तुत्वरयन्योधाञ्शंखशब्देनमारिष ॥ कर्णोनिष्कर्षयामासकौरवाणांमहद्बलं॥ १३॥ व्यूह्यव्यूहंमहेष्वासो मकरंशत्रुतापनः॥ प्रत्युद्ययौतथाकर्णःपांडवान्विजिगीषया॥ १४॥ मकरस्यतुतुंडेवैकर्णोराजन्व्यवस्थितः॥ नेत्राभ्यांशकुनिःशूरउलूकश्चमहारथः॥ १५॥ द्रोणपुत्रस्तुशिरसिग्रीवायांसर्वसोदराः॥ मध्येदुर्योधनोराजाबलेनमहतावृतः॥ १६॥ वामपादेतुराजेंद्रकृतवर्माव्यवस्थितः॥ नारायणबलैर्युक्तोगोपालैर्युद्धदुर्मदैः॥ १७॥ पादेतुदक्षिणेराजन्गौतमःसत्यविक्रमः॥ त्रिगर्तैःसुमहेष्वासैर्दाक्षिणात्यैश्चसंवृतः॥ १८॥ अनुपादेतुयोवामस्तत्रशल्योव्यवस्थितः॥ महत्यासेनयासार्धंमद्रदेशसमुत्थया॥ १९॥ दक्षिणेतुमहाराजसुषेणःसत्यसंगरः॥ वृतोरथसहस्रेणदंतिनांचत्रिभिःशतैः॥ २०॥ पुच्छेत्वास्तांमहावीर्यौभ्रातरौपार्थिवौतदा॥ चित्रश्चचित्रसेनश्चमहत्यासेनयावृतौ॥ २१॥ तथाप्रयातेराजेंद्रकर्णेनरवरोत्तमे॥ धनंजयमभिप्रेक्ष्यधर्मराजोऽब्रवीदिदं॥ २२॥ पश्यपार्थयथासेनाधार्तराष्ट्रीहसंयुगे॥ कर्णेनविहितावीरगुप्तावीरैर्महारथैः॥ २३॥ हतवीरतमाह्येषाधार्तराष्ट्रीमहाचमूः॥ फल्गुशेषामहाबाहोतृणैस्तुल्यामताममं ॥ २४॥ एकोह्यत्रमहेष्वासःसूतपुत्रोविराजते॥ सदेवासुरगंधर्वैःसकिन्नरमहोरगैः॥ २५॥

॥ ८ ॥ अभिपताकेनवायोःप्रातिकूल्याद्रथिपुरस्थपताकेन [illegible] ॥ ९ ॥ १० ॥ निघ्नन्निवतं इतिविनापाठः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ अनुपादेपादस्थानस्यापिपश्चाद्भागे ॥ १९ ॥ दक्षिणेअनुपादे ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

॥ २६ ॥ व्यूहरचय ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ इतिनैल० भारतभा० एकादशोध्यायः ॥ ११ ॥

चरापरैस्त्रिभिर्लोकैर्योजय्योरथिनांवरः ॥ तंहत्वाद्यमहाबाहोविजयस्तवफाल्गुन ॥ २६ ॥ उद्धृतश्चभवेच्छल्योममद्वादशवार्षिकः ॥ एवंज्ञात्वामहाबाहोव्यूहंव्यू हयथेच्छसि ॥ २७ ॥ भ्रातुरेतद्वचःश्रुत्वापांडवःश्वेतवाहनः ॥ अर्धचंद्रेणव्यूहेनप्रत्यव्यूहततांचमूं ॥ २८ ॥ वामपार्श्वेतुतस्याथभीमसेनोव्यवस्थितः ॥ दक्षिणे चमहेष्वासोधृष्टद्युम्नोव्यवस्थितः ॥ २९ ॥ मध्येव्यूहस्यराजातुपांडवश्चधनंजयः ॥ नकुलःसहदेवश्चधर्मराजस्यपृष्ठतः ॥ ३० ॥ चक्ररक्षौतुपांचाल्यौयुधामन्यू त्तमौजसौ ॥ नार्जुनंजहतुर्युद्धेपाल्यमानौकिरीटिना ॥ ३१ ॥ शेषान्नृपतयोवीराःस्थिताव्यूहस्यदंशिताः ॥ यथाभागंयथोत्साहंयथायत्नंचभारत ॥ ३२ ॥ एवमे तन्महाव्यूहंव्यूह्यभारतपांडवाः ॥ तावकाश्चमहेष्वासायुद्धायैवमनोदधुः ॥ ३३ ॥ दृष्ट्वाव्यूढांतवचमूंसूतपुत्रेणसंयुगे ॥ निहतान्पांडवान्मेनेधार्त्तराष्ट्रःसबांधवः ॥ ३४ ॥ तथैवपांडवींसेनांव्यूढांदृष्ट्वायुधिष्ठिरः ॥ धार्त्तराष्ट्रान्हतान्मेनेसकर्णान्वैजनाधिपः ॥ ३५ ॥ ततःशंखाश्चभेर्यश्चपणवानकदुंदुभिः ॥ डिंडिमाश्चाप्यह न्यंतवाद्यंतसमंततः ॥ ३६ ॥ सेनयोरुभयोराजन्प्रावाद्यंतमहास्वनाः ॥ सिंहनादश्चसंजज्ञेशूराणांजयगृद्धिनां ॥ ३७ ॥ हयहेषितशब्दाश्चवारणानांचबृंह तां ॥ रथनेमिस्वनाश्चोग्राःसंबभूवुर्जनाधिप ॥ ३८ ॥ नद्रोणव्यसनंकश्चिज्जानीतेतत्रभारत ॥ दृष्ट्वाकर्णंमहेष्वासंमुखेव्यूहस्यदंशितं ॥ ३९ ॥ उभेसैन्येमहारा जप्रहृष्टनरसंकुले ॥ योद्धुकामेस्थितेराजन्हंतुमन्योन्यमोजसा ॥ ४० ॥ तत्रयत्तौसुसंरब्धौदृष्ट्वान्योन्यंव्यवस्थितौ ॥ अनीकमध्येराजेंद्रचेरतुःकर्णपांडवौ ॥ ४१ ॥ नृत्यमानेचतेसेनेसमेयातांपरस्परं ॥ तेषांपक्षैःप्रपक्षैश्चनिर्जग्मुस्तेयुयुत्सवः ॥ ४२ ॥ ततःप्रववृतेयुद्धंनरवारणवाजिनां ॥ रथानांचमहाराजअन्योन्य मभिनिघ्नतां ॥ ४३ ॥ इतिश्रीमहाभारतेकर्णपर्वणिव्यूहनिर्माणेएकादशोऽध्यायः ॥ ११ ॥ ॥ ७१ ॥ संजयउवाच ॰ तेसेनेऽन्योन्यमासाद्यप्रहृष्टाश्वनर द्विपे ॥ बृहत्यौसंप्रजघ्नातेदेवासुरसमप्रभे ॥ १ ॥ ततोनररथाश्वेभाःपत्तयश्चोग्रविक्रमाः ॥ संप्रहारान्भृशंचक्रुर्देहपाप्मासुनाशनान् ॥ २ ॥ पूर्णचंद्रार्कपद्मानां कांतिभिर्गंधतःसमैः ॥ उत्तमांगैर्नृसिंहानांनृसिंहास्तस्तरुर्महीं ॥ ३ ॥ अर्धचंद्रैस्तथाभल्लैःक्षुरप्रैरसिपट्टिशैः ॥ परश्वधैश्चाप्यकृंतन्नुत्तमांगानियुध्यतां ॥ ४ ॥ व्या यतायतबाहूनांव्यायतायतबाहुभिः ॥ बाहवःपातितारेजुर्धरण्यांसायुधांगदैः ॥ ५ ॥

तेसेनेइति [illegible] ॥ १ देहानांपाप्मनामसूनांचनाशनान् ॥ २ ॥ पूर्णचंद्रार्काणांकांतिभिःसमैःपद्मानांगंधतःसमैःतस्तरुःआस्तीर्णवंतः ॥ ३ ॥ ४ ॥ व्यायताःपुष्टाःआयताःदीर्घाः ॥ ५ ॥

[illegible]:निरस्तैः ओ[illegible]॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ १३॥ १४॥ १५॥ आपीडिनः[illegible]ः नानापृथक् विविधरागाणिवसनानियेषांतेविरागवसनाः॥ १६॥ १७॥ १८॥ ॥ १९॥ २०॥ महामात्रवरैरितिपाठेश्रेष्ठरथैः गजधूर्गतःगजस्कंधगतः॥ २१॥ उदयाप्यद्रिभवनं उदयाद्रेरपभवनं अपाद्रीत्यपशब्दस्यपूर्वनिपातआर्षः उदयनामाअपाद्रिःपूर्वपर्वतःसएवभवनमितिवा

[illegible]रद्भिर्महीभातिरक्तांगुलितलैस्तथा॥ गरुडप्रहितैरुग्रैःपंचास्यैरुरगैरिव॥ ६॥ द्विरदस्यंदनाश्वेभ्यःपेतुर्वीराद्विषद्धताः॥ विमानेभ्योयथाक्षीणेपुण्येस्वर्गसदस्तथा॥ ७॥ गदाभिरन्येगुर्वीभिःपरिघैर्मुसलैरपि॥ पोथिताःशतशःपेतुर्वीराघोरतरैरणे॥ ८॥ रथारथैर्विमथितामत्तामत्तैर्द्विपाद्विपैः॥ सादिनःसादिभिश्चैवतस्मिन्परमसंकुले॥ ९॥ रथैर्नरारथानागैरश्वारोहाश्वपत्तिभिः॥ अश्वारोहैःपदाताश्चनिहतायुधिशेरते॥ १०॥ रथाश्वपत्तयोनागैरथाश्वेभाश्चपत्तिभिः॥ रथपत्तिद्विपाश्वाश्वैरथैश्चापिनरद्विपाः॥ ११॥ रथाश्वेभनराणांतुनराश्वेभरथैःकृतं॥ पाणिपादैश्चशस्त्रैश्चरथैश्चकदनंमहत्॥ १२॥ तथातस्मिन्बलेशूरैर्वध्यमानेहतेपिच॥ अस्मानभ्याययुःपार्थावृकोदरपुरोगमाः॥ १३॥ धृष्टद्युम्नःशिखंडीचद्रौपदेयाःप्रभद्रकाः॥ सात्यकिश्चेकितानश्चद्राविडैःसैनिकैःसह॥ १४॥ वृताव्यूहेनमहतापांड्याश्चोलाःसकेरलाः॥ व्यूढोरस्कादीर्घभुजाःप्रांशवःपृथुलोचनाः॥ १५॥ आपीडिनोरक्तदंतामत्तमातंगविक्रमाः॥ नानाविरागवसनागंधचूर्णावचूर्णिताः॥ १६॥ बद्धासयःपाशहस्तावारणप्रतिवारणाः॥ समानमृत्यवोराजन्नात्यजंतपरस्परं॥ १७॥ कलापिनश्चापहस्तादीर्घकेशाःप्रियंवदाः॥ पत्तयःसादिनश्चान्येघोररूपपराक्रमाः॥ १८॥ अथापरेपुनःशूराश्चेदिपांचालकेकयाः॥ कारूषाःकोशलाःकांच्यामागधाश्चापिदुद्रुवुः॥ १९॥ तेषांरथाश्चनागाश्चप्रवराश्चोग्रपत्तयः॥ नानावाद्यधरैर्हृष्टानृत्यंतिचहसंतिच॥ २०॥ तस्यसैन्यस्यमहतोमहामात्रवरैर्वृतः॥ मध्येवृकोदरोभ्यायात्त्वदीयान्नागधूर्गतः॥ २१॥ सनागप्रवरोत्युग्रोविधिवत्कल्पितोबभौ॥ उदयाग्र्याद्रिभवनंयथाभ्युदितभास्करं॥ २२॥ तस्यायसंवर्मवरंवररत्नविभूषितं॥ ताराव्याप्तस्यनभसःशारदस्यसमत्विषं॥ २३॥ सतोमरव्यग्रकरश्चारुमौलिःस्वलंकृतः॥ शरन्मध्यंदिनार्काभस्तेजसाव्यदहद्रिपून्॥ २४॥ तंदृष्ट्वाद्विरदंदूरात्क्षेमधूर्तिर्द्विपस्थितः॥ आह्वयन्नभिदुद्रावप्रमनाःप्रमनस्तरं॥ २५॥ तयोःसमभवद्युद्धंद्विपयोरुग्ररूपयोः॥ यदृच्छयाद्रुमवतोर्महापर्वतयोरिव॥ २६॥ संसक्तनागौतौवीरौतोमरैरितरेतरं॥ बलवत्सूर्यरश्म्याभैर्भित्वान्योन्यंविनेदतुः॥ २७॥

उदयाग्र्याद्रिभवनमितिपाठेउदयाचलस्याग्र्येशृंगेअत्रेरर्कभूतस्यभवनं॥ २२॥ शारदस्यशरदापलक्षितस्य॥ २३॥ चारुमौलिःरम्यकिरीटः॥ [illegible]॥ द्विपस्थितोद्विपारूढः प्रमनाःप्रकृष्टमनाः प्रमनस्तरंप्रसन्नतरमनसं॥ २५॥ २६॥ २७॥

॥२८॥२९॥३०॥ विनेदतुःसन्निर्ह्लादौबभूवतुःववर्षतुरित्यर्थः॥३१॥अपरैःतोमरैरेव॥३२॥सभीमसेनःमेघैःसमससम्निरिवांशुमान् यथामेघांतर्हितस्यसूर्यस्यमरीचयःरश्मिरूपेणसर्वतःप्रचरंति एवंरश्मिस्थानीयास्तोमराः॥३३॥अंजोगतिऋजुगतिं॥३४॥३५॥३६॥गृह्यमाणः निगृह्यमाणः क्षेमधूर्त्तिना॥३७॥३८॥३९॥आमित्रंशत्रुसंबंधिनं सामित्रमितिपाठांतरं॥४०॥४१॥४२॥४३॥अहनन्हतवान् हतःगद

व्यपसृत्यतुनागाभ्यांमंडलानिविचेरतुः॥ प्रगृह्यचोभौधनुषीजघ्नतुर्वैपरस्परं॥२८॥ क्ष्वेडितास्फोटितरवैर्बाणशब्दैस्तुसर्वतः॥ तौजनंहर्षयंतौचसिंहनादंप्रचक्रतुः॥ २९ ॥ समुद्यतकराभ्यांतौद्विपाभ्यांकृतिनावुभौ ॥ वातोद्धूतपताकाभ्यांयुयुधातेमहाबलौ॥ ३० ॥ तावन्योन्यस्यधनुषीछित्वान्योन्यंविनेदतुः॥ शक्तितोमरवर्षेणप्रावृण्मेघाविवांबुभिः॥ ३१॥ क्षेमधूर्त्तिस्तदाभीमंतोमरेणस्तनांतरे॥ निर्बिभेदातिवेगेनषड्भिश्चाप्यपरैर्नदन्॥३२॥ सभीमसेनःशुशुभेतोमरैरंगमाश्रितैः॥ क्रोधदीप्तवपुर्मेघैःसप्तसप्तिरिवांशुमान्॥ ३३ ॥ ततोभास्करवर्णाभमंजोगतिमयस्मयं॥ ससर्जतोमरंभीमःप्रत्यमित्राययत्नवान्॥ ३४ ॥ ततःकुलूताधिपतिश्चापमानम्यसायकैः ॥ दशभिस्तोमरंभित्वाषष्ट्याविव्याधपांडवं॥ ३५ ॥अथकार्मुकमादायभीमोजलदनिःस्वनं॥ रिपोरभ्यर्दयन्नागमुन्नदन्पांडवःशरैः॥ ३६॥सशरौघार्दितोनागोभीमसेनेनसंयुगे ॥ गृह्यमाणोपिनातिष्ठद्वातोद्धूतइवांबुदः॥ ३७॥ तमभ्यधावद्द्विरदंभीमोभीमस्यनागराट्॥ महावातेरितंमेघंवातोद्धूतइवांबुदः॥ ३८॥ सन्निवार्यात्मनोनागंक्षेमधूर्त्तिःप्रतापवान्॥ विव्याधाभिद्रुतंबाणैर्भीमसेनस्यकुंजरं॥ ३९॥ ततःसाधुविसृष्टेनक्षुरेणानतपर्वणा॥ छित्वाशरासनंशत्रोर्नागमामित्रमार्दयत्॥४०॥ ततःक्रुद्धोरणेभीमंक्षेमधूर्त्तिःपराभिनत्॥ जघानचास्यद्विरदंनाराचैःसर्वमर्मसु॥ ४१॥सपपातमहानागोभीमसेनस्यभारत॥ पुरानागस्यपतनादवप्लुत्यस्थितोमहीं॥४२॥ तस्यभीमोपिद्विरदंगदयासमपोथयत्॥ तस्मात्प्रमथितान्नागात्क्षेमधूर्त्तिमवप्लुतं॥ ४३॥ उद्यतायुधमायांतंगदयाहनद्वृकोदरः॥ सपपातहतःसासिर्व्यसुस्तमभितोद्विपं॥४४॥ वज्रप्रभग्नमचलंसिंहोवज्रहतोयथा॥ तंहतंनृपतिंदृष्ट्वाकुलूतानांयशस्करं॥ प्राद्रवद्व्यथितासेनात्वदीयाभरतर्षभ॥४५॥ इतिश्रीमहाभारतेकर्णप० क्षेमधूर्त्तिवधेद्वादशोऽध्यायः॥१२॥

संजयउवाच ततःकर्णोमहेष्वासःपांडवानामनीकिनीं॥ जघानसमरेशूरःशरैःसन्नतपर्वभिः॥ १॥ तथैवपांडवाराजंस्तवपुत्रस्यवाहिनीं॥ कर्णस्यप्रमुखेक्रुद्धानिजघ्नुस्तेमहारथाः॥ २॥ कर्णोपिराजन्समरेव्यहनत्पांडवींचमूं॥ नाराचैरर्करश्म्याभैःकर्मारपरिमार्जितैः॥ ३॥

यासकलीकृतः अतएवअभितोद्विपंद्विपस्याभितःपपात॥४४॥४५॥ इतिकर्णपर्वणिनैल० भारतभा० द्वादशोऽध्यायः॥१२॥ ॥१॥ ॥२॥ ततइति॥१॥२॥३॥

तत्रभारतकर्णेननाराचैस्ताडितागजाः॥ नेदुःसेदुश्चमम्लुश्चवभ्रमुश्चदिशोदश ॥ ४ ॥ वध्यमानेवलेतस्मिन्सूतपुत्रेणमारिष ॥ नकुलोभ्यद्रवत्तूर्णंसूतपुत्रंम हारणे ॥ ५ ॥ भीमसेनस्तथाद्रौणिंकुर्वाणंकर्मदुष्करं ॥ विंदानुविंदौकैकेयौसात्यकिःसमवारयत् ॥ ६ ॥ श्रुतकर्माणमायांतंचित्रसेनोमहीपतिः ॥ प्रतिविंध्य स्तथाचित्रंचित्रकेतनकार्मुकं ॥ ७ ॥ दुर्योधनस्तुराजानंधर्मपुत्रंयुधिष्ठिरं ॥ संशप्तकगणान्क्रुद्धोह्यभ्यधावद्धनंजयः ॥ ८ ॥ धृष्टद्युम्नःकृपेणाथतस्मिन्वीरवरक्ष ये ॥ शिखंडीकृतवर्माणंसमासादयदच्युतं ॥ ९ ॥ श्रुतकीर्तिस्तथाशल्यंमाद्रीपुत्रःसुतंतव ॥ दुःशासनंमहाराजसहदेवःप्रतापवान् ॥ १० ॥ कैकेयौसात्यकिंयु द्धेशरवर्षेणभास्वता ॥ सात्यकिःकैकेयौचापिच्छादयामासभारत ॥ ११ ॥ तावेनंभ्रातरौवीरौजघ्नतुर्हृदयेभृशं ॥ विषाणाभ्यांयथानागौप्रतिनागंमहावने ॥ १२ ॥ शरसंभिन्नवर्माणौतावुभौभ्रातरौरणे ॥ सात्यकिंसत्यकर्माणंराजन्विव्यधतुःशरैः ॥ १३ ॥ तौसात्यकिर्महाराजप्रहसन्सर्वतोदिशः ॥ छादयंश्छरव र्षेणवारयामासभारत ॥ १४ ॥ वार्यमाणौततस्तौहिशैनेयशरवृष्टिभिः ॥ शैनेयस्यरथंतूर्णंछादयामासतुःशरैः ॥ १५ ॥ तयोस्तुधनुषीचित्रेछित्वाशौरिर्महा यशाः ॥ अथतौसायकैस्तीक्ष्णैर्वारयामाससंयुगे ॥ १६ ॥ अथान्येधनुषीचित्रेप्रगृह्यचमहाशरान् ॥ सात्यकिंछादयंतौतौचेरतुर्लघुसुष्ठुच ॥ १७ ॥ ताभ्यांमु क्तामहाबाणाःकंकबर्हिणवाससः ॥ द्योतयंतोदिशःसर्वाःसंपेतुःस्वर्णभूषणाः ॥ १८ ॥ बाणांधकारमभवत्तयोराजन्महामृधे ॥ अन्योन्यस्यधनुश्चैवचिच्छिदुस्ते महारथाः ॥ १९ ॥ ततःक्रुद्धोमहाराजसात्वतोयुद्धदुर्मदः ॥ धनुरन्यत्समादायसज्यंकृत्वाचसंयुगे ॥ २० ॥ क्षुरप्रेणसुतीक्ष्णेनअनुविंदशिरोऽहरत् ॥ अपतत्त च्छिरोराजन्कुंडलोपचितंमहत् ॥ ॥ २१ ॥ शंवरस्यशिरोयद्वन्निहतस्यमहारणे ॥ शोचयन्केकयान्सर्वान्जगामाशुवसुंधरां ॥ २२ ॥ तंदृष्ट्वानिहतंशूरंभ्राता तस्यमहारथः ॥ सज्यमन्यद्धनुःकृत्वाशैनेयंपर्यवारयत् ॥ २३ ॥ सषष्ट्यासात्यकिंविध्वास्वर्णपुंखैःशिलाशितैः ॥ ननादबलवान्नादंतिष्ठतिष्ठेतिचाब्रवीत् ॥ २४ सात्यकिंचततस्तूर्णंकेकयानांमहारथः ॥ शरैरनेकसाहस्रैर्बाह्वोरुरसिचार्पयत् ॥ २५ ॥ सशरैःक्षतसर्वांगःसात्यकिःसत्यविक्रमः ॥ रराजसमरेराजन्सपुष्पइ वकिंशुकः ॥ २६ ॥ सात्यकिःसमरेविद्धःकैकेयेनमहात्मना ॥ कैकेयंपंचविंशत्याविव्याधप्रहसन्निव ॥ २७ ॥ तावन्योन्यस्यसमरेसंछिद्यधनुषीशुभे ॥ हत्वा चसारथीतूर्णंहयांश्चरथिनांवरौ ॥ २८ ॥

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ अपहस्तेनतिर्यक्हस्तेन ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ इतिकर्णप० नैलं० भारतभा० त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ७ ॥ श्रुतकर्मेति ॥ १ ॥ अभि

विरथाववसियुद्धायसमाजग्मतुराहवे ॥ शतचंद्रचितेगृह्यचर्मणीसुभुजौतथा ॥ २९ ॥ विरोचेतांमहारंगेनिस्त्रिंशवरधारिणौ ॥ यथादेवासुरेयुद्धेजंभशक्रौमहाबलौ ॥ ३० ॥ मंडलानिततस्तौतुविचरंतौमहारणे ॥ अन्योन्यमभितस्तूर्णंसमाजग्मतुराहवे ॥ ३१ ॥ अन्योन्यस्यवधेचैवचक्रतुर्यत्नमुत्तमं ॥ कैकेयस्यद्विधाचर्मततश्चिच्छेदसात्वतः ॥ ३२ ॥ सात्यकेस्तुतथैवासौचर्मचिच्छेदपार्थिवः ॥ चर्मच्छित्वातुकैकेयस्तारागणशतैर्वृतं ॥ ३३ ॥ चचारमंडलान्येवगतप्रत्यागतानिच ॥ तंचरंतंमहारंगेनिस्त्रिंशवरधारिणं ॥ ३४ ॥ अपहस्तेनचिच्छेदशैनेयस्त्वरयान्वितः ॥ सवर्माकेकयोराजन्द्विधाछिन्नोमहारणे ॥ ३५ ॥ निपपातमहेष्वासोवज्राहतइवाचलः ॥ तंनिहत्यरणेशूरःशैनेयोरथसत्तमः ॥ ३६ ॥ युधामन्युरथंतूर्णमारुरोहपरंतपः ॥ ततोन्यंरथमास्थायविधिवत्कल्पितंपुनः ॥ ३७ ॥ केकयानांमहत्सैन्यंव्यधमत्सात्यकिःशरैः ॥ सावध्यमानासमरेकेकयानांमहाचमूः ॥ तमुत्सृज्यरणेशत्रुंप्रदुद्रावदिशोदश ॥ ३८ ॥ इतिश्रीमहाभारतेकर्णप० विंदानुविंदवधेत्रयोदशोध्यायः ॥ १३ ॥

॥ ७ ॥ संजयउवाच श्रुतकर्माततोराजंश्चित्रसेनंमहीपतिं ॥ आजघ्नेसमरेक्रुद्धःपंचाशद्भिःशिलीमुखैः ॥ १ ॥ अभिसारस्तुतंराजन्नवभिर्नतपर्वभिः ॥ श्रुतकर्माणमाहत्यसूतंविव्याधपंचभिः ॥ २ ॥ श्रुतकर्माततःक्रुद्धश्चित्रसेनंचमूमुखे ॥ नाराचेनसुतीक्ष्णेनममदेशेसमार्पयत् ॥ ३ ॥ सोतिविद्धोमहाराजनाराचेनमहात्मना ॥ मूर्छामभिययौवीरःकश्मलंचाविवेशह ॥ ४ ॥ एतस्मिन्नंतरेचैनंश्रुतकीर्तिर्महायशाः ॥ नवत्याजगतीपालंछादयामासपत्रिभिः ॥ ५ ॥ प्रतिलभ्यततःसंज्ञांचित्रसेनोमहारथः ॥ धनुश्चिच्छेदभल्लेनतंचविव्याधसप्तभिः ॥ ६ ॥ सोन्यत्कार्मुकमादायवेगघ्नंरुक्मभूषितं ॥ चित्ररूपधरंचक्रेचित्रसेनंशरोर्मिभिः ॥ ७ ॥ सशरैश्चित्रितोराजाचित्रमाल्यधरोयुवा ॥ युवेवसमरेऽशोभद्गोष्ठीमध्येस्वलंकृतः ॥ ८ ॥ श्रुतकर्माणमथवैनाराचेनस्तनांतरे ॥ बिभेदतरसाशूरस्तिष्ठतिष्ठेतिचाब्रवीत् ॥ ९ ॥ श्रुतकर्मापिसमरेनाराचेनसमर्पितः ॥ सुस्रावरुधिरंतत्रगैरिकार्द्रइवाचलः ॥ १० ॥ ततःसरुधिराक्तांगोरुधिरेणकृतच्छविः ॥ रराजसमरेवीरःसपुष्पइवकिंशुकः ॥ ११ ॥ श्रुतकर्माततोराजन्शत्रुणासमभिद्रुतः ॥ शत्रुसंवारणंक्रुद्धोद्विधाचिच्छेदकार्मुकं ॥ १२ ॥

सारोभिसाराधिपतिश्चित्रसेनः आहत्यसंताड्य ॥ २ ॥ ३ ॥ मूर्छांअर्धनिद्रां कश्मलंअचित्तत्वं ॥ ४ ॥ एनं श्रुतकर्माणं ॥ ५ ॥ तंश्रुतकर्माणं ॥ ६ ॥ ७ ॥ सशरैरिति गोष्ठीगोयूथपःसोडोमहोक्षः सयथाशृंगादौअलंकृतएवंसशरैरलंकृतइत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ कृतच्छविः आहितशोभः ॥ ११ ॥ १२ ॥

॥ ४ ॥ ५ ॥ द्रौणिमभ्यद्रवत् ॥ ६ ॥ ७ ॥ ८ ॥ कृपेणयुयुधेइतिशेषः ॥ ९ ॥ माद्रीपुत्रःसुतंतवेत्यस्यव्याख्यादुःशासनमिति ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ लघु शीघ्रं सुष्ठु

तत्रभारतकर्णेननाराचैस्ताडितागजाः॥ नेदुःसेदुश्चमम्लुश्चबभ्रमुश्चदिशोदश ॥ ४ ॥ वध्यमानेबलेतस्मिन्सूतपुत्रेणमारिष ॥ नकुलोभ्यद्रवत्तूर्णंसूतपुत्रंमहारणे ॥ ५ ॥ भीमसेनस्तथाद्रौणिंकुर्वाणंकर्मदुष्करं ॥ विंदानुविंदौकैकेयौसात्यकिःसमवारयत् ॥ ६ ॥ श्रुतकर्माणमायांतंचित्रसेनोमहीपतिः ॥ प्रतिविंध्यस्तथाचित्रंचित्रकेतनकार्मुकं ॥ ७ ॥ दुर्योधनस्तुराजानंधर्मपुत्रंयुधिष्ठिरं ॥ संशप्तकगणान्क्रुद्धोअभ्यधावद्धनंजयः ॥ ८ ॥ धृष्टद्युम्नःकृपेणाथतस्मिन्वीरवरक्षये ॥ शिखंडीकृतवर्माणंसमासादयदच्युतं ॥ ९ ॥ श्रुतकीर्त्तिस्तथाशल्यंमाद्रीपुत्रःसुतंतव ॥ दुःशासनंमहाराजसहदेवःप्रतापवान् ॥ १० ॥ कैकेयौसात्यकिंयुद्धेशरवर्षेणभास्वता ॥ सात्यकिःकैकेयौचापिच्छादयामासभारत ॥ ११ ॥ तावेनंभ्रातरौवीरौजघ्नतुर्हृदयेभृशं ॥ विषाणाभ्यांयथानागौप्रतिनागंमहावने ॥ १२ ॥ शरसंभिन्नवर्माणौतावुभौभ्रातरौरणे ॥ सात्यकिंसत्यकर्माणंराजन्विव्यधतुःशरैः ॥ १३ ॥ तौसात्यकिर्महाराजप्रहसन्सर्वतोदिशः ॥ छादयंच्छरवर्षेणवारयामासभारत ॥ १४ ॥ वार्यमाणौततस्तौहिशैनेयशरवृष्टिभिः ॥ शैनेयस्यरथंतूर्णंछादयामासतुःशरैः ॥ १५ ॥ तयोस्तुधनुषीचित्रेछित्वाशौरिर्महायशाः ॥ अथतौसायकैस्तीक्ष्णैर्वारयामाससंयुगे ॥ १६ ॥ अथान्येधनुषीचित्रेप्रगृह्यचमहाशरान् ॥ सात्यकिंछादयंतौतौचेरतुर्लघुसुष्ठुच ॥ १७ ॥ ताभ्यांमुक्तामहाबाणाःकंकबर्हिणवाससः ॥ द्योतयंतोदिशःसर्वाःसंपेतुःस्वर्णभूषणाः ॥ १८ ॥ बाणांधकारमभवत्तयोराजन्महामृधे ॥ अन्योन्यस्यधनुश्चैवचिच्छिदुस्तेमहारथाः ॥ १९ ॥ ततःक्रुद्धोमहाराजसात्वतोयुद्धदुर्मदः ॥ धनुरन्यत्समादायसज्यंकृत्वाचसंयुगे ॥ २० ॥ क्षुरप्रेणसुतीक्ष्णेनअनुविंदशिरोऽहरत् ॥ अपतत्तच्छिरोराजन्कुंडलोपचितंमहत् ॥ ॥ २१ ॥ शंबरस्यशिरोयद्वन्निहतस्यमहारणे ॥ शोचयन्केकयान्सर्वान्जगामाशुवसुंधरां ॥ २२ ॥ तंदृष्ट्वानिहतंशूरंभ्रातातस्यमहारथः ॥ सज्यमन्यद्धनुःकृत्वाशैनेयंपर्यवारयत् ॥ २३ ॥ सषष्ट्यासात्यकिंविध्वास्वर्णपुंखैःशिलाशितैः ॥ ननादबलवान्नादंतिष्ठतिष्ठेतिचाब्रवीत् ॥ २४ ॥ सात्यकिंचततस्तूर्णंकेकयानांमहारथः ॥ शरैरनेकसाहस्रैर्बाह्वोरुरसिचार्पयत् ॥ २५ ॥ सशरैःक्षतसर्वांगःसात्यकिःसत्यविक्रमः ॥ रराजसमरेराजन्सपुष्पइवकिंशुकः ॥ २६ ॥ सात्यकिःसमरेविद्धःकैकेयेनमहात्मना ॥ कैकेयंपंचविंशत्याविव्याधप्रहसन्निव ॥ २७ ॥ तावन्योन्यस्यसमरेसंछिद्यधनुषीशुभे ॥ हत्वाचसारथीतूर्णंहयांश्चरथिनांवरौ ॥ २८ ॥

शोभनं ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ उपचितमलंकृतं ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ अपहस्तेनतिर्यक्हस्तेन ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ इतिकर्णप० नैलं० भारतभा० त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ७ ॥ श्रुतकर्मेति ॥ १ ॥ अभि

विरथावसियुद्धायसमाजग्मतुराहवे ॥ शतचंद्रचितेगृह्यचर्मणीसुभुजौतथा ॥ २९ ॥ विरोचेतांमहारंगेनिस्त्रिंशवरधारिणौ ॥ यथादेवासुरेयुद्धेजंभशक्रौम
हाबलौ ॥ ३० ॥ मंडलानिततस्तौतुविचरंतौमहारणे ॥ अन्योन्यमभितस्तूर्णंसमाजग्मतुराहवे ॥ ३१ ॥ अन्योन्यस्यवधेचैवचक्रतुर्यत्नमुत्तमं ॥ कैकेयस्यद्वि
धाचर्मततश्चिच्छेदसात्वतः ॥ ३२ ॥ सात्यकेस्तुतथैवासौचर्मचिच्छेदपार्थिवः ॥ चर्मच्छित्वातुकैकेयस्तारागणशतैर्वृतं ॥ ३३ ॥ चचारमंडलान्येवगतप्रत्या
गतानिच ॥ तंचरंतंमहारंगेनिस्त्रिंशवरधारिणं ॥ ३४ ॥ अपहस्तेनचिच्छेदशैनेयस्त्वरयान्वितः ॥ सवर्माकेकयोराजन्द्विधाछिन्नोमहारणे ॥ ३५ ॥ निपपात
महेष्वासोवज्राहतइवाचलः ॥ तंनिहत्यरणेशूरःशैनेयोरथसत्तमः ॥ ३६ ॥ युधामन्युरथंतूर्णमारुरोहपरंतपः ॥ ततोन्यंरथमास्थायविधिवत्कल्पितंपुनः ॥ ३७ ॥
केकयानांमहत्सैन्यंव्यधमत्सात्यकिःशरैः ॥ सावध्यमानासमरेकेकयानांमहाचमूः ॥ तमुत्सृज्यरणेशत्रुंप्रदुद्रावदिशोदश ॥ ३८ ॥ इतिश्रीमहाभारतेकर्णप०
विंदानुविंदवधेत्रयोदशोध्यायः ॥ १३ ॥ ॥ ७ ॥ संजयउवाच श्रुतकर्माततोराजंश्चित्रसेनंमहीपतिं ॥ आजघ्नेसमरेक्रुद्धःपंचाशद्भिःशिलीमुखैः
॥ १ ॥ अभिसारस्तुतंराजन्नवभिर्नतपर्वभिः ॥ श्रुतकर्माणमाहत्यसूतंविव्याधपंचभिः ॥ २ ॥ श्रुतकर्माततःक्रुद्धश्चित्रसेनंचमूमुखे ॥ नाराचेनसुतीक्ष्णेनम
र्मदेशेसमार्पयत् ॥ ३ ॥ सोतिविद्धोमहाराजनाराचेनमहात्मना ॥ मूर्छामभिययौवीरःकश्मलंचाविवेशह ॥ ४ ॥ एतस्मिन्नंतरेचैनंश्रुतकीर्तिर्महायशाः ॥
नवत्याजगतीपालंछादयामासपत्रिभिः ॥ ५ ॥ प्रतिलभ्यततःसंज्ञांचित्रसेनोमहारथः ॥ धनुश्चिच्छेदभल्लेनतंचविव्याधसप्तभिः ॥ ६ ॥ सोन्यत्कार्मुकमादा
यवेगघ्नंरुक्मभूषितं ॥ चित्ररूपधरंचक्रेचित्रसेनंशरोर्मिभिः ॥ ७ ॥ सशरैश्चित्रितोराजाचित्रमाल्यधरोयुवा ॥ युवेवसमरेऽशोभद्गोष्ठीमध्येस्वलंकृतः ॥ ८ ॥ श्रु
तकर्माणमथबाणेनाराचेनस्तनांतरे ॥ बिभेदतरसाशूरस्तिष्ठतिष्ठेतिचाब्रवीत् ॥ ९ ॥ श्रुतकर्मापिसमरेनाराचेनसमर्पितः ॥ सुस्रावरुधिरंतत्रगैरिकार्द्रइवाचलः
॥ १० ॥ ततःसरुधिराक्तांगोरुधिरेणकृतच्छविः ॥ रराजसमरेवीरःसपुष्पइवकिंशुकः ॥ ११ ॥ श्रुतकर्माततोराजन्शत्रुणासमभिद्रुतः ॥ शत्रुसंवारणंक्रुद्धो
द्विधाचिच्छेदकार्मुकं ॥ १२ ॥

सारोभिसाराधिपतिश्चित्रसेनः आहत्यसंताड्य ॥ २ ॥ ३ ॥ मूर्छाअर्धनिद्रां कश्मलंअचित्तत्वं ॥ ४ ॥ एनं श्रुतकर्माणं ॥ ५ ॥ तंश्रुतकर्माणं ॥ ६ ॥ ७ ॥ सशरैरिति गोष्ठीगोयूथपःसांडोमहोक्षः सयथाश्मादीअलंकृतएवंसशरैरलंकृतइत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ कृतच्छविः आहितशोभः ॥ ११ ॥ १२ ॥

[illegible] ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ मेतराट् यमः ॥ १७ ॥ दावोदावाग्निस्तेन दग्धाः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ स्वर्णघंटांसुवर्णमयघंटान्वितां ॥ २३ ॥

अथैनंछिन्नधन्वानंनाराचानांशतैस्त्रिभिः ॥ छादयन्समरेराजन्विव्याधचसुपत्रिभिः ॥ १३ ॥ ततोपरेणभल्लेनतीक्ष्णेननिशितेनच ॥ जहारसशिरस्त्राणं शिरस्तस्यमहात्मनः ॥ १४ ॥ तच्छिरोन्यपतद्भूमौचित्रसेनस्यदीप्तिमत् ॥ यदृच्छयायथाचंद्रश्च्युतःस्वर्गान्महीतलं ॥ १५ ॥ राजानंनिहतंदृष्ट्वातेऽभिसारंतुमारिष ॥ अभ्यद्रवंतवेगेनचित्रसेनस्यसैनिकाः ॥ १६ ॥ ततःक्रुद्धोमहेष्वासस्तत्सैन्यंप्राद्रवच्छरैः ॥ अंतकालेयथाक्रुद्धःसर्वभूतानिप्रेतराट् ॥ १७ ॥ तेवध्यमानाःसमरेतवपौत्रेणधन्विना ॥ व्यद्रवंतदिशस्तूर्णंदावदग्धाइवद्विपाः ॥ १८ ॥ तांस्तुविद्रवतोदृष्ट्वानिरुत्साहान्द्विपज्जये ॥ द्रावयन्निषुभिस्तीक्ष्णैःश्रुतकर्माव्यरोचत ॥ १९ ॥ प्रतिविंध्यस्ततश्चित्रंभित्वापंचभिराशुगैः ॥ सारथिंचत्रिभिर्विध्वाध्वजमेकेषुणापिच ॥ २० ॥ तंचित्रोनवभिर्भल्लैर्बाह्वोरुरसिचार्पयत् ॥ स्वर्णपुंखैःप्रसन्नाग्रैःकंकबर्हिणवाजितैः ॥ २१ ॥ प्रतिविंध्योधनुश्छित्वातस्यभारतसायकैः ॥ पंचभिर्निशितैर्बाणैरथैनंसहिजघ्निवान् ॥ २२ ॥ ततःशक्तिंमहाराजस्वर्णघंटांदुरासदां ॥ प्राहिणोत्तवपौत्रायघोरामग्निशिखामिव ॥ २३ ॥ तामापतंतींसहसामहोल्काप्रतिमांतदा ॥ द्विधाचिच्छेदसमरेप्रतिविंध्योहसन्निव ॥ २४ ॥ सापपातद्विधाछिन्नाप्रतिविंध्यशरैःशितैः ॥ युगांतेसर्वभूतानित्रासयंतीयथाऽशनिः ॥ २५ ॥ शक्तिंतांप्रहतांदृष्ट्वाचित्रोगृह्यमहागदां ॥ प्रतिविंध्यायचिक्षेपरुक्मजालविभूषितां ॥ २६ ॥ साजघानहयांस्तस्यसारथिंचमहारणे ॥ रथंप्रमृद्यवेगेनधरणीमन्वपद्यत ॥ २७ ॥ एतस्मिन्नेवकालेतुरथादाप्लुत्यभारत ॥ शक्तिंचिक्षेपचित्रायस्वर्णदंडामलंकृतां ॥ २८ ॥ तामापतंतींजग्राहचित्रोराजन्महामनाः ॥ ततस्तामेवचिक्षेपप्रतिविंध्यायपार्थिवः ॥ २९ ॥ समासाद्यरणेशूरंप्रतिविंध्यंमहाप्रभा ॥ निर्भिद्यदक्षिणंबाहुंनिपपातमहीतले ॥ पतिताभासयच्चैवतंदेशमशनिर्यथा ॥ ३० ॥ प्रतिविंध्यस्ततोराजंस्तोमरंहेमभूषितं ॥ प्रेषयामाससंक्रुद्धश्चित्रस्यवधकांक्षया ॥ ३१ ॥ सतस्यगात्रावरणंभित्वाहृदयमेवच ॥ जगामधरणींतूर्णंमहोरगइवाशयं ॥ ३२ ॥ सपपाततदाराजातोमरेणसमाहतः ॥ प्रसार्यविपुलौबाहूपीनौपरिघसन्निभौ ॥ ३३ ॥ चित्रंसंप्रेक्ष्यनिहतंतावकारणशोभिनः ॥ अभ्यद्रवंतवेगेनप्रतिविंध्यंसमंततः ॥ ३४ ॥ सृजंतोविविधान्बाणान्शतघ्नीश्चसकिंकिणीः ॥ तमवच्छादयामासुःसूर्यमभ्रगणाइव ॥ ३५ ॥ तान्विधम्यमहाबाहुःशरजालेनसंयुगे ॥ व्यद्रावयत्तवचमूंवज्रहस्तइवासुरीं ॥ ३६ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ गात्रावरणंकवचं ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ इतिकर्णप० नैल० भारतभा० चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ७ ॥ भीमेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ खड्गःगंडकः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

तेवध्यमानाःसमरेतावकाःपांडवैर्नृप ॥ विप्रकीर्यंतसहसावातनुन्नाघनाइव ॥ ३७ ॥ विप्रद्रुतेबलेतस्मिन्वध्यमानेसमंततः ॥ द्रौणिरेकोभ्ययात्तूर्णंभीमसेनंमहाबलं ॥ ३८ ॥ ततःसमागमोघोरोबभूवसहसातयोः ॥ यथादेवासुरेयुद्धेवृत्रवासवयोरिव ॥ ३९ ॥ इतिश्रीमहाभारतेकर्णप० चित्रवधेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ७ ॥ संजयउवाच भीमसेनंततोद्रौणीराजन्विव्याधपत्रिणा ॥ परयात्वरयायुक्तोदर्शयन्नस्त्रलाघवं ॥ १ ॥ अथैनंपुनराजघ्नेनवत्यानिशितैःशरैः ॥ सर्वमर्माणिसंप्रेक्ष्यमर्मज्ञोलघुहस्तवत् ॥ २ ॥ भीमसेनःसमाकीर्णोद्रौणिनानिशितैःशरैः ॥ रराजसमरेराजन्रश्मिवानिवभास्करः ॥ ३ ॥ ततःशरसहस्रेणसुप्रयुक्तेनपांडवः ॥ द्रोणपुत्रमवच्छाद्यसिंहनादममुंचत ॥ ४ ॥ शरैःशरांस्ततोद्रौणिःसंवार्ययुधिपांडवं ॥ ललाटेभ्याहनद्राजन्नाराचेनस्मयन्निव ॥ ५ ॥ ललाटस्थंततोबाणंधारयामासपांडवः ॥ यथाशृंगंवनेदृप्तःखड्गोधारयतेनृप ॥ ६ ॥ ततोद्रौणिंरणेभीमोयतमानंपराक्रमी ॥ त्रिभिर्विव्याधनाराचैर्ललाटेविस्मयन्निव ॥ ७ ॥ ललाटस्थैस्ततोबाणैर्ब्राह्मणोसौव्यशोभत ॥ प्रावृषीवयथासिक्तस्त्रिशृंगःपर्वतोत्तमः ॥ ८ ॥ ततःशरशतैर्द्रौणिरर्दयामासपांडवं ॥ नचैनंकंपयामाससमातरिश्वेवपर्वतं ॥ ९ ॥ तथैवपांडवोयुद्धेद्रौणिंशरशतैःशितैः ॥ नाकंपयतसंहृष्टोवार्योघइवपर्वतं ॥ १० ॥ तावन्योन्यंशरैर्घोरैश्छादयानौमहारथौ ॥ रथवर्यगतौवीरौशुशुभातेबलोत्कटौ ॥ ११ ॥ आदित्याविवसंदीप्तौलोकक्षयकरावुभौ ॥ स्वरश्मिभिरिवान्योन्यंतापयंतौशरोत्तमैः ॥ १२ ॥ ततःप्रतिकृतेयत्नंकुर्वाणौतौमहारणे ॥ कृतप्रतिकृतेयत्तौशरसंघैरभीतवत् ॥ १३ ॥ व्याघ्राविवचसंग्रामेचेरतुस्तौनरोत्तमौ ॥ शरदंष्ट्रौदुराधर्षौचापवक्त्रौभयंकरौ ॥ १४ ॥ अभूतांतावदृश्यौचशरजालैःसमंततः ॥ मेघजालैरिवच्छन्नौगगनेचंद्रभास्करौ ॥ १५ ॥ चकाशेतेमुहूर्त्तेनततस्तावप्यरिंदमौ ॥ विमुक्तावभ्रजालेनअंगारकबुधाविव ॥ १६ ॥ अथतत्रैवसंग्रामेवर्त्तमानेसुदारुणे ॥ अपसव्यंततश्चक्रेद्रौणिस्तत्रवृकोदरं ॥ १७ ॥ किरञ्छरशतैरुग्रैर्धाराभिरिवपर्वतं ॥ नतुतन्ममृषेभीमःशत्रोर्विजयलक्षणं ॥ १८ ॥ प्रतिचक्रेततोराजन्पांडवोप्यपसव्यतः ॥ मंडलानांविभागेषुगतप्रत्यागतेषुच ॥ १९ ॥ बभूवतुमुलंयुद्धंतयोःपुरुषसिंहयोः ॥ चरित्वाविविधान्मार्गान्मंडलस्थानमेवच ॥ २० ॥ शरैःपूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ अन्योन्यस्यवधेचैवचक्रतुर्यत्नमुत्तमं ॥ २१ ॥ ईषतुर्विरथंचैवकर्तुमन्योन्यमाहवे ॥ ततोद्रौणिर्महास्त्राणिप्रादुश्चक्रेमहारथः ॥ २२ ॥

कृतप्रतिकृतेअन्योन्याघातप्रतीघाते ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ईषतुःइच्छांचक्रतुः ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ उल्कानांअन्योन्याभिमुखंपातास्तैःसदृतमिवेतिलुप्तोपमा ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ तथैवदशनच्छदौक्रोधात्संदष्टौ

तान्यस्त्रैरेवसमरेप्रतिजघ्नेयपांडवः॥ ततोघोरंमहाराजअस्त्रयुद्धमवर्त्तत ॥ २३॥ ग्रहयुद्धंयथाघोरंप्रजासंहरणेत्यभूत् ॥ तेबाणाःसमसज्जंतमुक्तास्ताभ्यांतुभार त॥ २४ ॥ द्योतयंतोदिशःसर्वास्तवसैन्यंसमंततः॥बाणसंघैर्वृतंघोरमाकाशंसमपद्यत ॥ २५॥ उल्कापातावृतंयुद्धंप्रजानांसंक्षयेनृप॥ बाणाभिघातात्संजज्ञेत त्रभारतपावकः ॥ २६॥ संविस्फुलिंगोदीप्तार्चिर्योऽदहद्वाहिनीद्वयं ॥ तत्रसिद्धामहाराजसंपतंतोब्रुवन्वचः॥ २७॥ युद्धानामतिसर्वेषांयुद्धमेतदितिप्रभो ॥ सर्व युद्धानिचैतस्यकलांनार्हंतिषोडशीं ॥ २८ ॥ नेदृशंचपुनर्युद्धंभविष्यतिकदाचन ॥ अहोज्ञानेनसंपन्नावुभौब्राह्मणक्षत्रियौ ॥ २९ ॥ अहोशौर्येणसंपन्नावुभौ चोग्रपराक्रमौ ॥ अहोभीमबलोभीमएतस्यचकृतास्त्रता ॥ ३० ॥ अहोवीर्यस्यसारत्वमहोसौष्ठवमेतयोः ॥ स्थितावेतौहिसमरेकालांतकयमोपमौ ॥ ३१ ॥ रु- द्रौद्वाविवसंभूतौयथाद्वाविवभास्करौ ॥ यमौवांपुरुषव्याघ्रौघोररूपावुभौरणे ॥ ३२॥ इतिवाचःस्मश्रूयंतेसिद्धानांवैमुहुर्मुहुः॥ सिंहनादश्चसंजज्ञेसमेतानांदि वौकसां ॥ ३३ ॥ अद्भुतंचाप्यचिंत्यंचदृष्ट्वाकर्मतयोरणे ॥ सिद्धचारणसंघानांविस्मयःसमपद्यत ॥ ३४ ॥ प्रशंसंतितदादेवाःसिद्धाश्चपरमर्षयः ॥ साधुद्रौणे महाबाहोसाधुभीमेतिचाब्रुवन् ॥ ३५ ॥ तौशूरौसमरेराजन्परस्परकृतागसौ ॥ परस्परमुदीक्षेतांक्रोधादुद्वृत्यचक्षुषी ॥ ३६ ॥ क्रोधरक्तेक्षणौतौतुक्रोधात्प्रस्फु रिताधरौ ॥ क्रोधात्संदष्टदशनौतथैवदशनच्छदौ ॥ ३७ ॥ अन्योन्यंछादयंतौस्मंशरवृष्ट्यामहारथौ ॥ शरांबुधारौसमरेशस्त्रविद्युत्प्रकाशिनौ ॥ ३८ ॥ तावन्यो न्यंध्वजंविध्वासारथिंचमहारणे ॥ अन्योन्यस्यहयान्विध्वाबिभिदातेपरस्परं ॥ ३९ ॥ ततःक्रुद्धौमहाराजबाणौगृह्यमहाहवे ॥ उभौचिक्षिपतुस्तूर्णमन्योन्यस्य वधैषिणौ ॥ ४० ॥ तौसायकौमहाराजद्योतमानौचमूमुखे ॥ आजघ्नतुःसमासाद्यवज्रवेगौदुरासदौ ॥ ४१ ॥ तौपरस्परवेगाच्चशराभ्यांचभृशाहतौ ॥ निपेततु र्महावीर्यौरथोपस्थेतयोस्तदा ॥ ४२ ॥ ततस्तुसारथिर्ज्ञात्वाद्रोणपुत्रमचेतनं ॥ अपोवाहरणाद्राजन्सर्वसैन्यस्यपश्यतः ॥ ४३ ॥ तथैवपांडवंराजन्विह्वलंतंमुहु र्मुहुः ॥ अपोवाहरथेनाजौसारथिःशत्रुतापनं ॥ ४४ ॥ इतिश्रीमहाभारतेकर्णप० अश्वत्थामभीमसेनयोर्युद्धेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ धृतराष्ट्र उवाच यथासंशप्तकैःसार्धमर्जुनस्याभवद्रणः ॥ अन्येषांचमहीपानांपांडवैस्तद्ब्रवीहिमे ॥ १ ॥

श्लो ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ तौबाणौभृशाहताविति द्वे तौशराभ्यांअयभागाभ्यांतयोःतदीययोरथयोरुपस्थेमुख्यदेशेरथिनीतियावत् ॥ ४२ ॥ ४३ ॥ ४४ ॥ इतिकर्णप० नैल० भारतभा० पंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ यथेति ॥ १ ॥

॥ १ ॥ २ ॥ ३ ॥ ५ ॥ ६ ॥ ७ ॥ सरत्नान्रत्नांगुलीयकादियुक्तान् सरत्नीनितिपाठेरत्निःकूर्परादाकनिष्ठांतःकरःतत्सहितान्पाणीन् ॥ ८ ॥ ९ ॥ सुसंरब्धाइत्यत्रसुसंमर्दाइतिपाठेशोभनःस्वर्गदःसंमर्दोयेषां तथाभूताः वासितापुष्पवतीगौस्तदर्थं ॥ १० ॥ ११ ॥ १२ ॥ छिन्नेति त्रिवेणुःउभयतःकाष्ठद्वयसहितोधूर्दंडः अक्षश्चक्राधारदंडः ॥ १३ ॥ योक्त्राणिबंधनरज्जवः रश्मयःप्रग्रहाः विवरूथान्गुप्तिरहि

अश्वत्थाम्नस्तुयंयुद्धमर्जुनस्यचसंजय ॥ अन्येषांचमहीपानांपांडवैस्तद्ब्रवीहिमे ॥ २ ॥ संजयउवाच शृणुराजन्यथावृत्तंसंग्रामंब्रुवतोमम ॥ वीराणांशत्रुभिःसार्धंदेहपाप्मासुनाशनं ॥ ३ ॥ पार्थःसंशप्तकबलंप्रविश्यार्णवसन्निभं ॥ व्यक्षोभयदमित्रघ्नोमहावातइवार्णवं ॥ ४ ॥ शिरांस्युन्मथ्यवीराणांशितैर्भल्लैर्धनंजयः ॥ पूर्णचंद्राभवक्त्राणिस्वक्षिभ्रूदशनानिच ॥ ५ ॥ संतस्तारक्षितिंक्षिप्रंविनालैर्नलिनैरिव ॥ सुवृत्तानायतान्पुष्टान्चंदनागुरुभूषितान् ॥ ६ ॥ सायुधान्सतलत्रांश्चपंचास्योरगसन्निभान् ॥ बाहून्क्षुरैरमित्राणांचिच्छेदसमरेर्जुनः ॥ ७ ॥ धुर्यान्धुर्यतरान्सूतान्ध्वजांश्चापानिसायकान् ॥ पाणीन्सरत्नानसकृद्भल्लैश्चिच्छेदपांडवः ॥ ८ ॥ रथान्द्विपान्हयांश्चैवसारोहानर्जुनोयुधि ॥ शरैरनेकसाहस्रैर्निन्येराजन्यमक्षयं ॥ ९ ॥ तंप्रवीराःसुसंरब्धानर्दमानाइवर्षभाः ॥ वासितार्थमिवक्रुद्धमभिद्रुत्यमदोत्कटाः ॥ १० ॥ निघ्नंतमभिजघ्नुस्तेशरैःशृंगैरिवर्षभाः ॥ तस्यतेषांचतद्युद्धमभवल्लोमहर्षणं ॥ ११ ॥ त्रैलोक्यविजयेयद्वद्दैत्यानांसहवज्रिणा ॥ अस्त्रैरस्त्राणिसंवार्यद्विषतांसर्वतोर्जुनः ॥ १२ ॥ इषुभिर्बहुभिस्तूर्णंविध्वाप्राणानजहारसः ॥ छिन्नत्रिवेणुचक्राक्षान्हतयोधान्ससारथीन् ॥ १३ ॥ विध्वस्तायुधतूणीरान्समुन्मथितकेतनान् ॥ संछिन्नयोक्त्ररश्मीकान्विवरूथान्विकूवरान् ॥ १४ ॥ विस्रस्तबंधुरयुगान्विस्रस्ताक्षप्रमंडलान् ॥ रथान्विशकलीकुर्वन्महाभ्राणीवमारुतः ॥ १५ ॥ विस्मापयन्प्रेक्षणीयंद्विषतांभयवर्धनं ॥ महारथसहस्रस्यसमंकर्माकरोज्जयः ॥ १६ ॥ सिद्धदेवर्षिसंघाश्चचारणाश्चापितुष्टुवुः ॥ देवदुंदुभयोनेदुःपुष्पवर्षाणिचापतन् ॥ १७ ॥ केशवार्जुनयोर्मूर्ध्निप्राहवाक्चाशरीरिणी ॥ चंद्रार्काग्न्यनिलसूर्याणांकांतिदीप्तिबलद्युतीः ॥ १८ ॥ यौसदाबिभ्रतुर्वीराविमौतौकेशवार्जुनौ ॥ ब्रह्मेशानाविवाजय्यौवीरावेकरथेस्थितौ ॥ १९ ॥ सर्वभूतवरौवीरौनरनारायणाविमौ ॥ इत्येतन्महदाश्चर्यंदृष्ट्वाश्रुत्वाचभारत ॥ २० ॥ अश्वत्थामासुसंयत्तःकृष्णावभ्यद्रवद्रणे ॥ अथपांडवमस्यंतममित्रघ्नकराञ्छरान् ॥ २१ ॥ सेषुणापाणिनाहूयप्रहसन्द्रौणिरब्रवीत् ॥ यदिमांमन्यसेवीरप्राप्तमर्हमिहातिथिं ॥ २२ ॥

तान् कूबरःत्रिवेणोरपत्याः ॥ १४ ॥ बंधुरंरथतल्पः युगंधूरपकाष्ठं अक्षप्रमंडलंरथनीडाक्षयोःसंधानकाष्ठजातंविशकलीकुर्वन्विश्लेषयन्स कलीकुर्वन् ॥ १५ ॥ १६ ॥ १७ ॥ चंद्रादीनांकांत्यादीन्यथासंख्यंबिभृतुः ॥ १८ ॥ १९ ॥ २० ॥ अमित्रघ्नाःकराःकराकारमग्रफलकंयेषांतानअमित्रघ्नकरान् ॥ २१ ॥ अर्हपूजयितुंयोग्यं ॥ २२ ॥

॥ २३ ॥ २४ ॥ अंतरमनंतरं ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ आयस्तःयत्नवान् ॥ ३२ ॥ ३४ ॥ इषुधिप्रभृतिभ्यःशराःपेतुःलोमभ्योपिवर्मभ्योपिचपेतुस्तत्रहेतुःब्रह्मवादिनःयोगबलवतइत्य

ततःसर्वात्मनात्वंधयुद्धातिथ्यंप्रयच्छमे॥ एवमाचार्यपुत्रेणसमाहूतोयुयुत्सया ॥ २३ ॥ बहुमेनेर्जुनोत्मानमितिचाहजनार्दनं॥ संशप्तकाश्चमेवध्याद्रौणिरा
हूयतेचमां॥ २४॥ यदत्रानंतरंप्राप्तंशंसमेतद्धिमाधव॥ आतिथ्यकर्माभ्युत्थायदीयतांयदिमन्यसे ॥ २५ ॥ एवमुक्तोवहत्पार्थंकृष्णोद्रोणात्मजांतिके॥ जैत्रे
णविधिनाहूतंवायुरिंद्रमिवाध्वरे॥ २६ ॥ तमामंत्र्यैकमनसंकेशवोद्रौणिमब्रवीत् ॥ अश्वत्थामन्स्थिरोभूत्वाप्रहराशुसहस्वच ॥ २७॥ निर्वेष्टुंभर्तृपिंडंहिका
लोयमुपजीविनां॥ सूक्ष्मोविवादोविप्राणांस्थूलौक्षात्रौजयाजयौ॥ २८॥ यामभ्यर्थयसेमोहाद्दिव्यांपार्थस्यसत्क्रियां॥ तामाप्तुमिच्छन्युध्यस्वस्थिरोभूत्वा
यपांडवं॥ २९॥इत्युक्तोवासुदेवेनतथेत्युक्त्वाद्विजोत्तमः॥ विव्याधकेशवंषष्ट्यानाराचैरर्जुनंत्रिभिः ॥ ३० ॥ तस्यार्जुनःसुसंक्रुद्धस्त्रिभिर्बाणैःशरासनं॥ चि
च्छेदचान्यदादत्तद्रौणिर्घोरतरंधनुः॥ ३१॥ सज्जंकृत्वानिमेषाच्चविव्याधार्जुनकेशवौ ॥ त्रिभिःशतैर्वासुदेवंसहस्रेणचपांडवं॥ ३२ ॥ ततःशरसहस्राणिप्रयु
तान्यर्बुदानिच॥ ससृजेद्रौणिरायस्तःसंस्तभ्यचरणेर्जुनं॥ ३३ ॥इषुधेर्धनुषश्चैवज्यायाश्चैवाथमारिष॥ बाह्वोःकराभ्यामुरसोवदनघ्राणनेत्रतः॥ ३४॥ कर्णा
भ्यांशिरसोंगेभ्योलोमवर्मभ्यएवच॥ रथध्वजेभ्यश्चशरानिष्पेतुर्ब्रह्मवादिनः॥ ३५ ॥ शरजालेनमहताविध्वामाधवपांडवौ॥ ननादमुदितोद्रौणिर्महामेघौ
घनिःस्वनं॥ ३६॥ तस्यतंनिनदंश्रुत्वापांडवोच्युतमब्रवीत् ॥ पश्यमाधवदौरात्म्यंगुरुपुत्रस्यमांप्रति ॥ ३७ ॥ वधंप्राप्तौमन्यतेनौप्रावेश्यशरवेश्मनि॥ एषो
स्मिहन्मिसंकल्पंशिक्षयाचबलेनच॥ ३८॥ अश्वत्थाम्नःशरानस्तान्छित्वैकैकंत्रिधात्रिधा ॥ व्यधमद्भरतश्रेष्ठोनीहारमिवमारुतः ॥ ३९॥ ततःसंशप्तकान्भू
यःसाश्वसूतरथद्विपान्॥ ध्वजपत्तिगणानुग्रैर्बाणैर्विव्याधपांडवः ॥ ४० ॥ येयेददृशिरेतत्रयद्यद्रूपास्तदाजनाः॥ तेतेतत्रशरैर्व्याप्तंमेनिरेत्मानमात्मना॥ ४१॥
तेगांडीवप्रमुक्तास्तुनानारूपाःपतत्रिणः॥ क्रोशेसाग्रेस्थितान्घ्नंतिद्विपांश्चपुरुषान्रणे ॥ ४२॥ भल्लैश्छिन्नाःकराःपेतुःकरिणांमदवर्षिणां॥ यथावनेपरशुभि
र्निकृत्ताःसुमहाद्रुमाः॥ ४३॥पश्चात्तुशैलवत्पेतुस्तेगजाःसहसादिभिः ॥ वज्रिवज्रप्रमथितायथैवाद्रिचयास्तथा॥ ४४ ॥ गंधर्वनगराकारान्रथांश्चैवसुक
ल्पितान्॥ विनीतजवनैर्युक्तानास्थितान्युद्धदुर्मदैः॥ ४५॥ शरैर्विशकलीकुर्वन्नमित्रानभ्यवीवृषत्॥ स्वलंकृतानश्वसादीन्पत्तींश्चाहन्धनंजयः॥ ४६॥ धनं
जयोयुगांतार्कःसंशप्तकमहार्णवं॥ व्यशोषयतदुःशोषंतीक्ष्णैःशरगभस्तिभिः॥ ४७॥ र्थः॥ ३५॥ ३६॥ ३७॥ ३८॥ ३९॥ ४०॥ ४१॥ ४२॥ ४३॥ ४४॥ ४५॥ ४६॥ ४७॥

महाशैलशिलासमूहोयस्मिंस्तं महाशैलपर्वतमिव ॥ ४८ ॥ ४९ ॥ पांडवेबाणोत्थमकांडकोशाकितिपाठेबाणानांकोशातूणान्पिफ्नगाण्यवेदयत् ॥ ५० ॥ ५१ ॥ इतिकर्णपर्वणि नैलकंठीये भारतभावदीपे षोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ततइति नक्षत्रमभितःनक्षत्रंलक्षीकृत्य ॥ १ ॥ विमार्गस्थौवक्रातिचारगौ ॥ २ ॥ ३ ॥ कृष्णौकृष्णार्जुनौआसतुःदीपयांचक्रतुः ॥ ४ ॥ सर्वतोधारंसर्वतोधारा

पुनर्द्रौणिर्महाशैलंनाराचैर्वज्रसन्निभैः॥ निर्बिभेदमहावेगैस्त्वरन्वज्रीवपर्वतं॥ ४८ ॥ तमाचार्यसुतःक्रुद्धःसाश्वयंतारमाशुगैः॥ युयुत्सुरागमद्योद्धुंपार्थस्तमन्छिनच्छरान्॥ ४९ ॥ ततःपरमसंक्रुद्धःपांडवेऽस्त्राण्यवासृजत्॥ अश्वत्थामाभिरूपायगृहानतिथयेयथा॥ ५० ॥ अथसंशप्तकांस्त्यक्त्वापांडवोद्रौणिमभ्ययात्॥ अपांक्तेयानिवत्यक्त्वादातापांक्तेयमर्थिनं॥ ५१ ॥ इतिश्रीमहाभारतेकर्णप० अश्वत्थामार्जुनसंवादेषोडशोऽध्यायः॥ १६ ॥ ॥ ७ ॥ संजयउवाच ततःसमभवद्युद्धंशुक्रांगिरसवर्चसोः॥ नक्षत्रमभितोव्योम्निशुक्रांगिरसयोरिव॥ १ ॥ संतापयंतावन्योन्यंदीप्तैःशरगभस्तिभिः॥ लोकत्रासकरावास्तांविमार्गस्थौग्रहाविव॥ २ ॥ ततोविध्यद्भ्रुवोर्मध्येनाराचेनार्जुनोभृशं॥ सतेनविबभौद्रौणिरूर्ध्वरश्मिर्यथारविः॥ ३ ॥ अथकृष्णौशरशतैरश्वत्थाम्नार्दितौभृशं॥ स्वरश्मिजालविकचौयुगांतार्काविवासतुः॥ ४ ॥ ततोर्जुनःसर्वतोधारमस्त्रमवासृजद्वासुदेवेभिभूते॥ द्रौणायनिंचाभ्यहनत्पृषत्कैर्वज्राग्निवैवस्वतदंडकल्पैः॥ ५ ॥ सकेशवंचार्जुनंचातितेजाविव्याधमर्मस्वतिरौद्रकर्मा॥ बाणैःसुयुक्तैरतितीव्रवेगैर्यैराहतोमृत्युरपिव्यथेत॥ ६ ॥ द्रौणेरिषूनर्जुनःसन्निवार्यव्यायच्छतस्तद्विगुणैःसुपुंखैः॥ तंसाश्वसूतध्वजमेकवीरमावृत्यसंशप्तकसैन्यमार्च्छत्॥ ७ ॥ धनूंषिबाणानिषुधीर्धनुर्ज्याःपाणीन्भुजान्पाणिगतंचशस्त्रं॥ छत्राणिकेतूंस्तुरगान्रथेषांवस्त्राणिमाल्यान्यथभूषणानि॥ ८ ॥ चर्माणिवर्माणिमनोरमाणिप्रियाणिसर्वाणिशिरांसिचैव॥ चिच्छेदपार्थोद्विषतांसुयुक्तैर्बाणैःस्थितानामपराङ्मुखानां॥ ९ ॥ सुकल्पिताःस्यंदनवाजिनागाःसमास्थितायत्नकृतैर्नृवीरैः॥ पार्थेरितैर्बाणशतैर्निरस्तास्तैरेवसार्द्धंनृवराःनिपेतुः॥ १० ॥ पद्मार्कपूर्णेंदुनिभाननानिकिरीटमाल्याभरणोज्वलानि॥ भल्लार्धचंद्रक्षुरकर्त्तितानिप्रपेतुरुर्व्यांनृशिरांस्यजस्रं॥ ११ ॥ अथद्विपैर्देवरिपुद्विपाभैर्देवारिदर्पापहमत्युदग्रं॥ कलिंगवंगांगनिषादवीराजिघांसवःपांडवमभ्यधावन्॥ १२ ॥ तेषांद्विपानांनिचकर्त्तपार्थोवर्माणिचर्माणिकरान्नियंतॄन्॥ ध्वजान्पताकाश्चततःप्रपेतुर्वज्राहतानीवगिरेःशिरांसि॥ १३ ॥

वर्षकं वज्रकल्पैःअमोघैःअग्निकल्पैःदाहकैःवैवस्वतदंडकल्पैःप्राणहरैः ॥ ५ ॥ ६ ॥ व्यायच्छतोयत्नमानस्यआवृत्यलंघ्यवार ॥ ७ ॥ ८ ॥ ९ ॥ सुकल्पिताःसुसन्नद्धाः यत्नकृतैःप्रयत्नैः तैरेवबाणैरेव ॥ १० ॥ ११ ॥ देवरिपुर्याक्षसद्विपंश्चेतिनजाहुरतुल्योरित्यर्थः ॥ १२ ॥ [illegible] ॥ १३ ॥

तेषुप्रभग्नेषुगुरोस्तनूजंबाणैःकिरीटीनवसूर्यवर्णैः॥प्रच्छादयामासमहाभ्रजालैर्वायुःसमुद्यंतमिवांशुमंतं॥१४॥ततोर्जुनेषूनिषुभिर्निरस्यद्रोणिःशितैरर्जुनवासुदेवौ॥ प्रच्छादयित्वादिविचंद्रसूर्यौननादसोंभोदइवातपांते॥ १५॥ तमर्जुनस्तांश्चपुनस्त्वदीयानभ्यर्दितस्तैरभिसृत्यशस्त्रैः॥ बाणांधकारंसहसैवकृत्वाविव्याधसर्वानिषुभिःसुपुंखैः॥१६॥ नाप्याददत्संदधन्नैवमुंचन्बाणान्रथेदृश्यतसव्यसाची ॥रथांश्चनागांस्तुरगान्पदातीन्संस्यूतदेहान्ददृशुर्हतांश्च॥१७॥संधायनाराचवरान्दशाशुद्रौणिस्त्वरन्नेकमिवोत्ससर्ज॥ तेषांचपंचार्जुनमभ्यविध्यन्पंचाच्युतंनिर्बिभिदुःसुपुंखाः॥ १८॥तैराहतौसर्वमनुष्यमुख्यावसृक्स्रवंतौधनदेंद्रकल्पौ॥समाप्तविद्येनतथाभिभूतौहतौरणेतावितिमेनिरेन्ये॥१९॥ अथार्जुनंप्राहदशार्हनाथःप्रमाद्यसेकिंजहियोधमेतं॥ कुर्याद्धिदोषंसमुपेक्षितोयंकष्टोभवेद्व्याधिरिवाक्रियावान्॥२०॥तथेतिचोक्त्वाच्युतमप्रमादीद्रौणिंप्रयत्नादिषुभिस्ततक्ष॥ भुजौवरौचंदनसारदिग्धौवक्षःशिरोथाप्रतिमौतथोरू॥२१॥गांडीवमुक्तैःकुपितोविकर्णैर्द्रौणिंशरैःसंयतिनिर्बिभेद॥ छित्वातुरश्मींस्तुरगानविध्यंस्तेतंरणाद्दूरमतीवदूरं॥ २२॥ सतैर्हृतोवातजवैस्तुरंगैर्द्रौणिर्दृढंपार्थशराभिभूतः॥ इयेषनावृत्यपुनस्तुयोद्धुंपार्थेनसार्द्धंमतिमान्विमृश्य॥ जानन्जयंनियतंवृष्णिवीरेधनंजयेचांगिरसांवरिष्ठः॥ २३॥ नियम्यसहयान्द्रौणिःसमाश्वस्यचमारिष॥रथाश्वनरसंबाधंकर्णस्यप्राविशद्बलं॥ २४॥ प्रतीपकारिणिरणादश्वत्थाम्निहृतेहयैः॥ मंत्रौषधिक्रियायोगैर्व्याधौदेहादिवाहृते॥ २५॥ संशप्तकानभिमुखौप्रयातौकेशवार्जुनौ॥वातोद्धूतपताकेनस्यंदनेनौघनादिना॥२६॥ इतिश्रीमहाभा० कर्णप० अश्वत्थामपराजयेसप्तदशोऽध्यायः॥१७॥

संजयउवाच अथोत्तरेणपांडूनांसेनायांध्वनिरुत्थितः॥ रथनागाश्वपत्तीनांदंडधारेणवध्यतां॥१॥ निवर्त्तयित्वातुरथंकेशवोर्जुनमब्रवीत्॥ वाहयन्नेवतुरगान्गरुडानिलरंहसः॥ २॥ मागधोप्यतिविक्रांतोद्विरदेनप्रमाथिना॥भगदत्तादनवरःशिक्षयाचबलेनच॥३॥ एनंहत्वानिहंतासिपुनःसंशप्तकानिति॥ वाक्यांतेप्रापयत्पार्थंदंडधारांतिकंप्रति॥४॥

[illegible] इत्यर्थः वहे आदित्यादि [illegible] विकचः [illegible] लक्षित [illegible] ॥ ५ ॥ [illegible]
स [illegible] इत्यर्थः समास्थितः सहंतीत्यन्वयः ॥ ६ ॥ रथान्पादैरधिष्ठाय आक्रम्य मन्दे [illegible] त्युत्तरार्धस्यानुकर्षः एवं करेण [illegible] यानरादीनपोथयदिति [illegible] इत्यर्थः
॥ ७ ॥ शुष्मिणा बलवतास्थूलं [illegible] लं तृणविशेषं ॥ ८ ॥ संकुलेरणदेशे इति सामर्थ्यात्ज्ञेयं ॥ ९ ॥ १० ॥ सगुणेषुकार्मुकं मौर्वीबाणसहितं धनुः नियंतॄन् नियंतारं ॥ ११ ॥ घनाघनो घातुकमत्तदंतिनो

समारामधानां प्रवरोंकुशग्रहे ग्रहे ऽप्रसह्योविकचोयथाग्रहः॥ सपत्नसेनां प्रममाथदारुणो महीं समग्रां विकचोयथाग्रहः॥ ५॥ सुकल्पितं दानवनागसन्निभं महा भ्रनिर्ह्रादममित्रमर्दनं॥ रथाश्वमातंगगणान्सहस्रशः समास्थितो हंति शरैर्नरानपि॥ ६ ॥ रथानधिष्ठाय सवाजिसारथीन्नरांश्च पादैर्द्विरदो व्यपोथयत्॥ द्विपां श्च पद्भ्यां मृदेकरेण द्विपोत्तमो हंति च कालचक्रवत्॥ ७॥ नरांस्तु कार्ष्णायसवर्मभूषणान्निपात्य साश्वानपि पत्तिभिः सह॥ व्यपोथयद्दंतिवरेण शुष्मिणा सशब्द वत्स्थूलनलं यथा तथा॥ ८॥ अथार्जुनो ज्यातलनेमिनिःस्वने मृदंगभेरीबहुशंखनादिते॥ रथाश्वमातंगसहस्रसंकुले रथोत्तमेनाभ्यपतद्विपोत्तमं॥ ९॥ ततोर्जु नं द्वादशभिः शरोत्तमैर्जनार्दनं षोडशभिः समार्पयत्॥ सदंडधारस्तुरगांस्त्रिभिस्त्रिभिस्ततो ननाद प्रजहास चासकृत्॥ १०॥ ततोस्य पार्थः सगुणेषुकार्मुकं चक र्त भल्लैर्ध्वजमप्यलंकृतं॥ पुनर्नियंतॄन्सह पादगोप्तृभिस्ततः सचुक्रोध गिरिव्रजेश्वरः॥ ११॥ ततोर्जुनं भिन्नकटेन दंतिना घनाघनेनानिलतुल्यवर्चसा॥ अतीव चुक्षो भयिषुर्जनार्दनं धनंजयं चाभिजघान तोमरैः॥ १२॥ अथास्य बाहू द्विपहस्तसन्निभौ शिरश्च पूर्णेंदुनिभाननं त्रिभिः॥ क्षुरैः प्रचिच्छेद सहैव पांडवस्ततो द्विपं बाण शतैः समार्पयत्॥ १३॥ स पार्थबाणैस्तपनीयभूषणैः समाचितः कांचनवर्मभृद्द्विपः॥ तथा चकाशे निशि पर्वतो यथा दावाग्निना प्रज्वलितौषधिद्रुमः॥ १४॥ स वेदनार्तो ऽम्बुदनिस्वनो नदंश्चरन्भ्रमन्प्रस्खलितांतरोद्रवत्॥ पपात रुग्णः सनियंतृकस्तथा यथा गिरिर्वज्रविदारितस्तथा॥ १५॥ हिमावदातेन सुवर्णमालिना हिमाद्रिकूटप्रतिमेन दंतिना॥ हते रणे भ्रातरि दंडआव्रजज्जिघांसुरिंद्रावरजं धनंजयं॥ १६॥ स तोमरैरर्ककरप्रभैस्त्रिभिर्जनार्दनं पंचभिरर्जुनं शितैः॥ समर्पयि त्वा विननाद नर्दयंस्ततोस्य बाहू निचकर्त पांडवः॥ १७॥ क्षुरप्रकृत्तौ सुभृशं सतोमरौ शुभांगदौ चंदनरूषितौ भुजौ॥ गजात्पतंतौ युगपद्विरेजतुर्यथाद्रिशृंगात्पति तौ महोरगौ॥ १८॥

रिति विम्वः ॥ १२ ॥ सहैव युगपत् ॥ १३ ॥ १४ ॥ [illegible] भ्रमन् भ्रांतिमाप्नुवन् [illegible] इत्यर्थः सनियंतृकः [illegible]
[illegible] ॥ १५ ॥ [illegible] ॥ १६ ॥ [illegible] ॥ १८ ॥

...॥ १९ ॥ २० ॥ गजोत्तमः ... ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ... शोध्यायः ॥ १८ ॥ ... ॥ ९ ॥ ... प्रत्येति ॥ १ ॥ २ ॥ धुर्यान्धुर्येष्ठान्धुर्यगतान्वाहान्वाहादीन्अपिचवीराणांचिच्छेदेतिद्वयोःसंबंधः ॥ ३ ॥ ४ ॥ वासितार्थेस्त्रीनिमित्तं वासिताकरिणी...

तथार्धचंद्रेणहृतंकिरीटिनाप्रपातदंडस्यशिरःक्षितौद्विपान् ॥ सशोणितार्द्रोनिपतन्विरेजेदिवाकरोस्तादिवपश्चिमांदिशं ॥ १९ ॥ अथद्विपंश्वेतवराभ्रसन्निभंदिवाकरांशुप्रतिमैःशरोत्तमैः ॥ बिभेदपार्थःसपपातनादयन्हिमाद्रिकूटंकुलिशाहतंयथा ॥ २० ॥ ततोपरेतत्प्रतिमागजोत्तमाजिगीषवःसंयतिसव्यसाचिना ॥ तथाकृतास्तेचयथैववौद्विपौततःप्रभग्नंसुमहद्द्विषोबलं ॥ २१ ॥ गजारथाश्वाःपुरुषाश्वसंघशःपरस्परघ्नाःपरिपेतुराहवे ॥ परस्परंप्रस्खलिताःसमाहिताश्वशंसिरेतुर्बहुभाषिणोहताः ॥ २२ ॥ अथार्जुनंस्वेपरिवार्यसैनिकाःपुरंदरंदेवगणाइवाब्रुवन् ॥ अभैष्मयस्मान्मरणादिवप्रजाःसुवीरदिष्ट्यानिहतस्त्वयारिपुः ॥ २३ ॥ नचेदरक्षिष्यइमंजनंभयाद्द्विषद्भिरेवंबलिभिःप्रपीडितं ॥ तथाभविष्यद्द्विषतांप्रमोदनंयथाहतेष्वेष्विहनोरिसूदन ॥ २४ ॥ इतीवभूयश्चसुहृद्भिरीडितानिशम्यवाचःसुमनास्ततोर्जुनः ॥ यथानुरूपंप्रतिपूज्यतंजनंजगामसंशप्तकसंघहापुनः ॥ २५ ॥ इतिश्रीमहाभारतेकर्णप॰ दंडवधेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ ९ ॥

संजयउवाच ॥ प्रत्यागत्यपुनर्जिष्णुर्जघ्नेसंशप्तकान्बहून् ॥ वक्रातिवक्रगमनादंगारकइवग्रहः ॥ १ ॥ पार्थबाणहताराजन्नराश्वरथकुंजराः ॥ विचेलुर्बभ्रमुर्नेदुःपेतुर्मम्लुश्चभारत ॥ २ ॥ धुर्यान्धुर्यगतान्सूतान्ध्वजांश्चापानिसायकान् ॥ पाणीन्पाणिगतंशस्त्रंबाहूनपिशिरांसिच ॥ ३ ॥ भल्लैःक्षुरैरर्धचंद्रैर्वत्सदंतैश्चपांडवः ॥ चिच्छेदामित्रवीराणांसमरेप्रतियुध्यतां ॥ ४ ॥ वासितार्थेयुयुत्संतोवृषभावृषभंयथा ॥ निपतंत्यर्जुनंशूराःशतशोथसहस्रशः ॥ ५ ॥ तेषांतस्यचतद्युद्धमभवल्लोमहर्षणं ॥ त्रैलोक्यविजयेयादृग्दैत्यानांसहवज्रिणा ॥ ६ ॥ तमविध्यत्त्रिभिर्बाणैर्दंदशूकैरिवाहिभिः ॥ उग्रायुधस्ततस्तस्यशिरःकायादपाहरत् ॥ ७ ॥ तेर्जुनंसर्वतःक्रुद्धानानाशस्त्रैरवीवृषन् ॥ मरुद्भिःप्रेरितामेघाहिमवंतमिवोष्णगे ॥ ८ ॥ अस्त्रैरस्त्राणिसंवार्यद्विषतांसर्वतोर्जुनः ॥ सम्यगस्तैःशरैःसर्वानहितानहनद्बहून् ॥ ९ ॥ छिन्नत्रिवेणुसंघातान्हताश्वान्पार्ष्णिसारथीन् ॥ विस्रस्तहस्ततूणीरान्विचक्ररथकेतनान् ॥ १० ॥

...यथावृषभःवृषभस्यां...नतेषांपुर्यं...कुलंअहंपूर्विकयानिपततिएवंयुद्धेऽर्जुनंप्रतिराजामहत्वर्थः ॥ ... ॥ ५ ॥ ... ॥ ८ ॥ ... ॥ ९ ॥ १० ॥

[illegible]रथिनचोकाक्षान्प्यनुकर्षयुगान्यपान् ॥ विध्वस्तसर्वसन्नाहान्बाणैश्चक्रेऽर्जुनस्तदा ॥ ११ ॥ तेरथास्तत्रविध्वस्ताःपरार्ध्याभांत्यनेकशः ॥ [illegible]
[illegible]वेश्मानिहतान्यध्यनिलाग्निभिः ॥ १२ ॥ द्विपाःसंभिन्नमर्माणोवज्राशनिसमैःशरैः ॥ पेतुर्गिर्यग्रवेश्मानिवज्रपाताग्निभिर्यथा ॥ १३ ॥ सारोहास्तुरगाःपेतु
[illegible]र्हताऽर्जुनताडिताः ॥ निर्जिह्वांत्राःक्षितौक्षीणारुधिरार्द्राःसुदुर्दशाः ॥ १४ ॥ नराश्वनागानाराचैःसंस्यूताःसव्यसाचिना ॥ बभ्रमुश्चस्खलुःपेतुर्नेदुर्मम्लुश्चमारि
ष ॥ १५ ॥ अनेकैश्चशिलाधौतैर्वज्राशनिविषोपमैः ॥ शरैर्निजघ्निवान्पार्थोमहेंद्रइवदानवान् ॥ १६ ॥ महार्हवर्माभरणानानारूपांबरायुधाः ॥ सरथाःसध्व
[illegible]र्वीराहताःपार्थेनशेरते ॥ १७ ॥ विजिताःपुण्यकर्माणोविशिष्टाभिजनश्रुताः ॥ गताःशरीरैर्वसुधामूर्जितैःकर्मभिर्दिवं ॥ १८ ॥ अथार्जुनंरथवरंत्वदीयाःस
मभिद्रवन् ॥ नानाजनपदाध्यक्षाःसगणाजातमन्यवः ॥ १९ ॥ उह्यमानारथाश्वेभैःपत्तयश्चजिघांसवः ॥ समभ्यधावन्नस्यंतोविविधंक्षिप्रमायुधं ॥ २० ॥
तंवर्षमहावर्षंयुक्तंयोधमहांबुदैः ॥ व्यधमन्निशितैर्बाणैःक्षिप्रमर्जुनमारुतः ॥ २१ ॥ साश्वपत्तिद्विपरथंमहाशस्त्रौघसंप्लवं ॥ सहसासंतितीर्षंतंपार्थंशस्त्रास्त्रसे
तुना ॥ २२ ॥ अथाब्रवीद्वासुदेवःपार्थकिंक्रीडसेऽनघ ॥ संशप्तकान्प्रमथ्यैनांस्ततःकर्णवधेत्वर ॥ २३ ॥ तथेत्युक्त्वार्जुनःकृष्णंशिष्टान्संशप्तकांस्तदा ॥ आक्षिप्य
शस्त्रेणबलाद्दैत्यानिंद्रइवावधीत् ॥ २४ ॥ आददत्संदधन्नेषून्दृष्टःकैश्चिद्रणेऽर्जुनः ॥ विमुंचन्वाशराञ्शीघ्रंदृश्यतेवहितैरपि ॥ २५ ॥ आश्चर्यमितिगोविंदःसम
मन्यतभारत ॥ हंसांशुगौरास्तेसेनांहंसाःसरइवाविशन् ॥ २६ ॥ ततःसंग्रामभूमिंचवर्तमानेजनक्षये ॥ अवेक्षमाणोगोविंदःसव्यसाचिनमब्रवीत् ॥ २७ ॥ ए
षपार्थमहारौद्रोवर्ततेभरतक्षयः ॥ पृथिव्यांपार्थिवानांवैदुर्योधनकृतेमहान् ॥ २८ ॥ पश्यभारतचापानिरुक्मपृष्ठानिधन्विनां ॥ महतांचापविद्धानिकलापानि
तूणीस्तथा ॥ २९ ॥ जातरूपमयैःपुंखैःशरांश्चनतपर्वणः ॥ तैलधौतांश्चनाराचान्विमुक्तानिवपन्नगान् ॥ ३० ॥ आकीर्णांस्तोमरांश्चापिविचित्रान्हेमभूषिता
न् ॥ चर्माणिचापविद्धानिरुक्मपृष्ठानिभारत ॥ ३१ ॥ सुवर्णविकृतान्प्रासान्शक्तीःकनकभूषिताः ॥ जांबूनदमयैःपट्टैर्बद्धाश्चविपुलागदाः ॥ ३२ ॥ जातरू
पमयीश्चर्ष्टीःपट्टिशान्हेमभूषितान् ॥ दंडैःकनकचित्रैश्चविप्रविद्धान्परश्वधान् ॥ ३३ ॥ परिघान्भिंडिपालांश्चभुशुंडीःकुणपानपि ॥ अयस्कुंतांश्चपतितान्मुस
लानिगुरूणिच ॥ ३४ ॥

॥ २० ॥ १८ ॥ कलापानूर्ध्वं[illegible] ॥ २९ ॥ ३० ॥ आकीर्णान्सर्वतोविक्षिप्तान् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

असात्अस्त्रसाकल्यात् ॥ १९ ॥ २० ॥ गजोत्तमाः महागजाल्लब्धाः तैःदंडधरतद्भ्रात्रोर्द्विपौसाध्यक्षौकृत्तौछिन्नौतथान्येपित्रताः छिन्नाः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ इतिकर्णप० नै० भारतभावदीपे अष्टादशोऽध्यायः ॥ १८ ॥ ॥ ७ ॥ प्रत्येति ॥ १ ॥ २ ॥ धुर्यान्श्रेष्ठान् धुर्यगतान्वाहान्वाहादीन्अमित्रवीराणांचिच्छेदेतिद्वयोःसंबंधः ॥ ३ ॥ ४ ॥ वासितार्थेस्त्रीनिमित्तं वासिताकरिणीनार्यो

तथार्धचंद्रेणहतंकिरीटिनापपाततद्दंडस्यशिरःक्षितिंद्विपात् ॥ सशोणितार्द्रोनिपतन्विरेजेदिवाकरोस्तादिवपश्चिमांदिशं ॥ १९ ॥ अथद्विपंश्वेतवराभ्रसन्निभंदिवाकरांशुप्रतिमैःशरोत्तमैः ॥ बिभेदपार्थःसपपातनादयन्हिमाद्रिकूटंकुलिशाहतंयथा ॥ २० ॥ ततोपरेतत्प्रतिमागजोत्तमाजिगीषवःसंयतिसव्यसाचिना ॥ तथाकृतास्तेचयथैवतौद्विपौततःप्रभग्नंसुमहद्रिपोर्बलं ॥ २१ ॥ गजारथाश्वाःपुरुषाश्चसंघशःपरस्परघ्नाःपरिपेतुराहवे ॥ परस्परंप्रस्खलिताःसमाहताभृशंविपेतुर्बहुभाषिणोहताः ॥ २२ ॥ अथार्जुनंस्वेपरिवार्यसैनिकाःपुरंदरंदेवगणाइवाब्रुवन् ॥ अभैष्मयस्मान्मरणादिवप्रजाःसुवीरदिष्ट्यानिहतस्त्वयारिपुः ॥ २३ ॥ नचेदरक्षिष्यइमंजनंभयाद्द्विषद्भिरेवंबलिभिःप्रपीडितं ॥ तथाभविष्यद्द्विषतांप्रमोदनंयथाहतेष्वेष्विहनोरिसूदन ॥ २४ ॥ इतीवभूयश्चसुहृद्भिरीडितानिशम्यवाचःसुमनास्ततोर्जुनः ॥ यथानुरूपंप्रतिपूज्यतंजनंजगामसंशप्तकसंघहापुनः ॥ २५ ॥ इतिश्रीमहाभारतेकर्णप० दंडवधेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ ७ ॥

संजयउवाच प्रत्यागत्यपुनर्जिष्णुर्जघ्नेसंशप्तकान्बहून् ॥ वक्रातिवक्रगमनादंगारकइवग्रहः ॥ १ ॥ पार्थबाणहताराजन्नराश्वरथकुंजराः ॥ विचेलुर्बभ्रमुर्नेशुःपेतुर्मम्लुश्चभारत ॥ २ ॥ धुर्यान्धुर्यगतान्सूतान्ध्वजांश्चापानिसायकान् ॥ पाणीन्पाणिगतंशस्त्रंबाहूनपिशिरांसिच ॥ ३ ॥ भल्लैःक्षुरैरर्धचंद्रैर्वत्सदंतैश्चपांडवः ॥ चिच्छेदामित्रवीराणांसमरेप्रतियुध्यतां ॥ ४ ॥ वासितार्थेयुयुत्संतोवृषभावृषभंयथा ॥ निपतंत्यर्जुनंशूराःशतशोथसहस्रशः ॥ ५ ॥ तेषांतस्यचतद्युद्धमभवल्लोमहर्षणं ॥ त्रैलोक्यविजयेयादृग्दैत्यानांसहवज्रिणा ॥ ६ ॥ तमविध्यत्त्रिभिर्बाणैर्दंदशूकैरिवाहिभिः ॥ उग्रायुधसुतस्तस्यशिरःकायादपाहरत् ॥ ७ ॥ तेर्जुनंसर्वतःक्रुद्धानानाशस्त्रैरवीवृषन् ॥ मरुद्भिःप्रेरितामेघाहिमवंतमिवोष्णगे ॥ ८ ॥ अस्त्रैरस्त्राणिसंवार्यद्विषतांसर्वतोर्जुनः ॥ सम्यगस्तैःशरैःसर्वानहितानहनद्बहून् ॥ ९ ॥ छिन्नत्रिवेणुसंघातान्हताश्वान्पार्ष्णिसारथीन् ॥ विस्रस्तहस्ततूणीरान्विचक्ररथकेतनान् ॥ १० ॥

वासितार्थमैथुनार्थेइतिविश्वः यथास्वयंवरस्थांस्त्रियंप्राप्तुंवृषभाश्चअश्वमाश्वतेषांयूथंवृषभात्वृषभंश्रेष्ठार्थेत्वयोषकुलंअहंपूर्विकयानिपततिएवंयुद्धेऽर्जुनंप्राप्तुंराजानइत्यर्थः वासितंअतिश्रेष्ठंतस्यादिकंयास्तु ॥ ५ ॥ ६ ॥ उग्रायुधसुतस्यअपाहरदर्जुनइतिशेषः ॥ ७ ॥ उष्णगेग्रीष्मेगतेसतिप्रावृषीत्यर्थः उष्णोग्रीष्मोगतोऽतीतोयत्रसउष्णगःकालविशेषइतिविग्रहः ॥ ८ ॥ अस्तैःक्षिप्तैः ॥ ९ ॥ १० ॥

अनुकर्षः[illegible] ॥ ११ ॥ १२ ॥ १३ ॥ निर्जिह्वांत्राः निर्गताः जिह्वाः अंत्राणि येषां ते ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

संछिन्नरश्मियोक्त्राक्षान्व्यनुकर्षयुगान्रथान् ॥ विध्वस्तसर्वसन्नाहान्बाणैश्चक्रेर्जुनस्तदा ॥ ११ ॥ तेरथास्तत्रविध्वस्ताःपरार्ध्याभांत्यनेकशः ॥ धनिनामि
ववेश्मानिहतान्यग्न्यनिलांबुभिः ॥ १२ ॥ द्विपाःसंभिन्नमर्माणोवज्राशनिसमैःशरैः ॥ पेतुर्गिर्यग्रवेश्मानिवज्रपाताग्निभिर्यथा ॥ १३ ॥ सारोहास्तुरगाःपेतु
र्बहवोर्जुनताडिताः ॥ निर्जिह्वांत्राःक्षितौक्षीणारुधिरार्द्राःसुदुर्दशः ॥ १४ ॥ नराश्वनागानाराचैःसंस्यूताःसव्यसाचिना ॥ बभ्रमुश्चस्खलुःपेतुर्नेदुर्मम्लुश्चमारि
ष ॥ १५ ॥ अनेकैश्चशिलाधौतैर्वज्राशनिविषोपमैः ॥ शरैर्निजघ्निवान्पार्थोमहेंद्रइवदानवान् ॥ १६ ॥ महार्हवर्माभरणानानारूपांबरायुधाः ॥ सरथाःसध्व
जावीराहताःपार्थेनशेरते ॥ १७ ॥ विजिताःपुण्यकर्माणोविशिष्टाभिजनश्रुताः ॥ गताःशरीरैर्वसुधामूर्जितैःकर्मभिर्दिवं ॥ १८ ॥ अथार्जुनंरथवरंत्वदीयाःस
मभिद्रवन् ॥ नानाजनपदाध्यक्षाःसगणाजातमन्यवः ॥ १९ ॥ उह्यमानारथाश्वेभैःपत्तयश्चजिघांसवः ॥ समभ्यधावन्नस्यंतोविविधंक्षिप्रमायुधं ॥ २० ॥
तदायुधमहावर्षयुक्तंयोधमहांबुदैः ॥ व्यधमन्निशितैर्बाणैःक्षिप्रमर्जुनमारुतः ॥ २१ ॥ साश्वपत्तिद्विपरथंमहाशस्त्रौघसंप्लवं ॥ सहसासंतितीर्षंतंपार्थंशस्त्रास्त्रसे
तुना ॥ २२ ॥ अथाब्रवीद्वासुदेवःपार्थकिंक्रीडसेऽनघ ॥ संशप्तकान्प्रमथ्यैनांस्ततःकर्णवधेत्वर ॥ २३ ॥ तथेत्युक्त्वार्जुनःकृष्णंशिष्टान्संशप्तकांस्तदा ॥ आक्षिप्य
शस्त्रेणबलाद्दैत्यानिंद्रइवावधीत् ॥ २४ ॥ आददत्संदधन्नेषून्दृष्टःकैश्चिद्रणेर्जुनः ॥ विमुंचन्वाशराञ्शीघ्रंदृश्यतेवहितैरपि ॥ २५ ॥ आश्चर्यमितिगोविंदःसम
मन्यतभारत ॥ हंसांशुगौरास्तेसेनांहंसाःसरइवाविशन् ॥ २६ ॥ ततःसंग्रामभूमिंचवर्तमानेजनक्षये ॥ अवेक्षमाणोगोविंदःसव्यसाचिनमब्रवीत् ॥ २७ ॥ ए
षपार्थमहारौद्रोवर्ततेभरतक्षयः ॥ पृथिव्यांपार्थिवानांवैदुर्योधनकृतेमहान् ॥ २८ ॥ पश्यभारतचापानिरुक्मपृष्ठानिधन्विनां ॥ महतांचापविद्धानिकलापानि
षुधींस्तथा ॥ २९ ॥ जातरूपमयैःपुंखैःशरांश्चनतपर्वणः ॥ तैलधौतांश्चनाराचान्विमुक्तानिवपन्नगान् ॥ ३० ॥ आकीर्णांस्तोमरांश्चापिविचित्रान्हेमभूषिता
न् ॥ चर्माणिचापविद्धानिरुक्मपृष्ठानिभारत ॥ ३१ ॥ सुवर्णविकृतान्प्रासान्शक्तीःकनकभूषिताः ॥ जांबूनदमयैःपट्टैर्बद्धाश्चविपुलागदाः ॥ ३२ ॥ जातरूप
मयीश्चर्ष्टीःपट्टिशान्हेमभूषितान् ॥ दंडैःकनकचित्रैश्चविप्रविद्धान्परश्वधान् ॥ ३३ ॥ परिघान्भिंडिपालांश्चभुशुंडीःकुणपानपि ॥ अयस्कुंतांश्चपतितान्मुस
लानिगुरूणिच ॥ ३४ ॥

॥ २७ ॥ २८ ॥ कलापान् अलंकृतान् ॥ २९ ॥ ३० ॥ आकीर्णान् सर्वतोविक्षिप्तान् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

नानाविधानिशस्त्राणिप्रगृह्यजयगृद्धिनः ॥ जीवंतइवदृश्यंतेगतसत्वास्तरस्विनः ॥ ३५ ॥ गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान् ॥ गजवाजिरथैःक्षुण्णान्प श्ययोधान्सहस्रशः ॥ ३६ ॥ मनुष्यगजवाजीनांशरशक्त्यृष्टितोमरैः ॥ निस्त्रिंशैःपट्टिशैःप्रासैर्नखरैर्लगुडैरपि ॥ ३७ ॥ शरीरैर्बहुधाछिन्नैःशोणितौघपरिप्लुतैः ॥ गतासुभिरमित्रघ्नसंवृतारणभूमयः ॥ ३८ ॥ बाहुभिश्चंदनादिग्धैःसांगदैःशुभभूषणैः ॥ सतलत्रैःसकेयूरैर्भातिभारतमेदिनी ॥ ३९ ॥ सांगुलित्रैर्भुजाग्रैश्चवि प्रविद्धैरलंकृतैः ॥ हस्तिहस्तोपमैश्छिन्नैरूरुभिश्चतरस्विनां ॥ ४० ॥ बद्धचूडामणिवरैःशिरोभिश्चसकुंडलैः ॥ रथांश्चबहुधाभग्नान्हेमकिंकिणिनःशुभान् ॥ ४१ ॥ अश्वांश्चबहुधापश्यशोणितेनपरिप्लुतान् ॥ अनुकर्षानुपासंगान्पताकाविविधान्ध्वजान् ॥ ४२ ॥ योधानांचमहाशंखान्पांडुरांश्चप्रकीर्णकान् ॥ निरस्त जिह्वान्मातंगान्शयानान्पर्वतोपमान् ॥ ४३ ॥ वैजयंतीर्विचित्राश्चहतांश्चगजयोधिनः ॥ वारणानांपरिस्तोमान्संयुक्तानेककंबलान् ॥ ४४ ॥ विपाटितवि चित्राश्चरूपचित्राःकुथास्तथा ॥ भिन्नाश्चबहुधाघंटाःपतद्भिश्चूर्णितागजैः ॥ ४५ ॥ वैदूर्यमणिदंडांश्चपतितांश्चांकुशान्भुवि ॥ अश्वानांचयुगापीडान्रत्नचि त्रानुरश्छदान् ॥ ४६ ॥ विद्धाःसादिध्वजाग्रेषुसुवर्णविकृताःकुथाः ॥ विचित्रान्मणिचित्रांश्चजातरूपपरिष्कृतान् ॥ ४७ ॥ अश्वास्तरपरिस्तोमान्रांकवान्पति तान्भुवि ॥ चूडामणीन्नरेंद्राणांविचित्राःकांचनस्रजः ॥ ४८ ॥ छत्राणिचापविद्धानिचामरव्यजनानिच ॥ चंद्रनक्षत्रभासैश्चवदनैश्चारुकुंडलैः ॥ ४९ ॥ कॢप्त श्मश्रुभिराकीर्णापूर्णचंद्रनिभैर्महीं ॥ कुमुदोत्पलपद्मानांखंडैःफुल्लंयथासरः ॥ ५० ॥ तथामहीभृतांवक्त्रैःकुमुदोत्पलसन्निभैः ॥ तारागणविचित्रस्यनिर्मलेंदुद्यु तित्विषः ॥ ५१ ॥ पश्येमांनभसस्तुल्यांशरन्नक्षत्रमालिनीं ॥ एतत्तवैवानुरूपंकर्मार्जुनमहाहवे ॥ ५२ ॥ दिविवादेवराजस्यत्वयायत्कृतमाहवे ॥ एवंतांदर्शयन् कृष्णोयुद्धभूमिंकिरीटिने ॥ ५३ ॥ गच्छन्नेवाशृणोच्छब्दंदुर्योधनबलेमहत् ॥ शंखदुंदुभिनिर्घोषंभेरीपणवनिःस्वनं ॥ ५४ ॥ रथाश्वगजनादांश्चशस्त्रशब्दांश्च दारुणान् ॥ प्रविश्यतद्बलंकृष्णस्तुरगैर्वातवेगितैः ॥ ५५ ॥ पांड्येनाभ्यर्दितंसैन्यंत्वदीयंवीक्ष्यविस्मितः ॥ सहिनानाविधैर्बाणैरिष्वस्त्रप्रवरोयुधि ॥ ५६ ॥ न्यहन द्विषतांपूगान्गतासूनंतकोयथा ॥ गजवाजिमनुष्याणांशरीराणिशितैःशरैः ॥ ५७ ॥ भित्वाप्रहरतांश्रेष्ठोविदेहासून्न्यपातयत् ॥ शत्रुप्रवीरैरस्तानिनानाशस्त्रा णिसायकैः ॥ छित्वातानवधीच्छत्रून्पांड्यःशक्रइवासुरान् ॥ ५८ ॥ इतिश्रीम० कर्णप० संकुलयुद्धेएकोनविंशोऽध्यायः ॥ १९ ॥ ॥ ६१ ॥ एकोनविंशोऽध्यायः ॥ १९ ॥

प्रोक्तइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ पराभूतः प्रकोपितः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ सपांड्यः व्यसूनकरोदितिद्वयोःसंबंधः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ मुष्टिश्लिष्टायतज्यं मुष्टिदेशेश्लिष्टा चआयताचज्यायस्यतत्तथा एकस्मिन्नेवक्षणेयद्धनुर्मंडलाकारंचिपिटाकारंचदृश्यतइतिभावः ॥ १५ ॥ वर्षतःमत्तमत्तः ॥ १६ ॥ प्रमथसेप्रमथ्नासि ॥ १७ ॥ सस्यहाअतिदृष्ट्याधान्यहा ह्लादीगर्जन् ॥ १८ ॥

धृतराष्ट्रउवाच प्रोक्तस्त्वयापूर्वमेवप्रवीरोलोकविश्रुतः ॥ नत्वस्यकर्मसंग्रामेत्वयासंजयकीर्तितं ॥ १ ॥ तस्यविस्तरशोब्रूहिप्रवीरस्याद्यविक्रमं ॥ शिक्षांप्रभावंवीर्यंचप्रमाणंदर्पमेवच ॥ २ ॥ संजयउवाच भीष्मद्रोणकृपद्रौणिकर्णार्जुनजनार्दनान् ॥ समाप्तविद्यान्धनुषिश्रेष्ठान्यान्मन्यसेरथान् ॥ ३ ॥ योत्याक्षिपतिवीर्येणसर्वानेतान्महारथान् ॥ नमेनेचात्मनातुल्यंकंचिदेवनरेश्वरं ॥ ४ ॥ तुल्यतांद्रोणभीष्माभ्यामात्मनोयोनमृष्यते ॥ वासुदेवार्जुनाभ्यांचन्यूनतांनैच्छतात्मनि ॥ ५ ॥ सपांड्योनृपतिश्रेष्ठः सर्वशस्त्रभृतांवरः ॥ कर्णस्यानीकमहनत्पराभूतइवांतकः ॥ ६ ॥ तदुदीर्णरथाश्वंचपत्तिप्रवरसंकुलं ॥ कुलालचक्रवद्भ्रांतंपांड्येनाभ्याहतंबलात् ॥ ७ ॥ व्यश्वसूतध्वजरथान्विप्रविद्धायुधद्विपान् ॥ सम्यगस्तैःशरैःपांड्योवायुर्मेघानिवाक्षिपत् ॥ ८ ॥ द्विरदान्द्विरदारोहान्विपताकायुधध्वजान् ॥ सपादरक्षान्हनद्वज्रेणाद्रीनिवाद्रिहा ॥ ९ ॥ सशक्तिप्रासतूणीरानश्वारोहानहयानपि ॥ पुलिंदखसबाह्लीकनिषादांध्रककुंतलान् ॥ १० ॥ दाक्षिणात्यांश्चभोजांश्चशूरान्संग्रामकर्कशान् ॥ विशस्त्रकवचान्बाणैःकृत्वाचैवाकरोद्व्यसून् ॥ ११ ॥ चतुरंगंबलंबाणैर्निघ्नंतंपांड्यमाहवे ॥ दृष्ट्वाद्रौणिरसंभ्रांतमसंभ्रांतस्ततोभ्ययात् ॥ १२ ॥ आभाष्यचैनंमधुरमभीतंतमभीतवत् ॥ प्राहप्रहरतांश्रेष्ठःस्मितपूर्वंसमाह्वयन् ॥ १३ ॥ राजन्कमलपत्राक्षप्रशिष्टाभिजनश्रुत ॥ वज्रसंहननप्रख्यप्रख्यातबलपौरुष ॥ १४ ॥ मुष्टिश्लिष्टायतज्यंचव्यायताभ्यांमहद्धनुः ॥ दोर्भ्यांविस्फारयन्भासिमहाजलदवद्भृशं ॥ १५ ॥ शरवर्षैर्महावेगैरमित्रानभिवर्षतः ॥ मदन्यंनानुपश्यामिप्रतिवीरंतवाहवे ॥ १६ ॥ रथद्विरदपत्त्यश्वानेकःप्रमथसेबहून् ॥ मृगसंघानिवारण्येविभीर्भीमबलोहरिः ॥ १७ ॥ महतारथघोषेणदिवंभूमिंचनादयन् ॥ वर्षांतेसस्यहामेघोभासिह्रादीवपार्थिव ॥ १८ ॥ संस्पृशानःशरांस्तीक्ष्णांस्तूणादाशीविषोपमान् ॥ मयैवैकेनयुध्यस्वत्र्यंबकेनांधकोयथा ॥ १९ ॥ एवमुक्तस्तथेत्युक्त्वाप्रहरेतिचताडितः ॥ कर्णिनाद्रोणतनयंविव्याधमलयध्वजः ॥ २० ॥ मर्मभेदिभिरत्युग्रैर्बाणैरग्निशिखोपमैः ॥ स्मयन्नभ्यहनद्द्रौणिःपांड्यमाचार्यसत्तमः ॥ २१ ॥

॥ १९ ॥ ताडितःद्रौणिना मलयवत्कृत्रिमोध्वजोयस्य मलयध्वजइतिप्रवीरस्यैवनामांतरंवा ॥ २० ॥ २१ ॥

[illegible]या उन्मुख्य भिमुखीतिर्यङ्मंदागोमूत्रिकाध्रुवा स्खलिता यमकाकांताकुष्टेतीयुगतीर्विदुः शिरोहृदयपार्श्वदेशस्पृशस्तिस्रः मंदाईषच्छिन्नत्वक् गोमूत्रिकाकवचनिकृंतनीसव्यापसव्यगामिनी ध्रुवानि यमेनल[illegible]मेदिनी स्खलितालक्ष्यच्युता यमकाकांतालक्ष्यंजित्वाऽसर्कन्निर्गता कुष्टालक्ष्यैकदेशस्यबाह्वादेर्हंत्रीतिनवगतयः दशमीगतिस्तुशिरसासहदूरपातिनीअतिकुष्टानाम तयागत्याप्रक्षिप्तमानपिशरा

ततोपरान्सुतीक्ष्णाग्रान्नाराचान्मर्मभेदिनः ॥ गत्यादशम्यासंयुक्तानश्वत्थामाप्यवासृजत् ॥ २२ ॥ तान्शरानच्छित्पांड्योनवभिर्निशितैःशरैः ॥ चतुर्भिर दयच्चाश्वानाशुतेव्यसवोभवन् ॥ २३ ॥ अथद्रोणसुतस्येषूंस्तान्छित्वानिशितैःशरैः ॥ धनुर्ज्याविततांपांड्यश्चिच्छेदादित्यतेजसः ॥ २४ ॥ दिव्यंधनुरथाधि ज्यंकृत्वाद्रौणिरमित्रहा ॥ प्रेक्ष्यचाशुरथेयुक्तान्नरैरन्यान्हयोत्तमान् ॥ २५ ॥ ततःशरसहस्राणिप्रेषयामासवैद्विजः ॥ इषुसंबाधमाकाशमकरोद्दिशएवच ॥ २६ ॥ ततस्तानस्यतःसर्वान्द्रौणेर्बाणान्महात्मनः ॥ जानानोप्यक्षयान्पांड्योशातयत्पुरुषर्षभः ॥ २७ ॥ प्रयुक्तांस्तान्प्रयत्नेनछित्वाद्रौणेरिपूनरिः ॥ चक्ररक्षौरणेतस्य प्राणुदन्निशितैःशरैः ॥ २८ ॥ अथारेर्लाघवंदृष्ट्वामंडलीकृतकार्मुकः ॥ प्रास्यद्द्रोणसुतोबाणान्वृष्टिंपूषानुजोयथा ॥ २९ ॥ अष्टावष्टगवान्यूहुःशकटानियदा युधं ॥ अह्नस्तदष्टभागेनद्रौणिश्चिक्षेपमारिष ॥ ३० ॥ तमंतकमिवक्रुद्धमंतकस्यांतकोपमं ॥ येयेददृशिरेतत्रविसंज्ञाःप्रायशोऽभवन् ॥ ३१ ॥ पर्जन्यइवघर्मांते वृष्ट्यासाद्रिद्रुमांमहीं ॥ आचार्यपुत्रस्तांसेनांबाणवृष्ट्याव्यवीवृषत् ॥ ३२ ॥ द्रौणिपर्जन्यमुक्तांतांबाणवृष्टिंसुदुःसहां ॥ वायव्यास्त्रेणसंक्षिप्यमुदापांड्यानिलोनुद त् ॥ ३३ ॥ तस्यनानदतःकेतुंचंदनागुरुरूपितं ॥ मलयप्रतिमंद्रौणिश्छित्वाऽश्वांश्चतुरोहनत् ॥ ३४ ॥ सूतमेकेषुणाहत्वामहाजलदनिःस्वनं ॥ धनुश्छित्वार्धचंद्रेण तिलशोव्यधमद्रथं ॥ ३५ ॥ अस्त्रैरस्त्राणिसंवार्यछित्वासर्वायुधानिच ॥ प्राप्तमप्यहितंद्रौणिर्नजघानरणेप्सया ॥ ३६ ॥ एतस्मिन्नंतरेकर्णोगजानीकमुपाद्रवत् ॥ द्रावयामाससतदापांडवानांमहद्बलं ॥ ३७ ॥ विरथान्रथिनश्चक्रेगजानश्वांश्चभारत ॥ गजान्बहुभिरानर्छच्छरैःसन्नतपर्वभिः ॥ ३८ ॥ अथद्रौणिर्महेष्वासः पांड्यंशत्रुनिवर्हणं ॥ विरथंरथिनांश्रेष्ठंनाहनद्युद्धकांक्षया ॥ ३९ ॥ हतेश्वरोदंतिवरःसुकल्पितस्त्वराभिसृष्टःप्रतिशब्दगोबली ॥ तमाद्रवद्द्रौणिशराहतस्त्वर न्जवेनकृत्वाप्रतिहस्तिगर्जितं ॥ ४० ॥

नूनवसंख्याकान्नवभिःशरैःअच्छिनदितिसंबंधः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ पूषानुजःपर्जन्यः पूषाग्रजइतिपाठेपिसएवार्थः वृष्टेःसूर्यप्रभवत्वदर्शनात् ॥ २९ ॥ अष्टवृषभवाह्यानिअष्टौशकटानियदायुधसंभारंऊहुः वहंतितत्सर्वंअह्नोष्टमभागेनयामार्धेनक्षीणमित्यर्थः ॥ ३० ॥ ३१ ॥ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ हतेश्वरोयःकश्चित्तंपांड्यं ॥ ४० ॥

मलयध्वजः पांड्यस्तंयद् च्छयागतंवारणंसमभ्यतिष्ठत् ॥ ४१ ॥ बलेनअश्वसर्गेयउत्तमोयत्नस्तेनमन्युनाचतैः परिपीडयन्अंकुशेनकोपयन्अद्रिपतिर्मलयस्तस्येश्वरःपांड्यः ॥ ४२ ॥ द्रौणेःवरांगभूषणंकिरीटंतोमरेणपराहनत् ॥ ४३ ॥ ४४ ॥ इषून्समाददेद्रौणिरितिशेषः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ चतुरःचतुरंशः एवंसगजोदशधाभक्तोयथादशहविष्कायामिष्टौपिष्टपिंडोदशधाक्रियतेतथेत्यर्थः ॥ ४९ ॥

तंवारणंवारणयुद्धकोविदो द्विपोत्तमंपर्वतसानुसन्निभं ॥ समभ्यतिष्ठन्मलयध्वजस्त्वरन्यथाद्रिशृंगंहरिरुन्नदंस्तथा ॥ ४१ ॥ सतोमरंभास्कररश्मिवर्चसंबलाश्वसर्गोत्तमयत्नमन्युभिः ॥ ससर्जशीघ्रंपरिपीडयन्गजंगुरोःसुतायाद्रिपतीश्वरोनदन् ॥ ४२ ॥ मणिप्रवेकोत्तमवज्रहाटकैरलंकृतंचांशुकमाल्यमौक्तिकैः ॥ हतोहतोसीत्यसकृन्मुदानदन्पराहनद्द्रौणिवरांगभूषणं ॥ ४३ ॥ तदर्कचंद्रग्रहपावकत्विषंभृशातिपातात्पतितंविचूर्णितं ॥ महेंद्रवज्राभिहतंमहास्वनंयथाद्रिशृंगंधरणीतलेतथा ॥ ४४ ॥ ततःप्रजज्वालपरेणमन्युनापादाहतोनागपतिर्यथातथा ॥ समाददेचांतकदंडसन्निभानिषून्मित्रार्तिकरांश्चतुर्दश ॥ ४५ ॥ द्विपस्यपादाग्रकरान्सपंचभिर्नृपस्यबाहूचशिरोथचत्रिभिः ॥ जघानषड्भिःषडनुत्तमत्विषःसपांड्यराजानुचरान्महारथान् ॥ ४६ ॥ सुदीर्घवृत्तौवरचंदनोक्षितौसुवर्णमुक्तामणिवज्रभूषणौ ॥ भुजौधरायांपतितौनृपस्यतौविचेष्टतुस्तार्क्ष्यहताविवोरगौ ॥ ४७ ॥ शिरश्चतत्पूर्णशशिप्रभाननंसरोषनाघायतनेत्रमुन्नसं ॥ क्षितावपिभ्राजतितत्सकुंडलंविशाखयोर्मध्यगतःशशीयथा ॥ ४८ ॥ सतुद्विपःपंचभिरुत्तमेषुभिःकृतःषडंशश्चतुरोनृपस्त्रिभिः ॥ कृतोदशांशःकुशलेनयुध्यतायथाहविस्तद्दशदैवतंतथा ॥ ४९ ॥ सपादशोराक्षसभोजनान्बहून्प्रदायपांड्योश्वमनुष्यकुंजरान् ॥ स्वधामिवाप्यज्वलनःपितृप्रियस्ततःप्रशांतःसलिलप्रवाहतः ॥ ५० ॥ समाप्तविद्यंतुगुरोःसुतंनृपःसमाप्तकर्माणमुपेत्यतेसुतः ॥ सुहृद्वृतोत्यर्थमपूजयन्मुदाजितेबलौविष्णुमिवामरेश्वरः ॥ ५१ ॥ इतिश्रीमहाभारतेकर्णप० पांड्यवधेविंशोऽध्यायः ॥ २० ॥ ॥ ७ ॥ धृतराष्ट्रउवाच पांड्येहतेकिमकरोदर्जुनोयुधिसंजय ॥ एकवीरेणकर्णेनद्रावितेषुपरेषुच ॥ १ ॥ समाप्तविद्योबलवान्युक्तोवीरःसपांडवः ॥ सर्वभूतेष्वनुज्ञातःशंकरेणमहात्मना ॥ २ ॥ तस्मान्महद्भयंतीव्रममित्रघ्नाद्धनंजयात् ॥ सयत्तत्राकरोत्पार्थस्तन्ममाचक्ष्वसंजय ॥ ३ ॥ संजयउवाच हतेपांड्येर्जुनंकृष्णस्त्वरन्नाहवचोहितं ॥ पश्यामिनाहंराजानमपयातांश्चपांडवान् ॥ ४ ॥

पांड्योश्वादीन्पादशःप्रदायखंडयित्वाप्रशांतःद्रौणिबाणैरितिशेषः यथास्वधांप्रेतशरीररूपंहविःप्राप्यपितृप्रियोज्वलनःश्मशानाग्निःजलेनशाम्यतितद्वदित्यर्थः ॥ ५० ॥ समाप्तविद्यंसम्यगाप्तविद्यं समाप्तकर्माणंकृतकृत्यं ॥ ५१ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेविंशोऽध्यायः ॥ २० ॥ ॥ ७ ॥ पांड्यइति ॥ १ ॥ अनुज्ञातःत्वंअजय्योभविष्यसीत्यनुगृहीतः ॥ २ ॥ ३ ॥ राजानंयुधिष्ठिरं ॥ ४ ॥

॥५॥ ६ ॥ भ्रातुःयुधिष्ठिरस्य ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ द्यांस्वर्गं वियत्अंतरिक्षं ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ अंडजैर्जलपक्षिभिःसारसादिभिःआकीर्णां

निवृत्तैश्चपुनःपार्थैर्भग्नंशत्रुबलंमहत् ॥ अश्वत्थाम्नश्चसंकल्पाद्धताःकर्णेनसृंजयाः ॥५॥ तथाश्वरथनागानांकृतंचकदनंमहत् ॥ सर्वमाख्यातवान्वीरोवासुदेवःकिरीटिने ॥६॥ एतच्छ्रुत्वाचदृष्ट्वाचभ्रातुर्घोरंमहद्भयं ॥ वाहयाश्वान्हृषीकेशक्षिप्रमित्याहपांडवः ॥७॥ ततःप्रायाद्धृषीकेशोरथेनाप्रतियोधिना ॥ दारुणश्चपुनस्तत्रप्रादुरासीत्समागमः ॥८॥ ततःपुनःसमाजग्मुरभीताःकुरुपांडवाः ॥ भीमसेनमुखाःपार्थाःसूतपुत्रमुखावयं ॥९॥ ततःप्रववृतेभूयःसंग्रामोराजसत्तम ॥ कर्णस्यपांडवानांचयमराष्ट्रविवर्धनः ॥ १० ॥ धनूंषिबाणान्परिघानसिपट्टिशतोमरान् ॥ मुसलानिभुशुंडीश्चसशक्त्यृष्टिपरश्वधान् ॥ ११ ॥ गदाःप्रासान्शितान्कुंतान्भिंदिपालान्महांकुशान् ॥ प्रगृह्यक्षिप्रमापेतुःपरस्परजिघांसया ॥ १२ ॥ बाणज्यातलशब्देनद्यांदिशःप्रदिशोवियत् ॥ पृथिवींनेमिघोषेणनादयंतोभ्ययुःपरान् ॥ १३ ॥ तेनशब्देनमहतासंहृष्टाश्चकुराहवं ॥ वीरावीरैर्महाघोरंकलहांतंतितीर्षवः ॥ १४ ॥ ज्यातलत्रधनुःशब्दःकुंजराणांचबृंहतां ॥ पादातानांचपततांनृणांनादोमहानभूत् ॥ १५ ॥ तालशब्दांश्चविविधान्शूराणांचाभिगर्जतां ॥ श्रुत्वातत्रभृशंत्रेसुःपेतुर्मम्लुश्चसैनिकाः ॥ १६ ॥ तेषांनिनदतांचैवशस्त्रवर्षंचमुंचतां ॥ बहूनाधिरथिर्वीरःप्रममाथेषुभिःपरान् ॥ १७ ॥ पंचपांचालवीराणांरथान्दशचपंचच ॥ साश्वसूतध्वजान्कर्णःशरैर्निन्येयमक्षयं ॥ १८ ॥ योधमुख्यामहावीर्याःपांडूनांकर्णमाहवे ॥ शीघ्रास्त्रास्तूर्णमावृत्यपरिवव्रुःसमंततः ॥ १९ ॥ ततःकर्णोद्विषत्सेनांशरवर्षैर्विलोडयन् ॥ विजगाहांडजाकीर्णांपद्मिनीमिवयूथपः ॥ २० ॥ द्विषन्मध्यमवस्कंद्यराधेयोधनुरुत्तमं ॥ विधुन्वानःशितैर्बाणैःशिरांस्युन्मथ्यपातयत् ॥ २१ ॥ चर्मवर्माणिसंछिन्नान्यपतन्भुविदेहिनां ॥ विषेहुर्नास्यसंस्पर्शंद्वितीयस्यपतत्रिणः ॥ २२ ॥ वर्मदेहासुमथनैर्धनुषःप्रच्युतैःशरैः ॥ मौर्व्यातलत्रेन्यहनत्कशयावाजिनोयथा ॥ २३ ॥ पांडुसृंजयपंचालान्शरगोचरमागतान् ॥ ममर्दतरसाकर्णःसिंहोमृगगणानिव ॥ २४ ॥ ततःपांचालराजश्चद्रौपदेयाश्चमारिष ॥ यमौचयुयुधानश्चसहिताःकर्णमभ्ययुः ॥ २५ ॥ तेषुव्यायच्छमानेषुकुरुपांचालपांडुषु ॥ प्रियानसून्रणेत्यक्त्वायोधाजघ्नुःपरस्परं ॥ २६ ॥ सुसन्नद्धाःकवचिनःसशिरस्त्राणभूषणाः ॥ गदाभिर्मुसलैश्चान्येपरिघैश्चमहाबलाः ॥ २७ ॥

व्याप्तां ॥ २० ॥ अवस्कंद्यनिपत्य उन्मथ्यमार्गादन्यत्रकृत्वेत्यर्थः ॥ २१ ॥ २२ ॥ असुमथनैः असवःप्राणाउन्मथ्यंतेयैस्तैः मौर्व्यामौर्वीच्युतैःशरैर्बाणैःतलत्रेस्याघातवारणस्थानेन्यहनत् यथातेशरंसंधातुंनशक्नुवंतितथाचकारेत्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥ व्यायच्छमानेषुयतमानेषु ॥ २६ ॥ २७ ॥

॥ २८ ॥ विमस्तिष्केक्षणायुधाःमस्तिष्कंशिरोभागस्थमांसपिंडः ॥ २९ ॥ ३० ॥ परश्वधैःतनक्षुःपट्टिशैरसिभिश्चचिच्छिदुःशक्तिभिर्विभिदुः भिंदिपालैश्चिक्षिपुःनखरैःसंचकर्तुःप्रासतोमरैर्जघ्नुः ॥ ३१ ॥
॥३२॥ सुरसंस्निग्धं प्रकृत्ताश्छिन्नाश्चंदनारक्तचंदनाः ॥ ३३ ॥ ३४ ॥ ३५॥ ३६ ॥ समाप्लुत्यसंमुखमुत्प्लुत्य ॥ ३७ ॥ ३८ ॥ पद्मानीववदनानि स्रजइवगात्राणि ॥ ३९ ॥ समुज्ज्वानिक्षारक्लिन्नानिम

समभ्यधावंतभृशंकालदंडैरिवोद्यतैः ॥नर्दंतश्चाह्वयंतश्चप्रवल्गंतश्चमारिष॥ २८॥ ततोनिजघ्नुरन्योन्यंपेतुश्चान्योन्यताडिताः ॥ वमंतोरुधिरंगात्रैर्विमस्तिष्के
क्षणायुधाः ॥ २९ ॥ दंतपूर्णैःसरुधिरैर्वक्त्रैर्दाडिमसन्निभैः॥ जीवंतइवचाप्येकेतस्थुःशस्त्रोपबृंहिताः॥ ३०॥ परश्वधैश्चाप्यपरेपट्टिशैरसिभिस्तथा॥ शक्तिभिर्भि
दिपालैश्चनखरप्रासतोमरैः॥ ३१ ॥ ततक्षुश्चिच्छिदुश्चान्येबिभिदुश्चिक्षिपुस्तथा॥ संचकर्तुश्चजघ्नुश्चक्रुद्धारणमहार्णवे ॥ ३२ ॥ पेतुरन्योन्यनिहताव्यसवोरु
धिरोक्षिताः॥ क्षरंतःसुरसंरक्तंप्रकृत्ताश्चंदनाइव॥ ३३॥ रथैरथाविनिहताहस्तिभिश्चापिहस्तिनः॥ नरैर्नराहताःपेतुरश्वाश्चाश्वैःसहस्रशः॥ ३४॥ ध्वजाःशिरां
सिछत्राणिद्विपहस्तान्नृणांभुजाः॥क्षुरैर्भल्लार्धचंद्रैश्चच्छिन्नाःपेतुर्महीतले॥ ३५॥ नरांश्चनागान्सरथान्हयान्ममृदुराहवे॥ अश्वारोहैर्हताःशूराश्छिन्नहस्ताश्चदं
तिनः॥ ३६॥ सपताकाध्वजाःपेतुर्विशीर्णाइवपर्वताः॥ पत्तिभिश्चसमाप्लुत्यद्विरदाःस्यंदनास्तथा॥ ३७॥ हताश्चहन्यमानाश्चपतिताश्चैवसर्वशः॥ अश्वारोहाः
समासाद्यत्वरिताःपत्तिभिर्हताः॥ ३८ ॥ सादिभिःपत्तिसंघाश्चनिहतायुधिशेरते ॥ मृदितानीवपद्मानिप्रम्लानाइवचस्रजः ॥ हतानांवदनान्यासन्गात्राणि
चमहाहवे॥ ३९ ॥ रूपाण्यत्यर्थकांतानिद्विरदाश्वनृणांनृप ॥ समुज्ज्वानीववस्त्राणिययुर्दुर्दर्शतांपरां॥ ४०॥ इतिश्रीमहाभारतेकर्णप० संकुलयुद्धेएकविंशो
ध्यायः॥ २१॥ ॥ ॥ ॥ संजयउवाच हस्तिभिस्तुमहामात्रास्तवपुत्रेणचोदिताः॥ धृष्टद्युम्नंजिघांसंतःक्रुद्धाःपार्षतमभ्ययुः॥ १ ॥ प्राच्याश्चदाक्षि
णात्याश्चप्रवरागजयोधिनः॥ अंगावंगाश्चपुंड्राश्चमागधास्ताम्रलिप्तकाः॥ २ ॥ मेकलाःकोशलामद्रादशार्णानिषधास्तथा ॥ गजयुद्धेषुकुशलाःकलिंगैःसह
भारत॥ ३ ॥ शरतोमरनाराचैर्वृष्टिमंतइवांबुदाः ॥ सिषिचुस्तेततःसर्वंपांचालबलमाहवे ॥ ४ ॥ तान्संमिमर्दिषुर्नागान्पार्ष्ण्यंगुष्ठांकुशैर्भृशं॥ चोदितान्पा
र्षतोबाणैर्नाराचैरभ्यवीवृषत्॥ ५ ॥ एकैकंदशभिःषड्भिरष्टाभिरपिभारत ॥ द्विरदानभिविव्याधक्षिप्तैर्गिरिनिभान्शरैः॥ ६॥ प्रच्छाद्यमानंद्विरदैर्मेघैरिवदिवा
करं॥ प्रययुःपांडुपांचालानदंतोनिशितायुधाः॥ ७॥

लिनानि ॥ ४० ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेएकविंशोऽध्यायः ॥ २१ ॥ ॥ ॥
हस्तिभिरिति॥ १॥ २ ॥ ३ ॥ ४ ॥ पार्ष्णिःपादस्यपश्चाद्भागःअंगुष्ठःप्रसिद्धःअंकुशःप्रतोदःपार्ष्ण्यंकुशःअंगुष्ठांकुशश्चेतिद्वौकेवलांकुशश्चतैः ॥५ ॥ ६ ॥ प्रच्छाद्यमानंवृष्टयुम्नं ॥ ७ ॥

॥८॥९॥१०॥११॥१२॥ आवर्जितःप्रहारवंचनेनरक्षितःकायोयेनतस्य ॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥३०॥ इतिकर्णप०

तान्नागानभिवर्षतोज्यातंत्रीतलनादितैः॥ वीरनृत्यंप्रनृत्यंतःशूरतालप्रचोदितैः॥ नकुलःसहदेवश्चद्रौपदेयाःप्रभद्रकाः॥८॥ सात्यकिश्चशिखंडीचचेकिता नश्चवीर्यवान्॥समंतात्सिंषिचुर्वीरामेघास्तोयैरिवाचलान्॥९॥तेम्लेच्छैःप्रेषितानागानरानश्वान्रथानपि॥हस्तैराक्षिप्यममृदुःपद्भिश्चाप्यतिमन्यवः॥१०॥ बिभिदुश्चविषाणाग्रैःसमाक्षिप्यचचिक्षिपुः॥ विषाणलग्नाश्चाप्यन्येपरिपेतुर्विभीषणाः॥११॥ प्रमुखेवर्त्तमानंतुद्विपमंगस्यसात्यकिः॥ नाराचेनोग्रवेगेन भित्वामर्माण्यपातयत्॥१२॥ तस्यावर्जितकायस्यद्विरदादुत्पतिष्यतः॥ नाराचेनाहनद्वक्षःसात्यकिःसोपतद्भुवि॥१३॥ पुंड्रस्यापततोनागंचलंतमिवपर्व तं॥ सहदेवःप्रयत्नात्तैर्नाराचैरहनत्रिभिः॥१४॥ विपताकंवियंतारंविवर्मध्वजजीवितं॥ तंकृत्वांद्विरदंभूयःसहदेवोंगमभ्ययात्॥१५॥ सहदेवंतुनकुलो वारयित्वांगमार्दयत्॥ नाराचैर्यमदंडाभैस्त्रिभिर्नागंशतेनतं॥१६॥ दिवाकरकरप्रख्यानंगश्चिक्षेपतोमरान्॥ नकुलायशतान्यष्टौत्रिधैकैकंतुसोच्छिनत् ॥१७॥ तथार्धचंद्रेणशिरस्तस्यचिच्छेदपांडवः॥ सपपातहतोम्लेच्छस्तेनैवसहदंतिना॥१८॥ अथांगपुत्रेनिहतेहस्तिशिक्षाविशारदे॥ अंगाःक्रुद्धामहामा त्रानागैर्नकुलमभ्ययुः॥१९॥ चलत्पताकैःसुमुखैर्हेमकक्षातनुच्छदैः॥ मिमर्दिषंतस्त्वरिताःप्रदीप्तैरिवपर्वतैः॥२०॥ मेकलोत्कलकालिंगानिषधास्ताम्रलि प्तकाः॥ शरतोमरवर्षाणिविमुंचंतोजिघांसवः॥२१॥ तैश्छाद्यमानंनकुलंदिवाकरमिवांबुदैः॥ परिपेतुःसुसंरब्धाःपांडुपांचालसोमकाः॥२२॥ ततस्तदभ वद्युद्धंरथिनांहस्तिभिःसह॥ सृजतांशरवर्षाणितोमरांश्चसहस्रशः॥२३॥ नागानांप्रास्फुटन्कुंभाममर्माणिविविधानिच॥ दंताश्चैवातिविद्धानांनाराचैर्भूष णानिच॥२४॥ तेषामष्टौमहानागांश्चतुःषष्ट्यासुतेजनैः॥ सहदेवोजघानाशुतेऽपतन्सहसादिभिः॥२५॥ अंजोगतिभिरायम्यप्रयत्नाद्धनुरुत्तमं॥ नाराचैर हनन्नागान्नकुलःकुलनंदनः॥२६॥ ततःपांचालशैनेयौद्रौपदेयाःप्रभद्रकाः॥ शिखंडीचमहानागान्सिषिचुःशरवृष्टिभिः॥२७॥ तेपांडुयोधांबुधरैःशत्रु द्विरदपर्वताः॥ बाणवर्षैर्हताःपेतुर्वज्रवर्षैरिवाचलाः॥२८॥ एवंहत्वातवगजांस्तेपांडुरथकुंजराः॥ द्रुतांसेनामवैक्षंतभिन्नकूलामिवापगां॥२९॥ तांतिसेनां समालोड्यपांडुपुत्रस्यसैनिकाः॥ विक्षोभयित्वाचपुनःकर्णसमभिदुद्रुवुः॥३०॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेद्वाविंशोऽध्यायः॥२२॥ ॥७॥

संजयउवाच सहदेवंतथाक्रुद्धंदहंतंतववाहिनीं॥ दुःशासनोमहाराजभ्राताभ्रातरमभ्ययात्॥१॥ नैल०भारतभा०द्वाविंशोऽध्यायः॥२२॥ ॥७॥ समेति॥१॥

तौसमेतौमहायुद्धेदृष्ट्वातत्रमहारथाः ॥ सिंहनादरवांश्चक्रुर्वासांस्यादुधुवुश्चह ॥ २ ॥ ततोभारतक्रुद्धेनतवपुत्रेणधन्विना ॥ पांडुपुत्रस्त्रिभिर्बाणैर्वक्षस्यभिहतो बली ॥ ३ ॥ सहदेवस्ततोराजन्नाराचेनतवात्मजं ॥ विध्वाविव्याधसमत्यासारथिंचत्रिभिःशरैः ॥ ४ ॥ दुःशासनस्ततश्चापंछित्वाराजन्महाहवे ॥ सहदेवंत्रिसमत्याबाह्वोरुरसिचार्पयत् ॥५॥ सहदेवस्तुसंक्रुद्धःखड्गंगृत्यमहाहवे ॥ आविध्यप्रासृजत्तूर्णंतवपुत्ररथंप्रति ॥६॥ समार्गणंगुणंचापंछित्वातस्यमहानसिः ॥ निपपाततोभूमौच्युतःसर्पइवांबरात् ॥ ७॥ अथान्यद्धनुरादायसहदेवःप्रतापवान् ॥ दुःशासनायचिक्षेपबाणमंतकरंततः ॥८ ॥ तमापतंतंविशिखंयमदंडोपमत्विषं ॥ खड्गेनशितधारेणद्विधाचिच्छेदकौरवः ॥ ९ ॥ ततस्तंनिशितंखड्गमाविध्ययुधिसत्वरः ॥ धनुश्चान्यत्समादायशरंजग्राहवीर्यवान् ॥ १० ॥ तमापतंतंसहसानिस्त्रिंशंनिशितैःशरैः ॥ पातयामाससमरेसहदेवोहसन्निव ॥ ११ ॥ ततोबाणांश्चतुःषष्टिंतवपुत्रोमहारणे ॥ सहदेवरथंतूर्णंप्रेषयामासभारत ॥ १२ ॥ तांश्छरान्समरेराजन्वेगेनापततोबहून् ॥ एकैकंपंचभिर्बाणैःसहदेवोन्यकृंतत ॥ १३ ॥ संनिवार्यमहाबाणांस्तवपुत्रेणप्रेषितान् ॥ अथास्मैसुबहून्बाणान्प्रेषयामाससंयुगे ॥ १४ ॥ तान्बाणांस्तवपुत्रोपिछित्वैकैकंत्रिभिःशरैः ॥ ननादसुमहानादंदारयाणोवसुंधरां ॥ १५ ॥ ततोदुःशासनोराजन्विध्वापांडुसुतंरणे ॥ सारथिंनवभिर्बाणैर्माद्रेयस्यसमार्पयत् ॥ १६ ॥ ततःक्रुद्धोमहाराजसहदेवःप्रतापवान् ॥ समाधत्तशरंघोरंमृत्युकालांतकोपमं ॥१७॥ विकृष्यबलवच्चापंतवपुत्रायसोऽसृजत् ॥ सतंनिर्भिद्यवेगेनभित्वाचकवचंमहत् ॥ १८ ॥ प्राविशद्धरणींराजन्वल्मीकमिवपन्नगः ॥ ततःसंमुमुहेराजंस्तवपुत्रोमहारथः ॥ १९ ॥ मूढंचैनंसमालोक्यसारथिस्त्वरितोरथं ॥ अपोवाहभृशंचास्तोवध्यमानःशितैःशरैः ॥ २० ॥ पराजित्यरणेतंतुकौरव्यंपांडुनंदनः ॥ दुर्योधनबलंदृष्ट्वाप्रममाथसमंततः ॥ २१ ॥ पिपीलिकपुटंराजन्यथामृद्नन्नरोरुषा ॥ तथासाकौरवीसेनामृदितातेनभारत ॥ २२ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसहदेवदुःशासनयुद्धेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ९ ॥ संजयउवाच नकुलंरभसंयुद्धेद्रावयंतंवरूथिनीं ॥ कर्णोवैकर्त्तनोराजन्वारयामाससवैरुषा ॥ १ ॥ नकुलस्तुततःकर्णंप्रहसन्निदमब्रवीत् ॥ चिरस्यबतदृष्टोहंदैवतैःसौम्यचक्षुषा ॥ २ ॥ पश्यमांत्वंरणेपापचक्षुर्विषयमागतं ॥ त्वंहिमूलमनर्थानांवैरस्यकलहस्यच ॥ ३ ॥ त्वद्दोषात्कुरवःक्षीणाःसमासाद्यपरस्परं ॥ त्वामद्यसमरेहत्वाकृतकृत्योऽस्मिविज्वरः ॥ ४ ॥ त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ९ ॥ नकुलमिति रभसंरणोत्सुकं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

एवमुक्तः प्रत्युवाचनकुलंसूतनंदनः ॥ सदृशंराजपुत्रस्यधन्विनश्चविशेषतः ॥ ५ ॥ प्रहरस्वचमेवीरपश्यामस्तवपौरुषं ॥ कर्मकृत्वारणेशूरततःकत्थितुमर्हसि ॥ ६ ॥ अनुक्त्वासमरेतातशूरायुध्यंतिशक्तितः ॥ प्रयुध्यस्वमयाशक्त्याहंनिष्येदर्पमेवते ॥ ७ ॥ इत्युक्त्वाप्राहरत्तूर्णंपांडुपुत्रायसूतजः ॥ विव्याधचैनंसमरेत्रिसप्त त्याशिलीमुखैः ॥ ८ ॥ नकुलस्तुततोविद्धःसूतपुत्रेणभारत ॥ अशीत्याशीविषप्रख्यैःसूतपुत्रमविध्यत ॥ ९ ॥ तस्यकर्णोधनुश्छित्वास्वर्णपुंखैःशिलाशितैः ॥ त्रिंशतापरमेष्वासःशरैःपांडवमर्दयत् ॥ १० ॥ तेतस्यकवचंभित्वापपुःशोणितमाहवे ॥ आशीविषायथानागाभित्वागांसलिलंपपुः ॥ ११ ॥ अथान्यद्धनुरादाय हेमपृष्ठंदुरासदं ॥ कर्णंविव्याधसप्तत्यासारथिंचत्रिभिःशरैः ॥ १२ ॥ ततःक्रुद्धोमहाराजनकुलःपरवीरहा ॥ क्षुरप्रेणसुतीक्ष्णेनकर्णस्यधनुराच्छिनत् ॥ १३ ॥ अथैनंछिन्नधन्वानंसायकानांशतैस्त्रिभिः ॥ आजघ्नेप्रहसन्वीरःसर्वलोकमहारथं ॥ १४ ॥ कर्णमभ्यर्दितंदृष्ट्वापांडुपुत्रेणमारिष ॥ विस्मयंपरमंजग्मूरथिनःसहदैवतैः ॥ १५ ॥ अथान्यद्धनुरादायकर्णोवैकर्तनस्तदा ॥ नकुलंपंचभिर्बाणैर्जत्रुदेशेसमार्पयत् ॥ १६ ॥ तत्रस्थैरथतैर्बाणैर्माद्रीपुत्रोव्यरोचयत् ॥ स्वरश्मिभिरिवादित्योभुवनेविसृजन्प्रभां ॥ १७ ॥ नकुलस्तुततःकर्णंविध्वासप्तभिराशुगैः ॥ अथास्यधनुषःकोटिंपुनश्चिच्छेदमारिष ॥ १८ ॥ सोन्यत्कार्मुकमादायसमरेवेगवत्तरं ॥ नकुलस्यततोबाणैःसमंताच्छादयद्दिशः ॥ १९ ॥ संछाद्यमानःसहसांकर्णचापच्युतैःशरैः ॥ चिच्छेदसशरांस्तूर्णंशरैरेवमहारथः ॥ २० ॥ ततोबाणमयंजालंविततंव्योम्निदृश्यते ॥ खद्योतानामिवव्रातैःसंपतद्भिर्यथानभः ॥ २१ ॥ तैर्विमुक्तैःशरशतैश्छादितंगगनंतदा ॥ शलभानांयथाव्रातैस्तद्वदासीद्दिशांपते ॥ २२ ॥ तेशराहेमविकृताःसंपतंतोमुहुर्मुहुः ॥ श्रेणीकृताव्यकाशंतक्रौंचाःश्रेणीकृताइव ॥ २३ ॥ बाणजालवृतेव्योम्निछादितेचदिवाकरे ॥ नस्मसंपततेभूम्यांकिंचिदप्यंतरिक्षगं ॥ २४ ॥ निरुद्धेतत्रमार्गेचशरसंघैःसमंततः ॥ व्यरोचेतांमहात्मानौकालसूर्याविवोदितौ ॥ २५ ॥ कर्णचापच्युतैर्बाणैर्वध्यमानास्तुसोमकाः ॥ अवालीयंतराजेंद्रवेदनार्त्ताभृशार्दिताः ॥ २६ ॥ नकुलस्यतथाबाणैर्हन्यमानाचमूस्तव ॥ व्यशीर्यतदिशोराजन्वातनुन्नाइवांबुदाः ॥ २७ ॥ तेसेनेहन्यमानेतुवाभ्यांदिव्यैर्महाशरैः ॥ शरपातमपाक्रम्यतस्थतुःप्रेक्षिकेतदा ॥ २८ ॥ प्रोत्सारितजनेतस्मिन्कर्णपांडवयोःशरैः ॥ अविध्येतांमहात्मानावन्योन्यंशरवृष्टिभिः ॥ २९ ॥ विदर्शयंतौदिव्यानिशस्त्राणिबलमूर्धनि ॥ छादयंतौचसहसापरस्परवधैषिणौ ॥ ३० ॥

॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥

नकुलेनशरामुक्ताःकंकबर्हिणवाससः॥ सूतपुत्रमवच्छाद्यव्यतिष्ठंतयथांबरे॥ ३१ ॥ तथैवसूतपुत्रेणप्रेषिताःपरमाहवे॥ पांडुपुत्रमवच्छाद्यव्यतिष्ठंतांबरेश
राः॥ ३२ ॥ शरवेश्मप्रविष्टौतौददृशातेनकैश्चन॥ सूर्याचंद्रमसौराजन्छाद्यमानौघनैरिव॥ ३३॥ ततःक्रुद्धोरणेकर्णःकृत्वाघोरतरंवपुः ॥पांडवंछादयामास
समंताच्छरवृष्टिभिः॥ ३४॥ सोतिच्छन्नोमहाराजसूतपुत्रेणपांडवः॥ नचकारव्यथांराजन्भास्करोजलदैर्यथा ॥ ३५ ॥ ततःप्रहस्याधिरथिःशरजालानि
मारिष॥ प्रेषयामाससमरेशतशोथसहस्रशः॥ ३६॥ एकच्छायमभूत्सर्वंतस्यबाणैर्महात्मनः॥ अभ्रच्छायेवसंजज्ञेसंपतद्भिःशरोत्तमैः॥ ३७ ॥ ततःकर्णो
महाराजधनुश्छित्वामहात्मनः॥ सारथिंपातयामासरथनीडाद्धसन्निव॥ ३८ ॥ ततोश्वांश्चतुरश्चास्यचतुर्भिर्निशितैःशरैः ॥ यमस्यभवनंतूर्णंप्रेषयामासभा
रत॥ ३९ ॥ अथास्यतंरथंदिव्यंतिलशोव्यधमच्छरैः ॥ पताकांचक्ररक्षांश्चगदांखड्गंचमारिष॥ ४० ॥ शतचंद्रंचतच्चर्मसर्वोपकरणानिच ॥ हताश्वोविरथश्चै
वविवर्माचविशांपते॥ ४१ ॥ अवतीर्यरथात्तूर्णंपरिघंगृह्यधिष्ठितः॥ तमुद्यतंमहाघोरंपरिघंतस्यसूतजः ॥ ४२ ॥ व्यहनत्सायकैराजन्सुतीक्ष्णैर्भारसाधनैः॥
व्यायुधंचैनमालक्ष्यशरैःसन्नतपर्वभिः॥ ४३॥ आर्पयद्बहुभिःकर्णोनचैनंसमपीडयत्॥ सहन्यमानःसमरेकृतास्त्रेणवलीयसा॥ ४४॥ प्राद्रवत्सहसाराजन्नकु
लोव्याकुलेंद्रियः॥ तमभिद्रुत्यराधेयःप्रहसन्वैपुनःपुनः॥ ४५॥ सज्यमस्यधनुःकंठेव्यवासृजतभारत॥ ततःसशुशुभेराजन्कंठसक्तमहद्धनुः॥ ४६ ॥परिवेषम
नुप्राप्तेयथास्याद्व्योम्निचंद्रमाः॥ यथैवचासितोमेघःशक्रचापेनशोभितः॥ ४७ ॥ तमब्रवीत्ततःकर्णोव्यर्थंव्याहृतवानसि ॥ वदेदानींपुनर्हृष्टोवध्यमानःपुनः
पुनः॥ ४८ ॥ मायोत्सीःकुरुभिःसार्धंबलवद्भिश्चपांडव॥ सदृशैस्तातयुध्यस्वव्रीडांमाकुरुपांडव॥ ४९ ॥ गृहेवागच्छमाद्रेययत्रवाकृष्णफाल्गुनौ॥ एवमुक्त्वा
महाराजव्यसर्जयततंतदा॥ ५० ॥ वधप्राप्तंतुतंशूरोनाहनद्धर्मवित्तदा॥ स्मृत्वाकुंत्यावचोराजंस्ततएनंव्यसर्जयत्॥ ५१ ॥ विसृष्टःपांडवोराजन्सूतपुत्रेणध
न्विना॥ व्रीडन्निवजगामाथयुधिष्ठिररथंप्रति॥ ५२॥ आरुरोहरथंचापिसूतपुत्रप्रतापितः ॥ निःश्वसन्दुःखसंतप्तःकुंभस्थइवपन्नगः ॥ ५३॥ तंविजित्याथ
कर्णोपिपंचालांस्त्वरितोययौ ॥ रथेनातिपताकेनचंद्रवर्णहयेनच ॥ ५४ ॥ तत्राक्रंदोमहानासीत्पांडवानांविशांपते ॥ दृष्ट्वासेनापतिंयांतंपंचालानांरथव्र
जान्॥ ५५॥ तत्राकरोन्महाराजकदनंसूतनंदनः॥ मध्यंप्राप्तेदिनकरेचक्रवद्विचरन्प्रभुः॥ ५६॥

भग्नचक्रैरथैः कैश्चिच्छिन्नध्वजपताकिभिः ॥ हताश्वैर्हतसूतैश्च भग्नाक्षैश्चैव मारिष ॥ ५७ ॥ ह्रियमाणानपश्याम पंचालानां रथव्रजान् ॥ तत्रतत्र च संभ्रांता वि
चेरुरथकुंजराः ॥ ५८ ॥ दावाग्निपरिदग्धांगा यथैवस्युर्महावने ॥ भिन्नकुंभार्द्ररुधिरांश्छिन्नहस्ताश्च वारणाः ॥ ५९ ॥ छिन्नगात्रावराश्चैव च्छिन्नवालधयोऽप
रे ॥ छिन्नाभ्राणीव संपेतुर्हन्यमाना महात्मना ॥ ६० ॥ अपरेत्रासिता नागा नाराचशरतोमरैः ॥ तमेवाभिमुखं जग्मुः शलभाइव पावकं ॥ ६१ ॥ अपरेनिष्टनंत
श्चव्यदृश्यंत महाद्विपाः ॥ क्षरंतः शोणितं गात्रैर्नगाइव जलस्रवाः ॥ ६२ ॥ उरश्छदैर्वियुक्तांश्च वालबंधैश्च वाजिनः ॥ राजतैश्च तथा कांस्यैः सौवर्णैश्चैव भूषणैः ॥ ६३ ॥
हीनांश्चाभरणैश्चैव खलीनैश्च विवर्जितान् ॥ चामरैश्च कुथाभिश्च तूणीरैः पतितैरपि ॥ ६४ ॥ निहतैः सादिभिश्चैव शूरैराहवशोभितैः ॥ अपश्याम रणे तत्र भ्राम्य
माणान्हयोत्तमान् ॥ ६५ ॥ प्रासैः खड्गैश्च रहितानृष्टिभिश्चापि भारत ॥ हयसादीनपश्याम कंचुकोष्णीषधारिणः ॥ ६६ ॥ निहतान्वध्यमानांश्च वेपमानांश्च भार
त ॥ नागांगावयवैर्हीनांस्तत्रतत्रैव भारत ॥ ६७ ॥ रथान्हेमपरिष्कारान्संयुक्ताञ्जवनैर्हयैः ॥ भ्राम्यमाणानपश्याम हतेषु रथिषु द्रुतं ॥ ६८ ॥ भग्नाक्षकूबरान्कां
श्चिद्भग्नचक्रांश्च भारत ॥ विपताकध्वजांश्चान्यान्छिन्नेषादंडबंधुरान् ॥ ६९ ॥ विहतान्रथिनस्तत्र धावमानांस्ततस्ततः ॥ सूतपुत्रशरैस्तीक्ष्णैर्हन्यमानान्वि
शांपते ॥ ७० ॥ विशस्त्रांश्च तथैवान्यान्सशस्त्रांश्च हतान्बहून् ॥ तारकाजालसंछन्नान्वरघंटाविशोभितान् ॥ ७१ ॥ नानावर्णविचित्राभिः पताकाभिरलंकृतान् ॥
वारणाननुपश्याम धावमानान्समंततः ॥ ७२ ॥ शिरांसि बाहूनूरूंश्च च्छिन्नानन्यांस्तथैव च ॥ कर्णचापच्युतैर्बाणैरपश्याम समंततः ॥ ७३ ॥ महान्व्यतिकरो रौद्रो
योधानामन्वपद्यत ॥ कर्णसायकनुन्नानां युध्यतां च शितैः शरैः ॥ ७४ ॥ ते वध्यमानाः समरे सूतपुत्रेण सृंजयाः ॥ तमेवाभिमुखं यांति पतंगाइव पावकं ॥ ७५ ॥ तं
दहंतमनीकानि तत्रतत्र महारथं ॥ क्षत्रिया वर्जयामासुर्युगांताग्निमिवोल्बणं ॥ ७६ ॥ हतशेषास्तु ये वीराः पंचालानां महारथाः ॥ तान्प्रभग्नान्द्रुतान्वीरः पृष्ठतो
विकिरञ्छरैः ॥ ७७ ॥ अभ्यधावत तेजस्वी विशीर्णकवचध्वजान् ॥ तापयामास तान्बाणैः सूतपुत्रो महाबलः ॥ मध्यंदिनमनुप्राप्तो भूतानीव तमोनुदः ॥ ७८ ॥
इति श्रीमहाभारते कर्णपर्वणि कर्णयुद्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ७ ॥ संजय उवाच युयुत्सुं तव पुत्रस्य द्रावयंतं बलं महत् ॥ उलूकोन्यपतत्तूर्णं
तिष्ठतिष्ठेति चाब्रवीत् ॥ १ ॥ इति कर्णपर्वणि नैलकंठीये भारतभावदीपे चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ७ ॥ युयुत्सुमिति ॥ १ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

युयुत्सुश्चततोराजन्शितधारेणपत्रिणा ॥ उलूकंताडयामासवज्रेणेवमहाबलं ॥ २ ॥ उलूकस्तुततःक्रुद्धस्तवपुत्रस्यसंयुगे ॥ क्षुरप्रेणधनुश्छित्वाताडयामास
कर्णिना ॥ ३ ॥ तदपास्यधनुश्छिन्नंयुयुत्सुर्वेगवत्तरं ॥ अन्यदादत्तसुमहच्चापंसंरक्तलोचनः ॥ ४ ॥ शाकुनिंतुततःषष्ट्याविव्याधभरतर्षभ ॥ सारथिंत्रिभिरान
र्छत्तंचभूयोन्यविध्यत ॥ ५ ॥ उलूकस्तंतुविंशत्याविध्वास्वर्णविभूषितैः ॥ अथास्यसमरेक्रुद्धोध्वजंचिच्छेदकांचनं ॥ ६ ॥ सच्छिन्नयष्टिःसुमहान्शीर्यमाणोम
हाध्वजः ॥ पपातप्रमुखेराजन्युयुत्सोःकांचनध्वजः ॥ ७ ॥ ध्वजमुन्मथितंदृष्ट्वायुयुत्सुःक्रोधमूर्छितः ॥ उलूकंपंचभिर्बाणैराजघानस्तनांतरे ॥ ८ ॥ उलूकस्त
स्यसमरेतैलधौतेनमारिष ॥ शिरश्चिच्छेदभल्लेनयंतुर्भरतसत्तम ॥ ९ ॥ तच्छिन्नमपतद्भूमौयुयुत्सोःसारथेस्तदा ॥ तारारूपंयथाचित्रंनिपपातमहीतले ॥ १० ॥
जघानचतुरोश्वांश्चतंचविव्याधपंचभिः ॥ सोतिविद्धोबलवताप्रत्यपायाद्रथांतरं ॥ ११ ॥ तंनिर्जित्यरणेराजन्नुलूकस्त्वरितोययौ ॥ पांचालान्सृंजयांश्चैवविवि
भिन्ननिशितैःशरैः ॥ १२ ॥ शतानीकंमहाराजश्रुतकर्मासुतस्तव ॥ व्यश्वसूतरथंचक्रेनिमेषार्धादसंभ्रमः ॥ १३ ॥ हताश्वेतुरथेतिष्ठन्शतानीकोमहारथः ॥ ग
दांचिक्षेपसंक्रुद्धस्तवपुत्रस्यमारिष ॥ १४ ॥ साकृत्वास्यंदनंभस्महयांश्चैवससारथीन् ॥ पपातधरणींतूर्णंदारयंतीवभारत ॥ १५ ॥ तावुभौविरथौवीरौकुरू
णांकीर्तिवर्धनौ ॥ व्यपाक्रमेतांयुद्धात्तुप्रेक्षमाणौपरस्परं ॥ १६ ॥ पुत्रस्तुतवसंभ्रांतोविविंशोरथमारुहत् ॥ शतानीकोपित्वरितःप्रतिविंध्यरथंगतः ॥ १७ ॥
सुतसोमंतुशकुनिर्विध्वांतुनिशितैःशरैः ॥ नाकंपयतसंक्रुद्धोवार्यौघइवपर्वतं ॥ १८ ॥ सुतसोमस्तुतंदृष्ट्वापितुरत्यंतवैरिणं ॥ शरैरनेकसाहस्रैश्छादयामास
भारत ॥ १९ ॥ तान्शरान्शकुनिस्तूर्णंचिच्छेदान्यैःपतत्रिभिः ॥ लघ्वस्त्रश्चित्रयोधीचजितकाशीचसंयुगे ॥ २० ॥ निवार्यसमरेचापिशरांस्तान्निशितैःशरैः ॥ आ
जघानसुसंक्रुद्धःसुतसोमंत्रिभिःशरैः ॥ २१ ॥ तस्याश्वान्केतनंसूतंतिलशोव्यधमच्छरैः ॥ स्यालस्तवमहाराजततउच्चुक्रुशुर्जनाः ॥ २२ ॥ हताश्वोविरथश्चैव
छिन्नकेतुश्चमारिष ॥ धन्वीधनुर्वरंगृह्यरथाद्भूमावतिष्ठत ॥ २३ ॥ व्यसृजत्सायकांश्चैवस्वर्णपुंखान्शिलाशितान् ॥ छादयामाससमरेतवस्यालस्यतंरथं ॥
॥ २४ ॥ शलभानामिवव्रातान्शरव्रातान्महारथः ॥ रथोपगान्समीक्ष्यैवंविव्यथेनैवसौबलः ॥ २५ ॥ प्रममाथशरांस्तस्यशरव्रातैर्महायशाः ॥ तत्रातुष्यंतयोधा
श्चसिद्धाश्चापिदिविस्थिताः ॥ २६ ॥ सुतसोमस्यतत्कर्मदृष्ट्वाश्रद्धेयमद्भुतं ॥ रथस्थंशकुनिंयत्तुपदातिःसमयोधयत् ॥ २७ ॥

॥ २६ ॥ २७ ॥ मंडलानि भ्रांतमुद्भ्रांतमित्यादीन्मार्गान् अनुलोमविलोमभेदेनद्विगुणतयाचतुर्दश ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ मंडलानांआवर्त्तनेअनुलोमविलोमाभ्यासे ॥ ३६ ॥

तस्यतीक्ष्णैर्महावेगैर्भल्लैःसन्नतपर्वभिः ॥ व्यहनत्कार्मुकंराजन्तूणीरांश्चैवसर्वशः ॥ २८ ॥ सच्छिन्नधन्वाविरथःखड्गमुद्यम्यचानदत् ॥ वैदूर्योत्पलवर्णाभंदंतिदंतमयत्सरुं ॥ २९ ॥ भ्राम्यमाणंततस्तंतुविमलांबरवर्चसं ॥ कालदंडोपमंमेनेसुतसोमस्यधीमतः ॥ ३० ॥ सोचरत्सहसाखड्गीमंडलानिसहस्रशः ॥ चतुर्दशमहाराजशिक्षाबलसमन्वितः ॥ ३१ ॥ भ्रांतमुद्भ्रांतमाविद्धमाप्लुतंविप्लुतंस्तृतं ॥ संपातसमुदीर्णेचदर्शयामाससंयुगे ॥ ३२ ॥ सौबलस्तुततस्तस्यशरांश्चिक्षेपवीर्यवान् ॥ तानापततएवाशुचिच्छेदपरमासिना ॥ ३३ ॥ ततःक्रुद्धोमहाराजसौबलःपरवीरहा ॥ प्राहिणोत्सुतसोमाययशरानाशीविषोपमान् ॥ ३४ ॥ चिच्छेदतांस्तुखड्गेनशिक्षयाचबलेनच ॥ दर्शयन्लाघवंयुद्धेतार्क्ष्यतुल्यपराक्रमः ॥ ३५ ॥ तस्यसंचरतोराजन्मंडलावर्तनेतदा ॥ क्षुरप्रेणसुतीक्ष्णेनखड्गंचिच्छेदसुप्रभं ॥ ३६ ॥ सच्छिन्नःसहसाभूमौनिपपातमहानसिः ॥ अर्धमस्यस्थितंहस्तेसुत्सरोस्तंत्रभारत ॥ ३७ ॥ छिन्नमाज्ञायनिस्त्रिंशमवप्लुत्यपदानिषट् ॥ प्राविध्यत्ततःशेषंसुतसोमोमहारथः ॥ ३८ ॥ तच्छित्वासगुणंचापंरणेतस्यमहात्मनः ॥ पपातधरणींतूर्णंस्वर्णवज्रविभूषितं ॥ ३९ ॥ सुतसोमस्ततोगच्छच्छ्रुतकीर्तेर्महारथं ॥ सौबलोपिधनुर्गृह्यघोरमन्यत्सुदुर्जयं ॥ ४० ॥ अभ्ययात्पांडवानीकंनिघ्नन्शत्रुगणान्बहून् ॥ तत्रनादोमहानासीत्पांडवानांविशांपते ॥ ४१ ॥ सौबलंसमरेदृष्ट्वाविचरंतमभीतवत् ॥ तान्यनीकानिदृप्तानिशस्त्रवंतिमहांतिच ॥ ४२ ॥ द्राव्यमाणान्यदृश्यंतसौबलेनमहात्मना ॥ यथादैत्यचमूंराजन्देवराजोममर्दह ॥ तथैवपांडवींसेनांसौबलेयोव्यनाशयत् ॥ ४३ ॥ इतिश्रीमहाभारतेकर्णपर्वणि सुतसोमसौबलयुद्धेपंचविंशोऽध्यायः ॥ २५ ॥ ॥ ७ ॥ संजयउवाच

धृष्टद्युम्नंकृपोराजन्वारयामाससंयुगे ॥ यथादृष्ट्वावनेसिंहंशरभोवारयेद्युधि ॥ १ ॥ निरुद्धःपार्षतस्तेनगौतमेनबलीयसा ॥ पदात्पदंविचलितुंनाशकत्तत्रभारत ॥ २ ॥ गौतमस्यरथंदृष्ट्वाधृष्टद्युम्नरथंप्रति ॥ वित्रेसुःसर्वभूतानिक्षयंप्राप्तंचमेनिरे ॥ ३ ॥ तत्रावोचन्विमनसोरथिनःसादिनस्तथा ॥ द्रोणस्यनिधनान्नूनंसंक्रुद्धोद्विपदांवरः ॥ ४ ॥ शारद्वतोमहातेजादिव्यास्त्रविदुदारधीः ॥ अपिस्वस्तिभवेदद्यधृष्टद्युम्नस्यगौतमात् ॥ ५ ॥ अपीयंवाहिनीकृत्स्नामुच्येतमहतोभयात् ॥ अप्ययंब्राह्मणःसर्वान्नोहन्यात्समागतान् ॥ ६ ॥

अस्यअसेः सुत्सरोःशोभनमुष्टेः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेपंचविंशोऽध्यायः ॥ २५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ धृष्टेति शरभोष्टपादःसिंहघातीपशुपक्षिशरीरोन्तसिंहवन्महात्मा ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ वर्मणः वर्मप्राप्यअभ्रश्यंतयथा: वर्मनचिच्छिदुरित्यर्थः

यात्संहस्तेरूपमंतकप्रतिमंभृशं ॥ गमिष्यत्ययपदवींभारद्वाजस्यगौतमः ॥ ७ ॥ आचार्यःक्षिप्रहस्तश्चविजयीचसदायुधि ॥ अस्त्रवान्वीर्यसंपन्नःक्रोधेनचस मन्वितः ॥ ८ ॥ पार्षतश्चमहायुद्धेविमुखोद्याभिलक्ष्यते ॥ इत्येवंविविधावाचस्तावकानांपरैःसह ॥ ९ ॥ व्यश्रूयंतमहाराजतयोस्तत्रसमागमे ॥ विनिःश्वस्यततः क्रोधात्कृपःशारद्वतोनृप ॥ १० ॥ पार्षतंचार्दयामासनिश्चेष्टंसर्वमर्मसु ॥ सहन्यमानःसमरेगौतमेनमहात्मना ॥ ११ ॥ कर्त्तव्यंनस्मजानातिमोहेनमहताव तः ॥ तमब्रवीत्ततोत्यंताकच्चित्क्षेमंतुपार्षत ॥ १२ ॥ ईदृशंव्यसनंयुद्धेनतेदृष्टंमयाक्वचित् ॥ दैवयोगात्तुतेबाणानापतन्मर्मभेदिनः ॥ १३ ॥ प्रेषिताद्द्विजमुख्येन मर्माण्युद्दिश्यसर्वतः ॥ व्यावर्त्तयेरथंतूर्णंनदीवेगमिवार्णवात् ॥ १४ ॥ अवध्यंब्राह्मणंमन्येयेनतेविक्रमोहतः ॥ धृष्टद्युम्नस्ततोराजन्शनकैरब्रवीद्वचः ॥ १५ ॥ मु ह्यतेमेमनस्तातगात्रेस्वेदश्चजायते ॥ वेपथुश्चशरीरेमेरोमहर्षश्चसारथे ॥ १६ ॥ वर्जयन्ब्राह्मणंयुद्धेशनैर्याहियतोर्जुनः ॥ अर्जुनंभीमसेनंवासमरेप्राप्यसार थे ॥ १७ ॥ क्षेममद्यभवेदेवमेषामेनैष्ठिकीमतिः ॥ ततःप्रायान्महाराजसारथिस्त्वरयन्हयान् ॥ १८ ॥ यतोभीमोमहेष्वासोयुयुधेतवसैनिकैः ॥ प्रद्रुतंचरथंदृष्ट्वा धृष्टद्युम्नस्यमारिष ॥ १९ ॥ किरन्शतशतान्येवगौतमोनुययौतदा ॥ शंखंचपूरयामासमुहुर्मुहुररिंदमः ॥ २० ॥ पार्षतंत्रासयामासमहेंद्रोनमुचिंयथा ॥ शिखंडि नंतुसमरेभीष्ममृत्युंदुरासदं ॥ २१ ॥ हार्दिक्योवारयामाससस्मयन्निवमुहुर्मुहुः ॥ शिखंडीतुसमासाद्यहृदिकानांमहारथं ॥ २२ ॥ पंचभिर्निशितैर्भल्लैर्जत्रुदेशेस माहनत् ॥ कृतवर्मातुसंक्रुद्धोभित्वाषष्ट्यापतत्रिभिः ॥ २३ ॥ धनुरेकेनचिच्छेदहसन्राजन्महारथः ॥ अथान्यद्धनुरादायद्रुपदस्यात्मजोबली ॥ २४ ॥ तिष्ठति ष्ठेतिसंक्रुद्धोहार्दिक्यंप्रत्यभाषत ॥ ततोस्यनवतिंबाणान्रुक्मपुंखान्सुतेजनान् ॥ २५ ॥ प्रेषयामासराजेंद्रतेस्याभ्रश्यंतवर्मणः ॥ वितथांस्तान्समालक्ष्यपति तांश्चमहीतले ॥ २६ ॥ क्षुरप्रेणसुतीक्ष्णेनकार्मुकंचिच्छिदेभृशं ॥ अथैनंछिन्नधन्वानंभग्नश्रृंगमिवर्षभं ॥ २७ ॥ अशीत्यामार्गणैःक्रुद्धोबाह्वोरुरस्यचार्पयत् ॥ कृतवर्मातुसंक्रुद्धोमार्गणैःक्षतविक्षतः ॥ २८ ॥ ववामरुधिरंगात्रैःकुंभवक्त्रादिवोदकं ॥ रुधिरेणपरिक्लिन्नःकृतवर्मात्वराजत ॥ २९ ॥ वर्षेणक्लेदितोराजन्य थागैरिकपर्वतः ॥ अथान्यंद्धनुरादायसमार्गणगुणंप्रभुः ॥ ३० ॥ शिखंडिनंबाणगणैःस्कंधदेशेव्यताडयत् ॥ स्कंधदेशस्थितैर्बाणैःशिखंडीतुव्यराजत ॥ ३१ ॥ शाखाप्रशाखाविपुलःसुमहान्पादपोयथा ॥ तावन्योन्यंभृशंविध्वारुधिरेणसमुक्षितौ ॥ ३२ ॥

॥ २६ ॥ २७ ॥ २८ ॥ ववामवांतवान् ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

॥३३॥ पार्षतंशिलाशितैः ॥३४॥३५॥३६॥३७॥३८॥ इ०क०नै०भा० षड्विंशोऽध्यायः ॥२६॥ ॥७॥ श्वेतेति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥

अन्योन्यशृंगाभिहतौरेजतुर्वृषभाविव ॥ अन्योन्यस्यवधेयत्नंकुर्वाणौतौमहारथौ ॥ ३३ ॥ रथाभ्यांचेरतुस्तत्रमंडलानिसहस्रशः ॥ कृतवर्मामहाराजपार्षतंनिशितैःशरैः ॥ ३४ ॥ रणेविव्याधसप्तत्यास्वर्णपुंखैःशिलाशितैः ॥ ततोऽस्यसमरेबाणंभोजःप्रहरतांवरः ॥ ३५ ॥ जीवितांतकरंघोरंव्यसृजत्त्वरयान्वितः ॥ सतेनाभिहतोराजन्मूर्छामाशुसमाविशत् ॥ ३६ ॥ ध्वजयष्टिंचसहसाशिश्रियेकश्मलावृतः ॥ अपोवाहरणात्तूर्णंसारथीरथिनांवरं ॥ ३७ ॥ हार्दिक्यशरसंतप्तंनिःश्वसंतंपुनःपुनः ॥ पराजितेततःशूरेद्रुपदस्यात्मजेप्रभो ॥ व्यद्रवत्पांडवीसेनाव्यधमानासमंततः ॥ ३८ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेषड्विंशोऽध्यायः ॥ २६ ॥ ॥ ७ ॥ संजयउवाच श्वेताश्वोथमहाराजव्यधमत्तावकंबलं ॥ यथावायुःसमासाद्यतूलराशिंसमंततः ॥ १ ॥ प्रत्युद्ययुस्त्रिगर्त्तास्तंशिबयःकौरवैःसह ॥ शाल्वाःसंशप्तकाश्चैवनारायणबलंचतत् ॥ २ ॥ सत्यसेनश्चंद्रदेवोमित्रदेवःसुतंजयः ॥ सौश्रुतिश्चित्रसेनश्चमित्रवर्माचभारत ॥ ३ ॥ त्रिगर्त्तराजःसमरेभ्रातृभिःपरिवारितः ॥ पुत्रैश्चैवमहेष्वासैर्नानाशस्त्रविशारदैः ॥ ४ ॥ व्यसृजंतशरव्रातान्किरंतोर्जुनमाहवे ॥ अभ्यवर्त्तंतसहसावार्योघाइवसागरं ॥ ५ ॥ तेत्वर्जुनंसमासाद्ययोधाःशतसहस्रशः ॥ अगच्छन्विलयंसर्वेतार्क्ष्यंदृष्ट्वेवपन्नगाः ॥ ६ ॥ तेहन्यमानाःसमरेनाजहुःपांडवंरणे ॥ हन्यमानामहाराजशलभाइवपावकं ॥ ७ ॥ सत्यसेनस्त्रिभिर्बाणैर्विव्याधयुधिपांडवं ॥ मित्रदेवस्त्रिषष्ट्यातुचंद्रसेनस्तुसप्तभिः ॥ ८ ॥ मित्रवर्मात्रिसप्तत्यासौश्रुतिश्चापिसप्तभिः ॥ शत्रुंजयस्तुविंशत्यासुशर्मानवभिःशरैः ॥ ९ ॥ सविद्धोबहुभिःसंख्येप्रतिविव्याधतान्नृपान् ॥ सौश्रुतिंसप्तभिर्विध्वासत्यसेनंत्रिभिःशरैः ॥ १० ॥ शत्रुंजयंचविंशत्याचंद्रदेवंतथाष्टभिः ॥ मित्रदेवंशतेनैवश्रुतसेनंत्रिभिःशरैः ॥ ११ ॥ नवभिर्मित्रवर्माणंसुशर्माणंतथाष्टभिः ॥ शत्रुंजयंचराजानंहत्वातत्रशिलाशितैः ॥ १२ ॥ सौश्रुतेःसशिरस्त्राणंशिरःकायादपाहरत् ॥ त्वरितश्चंद्रदेवंचशरैर्निन्येयमक्षयं ॥ १३ ॥ तथेतरान्महाराजयतमानान्महारथान् ॥ पंचभिःपंचभिर्बाणैरेकैकंप्रत्यवारयत् ॥ १४ ॥ सत्यसेनस्तुसंक्रुद्धस्तोमरंव्यसृजन्महत् ॥ समुद्दिश्यरणेकृष्णंसिंहनादंननादच ॥ १५ ॥ सनिर्भिद्यभुजंसव्यंमाधवस्यमहात्मनः ॥ अयस्मयोहेमदंडोजगामधरणींतदा ॥ १६ ॥ माधवस्यतुविद्धस्यतोमरेणमहारणे ॥ प्रतोदःप्रापतद्धस्ताद्रश्मयश्चविशांपते ॥ १७ ॥ वासुदेवंविभिन्नांगंदृष्ट्वापार्थोधनंजयः ॥ क्रोधमाहारयत्तीव्रंकृष्णंचेदमुवाचह ॥ १८ ॥ प्रापयाश्वान्महाबाहोसत्यसेनंप्रतिप्रभो ॥ यावदेनंशरैस्तीक्ष्णैर्नयामियमसादनं ॥ १९ ॥

॥२०॥२१॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥ ध्वजादीनांशब्दोऽश्रूयतेतिषष्ठेनान्वयः ॥२९॥३०॥३१॥३२॥३३॥३४॥३५॥३६॥३७॥३८॥ हस्त्यश्वंचास्यतः छिंदतः स्वानुगाइव यथास्वस्मिन्

प्रतोदंगृह्यसोन्यसुरश्मीनपियथापुरा ॥ वाहयामासतानश्वान्सत्यसेनरथंप्रति ॥ २० ॥ विष्वक्सेनंतुनिर्भिन्नंदृष्ट्वापार्थोधनंजयः ॥ सत्यसेनंशरैस्तीक्ष्णैर्वारयित्वामहारथः ॥ २१ ॥ ततःसुनिशितैर्भल्लैराज्ञस्तस्यमहच्छिरः ॥ कुंडलोपचितंकायाच्चकर्त्तपृतनांतरे ॥ २२ ॥ तन्निकृत्यशितैर्बाणैर्मित्रवर्माणमाक्षिपत् ॥ वत्सदंतेनतीक्ष्णेनसारथिंचास्यमारिष ॥ २३ ॥ ततःशरशतैर्भूयःसंशप्तकगणान्बली ॥ पातयामाससंक्रुद्धःशतशोथसहस्रशः ॥ २४ ॥ ततोरजतपुंखेनराजन्शीर्षंमहात्मनः ॥ मित्रसेनस्यचिच्छेदक्षुरप्रेणमहारथः ॥ २५ ॥ सुशर्माणंसुसंक्रुद्धोजत्रुदेशेसमाहनत् ॥ ततःसंशप्तकाःसर्वेपरिवार्यधनंजयं ॥ २६ ॥ शस्त्रौघैर्ममृदुःक्रुद्धानादयंतोदिशोदश ॥ अभ्यर्दितस्तुतज्जिष्णुःशक्रतुल्यपराक्रमः ॥ २७ ॥ ऐंद्रमस्त्रममेयात्माप्रादुश्चक्रेमहारथः ॥ ततःशरसहस्राणिप्रादुरासन्विशांपते ॥ २८ ॥ ध्वजानांछिद्यमानानांकार्मुकाणांचमारिष ॥ रथानांसपताकानांतूणीराणांयुगैःसह ॥ २९ ॥ अक्षाणामथचक्राणांयोक्त्राणांरश्मिभिःसह ॥ कूबराणांवरूथानांपृषत्कानांचसंयुगे ॥ ३० ॥ अश्मानांपततांचापिप्रासानामृष्टिभिःसह ॥ गदानांपरिघानांचशक्तितोमरपट्टिशैः ॥ ३१ ॥ शतघ्नीनांसचक्राणांभुजानांचोरुभिःसह ॥ कंठसूत्रांगदानांचकेयूराणांचमारिष ॥ ३२ ॥ हाराणामथनिष्काणांतनुत्राणांचभारत ॥ छत्राणांव्यजनानांचशिरसांमुकुटैःसह ॥ ३३ ॥ अश्रूयतमहान्शब्दस्तत्रतत्रविशांपते ॥ सकुंडलानिस्वक्षीणिपूर्णचंद्रनिभानिच ॥ ३४ ॥ शिरांस्युर्व्यामदृश्यंतताराजालमिवांबरे ॥ सुस्रग्वीणिसुवासांसिचंदनेनोक्षितानिच ॥ ३५ ॥ शरीराणिव्यदृश्यंतनिहतानांमहीतले ॥ गंधर्वनगराकारंघोरमायोधनंतदा ॥ ३६ ॥ निहतैराजपुत्रैश्चक्षत्रियैश्चमहाबलैः ॥ हस्तिभिःपतितैश्चैवतुरंगैश्चाभवन्मही ॥ ३७ ॥ अगम्यरूपासमरेविशीर्णैरिवपर्वतैः ॥ नासीच्चक्रपथस्तत्रपांडवस्यमहात्मनः ॥ ३८ ॥ निघ्नतःशात्रवान्भल्लैर्हस्त्यश्वंचास्यतोमहत् ॥ स्वानुगाइवसीदंतिरथचक्राणिमारिष ॥ ३९ ॥ चरतस्तस्यसंग्रामेतस्मिन्लोहितकर्दमे ॥ सीदमानानिचक्राणिसमूहुस्तुरगाभृशं ॥ ४० ॥ श्रमेणमहतायुक्तामनोमारुतरंहसः ॥ वध्यमानंतुतत्सैन्यंपांडुपुत्रेणधन्विना ॥ ४१ ॥ प्रायशोविमुखंसर्वंनावतिष्ठतभारत ॥ तान्जित्वासमरेजिष्णुःसंशप्तकगणान्बहून् ॥ विरराजतदापार्थोविधूमोग्निरिवज्वलन् ॥ ४२ ॥ इ० म० भा० क० संशप्तकजयेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

नष्टेऽनुचराःसीदंत्येवंरथानांभंगदृष्ट्वाचक्राणिनश्यंतिअक्षभंगमदितिभावः आतंकादिवेतिपाठेचिंतयेवेत्युपचारः ॥३९॥ सीदमानानिपंकमज्जनात् ॥४०॥४१॥४२॥ इ० क० नै० भा० सप्तविंशोऽध्यायः ॥२७॥

युधिष्ठिरमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ आभरणंअववव्रुःअवक

संजयउवाच युधिष्ठिरंमहाराजविसृजंतंशरान्बहून् ॥ स्वयंदुर्योधनोराजाप्रत्यगृह्णादभीतवत् ॥ १ ॥ तमापतंतंसहसातवपुत्रंमहारथं ॥ धर्मराजोद्रुतंविध्वा तिष्ठतिष्ठेतिचाब्रवीत् ॥ २ ॥ सतुतंप्रतिविव्याधनवभिर्निशितैःशरैः ॥ सारथिंचास्यभल्लेनभृशंक्रुद्धोभ्यताडयत् ॥ ३ ॥ ततोयुधिष्ठिरोराजन्स्वर्णपुंखान्शिली मुखान् ॥ दुर्योधनायचिक्षेपत्रयोदशशिलाशितान् ॥ ४ ॥ चतुर्भिश्चतुरोवाहांस्तस्यहत्वामहारथः ॥ पंचमेनशिरःकायात्सारथेश्चसमाक्षिपत् ॥ ५ ॥ षष्ठेनतु ध्वजंराज्ञःसप्तमेनतुकार्मुकं ॥ अष्टमेनतथाखङ्गंपातयामासभूतले ॥ ६ ॥ पंचभिर्नृपतिंचापिधर्मराजोर्दयद्भृशं ॥ हताश्वात्तुरथात्तस्मादवप्लुत्यसुतस्तव ॥ ७ ॥ उत्तमंव्यसनंप्राप्तोभूमावेवावतिष्ठत ॥ तंतुकृच्छ्रगतंदृष्ट्वाकर्णद्रौणिकृपादयः ॥ ८ ॥ अभ्यवर्त्ततसहंसापरीप्संतोनराधिपं ॥ अथपांडुसुताःसर्वेपरिवार्ययुधि ष्ठिरं ॥ ९ ॥ अन्वयुःसमरेराजंस्ततोयुद्धमवर्त्तत ॥ ततस्तूर्यसहस्राणिप्रावाद्यंतमहामृधे ॥ १० ॥ ततःकिलकिलाशब्दाःप्रादुरासन्महीपते ॥ यत्राभ्यगच्छन्स मरेपांचालाःकौरवैःसह ॥ ११ ॥ नरानरैःसमाजग्मुर्वारणावरवारणैः ॥ रथाश्वरथिभिःसार्धंहयाश्वहयसादिभिः ॥ १२ ॥ द्वंद्वान्यासन्महाराजप्रेक्षणीयानिसं युगे ॥ विविधान्यप्यचिंत्यानिशस्त्रवंत्युत्तमानिच ॥ १३ ॥ तेशूराःसमरेसर्वेचित्रंलघुचसुष्ठुच ॥ अयुध्यंतमहावेगाःपरस्परवधैषिणः ॥ १४ ॥ अन्योन्यंसमरे जघ्नुर्योधव्रतमनुष्ठिताः ॥ नहितेसमरंचक्रुःपृष्ठतोवैकथंचन ॥ १५ ॥ मुहूर्त्तमेवतंयुद्धमासीन्मधुरदर्शनं ॥ ततउन्मत्तवद्राजन्निर्मर्यादमवर्त्तत ॥ १६ ॥ रथीनां गंसमासाद्यदारयन्निशितैःशरैः ॥ प्रेषयामासुःकालायशरैःसन्नतपर्वभिः ॥ १७ ॥ नागाहयान्समासाद्यविक्षिपंतोबहून्रणे ॥ दारयामासुरत्युग्रंतत्रतत्रतदात दा ॥ १८ ॥ हयारोहाश्चबहवःपरिवार्यहयोत्तमान् ॥ तलशब्दरवांश्चक्रुःसंपतंतस्ततस्ततः ॥ १९ ॥ धावमानांस्ततस्तांस्तुद्रवमाणान्महागजान् ॥ पार्श्वतःपृष्ठतश्चैव निजघ्नुर्हयसादिनः ॥ २० ॥ विद्राव्यचबहूनश्वान्नागाराजन्मदोत्कटाः ॥ विषाणैश्चापरेजघ्नुर्ममृदुश्चापरेभृशं ॥ २१ ॥ साश्वारोहांश्चतुरगान्विषाणैर्विव्यधूरु षा ॥ अपरेचिक्षिपुर्वेगात्प्रगृह्यातिबलास्तदा ॥ २२ ॥ पादातैराहतानागाविवरेषुसमंततः ॥ चक्रुरार्त्तस्वरंघोरंदुद्रुवुश्चदिशोदश ॥ २३ ॥ पदातीनांतुसहसा प्रद्रुतानांमहाहवे ॥ उत्सृज्याभरणंतूर्णमववव्रूरणाजिरे ॥ २४ ॥ निमित्तंमन्यमानास्तुपरिणाम्यमहागजाः ॥ जगृहुर्बिभिदुश्चैवचित्राण्याभरणानिच ॥ २५ ॥

स्पष्टलक्षं ॥ २४ ॥ निमित्तंजयहेतुं महांतोगजायेषांतेमहागजाःगजारोहाःजगृहुःहस्तिभिर्ग्राहयामासुः परिणाम्यविनाम्यहस्तिनमितिशेषः बिभिदुश्चशत्रून्गजैरेव ॥ २५ ॥

तांस्तुतत्रप्रसक्तान्वैपरिवार्यपदातयः॥ हस्त्यारोहान्निजघ्नुस्तेमहावेगाबलोत्कटाः॥ २६ ॥ अपरेहस्तिभिर्हस्तैःखंविक्षिप्तामहाहवे ॥ निपतंतोविषाणाग्रैर्भृशंवि
द्धाःसुशिक्षितैः॥ २७॥ अपरेसहसागृह्य विषाणैरेवसूदिताः॥ सेनांतरंसमासाद्यकेचित्तत्रमहागजैः॥ २८॥ क्षुण्णगात्रामहाराजविक्षिप्यचपुनःपुनः॥ अप
रेव्यजनानीवविभ्राम्यनिहतामृधे ॥ २९ ॥ पुरःसराश्चनागानामपरेषांविशांपते ॥ शरीराण्यतिविद्धानितत्रतत्ररणाजिरे ॥ ३०॥ प्रतिमानेषुकुंभेषुदंतवेष्टेषु
चापरे॥ निगृहीताभृशंनागाःप्रासतोमरशक्तिभिः॥ ३१ ॥ निगृह्यचगजाःकेचित्पार्श्वस्थैर्भृशदारुणैः ॥ रथाश्वसादिभिस्तत्रसंभिन्नान्यपतन्भुवि॥ ३२॥
सहयाःसादिनस्तत्रतोमरेणमहामृधे॥ भूमावमृद्नन्वेगेनसचर्माणंपदातिनं॥ ३३॥ तथासावरणान्कांश्चित्तत्रतत्रविशांपते॥रथान्नागाःसमासाद्यपरिगृह्य
चमारिष॥ ३४॥ व्याक्षिपन्सहसातत्रघोररूपंभयानके॥ नाराचैर्निहताश्चापिगजाःपेतुर्महाबलाः॥ ३५॥ पर्वतस्येवशिखरंवज्ररुग्णंमहीतले ॥ योधायोधा
न्समासाद्यमुष्टिभिर्व्यहनन्युधि॥ ३६॥ केशेष्वन्योन्यमाक्षिप्यचिक्षिपुर्बिभिदुश्चह ॥ उद्यम्यचभुजानन्येनिक्षिप्यचमहीतले ॥ ३७॥ पदाचोरःसमाक्रम्य
स्फुरतोऽपाहरच्छिरः॥ पततश्चापरोराजन्विजहारासिनाशिरः॥३८॥जीवतश्चतथैवान्यःशस्त्रंकायेन्यमज्जयत्॥मुष्टियुद्धंमहच्चासीद्योधानांतत्रभारत॥३९॥
तथाकेशग्रहश्चोग्रोबाहुयुद्धंचभैरवं॥ समासक्तस्यचान्येनअविज्ञातस्तथापरः॥ ४०॥ जहारसमरेप्राणान्नानाशस्त्रैरनेकधा ॥ संसक्तेषुचयोधेषुवर्त्तमानेच
संकुले॥ ४१॥ कबंधान्युत्थितानिस्युःशतशोथसहस्रशः॥ शोणितैःसिच्यमानानिशस्त्राणिकवचानिच॥ ४२॥ महारागानुरक्तानिवस्त्राणीवचकाशिरे॥एं
वमेतन्महद्युद्धंदारुणंशस्त्रसंकुलं॥ ४३॥ उन्मत्तगंगाप्रतिमंशब्देनापूरयज्जगत्॥ नैवस्वेनपरेराजन्विज्ञायंतेशरातुराः॥ ४४॥ योद्धव्यमितियुध्यंतेराजानो
जयगृद्धिनः॥ स्वान्स्वेजघ्नुर्महाराजपरांश्चैवसमागतान्॥४५॥उभयोःसेनयोर्वीरैर्व्याकुलंसमपद्यत॥रथैर्भग्नैर्महाराजवारणैश्चनिपातितैः॥४६॥हयैश्चपतितै
स्तत्रनरैश्चविनिपातितैः॥अगम्यरूपापृथिवीक्षणेनसमपद्यत॥४७॥क्षणेनासीन्महीपालक्षतजौघप्रवर्त्तिनी॥पंचालानहनत्कर्णस्त्रिगर्त्तांश्चधनंजयः॥४८॥

भीमसेनःकुरून्राजन्हस्त्यनीकंचसर्वशः ॥ एवमेपक्षयोवृत्तःकुरुपांडवसेनयोः ॥ अपराह्णेगतेसूर्येकांक्षतांविपुलंयशः ॥ ४९ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेऽष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ ७ ॥ धृतराष्ट्रउवाच । अतितीव्राणिदुःखानिदुःसहानिबहूनिच ॥ त्वत्तोहंसंजयाश्रौषंपुत्राणांचैवसंक्षयं ॥ १ ॥ यथात्वंमेकथयसेयथायुद्धमवर्तत ॥ नसंतिसूतकौरव्याइतिमेनिश्चितामतिः ॥ २ ॥ दुर्योधनश्चविरथःकृतस्तत्रमहारथः ॥ धर्मपुत्रःकथंचक्रेतस्यवानृपतिः कथं ॥ ३ ॥ अपराह्णेकथंयुद्धमभवल्लोमहर्षणं ॥ तन्ममाचक्ष्वतत्त्वेनकुशलोह्यसिसंजय ॥ ४ ॥ संजयउवाच । संसक्तेषुतुसैन्येषुवध्यमानेषुभागशः ॥ रथमन्यंसमास्थायपुत्रस्तवविशांपते ॥ ५ ॥ क्रोधेनमहतायुक्तःसविषोभुजगोयथा ॥ दुर्योधनःसमालक्ष्यधर्मराजंयुधिष्ठिरं ॥ ६ ॥ प्रोवाचसूतंत्वरितोयाहियाहीतिभारत ॥ तत्रमांप्रापयक्षिप्रंसारथेयत्रपांडवः ॥ ७ ॥ ध्रियमाणातपत्रेणराजाराजतिदंशितः ॥ ससूतश्चोदितोराज्ञाराज्ञःस्यंदनमुत्तमं ॥ ८ ॥ युधिष्ठिरस्याभिमुखंप्रेषयामाससंयुगे ॥ ततोयुधिष्ठिरःक्रुद्धःप्रभिन्नइवकुंजरः ॥ ९ ॥ सारथिंचोदयामासयाहियत्रसुयोधनः ॥ तौसमाजग्मतुर्वीरौभ्रातरौरथसत्तमौ ॥ १० ॥ समेत्यचमहावीरौसंरब्धौयुद्धदुर्मदौ ॥ ववर्षतुर्महेष्वासौशरैरन्योन्यमाहवे ॥ ११ ॥ ततोदुर्योधनोराजाधर्मशीलस्यमारिष ॥ शिलाशितेनभल्लेनधनुश्चिच्छेदसंयुगे ॥ १२ ॥ तंनामृष्यतसंक्रुद्धोह्यवमानंयुधिष्ठिरः ॥ अपविध्यधनुश्छिन्नंक्रोधसंरक्तलोचनः ॥ १३ ॥ अन्यत्कार्मुकमादायधर्मपुत्रश्चमूमुखे ॥ दुर्योधनस्यचिच्छेदध्वजंकार्मुकमेवच ॥ १४ ॥ अथान्यद्धनुरादायप्राविध्यतयुधिष्ठिरं ॥ तावन्योन्यंसुसंक्रुद्धौशरवर्षाण्यमुंचतां ॥ १५ ॥ सिंहाविवसुसंरब्धौपरस्परजिगीषया ॥ जघ्नतुस्तौरणेन्योन्यंनर्दमानौवृषाविव ॥ १६ ॥ अंतरंमार्गमाणौचचेरतुस्तौमहारथौ ॥ ततःपूर्णायतोत्सृष्टैःशरैस्तौतुकृतव्रणौ ॥ १७ ॥ विरेजतुर्महाराजकिंशुकाविवपुष्पितौ ॥ ततोराजन्विमुंचंतौसिंहनादान्मुहुर्मुहुः ॥ १८ ॥ तलयोश्चतथाशब्दान्धनुषश्चमहाहवे ॥ शंखशब्दवरांश्चैवचक्रतुस्तौनरेश्वरौ ॥ १९ ॥ अन्योन्यंतौमहाराजपीडयांचक्रतुर्भृशं ॥ ततोयुधिष्ठिरोराजापुत्रंतवशरैस्त्रिभिः ॥ २० ॥ आजघानोरसिक्रुद्धोवज्रवेगैर्दुरासदैः ॥ प्रतिविव्याधतंतूर्णंतवपुत्रोमहीपतिः ॥ २१ ॥ पंचभिर्निशितैर्बाणैःस्वर्णपुंखैःशिलाशितैः ॥ ततोदुर्योधनोराजाशक्तिंचिक्षेपभारत ॥ २२ ॥

नः कथंनमुच्यतइतिशेषः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ अपविध्यत्यक्त्वा ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

सर्वपारसवी सर्वविनाशिनीगौरादिः तिरस्कारविंनाशेचपुंसिपारसवःपुमानितिमेदिनी ॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ इतिकर्णपर्वणिनैलकंठीये

सर्वपारसवींतीक्ष्णांमहोल्काप्रतिमांतदा ॥ तामापतंतींसहसाधर्मराजःशितैःशरैः॥ २३॥त्रिभिश्छिच्छेदसहसातंचविव्याधपंचभिः॥निपपाततः साथस्वर्णदंडामहास्वना॥ २४ ॥ निपतंतीमहोल्केवव्यराजच्छिखिसन्निभा ॥ शक्तिविनिहतांदृष्ट्वापुत्रस्तवविशांपते ॥ २५ ॥ नवभिर्निशितैर्भल्लैर्निजघानयुधिष्ठिरं ॥ सोतिविद्धोबलवताशत्रुणाशत्रुतापनः ॥ २६ ॥ दुर्योधनंसमुद्दिश्यबाणंजग्राहसत्वरः ॥ समाधत्तचतंबाणंधनुर्मध्येमहाबलः ॥ २७ ॥ चिक्षेपचमहाराजततः क्रुद्धःपराक्रमी ॥ सतुबाणःसमासाद्यतवपुत्रंमहारथं ॥२८॥ व्यामोहयतराजानंधरणींचददारह ॥ ततोदुर्योधनःक्रुद्धोगदामुद्यम्यवेगितः ॥ २९ ॥ विधित्सुः कलहस्यांतंधर्मराजमुपाद्रवत् ॥ तमुद्यतगदंदृष्ट्वादंडहस्तमिवांतकं ॥ ३० ॥ धर्मराजोमहाशक्तिंप्राहिणोत्तवसूनवे ॥ दीप्यमानांमहावेगांमहोल्कांज्वलितामिव ॥ ३१ ॥ रथस्थःसतयाविद्धोवर्मभित्वास्तनांतरे ॥ भृशंसंविग्नहृदयःपपातचमुमोहच ॥ ३२ ॥ भीमस्तमाहचततःप्रतिज्ञामनुचिंतयन् ॥ नायंवध्यस्तवनृपइत्युक्तःसत्यवर्त्तत ॥ ३३ ॥ तवस्त्वरितमागम्यकृतवर्मातवात्मजं ॥ प्रत्यपद्यतराजानंनिमग्नंव्यसनार्णवे ॥ ३४ ॥ गदामादायभीमोपिहेमपट्टपरिष्कृतां ॥ अभिदुद्राववेगेनकृतवर्माणमाहवे ॥ ३५ ॥ एवंतदभवद्युद्धंत्वदीयानांपरैःसह ॥ अपराह्णेमहाराजकांक्षतांविजयंयुधि ॥ ३६ ॥ इतिश्रीमहाभारतेकर्णपर्वणि संकुलयुद्धेएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ७ ॥ संजयउवाच. ततःकर्णपुरस्कृत्यत्वदीयायुद्धदुर्मदाः ॥ पुनरावृत्यसंग्रामंचक्रुर्देवासुरोपमं ॥ १ ॥ द्विरदनररथाश्वशंखशब्दैःपरिहृषिताविविधैश्चशस्त्रपातैः ॥ द्विरदरथपदातिसादिसंघाःपरिकुपिताभिमुखाःप्रजघ्निरे ॥ २ ॥शितपरश्वधसासिपट्टिशैरिषुभिरनेकविधैश्चसूदिताः ॥ द्विरदरथहयामहाहवेवरपुरुषैःपुरुषाश्ववाहनैः ॥ ३ ॥कमलदिनकरेंदुसन्निभैःसितदशनैःसुमुखाक्षिनासिकैः॥रुचिरमुकुटकुंडलैर्महीपुरुषशिरोभिरुपस्तृताबभौ ॥ ४ ॥ परिघमुसलशक्तितोमरैर्नखरभुशुंडिगदाशतैर्हताः ॥ द्विरदनरहयाःसहस्रशोरुधिरनदीप्रवहास्तदाभवन् ॥ ५ ॥ प्रहतरथनराश्वकुंजरंप्रतिभयदर्शनमुल्बणव्रणं ॥तदहितहतमाबभौबलंपितृपतिराष्ट्रमिवप्रजाक्षये॥ ६ ॥ अथतवनरदेवसैनिकास्तवचसुताःसुरसूनुसन्निभाः ॥ अमितबलपुरःसरारणेकुरुवृषभाःशिनिपुत्रमभ्ययुः॥ ७ ॥तदतिरुधिरभीममाबभौपुरुषवराश्वरथद्विपाकुलं॥लवणजलसमुद्धतस्वनंबलमसुरामरसैन्यसप्रभं ॥ ८ ॥

भारतभावदीपेएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ७ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ लवणजलः क्षारसमुद्रः ॥ ८ ॥

॥ २८ ॥

[illegible]तिसमविक्रमस्ततस्त्रिदशवरावरजोपमंयुधि ॥ दिनकरकिरणप्रभैःपृषत्कैरवितनयोभ्यहनच्छिनिप्रवीरं ॥ ९ ॥ तमपिसरथवाजिसारथिंशिनिवृष भोविविधैःशरैस्त्वरन् ॥ भुजगविषसमप्रभैरणेपुरुषवरंसमवास्तृणोत्तदा ॥ १० ॥ शिनिवृषभशरैर्निपीडितंतवसुहृदोवसुषेणमभ्ययुः ॥ त्वरितमतिरथारथ र्षभंद्विरदरथाश्वपदातिभिःसह ॥ ११ ॥ तदुदधिनिभमाद्रवद्बलंत्वरिततरैःसमभिद्रुतंपरैः ॥ द्रुपदसुतमुखैस्तदाभवत्पुरुषरथाश्वगजक्षयोमहान् ॥ १२ ॥ अथ पुरुषवरौकृताह्निकौभवमभिपूज्ययथाविधिप्रभुं ॥ अरिवधकृतनिश्चयौद्रुतंतवबलमर्जुनकेशवौस्तृतौ ॥ १३ ॥ जलदनिनदनिःस्वनंरथंपवनविधूतपताककेत नं ॥ सितहयमुपयांतमंतिकंकृतमनसोदद्दशुस्तदारयः ॥ १४ ॥ अथविस्फार्यगांडीवंरथेनृत्यन्निवार्जुनः ॥ शरसंबाधमकरोत्खंदिशःप्रदिशस्तथा ॥ १५ ॥ रथान्विमानप्रतिमान्मज्जयन्सायुधध्वजान् ॥ ससारथींस्तदाबाणैरभ्राणीवानिलोवधीत् ॥ १६ ॥ गजान्गजप्रयंतृंश्चवैजयंत्यायुधध्वजान् ॥ सादिनोश्वांश्च पत्तींश्चशरैर्निन्येयमक्षयं ॥ १७ ॥ तमंतकमिवक्रुद्धमनिवार्यंमहारथं ॥ दुर्योधनोभ्ययादेकोनिघ्नन्बाणैरजिह्मगैः ॥ १८ ॥ तस्यार्जुनोधनुःसूतमश्वान्केतुंच सायकैः ॥ हत्वासप्तभिरेकेनछत्रंचिच्छेदपत्रिणा ॥ १९ ॥ नवमंचसमाधायव्यसृजत्प्राणघातिनं ॥ दुर्योधनायेपुवरंतंद्रौणिःसमधाच्छिनत् ॥ २० ॥ ततोद्रौ णेर्धनुश्छित्वाहत्वाचाश्वरथाञ्शरैः ॥ कृपस्यापितदत्युग्रंधनुश्चिच्छेदपांडवः ॥ २१ ॥ हार्दिक्यस्यधनुश्छित्वाध्वजंचाश्वांस्तदावधीत् ॥ दुःशासनस्येष्वसनंछि त्वाराधेयमभ्ययात् ॥ २२ ॥ अथसात्यकिमुत्सृज्यत्वरन्कर्णोर्जुनंत्रिभिः ॥ विध्वाविव्याधविंशत्याकृष्णंपार्थंपुनःपुनः ॥ २३ ॥ नग्लानिरासीत्कर्णस्यक्षिपतः सायकान्बहून् ॥ रणेविनिघ्नतःशत्रून्क्रुद्धस्येवशतक्रतोः ॥ २४ ॥ अथसात्यकिरागत्यकर्णंविध्वाशितैःशरैः ॥ नवत्यानवभिश्चोग्रैःशतेनपुनरार्पयत् ॥ २५ ॥ ततःप्रवीराःपार्थानांसर्वेकर्णमपीडयन् ॥ युधामन्युःशिखंडीचद्रौपदेयाःप्रभद्रकाः ॥ २६ ॥ उत्तमौजायुयुत्सुश्चयमौपार्षतएवच ॥ चेदिकारूषमत्स्यानांकेक यानांचयद्बलं ॥ २७ ॥ चेकितानश्चबलवान्धर्मराजश्चसुव्रतः ॥ एतेरथाश्वद्विरदैःपत्तिभिश्चोग्रविक्रमैः ॥ २८ ॥ परिवार्यरणेकर्णंनानाशस्त्रैरवाकिरन् ॥ भा षंतोवाग्भिरुग्राभिःसर्वेकर्णवधेधृताः ॥ २९ ॥ तांशस्त्रवृष्टिंबहुधाकर्णश्छित्वाशितैःशरैः ॥ अपोवाहास्त्रवीर्येणद्रुमंभंक्त्वेवमारुतः ॥ ३० ॥ ॥ २९ ॥ ३० ॥

॥ २८ ॥

॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ निष्कैवल्यंनिश्चितंकैवल्यंमरणंयस्मिन्तत्तथा ॥ ३६॥ प्रत्यपद्यतप्रविष्टः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ इतिकर्णपर्वणिनैलकं
ठीयेभारतभावदीपेत्रिंशोऽध्यायः ॥ ३० ॥ ॥ ९ ॥ स्वेनच्छंदेनइच्छया आततायिनःशस्त्रपाणेः ॥ १ ॥ भद्रांसुभद्रां बलिभृतःकरदान् ॥ २॥ २ ॥ अरक्षत्घोषयात्रायांभरतान्दुर्योधनादीन् ॥ ४ ॥

रथिनःसमहामात्रान्गजानश्वान्ससादिनः॥ पत्तिव्रातांश्चसंक्रुद्धोनिघ्नन्कर्णोव्यदृश्यत॥ ३१ ॥ तद्वध्यमानंपांडूनांबलंकर्णास्त्रतेजसा ॥ विशस्त्रपत्रदेहासु
प्रायआसीत्पराङ्मुखं॥ ३२ ॥ अथकर्णास्त्रमस्त्रेणप्रतिहत्यार्जुनःस्मयन्॥ दिशंखंचैवभूमिंचप्रावृणोच्छरवृष्टिभिः॥ ३३ ॥ मुसलानीवसंपेतुःपरिघाइवचे
षवः॥ शतघ्न्यइवचाप्यन्येवज्राण्युग्राणिचापरे॥ ३४॥ तैर्वध्यमानंतत्सैन्यंसपत्त्यश्वरथद्विपं॥ निमीलिताक्षमत्यर्थंबभ्रामचननादच॥ ३५॥ निष्कैवल्यंतदा
युद्धंप्रापुरश्वनरद्विपाः॥ हन्यमानाःशरैरार्त्तास्तदाभीताःप्रदुद्रुवुः॥ ३६॥ त्वदीयानांतदायुद्धेसंसक्तानांजयैषिणां॥ गिरिमस्तंसमासाद्यप्रत्यपद्यतभानुमान्
॥ ३७॥ तमसाचमहाराजरजसाचविशेषतः॥ नकिंचित्प्रत्यपश्यामशुभंवायदिवाऽशुभं॥ ३८॥ तेत्रस्यंतोमहेष्वासारात्रियुद्धस्यभारत॥ अपयानंततश्चक्रुः
सहिताःसर्वयोधिभिः॥ ३९॥ कौरवेष्वपयातेषुतदाराजन्दिनक्षये॥ जयंसुमनसःप्राप्यपार्थाःस्वशिबिरंययुः ॥ ४० ॥ वादित्रशब्दैर्विविधैःसिंहनादैःसगर्
जितैः॥ परानुपहसंतश्चस्तुवंतश्चाच्युतार्जुनौ॥ ४१॥ कृतेऽवहारेतैर्वीरैःसैनिकाःसर्वएवते॥ आशीर्वाचःपांडवेषुप्रायुज्यंतनरेश्वराः॥ ४२॥ ततःकृतेऽवहारेचप्रहृ
ष्टास्तत्रपांडवाः॥ निशायांशिबिरंगत्वान्यवसंतनरेश्वराः॥ ४३॥ ततोरक्षःपिशाचाश्चश्वापदाश्चैवसंघशः॥ जग्मुरायोधनंघोरंरुद्रस्याक्रीडसन्निभं॥ ४४॥
इतिश्रीमहाभारतेकर्णपर्वणिप्रथमेयुद्धदिवसेत्रिंशोऽध्यायः ॥ ३०॥ ॥ ९ ॥ धृतराष्ट्रउवाच स्वेनच्छंदननःसर्वानवधीद्व्यक्तमर्जुनः॥ नत्यस्यस
मरेमुच्येदंतकोप्याततायिनः॥ १ ॥ पार्थश्चैकोहरद्भद्रामेकश्चाग्निमतर्पयत्॥ एकश्चेमांमहींजित्वाचक्रेबलिभृतोनृपान्॥ २ ॥ एकोनिवातकवचानहनद्दिव्य
कार्मुकः॥ एकःकिरातरूपेणस्थितंसर्वमयोधयत्॥ ३ ॥ एकोह्यरक्षद्भरतानेकोभवमतोषयत्॥ तेनैकेनजिताःसर्वेमहीपाल्युग्रतेजसा॥ ४ ॥ नतेनिंद्याःप्रश
स्यास्तेयत्तेचक्रुर्ब्रवीहितत्॥ ततोदुर्योधनःसूतपश्चात्किमकरोत्तदा॥ ५॥ संजयउवाच हतप्रहतविध्वस्ताविवर्मायुधवाहनाः॥ दीनस्वरादूयमानामा
निनःशत्रुनिर्जिताः॥ ६॥ तेअस्मदीयाःननिंद्याः तेशब्दस्याभ्यासाद्वाक्यत्रयमिदं तथादुर्योधनोपिननिंद्यःअपितुततःविस्तृतःतादृशंशत्रुंप्राप्यख्यातिंगतइत्यर्थः ॥ ५ ॥ हताःताडिताःप्रह
ताश्छिन्नावयवाःविध्वस्ताःवाहनेभ्योऽधःपातिताः ॥ ६ ॥

॥ ७ ॥ ८ ॥ ९ ॥ सहसा अकस्मात् ॥ १० ॥ ११ ॥ १२ ॥ मनेस्थिनेनेतिशेषः प्रतीपकर्त्तारंशत्रूणांछेत्तारं प्रवीरंप्रकृष्टवीरं ॥ १३ ॥ १४ ॥ आत्ययिकेषुप्राणसंकटेषु ॥ १५ ॥ अप्यपश्यत अपिः

शिबिरस्थाःपुनर्मंत्रंमंत्रयंतिस्मकौरवाः॥ भग्नदंष्ट्राहतविषाःपादाक्रांताइवोरगाः॥ ७॥ तानब्रवीत्ततःकर्णःक्रुद्धःसर्पइवश्वसन्॥ करंकरेणनिष्पीड्यप्रेक्षमाणस्तवात्मजं॥ ८ ॥ यत्तोदृढश्चदक्षश्चधृतिमानर्जुनस्तदा॥ संबोधयतिचाप्येनंयथाकालमधोक्षजः॥ ९ ॥ सहसास्त्रविसर्गेणवयंतेनाद्यवंचिताः ॥ श्वस्त्वहंतस्यसंकल्पंसर्वंहंतामहीपते॥ १० ॥ एवमुक्तस्तथेत्युक्त्वासोनुजज्ञेनृपोत्तमान्॥ तेऽनुज्ञातानृपाःसर्वेस्वानिवेश्मानिभेजिरे॥ ११॥सुखोषितास्तांरजनींहृष्टायुद्धायनिर्ययुः॥ तेऽपश्यन्विहितंव्यूहंधर्मराजेनदुर्जयं॥ १२॥ प्रयत्नात्कुरुमुख्येनबृहस्पत्युशनोमते॥ अथप्रतीपकर्त्तारंप्रवीरंपरवीरहा ॥ १३ ॥ सस्मारवृषभस्कंधंकर्णंदुर्योधनस्तदा॥ पुरंदरसमंयुद्धेमरुद्गणसमंबले॥ १४ ॥ कार्त्तवीर्यसमंवीर्येकर्णंराज्ञोऽगमन्मनः॥ सर्वेषांचैवसैन्यानांकर्णमेवागमन्मनः॥सूतपुत्रंमहेष्वासंबंधुमात्ययिकेष्विव॥ १५॥ धृतराष्ट्रउवाच· ततोदुर्योधनःसूतपश्चात्किमकरोत्तदा॥ यद्वोऽगमन्मनोमंदाःकर्णंवैकर्त्तनंप्रति॥ १६॥अप्यपश्यतराधेयंशीतार्त्ताइवभास्करं॥ कृतेऽवहारेसैन्यानांप्रवृत्तेचरणेपुनः॥ १७॥कथंवैकर्तनःकर्णस्तत्रायुध्यतसंजय॥कथंचपांडवाःसर्वेयुयुधुस्तत्रसूतजं॥ १८॥ कर्णोह्येकोमहाबाहुर्हन्यात्पार्थान्ससृंजयान्॥ कर्णस्यभुजयोर्वीर्यंशक्रविष्णुसमंयुधि॥ १९ ॥तस्यशस्त्राणिघोराणिविक्रमश्चमहात्मनः॥ कर्णमाश्रित्यसंग्रामेमत्तोदुर्योधनोनृपः॥ २० ॥ दुर्योधनंततोदृष्ट्वापांडवेनभृशार्दितं॥ पराक्रांतान्पांडुसुतान्दृष्ट्वाचापिमहारथः॥ २१॥ कर्णमाश्रित्यसंग्रामेमंदोदुर्योधनःपुनः॥ जेतुमुत्सहतेपार्थान्सपुत्रान्सहकेशवान्॥ २२॥ अहोबतमहद्दुःखंयत्रपांडुसुतान्रणे॥ नातरद्रभसःकर्णोदैवंनूनंपरायणं ॥ २३ ॥ अहोद्यूतस्यनिष्ठेयंघोरासंप्रतिवर्तते॥ अहोतीव्राणिदुःखानिदुर्योधनकृतान्यहं॥ २४॥ सोढाघोराणिबहुशःशल्यभूतानिसंजय॥सौबलंचतदातातनीतिमानितिमन्यते॥ २५॥ कर्णश्चरभसोनित्यंराजातंचाप्यनुव्रतः॥ यदेवंवर्तमानेषुमहायुद्धेषुसंजय॥ २६॥ अश्रौषंनिहतान्पुत्रान्नित्यमेवविनिर्जितान्॥नपांडवानांसमरेकश्चिदस्तिनिवारकः॥ २७॥

प्रश्ने ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ मत्तः कर्णाश्रयेणमूढः भाविनाशानवधानात् ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ निष्ठाविपाकः ॥ २४ ॥ २५ ॥ कर्णश्चेतिमानितिमन्यतइतिपूर्वेणान्वयः ॥ २६ ॥ २७ ॥

भीमध्यमिवगाहते सेनांमध्यंतीत्यर्थः निमित्तानिधूताद्दीनिधर्मिष्ठानीतिलोपालंभंविरुद्धानीत्यर्थः ॥२८ ॥ २९ ॥ कार्यंराज्यलाभाख्यंदूरप्राप्तंअत्यंतदुर्लभं यद्यतः विजानतापित्वया प्राप्ताप्राप्तविचारणं युक्तायुक्तपरीक्षणंनकृतमित्यन्वयः ॥ ३० ॥३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ शक्रशक्तोतित्वस्य अर्जुनवधेसामर्थ्याभावंद्योतयति ॥ ३८ ॥ श्रेयस्करंआत्मत्राणकरं वीर्यंसमानमिति

भीमध्यमिवगाहंतेदैवंतुबलवत्तरं॥ संजयउवाच राजन्पूर्वमिमित्तानिधर्मिष्ठानिविचिंतय ॥ २८ ॥ अतिक्रांतंहियत्कार्यंपश्चात्चिंतयतेनरः ॥ तच्चा स्यनभवेत्कार्यंचिंतयाचविनश्यति॥२९॥तदिदंतवकार्यंतुदूरप्राप्तंविजानता॥नकृतयत्त्वयापूर्वंप्राप्ताप्राप्तविचारणं॥३०॥उक्तोसिबहुधाराजन्मायुध्यस्वेति पांडवैः॥गृह्णीषेनचतन्मोहाद्दचनंचविशांपते॥ ३१ ॥त्वयापापानिघोराणिसमाचीर्णानिपांडुषु॥ त्वत्कृतेवर्ततेघोरःपार्थिवानांजनक्षयः॥ ३२ ॥ तत्त्विदानी मतिक्रांतंमाशुचोभरतर्षभ॥शृणुसर्वंयथावृत्तंघोरंवैशसमच्युत॥ ३३॥ प्रभातायांरजन्यांतुकर्णोराजानमभ्ययात्॥ समेत्यचमहाबाहुर्दुर्योधनमथाब्रवीत् ॥३४॥ कर्णउवाच अद्यराजन्समेष्यामिपांडवेनयशस्विना॥ निहनिष्यामितंवीरंसंग्रामेमांनिहनिष्यति ॥ ३५ ॥ बहुत्वान्ममकार्याणांतथापार्थस्यभा रत॥ नाभूत्समागमोराजन्ममचैवार्जुनस्यच॥ ३६ ॥ इदंतुमेयथाप्रज्ञंशृणुवाक्यंविशांपते॥ अनिहत्यरणेपार्थंनाहमेष्यामिभारत ॥ ३७ ॥ हतप्रवीरेसैन्ये स्मिन्मयिचावस्थितेयुधि॥ अभियास्यतिमांपार्थःशक्रशक्तिविनाकृतं॥ ३८॥ ततःश्रेयस्करंयच्चतन्निबोधजनेश्वर ॥ आयुधानांचमेवीर्यंदिव्यानामर्जुन स्यच॥ ३९॥कार्यस्यमहतोभेदेलाघवेदूरपातने॥ सौष्ठवेचास्त्रपातेचसव्यसाचीनमत्समः॥ ४० ॥प्राणेशौर्येथविज्ञानेविक्रमेचापिभारत ॥ निमित्तज्ञान योगेचसव्यसाचीनमत्समः॥ ४१ ॥ सर्वायुधमहामात्रंविजयंनामतद्धनुः॥ इंद्रार्थंप्रियकामेननिर्मितंविश्वकर्मणा॥ ४२ ॥ येनदैत्यगणान्राजन्जितवान्वै शतक्रतुः॥ यस्यघोषेणदैत्यानांव्यामुह्यंतदिशोदश॥ ४३ ॥ तद्भार्गवायप्रायच्छच्छक्रःपरमसंमतं॥ तद्दिव्यंभार्गवोमह्यमददद्धनुरुत्तमं॥४४॥ तेनयोत्स्ये महाबाहुमर्जुनंजयतांवरं॥ यथेंद्रःसमरेसर्वान्दैतेयान्वैसमागतान्॥ ४५॥ धनुर्घोरंरामदत्तंगांडीवात्तद्विशिष्यते ॥ त्रिस्सप्तकृत्वःपृथिवीधनुषायेननिर्जिता ॥ ४६ ॥धनुषोत्यस्यकर्माणिदिव्यानिप्राहभार्गवः॥ तद्रामोत्यददन्मह्यंतेनयोत्स्यामिपांडवं॥ ४७॥ अद्यदुर्योधनाहंत्वानंदयिष्येसबांधवं॥निहत्यसमरेवीर मर्जुनंजयतांवरं॥ ४८॥ शेषः ॥ ३९ ॥ कार्यस्यकर्तव्यस्यपरकीयस्यभेदेविनाशे लाघवेशैघ्र्येसौष्ठवेकौशले ॥ ४० ॥ प्राणेशारीरबलेशौर्येमानसबलेविज्ञानेअस्त्रशिक्षायां विक्रमेफलोप धानेऽस्त्राणां निमित्तज्ञानयोगेलक्षसंबंधावधारणे ॥४१॥ महामात्रंश्रेष्ठं विजयाख्यंनामप्रसिद्धं ॥ ४२ ॥४३॥४४॥४५॥४६॥४७॥४८॥

॥ ४९ ॥ सिद्धिर्मोक्षः आत्मवतोजितचित्तस्य ॥ ५० ॥ ५१॥५२॥५३॥५४॥५५॥५६॥ ५७॥ शल्यः कृष्णतुल्यः बाणशकटबहुलतयाबाणानामक्षय्यत्वंज्ञेयं एवंबद्धश्वत्वेन दिव्याश्वजयइत्याह अय

सपर्वतनवद्वीपाहृतवीरासुसागरा॥ पुत्रपौत्रप्रतिष्ठातेभविष्यत्यद्यपार्थिव॥ ४९॥ नाशक्यंविद्यतेमेद्यत्वत्प्रियार्थंविशेषतः॥सम्यग्धर्मानुरक्तस्यसिद्धिरात्मवतोयथा॥ ५० ॥ नहिमांसमरेसोढुंसंशक्तोग्निंतरुर्यथा॥ अवश्यंतुमयावाच्यंयेनहीनोस्मिफाल्गुनात्॥५१॥ ज्यातस्यधनुषोदिव्यातथाक्षय्येमहेषुधी ॥ सारथिस्तस्यगोविंदोममतादृङ्विद्यते॥५२॥ तस्यदिव्यंधनुःश्रेष्ठंगांडीवमजितंयुधि॥ विजयंचमहद्दिव्यंममापिधनुरुत्तमं॥५३॥ तत्राहमधिकःपार्थाद्धनुषातेनपार्थिव॥ येनचाप्यधिकोवीरःपांडवस्तन्निबोधमे ॥ ५४॥ रश्मिग्राहश्चदाशार्हःसर्वलोकनमस्कृतः ॥ अग्निदत्तश्चवैदिव्योरथःकांचनभूषणः ॥ ५५॥ अच्छेद्यःसर्वतोवीरवाजिनश्चमनोजवाः॥ ध्वजश्चदिव्योद्युतिमान्वानरोविस्मयंकरः ॥ ५६ ॥ कृष्णश्चस्रष्टाजगतोरथंतमभिरक्षति ॥ एतैर्द्रव्यैरहंहीनोयोद्धुमिच्छामिपांडवं॥५७॥ अयंतुसदृशःशौरेःशल्यःसमितिशोभनः॥ सारथ्यंयदिमेकुर्याद्ध्रुवस्तेविजयोभवेत् ॥५८॥ तस्यमेसारथिःशल्योभवत्वसुकरःपरैः॥ नाराचान्गार्ध्रपत्रांश्चशकटानिवहंतुमे॥ ५९॥ रथाश्चमुख्याराजेंद्रयुक्तावाजिभिरुत्तमैः॥ आयांतुपश्चात्सततंमामेवभरतर्षभ॥६०॥एवमभ्यधिकःपार्थाद्भविष्यामिगुणैरहं ॥ शल्योप्यभ्यधिकःकृष्णादर्जुनादपिचाप्यहं ॥ ६१ ॥ यथाश्वहृदयंवेददाशार्हःपरवीरहा॥तथाशल्योविजानीतेहयज्ञानंमहारथः ॥ ६२ ॥ बाहुवीर्येसमोनास्तिमद्रराजस्यकश्चन॥ तथास्त्रेमत्समोनास्तिकश्चिदेवधनुर्धरः॥ ६३ ॥ तथाशल्यसमोनास्तिहयज्ञानेहिकश्चन॥ सोयमभ्यधिकःकृष्णाद्भविष्यतिरथोमम॥ ६४ ॥ एवंकृतेरथस्थोहंगुणैरभ्यधिकोर्जुनात्॥ भवेयुधिजयेयंचफाल्गुनंकुरुसत्तम ॥६५॥ समुद्यातुंनशक्ष्यंतिदेवाअपिसवासवाः॥ एतत्कृतंमहाराजत्वयेच्छामिपरंतप॥६६॥ क्रियतामेपकामोमेमावःकालोऽत्यगादयं॥एवंकृतेकृतंसत्यंसर्वकामैर्भविष्यति॥६७॥ ततोद्रक्ष्यसिसंग्रामेयत्करिष्यामिभारत॥ सर्वथापांडवान्संख्येविजेष्येवैसमागतान्॥ ६८ ॥ नहिमेसमरेशक्ताःसमुद्यातुंसुरासुराः॥ किमुपांडुसुताराजन्रणेमानुषयोनयः ॥६९॥ संजयउवाच एवमुक्तस्तवसुतःकर्णेनाहवशोभिना॥ संपूज्यसंप्रहृष्टात्माततोराधेयमब्रवीत्॥७०॥ दुर्योधनउवाच एवमेतत्करिष्यामियथात्वंकर्णमन्यसे॥सोपासंगारथाःसाश्वाःस्वनुयास्यंतिसंयुगे॥ ७१ ॥

मित्यादिना ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ भवे भवेयं भवेदितिपाठःप्रामादिकः ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

॥ ७२ ॥ ७३ ॥ इतिश्रीनैलकंठीये भारतभावदीपे एकत्रिंशोध्यायः ॥ ३१ ॥ ॥ ५ ॥ पुत्रेति विनयेननत्या प्रणयात्प्रकृष्टात्न्यायात्युक्तियुक्तइर्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ अभी

नाराचान्गार्द्धपत्रांश्चशकटानिवहंतुते॥ अनुयास्यामकर्णत्वांवयंसर्वेचपार्थिवाः ॥ ७२ ॥ संजयउवाच एवमुक्त्वामहाराजतवपुत्रःप्रतापवान् ॥ अभिगम्याब्रवीद्राजामद्रराजमिदंवचः॥ ७३ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णदुर्योधनसंवादेएकत्रिंशोऽध्यायः॥ ३१ ॥ ॥ ५॥ संजयउवाच पुत्रस्तवमहाराजमद्रराजंमहारथं॥ विनयेनोपसंगम्यप्रणयाद्वाक्यमब्रवीत् ॥ १ ॥ सत्यव्रतमहाभागद्विषतांतापवर्धन॥ मद्रेश्वररणेशूरपरसैन्यभयंकर॥ २॥ श्रुतवानसिकर्णस्यब्रुवतोवदतांवर॥ यथानृपतिसिंहानांमध्येत्वांवरयेस्वयं॥ ३॥तत्त्वामप्रतिवीर्याद्यशत्रुपक्षक्षयावह॥मद्रेश्वरप्रयाचेऽहंशिरसाविनयेनच ॥ ४ ॥ तस्मात्पार्थविनाशार्थंहितार्थंममचैवहि॥ सारथ्यंरथिनांश्रेष्ठप्रणयात्कर्तुमर्हसि॥ ५ ॥ त्वयियंतरिराधेयोविद्विषोमेविजेष्यते॥ अभीषूणांहिकर्णस्य ग्रहीतान्योनविद्यते॥ ६॥ ऋतेहित्वांमहाभागवासुदेवसमंयुधि॥ सपाहिसर्वथाकर्णयथाब्रह्मामहेश्वरं॥ ७॥यथाचसर्वथापत्सुवार्ष्णेयःपातिपांडवं॥ तथामद्रेश्वराद्यत्वंराधेयंप्रतिपालय॥ ८॥ भीष्मोद्रोणःकृपःकर्णोभवान्भोजश्चवीर्यवान्॥ शकुनिःसौवलोद्रौणिरहमेवचनोबलं॥ ९ ॥ एवमेषकृतोभागोनवधापृथिवीपते॥ नचभागोत्रभीष्मस्यद्रोणस्यचमहात्मनः॥ १०॥ ताभ्यामतीत्यतौभागौनिहताममशात्रवः॥ वृद्धौहितौमहेष्वासौछलेननिहतौयुधि॥ ११ ॥कृत्वानसुकरंकर्मगतौस्वर्गमितोनघ॥ तथान्येपुरुषव्याघ्राःपरैर्विनिहतायुधि॥ १२ ॥ अस्मदीयाश्चबहवःस्वर्गायोपगतारणे॥ त्यक्त्वाप्राणान्यथाशक्तिचेष्टांकृत्वाचपुष्कलां॥ १३॥ तदिदंहतभूयिष्ठंबलंममनराधिप॥ पूर्वमप्यल्पकैःपार्थैर्हतंकिमुतसांप्रतं ॥ १४॥ बलवंतोमहात्मानःकौंतेयाःसत्यविक्रमाः॥ बलंशेषंनहन्युर्मेयथातत्कुरुपार्थिव॥ १५॥ हतवीरमिदंसैन्यंपांडवैःसनरेविभो॥ कर्णोह्येकोमहाबाहुरस्मत्प्रियहितेरतः॥ १६॥ भवांश्चपुरुषव्याघ्रसर्वलोकमहारथः॥ शल्यकर्णोर्जुनेनाद्ययोद्धुमिच्छतिसंयुगे॥ १७॥ तस्मिन्जयाशाविपुलामद्रराजनराधिप॥ तस्याभीषुग्रहवरोनान्योस्तिभुविकश्चन॥ १८ ॥ पार्थस्यसमरेकृष्णोयथाभीषुग्रहोवरः ॥ तथात्वमपिकर्णस्यरथेभीषुग्रहोभव॥ १९॥ तेनयुक्तोरणेपार्थोरक्ष्यमाणश्चपार्थिव॥ यानिकर्माणिकुरुतेप्रत्यक्षाणितथैवतत् ॥ २०॥ पूर्वंनःसमरेह्येवमवधीदर्जुनोरिपून्॥ इदानींविक्रमोह्यस्यकृष्णेनसहितस्यच॥ २१ ॥

षूणांहयरश्मीनां ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

॥ ३१ ॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ त्रातुत्रायतां ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ विश्रब्धंनिःशंकंयथास्यात्तथा ॥ ३२ ॥ ३३॥ ३४॥३५॥ निधायत्वत्कृतमपमानमितिशेषः प्रवर्तेतत्यक्तु

कृष्णेनसहितःपार्थोधार्त्तराष्ट्रींमहाचमूं ॥ अहन्यहनिमद्रेशद्रावयन्दृश्यतेयुधि ॥ २२ ॥ भागोऽवशिष्टःकर्णस्यतवचैवमहाद्युते ॥ तंभागंसहकर्णेनयुगपन्नाश याग्रहि ॥ २३ ॥ अरुणेनयथासार्द्धंतमःसूर्योव्यपोहति ॥ तथाकर्णेनसहितोजहिपार्थंमहाहवे ॥ २४ ॥ उद्यंतौचयथासूर्यौबालसूर्यसमप्रभौ ॥ कर्णशल्यौरणे दृष्ट्वाविद्रवंतुमहारथाः ॥ २५ ॥ सूर्यारुणौयथादृष्ट्वातमोनश्यतिमारिष ॥ तथानश्यंतुकौंतेयाःसपंचालाःससृंजयाः ॥ २६ ॥ रथिनांप्रवरःकर्णोयंतॄणांप्रवरो भवान् ॥ संयोगोयुवयोर्लोकेनाभून्नचभविष्यति ॥ २७ ॥ यथासर्वास्ववस्थासुवार्ष्णेयःपातिपांडवं ॥ तथाभवान्परित्रातुकर्णंवैकर्त्तनंरणे ॥ २८ ॥ त्वयासा रथिनात्येपअप्रधृष्योभविष्यति ॥ देवतानामपिरणेसशक्राणांमहीपते ॥ किंपुनःपांडवेयानांमाविशंकीर्वचोमम ॥ २९ ॥ संजयउवाच दुर्योधनवचः श्रुत्वाशल्यःक्रोधसमन्वितः ॥ त्रिशिखांभ्रुकुटिंकृत्वाधुन्वन्हस्तौपुनःपुनः ॥ ३० ॥ क्रोधरक्तेमहानेत्रेपरिवृत्यमहाभुजः ॥ कुलैश्वर्यश्रुतबलैर्दृप्तःशल्योब्रवीदिदं ॥ ॥ ३१ ॥ शल्यउवाच अवमन्यसिगांधारेध्रुवंचपरिशंकसे ॥ यन्मांब्रवीपिविश्रब्धंसारथ्यंक्रियतामिति ॥ ३२ ॥ अस्मत्तोभ्यधिकंकर्णंमन्यमानःप्रशं ससि ॥ नचाहंयुधिराधेयंगणयेतुल्यमात्मनः ॥ ३३ ॥ आदिश्यतामभ्यधिकोममांशःपृथिवीपते ॥ तमहंसमरेजित्वागमिष्यामियथागतं ॥ ३४ ॥ अथवाप्ये कएवाहंयोत्स्यामिकुरुनंदन ॥ पश्यवीर्यंममाद्यत्वंसंग्रामेदहतोरिपून् ॥ ३५ ॥ यथाभिमानंकौरव्यनिधायहृदयेपुमान् ॥ अस्मद्विधःप्रवर्त्ततमामांत्वमभिशं किथाः ॥ ३६ ॥ युधिवाप्यवमानोमेनकर्त्तव्यःकथंचन ॥ पश्यपीनौममभुजौवज्रसंहननोपमौ ॥ ३७ ॥ धनुःपश्यचमेचित्रंशरांश्चाशीविपोपमान् ॥ रथंपश्य चमेकॢप्तंसदश्वैर्वातवेगितैः ॥ ३८ ॥ गदांचपश्यगांधारेहेमपट्टविभूषितां ॥ दारयेयंमहींकृत्स्नांविकिरेयंचपर्वतान् ॥ ३९ ॥ शोषयेयंसमुद्रांश्चतेजसास्वेनपार्थि व ॥ तंमामेवंविधंराजन्समर्थमरिनिग्रहे ॥ ४० ॥ कस्माद्युनक्षिसारथ्येनीचस्याधिरथेरणे ॥ नमामधुरिराजेंद्रनियोक्तुंत्वमिहार्हसि ॥ ४१ ॥ नहिपापीयसः श्रेयान्भूत्वाप्रेष्यत्वमुत्सहे ॥ योह्यभ्युपगतंप्रीत्यागरीयांसंवशेस्थितं ॥ ४२ ॥ वशेपापीयसोधत्तेतत्पापमधरोत्तरं ॥ ब्रह्मणाब्राह्मणाःसृष्टामुखात्क्षत्रंचबाहु तः ॥ ४३ ॥ ऊरुभ्यामसृजद्वैश्यान्शूद्रान्पद्भ्यामितिश्रुतिः ॥ तेभ्योवर्णविशेषाश्चप्रतिलोमानुलोमजाः ॥ ४४ ॥

॥ ३१ ॥

मितिशेषः ॥ ३६ ॥ ३७ ॥ ३८॥३९॥४०॥ अधुरिनीचेकर्मणि॥४१॥ पापीयसःनीचयोनेःप्रेष्यत्वंदासत्वंकर्तुमितिशेषः॥४२॥ वशेआज्ञायां ॥ अधरोत्तरंनीचोच्चयोर्वैपरीत्यकरणजंमहत्पापं॥४३॥४४॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ कृतमिति ॥ कृतमेवअयनंआश्रयोयेषांतेकृतायनास्तेषांगोत्रापत्यमार्तायनिस्त्वं ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

अथान्योन्यस्यसंयोगाच्चातुर्वर्ण्यस्यभारत ॥ गोप्तारःसंगृहीतारोदातारःक्षत्रियाःस्मृताः ॥ ४५ ॥ याजनाध्यापनैर्विप्राविशुद्धैश्चप्रतिग्रहैः ॥ लोकस्यानुग्रहा
र्थायस्थापिताब्राह्मणाभुवि ॥ ४६ ॥ कृषिश्चपाशुपाल्यंचविशांदानंचधर्मतः ॥ ब्रह्मक्षत्रविशांशूद्राविहिताःपरिचारकाः ॥ ४७ ॥ ब्रह्मक्षत्रस्यविहिताःसूतावैप
रिचारकाः ॥ नक्षत्रियोवैसूतानांशृणुयाच्चकथंचन ॥ ४८ ॥ अहंमूर्द्धाभिषिक्तोहिराजर्षिकुलजोनृपः ॥ महारथःसमाख्यातःसेव्यःस्तुत्यश्चवंदिनां ॥ ४९ ॥ सो
हमेतादृशोभूत्वानेहारिबलसूदनः ॥ सूतपुत्रस्यसंग्रामेसारथ्यंकर्तुमुत्सहे ॥ ५० ॥ अवमानमहंप्राप्यनयोत्स्यामिकथंचन ॥ आपृच्छेत्वाऽद्यगांधारेगमिष्यामिगृ
हायवै ॥ ५१ ॥ संजयउवाच एवमुक्त्वामहाराजशल्यःसमितिशोभनः ॥ उत्थायप्रययौतूर्णंराजमध्यादमर्षितः ॥ ५२ ॥ प्रणयाद्बहुमानाच्चतन्निगृह्य
सुतस्तव ॥ अब्रवीन्मधुरंवाक्यंसामसर्वार्थसाधकं ॥ ५३ ॥ यथाशल्यविजानीषेएवमेतदसंशयं ॥ अभिप्रायस्तुमेकश्चित्तन्निबोधजनेश्वर ॥ ५४ ॥ नकर्णो
भ्यधिकस्त्वत्तोनशंकेत्वांचपार्थिव ॥ नहिमद्रेश्वरोराजाकुर्याद्यदनृतंभवेत् ॥ ५५ ॥ कृतमेवहिपूर्वास्तेवदंतिपुरुषोत्तमाः ॥ तस्मादार्तायनिःप्रोक्तोभवानितिमति
र्मम ॥ ५६ ॥ शल्यभूतस्तुशत्रूणांयस्मात्त्वंयुधिमानद ॥ तस्माच्छल्योहितेनामकथ्यतेपृथिवीतले ॥ ५७ ॥ यदेतद्व्याहृतंपूर्वंभवताभूरिदक्षिण ॥ तदेवकुरुधर्म
ज्ञमदर्थंयद्यदुच्यते ॥ ५८ ॥ नचत्वत्तोहिराधेयोनचाहमपिवीर्यवान् ॥ वृणेहंत्वांहयाग्र्याणांयंतारमिहसंयुगे ॥ ५९ ॥ मन्येचाभ्यधिकंशल्यगुणैःकर्णंधनंजया
त् ॥ भवंतंवासुदेवाच्चलोकोयमितिमन्यते ॥ ६० ॥ कर्णोह्यभ्यधिकःपार्थादस्त्रैरेवनरर्षभ ॥ भवानभ्यधिकःकृष्णादश्वज्ञानेबलेतथा ॥ ६१ ॥ यथाश्वहृदयंवे
दवासुदेवोमहामनाः ॥ द्विगुणंत्वंतथावेत्सिमद्रराजेश्वरात्मज ॥ ६२ ॥ शल्यउवाच यन्मांब्रवीषिगांधारेमध्येसैन्यस्यकौरव ॥ विशिष्टंदेवकीपुत्रात्प्री
तिमानस्म्यहंत्वयि ॥ ६३ ॥ एषसारथ्यमातिष्ठेराधेयस्ययशस्विनः ॥ युध्यतःपांडवाग्र्येणयथात्वंवीरमन्यसे ॥ ६४ ॥ समयश्चहिमेवीरकश्चिद्वैकर्तनंप्रति ॥ उ
त्सृजेयंयथाश्रद्धमहंवाचोस्यसन्निधौ ॥ ६५ ॥

॥ ६० ॥ ६१ ॥ मद्रेश्वरेत्यश्वोत्पत्तिदेशजत्वाद्विशेषेणतद्गुणाभिज्ञत्वंसूच्यते ॥ ६२ ॥ ६३ ॥ ६४ ॥ वाचउत्सृजेयंताःअनेनक्षंतव्याइतिभावः ॥ ६५ ॥

॥ ६६ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ ५ ॥ भूयइति ॥ १ ॥ पितुः पुरतःमसंमम ॥ २ ॥ ३ ॥ तारकामयः तारकासुरएवआमयोरोगवत्पराभवहेतुर्यत्रसत था ॥ ४ ॥ ५ ॥ ६ ॥ दमेनबाह्येंद्रियजयेन तपसाचित्तस्यैकाग्र्येण नियमेनशौचादिना समाधिनाअव्युत्थानेन॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ चक्रस्थं

संजयउवाच. तथेतिराजन्पुत्रस्तेसहकर्णेनभारत ॥ अब्रवीन्मद्रराजस्यमतंभरतसत्तम ॥ ६६ ॥ इतिश्रीमहाभारतेकर्णपर्वणिशल्यसारथ्येद्वात्रिंशोध्यायः॥ ३२ ॥ ॥ ५ ॥ दुर्योधनउवाच भूयएवतुमद्रेशयत्तेवक्ष्यामितच्छृणु॥ यथापुरावृत्तमिदंयुद्धेदेवासुरेविभो॥ १ ॥ यदुक्तवान्पितुर्मेत्वंमार्कंडेयोमहानृषिः॥ तदशेषेणंब्रुवतोममराजर्षिसत्तम॥ २ ॥ निबोधमनसाचात्रनतेकार्याविचारणा॥ देवानामसुराणांचपरस्परजिगीषया॥ ३ ॥ बभूवप्रथमोराजन्संग्रामस्तारकामयः॥ निर्जिताश्चतदादैत्यादैवतैरितिनःश्रुतं॥ ४ ॥ निर्जितेषुचदैत्येषुतारकस्यसुतास्त्रयः ॥ ताराक्षःकमलाक्षश्चविद्युन्मालीचपार्थिव॥ ५ ॥ तपउग्रंसमास्थायनियमेपरमेस्थिताः॥ तपसाकर्षयामासुर्देहान्स्वान्शत्रुतापन ॥ ६ ॥ दमेनतपसाचैवनियमेनसमाधिना ॥ तेषांपितामहःप्रीतोवरदःप्रददौवरं ॥ ७ ॥ अवध्यत्वंचतेराजन्सर्वभूतस्यसर्वदा॥ सहितावरयामासुःसर्वलोकपितामहं॥ ८ ॥ तानब्रवीत्तदादेवोलोकानांप्रभुरीश्वरः॥ नास्तिसर्वामरत्वंवैनिवर्तध्वमितोसुराः॥ ९ ॥ अन्यंवरंवृणीध्वंवैयादृशंसंप्ररोचते॥ ततस्तेसहिताराजन्संप्रधार्यासकृत्प्रभुं॥ १० ॥ सर्वलोकेश्वरंवाक्यंप्रणम्येदमथाब्रुवन्॥ अस्मभ्यंत्वंवरंदेवसंप्रयच्छपितामह॥ ११ ॥ वयंपुराणित्रीण्येवसमास्थायमहीमिमां॥ विचरिष्यामलोकेस्मिन्त्वत्प्रसादपुरस्कृताः॥ १२ ॥ ततोवर्षसहस्रेतुसमेष्यामःपरस्परं॥ एकीभावंगमिष्यंतिपुराण्येतानिचानघ॥ १३ ॥ समागतानिचैतानियोहन्याद्भगवंस्तदा॥ एकेषुणादेववरःसनोमृत्युर्भविष्यति॥ १४ ॥ एवमस्त्वितितान्देवःप्रत्युक्त्वाप्राविशद्दिवं॥ तेतुलब्धवराःप्रीताःसंप्रधार्यपरस्परं॥ १५ ॥ पुरत्रयविसृष्ट्यर्थंमयंवव्रुर्महासुरं ॥ विश्वकर्माणमजरंदैत्यदानवपूजितं॥ १६ ॥ ततोमयःस्वतपसाचक्रेधीमान्पुराणिच॥ त्रीणिकांचनमेकंवैरौप्यंकार्ष्णायसंतथा ॥ १७ ॥ कांचनंदिवितत्रासीदंतरिक्षेचराजतं॥ आयसंचाभवद्भूमौचक्रस्थंपृथिवीपते ॥ १८ ॥ एकैकंयोजनशतंविस्तारायामतःसमं॥ गृहाट्टालकसंयुक्तंबहुप्राकारतोरणं॥ १९ ॥ गृहप्रवरसंबाधमसंबाधमहापथं॥ प्रासादैर्विविधैश्चापिद्वारैश्चैवोपशोभितं॥ २० ॥ पुरेषुचाभवन्राजन्राजानोवैपृथक्पृथक्॥ कांचनंतारकाक्षस्यचित्रमासीन्महात्मनः॥ २१ ॥

आज्ञावशंयथेष्टसंचारीत्यर्थः चक्रस्थमित्यत्रतृतीयमितिपाठःप्रमादिकः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

राजतंकमलाक्षस्यविद्युन्मालिनआयसं॥ त्रयस्तेदैत्यराजानस्त्रींल्लोकानस्त्रतेजसा॥ २२॥ आक्रम्यतस्थुरूचुश्चकश्चनामप्रजापतिः॥ तेषांदानवमुख्यानांप्र
युतान्यर्बुदानिच॥ २३॥ कोट्यश्चाप्रतिवीराणांसमाजग्मुस्ततस्ततः॥ मांसाशिनःसुदृप्ताश्चसुरैर्विनिकृताःपुरा॥ २४॥ महदैश्वर्यमिच्छंतस्त्रिपुरंदुर्गमाश्रि
ताः॥ सर्वेषांचपुनश्चैषांसर्वयोगवहोमयः॥ २५॥ तमाश्रित्यहितेसर्वेवर्तयंतेऽकुतोभयाः॥ योहियन्मनसाकामंदध्यौत्रिपुरसंश्रयः॥ २६॥ तस्मैकामंमयस्तंत
विदधेमाययातदा॥ तारकाक्षसुतोवीरोहरिर्नाममहाबलः॥ २७॥ तपस्तेपेपरमकंयेनातुष्यत्पितामहः॥ संतुष्टमवृणोद्देवंवापीभवतुनःपुरे॥ २८॥ शस्त्रैर्वि
निहतायत्रक्षिप्ताःस्युर्बलवत्तराः॥ सतुलब्ध्वावरंवीरस्तारकाक्षसुतोहरिः॥ २९॥ ससृजेतत्रवापींतांमृतानांजीवनींप्रभो॥ येनरूपेणदैत्यस्तुयेनवेषेणचैवह
॥ ३०॥ मृतस्तस्यांपरिक्षिप्तस्तादृशेनैवजज्ञिवान्॥ तांप्राप्यतेपुनस्तांस्तुलोकान्सर्वान्व्यबाधिरे॥ ३१॥ महतातपसासिद्धाःसुराणांभयवर्धनाः॥ नतेषामभव
द्राजन्क्षयोयुद्धेकदाचन॥ ३२॥ ततस्तेलोभमोहाभ्यामभिभूताविचेतसः॥ निर्ह्रीकाःसंस्थिताःसर्वेस्थापिताःसमलूलुपन्॥ ३३॥ विद्राव्यसगणान्देवां
स्तत्रतत्रतदातदा॥ विचेरुःस्वेनकामेनवरदानेनदर्पिताः॥ ३४॥ देवोद्यानानिसर्वाणिप्रियाणिचदिवौकसां॥ ऋषीणामाश्रमान्पुण्यान्रम्यान्जनपदांस्त
था॥ ३५॥ व्यनाशयन्नमर्यादादानवादुष्टचारिणः॥ पीड्यमानेषुलोकेषुततःशक्रोमरुद्गतः॥ ३६॥ पुराण्यायोधयांचक्रेवज्रपातैःसमंततः॥ नाशकत्तान्य
भेद्यानियदाभेत्तुंपुरंदरः॥ ३७॥ पुराणिवरदत्तानिधात्रातेननराधिप॥ तदाभीतःसुरपतिर्मुक्त्वातानिपुराण्यथ॥ ३८॥ तैरेवविबुधैःसार्धंपितामहमरिंदम॥
जगामाथतदाख्यातुंविप्रकारंसुरेतरैः॥ ३९॥ तेतत्त्वंसर्वमाख्यायशिरोभिःसंप्रणम्यच॥ वधोपायमपृच्छंतभगवंतंपितामहं॥ ४०॥ श्रुत्वातद्भगवान्देवोदे
वानिदमुवाचह॥ ममापिसोऽपराध्नोतियोयुष्माकमसौम्यकृत्॥ ४१॥ असुराहिदुरात्मानःसर्वएवसुरद्विषः॥ अपराध्यंतिसततंयेयुष्मान्पीडयंत्युत॥ ४२॥
अहंहितुल्यःसर्वेषांभूतानांनात्रसंशयः॥ अधार्मिकास्तुहंतव्याइतिमेव्रतमाहितं॥ ४३॥ एकेषुणाविभेद्यानितानिदुर्गाणिनान्यथा॥ नचस्थाणुमृतेशक्तोभे
त्तुमेकेषुणापुरः॥ ४४॥ तेयूयंस्थाणुमीशानंजिष्णुमक्लिष्टकारिणं॥ योद्धारंवृणुतादित्याःसतान्हंतासुरेतरान्॥ ४५॥ इतितस्यवचःश्रुत्वादेवाःशक्रपुरोग
माः॥ ब्रह्माणमग्रतःकृत्वावृषांकंशरणंययुः॥ ४६॥ तपोनियममास्थायगृणंतोब्रह्मशाश्वतं॥ ऋषिभिःसहधर्मज्ञाभवंसर्वात्मनागताः॥ ४७॥

उग्राभिः रक्षोघ्नीभिः आत्मव्याप्तं आत्मनाअनौपाधिकेन ॥ ४८ ॥ आत्मनःमनसः योगंसर्ववृत्तिनिरोधं सांख्यंसम्यक्ख्यापनंआत्मनोजडवर्गात्पृथग्ग्रहणं आत्मामनः वशेआज्ञायां ॥४९ ॥ ५० ॥ भ
गवंतंषड्विधैश्वर्यवंतं एकमपितंयथायथोपासतइतिश्रुतेर्यथाभावनंशिवविष्णुरुद्रादिवेषेणनानारूपंअकल्पयन् आत्मनःचित्तस्यप्रतिरूपाणिसंकल्पानुसारीणिप्रतिबिंबानिवापरस्परस्यचेतिईश्वरस्वरूपेसर्वे

तुष्टुवुर्वाग्भिरुग्राभिर्भयेष्वभयदंनृप ॥ सर्वात्मानंमहात्मानंयेनाप्तंसर्वमात्मना ॥ ४८ ॥ तपोविशेषैर्विविधैर्योगंयोवेदचात्मनः ॥ यःसांख्यमात्मनोवेत्तियस्य
चात्मावशेसदा ॥ ४९ ॥ तंतेददृशुरीशानंतेजोराशिमुमापतिं ॥ अनन्यसदृशंलोकेभगवंतमकल्मषं ॥ ५० ॥ एकंचभगवंतंतेनानारूपमकल्पयन् ॥ आत्मनःप्र
तिरूपाणिरूपाण्यथमहात्मनि ॥ ५१ ॥ परस्परस्यचापश्यन्सर्वेपरमविस्मिताः ॥ सर्वभूतमयंदृष्ट्वातमजंजगतःपतिं ॥ ५२ ॥ देवाब्रह्मर्षयश्चैवशिरोभिर्धरणीं
गताः ॥ तान्स्वस्तिवादेनाभ्यर्च्यसमुत्थाप्यचशंकरः ॥ ५३ ॥ ब्रूतब्रूतेतिभगवान्स्मयमानोभ्यभाषत ॥ त्र्यंबकेणाभ्यनुज्ञातास्ततस्तेस्वस्थचेतसः ॥ ५४ ॥ नमो
नमोनमस्तेस्तुप्रभोइत्यब्रुवन्वचः ॥ नमोदेवाधिदेवायधन्विनेवनमालिने ॥ ५५ ॥ प्रजापतिमखघ्नायप्रजापतिभिरीड्यते ॥ नमस्तुतायस्तुत्यायस्तूयमाना
यशंभवे ॥ ५६ ॥ विलोहितायरुद्रायनीलग्रीवायशूलिने ॥ अमोघायमृगाक्षायप्रवरायुधयोधिने ॥ ५७ ॥ अर्हायचैवशुद्धायक्षयायक्रथनायच ॥ दुर्वारणा
यकाथायब्रह्मणेब्रह्मचारिणे ॥ ५८ ॥ ईशानायाप्रमेयायनियंत्रेचर्मवाससे ॥ तपोरतायपिंगायव्रतिनेकृत्तिवाससे ॥ ५९ ॥ कुमारपित्रेत्र्यक्षायप्रवरायुधधा
रिणे ॥ प्रपन्नार्तिविनाशायब्रह्मद्विट्संघघातिने ॥ ६० वनस्पतीनांपतयेनराणांपतयेनमः ॥ गवांचपतयेनित्यंयज्ञानांपतयेनमः ॥ ६१ ॥ नमोस्तुतेससैन्या
यत्र्यंबकायामितौजसे ॥ मनोवाक्कर्मभिर्देवत्वांप्रपन्नान्भजस्वनः ॥ ६२ ॥ ततःप्रसन्नोभगवान्स्वागतेनाभिनंद्यच ॥ प्रोवाचव्येतुवस्त्रासोब्रूतकिंकरवाणि
वः ॥ ६३ ॥ इतिश्रीमहाभारतेकर्णपर्वणित्रिपुराख्यानेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ७ ॥ दुर्योधनउवाच पितृदेवर्षिसंघेभ्योऽभयेदत्तेमहात्म
ना ॥ सत्कृत्यशंकरंप्राहब्रह्मालोकहितंवचः ॥ १ ॥ तवातिसर्गाद्देवेशप्राजापत्यमिदंपदं ॥ मयाधितिष्ठतादत्तोदानवेभ्योमहान्वरः ॥ २ ॥ताननतिक्रांतमर्यादान्
नान्यःसंहर्तुमर्हति ॥ त्वामृतेभूतभव्येशत्वंह्येषांप्रत्यरिर्वधे ॥ ३ ॥ सत्वंदेवप्रपन्नानांयाचतांचदिवौकसां ॥ कुरुप्रसादंदेवेशदानवाञ्जहिशंकर ॥ ४ ॥

आत्मानंपरांश्चापश्यन्नितिसार्धश्लोकःएकंवाक्यं ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ईड्यतेईड्यमानाय कर्मणीदमपौरुषं ॥ ५६ ॥ ५७ ॥ क्रथनायहिंस्राय ॥५८॥५९॥६०॥६१॥ भजस्वइष्टैः
कामैः पूरयस्व॥६२॥ व्येतुव्यपगच्छतु ॥६३॥ इतिकर्णप० नैलकंठीयेभारतभावदीपेत्रयस्त्रिंशोऽध्यायः ॥३३॥ ॥ ७ ॥ पित्रिति अभयेइतिच्छेदः ॥१॥२॥ वधेनिमित्तेप्रत्यरिः प्रतिकूलःशत्रुः॥३॥४॥

ऐधनअवर्धत तेंप्रसिद्धावयंशरणंगतास्त्वामितिशेषः ॥ ५ ॥ ६ ॥ संहताः एकीभूताः यूयं ॥७॥ तेषांतेजोस्मत्तेजस्तोद्विगुणंदृष्टमेवेत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ अर्धतेजसः ॥ १२ ॥ १३ ॥ महता सर्वातिशायिनाबलेनदीव्यतिप्रकाशतेइतिमहादेवः ॥ १४ ॥ १५ ॥ मूर्त्तीस्तेजोमात्राः समाधायएकीकृत्य ॥ १६ ॥ विहितंअपूर्वंज्ञापितंयथातथैवविश्वकर्मणाकृतं ॥ १७ ॥ शृंगंशृंगाकारखटिकायु

त्वत्प्रसादाज्जगत्सर्वंसुखमैधतमानद॥शरण्यस्त्वंहिलोकेशतेवयंशरणंगताः॥५॥ स्थाणुरुवाच हंतव्याःशत्रवःसर्वेयुष्माकमितिमेमतिः॥नत्वेकउत्सहेहंतुंबलस्थाहिसुरद्विषः॥ ६॥ तेयूयंसंहताःसर्वेमदीयेनार्धतेजसा॥ जयध्वंयुधितान्शत्रून्संहताहिमहाबलाः॥७॥ देवाऊचुः अस्मत्तेजोबलंयावत्तावद्द्विगुणमाहवे॥तेषामितिहिमन्यामोदृष्टतेजोबलाहिते॥८॥ श्रीभगवानुवाच वध्यास्तेसर्वतःपापायेयुष्मास्वपराधिनः॥ममतेजोबलार्धेनसर्वान्निघ्नतशात्रवान्॥ ९॥ देवाऊचुः बिभर्तुंभवनोर्धतुनशक्ष्यामोमहेश्वर॥सर्वेषांनोबलार्धेनत्वमेवजहिशात्रवान्॥ १०॥ श्रीभगवानुवाच यदिशक्तिर्नवःकाचिद्बिभर्तुंमामकंबलं॥ अहमेतान्हनिष्यामियुष्मत्तेजोर्धबृंहितः॥ ११॥ ततस्तथेतिदेवेशस्तैरुक्तोराजसत्तम॥ अर्धमादायसर्वेषांतेजसाभ्यधिकोभवत्॥ १२॥ सतुदेवोबलेनासीत्सर्वेभ्योबलवत्तरः॥ महादेवइतिख्यातस्ततःप्रभृतिशंकरः॥ १३॥ ततोब्रवीन्महादेवोधनुर्बाणधरोत्यहं॥हनिष्यामिरथेनाजौतान्रिपून्वोदिवौकसः॥ १४॥तेयूयंमेरथंचैवधनुर्बाणंतथैवच॥ पश्यध्वंयावदद्यैतान्पातयामिमहीतले॥१५॥ देवाऊचुः . मूर्तीःसर्वाःसमाधायत्रैलोक्यस्यततस्ततः॥रथंतेकल्पयिष्यामोदेवेश्वरसुवर्चसं॥ १६॥ तथैवबुद्ध्याविहितंविश्वकर्मकृतंशुभं॥ ततोविबुधशार्दूलास्तेरथंसमकल्पयन्॥ १७॥ विष्णुंसोमंहुताशंचतस्येषुंसमकल्पयन्॥शृंगमग्निर्बभूवास्यभल्लःसोमोविशांपते॥१८॥कुड्मलश्चाभवद्विष्णुस्तस्मिन्निषुवरेतदा॥रथंवसुंधरांदेवींविशालपुरमालिनीं॥ १९॥ सपर्वतवनद्वीपांचक्रुर्भूतधरांतदा॥ मंदरःपर्वतश्चाक्षंजंघातस्यमहानदी॥ २०दिशश्चप्रदिशश्चैवपरिवारोरथस्यतु॥ईषानक्षत्रवंशश्चयुगःकृतयुगोभवत्॥२१॥कूबरश्चरथस्यासीद्वासुकिर्भुजगोत्तमः॥अपस्करमधिष्ठानेहिमवान्विंध्यपर्वतः॥उदयास्तावधिष्ठानेगिरीचक्रेसुरोत्तमाः॥ २२॥

ककांडं भल्लःशल्यःकुड्मलस्तस्याधभागस्तस्यैवतीक्ष्णभागःसोमः शल्योविष्णुस्तेजनमितिश्रुतेः ॥ १८ ॥ १९ ॥ अक्षश्चक्राधारदंडः जंघाअक्षाधारकाष्ठं महानदीगंगा ॥ २० ॥ ईषायुगाक्षसंधानंत्रिवेणुमयंकाष्ठं युगःधुर्ययोजनदंडः ॥ २१ ॥ कूबरःयुगंधरः अपस्करंपश्चात्काष्ठंभुजगोत्तमःशेषः अधिष्ठानेचक्रेचक्रेअधिष्ठानेचक्राधारौ अधिष्ठानंपुरेचक्रेप्रभावेध्यासनेपिचेतिमेदिनी ॥ २२ ॥

अक्षंबंधनपाशसमुदायः समुद्रःजलमयत्वेनचिक्कणत्वात् परिष्करःचक्ररक्षादिः ॥ २३ ॥ सिंधुर्यमुनाख्यानदीति सभिस्त्रिवेणुस्थानीयाभिःसहितमाकाशंधुरंधूर्भागः उपस्करःबंधादिसामग्री ॥ २४ ॥ अनुकर्षरथाधःस्थितदारु वरूथंरथगुप्तिः ॥ २५ ॥ धर्मादयस्त्रिवेणुसदृशाबंधुरंरथतल्पं ॥ २६ ॥ पूर्वंहिमवद्विंध्यपर्वतौचक्रत्वेनोक्तौअत्रसूर्यचंद्रौचक्रत्वेनदृष्टावतश्चतुश्चक्रोरथइतिगम्यते अतःसमुद्रोप्यक्षां तरमितिकजुरैवार्थः पूर्वःपक्षःपूर्वांगंरात्रिः अपरःपक्षोऽपरांगअहः ॥ २७ ॥ २८ ॥ यांद्वितीयंयुगंचतुश्चक्रत्वाद्रथस्य संवर्तकवलाहकान्युगचर्माणिधुर्यस्कंधयुगयोरंतरस्थानिकशिपूनि ॥२९ ॥ वाल

समुद्रमक्षमसृजद्दानवालयमुत्तमं ॥ सप्तर्षिमंडलंचैवरथस्यासीत्परिष्करः ॥ २३ ॥ गंगासरस्वतींसिंधुंधुरमाकाशमेवच ॥ उपस्करोरथस्यासन्नापःसर्वाश्चनिम्नगाः ॥ २४ ॥ अहोरात्रंकलाश्चैवकाष्ठाश्चऋतवस्तथा ॥ अनुकर्षंग्रहादीप्तावरूथंचापितारकाः ॥ २५ ॥ धर्मार्थकामंसंयुक्तंत्रिवेणुंदारुबंधुरं ॥ ओषधीर्वीरुधश्चैवघंटाःपुष्पफलोपगाः ॥ २६ ॥ सूर्याचंद्रमसौकृत्वाचक्रेरथवरोत्तमे ॥ पक्षौपूर्वापरौतत्रकृतेराव्यहनीशुभे ॥ २७ ॥ दशनागपतीनीषांधृतराष्ट्रमुखांस्तदा ॥ योक्त्राणिचकुर्नागांश्चनिःश्वसतोमहोरगान् ॥ २८ ॥ द्यांयुगंयुगचर्माणिसंवर्तकवलाहकान् ॥ कालपृष्ठोथनहुषःकर्कोटकधनंजयौ ॥ २९ ॥ इतरेचाभवन्नागाहयानांवालबंधनाः ॥ दिशश्चप्रदिशश्चैवरश्मयोरथवाजिनां ॥ ३० ॥ संध्यांधृतिंचमेधांचस्थितिंसन्नतिमेवच ॥ ग्रहनक्षत्रताराभिश्चर्मचित्रंनभस्तलं ॥ ३१ ॥ सुरांबुप्रेतवित्तानांपतीन्लोकेश्वरान्हयान् ॥ सिनीवालीमनुमतिंकुहूंराकांचसुव्रतां ॥ ३२ ॥ योक्त्राणिचकुर्वाहानांरोहकांस्तत्रकंटकान् ॥ धर्मःसत्यंतपोर्थश्चविहितास्तत्ररश्मयः ॥ ३३ ॥ अधिष्ठानंमनश्चासीत्परिरथ्यासरस्वती ॥ नानावर्णाश्चचित्राश्चपताकाःपवनेरिताः ॥ ३४ ॥ विद्युदिंद्रधनुर्नद्धंरथंदीप्तंव्यदीपयन् ॥ वषट्कारःप्रतोदोभूद्गायत्रीशीर्षबंधना ॥ ३५ ॥ योयज्ञेविहितःपूर्वमीशानस्यमहात्मनः ॥ संवत्सरोधनुस्तद्वैसावित्रीज्यामहास्वना ॥ ३६ ॥ दिव्यंचवर्मविहितंमहार्हंरत्नभूषितं ॥ अभेद्यंविरजस्कंवैकालचक्रबहिष्कृतं ॥ ३७ ॥ ध्वजयष्टिरभून्मेरुःश्रीमान्कनकपर्वतः ॥ पताकाश्चाभवन्मेघास्तडिद्भिःसमलंकृताः ॥ ३८ ॥

बंधनाः अश्वकेसरबंधनाः ॥ ३० ॥ नभस्तलंचर्मरथस्यबाह्यमावरणंतच्चसंध्यादिभिर्ग्रहादिभिश्चचित्रं ॥ ३१ ॥ सिनीवालींपूर्वामावास्यां अनुमतिंपूर्वपौर्णमासीं कुहूंउत्तरामावास्यां राकांउत्तरांपौर्णमासीं ॥ ३२ ॥ रोहकान्सिनीवाल्याद्यधिष्ठातॄन्पित्रादीन् कंटकान्प्रकीलकान् धर्मादयस्तत्रकंटकेषुरश्मयः ॥ ३३ ॥ मनःअधिष्ठानंरथाधारभूः मनोमयोरथइत्यर्थः परिरथ्याप्रचारमार्गः सरस्वतीवाग्देवीकल्पितः शब्दमात्रशरीरइत्यर्थः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

अध्वर्यूणामृत्विजांमध्येस्थिताः पावकाःधिष्ण्यगाः ॥ ३९ ॥ ४० ॥ ४१ ॥ गोवृषंध्वजत्वेनस्थापयामास ॥ ४२ ॥ परिस्कंदाः पार्श्वगोपाः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ छायांपूर्वोक्तांसावित्रींशब्द
ब्रह्मरूपत्वादात्मनस्तुल्यां ॥ ४७ ॥ ४८ ॥ ४९ ॥ धनुर्ज्याकालरात्रिरूपातस्याःसंस्पर्शनविषेहुःनसेहिरे तेऽसुराः ॥ ५० ॥ तिग्ममन्युंतीक्ष्णसंकल्पं ॥ ५१ ॥ अजयमितिच्छेदः संधिरार्षः ॥ ५२ ॥ ५३ ॥

रेजुरध्वर्युमध्यस्थाज्वलंतइवपावकाः ॥ कूमंतुतंरथंदृष्ट्वाविस्मितादेवताभवन् ॥ ३९ ॥ सर्वलोकस्यतेजांसिदृष्ट्वैकस्थानिमारिष ॥ युक्तंनिवेदयामासुर्दे
वास्तस्मैमहात्मने ॥ ४० ॥ एवंतस्मिन्महाराजकल्पितेरथसत्तमे ॥ देवैर्मनुजशार्दूलद्विषतामभिमर्दने ॥ ४१ ॥ स्वान्यायुधानिमुख्यानिन्यदधाच्छंकरो
रथे ॥ ध्वजयष्टिंवियत्कृत्वास्थापयामाससगोवृषं ॥ ४२ ॥ ब्रह्मदंडःकालदंडोरुद्रदंडस्तथाज्वरः ॥ परिस्कंदारथस्यासन्सर्वतोदिशमुद्यताः ॥ ४३ ॥ अथ
र्वांगिरसावास्तांचक्ररक्षौमहात्मनः ॥ ऋग्वेदःसामवेदश्चपुराणंचपुरःसराः ॥ ४४ ॥इतिहासयजुर्वेदौपृष्ठरक्षौबभूवतुः ॥ दिव्यावाचश्चविद्याश्चपरिपार्श्वच
राःस्थिताः ॥ ४५ ॥ स्तोत्रादयश्चराजेंद्रवषट्कारस्तथैवच ॥ ओंकारश्चमुखेराजन्नतिशोभाकरोभवत् ॥ ४६ ॥ विचित्रमृतुभिःषड्भिःकृत्वासंवत्सरंधनुः ॥ छा
यामेवात्मनश्चक्रेधनुर्ज्यामक्षयांरणे ॥ ४७ ॥ कालोहिभगवानरुद्रस्तस्यसंवत्सरोधनुः ॥ तस्माद्रौद्रीकालरात्रिर्ज्याकृताधनुषोजरा ॥ ४८ ॥ इषुश्चाप्यभवद्वि
ष्णुर्ज्वलनःसोमएवच ॥ अग्नीषोमौजगत्कृत्स्नंवैष्णवंरोच्यतेजगत् ॥ ४९ ॥ विष्णुश्चात्माभगवतोभवस्यामिततेजसः ॥ तस्माद्धनुर्ज्यासंस्पर्शनविषेहुर्हरस्य
ते ॥ ५० ॥ तस्मिन्शरेतिग्ममन्युंमुमोचासह्यमीश्वरः ॥ भृग्वंगिरोमन्युभवंक्रोधाग्निमतिदुःसहं ॥ ५१ ॥ सनीललोहितोधूम्रःकृत्तिवासाभयंकरः ॥ आदि
त्यायुतसंकाशस्तेजोज्वालावृतोज्वलन् ॥ ५२ ॥ दुश्च्यावच्यावनोजेताहंताब्रह्मद्विषांहरः ॥ नित्यंत्राताचहंताचधर्माधर्माश्रितान्नरान् ॥ ५३ ॥ प्रमाथिभिर्भी
मबलैर्भीमरूपैर्मनोजवैः ॥ विभातिभगवान्स्थाणुस्तैरेवात्मगुणैर्वृतः ॥ ५४ ॥ तस्यांगानिसमाश्रित्यस्थितंविश्वमिदंजगत् ॥ जंगमाजंगमंराजंञ्शुशुभेऽद्भु
तदर्शनं ॥ ५५ ॥ दृष्ट्वातुतंरथंयुक्तंकवचीसशरासनी ॥ बाणमादायतंदिव्यंसोमविष्ण्वग्निसंभवं ॥ ५६ ॥ तस्यराजंस्तदादेवाःकल्पयांचक्रिरेप्रभो ॥ पुण्यगंधव
हंराजन्श्वसनंदेवसत्तमं ॥ ५७ ॥ तमास्थायमहादेवस्त्रासयन्दैवतान्यपि ॥ आरुरोहतदायत्तःकंपयन्निवमेदिनीं ॥ ५८ ॥ तमारुरुक्षुंदेवेशंतुष्टुवुःपरमर्षयः ॥
गंधर्वादेवसंघाश्चतथैवाप्सरसांगणाः ॥ ५९ ॥ ब्रह्मर्षिभिःस्तूयमानोवंद्यमानश्चवंदिभिः ॥ तथैवाप्सरसांवृंदैर्नृत्यद्भिर्नृत्यकोविदैः ॥ ६० ॥

तैरथादिभूतैःआत्मगुणैःआत्मनोभोक्तुर्गुणभूतैर्भोग्यैः ॥ ५४ ॥ ५५ ॥ बाणमादायस्थितंतंदृष्ट्वादेवास्तस्यानुकूलंजयावहंश्वसनंकल्पयांचक्रिरेइत्यन्वयः ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

सशोभमानोवरदःखड्गीबाणीशरासनी ॥ हसन्निवाब्रवीद्देवान्सारथिःकोभविष्यति ॥ ६१ ॥ तमब्रुवन्देवगणायंभवान्संनियोक्ष्यते ॥ सभविष्यतिदेवेशंसार
थिस्तेनसंशयः ॥ ६२ ॥ तानब्रवीत्पुनर्देवोमत्तःश्रेष्ठतरोहियः ॥ तंसारथिंकुरुध्वंमेस्वयंसंचिन्त्यमाचिरं ॥ ६३ ॥ एतच्छ्रुत्वाततोदेवावाक्यमुक्तंमहात्मना ॥ ग
त्वापितामहंदेवाः प्रसाद्येदंवचोब्रुवन् ॥ ६४ ॥ यथात्वत्कथितंदेवत्रिदशारिविनिग्रहे ॥ तथाचकृतमस्माभिःप्रसन्नोनोवृषध्वजः ॥ ६५ ॥ रथश्चविहितोऽस्माभि
र्विचित्रायुधसंवृतः ॥ सारथिंचनजानीमःकःस्यात्तस्मिन्रथोत्तमे ॥ ६६ ॥ तस्माद्विधीयतांकश्चित्सारथिर्देवसत्तम ॥ सफलांतांगिरंदेवकर्तुमर्हसिनोविभो
॥ ६७ ॥ एवमस्मासुहिपुराभगवन्नुक्तवानसि ॥ हितकर्तास्मिभवतामितितत्कर्तुमर्हसि ॥ ६८ ॥ सदेवयुक्तोरथसत्तमोनोदुराधरोद्रावणःशात्रवाणां ॥ पि
नाकपाणिर्विहितोत्रयोद्धाविभीषयन्दानवानुद्यतोसौ ॥ ६९ ॥ तथैववेदाश्चतुरोहयाग्र्याधरासशैलाचरथोमहात्मनः ॥ नक्षत्रवंशानुगतोवरूथीहरोयोद्धासा
रथिर्नाभिलक्ष्यः ॥ ७० ॥ तत्रसारथिरेष्टव्यःसर्वैरेतैर्विशेषवान् ॥ तत्प्रतिष्ठोरथोदेवहयायोद्धातथैवच ॥ ७१ ॥ कवचानिसशस्त्राणिकार्मुकंचपितामह ॥ त्वामृ
तेसारथिंतत्रनान्यंपश्यामहेवयं ॥ ७२ ॥ त्वंहिसर्वगुणैर्युक्तोदैवतेभ्योधिकःप्रभो ॥ सरथंतूर्णमारुह्यसंयच्छपरमान्हयान् ॥ ७३ ॥ जयायत्रिदिवेशानांवधा
यत्रिदशद्विषां ॥ इतितेशिरसागत्वात्रिलोकेशंपितामहं ॥ देवाःप्रसादयामासुःसारथ्यायेतिनःश्रुतं ॥ ७४ ॥ पितामहउवाच नात्रकिंचिन्मृषावाक्यं
यदुक्तंत्रिदिवौकसः ॥ संयच्छामिहयानेषयुध्यतोवैकपर्दिनः ॥ ततःसभगवान्देवोलोकस्रष्टापितामहः ॥ ७५ ॥ सारथ्येकल्पितोदेवैरीशानस्यमहात्मनः ॥ त
स्मिन्नारोहतिक्षिप्रस्यंदनेलोकपूजिते ॥ ७६ ॥ शिरोभिरगमन्भूमिंतेहयावातरंहसः ॥ आरुह्यभगवान्देवोदीप्यमानःस्वतेजसा ॥ ७७ ॥ अभीषून्हिप्रतोदं
चसंजग्राहपितामहः ॥ ततउत्थायभगवांस्तान्हयाननिलोपमान् ॥ ७८ ॥ बभाषेचतदास्थाणुमारोहेतिसुरोत्तमः ॥ ततस्तमिषुमादायविष्णुसोमाग्निसंभवं ॥
॥ ७९ ॥ आरुरोहतदास्थाणुर्धनुषाकंपयन्परान् ॥ तमारूढंतुदेवेशंतुष्टुवुःपरमर्षयः ॥ ८० ॥ गंधर्वादेवसंघाश्चतथैवाप्सरसांगणाः ॥ सशोभमानोवरदःखड्गी
बाणीशरासनी ॥ ८१ ॥ प्रदीपयन्रथेतस्थौत्रींल्लोकान्स्वेनतेजसा ॥ ततोभूयोब्रवीद्देवोदेवानिंद्रपुरोगमान् ॥ ८२ ॥ नहन्यादितिकर्तव्योनशोकोवःकथंचन ॥
हतानित्येवजानीतबाणेनानेनचासुरान् ॥ ८३ ॥ तेदेवाःसत्यमित्याहुर्निहताइतिचाब्रुवन् ॥ नचतद्वचनंमिथ्यायदाहभगवान्प्रभुः ॥ ८४ ॥

॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥

इतिसंचिंत्यवैदेवाःपरांतुष्टिमवाप्नुवन् ॥ ततःप्रयातोदेवेशःसर्वैर्देवगणैर्वृतः ॥ ८५ ॥ रथेनमहताराजन्नुपमानास्तियस्यह ॥ स्वैश्चपारिषदैर्देवःपूज्यमानो महायशाः ॥ ८६ ॥ नृत्यद्भिरपरैश्चैवमांसभक्षैर्दुरासदैः ॥ धावमानैःसमंताच्चतर्जमानैःपरस्परं ॥ ८७ ॥ ऋषयश्चमहाभागास्तपोयुक्तामहागुणाः ॥ आशंसुर्वैजनादेवामहादेवस्यसर्वशः ॥ ८८ ॥ एवंप्रयातेदेवेशेलोकानामभयंकरे ॥ तुष्टमासीज्जगत्सर्वंदेवनाश्चनरोत्तम ॥ ८९ ॥ ऋषयस्तत्रदेवेशंस्तुवंतोवहुभिःस्तवैः ॥ तेजश्चास्मैवर्धयंतोराजन्नासन्पुनःपुनः ॥ ९० ॥ गंधर्वाणांसहस्राणिप्रयुतान्यर्बुदानिच ॥ वादयंतिप्रयाणेस्यैवाद्यानिविविधानिच ॥ ९१ ॥ ततोधिरूढे वरदेप्रयातेचासुरान्प्रति ॥ साधुसाध्वितिविश्वेशःस्मयमानोऽभ्यभापत ॥ ९२ ॥ याहिदेवयतोदैत्याश्चोदयाश्वानतंद्रितः ॥ पश्यवाह्वोर्वलंमेघनिघ्नतःशात्रवाणे ॥ ९३ ॥ ततोश्वांश्चोदयामासमनोमारुतरंहसः ॥ येनतत्त्रिपुरंराजन्दैत्यदानवरक्षितं ॥ ९४ ॥ पिवद्भिरिवचाकाशंतैर्हयैर्लोकपूजितैः ॥ जगामभगवान्क्षिप्रंजयायत्रिदिवौकसां ॥ ९५ ॥ प्रयांतेरथमास्थायत्रिपुराभिमुखेभवे ॥ ननादसुमहान्नादंवृपभःपूरयन्दिशः ॥ ९६ ॥ वृपभस्यास्यनिनदंश्रुत्वाभयकरंमहत् ॥ विनाशमगमंस्तत्रतारकाःसुरशत्रवः ॥ ९७ ॥ अपरेवस्थितास्तत्रयुद्धायाभिमुखास्तदा ॥ ततःस्थाणुर्महाराजशूलधृक्क्रोधमूर्छितः ॥ ९८ ॥ त्रस्तानि सर्वभूतानित्रैलोक्यंभूःप्रकंपते ॥ निमित्तानिचघोराणितत्रसंदधतःशरं ॥ ९९ ॥ तस्मिन्सोमाग्निविष्णूनांक्षोभेणब्रह्मरुद्रयोः ॥ सरथोधनुपःक्षोभादतीवत्यवसीदति ॥ १०० ॥ ततोनारायणस्तस्माच्छरभागाद्विनिःसृतः ॥ वृपरूपंसमास्थायउज्जहारमहारथं ॥ १०१ ॥ सीदमानेरथेचैवनर्दमानेषुशत्रुषु ॥ ससंभ्रमात्तुभगवान्नादंचक्रेमहाबलः ॥ २ ॥ वृपभस्यास्थितोमूर्ध्निहयपृष्ठेचमानद ॥ तदासभगवान्रुद्रोनिरैक्षद्दानवंपुरं ॥ ३ ॥ वृपभस्यास्थितोरुद्रोहयस्यचनरोत्तम ॥ स्तनांस्तदाशातयनखुरांश्चैवद्विधाकरोत् ॥ ४ ॥ ततःप्रभृतिभद्रंतेगवांद्वैधीकृताःखुराः ॥ हयानांचस्तनाराजंस्तदाप्रभृतिनाभवन् ॥ ५ ॥ पीडितानांवलवता रुद्रेणाद्भुतकर्मणा ॥ अथाधिज्यंधनुःकृत्वाशर्वःसंधायतंशरं ॥ ६ ॥ युक्त्वापाशुपतास्त्रेणत्रिपुरंसमचिंतयत् ॥ तस्मिन्स्थितेमहाराजरुद्रेविधृतकार्मुके ॥ ७ ॥ पुराणितानिकालेनजग्मुरेकत्वंतदा ॥ एकीभावंगतेचैवत्रिपुरत्वमुपागते ॥ ८ ॥ वभूवतुमलोहर्षोदेवतानांमहात्मनां ॥ ततोदेवगणाःसर्वेसिद्धाश्चपरमर्षयः ॥ ९ ॥ जयेतिवाचोमुमुचुःसंस्तुवंतोमहेश्वरं ॥ ततोग्रतःप्रादुरभूत्त्रिपुरंनिघ्नतोसुरान् ॥ ११० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ १३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ १३४ ॥

अनिर्देश्योग्रवपुषोदेवस्यामितेजसः ॥ सतद्विकृष्यभगवान्दिव्यंलोकेश्वरोधनुः ॥ ११ ॥ त्रैलोक्यसारंतमिषुंमुमोचत्रिपुरंप्रति ॥ उत्सृष्टेवैमहाभागतस्मिन्निषुवरेतदा ॥ १२ ॥ महानार्तस्वरोत्यासीत्पुराणांपततांभुवि ॥ तान्सोऽसुरगणान्दग्ध्वाप्राक्षिपत्पश्चिमार्णवे ॥ १३ ॥ एवंतुत्रिपुरंदग्धंदानवाश्चाप्यशेषतः ॥ महेश्वरेणक्रुद्धेनत्रैलोक्यस्यहितैषिणा ॥ १४ ॥ सचात्मक्रोधजोवह्निर्हाहेत्युक्त्वानिवारितः ॥ मोकार्षीर्भस्मसाल्लोकानितिच्यक्षोत्रवीचवन् ॥ १५ ॥ ततःप्रकृतिमापन्नादेवालोकास्त्वथर्षयः ॥ तुष्टुवुर्वाग्भिरग्र्याभिःस्थाणुमप्रतिमौजसं ॥ १६ ॥ तेनुज्ञाताभगवताजग्मुःसर्वेयथागतं ॥ कृतकामाःप्रयत्नेनप्रजापतिमुखाःसुराः ॥ १७ ॥ एवंसभगवान्देवालोकस्रष्टामहेश्वरः ॥ देवासुरगणाध्यक्षोलोकानांविदधेशिवं ॥ १८ ॥ यथैवभगवान्ब्रह्मालोकधातापितामहः ॥ सारथ्यमकरोत्तत्ररुद्रस्यपरमोव्ययः ॥ १९ ॥ तथाभवानपिक्षिप्रंरुद्रस्येवपितामहः ॥ संयच्छतुहयानस्यराधेयस्यमहात्मनः ॥ २० ॥ त्वंहिकृष्णाच्चकर्णाच्चफाल्गुनाच्चविशेषतः ॥ विशिष्टोराजशार्दूलनास्तितत्रविचारणा ॥ २१ ॥ युद्धेह्ययंरुद्रकल्पस्त्वंचब्रह्मसमोनये ॥ तस्माच्छक्तोभवान्जेतुंमच्छत्रूंस्तानिवासुरान् ॥ २२ ॥ यथाशल्याद्यकर्णोयंश्वेताश्वंकृष्णसारथिं ॥ प्रमथ्यहन्यात्कौंतेयंतथाशीघ्रंविधीयतां ॥ २३ ॥ त्वयिमद्रेशराज्याशाजीविताशातथैवच ॥ विजयश्चतथैवाद्यकर्णसाचिव्यकारितः ॥ २४ ॥ त्वयिकर्णश्चराज्यंचवयंचैवप्रतिष्ठिताः ॥ विजयश्चैवसंग्रामेसंयच्छाद्यहयोत्तमान् ॥ २५ ॥ इमंचाप्यपरंभूयइतिहासंनिबोधमे ॥ पितुर्ममसकाशेयद्ब्राह्मणःप्राहधर्मवित् ॥ २६ ॥ श्रुत्वाचैतद्वचश्चित्रंहेतुकार्यार्थसंहितं ॥ कुरुशल्यविनिश्चित्यमाभूदत्रविचारणा ॥ १७ ॥ भार्गवाणांकुलेजातोजमदग्निर्महायशाः ॥ तस्यरामेतिविख्यातःपुत्रस्तेजोगुणान्वितः ॥ २७ ॥ सतीव्रंतपआस्थायप्रसादयितवान्भवं ॥ अस्त्रहेतोःप्रसन्नात्मानियतःसंयतेंद्रियः ॥ २८ ॥ तस्यतुष्टोमहादेवोभक्त्याचप्रशमेनच ॥ हृद्गतंचास्यविज्ञायदर्शयामासशंकरः ॥ महेश्वरउवाच रामतुष्टोस्मिभद्रंतेविदितंमेतवेप्सितं ॥ कुरुष्वपूतमात्मानंसर्वमेतदवाप्स्यसि ॥ ३० ॥ दास्यामितेतदास्त्राणियदापूतोभविष्यसि ॥ अपात्रमसमर्थंचदहंत्यस्त्राणिभार्गव ॥ ३१ ॥ इत्युक्तोजामदग्न्यस्तुदेवदेवेनशूलिना ॥ प्रत्युवाचमहात्मानंशिरसावनतःप्रभुं ॥ ३२ ॥ यदाजानातिदेवेशःपात्रंमामस्त्रधारणे ॥ तदाशुश्रूषवेस्त्राणिभवान्मेदातुमर्हति ॥ ३३ ॥ दुर्योधनउवाच ततःसतपसाचैवदमेननियमेनच ॥ पूजोपहारबलिभिर्होममंत्रपुरस्कृतैः ॥ १३४ ॥

आराधयितवान्शर्वंबहून्वर्षगणांस्तदा ॥ प्रसन्नश्चमहादेवोभार्गवस्यमहात्मनः ॥ ३५ ॥ अब्रवीत्तस्यबहुशोगुणान्देव्याःसमीपतः ॥ भक्तिमानेषसततंमयि
रामोदृढव्रतः ॥ ३६ ॥ एवंतस्यगुणान्प्रीतोबहुशोऽकथयत्प्रभुः ॥ देवतानांपितॄणांचसमक्षमरिसूदन ॥ ३७ ॥ एतस्मिन्नेवकालेतुदैत्याह्यासन्महाबलाः ॥ तैस्त
दादर्पमोहाद्धैरबाध्यंतदिवौकसः ॥ ३८ ॥ ततःसंभूयविबुधास्तान्हंतुंकृतनिश्चयाः ॥ चक्रुःशत्रुवधेयत्नंनशेकुर्जेतुमेवतान् ॥ ३९ ॥ अभिगम्यततोदेवामहेश्वर
मुमापतिं ॥ प्रासादयंस्तदाभक्त्याजहिशत्रुगणानिति ॥ ४० ॥ प्रतिज्ञायततोदेवोदेवतानांरिपुक्षयं ॥ रामंभार्गवमाहूयसोऽभ्यभाषतशंकरः ॥ ४१ ॥ रिपून्भा
र्गवदेवानांजहिसर्वान्समागतान् ॥ लोकानांहितकामार्थंमत्प्रीत्यर्थंतथैवच ॥ ४२ ॥ एवमुक्तःप्रत्युवाचत्र्यंबकंवरदंप्रभुं ॥ राम उवाच काशक्तिर्ममदे
वेशअकृतास्त्रस्यसंयुगे ॥ ४३ ॥ निहंतुंदानवान्सर्वान्कृतास्त्रान्युद्धदुर्मदान् ॥ महेश्वर उवाच गच्छत्वंमदनुज्ञातोनिहनिष्यसिशात्रवान् ॥ ४४ ॥ वि
जित्यचरिपून्सर्वान्गुणान्प्राप्स्यसिपुष्कलान् ॥ एतच्छ्रुत्वातुवचनंप्रतिगृह्यचसर्वशः ॥ ४५ ॥ रामःकृतस्वस्त्ययनःप्रययौदानवान्प्रति ॥ अब्रवीद्देवशत्रूंस्ता
न्महादर्पबलान्वितान् ॥ ४६ ॥ ममयुद्धंप्रयच्छध्वंदैत्यायुद्धमदोत्कटाः ॥ प्रेषितोदेवदेवेनवोविजेतुंमहासुराः ॥ ४७ ॥ इत्युक्ताभार्गवेणाथदैत्यायुद्धंप्रचक्र
मुः ॥ संतान्निहत्यसमरेदैत्यान्भार्गवनंदनः ॥ ४८ ॥ वज्राशनिसमस्पर्शैःप्रहारैरेवभार्गवः ॥ सदानवैःक्षततनुर्जामदग्न्योद्विजोत्तमः ॥ ४९ ॥ संस्पृष्टःस्थाणुना
सद्योनिर्व्रणःसमजायत ॥ प्रीतश्चभगवान्देवःकर्मणातेनतस्यवै ॥ ५० ॥ वरान्प्रादाद्बहुविधान्भार्गवायमहात्मने ॥ उक्तश्चदेवदेवेनप्रीतियुक्तेनशूलिना ॥
॥ ५१ ॥ निपातात्तवशस्त्राणांशरीरेयाऽभवद्रुजा ॥ तयातेमानुषंकर्मव्यपोढंभृगुनंदन ॥ ५२ ॥ गृहाणास्त्राणिदिव्यानिमत्सकाशाद्यथेप्सितं ॥ दुर्योधन उ
वाच तन्नस्त्राणिसमस्तानिवरांश्चमनसेप्सितान् ॥ ५३ ॥ लब्ध्वाबहुविधान्रामःप्रणम्यशिरसाभवं ॥ अनुज्ञांप्राप्यदेवेशाज्जगामसमहातपाः ॥ ५४ ॥ ए
वमेतत्पुरावृत्तंतदाकथितवानृषिः ॥ भार्गवोप्यददौदिव्यंधनुर्वेदंमहात्मने ॥ ५५ ॥ कर्णायपुरुषव्याघ्रसुप्रीतेनांतरात्मना ॥ वृजिनंहिभवेत्किंचिद्यदिकर्णस्य
पार्थिव ॥ ५६ ॥ नास्मैस्त्र्यस्त्राणिदिव्यानिप्रादास्यद्भृगुनंदनः ॥ नापिसूतकुलेजातंकर्णंमन्येकथंचन ॥ ५७ ॥ देवपुत्रमहंमन्येक्षत्रियाणांकुलोद्भवं ॥ विसृष्ट
मवबोधार्थंकुलस्येतिमतिर्मम ॥ ५८ ॥ सर्वथानत्वयंशल्यकर्णःसूतकुलोद्भवः ॥ सकुंडलंसकवचंदीर्घबाहुंमहारथं ॥ ५९ ॥

॥ १६० ॥ ६१ ॥ ६२ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ ७ ॥ एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ नरसिंहयोः कृष्णार्जुनयोः अतस्तयोः साम्यंममकी

कथमादित्यसदृशंमृगीव्याघ्रंजनिष्यति ॥ यथाह्यस्यभुजौपीनौनागराजकरोपमौ ॥ ६० ॥ वक्षःपश्यविशालंचसर्वशत्रुनिबर्हणं ॥ नत्वेषप्राकृतःकश्चित्क र्णोवैकर्त्तनोवृषः ॥ ६१ ॥ महात्मात्येपराजेंद्ररामशिष्यःप्रतापवान् ॥ ६२ ॥ इतिश्रीमहाभारतेकर्णपर्वणित्रिपुरवधोपाख्यानेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ दुर्योधनउवाच एवंसभगवान्देवःसर्वलोकपितामहः ॥ सारथ्यमकरोत्तत्रब्रह्मारुद्रोभवद्रथी ॥ १ ॥ रथिनोभ्यधिकोवीरकर्त्तव्योरथसारथिः ॥ तस्मात्त्वं पुरुषव्याघ्रनियच्छतुरंगान्युधि ॥ २ ॥ यथादेवगणैस्तत्रवृतोयत्नात्पितामहः ॥ तथास्माभिर्भवान्यत्नात्कर्णादभ्यधिकोवृतः ॥ ३ ॥ यथादेवैर्महाराजईश्वरा दधिकोवृतः ॥ तथाभवानपिक्षिप्रंरुद्रस्येवपितामहः ॥ ४ ॥ नियच्छतुरगान्युद्धेराधेयस्यमहाद्युते ॥ शल्यउवाच मयाप्येतन्नरश्रेष्ठबहुशोनरसिंहयोः ॥ ५ ॥ कथ्यमानंश्रुतंदिव्यमाख्यानमतिमानुषं ॥ यथाचचक्रेसारथ्यंभवस्यप्रपितामहः ॥ ६ ॥ यथाऽसुराश्चनिहताइषुणैकेनभारत ॥ कृष्णस्यचापिविदितं सर्वमेतत्पुराह्यभूत् ॥ ७ ॥ यथापितानहोजज्ञेभगवान्सारथिस्तदा ॥ अनागतमतिक्रांतंवेदकृष्णोपितत्त्वतः ॥ ८ ॥ एतदर्थंविदित्वापिसारथ्यमुपजग्मिवान् ॥ स्वयंभूरिवरुद्रस्यकृष्णःपार्थस्यभारत ॥ ९ ॥ यदिहन्याच्चकौंतेयंसूतपुत्रःकथंचन ॥ दृष्ट्वापार्थंहिनिहतंस्वयंयोत्स्यतिकेशवः ॥ १० ॥ शंखचक्रगदापाणिर्धक्ष्य तेतववाहिनीं ॥ नचापितस्यकुद्धस्यवार्ष्णेयस्यमहात्मनः ॥ ११ ॥ स्थास्यतेप्रत्यनीकेषुकश्चिदत्रनृपस्तव ॥ संजयउवाच तंतथाभाषमाणंतुमद्रराजम रिंदमः ॥ १२ ॥ प्रत्युवाचमहाबाहुरदीनात्मासुतस्तव ॥ मावमंस्थामहाबाहोकर्णंवैकर्तनंरणे ॥ १३ ॥ सर्वशस्त्रभृतांश्रेष्ठंसर्वशास्त्रार्थपारगं ॥ यस्यज्यातलनि र्घोषंश्रुत्वाभयकर्ममहत् ॥ १४ ॥ पांडवेयानिसैन्यानिविद्रवंतिदिशोदश ॥ प्रत्यक्षंतेमहाबाहोयथारात्रौघटोत्कचः ॥ १५ ॥ मायाशतानिकुर्वाणोहतोमाया पुरस्कृतः ॥ नचातिष्ठतबीभत्सुःप्रत्यनीककथंचन ॥ १६ ॥ एतांश्चदिवसान्सर्वान्भयेनमहतावृतः ॥ भीमसेनश्चबलवान्धनुष्कोट्याभिचोदितः ॥ १७ ॥ उक्त श्चसंज्ञयाराजन्मूढऔदरिकोयथा ॥ माद्रीपुत्रौतथाशूरौयेनजित्वामहारणे ॥ १८ ॥ कमप्यर्थंपुरस्कृत्यनहतौयुधिमारिष ॥ येनवृष्णिप्रवीरस्तुसात्यकिःसा त्वतांवरः ॥ १९ ॥ निर्जित्यसमरेशूरोविरथश्चबलात्कृतः ॥ संजयाश्चेतरेसर्वेधृष्टद्युम्नपुरोगमाः ॥ २० ॥

किंकरमेवेतिभावः सुरसिंहयोरितिपाठेरुद्रपितामहयोः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ किमर्थमिति ॥ सारथ्यमात्रंप्रतिज्ञायप्रातिभव्यंचेत्कृष्णःकुर्यात्तर्हित्वंयुध्यन्तद्वन्मिथ्याप्रतिज्ञोनभविष्यसीतिभावः ॥ २६ ॥ पदवीमानृण्यं ॥ २७॥२८॥ २९॥

असकृन्निर्जिताःसंख्येस्मयमानेनसंयुगे॥ तंकथंपांडवायुद्धेविजेष्यंतिमहारथं ॥ २१ ॥ योहन्यात्समरेक्रुद्धोवज्रहस्तंपुरंदरं ॥ त्वंचसर्वास्त्रविद्वीरःसर्वविद्या
स्त्रपारगः॥ २२ ॥ बाहुवीर्येणतेतुल्यःपृथिव्यांनास्तिकश्चन॥ त्वंशल्यभूतःशत्रूणामविषह्यःपराक्रमे ॥ २३ ॥ ततस्त्वमुच्यसेराजन्शल्यइत्यरिसूदन ॥ तव
बाहुबलंप्राप्यनशेकुःसर्वसात्वताः॥ २४ ॥तवबाहुबलाद्राजन्किंतुकृष्णोबलाधिकः॥ यथाहिकृष्णेनबलंधार्यंवैफाल्गुनेहते॥ २५ ॥ तथाकर्णात्ययीभावेत्व
याधार्यंमहद्बलं॥ किमर्थंसमरेसैन्यंवासुदेवोन्यवारयत्॥ २६॥ किमर्थंचभवान्सैन्यंनहनिष्यतिमारिष॥ त्वत्कृतेपदवींगंतुमिच्छेयंयुधिमारिष॥सोदराणां
चवीराणांसर्वेषांचमहीक्षितां॥ २७॥ शल्यउवाच यन्मांब्रवीषिगांधारेअग्रेसैन्यस्यमानद॥ विशिष्टंदेवकीपुत्रात्प्रीतिमानस्म्यहंत्वयि ॥ २८॥ एष
सारथ्यमातिष्ठेराधेयस्ययशस्विनः॥ युध्यतःपांडवाग्र्येणयथात्वंवीरमन्यसे॥ २९॥ समयश्चहिमेवीरकश्चिद्वैकर्तनंप्रति॥ उत्सृजेयंयथाश्रद्धमहंवाचोस्यस
न्निधौ॥ ३०॥ संजयउवाच. तथेतिराजन्पुत्रस्तेसहकर्णेनमारिष॥ अब्रवीन्मद्रराजानंसर्वक्षत्रस्यसन्निधौ॥ ३१॥ सारथ्यस्याभ्युपगमाच्छल्येनाश्वा
सितस्तदा॥ दुर्योधनस्तदाहृष्टःकर्णंतमभिषस्वजे॥ ३२॥ अब्रवीच्चपुनःकर्णस्तूयमानःसुतस्तव॥ जहिपार्थान्रणेसर्वान्महेंद्रोदानवानिव॥३३॥ सशल्येना
भ्युपगतेहयानांसंनियच्छने॥ कर्णोहृष्टमनाभूयोदुर्योधनमभाषत ॥ ३४ ॥ नातिहृष्टमनाह्येषमद्रराजोभिभाषते ॥ राजन्मधुरयावाचापुनरेनंब्रवीहिवै॥
॥ ३५॥ ततोराजामहाप्राज्ञःसर्वास्त्रकुशलोबली॥ दुर्योधनोब्रवीच्छल्यंमद्रराजंमहीपतिं॥ ३६॥ पूरयन्निवघोषेणमेघगंभीरयागिरा॥ शल्यकर्णोर्जुनेनाद्य
योद्धव्यमितिमन्यते॥ ३७॥ तस्यत्वंपुरुषव्याघ्रनियच्छतुरगान्युधि॥ कर्णोहत्वेतरान्सर्वान्फाल्गुनंहंतुमिच्छति॥३८॥ तस्याभीषुग्रहेराजन्प्रयाचेत्वांपुनः
पुनः॥ पार्थस्यसचिवःकृष्णोयथाभीषुग्रहोवरः॥ तथात्वमपिराधेयंसर्वतःपरिपालय॥ ३९॥ संजयउवाच ततःशल्यःपरिष्वज्यसुतंतेवाक्यमब्रवीत्॥
दुर्योधनममित्रघ्नंप्रीतोमद्राधिपस्तदा॥ ४०॥ शल्यउवाच एवंचेन्मन्यसेराजन्गांधारेप्रियदर्शन॥ तस्मात्तेयत्प्रियंकिंचित्तत्सर्वंकरवाण्यहं॥४१॥ य
त्रास्मिंभरतश्रेष्ठयोग्यःकर्मणिकर्हिचित्॥ तत्रसर्वात्मनायुक्तोवक्ष्येकार्यंपरंतप॥ ४२॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ वक्ष्येवोढास्मि ॥ ४२ ॥

॥ ४३ ॥ ४४ ॥ आत्मनिंदापरस्तवावपिश्रेयसांनिंद्यौकिमुतात्मपूजापरनिंदेतदुभयमहंकरोमीतिभावः ॥ ४५ ॥ ४६ ॥ अप्रमादोऽवधानं प्रयोगःअश्वप्रेरणं ॥ ज्ञानंआगामिदोषावेक्षणं विद्यातत्परिहा

यत्तुकर्णमहंब्रूयांहितकामःप्रियाप्रिये ॥ ममतत्क्षमतांसर्वंभवान्कर्णश्वसर्वशः ॥ ४३ ॥ कर्णउवाच ईशानस्ययथाब्रह्मायथापार्थस्यकेशवः ॥ तथा नित्यंहितेयुक्तोमद्रराजभवस्वनः ॥ ४४ ॥ शल्यउवाच आत्मनिंदात्मपूजाचपरनिंदापरस्तवः ॥ अनाचरितमार्याणांवृत्तमेतच्चतुर्विधं ॥ ४५ ॥ यत्तुवि द्वन्प्रवक्ष्यामिप्रत्ययार्थमहंतव ॥ आत्मनस्तवसंयुक्तंतन्निबोधयथातथं ॥ ४६ ॥ अहंशक्रस्यसारथ्येयोग्योमातलिवत्प्रभो ॥ अप्रमादात्प्रयोगाच्चज्ञानविद्या चिकित्सनैः ॥ ४७ ॥ ततःपार्थेनसंग्रामेयुध्यमानस्यतेनघ ॥ वाहयिष्यामितुरगान्विज्वरोभवसूतज ॥ ४८ ॥ इतिश्रीमहाभारतेकर्णपर्वणिशल्यसारथ्य स्वीकारेपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ ७ ॥ दुर्योधनउवाच अयंतेकर्णसारथ्यंमद्रराजःकरिष्यति ॥ कृष्णादभ्यधिकोयंतादेवेशस्येवमातलिः ॥ १ ॥ यथाहरिहयैर्युक्तंसंगृह्णातिसमातलिः ॥ शल्यस्तथातवाद्यायंसंयंतारथवाजिनां ॥ २ ॥ योधेत्वयिरथस्थेचमद्रराजेचसारथौ ॥ रथश्रेष्ठोध्रुवंसंख्येपार्थोनभिभ विष्यति ॥ ३ ॥ संजयउवाच ततोदुर्योधनोभूयोमद्रराजंतरस्विनं ॥ उवाचराजन्संग्रामेऽभ्युषितेपर्युपस्थिते ॥ ४ ॥ कर्णस्ययच्छसंग्राममेमद्रराजहयोत्त मान् ॥ त्वयाभिगुप्तोराधेयोविजेष्यतिधनंजयं ॥ ५ ॥ इत्युक्तोरथमास्थायतथेतिप्राहभारत ॥ शल्येऽभ्युपगतेकर्णःसारथिंसुमनाब्रवीत् ॥ ६ ॥ त्वंसूतस्यंदनं मत्यंकल्पयेत्यसकृत्त्वरन् ॥ ततोजैत्रंरथवरंगंधर्वनगरोपमं ॥ ७ ॥ विधिवत्कल्पितंभद्रंजयेत्युक्त्वान्यवेदयत् ॥ तंरथंरथिनांश्रेष्ठःकर्णोभ्यर्च्ययथाविधि ॥ ८ ॥ संपादितंब्रह्मविदापूर्वमेवपुरोधसा ॥ कृत्वाप्रदक्षिणंयत्नादुपस्थायचभास्करं ॥ ९ ॥ समीपस्थंमद्रराजमारोहत्वमथाब्रवीत् ॥ ततःकर्णस्यदुर्धर्षंस्यंदनप्रवरं महत् ॥ १० ॥ आरुरोहमहातेजाःशल्यःसिंहइवाचलं ॥ ततःशल्याश्रितंदृष्ट्वाकर्णःस्वंरथमुत्तमं ॥ ११ ॥ अध्यतिष्ठद्यथांऽभोदंविद्युत्वंतंदिवाकरः ॥ तावेकरथ मारूढावादित्याग्निसमत्विषौ ॥ १२ ॥ अभ्राजेतांयथामेघंसूर्याग्नीसहितौदिवि ॥ संस्तूयमानौतौवीरौतदास्तांद्युतिमत्तमौ ॥ १३ ॥ ऋत्विक्सदस्यैरिंद्राग्नीस्तू यमानाविवाध्वरे ॥ सशल्यसंगृहीताश्वेरथेकर्णःस्थितोबभौ ॥ १४ ॥ धनुर्विस्फारयन्घोरंपरिवेषीवभास्करः ॥ आस्थितःसरथश्रेष्ठंकर्णःशरगभस्तिमान् ॥ १५ ॥

रज्ञानं चिकित्सनंदोषपरिहारसामर्थ्यं ॥ ४७ ॥ ४८ ॥ इतिनैलकंठीयेभारतभावदीपेपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ ७ ॥ अयमिति ॥ १ ॥ हरिहयैःइंद्रतुरगैर्युक्तंरथं ॥ २ ॥ ३ ॥ अभ्युषिते प्रातःकाले ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ इतिकर्णपर्वणि नैलकंठीये भारतभावदीपे षट्त्रिंशोऽध्यायः

प्रबभौपुरुषव्याघ्रोमंदरस्थइवांशुमान् ॥ तंरथस्थंमहाबाहुंयुद्धायामिततेजसं ॥ १६ ॥ दुर्योधनस्तुराधेयमिदंवचनमब्रवीत् ॥ अकृतंद्रोणभीष्माभ्यांदुष्करं कर्मसंयुगे ॥ १७ ॥ कुरुष्वाधिरथेवीरमिषतांसर्वधन्विनां ॥ मनोगतंममत्यासीद्भीष्मद्रोणौमहारथौ ॥ १८ ॥ अर्जुनंभीमसेनंचनिहंतारावितिध्रुवं ॥ ताभ्यां यदकृतंवीरवीरकर्ममहामृधे ॥ १९ ॥ तत्कर्मकुरुराधेयवज्रपाणिरिवापरः ॥ गृहाणधर्मराजंवाजहिवात्वंधनंजयं ॥ २० ॥ भीमसेनंचराधेयमाद्रीपुत्रौयमा वपि ॥ जयश्चतेऽस्तुभद्रंतेप्रयाहिपुरुषर्षभ ॥ २१ ॥ पांडुपुत्रस्यसैन्यानिकुरुसर्वाणिभस्मसात् ॥ ततस्तूर्यसहस्राणिभेरीणामयुतानिच ॥ २२ ॥ वाद्यमानान्यरो चंतमेघशब्दोयथादिवि ॥ प्रतिगृह्यतुतद्वाक्यंरथस्थोरथसत्तमः ॥ २३ ॥ अभ्यभाषतराधेयःशल्यंयुद्धविशारदं ॥ चोदयाश्वान्महाबाहोयावद्धन्मिधनंजयं ॥ २४ ॥ भीमसेनंयमौचोभौराजानंचयुधिष्ठिरं ॥ अद्यपश्यतुमेशल्यबाहुवीर्यंधनंजयः ॥ २५ ॥ अस्यतःकंकपत्राणांसहस्राणिशतानिच ॥ अद्यक्षेप्स्याम्यहंशल्यशरा न्परमतेजनान् ॥ २६ ॥ पांडवानांविनाशायदुर्योधनजयायच ॥ शल्यउवाच सूतपुत्रकथंनुत्वंपांडवानवमन्यसे ॥ २७ ॥ सर्वास्त्रज्ञान्महेष्वासान्स र्वानेवमहाबलान् ॥ अनिवर्तिनोमहाभागानजय्यान्सत्यविक्रमान् ॥ २८ ॥ अपिसंजनयेयुर्येभयंसाक्षाच्छतक्रतोः ॥ यदाश्रोष्यसिनिर्घोषंविस्फूर्जितमिवा शनेः ॥ २९ ॥ राधेयगांडिवस्याजौतदानैवंवदिष्यसि ॥ यदाद्रक्ष्यसिभीमेनकुंजरानीकमाहवे ॥ ३० ॥ विशीर्णदंतंनिहतंतदानैवंवदिष्यसि ॥ यदाद्रक्ष्यसिसं ग्रामेधर्मपुत्रंयमौतथा ॥ ३१ ॥ शितैःपृषत्कैःकुर्वाणानभ्रच्छायामिवांबरे ॥ अस्यतःक्षिण्वतश्चारीन्लघुहस्तान्दुरासदान् ॥ पार्थिवानपिचान्यांस्त्वंतदानै वंवदिष्यसि ॥ ३२ ॥ संजयउवाच अनादृत्यतुतद्वाक्यंमद्रराजेनभाषितं ॥ याहीत्येवाब्रवीत्कर्णोमद्रराजंतरस्विनं ॥ ३३ ॥ इतिश्रीमहाभारतेकर्ण पर्वणिशल्यसंवादेषट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ ५ ॥ संजयउवाच दृष्ट्वाकर्णंमहेष्वासंयुयुत्सुंसमवस्थितं ॥ चुक्रुशुःकुरवःसर्वेहृष्टरूपाःसमंततः ॥ १ ॥ ततोदुंदुभिनिर्घोषैर्भेरीणांनिनदेनच ॥ बाणशब्दैश्चविविधैर्गर्जितैश्चतरस्विनां ॥ २ ॥ निर्ययुस्तावकायुद्धेमृत्युंकृत्वानिवर्तनं ॥ प्रयातेतुततःकर्णेयोधे षुमुदितेषुच ॥ ३ ॥ चचालपृथिवीराजन्ववाशचसुविस्तरं ॥ निःसरंतोव्यदृश्यंतसूर्यात्सप्तमहाग्रहाः ॥ ४ ॥

॥ ३६ ॥ ॥ ५ ॥ दृष्ट्वेति ॥ १ ॥ तरस्विनांअश्वादीनां ॥ २ ॥ ३ ॥ ववाशशब्दंचकार रसासेतिपाठेपिसएवार्थः निःसरंतोयुद्धार्थमितिशेषः सूर्यात्सूर्यमारभ्य सूर्यादयोऽन्योन्यंयुध्यंतीत्यर्थः ॥ ४ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ भीष्मद्रोणौअतिक्रांतंवीर्यंययोस्तावतिवीर्यौसमीक्ष्यस्वकृत्यमालोच्यजगादेत्युत्तरेणान्वयः ॥ ११ ॥ आभाष्यभोशल्यइतिसंबोध्य ॥ १२ ॥ अस्थिरताजहातीत्यचं चलोस्मीत्यर्थः ॥ १३ ॥ ततोपिमेऽघसाध्वसंभयंनास्तीतियोजना ॥ १४ ॥ १५ ॥ १६ ॥ आतुरान्आसन्नमृत्यून् ॥ १७ ॥ विद्यांजानीयां भावंश्वोहंस्थास्यामीतिनिश्चयं ॥ १८ ॥ अस्त्रादीनिमनुष्यस्य

उल्कापाताश्चसंजज्ञुर्दिशांदाहास्तथैवच ॥ शुष्काशन्यश्चसंपेतुर्ववुर्वाताश्चभैरवाः ॥ ५ ॥ मृगपक्षिगणाश्चैवपृतनांबहुशस्तव ॥ अपसव्यंतदाचक्रुर्वेदयंतोम हाभयं ॥ ६ ॥ प्रथितस्यचकर्णस्यनिपेतुस्तुरगाभुवि ॥ अस्थिवर्षंचपतितमंतरिक्षाद्भयानकं ॥ ७ ॥ जज्वलुश्चैवशस्त्राणिध्वजाश्चैवचकंपिरे ॥ अश्रूणिचव्यमुंच तवाहनानिविशांपते ॥ ८ ॥ एतेचान्येचबहवउत्पातास्तत्रदारुणाः ॥ समुत्पेतुर्विनाशायकौरवाणांसुदारुणाः ॥ ९ ॥ नचतान्गणयामासुःसर्वेदैवेनमोहिताः ॥ प्रस्थितंसूतपुत्रंचजयेत्यूचुर्नराधिपाः ॥ निर्जितान्पांडवांश्चैवमेनिरेतत्रकौरवाः ॥ १० ॥ ततोरथस्थःपरवीरहंताभीष्मद्रोणावतिवीर्यौसमीक्ष्य ॥ समुज्ज्वलन् भास्करपावकाभोवैकर्तनोसौरथकुंजरोनृप ॥ ११ ॥ सशल्यमाभाष्यजगादवाक्यंपार्थस्यकर्मातिशयंविचिंत्य ॥ माननदर्पेणविदह्यमानःक्रोधेनदीप्यन्निव निःश्वसंश्च ॥ १२ ॥ नाहंमहेंद्रादपिवज्रपाणेःक्रुद्धाद्विभेम्यायुधवान्रथस्थः ॥ दृष्ट्वाहिभीष्मप्रमुखान्शयानानतीवमांत्यस्थिरताजहाति ॥ १३ ॥ महेंद्रविष्णुप्र तिमावनिंदितौरथाश्वनागप्रवरप्रमाथिनौ ॥ अवध्यकल्पौनिहतौयदापरैस्ततोनमेप्यस्तिरणेऽघसाध्वसं ॥ १४ ॥ समीक्ष्यसंख्येतिबलान्नराधिपान्ससूतमा तंगरथान्परैर्हतान् ॥ कथंनसर्वानहितान्रणेवधीन्महास्त्रविद्ब्राह्मणपुंगवोगुरुः ॥ १५ ॥ ससंस्मरन्द्रोणमहंमहाहवेब्रवीमिसत्यंकुरवोनिबोधत ॥ नवामदन्यः प्रसहेद्रणेर्जुनंसमागतंमृत्युमिवोग्ररूपिणं ॥ १६ ॥ शिक्षाप्रसादश्चबलंधृतिश्चद्रोणेमहास्त्राणिचसंनतिश्च ॥ सचेदगान्मृत्युवशंमहात्मासर्वानन्यानातुरानद्य मन्ये ॥ १७ ॥ नेहध्रुवंकिंचिदपिप्रचिंतयन्विद्यांलोकेकर्मणोदैवयोगात् ॥ सूर्योदयेकोहिंविमुक्तसंशयोभावंकुर्वीताद्यगुरौनिपातिते ॥ १८ ॥ ननूनमस्त्राणिब लंपराक्रमःक्रियाःसुनीतंपरमायुधानिवा ॥ अलंमनुष्यस्यसुखायवर्तितुंतथाहियुद्धेनिहतःपरैर्गुरुः ॥ १९ ॥ हुताशनादित्यसमानतेजसंपराक्रमेविष्णुपुरंद रोपमं ॥ नयेबृहस्पत्युशनोःसदासमंनचैनमस्त्रंतदुपास्तदुःसहं ॥ २० ॥ संप्राकुष्टेरुदितस्त्रीकुमारेपराभूतेपौरुषेधार्तराष्ट्रे ॥ मयाकृत्यमितिजानामिशल्यप्रया हितस्माद्द्विषतामनीकं ॥ २१ ॥ यत्रराजापांडवःसत्यसंधोव्यवस्थितोभीमसेनार्जुनौच ॥ वासुदेवःसात्यकिःसृंजयाश्चयमौचकस्तान्विषहेन्मदन्यः ॥ २२ ॥

सुखायवर्तितुंनालमितिसंबंधः ॥ १९ ॥ उशनोःउशनसोः उपास्तउपातिष्ठत त्रातुमितिशेषः अस्त्रंअस्त्रादि ॥ २० ॥ संप्राकुष्टेसम्यगाक्रोशवति पराभूतेनिरस्ते धार्तराष्ट्रेधृतराष्ट्रपुत्रसंबंधिनि पौरुषेयत्ने ॥ २१ ॥ २२ ॥

रौणपथाद्रोणपथेन ॥ २२ ॥ तेषांभीष्मादीनांमध्येनगमिष्यामीतिनअपितुगमिष्याम्येवेत्यर्थः संग्रामात्पलायनेहिमित्रस्यदुर्योधनस्यद्रोहःकृतःस्यात्तच्चासह्यं ॥ २४ ॥ जीवितांतेआयुषःसमाप्तौप्रमोक्षोमृ
त्युनिवर्तनं ॥ २५ ॥ २६ ॥ वैयाघ्रचर्माणंव्याघ्रचर्मपरिवृतं ॥ २७ ॥ २८ ॥ २९ ॥ अप्रमत्तइतिच्छेदः भीष्ममुखःभीष्माभिमुखः ॥ ३० ॥ जुगुपिषवः गोपुमिच्छवः ॥ ३१ ॥ रणरभसस्यरणोत्कट

तस्मात्क्षिप्रंमद्रपतेप्रयाहिरणेपंचालान्पांडवान्संजयांश्च ॥ तान्वाहन्निष्यामिसमेत्यसंख्येयास्यामिवाद्रोणपथायमाय ॥ २३ ॥ नन्वेवाहंगमिष्यामिमध्येते
षांशूराणामितिमांशल्यविद्धि ॥ मित्रद्रोहोमर्षणीयोनमेऽयंत्यक्त्वाप्राणाननुयास्यामिद्रोणं ॥ २४ ॥ प्राज्ञस्यमूढस्यचजीवितांतेनास्तिप्रमोक्षोंतकसत्कृत
स्य ॥ अतोविद्वन्नभियास्यामिपार्थान्दिष्टंनशक्यंव्यतिवर्तितुंवै ॥ २५ ॥ कल्याणवृत्तःसततंहिराजावैचित्रवीर्यस्यसुतोममासीत् ॥ तस्यार्थसिद्ध्यर्थमहंत्यजा
मिप्रियान्भोगान्दुस्त्यजंजीवितंच ॥ २६ ॥ वैयाघ्रचर्माणमकूजनाक्षंहेमत्रिकोशंरजतत्रिवेणुं ॥ रथप्रबर्हंतुरगप्रबर्हैर्युक्तंप्रादान्मह्यमिमंहिरामः ॥ २७ ॥
धनूंषिचित्राणिनिरीक्ष्यशल्यध्वजान्गदाःसायकांश्चोग्ररूपान् ॥ असिंचदीप्तंपरमायुधंचशंखंचशुभ्रंस्वनवंतमुग्रं ॥ २८ ॥ पताकिनंवज्रनिपातनिःस्वनंसिता
श्वयुक्तंशुभतूणशोभितं ॥ इमंसमास्थायरथंरथर्षभंरणेहनिष्याम्यहमर्जुनंबलात् ॥ २९ ॥ तंचेन्मृत्युःसर्वहरोभिरक्षेत्सदाऽप्रमत्तःसमरेपांडुपुत्रं ॥ तंवाहनि
ष्यामिरणेसमेत्ययास्यामिवाभीष्ममुखोयमाय ॥ ३० ॥ यमवरुणकुबेरवासवावायदियुगपत्सगणामहाहवे ॥ जुगुपिषवइहाद्यपांडवंकिंबहुनासहतैर्जयामि
तं ॥ ३१ ॥ संजयउवाच इतिरणरभसस्यकत्थतस्तदुपनिशम्यवचःसमद्रराट् ॥ अवहसदवमन्यवीर्यवान्प्रतिषिषिधेचजगादचोत्तरं ॥ ३२ ॥ श
ल्यउवाच विरमविरमकर्णकत्थनादतिरभसोप्यतिवाचमुक्तवान् ॥ क्वचहिनरवरोधनंजयःक्वपुनरहोपुरुषाधमोभवान् ॥ ३३ ॥ यदुसदनमुपेंद्रपालितंत्रिद
शमिवामरराजरक्षितं ॥ प्रसभमतिविलोड्यकोहरेत्पुरुषवरावरजामृतेऽर्जुनात् ॥ ३४ ॥ त्रिभुवनविभुमीश्वरेश्वरंकइहपुमान्भवमाह्वयेद्युधि ॥ मृगवधकल
हेकृतेर्जुनात्सुरपतिवीर्यसमप्रभावतः ॥ ३५ ॥ असुरसुरमहोरगान्नरान्गरुडपिशाचसयक्षराक्षसान् ॥ इषुभिरजयदग्निगौरवात्स्वभिलषितंचहविर्ददौ
जयः ॥ ३६ ॥ स्मरसिननुयदापरैर्हृतःसचधृतराष्ट्रसुतोपिमोक्षितः ॥ दिनकरसदृशैःशरोत्तमैर्युधाकुरुषुबहून्विनिहत्यतानरीन् ॥ ३७ ॥ प्रथममपिपलायिते
त्वयिप्रियकलहाधृतराष्ट्रसूनवः ॥ स्मरसिननुयदाप्रमोचिताःखचरगणानवजित्यपांडवैः ॥ ३८ ॥

स्य ॥ ३२ ॥ अतिरभसोपित्वंअतिवाचंस्वसामर्थ्यादधिकां ॥ ३३ ॥ पुरुषवरस्यकृष्णस्यावरजांकनीयसींसुभद्रां ॥ ३४ ॥ ३५ ॥ ३६ ॥ स्मरसीतिविषमंछंदः ॥ ३७ ॥ खचरगणान्गंधर्वान् ॥ ३८ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ श्वेतयुजाश्वेताश्वयुजा ॥ ४५ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
प्रयाणेइति ॥ १ ॥२॥ अभिमन्येतअल्पमित्यवजानीत ॥३॥४॥५॥ अंजनकेशीभिःकृष्णकेशीभिरश्वतरीभिर्युवतीभिर्वायुक्तं ॥६॥ हस्तिषड्गवंहस्तिषट्कं हस्तिषड्गवमिच्छंतिवीराःषट्केचदंतिनामितिप्रांचः

समुदितबलवाहनाःपुनःपुरुषवरेणजिताःस्थगोग्रहे॥ सगुरुगुरुसुताःसभीष्मकाःकिमुनजितःसतदात्वयार्जुनः॥ ३९॥ इदमपरमुपस्थितंपुनस्तवनिधनायसुयुद्धमद्यवै॥ यदिनरिपुभयात्पलायसेसमरगतोद्यहतोसिसूतज॥ ४०॥ संजयउवाच इतिबहुपरुषंप्रभाषतिप्रमनसिमद्रपतौरिपुस्तवं॥ भृशमभिरुषितःपरंतपःकुरुपृतनापतिराहमद्रपं॥ ४१॥ कर्णउवाच भवतुभवतुकिंविकत्थसेननुममतस्यहियुद्धमुद्यतं॥ यदिसजयतिमामिहाहवेततइदमस्तुसुकत्थितंतव॥ ४२॥ संजयउवाच एवमस्त्वितिमद्रेशउक्त्वानोत्तरमुक्तवान्॥ याहिशल्येतिचाप्येनंकर्णःप्राहयुयुत्सया॥ ४३॥ सरथःप्रययौशत्रून्श्वेताश्वःशल्यसारथिः॥ निघ्नन्नमित्रान्समरेतमोघ्नन्सवितायथा॥ ४४॥ ततःप्रायात्प्रीतिमान्वैरथेनवैयाघ्रेणश्वेतयुजाथकर्णः॥ सचालोक्यध्वजिनीपांडवानांधनंजयंत्वरयापर्यपृच्छत्॥ ४५॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसंवादेसप्तत्रिंशोऽध्यायः॥ ३७॥ ॥ ७॥ संजयउवाच प्रयाणेचततःकर्णोहर्षयन्वाहिनींतव॥ एकैकंसमरेदृष्ट्वापांडवान्पर्यपृच्छत॥ १॥ योमामद्यमहात्मानंदर्शयेच्छ्वेतवाहनं॥ तस्मैदद्यामभिप्रेतंधनंयन्मनसेच्छति॥ २॥ नचेत्तदभिमन्येततस्मैदद्यामहंपुनः॥ शकटंरत्नसंपूर्णयोमेब्रूयाद्धनंजयं॥ ३॥ नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान्॥ शतंदद्यांगवांतस्मैनैत्यकंकांस्यदोहनं॥ ४॥ शतंग्रामवरांश्चैवदद्यामर्जुनदर्शिने॥ तथातस्मैपुनर्दद्यांश्वेतमश्वतरीरथं॥ ५॥ युक्तमंजनकेशीभिर्योमेब्रूयाद्धनंजयं॥ नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान्॥ ६॥ अन्यंवास्मैपुनर्दद्यांसौवर्णहस्तिषड्गवं॥ तथाप्यस्मैपुनर्दद्यांस्त्रीणांशतमलंकृतं॥ ७॥ श्यामानांनिष्ककंठीनांगीतवाद्यविपश्चितां॥ नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान्॥ ८॥ तस्मैदद्यांशतंनागान्शतंग्रामान्शतंरथान्॥ सुवर्णस्यचमुख्यस्यहयाग्र्याणांशतंशतान्॥ ९॥ ऋद्ध्यागुणैःसुदांतांश्चधुर्यवाहान्सुशिक्षितान्॥ तथासुवर्णशृंगीणांगोधेनूनांचतुःशतं॥ १०॥

अन्यंवासौवर्णरथमितिशेषः हस्तितुल्याःषड्गावउक्षाणोयस्मिन्तं षड्हस्तिनएवगोवत्वोढारोयस्यतादृशं ॥ ७ ॥ श्यामानांअप्रजातानां निष्कमुरोभूषणं ॥ ८ ॥ शतंशतान्दशसहस्राणि ॥ ९ ॥ ऋद्ध्यापुष्ट्या सुदांतान्विनीतान् धुर्यवाहान्रथोद्वहनक्षमान् ॥ १० ॥

॥ ११ ॥ भांडमाभरणं ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ अपरांतेषुपश्चिमकच्छेषु ॥ १६ ॥ १७ ॥ प्रत्यग्रवयसांअभिनवयौवनानां ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

दद्यांतस्मैसवत्सानांयोमेब्रूयाद्धनंजयं ॥ नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान् ॥ ११ ॥ अन्यदस्मैवरंदद्यांश्वेतान्पंचशतान्हयान् ॥ हेमभांडपरिच्छन्नान्सुमृष्टमणिभूषणान् ॥ १२ ॥ सुदांतानपिचैवाहंदद्यामष्टादशापरान् ॥ रथंचशुभ्रंसौवर्णंदद्यांतस्मैस्वलंकृतं ॥ १३ ॥ युक्तंपरमकांबोजैर्योमेब्रूयाद्धनंजयं ॥ नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान् ॥ १४ ॥ अन्यदस्मैवरंदद्यांकुंजराणांशतानिषट् ॥ कांचनैर्विविधैर्भांडैराच्छन्नान्हेममालिनः ॥ १५ ॥ उत्पन्नानपरांतेषुविनीतान्हस्तिशिक्षकैः ॥ नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान् ॥ १६ ॥ अन्यदस्मैवरंदद्यांवैश्यग्रामांश्चतुर्दश ॥ सुस्फीतान्धनसंयुक्तान्प्रत्यासन्नवनोदकान् ॥ अकुतोभयान्सुसंपन्नान्राजभोज्यांश्चतुर्दश ॥ १७ ॥ दासीनांनिष्ककंठीनांमागधीनांशतंतथा ॥ प्रत्यग्रवयसांदद्यांयोमेब्रूयाद्धनंजयं ॥ १८ ॥ नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान् ॥ अन्यंतस्मैवरंदद्यांयमसौकामयेत्स्वयं ॥ १९ ॥ पुत्रदारान्विहारांश्चयदन्यद्वित्तमस्तिमे ॥ तच्चतस्मैपुनर्दद्यांयद्यच्चमनसेच्छति ॥ २० ॥ हत्वाचसहितौकृष्णौतयोर्वित्तानिसर्वशः ॥ तस्मैदद्यामहंयोमेप्रब्रूयात्केशवार्जुनौ ॥ २१ ॥ एतावाचःसुबहुशःकर्णउच्चारयन्युधि ॥ दध्मौसागरसंभूतंसुस्वरंशंखमुत्तमं ॥ २२ ॥ तांवाचःसूतपुत्रस्यतथायुक्तानिशम्यतु ॥ दुर्योधनोमहाराजसंहृष्टःसानुगोभवत् ॥ २३ ॥ ततोदुंदुभिनिर्घोषोमृदंगानांचसर्वशः ॥ सिंहनादःसवादित्रःकुंजराणांचनिःस्वनः ॥ २४ ॥ प्रादुरासीत्तदाराजन्सैन्येषुपुरुषर्षभ ॥ योधानांसंप्रहृष्टानांतथासमभवत्स्वनः ॥ २५ ॥ तथाप्रहृष्टेसैन्येतुप्लवमानंमहारथं ॥ विकत्थमानंचतदाराधेयमरिकर्षणं ॥ मद्रराजःप्रहस्येदंवचनंप्रत्यभाषत ॥ २६ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णावलेपेऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ ७ ॥ शल्यउवाच मासूतपुत्रदानेनसौवर्णंहस्तिषड्गवं ॥ प्रयच्छपुरुषायाद्यद्रक्ष्यसित्वंधनंजयं ॥ १ ॥ बाल्यादिहत्वंत्यजसिवसुवैश्रवणोयथा ॥ अयत्नेनैवराधेयद्रष्टास्यद्यधनंजयं ॥ २ ॥ परास्त्रजसियद्वित्तंकिंचित्त्वंबहुमूढवत् ॥ अपात्रदानेयेदोषास्तान्मोहान्नावबुध्यसे ॥ ३ ॥ यत्त्वंप्रेरयसेवित्तंबहुतेनखलुत्वया ॥ शक्यंबहुविधैर्यज्ञैर्यष्टुंसूतयजस्वतैः ॥ ४ ॥ यच्चप्रार्थयसेहंतुंकृष्णौमोहात्तथैवतत् ॥ नहिशुश्रुमसंमर्देक्रोष्ट्रासिंहौनिपातितौ ॥ ५ ॥

प्लवमानंमयांतं ॥ २६ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेअष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ मासूतेति ॥ १ ॥ वसुवित्तं द्रष्टासिद्रक्ष्यसि ॥ २ ॥ परास्त्रजसित्यजसि ॥ ३ ॥ ४ ॥ ५ ॥

अप्रार्थितंप्रार्थयसेसुहृद्दोनहिसंतिते ॥ येत्वांनिवारयंत्याशुप्रपतंतंहुताशने ॥ ६ ॥ कार्याकार्यंनजानीषेकालपक्कोस्यसंशयं ॥ बद्धबद्धमकर्णीयंकोहिब्रूयाज्जिजीविषुः ॥ ७ ॥ समुद्रतरणंदोर्भ्यांकंठेबध्वायथाशिलां ॥ गिर्यग्राद्वानिपतनंतादृक्तवचिकीर्षितं ॥ ८ ॥ सहितःसर्वयोधैस्त्वंव्यूढानीकैःसुरक्षितः ॥ धनंजयेनयुध्यस्वश्रेयश्चेत्प्राप्तुमिच्छसि ॥ ९ ॥ हितार्थंधार्तराष्ट्रस्यब्रवीमित्वानहिंसया ॥ श्रद्धत्स्वैवंमयाप्रोक्तंयदितेस्तिजिजीविषा ॥ १० ॥ कर्णउवाच स्वबाहुवीर्यमाश्रित्यप्रार्थयाम्यर्जुनंरणे ॥ त्वंतुमित्रमुखःशत्रुर्मांभीषयितुमिच्छसि ॥ ११ ॥ नमामस्मादभिप्रायात्कश्चिदद्यनिवर्तयेत् ॥ अपींद्रोवज्रमुद्यम्य किमुमर्त्यःकथंचन ॥ १२ ॥ संजयउवाच इतिकर्णस्यवाक्यांतेशल्यःप्राहोत्तरंवचः ॥ चुकोपयिषुरत्यर्थंकर्णंमद्रेश्वरःपुनः ॥ १३ ॥ यदात्वांफाल्गुनवेगयुक्ताज्याचोदिताहस्तवताविसृष्टाः ॥ अन्वेतारःकंकपत्राःशिताग्रास्तदातप्स्यस्यर्जुनस्यानुयोगात् ॥ १४ ॥ यदादिव्यंधनुरादायपार्थःप्रतापयन्पृतनांसव्यसाची ॥ त्वांमर्दयिष्यन्निशितैःपृषत्कैस्तदापश्चात्तप्स्यसेसूतपुत्र ॥ १५ ॥ बालश्चंद्रंमातुरंकेशयानोयथाकश्चित्प्रार्थयतेपहर्तुं ॥ तद्वन्मोहाद्द्योतमानंरथस्थंसंप्रार्थयस्यर्जुनंजेतुमद्य ॥ १६ ॥ त्रिशूलमाश्रित्यसुतीक्ष्णधारंसर्वाणिगात्राणिविघर्षसित्वं ॥ सुतीक्ष्णधारोपमकर्मणात्वंयुयुत्ससेयोर्जुनेनाद्यकर्ण ॥ ॥ १७ ॥ क्रुद्धंसिंहंकेसरिणंबृहंतंबालोमूढःक्षुद्रमृगस्तरस्वी ॥ समाह्वयेत्तद्वदेतत्तवाद्यसमाह्वानंसूतपुत्रार्जुनस्य ॥ १८ ॥ मासूतपुत्राह्वयराजपुत्रंमहावीर्यंकेसरिणंयथैव ॥ वनेसृगालःपिशितेनतृप्तोमापार्थमासाद्यविनंक्ष्यसित्वं ॥ १९ ॥ ईषादंतंमहानागंप्रभिन्नकरटामुखं ॥ शशकोह्वयसेयुद्धेकर्णपार्थंधनंजयं ॥ ॥ २० ॥ बिलस्थंकृष्णसर्पंत्वंबाल्यात्काष्ठेनविध्यसि ॥ महाविषंपूर्णकोपंयत्पार्थंयोद्धुमिच्छसि ॥ २१ ॥ सिंहंकेसरिणंक्रुद्धमतिक्रम्याभिनर्दसे ॥ सृगालइवमूढस्त्वंनृसिंहंकर्णपांडवं ॥ २२ ॥ सुपर्णपतगश्रेष्ठंवैनतेयंतरस्विनं ॥ भोगीवाह्वयसेपातेकर्णपार्थंधनंजयं ॥ २३ ॥ सर्वांभसांनिधिंभीमंमूर्तिमंतंझषायुतं ॥ चंद्रोदयेविवर्धंतमप्लवःसन्तितीर्षसि ॥ २४ ॥ ऋषभंदुंदुभिग्रीवंतीक्ष्णशृंगंप्रहारिणं ॥ वत्सआह्वयसेयुद्धेकर्णपार्थंधनंजयं ॥ २५ ॥ महामेघंमहाघोरंदर्दुरःप्रतिनर्दसि ॥ कामतोयप्रदंलोकेनरपर्जन्यमर्जुनं ॥ २६ ॥ यथाचस्वगृहस्थःश्वाव्याघ्रंवनगतंभषेत् ॥ तथात्वंभषसेकर्णनरव्याघ्रंधनंजयं ॥ २७ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ भोगीसर्पःपातेपतनार्थं ॥ २३ ॥ झषैर्मीनैरासमंतायुतंझषायुतं अप्लवःबाहुभ्यामित्यर्थः ॥ २४ ॥ दुंदुभिग्रीवंदुंदुभिस्वनकंठं ॥ २५ ॥ २६ ॥ २७ ॥

श्टगालोपिवनेकर्णशशैःपरिवृतोवमन् ॥ मन्यतेसिंहमात्मानंयावत्सिंहंनपश्यति ॥ २८ ॥ तथात्वमपिराधेयसिंहमात्मानमिच्छसि ॥ अपश्यन्शत्रुदमनंनर व्याघ्रंधनंजयं ॥ २९ ॥ व्याघ्रंत्वंमन्यसेत्मानंयावत्कृष्णौनपश्यसि ॥ समास्थितावेकरथेसूर्याचंद्रमसाविव ॥ ३० ॥ यावद्गांडीवघोषंत्वंनश्टणोषिमहाहवे ॥ तावदेवत्वयाकर्णशक्यंवक्तुंयथेच्छसि ॥ ३१ ॥ रथशब्दधनुःशब्दैर्नादयंतंदिशोदश ॥ नर्दंतमिवशार्दूलंदृष्ट्वाक्रोष्टाभविष्यसि ॥ ३२ ॥ नित्यमेवश्टगालस्त्वं नित्यंसिंहोधनंजयः ॥ वीरप्रद्वेषणान्मूढतस्मात्क्रोष्टेवलक्ष्यसे ॥ ३३ ॥ यथाखुःस्याद्बिडालश्चश्वाव्याघ्रश्चबलाबले ॥ यथाश्टगालःसिंहश्चयथाचशशकुंजरौ ॥ ॥ ३४ ॥ यथाऽनृतंचसत्यंचयथाचापिविषामृते ॥ तथात्वमपिपार्थश्चप्रख्यातावात्मकर्मभिः ॥ ३५ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्याधिक्षेपेएको नचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ ४ ॥ संजयउवाच अधिक्षिप्तस्तुराधेयःशल्येनामिततेजसा ॥ शल्यमाहसुसंक्रुद्धोवाकशल्यमवधारयन् ॥ १ ॥ कर्णउवाच गुणान्गुणवतांशल्यगुणवान्वेत्तिनागुणः ॥ त्वंतुशल्यगुणैर्हीनःकिंज्ञास्यसिगुणागुणं ॥ २ ॥ अर्जुनस्यमहास्त्राणिक्रोधंवीर्यंधनुःशरान् ॥ अहं शल्याभिजानामिविक्रमंचमहात्मनः ॥ ३ ॥ तथाकृष्णस्यमाहात्म्यमृषभस्यमहीक्षितां ॥ यथाहंशल्यजानामिनत्वंजानासितत्तथा ॥ ४ ॥ एवमेवात्मनोवीर्यं महद्वीर्यंचपांडवे ॥ जानन्नेवाह्वयेयुद्धेशल्यगांडीवधारिणं ॥ ५ ॥ अस्तिवाऽयमिषुःशल्यसुपुंखोरक्तभोजनः ॥ एकतूणीशयःपत्रीसुधौतःसमलंकृतः ॥ ६ ॥ शेतेचंदनचूर्णेषुपूजितोबहुलाःसमाः ॥ आहेयोविषवानुग्रोनराश्वद्विपसंघहा ॥ ७ ॥ घोररूपोमहारौद्रस्तनुत्रास्थिविदारणः ॥ निर्भिंद्यांयेनरुष्टोहमपिमेरुंमहा गिरिं ॥ ८ ॥ नतमहंजातुंनास्येयमन्यस्मिन्फाल्गुनादृते ॥ कृष्णाद्वादेवकीपुत्रात्सत्यंचापिश्टणुष्वमे ॥ ९ ॥ तेनाहमिषुणाशल्यवासुदेवधनंजयौ ॥ योत्स्येपरम संक्रुद्धस्तत्कर्मसदृशंमम ॥ १० ॥ सर्वेषांवृष्णिवीराणांकृष्णेलक्ष्मीःप्रतिष्ठिता ॥ सर्वेषांपांडुपुत्राणांजयःपार्थेप्रतिष्ठितः ॥ ११ ॥ उभयंतुसमासाद्यकोनिवर्ति तुमर्हति ॥ तावेतौपुरुषव्याघ्रौसमेतौस्यंदनेस्थितौ ॥ १२ ॥ मामेकमभिसंयातौसुजातंपश्यशल्यमे ॥ पितृष्वसामातुलजौभ्रातरावपराजितौ ॥ १३ ॥ मणी सूत्रइवप्रोतौद्रष्टासिनिहतौमया ॥ अर्जुनेगांडिवंकृष्णेचक्रंतार्क्ष्यकपिध्वजौ ॥ १४ ॥

त्रासजननमितिसमुदायापेक्षयासामान्येननिर्देशः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ जोषंतूष्णींआस्वंतिष्ठ क्रीडागताःलीलयांआगताः ॥ २० ॥ मद्रकेषुकुत्सितेषुमद्रदेशेषु ॥ २१ ॥२२॥ ॥ २३ ॥ अनृतेनचरतीत्यानृतिकः यावदंतं अंत्यजपर्यंतंमरणावधींतिवा ॥ २४॥२५ ॥ पुंभिःपुरुषैःविमिश्राःसंगताः इच्छया मैथुनिनःअज्ञातवत्ज्ञाताअप्यविगीताइत्यर्थः ॥ २६ ॥ येषांमद्रकाणांसक्तुमिश्रितम

भीरूणांत्रासजननंशल्यहर्षकरंमम ॥ त्वंतुदुष्प्रकृतिर्मूढोमहायुद्धेष्वकोविदः ॥ १५ ॥भयावदीर्णःसंत्रासादवद्धंबहुभाषसे ॥ संस्तौषितौतुकेनापिहेतुनात्वंकुदेशज ॥ १६ ॥तौहत्वासमरेहंतात्वामद्यसहबांधवं ॥ पापदेशजदुर्बुद्धेक्षुद्रक्षत्रियपांसन ॥ १७ ॥ सुहृद्भूत्वारिपुःकिंमांकृष्णाभ्यांभीषयिष्यसि ॥ तौवामामद्यहंतारौहनिष्येवापितावहं ॥ १८ ॥ नाहंबिभेमिकृष्णाभ्यांविजानन्नात्मनोबलं ॥ वासुदेवसहस्रंवाफाल्गुनानांशतानिवा ॥ १९ ॥ अहमेकोहनिष्यामिजोषमास्वकुदेशज ॥ स्त्रियोबालाश्ववृद्धाश्वप्रायःक्रीडागताजनाः ॥ २० ॥ यागाथाःसंप्रगायंतिकुर्वंतोध्ययनंयथा ॥ तागाथाःशृणुमेशल्यमद्रकेषुदुरात्मसु ॥ २१ ॥ ब्राह्मणैःकथिताःपूर्वंयथावद्राजसन्निधौ ॥ श्रुत्वाचैकमनामूढक्षमवाब्रूहिचोत्तरं ॥ २२ ॥ मित्रध्रुङ्मद्रकोनित्यंयोनोद्वेष्टिसमद्रकः ॥ मद्रकेसंगतंनास्तिक्षुद्रवाक्येनराधमे ॥ २३ ॥ दुरात्मामद्रकोनित्यंनित्यमानृतिकोऽनृजुः ॥ यावदंत्यंहिदौरात्म्यंमद्रकेष्वितिनःश्रुतं ॥ २४ ॥ पितापुत्रश्चमाताचश्वश्रूश्वशुरमातुलाः ॥ जामातादुहिताभ्रातानप्ताऽन्येतेचबांधवाः ॥ २५ ॥ वयस्याभ्यागताश्चान्येदासीदासंचसंगतं ॥ पुंभिर्विमिश्रानार्यश्चज्ञाताज्ञाताःस्वयेच्छया ॥ २६ ॥ येषांगृहेष्वशिष्टानांसक्तुमत्स्याशिनांतथा ॥ पीत्वासीधुसगोमांसंक्रंदंतिचहसंतिच ॥ २७ ॥ गायंतिचाप्यबद्धानिप्रवर्त्तंतेचकामतः ॥ कामप्रलापिनोऽन्योन्यंतेषुधर्मःकथंभवेत् ॥ २८ ॥ मद्रकेष्ववलिप्तेषुप्रख्याताशुभकर्मसु ॥ नापिवैरंनसौहार्दंमद्रकेणसमाचरेत् ॥ २९ ॥ मद्रकेसंगतंनास्तिमद्रकोहिसदामलः ॥ मद्रकेषुचसंसृष्टंशौचंगांधारकेषुच ॥ ३० ॥ राजयाजकयाज्येचनष्टंदत्तंहविर्भवेत् ॥ शूद्रसंस्कारकोविप्रोयथायातिपराभवं ॥ ३१ ॥ यथाब्रह्मद्विषोनित्यंगच्छंतीहपराभवं ॥ यथैवसंगतंकृत्वानरःपततिमद्रकैः ॥ ३२ ॥ मद्रकेसंगतंनास्तिहतंवृश्चिकतेविषं ॥ आथर्वणेनमंत्रेणयथाशांतिःकृतामया ॥ ३३ ॥ इतिवृश्चिकदष्टस्यविषवेगहतस्यच ॥ कुर्वंतिभेषजंप्राज्ञाःसत्यंतच्चापिदृश्यते ॥ ३४ ॥ एवंविद्वन्जोषमास्वशृणुचात्रोत्तरंवचः ॥ वासांस्युत्सृज्यनृत्यंतिस्त्रियोयामद्यमोहिताः ॥ ३५ ॥

त्स्याशिनां सीधुमद्यं ॥ २७ ॥ २८ ॥ २९ ॥ मद्रकेषुसंसृष्टंनष्टंएवंगांधारकेषुशौचंनष्टंभवेत् ॥ ३० ॥ राजायाजकोयस्यतस्मिन्याज्येहविर्नष्टंभवेत् ॥ ३१ ॥ यथैवेति यथामद्रकैःसंगतंकृत्वापतति यथावामद्रकेसंगतंनास्तिहेवृश्चिकतथातेविषंहतमित्युत्तरेणसंबंधः यथेतत्सत्यंतर्हितवविषंनश्यत्वितिमंत्रेणसर्वथाविषंनश्यतीत्यर्थः ॥ ३२ ॥ मयेत्यात्मानुभवसिद्धमिदमितिद्योतयति ॥ ३३ ॥३४॥३५॥

यथाकामंवरयंतिताःअसंयताइतिच्छेदः तासांपुत्रःसंकरजातइत्यर्थः ॥ ३६ ॥ प्रमेहंतिमूत्रयंतेदशेरकाःगर्दभाः ॥ ३७ ॥ सुवीरकंकांजिकं स्फिचौकटिप्रोथौ ॥ ३८ ॥ ३९ ॥ निर्ह्रीकाःनिर्लज्जाः ॥ ४० ॥ घस्मराःबहुभक्षकाः ॥ ४१ ॥ वक्तव्येषुगर्हणीयेषु ॥ ४२ ॥ ४३ ॥ सांपरायेसमूहेसंग्रामेइत्यर्थः मुच्येयंजीवितमितिशेषः ॥ ४४ ॥ ४५ ॥ उपहितःउपजप्तः ॥ ४६ ॥ ४७ ॥ ४८ ॥

मैथुनेऽसंयताश्चापियथाकामवराश्चताः ॥ तासांपुत्रःकथंधर्मंमद्रकोवक्तुमर्हति ॥ ३६ ॥ यास्तिष्ठंत्यःप्रमेहंतियथैवोष्ट्रदशेरकाः ॥ तासांविभ्रष्टधर्माणांनिर्लज्जानांततस्ततः ॥ ३७ ॥ त्वंपुत्रस्तादृशीनांहिधर्मंवक्तुमिहेच्छसि ॥ सुवीरकंयाच्यमानामद्रिकाकर्षतिस्फिचौ ॥ ३८ ॥ प्रदातुकामावचनमिदंवदतिदारुणं ॥ मामांसुवीरकंकश्चिद्याचतांदयितंमम ॥ ३९ ॥ पुत्रंदद्यांपतिंदद्यांनतुदद्यांसुवीरकं ॥ गौर्योबृहत्योनिर्ह्रीकामद्रिकाःकंबलावृताः ॥ ४० ॥ घस्मरानष्टशौचाश्चप्रायइत्यनुशुश्रुम ॥ एवमादिमयाऽन्यैर्वाशक्यंवक्तुंभवेद्बहु ॥ ४१ ॥ आकेशाग्रान्नखाग्राच्चवक्तव्येषुकुकर्मसु ॥ मद्रकाःसिंधुसौवीराःधर्मंविद्युःकथंत्विह ॥ ४२ ॥ पापदेशोद्भवाम्लेच्छाधर्माणामविचक्षणाः ॥ एषमुख्यतमोधर्मःक्षत्रियस्येतिनःश्रुतं ॥ ४३ ॥ यदाजौनिहतःशेतेसद्भिःसमभिपूजितः ॥ आयुधानांसांपरायेयन्मुच्येयमहंततः ॥ ४४ ॥ ममैषप्रथमःकल्पोनिधनेस्वर्गमिच्छतः ॥ सोयंप्रियःसखाचास्मिधार्त्तराष्ट्रस्यधीमतः ॥ ४५ ॥ तदर्थंहिममप्राणायच्चमेविद्यतेवसु ॥ व्यक्तंत्वमप्युपहितःपांडवैःपापदेशज ॥ ४६ ॥ यथाचामित्रवत्सर्वंत्वमस्मासुप्रवर्त्तसे ॥ कामंनखल्वुशक्योहंत्वद्विधानांशतैरपि ॥ ४७ ॥ संग्रामाद्विमुखःकर्त्तुंधर्मज्ञइवनास्तिकैः ॥ सारंगइवधर्मार्त्तःकामंविलपशुष्यच ॥ ४८ ॥ नाहंभीषयितुंशक्यःक्षत्रवृत्तेव्यवस्थितः ॥ तनुत्यजांनृसिंहानामाहवेष्वनिवर्तिनां ॥ ४९ ॥ यागतिर्गुरुणाप्रोक्तापुरारामेणतांस्मरे ॥ तेषांत्राणार्थमुद्यंतंवधार्थंद्विषतामपि ॥ ५० ॥ विद्धिमामास्थितंवृत्तंपौरूरवसमुत्तमं ॥ नतद्भूतंप्रपश्यामित्रिषुलोकेषुमद्रप ॥ ५१ ॥ योमामस्मादभिप्रायाद्वारयेदितिमेमतिः ॥ एवंविद्वन्जोषमास्वत्रासात्किंबहुभाषसे ॥ ५२ ॥ नत्वांहत्वाप्रदास्यामिक्रव्याद्भ्योमद्रकाधम ॥ मित्रप्रतीक्षयाशल्यधार्तराष्ट्रस्यचोभयोः ॥ ५३ ॥ अपवादतितिक्षाभिस्त्रिभिरेतैर्हिजीवसि ॥ पुनश्चेदीदृशंवाक्यंमद्रराजवदिष्यसि ॥ ५४ ॥ शिरस्तेपातयिष्यामिगदयावज्रकल्पया ॥ श्रोतारस्त्विदमद्येहद्रष्टारोवाकुदेशज ॥ ५५ ॥

॥ ४९ ॥ तेषांधार्तराष्ट्राणां ॥ ५० ॥ ५१ ॥ ५२ ॥ हत्वाअर्जुनेनघातयित्वा मित्रप्रतीक्षयामित्रकार्यवेक्षणेन चात्दुर्योधनस्यतयोरेवोभयोः ॥ ५३ ॥ अपवादोनिंदातितिक्षाचतैस्त्रिभिर्हेतुभिः ॥ ५४ ॥ ५५ ॥

॥ ५६ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ७ ॥ ॥ ७ ॥ मारिषहेराजन् ॥ १ ॥ २ ॥ दृपःमहोक्षः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ आयुधस्यास्तिनवेतिज्ञानं परिज्ञानं रुतंजयपराजयसूचकं अतिभारोदुर्वहत्वं ॥ ८ ॥ निमित्तानिदिव्यांतरिक्षभौमानिमहाद्यानुकूल्यप्रातिकूल्यादीनि ॥ ९ ॥ निदर्शनंदृष्टांतं ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अतिपानिनःगत्यति

कर्णवाजघ्रतुःकृष्णौकर्णोवानिजघानतौ ॥ एवमुक्त्वातुराधेयःपुनरेवविशांपते ॥ अब्रवीन्मद्रराजानंयाहियाहीत्यसंभ्रमं ॥ ५६ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णमद्राधिपसंवादेचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ७ ॥ संजयउवाच मारिषाधिरथेःश्रुत्वावाचोयुद्धाभिनंदिनः ॥ शल्योब्रवीत्पुनःकर्णंनिदर्शनमिदंवचः ॥ १ ॥ जातोहंयज्वनांवंशेसंग्रामेष्वनिवर्तिनां ॥ राज्ञांमूर्धाभिषिक्तानांस्वयंधर्मपरायणः ॥ २ ॥ यथैवमत्तोमद्येनत्वंतथालक्ष्यसेवृष ॥ तथाद्यत्वांप्रमाद्यंतंचिकित्सेयंसुहृत्तया ॥ ३ ॥ इमांकाकोपमांकर्णप्रोच्यमानांनिबोधमे ॥ श्रुत्वायथेष्टंकुर्यास्त्वंनिहीनकुलपांसन ॥ ४ ॥ नाहमात्मनिकिंचिद्वैकिल्बिषंकर्णसंस्मरे ॥ येनमांत्वंमहाबाहोहंतुमिच्छस्यनागसं ॥ ५ ॥ अवश्यंतुमयावाच्यंबुध्यतात्वद्धितःहितं ॥ विशेषतोरथस्थेनराज्ञश्चैवहितैषिणा ॥ ६ ॥ समंचविषमंचैव रथिनश्चबलाबलं ॥ श्रमःखेदश्चसततंहयानांरथिनासह ॥ ७ ॥ आयुधस्यपरिज्ञानंरुतंचमृगपक्षिणां ॥ भारश्चाप्यतिभारश्चशल्यानांचप्रतिक्रिया ॥ ८ ॥ अस्त्रयोगश्चयुद्धंचनिमित्तानितथैवच ॥ सर्वमेतन्मयाज्ञेयंरथस्यास्यकुटुंबिना ॥ ९ ॥ अतस्त्वांकथयेकर्णनिदर्शनमिदंपुनः ॥ वैश्यःकिलसमुद्रांतेप्रभूतधनधान्यवान् ॥ १० ॥ यज्वादानपतिःक्षांतःस्वकर्मस्थोभवच्छुचिः ॥ बहुपुत्रःप्रियापत्यःसर्वभूतानुकंपकः ॥ ११ ॥ राज्ञोधर्मप्रधानस्यराष्ट्रेवसतिनिर्भयः ॥ पुत्राणांतस्यबालानांकुमाराणांयशस्विनां ॥ १२ ॥ काकोबहूनामभवदुच्छिष्टकृतभोजनः ॥ तस्मैसदाप्रयच्छंतिवैश्यपुत्राःकुमारकाः ॥ १३ ॥ मांसोदनंदधिक्षीरंपायसंमधुसर्पिषी ॥ सचोच्छिष्टभृतःकाकोवैश्यपुत्रैःकुमारकैः ॥ १४ ॥ सदृशान्पक्षिणोदृप्तःश्रेयसश्चाधिचिक्षिपे ॥ अथहंसाःसमुद्रांतेकदाचिदतिपातिनः ॥ १५ ॥ गरुडस्यगतौतुल्याश्चक्रांगाहृष्टचेतसः ॥ कुमारकास्तदाहंसान्दृष्ट्वाकाकमथाब्रुवन् ॥ १६ ॥ भवानेवविशिष्टोहिपतत्रिभ्योविहंगम ॥ प्रतार्यमाणस्तैःसर्वैरल्पबुद्धिभिरंडजः ॥ १७ ॥ तद्वचःसत्यमित्येवमौर्ख्याद्दर्पाच्चमन्यते ॥ तान्सोभिपत्यजिज्ञासुःकएषांश्रेष्ठभागिति ॥ १८ ॥ उच्छिष्टदर्पितःकाकोबहूनांदूरपातिनां ॥ तेषांयंप्रवरंमेनेहंसानांदूरपातिनां ॥ १९ ॥ तमाह्वयतदुर्बुद्धिःपतावइतिपक्षिणं ॥ तच्छ्रुत्वाप्राहसन्हंसायेतत्रासन्समागताः ॥ २० ॥

शयगामिनः ॥ १५ ॥ चक्रांगाःमानसचारिणः ॥ १६ ॥ पतत्रिभ्योऽन्येभ्यःप्रतार्यमाणोऽन्यथाप्रत्याय्यमानः ॥ १७ ॥ श्रेष्ठभाक्श्रेष्ठंअंगंभजते ॥ १८ ॥ १९ ॥ पतावःगच्छावः ॥ २० ॥

॥ २१ ॥ दूरपातेनदूरगमनेन ॥ २२ ॥ २३ ॥ पतितापतिष्यसि ॥ कत्थनःगुणश्लाघी ॥ २४ ॥ पतितास्मिपतिष्यामि ॥ २५ ॥ पातानांशतमेकंगणयति उड्डीनमित्यादिना उड्डीनमूर्ध्वगमनमवडी नमधोगतिः प्रडीनंसर्वतोयानंडीनंगमनमात्रकं निडीनंशनकैर्यानंसंडीनंललितंगतं तिर्यग्डीनंगतंप्राहुस्तिरःप्रचरणंबुधाः तान्याशाभेदभिन्नानिचत्वारिप्रतिजानते तानितिर्यक्डीनानि॥२६ ॥ विडंबितंवि डीनंस्यात्परिडीनंतुसर्वतः पश्चाद्गतिःपराडीनंस्वर्गंगंतुसुडीनकं आभिमुख्येनगमनमभिडीनंप्रचक्षते यानंमहाडीनमाहुःपवित्रामूर्जितांगतिं निर्डीनंनिश्चलंयानंप्रचंडमतिडीनकं विडंबितंमल्लव दुड्डीयोड्डीयगमनं ॥ २७ ॥ अवरोहोवडीनंस्यात्प्रडीनंचित्रमुच्यते गत्याललितयापूर्वमुपक्रम्यसमंततः परिक्रम्यप्रपतनंसंडीनंडीनडीनकं संडीनोड्डीनडीनंस्यात्तदेवोर्ध्वप्रकल्पनात् गतौगत्यंतरो

भाषतोबहुकाकस्यबलिनःपततांवराः ॥ इदमूचुःस्मचक्रांगावचःकाकंविहंगमाः ॥ २१ ॥ हंसाऊचुः वयंहंसाश्चरामेमांपृथिवींमानसौकसः ॥ पक्षि णांचवयंनित्यंदूरपातेनपूजिताः ॥ २२ ॥ कथंहंसंनुबलिनंचक्रांगंदूरपातिनं ॥ काकोभूत्वानिपतनेसमाव्हयसिदुर्मते ॥ २३ ॥ कथंत्वंपतितांकाकसहास्माभि र्ब्रवीहितत् ॥ अथहंसवचोमूढःकुत्सयित्वापुनःपुनः ॥ प्रजगादोत्तरंकाकःकत्थनोजातिलाघवात् ॥ २४ ॥ काकउवाच शतमेकंचपातानांपतितास्मि नसंशयः ॥ शतयोजनेमकैकंविचित्रंविविधंतथा ॥ २५ ॥ उड्डीनमवडीनंचप्रडीनंडीनमेवच ॥ निडीनमथसंडीनंतिर्यक्डीनगतानिच ॥ २६ ॥ विडीनंपरि डीनंचपराडीनंसुडीनकं ॥ अभिडीनंमहाडीनंनिर्डीनमतिडीनकं ॥ २७ ॥ अवडीनंप्रडीनंचसंडीनंडीनडीनकं ॥ संडीनोड्डीनडीनंचपुनर्डीनंविडीनकं ॥ २८ ॥ संपातंसमुदीषंचततोन्यद्व्यतिरिक्तकं ॥ गतागतंप्रतिगतंबह्वीश्चनिकुलीनकाः ॥ २९ ॥ कर्त्तास्मिमिषतांवोद्यततोद्रक्ष्यथमेबलं ॥ तेषामन्यतमेनाहंपतिष्या मिविहायसं ॥ ३० ॥ प्रदिशध्वंयथान्यायंकेनहंसाःपताम्यहं ॥ तेवैध्रुवंविनिश्चित्यपतध्वंनंमयासह ॥ ३१ ॥ पातैरेभिःखलुखगाःपतितुंखेनिराश्रये ॥ एवमुक्तेतु काकेनप्रहस्यैकोविहंगमः ॥ ३२ ॥ उवाचकाकंराधेयवचनंतन्निबोधमे ॥ हंसउवाच शतमेकंचपातानांत्वंकाकपतिताध्रुवं ॥ ३३ ॥ एकमेवतुयंपातंविदुः सर्वेविहंगमाः ॥ तमहंपतिताकाकनान्यंजानामिकंचन ॥ ३४ ॥ पतत्वमपिताम्राक्षयेनपातेनमन्यसे ॥ अथकाकाःप्रजहसुर्येतत्रासन्समागताः ॥ ३५ ॥ कथमेके नपातेनहंसःपातशतंजयेत् ॥ एकेनैवशतस्यैपपातेनाभिपतिष्यति ॥ ३६ ॥ हंसस्यपतितंकाकोबलवानाशुविक्रमः ॥ प्रपेततुःस्पर्धयाचततस्तौहंसवायसौ ॥ ३७ ॥

द्भेदोभवेड्डीनविड्डीनकं ॥ २८ ॥ क्षणात्संगत्यनिष्क्रम्यपक्षसंपानमुच्यते ऊर्ध्वाधोगतिसंभेदःसमुदीषंप्रचक्षते संकल्प्यपक्षगमनमुच्यतेव्यतिरिक्तकं षट्त्रिंशत्त्रिमीभेदाःपातानामिहदर्शिताः महाडीनंवि हायैषांपातानांत्रिविधागतिः गतंत्रयथोद्दिष्टमागतंपुनरागमः प्रत्यावृत्तिःप्रतिगतिरितिषट्सप्ततिःस्मृताः तेषांनिपाताःकथ्यंतेप्रत्येकंपंचविंशतिः मिकुलीनकाःनिपाताः ॥ २९ ॥ मिषतांपश्य तां ॥ ३० ॥ केनपातेन पतध्वंनेतिशिरश्चालनेनकिंनपतध्वमपितुपतध्वमेवेतिकाकूत्त्यापरिहासः संपतध्वमितिवापाठः ॥ ३१ ॥ ३२ ॥ ३३ ॥ एकंमुख्यं ॥ ३४ ॥ ३५ ॥ एकेनपातेन ॥ ३६ ॥ ३७ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ इदमब्रुवन्काकाइत्यर्थात् ॥४३॥४४॥४५॥४६ ॥ नभसआकाशात् ॥ ४७ ॥ गांभीर्यात्गहनत्वाद्दिगंबरांभसः दिशएवांबरमावरणंयस्यतादृशमंभोयस्येत्या

एकपातीचचक्रांगःकाकःपातशतेनच ॥ पतितावाथचक्रांगःपतितावाथवायसः ॥ ३८ ॥ विसिस्मापयिषुःपातैराचक्षाणोत्मनःक्रियाः ॥ अथकाकस्यचित्राणिपतितानिमुहुर्मुहुः ॥ ३९ ॥ दृष्ट्वाप्रमुदिताःकाकाविनेदुरधिकैःस्वरैः ॥ हंसांश्चावहसंतिस्मप्रावदन्नप्रियाणिच ॥ ४० ॥ उत्पत्योत्पत्यचमुहुर्मुहूर्तमितिचेतिच ॥ वृक्षाग्रेभ्यःस्थलेभ्यश्चनिपतंत्युत्पतंतिच ॥ ४१ ॥ कुर्वाणाविविधान्रावानाशंसंतोजयंनथा ॥ हंसस्तुंमृदुनैकेनविक्रांतुमुपचक्रमे ॥ ४२ ॥ प्रत्यहीयतकाकाच्चमुहूर्तमिवमारिष ॥ अवमन्यचहंसांस्तानिदंवचनमब्रुवन् ॥ ४३ ॥ योसावुत्पतितोहंसःसोसावेवंप्रहीयते ॥ अथहंसःसतच्छ्रुत्वाप्रापतत्पश्चिमांदिशं ॥ ४४ उपर्युपरिवेगेनसागरंमकरालयं ॥ ततोभीःप्राविशत्काकंतदातत्रविचेतसं ॥ ४५ ॥ द्वीपद्रुमानपश्यंतंनिपातार्थंश्रमान्वितं ॥ निपतेयंक्वनुश्रांतइतितस्मिन्जलार्णवे ॥ ४६ ॥ अविषह्यःसमुद्रोहिबहुसत्वगणालयः ॥ महासत्वशतोद्भासीनभसोपिविशिष्यते ॥ ४७ ॥ गांभीर्याद्धिसमुद्रस्यनविशेषंहिसूतज ॥ दिगंबरांभसःकर्णसमुद्रस्थाविदुर्जनाः ॥ ४८ ॥ विदूरपातात्तोयस्यकिंपुनःकर्णवायसः ॥ अथहंसोप्यतिक्रम्यमुहूर्तमितिचेतिच ॥ ४९ ॥ अवेक्षमाणस्तंकाकंनाशकद्व्यपसर्पितुं ॥ अतिक्रम्यचचक्रांगःकाकंतंसमुदैक्षत ॥ ५० ॥ यावद्गत्वापतत्येषकाकोमामितिचिंतयन् ॥ ततःकाकोभृशंश्रांतोहंसमभ्यागमत्तदा ॥ ५१ ॥ तंतथाहीयमानंतुहंसोदृष्ट्वाब्रवीदिदं ॥ उज्जिहीर्षुर्निमज्जंतंस्मरन्सत्पुरुषव्रतं ॥ ५२ ॥ हंसउवाच बहूनिपतितानित्वमाचक्षाणोमुहुर्मुहुः ॥ पातस्यव्याहरंश्चेदंननोगुह्यंप्रभाषसे ॥ ५३ ॥ किंनामपतितंकाकयत्त्वंपतसिसांप्रतं ॥ जलंस्पृशसिपक्षाभ्यांतुंडेनचपुनःपुनः ॥ ५४ ॥ प्रब्रूहिकतमेतत्रपातेवर्तसिवायस ॥ एह्येहिकाकशीघ्रंत्वमेषत्वांप्रतिपालये ॥ ५५ ॥ शल्यउवाच सपक्षाभ्यांस्पृशन्नार्तस्तुंडेनचजलंतदा ॥ दृष्टोहंसेनदुष्टात्मन्निदंहंसंततोब्रवीत् ॥ ५६ ॥ अपश्यन्नंभसःपारंनिपतंश्चश्रमान्वितः ॥ पातवेगप्रमथितोहंसंकाकोब्रवीदिदं ॥ ५७ ॥ वयंकाकाःकुतोनामचरामःकाकवाशिकाः ॥ हंसप्राणैःप्रपद्येत्वामुदकांतंनयस्वमां ॥ ५८ ॥ सपक्षाभ्यांस्पृशन्नार्तस्तुंडेनचमहार्णवे ॥ काकोदृढपरिश्रांतःसहसानिपपातह ॥ ५९ ॥

कासेोषमा समुद्रस्यसंबंधिनस्तोयस्य ॥ ४८ ॥ ४९ ॥ अपसर्पितुंत्यक्त्वागंतुंदयावशत्वान्नाशकत् ॥ ५० ॥ मामनुलक्ष्येतिशेषः ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ दुष्टात्मन्नितिकर्णसंबोधनं ॥ ५६ ॥ ॥ ५७ ॥ काकवाशिकाःकाकाइतिवाशंतःशब्दंकुर्वंतः ॥ ५८ ॥ ५९ ॥

सागरांभसितंदृष्ट्वापतितंदीनचेतसं॥ म्रियमाणमिदंकाकंहंसोवाक्यमुवाचह॥६०॥ शतमेकंचपातानांपताम्यहमनुस्मर॥ श्लाघमानस्त्वमात्मानंकाकभा
षितवानसि॥ ६१ ॥ सत्वमेकशतंपातंपतन्नभ्यधिकोमया॥ कथमेवंपरिश्रांतःपतितोसिमहार्णवे॥ ६२ ॥ प्रत्युवाचततःकाकःसीदमानइदंवचः॥ उपरिष्टुत
दाहंसमभिवीक्ष्यप्रसादयन्॥ ६३ ॥ काकउवाच उच्छिष्टदर्पितोहंसमन्येत्मानंसुपर्णवत् ॥ अवमन्यवहूंश्चाहूंकाकानन्यांश्वपक्षिणः॥ ६४ ॥ प्राणैर्हं
सप्रपद्येत्वांद्वीपांतंप्रापयस्वमां॥ यद्यहंस्वस्तिमान्हंसस्वंदेशंप्राप्नुयांविभो॥ ६५ ॥ नकंचिदवमन्येहमापदोमांसमुद्धर ॥ तमेवंवादिनंदीनंविलपंतमचेतनं॥
॥ ६६ ॥ काककाकेतिवाशंतंनिमज्जंतंमहार्णवे॥ कृपयादायहंसस्तंजलक्लिन्नंसुदुर्दशं॥ ६७॥ पद्भ्यामुत्क्षिप्यवेगेनपृष्ठमारोपयच्छनैः ॥ आरोप्यपृष्ठंहंसस्तं
काकंतूर्णंविचेतनं॥ ६८ ॥ आजगामपुनर्द्वीपंस्पर्धयापेततुर्यतः॥ संस्थाप्यतंचापिपुनःसमाश्वास्यचखेचरं ॥ ६९ ॥ गतोयथेप्सितंदेशंहंसोमनइवाशुगः ॥
एवमुच्छिष्टपुष्टःसकाकोहंसपराजितः॥ ७० ॥ बलंवीर्यमहत्कर्णत्यक्त्वाक्षांतिमुपागतः॥ उच्छिष्टभोजनःकाकोयथावैश्यकुलेपुरा ॥ ७१ ॥ एवंत्वमुच्छिष्टभृ
तोधार्त्तराष्ट्रैर्नसंशयः॥ संदृशान्श्रेयसश्चापिसर्वान्कर्णावमन्यसे॥ ७२॥ द्रोणद्रौणिकृपैर्गुप्तोभीष्मेणान्यैश्चकौरवैः॥ विराटनगरेपार्थमेकंकिंनावधीस्तदा॥
॥ ७३ ॥ यत्रव्यस्ताःसमस्ताश्वनिर्जिताःस्थकिरीटिना॥ सृगालाइवसिंहेनक्कतेवीर्यमभूत्तदा॥ ७४ ॥ भ्रातरंनिहतंदृष्ट्वासमरेसव्यसाचिना ॥ पश्यतांकुरुवी
राणांप्रथमंत्वंपलायितः॥ ७५ ॥ तथाद्वैतवनेकर्णगंधर्वैःसमभिद्रुतः॥ कुरून्समग्रानुत्सृज्यप्रथमंत्वंपलायितः॥ ७६ ॥ हत्वाजित्वाचगंधर्वांश्चित्रसेनमुखान्र
णे॥ कर्णदुर्योधनंपार्थःसभार्यसममोक्षयत्॥ ७७॥ पुनःप्रभावःपार्थस्यपौराणःकेशवस्यच॥ कथितःकर्णरामेणसभायांराजसंसदि॥ ७८ ॥ सततंचत्वम
श्रौषीर्वचनंद्रोणभीष्मयोः॥ अवध्यौवदतःकृष्णौसन्निधौचमहीक्षितां॥ ७९ ॥ कियत्तत्तत्प्रवक्ष्यामियेनयेनधनंजयः ॥ त्वत्तोतिरिक्तःसर्वेभ्योभूतेभ्योब्राह्म
णोयथा॥ ८०॥ इदानीमेवद्रष्टासिप्रधानेस्यंदनेस्थितौ॥ पुत्रंचवसुदेवस्यकुंतीपुत्रंचपांडवं॥ ८१॥ यथाश्रयन्तचक्रांगंवायसोबुद्धिमास्थितः॥ तथाश्रयस्व
वार्ष्णेयंपांडवंचधनंजयं॥ ८२ ॥ यदात्वंयुधिविक्रांतौवासुदेवधनंजयौ॥ द्रष्टास्येकरथेकर्णतदानैवंवदिष्यसि॥ ८३ ॥ यदाशरशतैःपार्थोदर्पंतववधिष्यति॥
तदात्वमंतरंद्रष्टाआत्मनश्चार्जुनस्यच॥ ८४ ॥ देवासुरमनुष्येषुप्रख्यातौयौनरोत्तमौ॥ तौमावमंस्थामौर्ख्यात्त्वंखद्योतइवरोचनौ॥ ८५ ॥

॥ ८६ ॥ ८७ ॥ ८८ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेएकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ ५ ॥ मद्रेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ चेलिवान्चलितवान् ॥ ६ ॥ ७ ॥ सूतोपधौसूतत्वपिधाननिमित्तं

सूर्याचंद्रमसौयद्वत्तद्वदर्जुनकेशवौ ॥ प्राकाश्येनाभिविख्यातौत्वंतुखद्योतवन्नृषु ॥ ८६ ॥ एवंविद्वन्मावमंस्थाःसूतपुत्राच्युतार्जुनौ ॥ नृसिंहौतौमहात्मानौजोषमास्वविकत्थने ॥ ८७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसंवादेहंसकाकीयोपाख्यानेएकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ ५ ॥ ॥ ५ ॥

संजयउवाच मद्राधिपस्याधिरथिर्महात्मावचोनिशम्याप्रियमप्रतीतः ॥ उवाचशल्यंविदितंममैतद्यथाविधावर्जुनवासुदेवौ ॥ १ ॥ शौरेरथंवाहयतोर्जुनस्यबलंमहास्त्राणिचपांडवस्य ॥ अहंविजानामियथावदद्यपरोक्षभूतंतवतत्तुशल्य ॥ २ ॥ तौचाप्यहंशस्त्रभृतांवरिष्ठौव्यपेतभीर्योधयिष्यामिकृष्णौ ॥ संतापयत्यभ्यधिकंनुरामाच्छापोद्यमांब्राह्मणसत्तमाच्च ॥ ३ अवसंवैब्राह्मणच्छद्मनाहंरामेपुरादिव्यमस्त्रंचिकीर्षुः ॥ तत्रापिमेदेवराजेनविघ्नोहितार्थिनाफाल्गुनस्यैवशल्य ॥ ४ ॥ कृतोविभेदेनममोरुमेत्यप्रविश्यकीटस्यतनुंविरूपां ॥ ममोरुमेत्यप्रबिभेदकीटःसुप्तेगुरौतत्रशिरोनिधाय ॥ ५ ॥ ऊरुप्रभेदाच्चमहान्बभूवशरीरतोमेघनशोणितौघः ॥ गुरोर्भयाच्चापिनचेलिवानहंततोविबुद्धोददृशेसविप्रः ॥ ६ ॥ सधैर्ययुक्तंप्रसमीक्ष्यमांवैनत्वंविप्रःकोसिसत्यंवदेति ॥ तस्मैतदात्मानमहंयथावदाख्यातवान्सूतवदेत्यशल्य ॥ ७ ॥ समांनिशम्याथमहातपस्वीसंशप्तवान्रोषपरीतचेताः ॥ सूतोपधावाप्तमिदंतवास्त्रंनकर्मकालेप्रतिभास्यतित्वां ॥ ८ ॥ अन्यत्रवस्मात्तवमृत्युकालादब्राह्मणेब्रह्मनहिध्रुवंस्यात् ॥ तदद्यपर्याप्तमतीवचास्त्रमस्मिन्संग्रामेतुमुलेऽतीवभीमे ॥ ९ ॥ योयंशल्यभरतेषूपपन्नःप्रकर्षणःसर्वहरोतिभीमः ॥ सोभिमन्येक्षत्रियाणांप्रवीरान्प्रतापितावलवान्वैविमर्दः ॥ १० ॥ शल्योग्रधन्वानमहंवरिष्ठंतरस्विनंभीममसत्यवीर्यं ॥ सत्यप्रतिज्ञंयुधिपांडवेयंधनंजयंमृत्युमुखंनयिष्ये ॥ ११ ॥ अस्त्रंततोन्यत्प्रतिपन्नमद्ययेनक्षेप्स्येसमरेशत्रुपूगान् ॥ प्रतापिनंबलवंतंकृतास्त्रंतमुग्रधन्वानममितौजसंच ॥ १२ ॥ क्रूरंशूरंरौद्रममित्रसाहंधनंजयंसंयुगेऽहंहनिष्ये ॥ अपांपतिर्वेगवानप्रमेयोनिमज्जयिष्यन्बहुलाःप्रजाश्च ॥ १३ ॥ महावेगंसंकुरुतेसमुद्रोवेलाचैनंधारयत्यप्रमेयं ॥ प्रमुंचंतंबाणसंघानमेयान्मर्मच्छिदोवीरहणःसुपत्रान् ॥ १४ ॥ कुंतीपुत्रंयत्रयोत्स्यामियुद्धेज्याकर्षतामुत्तममद्यलोके ॥ एवंबलेनातिबलंमहास्त्रंसमुद्रकल्पंसुदुरापमुग्रं ॥ १५ ॥ शरौघिणंपार्थिवान्मज्जयंतंवेलेवपार्थमिषुभिःसंसहिष्ये ॥ अद्याहवेयस्यनतुल्यमन्यंमन्येमनुष्यंधनुराददानं ॥ १६ ॥

कर्मकालेस्वप्रतिज्ञारक्षणकाले ॥ ८ ॥ पर्याप्तंसमाप्तंविस्मृतमित्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ अस्त्रंततोरामदत्तादस्त्रादन्यत्प्रतिपन्नंप्राप्तंअहिबाणाख्यमित्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

नैर्मामतिरेष्यति ॥ १७ ॥ अस्त्रैरमानुष्यैः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ खांडवेखांडवदाहे ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ आर्जवेकर्त्तव्येसति ॥ ३० ॥ अर्हसिद्धिंकांक्षमाणोसि त्वंतुतन्मन्यसेयत्रऐकांत्यंसख्यंनास्ति अस्मत्पक्षीयोप्यन्यत्रस्नेहवानसीत्यर्थः तदेवाह मित्रमिति मिंदयतिमेदयतिवास्नेहार्थान्मिंदेर्मिदेर्वामित्रमितिविरूपं नंदतेरित्यत्रमदतेरितिपाठः मदीहर्षेइत्यस्यवारूपं

सुरासुरान्युधिवैयोजयेततेनाद्यमेपश्ययुद्धंसुघोरं ॥ अतीवमानीपांडवोयुद्धकामोत्यमानुषैरेष्यतिमेमहास्त्रैः ॥ १७ ॥ तस्यास्त्रमस्त्रैःप्रतिहत्यसंख्येबाणोत्तमैः पातयिष्यामिपार्थं ॥ सहस्ररश्मिप्रतिमंज्वलंतंदिशश्चसर्वाःप्रतपंतमुग्रं ॥ १८ ॥ तमोनुदंमेघइवातिमात्रंधनंजयंछादयिष्यामिबाणैः ॥ वैश्वानरंधूमशिखंज्व लंतंतेजस्विनंलोकमिमंदहंतं ॥ १९ ॥ पर्जन्यभूतःशरवर्षैर्यथाग्निंतथापार्थंशमयिष्यामियुद्धे ॥ आशीविषंदुर्धरमप्रमेयंसुतीक्ष्णदंष्ट्रंज्वलनप्रभावं ॥ २० ॥ क्रोधप्रदीप्तंत्वहितंमहांतंकुंतीपुत्रंशमयिष्यामिभल्लैः ॥ प्रमाथिनंबलवंतंप्रहारिणंप्रभंजनंमातरिश्वानमुग्रं ॥ २१ ॥ युद्धेसहिष्येहिमवानिवाचलोधनंजयंक्रु द्धममृष्यमाणं ॥ विशारदंरथमार्गेषुशक्तंधुर्यंनित्यंसमरेषुप्रवीरं ॥ २२ ॥ लोकेवरंसर्वधनुर्द्धराणांधनंजयंसंयुगेसंसहिष्ये ॥ अद्याहवेयस्यनतुल्यमन्यंमन्येम नुष्यंधनुराददानं ॥ २३ ॥ सर्वामिमांयःपृथिवींविजिग्येतेनप्रयोद्धास्मिसमेत्यसंख्ये ॥ यःसर्वभूतानिसदैवकानिप्रस्थेजयत्खांडवेसव्यसाची ॥ २४ ॥ को जीवितंरक्ष्यमाणोहितेनयुयुत्सेद्वैमानुषोमामृतेन्यः ॥ मानीकृतास्त्रःकृतहस्तयोगोदिव्यास्त्रविच्छ्वेतहयःप्रमाथी ॥ २५ ॥ तस्याहमद्याविरथस्यकायाच्छिरोह रिष्यामिशितैःपृषत्कैः ॥ योत्स्याम्येनंशल्यधनंजयंवैमृत्युंपुरस्कृत्यरणेजयंवा ॥ २६ ॥ अन्योहिनत्वेकरथेनमर्त्योयुध्येतयःपांडवमिंद्रकल्पं ॥ तस्याहवेपौरुषं पांडवस्यब्रूयांहृष्टःसमितौक्षत्रियाणां ॥ २७ ॥ किंत्वंमूर्खःप्रसभंमूढचेताममावोचःपौरुषंफाल्गुनस्य ॥ अप्रियोयःपुरुषोनिष्ठुरोहिक्षुद्रःक्षेप्ताक्षमिणश्चा क्षमावान् ॥ २८ ॥ हन्यामहंत्वादृशानांशतानिक्षमाम्यहंक्षमयाकालयोगात् ॥ अवोचस्त्वंपांडवार्थेप्रियाणिप्रधर्षयन्मांमूढवत्पापकर्मन् ॥ २९ ॥ मयार्जवेजि ह्ममतिर्हतस्त्वंमित्रद्रोहीसाप्तपदंहिमैत्रं ॥ कालस्त्वयंप्रत्युपयातिदारुणोदुर्योधनोयुद्धमुपागमद्यत् ॥ ३० ॥ अस्यार्थसिद्धिंत्वभिकांक्षमाणस्तन्मन्यसेयत्रनै कांत्यमस्ति ॥ मित्रंमिदेर्नंदतेःप्रीयतेर्वासंत्रायतेर्मिनुतेर्मोदतेर्वा ॥ ३१ ॥

मादयतितर्पयतीतिवामादयतेर्मित्रं मिदतेस्त्राणार्थस्यत्रामिदेरिदंरूपं नंदयतेःप्रीयतेःसंत्रायतेर्वाऽर्थेवर्त्तमानस्यमिदेर्मित्रमितिवार्थः मिनुतेमानंकरोतिसर्वंहितमस्यसंगृह्णातीतिवामोदतेऽस्यसुखेनेतिवामित्रमि त्येतेऽर्थाःमयिसंतीत्यर्थः ॥ ३१ ॥

शत्रुरिति शदेः शातनार्थात् शास्तेः शासनार्थात् श्यतेस्तनूकरणार्थात् श्रृणातेर्हिंसार्थात् श्वसतेरुच्छ्वासार्थात् दंतभावितण्यर्थात् सीदतेः सूदतेर्वा दंत्यस्थानेतालव्यस्योपसर्जनात् शत्रुरितिशब्द उत्पन्नस्तदर्थश्चसर्वस्त्वय्यस्तीत्यर्थः ॥३२॥ दुर्योधनस्यतत्रममप्रीतिर्जयलाभेनयशसश्चप्रामित्त्रयाणामपिईश्वरप्रीतिः स्वधर्माचरणेनेत्यर्थः ॥३३॥ अस्त्राणीति कालेऽस्त्वंनप्रतिभास्यतीतिपूर्वमुक्तापिआवेशात्त्वस्यविद्यमानामस्त्रसं

ब्रवीमितेसर्वमिदंममास्तितच्चापिसर्वंममवेत्तिराजा ॥ शत्रुःशदेःशासतेर्वाश्यतेर्वाश्रृणातेर्वाश्वसतेःसीदतेर्वा ॥ ३२ ॥ उपसर्गाद्दुधासूदतेश्चप्रायेणसर्वं त्वयितच्चमत्यं ॥ दुर्योधनार्थंतवचप्रियार्थंयशोर्थमात्मार्थमपीश्वरार्थं ॥ ३३ ॥ तस्मादहंपांडववासुदेवौयोत्स्येयत्नात्कर्मतत्पश्यमेऽद्य ॥ अस्त्राणिपश्याद्यममोत्तमानिब्राह्माणिदिव्यान्यथमानुषाणि ॥ ३४ ॥ आसादयिष्याम्यहमुग्रवीर्यंद्विपोद्विपंमत्तमिवातिमत्तः ॥ अस्त्रंब्राह्मंमनसायद्धजेयंक्षेप्स्येपार्थायाप्रमेयंजयाय ॥ तेनापिमेनैवमुच्येतयुद्धेनचेत्पतेद्विषमेमेऽद्यचक्रं ॥ ३५ ॥ वैवस्वताद्दंडहस्ताद्वरुणाद्वापिपाशिनः ॥ सगदाद्वाधनपतेःसवज्राद्वापिवासवात् ॥ अन्यस्मादपिकस्माच्चिदमित्रादाततायिनः ॥ ३६ ॥ इतिशल्यविजानीहियथानाहंबिभेम्यतः ॥ तस्मान्नमेभयंपार्थान्नापिचैवजनार्दनात् ॥ ३७ ॥ सहयुद्धंहिमेताभ्यांसांपरायेभविष्यति ॥ कदाचिद्विजयस्याहमस्त्रहेतोरटन्नृप ॥ ३८ ॥ अज्ञानाद्विक्षिपन्बाणान्घोररूपान्भयानकान् ॥ होमधेन्वावत्समस्यप्रमत्तइषुणाऽहनं ॥ ३९ ॥ चरंतंविजनेशल्यततोनुव्याजहारमां ॥ यस्मात्त्वयाप्रमत्तेनहोमधेन्वाहतःसुतः ॥ ४० ॥ श्वभ्रेतेपततांचक्रमितिमांब्राह्मणोब्रवीत् ॥ युध्यमानस्यसंग्रामेप्राप्तस्यैकायनंभयं ॥ ४१ ॥ तस्माद्बिभेमिबलवद्ब्राह्मणव्याहृतादहं ॥ एतेहिसोमराजानईश्वराःसुखदुःखयोः ॥ ४२ ॥ अदांतस्मैगोसहस्रंबलीवर्दांश्चषट्शतान् ॥ प्रसादंनलभेशल्यब्राह्मणान्मद्रकेश्वर ॥ ४३ ॥ ईषादंतान्सप्तशतान्दासीदासशतानिच ॥ ददतोद्विजमुख्योमेप्रसादंनचकारसः ॥ ४४ ॥ कृष्णानांश्वेतवत्सानांसहस्राणिचतुर्दश ॥ आहरंनलभेतस्मात्प्रसादंद्विजसत्तमात् ॥ ४५ ॥ ऋद्धंगृहंसर्वकामैर्यच्चमेवसुकिंचन ॥ तत्सर्वमस्मैसत्कृत्यप्रयच्छामिनचेच्छति ॥ ४६ ॥ ततोब्रवीन्मांयाचंतमपराधंप्रयत्नतः ॥ व्याहृतंयन्मयासूततत्तथानतदन्यथा ॥ ४७ ॥ अनृतोक्तंप्रजांहन्यात्ततःपापमवाप्नुयां ॥ तस्माद्धर्माभिरक्षार्थंनानृतंवक्तुमुत्सहे ॥ ४८ ॥ मात्वंब्रह्मगतिंहिंस्याःप्रायश्चित्तंकृतंत्वया ॥ मद्वाक्यंनानृतंलोकेकश्चित्कुर्यात्समाप्नुहि ॥ ४९ ॥

पद्ममभिप्रेत्याह अस्त्राणिब्रह्मशिरआदीनि दिव्यानिऐंद्रवारुणगांधर्वादीनि मानुषाणिभौमानिदिव्यधनुरादीनि ॥ ३४ ॥ अस्त्रमिति यत्यदिहिप्रसिद्धंक्षेप्स्येतर्हिनैवमुच्येतशत्रुःपरंतुयदिचक्रंविषमेनपतेदित्ययमपिद्वितीयोदोषोदर्शितः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ अहनंहतवानस्मि ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ समामुद्दिश्यापमनुभवस्वेत्यर्थः ॥ ४९ ॥

॥ ५० ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेद्वाचत्वारिंशोऽध्यायः ॥४२॥ ॥ १ ॥ ततःअनंतरंशल्येनवक्तव्यंवचःसंनिवार्यत्वयमेवाहेत्यर्थः ॥१॥२॥३॥४॥५॥६॥ सखिभावःसारथ्येनोप कारकत्वं सौहार्दंमदीयाक्षमा मित्रस्यदुर्योधनस्यभावःइष्टसिद्धिःहेतुरित्यर्थः ॥७॥ एतदेवत्रयंव्याचष्टे राज्ञश्चेत्यादिना ॥ ८ ॥ कृतइति शल्यसहस्रतुल्योहमेवास्मीत्यर्थः ॥ ९ ॥ इतिकर्णप० नै० भारत

इत्येतत्तेमयाप्रोक्तंक्षिप्तेनापिसुहृत्तया॥जानामित्वांविक्षिपंतंजोषमास्वोत्तरंशृणु॥ ५० ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसंवादेद्वाचत्वारिंशो ध्यायः॥४२॥ ॥५॥ संजयउवाच ततःपुनर्महाराजमद्रराजमरिंदमः॥अभ्यभाषतराधेयःसंनिवार्योत्तरंवचः॥१॥यत्त्वंनिदर्शनार्थंमांशल्यजल्पि तवानसि॥नाहंशक्यस्त्वयावाचाविभीषयितुमाहवे॥ २॥ यदिमांदेवताःसर्वायोधयेयुःसवासवाः॥ तथापिमेभयंनस्यात्किमुपार्थात्सकेशवात् ॥ ३॥ नाहं भीषयितुंशक्योवाङ्मात्रेणकथंचन॥ अन्यंजानीहियःशक्यस्त्वयाभीषयितुंरणे॥४॥ नीचस्यबलमेतावत्पारुष्यंयत्त्वमात्थमां ॥ अशक्तोमद्गुणान्वक्तुंवल्ग सेबहुदुर्मते॥ ५॥ नहिकर्णःसमुद्भूतोभयार्थमिहमद्रक॥ विक्रमार्थमहंजातोयशोर्थंचतथात्मनः॥ ६॥ सखिभावेनसौहार्दान्मित्रभावेनचैवहि॥ कारणैस्त्रि भिरेतैस्त्वंशल्यजीवसिसांप्रतं॥ ७॥राज्ञश्चधार्त्तराष्ट्रस्यकार्यंसुमहदुद्यतं॥ मयितच्चाहितंशल्यतेनजीवसिमेक्षणं॥८॥कृतश्चसमयःपूर्वंक्षंतव्यंविप्रियंतव॥ ऋतेशल्यसहस्रेणविजयेयमहंपरान्॥ मित्रद्रोहस्तुपापीयानितिजीवसिसांप्रतं॥ ९ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसंवादेत्रिचत्वारिंशोऽध्यायः ॥४३॥ ॥५॥ शल्यउवाच ननुप्रलापाःकर्णैतेयान्ब्रवीषिपरान्प्रति॥ऋतेकर्णसहस्रेणशक्याजेतुंपरेयुधि॥ १॥ संजयउवाच तथाब्रुवंतं परुषंकर्णोमद्राधिपंतदा॥परुषंद्विगुणंभूयःप्रोवाचाप्रियदर्शनं॥ २॥ कर्णउवाच इदंतुतत्त्वमेकाग्रःशृणुमद्रजनाधिप ॥ संनिधौधृतराष्ट्रस्यप्रोच्यमा नंमयाश्रुतं॥ ३॥ देशांश्चविविधांश्चित्रान्पूर्ववृत्तांश्चपार्थिवान्॥ ब्राह्मणाःकथयंतिस्मधृतराष्ट्रनिवेशने॥ ४॥ तत्रवृद्धःपुरावृत्ताःकथाःकश्चिद्द्विजोत्तमः॥ वा हीकदेशंमद्रांश्चकुत्सयन्वाक्यमब्रवीत्॥ ५॥ वहिष्कृताहिमवतागंगयाचवहिष्कृताः॥सरस्वत्यायमुनयाकुरुक्षेत्रेणचापिये॥ ६ ॥ पंचानांसिंधुषष्ठानांनदी नांयेंतराश्रिताः॥ तान्धर्मबाह्यानशुचीन्वाहीकानपिवर्जयेत् ॥ ७॥ गोवर्धनोनामवटःसुभद्रंनामचत्वरं॥ एतद्राजकुलद्वारमाकुमारात्स्मराम्यहम् ॥ ८ ॥

भा० त्रिचत्वारिंशोध्यायः॥ ४३ ॥ ॥ १ ॥ ॥ ५ ॥ नन्विति कर्णसहस्रेणविनापिपरैर्जेतुंशक्या; मयेनिशेषः कर्णसहस्रतुल्योहमेकएवास्मीतिभावः ॥१॥ भूयःद्विगुणंअधिकगुणं ॥२॥३॥४॥५॥६॥ पंचानांवक्ष्यमाणानां सिंधुःषष्ठीयासां अंतरमवकाशमाश्रिताः ॥ ७॥ गोवर्धनःगवांछेदनस्थानं सुभद्रंचत्वरंसुराभांडाश्रयभूतं एतदुभयंराजकुलस्यराजगृहद्वारस्योपलक्षणं॥ ८ ॥

॥९॥ वृत्तंचरित्रं ॥१०॥ धाना भृष्टयवा गौड्यासवंसुराविशेषं बाट्यंयवान्नं क्रीतान्नंवा वाटोरतौचमार्गेचवरंडेगान्नभेदयोरितिविश्वः स्वार्थेष्यञ् आशिनःभक्षणशीलाः॥११॥ वप्रेषुप्राकारभित्तिषु॥१२॥ अवगीतैः भगलिंगादिविगीतशब्दैः अनावृताःस्वपरपुरुषविवेकहीनाः कामचाराःयथेष्टचारिण्यः ॥ १३ ॥ सूक्तानिविनोदवचनानि हेहतेभोलिगनाडितेइत्याक्रोशेद्वित्वं संधिश्छांदसः स्वामिहतेभर्तृहतेइ

कार्येणात्यर्थगूढेनवाहीकेषूषितंमया॥ ततएषांसमाचारःसंवासाद्विदितोमम॥ ९॥ शाकलंनामनगरमापगानाममनिम्नगा॥ जर्त्तिकानामवाहीकास्तेषांवृत्तं सुनिंदितं॥ १०॥ धानागौड्यासवंपीत्वागोमांसंलशुनैःसह॥ अपूपमांसवाट्यानामाशिनःशीलवर्जिताः॥११॥ गायंत्यथचनृत्यंतिस्त्रियोमत्ताविवाससः॥ नगरागारवप्रेषुबहिर्माल्यानुलेपनाः॥ १२॥ मत्तावगीतैर्विविधैःखरोष्ट्रनिनदोपमैः॥ अनावृतामैथुनेताःकामचाराश्चसर्वशः॥१३॥ आहुरन्योन्यसूक्तानि प्रब्रुवाणामदोत्कटाः॥ हेहतेहेहतेत्येवंस्वामिभर्तृहतेतिच॥ १४॥ आक्रोशंत्यःप्रनृत्यंतिव्रात्याःपर्वस्वसंयताः॥तासांकिलावलिप्तानांनिवसन्कुरुजांगले॥१५॥ कश्चिद्वाहीकदुष्टानांनातिहृष्टमनाजगौ॥ सानूनंबृहतीगौरीसूक्ष्मकंबलवासिनी॥ १६॥ मामनुस्मरतीशेतेवाहीकंकुरुजांगले॥ शतद्रुकामहंतीर्त्वातांचरम्या मिरावतीं॥ १७॥गत्वास्वदेशंद्रक्ष्यामिस्थूलशंखाःशुभाःस्त्रियः॥ मनःशिलोज्वलापांग्योगौर्यस्त्रिककुदांजनाः॥१८॥ कंबलाजिनसंवीताःक्रंदंत्यःप्रियदर्श नाः॥ मृदंगानकशंखानांमर्दलानांचनिःस्वनैः॥ १९॥ खरोष्ट्राश्वतरैश्चैवमत्तायास्यामहेसुखं॥ शमीपीलुकरीराणांवनेषुसुखवर्त्मसु॥ २०॥ अपूपान्सक्तुपिं डांश्चप्राश्नंतोमथितान्वितान्॥ पथिसुप्रबलाभूत्वाकदासंपततोध्वगान्॥ २१॥ चेलापहारंकुर्वाणास्ताडयिष्यामभूयसः॥ एवंशीलेषुव्रात्येषुवाहीकेषुदुरात्म सु॥ २२॥ कश्चेतयानोनिवसेन्मुहूर्त्तमपिमानवः॥ ईदृशाब्राह्मणेनोक्तावाहीकामोघचारिणः॥२३॥ येषांषड्भागहर्तात्वमुभयोःशुभपापयोः॥ इत्युक्त्वाब्राह्म णःसाधुरुत्तरंपुनरुक्तवान्॥ २४॥ वाहीकेष्वविनीतेषुप्रोच्यमानंनिबोधतत्॥ तत्रस्मराक्षसीगातिःसदाकृष्णचतुर्दशीं॥ २५॥ नगरेशाकलेस्फीतेआहत्यनि शिदुंदुभिं॥ कदावाहेयिकागाथाःपुनर्गास्यामिशाकले॥ २६॥ गव्यस्यतृप्तामांसस्यपीत्वागौडंसुरासवं॥ गौरीभिःसहनारीभिर्बृहतीभिःस्वलंकृता॥ २७॥ पलांडुगंडूषयुतान्खादंतीचैडकान्बहून्॥ वाराहंकौक्कुटंमांसंगव्यंगार्दभमौष्ट्रिकं॥ २८॥

तिचहतहत॥१४॥पर्वसुउत्सवदिनेषुआक्रोशंत्यःगालयंत्यः तासांपतिरितिशेषः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ खरादियानैः ॥ २० ॥ मथितंतक्रं ॥ २१ ॥ भूयसःबहून् ॥ २२ ॥ २३ ॥ २४॥ ॥ २५ ॥ बहोबषमःतस्येदंवषपर्ववाहंतत्रोचिताःवाहेयिकाःगाथाःगीतीः ॥ २६ ॥ २७ ॥ खादंतीबलिरूपानएडकान्मेषान् वाराहंविड्वराहजं ॥ २८॥

शाकलाःशाकलपुरवासिनः ॥ २९॥३०॥३१॥ गिरेःहिमाद्रेः ॥ ३२ ॥ व्रात्यानांउपनयनादिसंस्काररहीनानां दासमीयानांदसमदेशोद्भवानां दासंगृह्यशूद्रंमिमतेमानयंतिमैथुनार्थिन्यस्ताःदासम्यःतज्जानां दासमीयानांवा ॥३३॥३४॥ कुंडेषुमहोदरपात्रेषु ॥३५॥३६॥सर्वमन्नमदनीयंक्षीरंचभोजनंयेषांते॥३७॥३८॥युगंधरेनगरेऔष्ट्रादिकमपिक्षीरंपीयतेभक्ष्याभक्ष्यविवेकाभावात्तत्रावश्यमभक्ष्यभक्षणंआपत

ऐडंचयेनखादंतितेषांजन्मनिरर्थकं॥ इतिगायंतियेमत्ताःसीधुनाशाकलाश्रये॥ २९ ॥ सबालवृद्धाःक्रंदंतस्तेषुधर्मःकथंभवेत् ॥ इतिशल्यविजानीहिहंतभूयोब्रवीमिते॥ ३० ॥ यदन्योप्युक्तवानस्मान्ब्राह्मणःकुरुसंसदि॥ पंचनद्योवहंत्येतायत्रपीलुवनान्युत॥ ३१ ॥ शतद्रुश्चविपाशाचतृतीयैरावतीतथा ॥ चंद्रभागावितस्ताचसिंधुषष्ठावहिर्गिरेः॥ ३२ ॥ आरट्टानामतेदेशानष्टधर्मानतान्व्रजेत्॥ व्रात्यानांदासमीयानांवाहीकानामयज्वनां ॥ ३३ ॥ नदेवाःप्रतिगृह्णंतिपितरोब्राह्मणास्तथा॥ तेषांप्रनष्टधर्माणांवाहीकानामितिश्रुतिः॥ ३४ ॥ ब्राह्मणेनतथाप्रोक्तंविदुषासाधुसंसदि ॥ काष्ठकुंडेषुवाहीकामृन्मयेषुचभुंजते॥ ॥ ३५ ॥ सक्तुमंद्यावलिप्तेषुश्वावलीढेषुनिर्घृणाः॥ आविकंचौष्ट्रिकंचैवक्षीरंगार्दभमेवच॥ ३६॥ तद्विकारांश्चवाहीकाःखादंतिचपिबंतिच ॥ पुत्रसंकरिणोजाल्माःसर्वान्नक्षीरभोजनाः॥ ३७ ॥ आरट्टानामवाहीकावर्जनीयाविपश्चिता॥ हंतशल्यविजानीहिहंतभूयोब्रवीमिते ॥ ३८ ॥ यदन्योप्युक्तवान्मत्यंब्राह्मणःकुरुसंसदि॥ युगंधरेपयःपीत्वाप्रोष्यचाप्यच्युतस्थले॥ ३९ ॥ तद्वद्भूतिलयेस्नात्वाकथंस्वर्गंगमिष्यति॥ पंचनद्योवहंत्येतायत्रनिःसृत्यपर्वतात् ॥ ४० ॥ आरट्टानामवाहीकानतेष्वार्योद्व्यहंवसेत्॥ वहिश्चनामहीकश्चविपाशायांपिशाचकौ॥ ४१ ॥ तयोरपत्यंवाहीकानैषासृष्टिःप्रजापतेः॥ तेकथंविविधान्धर्मान्ज्ञास्यंतेहीनयोनयः॥ ४२ ॥ कारस्करान्माहिषकान्कालिंगान्केरलांस्तथा॥ कर्कोटकान्वीरकांश्चदुर्धर्मांश्चविवर्जयेत् ॥ ४३ ॥ इतितीर्थानुसर्तारंराक्षसीकाचिदब्रवीत्॥ एकरात्रशमीगेहेमहोलूखलमेखला॥ ४४॥ आरट्टानामतेदेशावाहीकंनामतज्जलं॥ ब्राह्मणापसदायत्रतुल्यकालाःप्रजापतेः॥ ४५॥ वेदानतेषांवेद्यश्चयज्ञायजनमेवच॥ व्रात्यानांदासमीयानामन्नंदेवानभुंजते॥ ४६ ॥ प्रस्थलामद्रगांधाराआरट्टानामतःखशाः॥ वसातिसिंधुसौवीराइतिप्रायोतिकुत्सिताः॥ ४७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसंवादेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥

त्येवएवमच्युतस्थलेनगरेउषितस्यागम्यागमनमवश्यंभावितादृशानामेवतत्रसत्त्वात्॥३९॥भूतिलयेहित्रंडालब्राह्मणसाधारणएकोजलाशयस्तत्रचस्नातःकथंस्वर्गंगच्छेन्नकथंचिदित्यर्थः॥४०॥द्व्यहमित्येकरात्रवासेनदोषइत्यर्थः॥४१॥४२॥कारस्करादयोदेशाः॥४३॥एकरात्रशयीएकरात्रशायिनंब्राह्मणमितिद्वितीयार्थेप्रथमा॥४४॥४५॥४६॥४७॥ इति॰ कर्णप॰ नै॰ भारतभा॰ चतुश्चत्वारिंशोऽध्यायः॥४४॥

हतेति ॥ १ ॥ २ ॥३ ॥ इमाः अनुभूतपूर्वाः प्रजाः केनचकेनापिअर्थकामादिनानिमित्तेनधर्मेणसहनविरुध्यंते नकेनचिदधर्मेणेतिपाठेकेनाप्यधर्मेणैतानविरुध्यंतेनकंचिदन्यधर्मकृत्वाशास्त्रेणविरुध्यंतेइत्यर्थः ॥ ४ ॥ विश्रामितंश्रुतं ॥ ५ ॥ ब्राह्मणोभूत्वेत्यादितज्जातीयकर्माचरणनिबंधनं ॥ ६ ॥ ७ ॥ कुलेएकएवविप्रोभवत्यन्येभ्रातरःप्रसृष्टाःसंकीर्णक्रियाइत्यर्थः ॥ ८ ॥ तत्रवाहीकेषु धर्मसंकरकारकोविपर्ययःश्रुतइतिलिंगंविपरिणेयं विपर्ययोविहितवैपरीत्यं ॥ ९ ॥ १० ॥ ११ ॥ बंधक्योवेश्याः पंचमेव्यभिचारेबंधक्यः ॥ १२ ॥ नचैवेति उत्तरत्रेदंबंधकीत्वंसर्वत्रानुवर्त्तिष्यते यस्मात्मातुर्धनंदुहिताहरति

कर्णउवाच हंतशल्यविजानीहिहंतभूयोब्रवीमिते ॥ उच्यमानंमयासम्यक्त्वमेकाग्रमनाःशृणु ॥ १ ॥ ब्राह्मणःकिलनोगेहमध्यगच्छत्पुराऽतिथिः ॥ आचारंतत्रसंप्रेक्ष्यप्रीतोवचनमब्रवीत् ॥ २ ॥ मयाहिमवतःशृंगमेकेनाध्युषितंचिरं ॥ दृष्टाश्चबहवोदेशानानाधर्मसमावृताः ॥ ३ ॥ नचकेनचधर्मेणविरुध्यंतेप्रजाइमाः ॥ सर्वेहितेब्रुवन्धर्मंयदुक्तंवेदपारगैः ॥ ४ ॥ अटतातुततोदेशान्नानाधर्मसमाकुलान् ॥ आगच्छतामहाराजवाहीकेषुनिशामितं ॥ ५ ॥ तत्रवैब्राह्मणोभूत्वाततोभवतिक्षत्रियः ॥ वैश्यःशूद्रश्चवाहीकस्ततोभवतिनापितः ॥ ६ ॥ नापितश्चततोभूत्वापुनर्भवतिब्राह्मणः ॥ द्विजोभूत्वाचतत्रैवपुनर्दासोभिजायते ॥ ॥ ७ ॥ भवंत्येककुलेविप्राःप्रसृष्टाःकामचारिणः ॥ गांधारामद्रकाश्चैववाहीकाश्चाल्पचेतसः ॥ ८ ॥ एतन्मयाश्रुतंतत्रधर्मसंकरकारकं ॥ कृत्स्नामटित्वापृथिवींवाहीकेषुविपर्ययः ॥ ९ ॥ हंतशल्यविजानीहिहंतभूयोब्रवीमिते ॥ यदप्यन्योब्रवीद्वाक्यंवाहीकानांचकुत्सितं ॥ १० ॥ सतीपुराहताकाचिदारट्टात्किलदस्युभिः ॥ अधर्मतश्चोपयातासातानभ्यशपत्ततः ॥ ११ ॥ बालांबंधुमतींयन्मामधर्मेणोपगच्छथ ॥ तस्मान्नार्योभविष्यंतिबंधक्योवैकुलस्यच ॥ १२ ॥ नचैवास्मात्प्रमोक्षध्वंघोरात्पापान्नराधमाः ॥ तस्मात्तेषांभागहराभागिनेयानसूनवः ॥ १३ ॥ कुरवःसहपंचालाःशाल्वामत्स्याःसनैमिषाः ॥ कोसलाःकाशपौंड्राश्चकालिंगामागधास्तथा ॥ १४ ॥ चेदयश्चमहाभागाधर्मंजानंतिशाश्वतं ॥ नानादेशेष्वसंतश्चप्रायोवाह्यनयादृते ॥ १५ ॥ आमत्स्येभ्यःकुरुपांचालदेश्याआनैमिषाच्चेदयोयेविशिष्टाः ॥ धर्मपुराणमुपजीवंतिसंतोमद्रादृतेपांचनदांश्चजिह्मान् ॥ १६ ॥ एवंविद्वान्धर्मकथासुराजंस्तूष्णींभूतोजडवच्छल्यभूयः ॥ त्वंतस्यगोप्ताचजनस्यराजाषड्भागहर्त्ताशुभदुष्कृतस्य ॥ १७ ॥ अथवादुष्कृतस्यत्वंहर्त्तातेषामरक्षिता ॥ रक्षितापुण्यभाग्राजाप्रजानांत्वंत्वपुण्यभाक् ॥ १८ ॥

पितुःपुत्रइतिनियमात् यद्यपिपुत्रोपुत्रश्चद्वावपिजारजौतथापिपितृत्वइवमातृत्वेविसंवादाभावात्दौहित्रएवरिक्थहारीभवतिनपुत्रइतिभावः यतस्तेभगिनीष्वेवापत्यानिजनयंतिनस्वदारेष्वतस्तेषांभागिनेयाभागहराइतिव्याख्यानंभाष्यां ॥ १२ ॥ १४ ॥ असंतश्चासंतश्चवर्ततेपरंतुवाह्यनयादृतेवाहीकनीतिंविनातत्रकेवलमसंतएववर्ततइत्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

पूज्यमानेप्रशस्यमाने ॥ १९ ॥ कृतेकृतयुगेपिधर्मे वाहीकानामितिशेषः सवाहीकस्त्वं ॥ २० ॥ नाभ्यपूजयन्नप्रशंसितवान् ॥ २१ ॥ २२॥२३॥२४॥ म्लेच्छाःपापरताःधर्माधर्मविचारहीनाः म्लेच्छः पापरतेजातिभेदेस्यादपभाषणेइतिविश्वः उष्ट्रिकामृत्तिकाभांडभेदेपिकरभस्त्रियामितिविश्वः औष्ट्रिकःस्नेहभांडजीवीतैलिकइत्यर्थः षंढावर्षवराः राजयाजकाःक्षत्रियस्ययाज्यास्तेषामपियाज्याः राजपुरोहितयाज्यावा ॥ २५ ॥ २६ ॥ रक्षोपसृष्टेषुरक्षसाउपद्रुतेषु राक्षसंरक्षसांनाशकमिदंराक्षसं ॥ २७॥ ब्राह्मंवेदसमूहं धर्म्यंधर्मादनपेतंकर्ममानयंतीतिशेषः प्राच्यादासाःशूद्रधर्माणः दाशाइतिपाठेमत्स्यजीविनः वृषधर्मलोपिआदिदंतेनवृषलाः धर्मसंग्रहपराःधर्मद्रोहिणइतिवा ॥२८॥ बहिर्गेहंरात्रिचर्यांप्रच्छन्नंचौर्यपारदार्यादि ॥२९॥ आपांचाल्येभ्यःधर्मज्ञाः उदीच्याःक्रमुग्धदधर्मस्वरूपमजानंतोपिशिष्टानुगामिनइत्यर्थः आरट्टास्तुभयभ्रष्टाइतिभावः॥३०॥प्राचीमित्यत्रजातवेदइत्यनेनाग्नेयीसहिताप्राचीदेवानामाश्रयः दक्षिणापितृणां नत्वेवश्राद्धादिधर्मोदृश्यते ॥३१॥ एवंप्रतीचीवरुणः उदीचींसोमइतिकुबेरेशानयोर्पहणं परिशेषान्नैऋत्यांवायव्यांचवाहीकाश्रयायांनैर्ऋतनास्त्वादृशावातूलाश्चसंतीत्यर्थः॥३२॥तथारक्षइतिहिमवतोप्यप्रशस्यजनाश्रयत्वमुक्तं गंधमादनस्तुभोगलोलुपानांगुह्यकादीनामाश्रयः॥३३॥

पूज्यमानेपुराधर्मेसर्वदेशेषुशाश्वते॥ धर्मंपांचनदंदृष्ट्वाधिगित्याहपितामहः॥ १९॥ व्रात्यानांदासमीयानांकृतेप्यशुभकर्मणां॥ ब्रह्मणानिंदितेधर्मेसत्वंलोकेकिमब्रवीः॥ २०॥ इतिपांचनदंधर्ममवमेनेपितामहः॥ स्वधर्मस्थेषुवर्णेषुसोप्येतान्नाभ्यपूजयत्॥ २१॥ हंतशल्यविजानीहिहंतभूयोब्रवीमिते॥ कल्माषपादःसरसिनिमज्जन्राक्षसोब्रवीत्॥ २२॥ क्षत्रियस्यमलंभैक्ष्यंब्राह्मणस्याव्रतंमलं॥ मलंपृथिव्यावाहीकाःस्त्रीणांमद्रस्त्रियोमलं॥ २३॥ निमज्जमानमुद्धृत्यकश्चिद्राजानिशाचरं॥ आपृच्छत्तेनचाख्यातंप्रोक्तवांस्तन्निबोधमे॥ २४॥ मानुषाणांमलंम्लेच्छाम्लेच्छानामौष्ट्रिकामलं॥ औष्ट्रिकाणांमलंषंढाःषंढानांराजयाजकाः॥ २५॥ राजयाजकयाज्यानांमद्रकाणांचयन्मलं॥ तद्भवेद्वैतवमलंयद्यस्मान्नविमुंचसि॥ २६॥ इतिरक्षोपसृष्टेषुविषवीर्यहतेषुच॥ राक्षसंभेषजंप्रोक्तंसंसिद्धवचनोत्तरं॥ २७॥ ब्राह्मंपांचालाःकौरवेयास्तुधर्म्यंसत्यंमत्स्याःशूरसेनाश्चयज्ञं॥ प्राच्यादासावृषलादाक्षिणात्याःस्तेनावाहीकाःसंकरावैसुराष्ट्राः॥ २८॥ कृतघ्नतापरवित्तापहारोमद्यपानंगुरुदारावमर्दः॥ वाक्पारुष्यंगोवधोरात्रिचर्यावहिर्गेहंपरवस्त्रोपभोगः॥ २९॥ येषांधर्मस्तान्प्रतिनास्त्यधर्मोह्यारट्टानांपंचनदान्धिगस्तु॥ आपांचाल्येभ्यःकुरवोनैमिषाश्चमत्स्याश्चैतेप्यथजानंतिधर्मं॥ अथोदीच्याश्चांगकामागधाश्चशिष्टान्धर्मानुपजीवंतिवृद्धाः॥ ३०॥ प्राचींदिशंश्रितादेवाजातवेदःपुरोगमाः॥ दक्षिणांपितरोगुप्तांयमेनशुभकर्मणा॥ ३१॥ प्रतीचींवरुणःपातिपालयानःसुरान्बली॥ उदीचींभगवान्सोमोब्राह्मणैःसहरक्षति॥ ३२॥ तथारक्षःपिशाचाश्चहिमवंतंनगोत्तमं॥ गुह्यकाश्चमहाराजपर्वतंगंधमादनं॥३३॥

एवमपिसवाहीकान्सनेकतान्देशान्विष्णुःपातिपर्जन्यवत्नदेशांतरेष्विववाहीकेषुविशेषतोदेवतानुपहोदृश्यतइत्यभिप्रायः अतएवतेषांमौढ्यंवर्णयति इंगितज्ञाश्चेति ॥३४॥ विषमाःदुःखमाध्याः॥३५॥ सर्वं जानंतोपियवनाम्लेच्छाश्चस्वसंज्ञायाधियैःकृतोयोधर्मसंकेतस्तत्रैवनियताः वैदिकंधर्मंनमानयंतीत्यर्थः इतरेत्वनुक्तंहितंनाववुध्यंते ॥ ३६॥ प्रतिरथाःहितवादिनिप्रतिकूलाः गुरुद्रोहिणइत्यर्थः तादृशश्चत्वं

ध्रुवःसर्वाणिभूतानिविष्णुःपातिजनार्दनः ॥ इंगितज्ञाश्चमगधाःप्रेक्षितज्ञाश्चकोसलाः॥ ३४ ॥ अर्धोक्ताःकुरुपंचालाःशाल्वाःकृत्स्नानुशासनाः ॥ पार्वतीयाश्चविषमायथैवशिवयस्तथा॥ ३५॥ सर्वज्ञायवनाराजन्शूराश्चैवविशेषतः॥ म्लेच्छाःस्वसंज्ञानियतानानुक्तमितरेजनाः ॥३६॥ प्रतिरथांस्तुवाहीकान चकेचनमद्रकाः॥ सत्वमेतादृशःशल्यनोत्तरंवक्तुमर्हसि ॥ पृथिव्यांसर्वदेशानांमद्रकोमलमुच्यते॥ ३७॥ सीधोःपानंगुरुतल्पावमर्दोभ्रूणहत्यापरवित्तापहारः॥ येषांधर्मस्तान्प्रतिनास्त्यधर्मआरट्टजान्पंचनदान्धिगस्तु॥ ३८॥ एतज्ज्ञात्वाजोषमास्वप्रतीपंमास्मवैकृथाः ॥ मात्वांपूर्वमहंहत्वाहनिष्येकेशवार्जुनौ॥ ॥३९॥ शल्यउवाच आतुराणांपरित्यागःस्वदारसुतविक्रयः॥ अंगेप्रवर्त्ततेकर्णयेषामधिपतिर्भवान्॥४०॥रथातिरथसंख्यायांयत्त्वांभीष्मस्तदाब्रवीत्॥ तान्विदित्वात्मनोदोषान्निर्मन्युर्भवमाक्रुधः॥ ४१॥ सर्वत्रब्राह्मणाःसंतिसंतिसर्वत्रक्षत्रियाः॥ वैश्याःशूद्रास्तथाकर्णस्त्रियःसाध्व्यश्चसुव्रताः॥४२॥ रमंतेचोपहासेनपुरुषाःपुरुषैःसह॥ अन्योन्यमवरक्षंतोदेशेदेशेसमैथुनाः॥४३॥ परवाच्येषुनिपुणःसर्वोभवतिसर्वदा॥ आत्मवाच्यंनजानीतेजानन्नपिचमुह्यति ॥ ४४॥ सर्वत्रसंतिराजानःस्वंस्वंधर्ममनुव्रताः॥ दुर्मनुष्यान्निगृह्णंतिसंतिसर्वत्रधार्मिकाः॥ ४५॥ नकर्णदेशसामान्यात्सर्वःपापंनिषेवते॥ यादृशाःस्वस्वभावेनदेवाअपिनतादृशाः॥ ४६॥ संजयउवाच ततोदुर्योधनोराजाकर्णशल्याववारयत्॥ सखिभावेनराधेयंशल्यंस्वांजल्यकेनच ॥ ४७॥ ततोनिवारितःकर्णोधार्तराष्ट्रेणमारिष॥ कर्णोपिनोत्तरंप्राहशल्योप्यभिमुखःपरान्॥ ततःप्रहस्यराधेयःपुनर्याहीत्यचोदयत् ॥ ४८ ॥ इतिश्रीमहाभारतेकर्णपर्वणि कर्णशल्यसंवादेपंचचत्वारिंशोऽध्यायः॥ ४५॥ ॥ ७॥ ॥ ७॥ संजयउवाच ततःपरानीकसहंव्यूहमप्रतिमंकृतं॥ समीक्ष्यकर्णःपार्थानांधृष्टद्युम्नाभिरक्षितं॥ १॥ प्रययौरथघोषेणसिंहनादरवेणच॥ वादित्राणांचनिनदैःकंपयन्निवमेदिनीं॥ २॥

हितोपदेष्टारंमांनिंदसीत्यर्थः ॥ ३७॥ ३८ ॥ प्रतीपंप्रतिकूलंतेजोवधाख्यं ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ देवाअपीति वृत्तेनदेवानप्यतिक्रामंतीत्यर्थः ॥ ४६ ॥ स्वांजल्यकेन स्वस्यअंजलिकर्मणा ॥ ४७ ॥ ४८ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ७ ॥ ॥ ७ ॥ ततइति ॥ १ ॥ २ ॥

॥ २ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

वेपमानइवक्रोधाद्युद्धशौंडःपरंतपः ॥ प्रतिव्यूह्यमहातेजायथावद्भरतर्षभ ॥ ३ ॥ व्यधमत्पांडवींसेनामासुरींमघवानिव ॥ युधिष्ठिरंचाभ्यहनदपसव्यंचका
रह ॥ ४ ॥ धृतराष्ट्रउवाच कथंसंजयराधेयःप्रत्यव्यूहतपांडवान् ॥ धृष्टद्युम्नमुखान्सर्वान्भीमसेनाभिरक्षितान् ॥ ५ ॥ सर्वानेवमहेष्वासानजय्यानमरै
रपि ॥ केचप्रपक्षौपक्षौवाममसैन्यस्यसंजय ॥ ६ ॥ प्रविभज्ययथान्यायंकथंवासमवस्थिताः ॥ कथंपांडुसुताश्चापिप्रत्यव्यूहंतमामकान् ॥ ७ ॥ कथंचैवमह
द्युद्धंप्रावर्ततसुदारुणं ॥ क्वचबीभत्सुरभवद्यत्कर्णोऽयाद्युधिष्ठिरं ॥ ८ ॥ कोह्यर्जुनस्यसान्निध्येशक्तोभ्येतुंयुधिष्ठिरं ॥ सर्वभूतानियोह्येकःखांडवेजितवान्पुरा ॥
कस्तमन्यस्तुराधेयात्प्रतियुद्ध्येज्जिजीविषुः ॥ ९ ॥ संजयउवाच शृणुव्यूहस्यरचनामर्जुनश्चयथागतः ॥ परिवार्यनृपंस्वंस्वंसंग्रामश्चाभवद्यथा ॥ १० ॥
कृपःशारद्वतोराजन्मागधाश्चतरस्विनः ॥ सात्वतःकृतवर्माचदक्षिणंपक्षमाश्रिताः ॥ ११ ॥ तेषांप्रपक्षेशकुनिरुलूकश्चमहारथः ॥ सादिभिर्विमलप्रासैस्तवा
नीकमरक्षतां ॥ १२ ॥ गांधारिभिरसंभ्रांतैःपार्वतीयैश्चदुर्जयैः ॥ शलभानामिवव्रातैःपिशाचैरिवदुर्दृशैः ॥ १३ ॥ चतुर्विंशत्सहस्राणिरथानामनिवर्तिनां ॥
संशप्तकायुद्धशौंडावामंपार्श्वमपालयन् ॥ १४ ॥ समन्वितास्तवसुतैःकृष्णार्जुनजिघांसवः ॥ तेषांप्रपक्षाःकांबोजाःशकाश्चयवनैःसह ॥ १५ ॥ निदेशात्सू
तपुत्रस्यसरथाःसाश्वपत्तयः ॥ आह्वयंतोर्जुनंतस्थुःकेशवंचमहाबलं ॥ १६ ॥ मध्येसेनामुखेकर्णोप्यवातिष्ठतदंशितः ॥ चित्रवर्मांगदःस्रग्वीपालयन्वाहिनी
मुखं ॥ १७ ॥ रक्षमाणैःसुसंरब्धैःपुत्रैःशस्त्रभृतांवरः ॥ वाहिनीप्रमुखेवीरःसंप्रकर्षन्नशोभत ॥ १८ ॥ अभ्यवर्तन्महाबाहुःसूर्यवैश्वानरप्रभः ॥ महाद्विपस्कंधग
तःपिंगाक्षःप्रियदर्शनः ॥ १९ ॥ दुःशासनोवृतःसैन्यैःस्थितोव्यूहस्यपृष्ठतः ॥ तमन्वयान्महाराजस्वयंदुर्योधनोनृपः ॥ २० ॥ चित्राश्वैश्चित्रसन्नाहैःसोदर्यै
रभिरक्षितः ॥ रक्ष्यमाणोमहावीर्यैःसहितैर्मद्रकेकयैः ॥ २१ ॥ अशोभतमहाराजदेवैरिवशतक्रतुः ॥ अश्वत्थामाकुरूणांचयेप्रवीरामहारथाः ॥ २२ ॥ नि
त्यमत्ताश्चमातंगाःशूरैर्म्लेच्छैःसमन्विताः ॥ अन्वयुस्तद्रथानीकंक्षरंतइवतोयदाः ॥ २३ ॥ तेध्वजैर्वैजयंतीभिर्ज्वलद्भिःपरमायुधैः ॥ सादिभिश्चास्थितारेजुर्द्रुम
वंतइवाचलाः ॥ २४ ॥ तेषांपदातिनागानांपादरक्षाःसहस्रशः ॥ पट्टिशासिधराःशूराबभूवुरनिवर्तिनः ॥ २५ ॥ सादिभिःस्यंदनैर्नागैरधिकंसमलंकृतैः ॥ स
व्यूहराजोविबभौदेवासुरचमूपमः ॥ २६ ॥ बार्हस्पत्यःसुविहितोनायकेनविपश्चिता ॥ नृत्यतीवमहाव्यूहःपरेषांभयमादधत् ॥ २७ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ अग्निरिति योयंवैश्वानरोविश्वस्यनेताअग्निः सब्रह्माब्राह्मणःप्रजापतिमुखोद्भवत्वसाम्यात् सएवइंदुः उनत्तीतिव्युत्पत्तेर्जलाधी राःसोमरसश्च सएवसमितामश्वत्वंगतः वारुणोवाअश्वइतिश्रुतेः सोमोप्यश्वत्वेनस्तूयतेअत्यंमृजंतिकलशेदशक्षिपइत्यादौअत्यंअश्वं कलशेद्रोणकलशेक्षिपोंगुलयः तमश्वंदेवाःब्राह्मणाश्वविदुःसएकएव

तस्यपक्षप्रपक्षेभ्योनिष्पतंतियुयुत्सवः॥ हस्त्यश्वरथमातंगाःप्रावृषीवबलाहकाः॥ २८॥ ततःसेनामुखेकर्णंदृष्ट्वाराजायुधिष्ठिरः॥ धनंजयममित्रघ्नमेकवीरमुवाचह॥ २९॥ पश्यार्जुनमहाव्यूहंकर्णेनविहितंरणे॥ युक्तंपक्षैःप्रपक्षैश्चपरानीकंप्रकाशते॥३०॥ तदेतद्वैसमालोक्यप्रत्यमित्रंमहद्बलं॥ यथानाभिभवत्यस्मांस्तथानीतिर्विधीयतां॥ ३१ ॥ एवमुक्तोर्जुनोराज्ञाप्रांजलिर्नृपमब्रवीत्॥ यथाभवानाहतथातत्सर्वंनतदन्यथा॥ ३२॥ यस्त्वस्यविहितोघातस्तंकरिष्यामिभारत॥ प्रधानवधएवास्यविनाशस्तंकरोम्यहं॥ ३३॥ युधिष्ठिरउवाच तस्मात्त्वमेवराधेयंभीमसेनःसुयोधनं॥वृषसेनंचनकुलःसहदेवोपिसौबलं॥ ॥ ३४॥ दुःशासनंशतानीकोहार्दिक्यंशिनिपुंगवः॥ धृष्टद्युम्नोद्रोणसुतंस्वयंयोत्स्याम्यहंकृपं॥ ३५॥ द्रौपदेयाधार्त्तराष्ट्रान्शिष्टान्सहशिखंडिना॥ तेतेचतांस्तानहितानस्माकंघ्नंतुमामकाः॥ ३६॥ संजयउवाच इत्युक्तोधर्मराजेनतथेत्युक्त्वाधनंजयः॥ व्यादिदेशस्वसैन्यानिस्वयंचागाच्चमूमुखं॥ ३७॥ अग्निर्वैश्वानरःपूर्वोब्रह्मेंदुःसमितांगतः॥ तस्माद्यःप्रथमंजातस्तंदेवाब्राह्मणाविदुः॥ ३८॥ ब्रह्मेशानेंद्रवरुणान्क्रमशोयोवहत्पुरा॥ तमाद्यंरथमास्थायप्रयातौकेशवार्जुनौ॥ ३९॥ अथतंरथमायांतंदृष्ट्वात्यद्भुतदर्शनं॥ उवाचाधिरथिंशल्यःपुनस्तंयुद्धदुर्मदं॥ ४०॥ अयंसरथआयातःश्वेताश्वःकृष्णसारथिः॥ दुर्वारःसर्वसैन्यानांविपाकःकर्मणामिव॥ ४१॥ निघ्नन्नमित्रान्कौंतेयोयंकर्णपरिपृच्छसि॥ श्रूयतेतुमुलःशब्दोयथामेघस्वनोमहान्॥ ४२॥ ध्रुवमेतौमहात्मानौवासुदेवधनंजयौ॥ एषरेणुःसमुद्भूतोदिवमावृत्यतिष्ठति॥ ४३॥ चक्रनेमिप्रणुन्नेवकंपतेकर्णमेदिनी॥ प्रवात्येषमहावायुरभितस्तववाहिनीं॥ ४४॥ क्रव्यादाव्याहरंत्येतेमृगाःक्रंदंतिभैरवं॥ पश्यकर्णमहाघोरंभयदंलोमहर्षणं॥ ४५॥ कबंधंमेघसंकाशंभानुमावृत्यसंस्थितं॥पश्ययूथैर्बहुविधैर्मृगाणांसर्वतोदिशं॥ ४६॥ बलिभिर्दृप्तशार्दूलैरादित्योभिनिरीक्ष्यते॥ पश्यकंकांश्चगृध्रांश्चसमवेतान्सहस्रशः॥ ४७॥

देवश्चतुर्धात्मानंव्यूह्यार्जुनरथंवाहयंतीत्यर्थः ब्रह्मेद्धइतिपाठेब्रह्मणावेदेनइद्धःस्तुत्याप्रदीप्तः सएवाश्वत्वंगतइत्यर्थः ॥ ३८ ॥ एवमश्वान्स्तुत्वारथंस्तौति ब्रह्मेति ॥ ३९ ॥ ४० ॥ अयंसरथःकौंतेयआयातइतिद्वयोःसंबंधः ॥ ४१ ॥ शब्दोरथस्येतिशेषः ॥ ४२ ॥ ४३ ॥ प्रवातीत्यादिपराजयलक्षणमहातेजोभंगार्थमेव ॥ ४४ ॥ ४५ ॥ कबंधंकेतुं मृगादिभिरादित्यावेक्षणंक्रियमाणंमृत्युसूचकं॥ ४६ ॥ ४७॥

चामराः रथेवलंबंतोरथाक्षचक्रयोः संघर्षजैः स्फुलिंगैर्ज्वलंतीत्यर्थः ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ज्यातलत्रेषुकर्णानितिपाठेकर्णोवाद्यविशेषः तेषांध्वनीन् शिल्पिनोरंजकाः ॥ ५३ ॥ ५४ ॥ ५५ ॥

स्थितानभिमुखान्घोरानन्योन्यमभिभाषतः॥ रंजिताश्चामरायुक्तास्तवकर्णमहारथे॥ ४८॥ प्रवराःप्रज्वलंत्येतेध्वंजश्चैवप्रकंपते॥ सवेपथून्हयान्पश्यमहा कायान्महाजवान्॥ ४९॥ प्लवमानान्दर्शनीयानाकाशेगरुडानिव॥ ध्रुवमेषुनिमित्तेषुभूमिमाश्रित्यपार्थिवाः॥ ५० ॥ स्वप्स्यंतिनिहताःकर्णशतशोथसहस्र शः॥ शंखानांतुमुलःशब्दःश्रूयतेलोमहर्षणः॥ ५१ ॥ आनकानांचराधेयमृदंगानांचसर्वशः॥ बाणशब्दान्बहुविधान्नराश्वगजवाजिनां॥ ५२ ॥ ज्यातलत्रे षुशब्दांश्चश्टणुकर्णमहात्मनां॥ हेमरूप्यप्रसृष्टानांवाससांशिल्पिनिर्मिताः॥ ५३ ॥ नानावर्णारथेभांतिश्वसनेनप्रकंपिताः ॥ सहेमचंद्रताराकाःपताकाःकिं किणीयुताः॥ ५४॥ पश्यकर्णार्जुनस्यैनाःसौदामन्यइवांबुदे ॥ ध्वजाःकणकणायंतेवातेनाभिसमीरिताः ॥ ५५ ॥ विभ्राजंतिरथेकर्णविमानेदैवतेयथा ॥ सपताकारथाश्चैतेपंचालानांमहात्मनां॥ ५६॥ पश्यकुंतीसुतंवीरंबीभत्सुमपराजितं॥ प्रधर्षयितुमायांतंकपिप्रवरकेतनं॥ ५७ ॥ एषध्वजाग्रेपार्थस्यप्रेक्षणी यःसमंततः॥ दृश्यतेवानरोभीमोद्विपतामघवर्धनः॥ ५८॥ एतच्चक्रंगदाशार्ङ्गंशंखःकृष्णस्यधीमतः॥ अत्यर्थंभ्राजतेकृष्णेकौस्तुभस्तुमणिस्तनः॥ ५९ ॥ ए षशार्ङ्गगदापाणिर्वासुदेवोतिवीर्यवान्॥ वाहयन्नेतितुरमान्पांडुरान्वातरंहसः॥ ६०॥ एतत्कूजतिगांडीवंविकृष्टंसव्यसाचिना॥ एतेहस्तवतामुक्ताघ्नंत्यमित्रा न्शिताःशराः॥ ६१॥ विशालायतताम्राक्षैःपूर्णचंद्रनिभाननैः॥ एषाभूःकीर्यतेराजन्शिरोभिरपलायिनां ॥ ६२ ॥ एतेसुपरिघाकाराःपुण्यगंधानुलेपनाः॥ उद्यतायुधशौंडानांपात्यंतेसायुधाभुजाः॥ ६३॥ निरस्तनेत्रजिह्वाश्चवाजिनःसहसादिभिः॥ पतिताःपात्यमानाश्चक्षितौक्षीणाश्चशेरते॥ ६४॥ एतेपर्वतशृं गाणांतुल्यरूपाहताद्विपाः॥ संछिन्नभिन्नाःपार्थेनप्रचरंत्यद्रयोयथा॥ ६५॥ गंधर्वनगराकारारथाहतनरेश्वराः॥ विमानानीवपुण्यानिस्वर्गिणांनिपतंत्यमी॥ ॥ ६६॥ व्याकुलीकृतमत्यर्थंपश्यसैन्यंकिरीटिना॥ नानामृगसहस्राणांयूथंकेसरिणायथा॥ ६७॥ घ्नंत्येतेपार्थिवान्वीराःपांडवाःसमभिद्रुताः॥ नागाश्वरथप त्त्यौघांस्तावकान्समभिघ्नतः॥ ६८॥ एषसूर्यइवांभोदैश्छन्नःपार्थोनदृश्यते॥ ध्वजाग्रंदृश्यतेत्वस्यज्याशब्दश्चापिश्रूयते॥ ६९ ॥ अद्यद्रक्ष्यसितंवीरंश्वेताश्वंकृ ष्णसारथिं॥ निघ्नंतंशात्रवान्संख्येयंकर्णपरिपृच्छसि॥ ७० ॥ अद्यतौपुरुषव्याघ्रौलोहिताक्षौपरंतपौ॥ वासुदेवार्जुनौकर्णद्रष्टास्येकरथेस्थितौ॥ ७१ ॥

॥ ५६ ॥ ५७ ॥ अघवर्धनःदुःखवर्धयिता ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥८४॥ ८५॥८६॥८७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेषट्चत्वारिंशोऽध्यायः॥ ४६॥ ॥ ७ ॥

सारथिर्यस्यवार्ष्णेयोगांडीवंयस्यकार्मुकं॥ तंचेद्धंतासिराधेयत्वंनोराजाभविष्यसि॥ ७२ ॥ एषसंशप्तकाहूतस्तानेवाभिमुखोगतः ॥ करोतिकदनंचैषांसंग्रामेद्विषतांबली॥ ७३ ॥ इतिब्रुवाणंमद्रेशंकर्णःप्राहातिमन्युना॥ पश्यसंशप्तकैःक्रुद्धैःसर्वतःसमभिद्रुतः॥ ७४॥ एषसूर्यइवांभोदैश्छन्नःपार्थोनदृश्यते॥ एतदंतोर्जुनःशल्यनिमग्नोयोधसागरे॥ ७५॥ शल्यउवाच वरुणंकोंभसाहन्यादिंधनेनचपावकं॥ कोवाऽनिलंनिगृह्णीयात्पिबेद्वाकोमहार्णवं॥ ७६ ॥ ईदृग्रूपमहंमन्येपार्थस्ययुधिविग्रहं॥ नहिशक्योर्जुनोजेतुंयुधिसेंद्रैःसुरासुरैः ॥ ७७॥ अथवापरितोषस्तेवाचोक्त्वासुमनाभव॥ नसशक्योयुधाजेतुमन्यंकुरुमनोरथं ॥ ७८ ॥ बाहुभ्यामुद्धरेद्भूमिंदहेत्क्रुद्धइमाःप्रजाः॥ पातयेत्रिदिवाद्देवान्योर्जुनंसमरेजयेत् ॥ ७९ ॥ पश्यकुंतीसुतंवीरंभीममक्लिष्टकारिणं॥ प्रभासंतंमहाबाहुंस्थितंमेरुमिवापरं॥ ८० ॥ अमर्षीनित्यसंरब्धश्चिरंवैरमनुस्मरन्॥ एषभीमोजयप्रेप्सुर्युधितिष्ठतिवीर्यवान् ॥ ८१ ॥ एषधर्मभृतांश्रेष्ठोधर्मराजोयुधिष्ठिरः॥ तिष्ठत्यसुकरःसंख्येपरैःपरपुरंजयः ॥ ८२ ॥ एतौचपुरुषव्याघ्रावश्विनाविवसोदरौ॥ नकुलःसहदेवश्चतिष्ठतोयुधिदुर्जयौ॥ ८३ ॥ अमीस्थिताद्रौपदेयाःपंचपंचाचलाइव ॥ व्यवस्थितायोद्धुकामाःसर्वेर्जुनसमायुधि ॥ ८४ ॥ एतेद्रुपदपुत्राश्चधृष्टद्युम्नपुरोगमाः ॥ स्फीताःसत्यजितोवीरास्तिष्ठंतिपरमौजसः ॥ ८५ ॥ असाविंद्रइवासह्यःसात्यकिःसात्वतांवरः॥ युयुत्सुरुपयात्यस्मान्क्रुद्धांतकसमःपुरः॥८६॥इतिसंवदतोरेवतयोःपुरुषसिंहयोः ॥ तेसेनेसमसज्जेतांगंगायमुनवद्भृशं॥ ८७॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसंवादेषट्चत्वारिंशोऽध्यायः॥ ४६॥ ॥ ७॥ धृतराष्ट्रउवाच तथाव्यूढेष्वनीकेषुसंसक्तेषुचसंजय॥ संशप्तकान्कथंपार्थोगतःकर्णश्चपांडवान्॥ १ ॥ एतद्विस्तरशोयुद्धंप्रब्रूहिकुशलोह्यसि॥ नहितृप्यामिवीराणांशृण्वानोविक्रमान्रणे॥ २॥ संजयउवाच तदास्थितमवज्ञायप्रत्यमित्रबलंमहत्॥ अव्यूहतार्जुनोव्यूहंपुत्रस्यतवदुर्नये॥ ३॥ तत्सादिनागकलिलंपदातिरथसंकुलं॥ धृष्टद्युम्नमुखंव्यूहमशोभतमहद्बलं॥ ४॥ पारावतसवर्णाश्वश्चंद्रादित्यसमद्युतिः॥ पार्षतःप्रबभौधन्वीकालोविग्रहवानिव॥५॥ पार्षतंजुगुपुःसर्वेद्रौपदेयायुयुत्सवः॥ दिव्यवर्मायुधधराःशार्दूलसमविक्रमाः॥ ६॥ सानुगादीप्तवपुषश्चंद्रंतारागणाइव॥ अथव्यूढेष्वनीकेषुप्रेक्ष्यसंशप्तकान्रणे॥ ७॥

तयेति॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

क्रुद्धोर्जुनोभिदुद्राव व्याक्षिपन्गांडिवंधनुः ॥ अथसंशप्तकाःपार्थमभ्यधावन्वधैषिणः ॥ ८ ॥ विजयेधृतसंकल्पामृत्युंकृत्वाऽनिवर्त्तनं ॥ तन्नराश्वौघवद्बहुलंम
त्तनागरथाकुलं ॥ ९ ॥ पत्तिमच्छूरवीरौघंद्रुतमर्जुनमार्दयत् ॥ ससंप्रहारस्तुमुलस्तेषामासीत्किरीटिना ॥ १० ॥ तस्यैवनःश्रुतोयादृङ्निवातकवचैःसह ॥ रथानश्वा
न्ध्वजान्नागान्पत्तीन्रणगतानपि ॥ ११ ॥ इषून्धनूंषिखड्गांश्चचक्राणिचपरश्वधान् ॥ सायुधानुद्यतान्बाहून्विविधान्यायुधानिच ॥ १२ ॥ चिच्छेदद्विषतांपा
र्थःशिरांसिचसहस्रशः ॥ तस्मिन्सैन्यमहावर्त्तेपातालतलसन्निभे ॥ १३ ॥ निमग्नंतंरथंमत्वानेदुःसंशप्तकास्तथा ॥ सपुनस्तानरीन्हत्वापुनरुत्तरतोवधीत् ॥
॥ १४ ॥ दक्षिणेनचपश्चाच्चकुद्धोरुद्रःपशूनिव ॥ अथपंचालचेदीनांसृंजयानांचमारिष ॥ १५ ॥ त्वदीयैःसहसंग्रामआसीत्परमदारुणः ॥ कृपश्चकृतवर्माच
शकुनिश्चापिसौबलः ॥ १६ ॥ हृष्टसेनाःसुसंरब्धारथानीकप्रहारिणः ॥ कोसलैःकाश्यमत्स्यैश्चकारूषैःकेकयैरपि ॥ १७ ॥ शूरसेनैःशूरवरैर्युयुधुर्युद्धदुर्मदाः ॥
तेषामंतकरंयुद्धंदेहपाप्मासुनाशनं ॥ १८ ॥ क्षत्रविट्शूद्रवीराणांधर्म्यंस्वर्ग्यंयशस्करं ॥ दुर्योधनोथसहितोभ्रातृभिर्भरतर्षभ ॥ १९ ॥ गुप्तःकुरुप्रवीरैश्चमद्रा
णांचमहारथैः ॥ पांडवैःसहपंचालैश्चेदिभिःसात्यकेनच ॥ २० ॥ युध्यमानंरणेकर्णंकुरुवीरोभ्यपालयत् ॥ कर्णोपिनिशितैर्बाणैर्विनिहत्यमहाचमूं ॥ २१ ॥
प्रमृद्यचरथश्रेष्ठान्युधिष्ठिरमपीडयत् ॥ विवस्त्रायुधदेहासून्कृत्वाशत्रून्सहस्रशः ॥ २२ ॥ युक्तास्वर्गयशोभ्यांचस्वेभ्योमुदमुदावहत् ॥ एवंमारिषसंग्रामोनर
वाजिगजक्षयः ॥ कुरूणांसृंजयानांचदेवासुरसमोभवत् ॥ २३ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ ७ ॥ ॥ ७ ॥
धृतराष्ट्रउवाच यत्तत्प्रविश्यपार्थानांसैन्यंकुर्वन्जनक्षयं ॥ कर्णोराजानमभ्येत्यतन्ममाचक्ष्वसंजय ॥ १ ॥ केचप्रवीराःपार्थानांयुधिकर्णमवारयन् ॥ कांश्च
प्रमथ्याधिरथिर्युधिष्ठिरमपीडयत् ॥ २ ॥ संजयउवाच धृष्टद्युम्नमुखान्पार्थान्दृष्ट्वाकर्णोव्यवस्थितान् ॥ समभ्यधावत्त्वरितःपंचालाञ्छत्रुकर्षणः ॥
॥ ३ ॥ तंतूर्णमभिधावंतंपंचालाजितकाशिनः ॥ प्रत्युद्ययुर्महात्मानंहंसाइवमहार्णवं ॥ ४ ॥ ततःशंखसहस्राणांनिःस्वनोहृदयंगमः ॥ प्रादुरासीदुभयतोभेरी
शब्दश्चदारुणः ॥ ५ ॥ नानाबाणनिपाताश्चद्विपाश्वरथनिःस्वनः ॥ सिंहनादश्चवीराणामभवद्दारुणस्तदा ॥ ६ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ धिमर्दंतं विमृद्नंतं ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

साद्रिद्रुमार्णवाभूमिःसवातांबुदमंबरं॥ सार्केंदुग्रहनक्षत्राद्यौश्चव्यक्तंविघूर्णिता॥ ७॥ इतिभूतानितंशब्दंमेनिरेतेचविव्यथुः॥ यानिचाप्यल्पसत्वानिप्राय स्तानिमृतानिच॥ ८॥ अथकर्णोभृशंक्रुद्धःशीघ्रमस्त्रमुदीरयन्॥ जघानपांडवींसेनांमासुरींमघवानिव॥ ९॥ सपांडवबलंकर्णःप्रविश्यविसृजञ्छरान्॥ प्र भद्रकाणांप्रवरानहनत्सप्तसप्ततिं॥ १०॥ ततःसुपुंखैर्निशितैरथश्रेष्ठोरथेषुभिः॥ अवधीत्पंचविंशत्यापंचालान्पंचविंशतिं॥ ११॥ सुवर्णपुंखैर्नाराचैःपरका यविदारणैः॥ चेदिकानवधीद्वीरःशतशोथसहस्रशः॥ १२॥ तंतथासमरेकर्मकुर्वाणमतिमानुषं॥ परिवव्रुर्महाराजपंचालानांरथव्रजाः॥ १३॥ ततःसंधायवि शिखान्पंचभारतदुःसहान्॥ पंचालानवधीत्पंचकर्णोवैकर्तनोवृषः॥ १४॥ भानुदेवंचित्रसेनंसेनाबिंदुंचभारत॥ तपनंशूरसेनंचपंचालानहनद्रणे॥ १५॥ पंचालेषुचशूरेषुवध्यमानेषुसायकैः॥ हाहाकारोमहानासीत्पंचालानांमहाहवे॥ १६॥ परिवव्रुर्महाराजपंचालानांरथादश॥ पुनरेवचतान्कर्णोजघानाशुप तत्रिभिः॥ १७॥ चक्ररक्षौतुकर्णस्यपुत्रौमारिपदुर्जयौ॥ सुषेणःसत्यसेनश्चत्यक्त्वाप्राणानयुध्यतां॥ १८॥ पृष्ठगोप्तातुकर्णस्यज्येष्ठःपुत्रोमहारथः॥ वृषसेनः स्वयंकर्णंपृष्ठतःपर्यपालयत्॥ १९॥ धृष्टद्युम्नःसात्यकिश्चद्रौपदेयावृकोदरः॥ जनमेजयःशिखंडीचप्रवीराश्चप्रभद्रकाः॥ २०॥ चेदिकेकयपंचालायमौम त्स्याश्चदंशिताः॥ समभ्यधावन्राधेयंजिघांसंतःप्रहारिणं॥ २१॥ तएनंविविधैःशस्त्रैःशरधाराभिरेवच॥ अभ्यवर्षन्विमर्दंतंप्रावृषीवांबुदागिरिं॥ २२॥ पि तरंतुपरीप्संतःकर्णपुत्राःप्रहारिणः॥ त्वदीयाश्चापरेराजन्वीरावीरानवारयन्॥ २३॥ सुषेणोभीमसेनस्यच्छित्वाभल्लेनकार्मुकं॥ नाराचैःसप्तभिर्विध्वाहृदिभी मंननादह॥ २४॥ अथान्यद्धनुरादायसुदृढंभीमविक्रमः॥ सज्यंवृकोदरःकृत्वासुषेणस्याच्छिनद्धनुः॥ २५॥ विव्याधचैनंदशभिःक्रुद्धोनृत्यन्निवेषुभिः॥ कर्णंचतूर्णंविव्याधत्रिसप्तत्याशितैःशरैः॥ २६॥ भानुसेनंचदशभिःसाश्वसूतायुधध्वजं॥ पश्यतांसुहृदांमध्येकर्णपुत्रमपातयत्॥ २७॥ क्षुरप्रणुन्नंतत्तस्यशि रश्चंद्रनिभाननं॥ शुभदर्शनमेवासीन्नालभ्रष्टमिवांबुजं॥ २८॥ हत्वाकर्णसुतंभीमस्तावकान्पुनरार्दयत्॥ कृपहार्दिक्ययोश्छित्वाचापौतावप्यथार्दयत्॥ २९॥ दुःशासनंत्रिभिर्विध्वाशकुनिंषड्भिरायसैः॥ उलूकंचपतत्रिंचचकारविरथावुभौ॥ ३०॥ सुषेणंचहतोसीतिब्रुवन्नादत्तसायकं॥ तमस्यकर्णश्चिच्छेदत्रिभिश्चै नमताडयत्॥ ३१॥ अथान्यंपरिजग्राहसुपर्वाणंसुतेजनं॥ सुषेणायासृजद्भीमस्तमप्यस्याच्छिनद्वृषः॥ ३२॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

पुनःकर्णस्त्रिसप्तत्याभीमसेनमथेषुभिः ॥ पुत्रंपरीप्सन्विव्याधक्रूरंक्रूरैर्जिघांसया ॥ ३३ ॥ सुषेणस्तुधनुर्गृह्यभारसाधनमुत्तमं ॥ नकुलंपंचभिर्बाणैर्बाह्वोरुरसिचार्पयत् ॥ ३४ ॥ नकुलस्तंतुविंशत्याविध्वाभारसहैर्दृढैः ॥ ननादबलवान्नादंकर्णस्यभयमादधत् ॥ ३५ ॥ तंसुषेणोमहाराजविध्वादशभिराशुगैः ॥ चिच्छेदचधनुःशीघ्रंक्षुरप्रेणमहारथः ॥ ३६ ॥ अथान्यद्धनुरादायनकुलःक्रोधमूर्छितः ॥ सुषेणंनवभिर्बाणैर्वारयामाससंयुगे ॥ ३७ ॥ सतुबाणैर्दिशोराजन्नाच्छाद्यपरवीरहा ॥ आजघ्नेसारथिंचास्यसुषेणंचततस्त्रिभिः ॥ ३८ ॥ चिच्छेदचास्यसुदृढंधनुर्भल्लैस्त्रिभिस्त्रिधा ॥ अथान्यद्धनुरादायसुषेणःक्रोधमूर्छितः ॥ ३९ ॥ आविध्यन्नकुलंषष्ट्यासहदेवंचसप्तभिः ॥ तद्युद्धंसुमहद्घोरमासीद्देवासुरोपमं ॥ ४० ॥ निघ्नतांसायकैस्तूर्णमन्योन्यस्यवधंप्रति ॥ सात्यकिर्वृषसेनस्यसूतंहत्वात्रिभिःशरैः ॥ ४१ ॥ धनुश्चिच्छेदभल्लेनजघानाश्वांश्चसप्तभिः ॥ ध्वजमेकेषुणोन्मथ्यत्रिभिस्तंहृद्यताडयत् ॥ ४२ ॥ अथावसन्नःस्वरथेमुहूर्तात्पुनरुत्थितः ॥ सरणेयुयुधानेनविसूताश्वरथध्वजः ॥ ४३ ॥ कृतोजिघांसुःशैनेयंखड्गचर्मधृगभ्ययात् ॥ तस्यचापततःशीघ्रंवृषसेनस्यसात्यकिः ॥ ४४ ॥ वाराहकर्णैर्दशभिरविध्यदसिचर्मणी ॥ दुःशासनस्तुतंदृष्ट्वाविरथंव्यायुधंकृतं ॥ ४५ ॥ आरोप्यस्वरथंतूर्णमपोवाहरणातुरं ॥ अथान्यंरथमास्थायवृषसेनोमहारथः ॥ ४६ ॥ द्रौपदेयांस्त्रिसप्तत्यायुयुधानंचपंचभिः ॥ भीमसेनंचतुःषष्ट्यासहदेवंचपंचभिः ॥ ४७ ॥ नकुलंत्रिंशताबाणैःशतानीकंचसप्तभिः ॥ शिखंडिनंचदशभिर्धर्मराजंशतेनच ॥ ४८ ॥ एतांश्चान्यांश्चराजेंद्रप्रवीरान्जयगृद्धिनः ॥ अभ्यर्दयन्महेष्वासःकर्णपुत्रोविशांपते ॥ ४९ ॥ कर्णस्ययुधिदुर्धर्षस्ततःपृष्ठमपालयत् ॥ दुःशासनंचशैनेयोनवर्नवभिरायसैः ॥ ५० ॥ विसूताश्वरथंकृत्वाललाटेत्रिभिरार्पयत् ॥ सत्वन्यंरथमास्थायविधिवत्कल्पितंपुनः ॥ ५१ ॥ युयुधेपांडुभिःसार्धंकर्णस्याप्याययन्बलं ॥ धृष्टद्युम्नस्ततःकर्णमविध्यद्दशभिःशरैः ॥ ५२ ॥ द्रौपदेयास्त्रिसप्तत्यायुयुधानस्तुसप्तभिः ॥ भीमसेनश्चतुःषष्ट्यासहदेवश्चसप्तभिः ॥ ५३ ॥ नकुलस्त्रिंशताबाणैःशतानीकस्तुसप्तभिः ॥ शिखंडीदशभिर्वीरोधर्मराजःशतेनतु ॥ ५४ ॥ एतेचान्येचराजेंद्रप्रवीराजयगृद्धिनः ॥ अभ्यर्दयन्महेष्वासंसूतपुत्रंमहामृधे ॥ ५५ ॥ तान्सूतपुत्रोविशिखैर्दशभिर्दशभिःशरैः ॥ रथेनानुचरन्वीरःप्रत्यविध्यदरिंदमः ॥ ५६ ॥ तत्रास्त्रवीर्यंकर्णस्यलाघवंचमहात्मनः ॥ अपश्यामहाभागतदद्भुतमिवाभवत् ॥ ५७ ॥ नह्याददानंददृशुःसंदधानंचसायकान् ॥ विमुंचंतंचसंरंभाददृश्यंतहतानरीन ॥ ५८ ॥

॥५९॥६०॥विवरंअंतरंददुःप्रस्तताइत्यर्थः ॥६१॥६२॥६३॥६४॥६५॥६६॥६७॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेअष्टचत्वारिंशोऽध्यायः ॥ ४८॥ ॥७॥ ॥७॥ ॥७॥

द्यौर्वियद्भूर्दिशश्चैवप्रपूर्णानिशितैःशरैः ॥ अरुणाभ्राटनाकारंतस्मिन्देशेबभौवियत् ॥ ५९ ॥ नृत्यन्निवहिराधेयश्चापहस्तःप्रतापवान् ॥ यैर्विद्धःप्रत्यविद्ध्यत्तानेकैकंत्रिगुणैःशरैः॥ ६० ॥ शतैश्चदशभिश्चैतान्पुनर्विध्वाननादच ॥ साश्वसूतरथाश्छन्नास्ततस्तेविवरंददुः ॥ ६१॥ तान्प्रमथ्यमहेष्वासान्राधेयःशरवृष्टिभिः ॥ गजानीकमसंबाधंप्राविशच्छत्रुकर्शनः ॥ ६२ ॥ सरथांस्त्रिशतंहत्वाचेदीनामनिवर्त्तिनां ॥ राधेयोनिशितैर्बाणैस्ततोभ्याच्छंद्युधिष्ठिरं ॥ ६३ ॥ ततस्तेपांडवाराजञ्छिखंडीचससात्यकिः ॥ राधेयात्परिरक्षंतोराजानंपर्यवारयन् ॥ ६४ ॥ तथैवतावकाःसर्वेकर्णंदुर्वारणंरणे ॥ यत्ताःशूरामहेष्वासाःपर्यरक्षंतसर्वशः ॥ ६५ ॥ नानावादित्रघोषाश्चप्रादुरासन्विशांपते ॥ सिंहनादश्चसंजज्ञेशूराणामभिगर्जतां ॥६६॥ ततःपुनःसमाजग्मुरभीताःकुरुपांडवाः ॥ युधिष्ठिरमुखाःपार्थाःसूतपुत्रमुखावयं ॥ ६७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेअष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥७॥ ॥७॥ संजयउवाच

विदार्यकर्णस्तांसेनांयुधिष्ठिरमथाद्रवत् ॥ रथहस्त्यश्वपत्तीनांसहस्रैःपरिवारितः ॥ १ ॥ नानायुधसहस्राणिप्रेरितान्यरिभिर्वृषः ॥ छित्वाबाणशतैरुग्रैस्तानविध्यदसंभ्रमात् ॥ २ ॥ निचकर्तशिरांस्येषांबाहूनूरूंश्चसूतजः ॥ तेहतावसुधांपेतुर्भग्नाश्चान्येविदुद्रुवुः ॥ ३ ॥ द्राविडास्तुनिषादास्तुपुनःसात्यकिचोदिताः ॥ अभ्यद्रवन्जिघांसंतःपत्तयःकर्णमाहवे ॥ ४ ॥ तेविबाहुशिरस्त्राणाःप्रहताःकर्णसायकैः ॥ पेतुःपृथिव्यांयुगपच्छिन्नंशालवनंयथा ॥ ५ ॥ एवंयोधशतान्याजौसहस्राण्ययुतानिच ॥ हतानीयुर्महींदेहैर्यशसापूरयन्दिशः ॥ ६ ॥ अथवैकर्तनंकर्णंरणेक्रुद्धमिवांतकं ॥ रुरुधुःपांडुपंचालाव्याधिंमंत्रौषधैरिव ॥ ७ ॥ सतान्प्रमृद्याभ्यपतत्पुनरेवयुधिष्ठिरं ॥ मंत्रौषधिक्रियातीतोव्याधिरत्युल्बणोयथा ॥ ८ ॥ सराजगृद्धिभीरुद्धःपांडुपंचालकेकयैः ॥ नाशकत्तानतिक्रांतुंमृत्युर्ब्रह्मविदोयथा ॥ ९ ॥ ततोयुधिष्ठिरःकर्णमदूरस्थंनिवारितं ॥ अब्रवीत्परवीरघ्नंक्रोधसंरक्तलोचनः ॥ १० ॥ कर्णकर्णवृथादृष्टेसूतपुत्रवचःशृणु ॥ सदास्पर्धसिसंग्रामेफाल्गुनेनतरस्विना ॥ ११ ॥ तथास्मान्बाधसेनित्यंधार्तराष्ट्रमतेस्थितः ॥ यद्बलंयच्चतेवीर्यंप्रद्वेषोयस्तुपांडुषु ॥ १२ ॥ तत्सर्वंदर्शयस्वाद्यपौरुषंमहदास्थितः ॥ युद्धश्रद्धांचतेद्याहंविनेष्यामिमहाहवे ॥ १३ ॥ एवमुक्त्वामहाराजकर्णंपांडुसुतस्तदा ॥ सुवर्णपुंखैर्दशभिर्विव्याधायस्मयैःशरैः ॥ १४ ॥

विदार्येति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

तंसूतपुत्रोदशभिःप्रत्यविध्यदरिंदमः॥वत्सदंतैर्महेष्वासःप्रहसन्निवभारत॥१५॥ सोवज्ञायतुनिर्विद्धःसूतपुत्रेणमारिष॥ प्रजज्वालततःक्रोधाद्धविषेवहुता
शनः॥१६॥ज्वालामालापरिक्षिप्तोराज्ञोदेहोव्यदृश्यत॥युगांतेदग्धुकामस्यसंवर्ताग्नेरिवापरः॥१७॥ततोविस्फार्यसुमहच्चापंहेमपरिष्कृतं॥समाधत्तशितंबाणं
गिरीणामपिदारणं॥१८॥ ततःपूर्णायतोत्कृष्टंयमदंडनिभंशरं॥ मुमोचत्वरितोराजासूतपुत्रजिघांसया॥१९॥ सतुवेगवतामुक्तोबाणोवज्राशनिस्वनः॥ वि
वेशसहसाकर्णंसव्येपार्श्वेमहारथं॥२०॥सतुतेनप्रहारेणपीडितःप्रमुमोहवै॥स्रस्तगात्रोमहाबाहुर्धनुरुत्सृज्यस्यंदने॥२१॥ गतासुरिवनिश्चेतःशल्यस्याभिमु
खोपतत्॥ राजापिभूयोनाजघ्नेकर्णंपार्थहितेप्सया॥ २२॥ ततोहाहाकृतंसर्वंधार्तराष्ट्रबलंमहत्॥ विवर्णमुखभूयिष्ठंकर्णंदृष्ट्वातथागतं॥ २३॥ सिंहनादश्चसं
जज्ञेक्ष्वेलाःकिलकिलास्तथा॥ पांडवानांमहाराजदृष्ट्वाराज्ञःपराक्रमं ॥ २४ ॥ प्रतिलभ्यतुराधेयःसंज्ञांनातिचिरादिव॥ दध्रेराजविनाशायमनःक्रूरपराक्र
मः॥ २५॥ सहेमविकृतंचापंविस्फार्यविजयंमहत्॥ अवाकिरदमेयात्मापांडवंनिशितैःशरैः ॥ २६॥ ततःक्षुराभ्यांपांचाल्यौचक्ररक्षौमहात्मनः॥ जघानचं
द्रदेवंचदंडधारंचसंयुगे॥२७॥तावुभौधर्मराजस्यप्रवीरौपरिपार्श्वतः॥रथाभ्याशेचकाशेतेचंद्रस्येवपुनर्वसू॥२८॥ युधिष्ठिरःपुनःकर्णमविध्यत्त्रिंशताशरैः॥
सुषेणंसत्यसेनंचत्रिभिस्त्रिभिरताडयत्॥२९॥शल्यंनवत्याविव्याधत्रिसप्तत्याचसूतजं॥तांस्तस्यगोप्तॄन्विव्याधत्रिभिस्त्रिभिरजिह्मगैः॥३०॥ ततःप्रहस्याधि
रथिर्विधुन्वानःसकार्मुकं॥ भित्वाभल्लेनराजानंविध्वाषष्ट्यानदत्तदा ॥३१॥ ततःप्रवीराःपांडूनामभ्यधावन्नमर्षिताः ॥युधिष्ठिरंपरीप्संतःकर्णमभ्यर्दयञ्छ
रैः॥ ३२॥ सात्यकिश्चेकितानश्चयुयुत्सुःपांड्यएवच॥ धृष्टद्युम्नःशिखंडीचद्रौपदेयाःप्रभद्रकाः ॥ ३३ ॥ यमौचभीमसेनश्चशिशुपालस्यचात्मजः ॥ कारूषा
मत्स्यशेषाश्चकेकयाःकाशिकोसलाः॥ ३४॥ एतेचत्वरितावीरावसुषेणमताडयन्॥ जनमेजयश्चपांचाल्यःकर्णंविव्याधसायकैः॥३५॥ वाराहकर्णनाराचै
र्नालीकैर्निशितैःशरैः॥ वत्सदंतैर्विपाठैश्चक्षुरप्रैश्चचटकामुखैः॥ ३६॥ नानाप्रहरणैश्चोग्रैरथहस्त्यश्वसादिभिः॥ सर्वतोभ्यद्रवत्कर्णंपरिवार्यजिघांसया॥३७॥
सपांडवानांप्रवरैःसर्वतःसमभिद्रुतः॥ उदीरयन्ब्राह्ममस्त्रंशरैरापूरयन्दिशः॥ ३८ ॥ ततःशरमहाज्वालोवीर्योष्माकर्णपावकः॥ निर्दहन्पांडववनंवीरःपर्यचर
द्रणे॥ ३९॥ ससंधायमहास्त्राणिमहेष्वासोमहामनाः॥ प्रहस्यपुरुषेंद्रस्यशरैश्चिच्छेदकार्मुकं॥ ४०॥

पुरुषेंद्रस्ययुधिष्ठिरस्य ॥ ४० ॥

ततःसंधायनवतिंनिमेषान्नतपर्वणां ॥ बिभेदकवचंराज्ञोरणेकर्णःशितैःशरैः ॥ ४१ ॥ तद्वर्महेमविकृतंरत्नचित्रंबभौपतत् ॥ सविद्युदभ्रंसवितुःश्लिष्टंवातहतं यथा ॥ ४२ ॥ तदंगात्पुरुषेंद्रस्यभ्रष्टंवर्मव्यरोचत ॥ रत्नैरलंकृतंचित्रैर्व्यभ्रंनिशियथानभः ॥ ४३ ॥ छिन्नवर्माशरैःपार्थोरुधिरेणसमुक्षितः ॥ ततःसर्वायसींशक्तिंचिक्षेपाधिरथिंप्रति ॥ ४४ ॥ तांज्वलंतीमिवाकाशेशरैश्चिच्छेदसप्तभिः ॥ साछिन्नाभूमिमगमन्महेष्वासस्यसायकैः ॥ ४५ ॥ ततोबाह्वोर्ललाटेचहृदिचैवयुधिष्ठिरः ॥ चतुर्भिस्तोमरैःकर्णंताडयित्वानदन्मुदा ॥ ४६ ॥ उद्भिन्नरुधिरःकर्णःक्रुद्धःसर्पइवश्वसन् ॥ ध्वजंचिच्छेदभल्लेनत्रिभिर्विव्याधपांडवं ॥ ४७ ॥ इषुधीचास्यचिच्छेदरथंचतिलशोच्छिनत् ॥ कालवालास्तुयेपार्थंदंतवर्णावहन्हयाः ॥ ४८ ॥ तैर्युक्तंरथमास्थायप्रायाद्राजापराङ्मुखः ॥ एवंपार्थोभ्युपायात्सनिहतःपार्ष्णिसारथिः ॥ ४९ ॥ अशक्नुवन्प्रमुखतःस्थातुंकर्णस्यदुर्मनाः ॥ अभिद्रुत्यतुराधेयःपांडुपुत्रंयुधिष्ठिरं ॥ ५० ॥ वज्रच्छत्रांकुशैर्मत्स्यैर्ध्वजकूर्मांबुजादिभिः ॥ लक्षणैरुपपन्नेनपांडुनापांडुनंदनं ॥ ५१ ॥ पवित्रीकर्तुमात्मानंस्कंधेसंस्पृश्यपाणिना ॥ ग्रहीतुमिच्छन्सबलात्कुंतीवाक्यंचसोऽस्मरत् ॥ ५२ ॥ तंशल्यःप्राहमाकर्णगृहीथाःपार्थिवोत्तमं ॥ गृहीतमात्रोहत्वात्वांमाकरिष्यतिभस्मसात् ॥ ५३ ॥ अब्रवीत्प्रहसन्राजन्कुत्सयन्निवपांडवं ॥ कथंनामकुलेजातःक्षत्रधर्मेव्यवस्थितः ॥ ५४ ॥ प्रजह्यात्समरंभीतःप्राणान्रक्षन्महाहवे ॥ नभवान्क्षत्रधर्मेषुकुशलोहीतिमेमतिः ॥ ५५ ॥ ब्राह्मेबलेभवान्युक्तःस्वाध्यायेयज्ञकर्मणि ॥ मास्मयुध्यस्वकौंतेयमास्मवीरान्समासदः ॥ ५६ ॥ माचैतानप्रियंब्रूहिमाचैव्रजमहारणं ॥ वक्तव्यामारिषान्येतुनवक्तव्यास्तुमादृशाः ॥ ५७ ॥ मादृशान्विब्रुवन्युद्धेएतदन्यच्चलप्स्यसे ॥ स्वगृहंगच्छकौंतेययत्रतौकेशवार्जुनौ ॥ ५८ ॥ नहित्वांसमरेराजन्हन्यात्कर्णःकथंचन ॥ एवमुक्त्वाततःपार्थंविसृज्यचमहाबलः ॥ ॥ ५९ ॥ न्यहनत्पांडवींसेनांवज्रहस्तइवासुरीं ॥ ततोपायाद्द्रुतंराजन्व्रीडन्निवनरेश्वरः ॥ ६० ॥ अथापयातंराजानंमत्वान्वीयुस्तमच्युतं ॥ चेदिपांडवपंचालाःसात्यकिश्चमहारथः ॥ ६१ ॥ द्रौपदेयास्तथाशूरामाद्रीपुत्रौचपांडवौ ॥ ततोयुधिष्ठिरानीकंदृष्ट्वाकर्णःपराङ्मुखं ॥ ६२ ॥ कुरुभिःसहितोवीरःप्रहृष्टःपृष्ठतोन्वगात् ॥ भेरीशंखमृदंगानांकार्मुकाणांचनिःस्वनः ॥ ६३ ॥ बभूवधार्तराष्ट्राणांसिंहनादरवस्तथा ॥ युधिष्ठिरस्तुकौरव्यरथमारुह्यसत्वरं ॥ ६४ ॥ श्रुतकीर्तेर्महाराजदृष्टवान्कर्णविक्रमं ॥ काल्यमानंबलंदृष्ट्वाधर्मराजोयुधिष्ठिरः ॥ ६५ ॥ स्वान्योधानब्रवीत्क्रुद्धोनिघ्नतैतान्किमासत ॥ ततोराज्ञाभ्यनुज्ञाताःपांडवानांमहारथाः ॥ ६६ ॥

भीमसेनमुखाःसर्वेपुत्रांस्तेप्रत्युपाद्रवन् ॥ अभवत्तुमुलःशब्दोयोधानांतत्रभारत ॥ ६७॥ रथहस्त्यश्वपत्तीनांशस्त्राणांचततस्ततः ॥ उत्तिष्ठतप्रहरतप्रैताभिपत
तेतिच ॥ ६८ ॥ इतिब्रुवाणात्व्यन्योन्यंजघ्नुर्योधामहारणे ॥ अभ्रच्छायेवतत्रासीच्छरवृष्टिभिरंबरे ॥ ६९॥ समावृतैर्नरवरैर्निघ्नद्भिरितरेतरं ॥ विपताकध्वजच्छ
त्राव्यश्वसूतायुधारण ॥ ७० ॥ व्यंगांगावयवाःपेतुःक्षितौक्षीणाःक्षितीश्वराः ॥ प्रवणादिवशैलानांशिखराणिद्विपोत्तमाः ॥ ७१ ॥ सारोहानिहताःपेतुर्वज्र
भिन्नाइवाद्रयः ॥ छिन्नभिन्नविपर्यस्तैर्वर्मालंकारभूषणैः ॥ ७२ ॥ सारोहास्तुरगाःपेतुर्हतवीराःसहस्रशः ॥ विप्रविद्धायुधाश्चैवविरथाश्वरथैर्हताः ॥ ७३ ॥ प्र
तिवीरैश्वसंमर्दपत्तिसंघाःसहस्रशः ॥ विशालायतताम्राक्षैःपद्मेंदुसदृशाननैः ॥ ७४ ॥ शिरोभिर्युद्धशौंडानांसर्वतःसंवृतामही ॥ यथाभुवितथाव्योम्निनिःस्व
नंशुश्रुवुर्जनाः ॥ ७५ ॥ विमानैरप्सरःसंघैर्गीतवादित्रनिःस्वनैः ॥ हतानभिमुखान्वीरान्वीरैःशतसहस्रशः ॥ ७६ ॥ आरोप्यारोप्यगच्छंतिविमानेष्वप्सरोग
णाः ॥ तद्दृष्ट्वामहदाश्चर्यंप्रत्यक्षंस्वर्गलिप्सया ॥ ७७॥ प्रहृष्टमनसःशूराःक्षिप्रंजघ्नुःपरस्परं ॥ रथिनोरथिभिःसार्धंचित्रंयुयुधुराहवे ॥ ७८ ॥पत्तयःपत्तिभिर्ना
गाःसहनागैर्हयैर्हयाः ॥ एवंप्रवृत्तेसंग्रामेगजवाजिनरक्षये ॥ ७९ ॥ सैन्येनरजसावृत्तेस्वेस्वांजघ्नुःपरेपरान् ॥ कचाकचियुद्धमासीद्दंतादंतिनखानखि ॥ ८० ॥
मुष्टियुद्धंनियुद्धंचदेहपाप्मासुनाशनं ॥ तथावर्ततिसंग्रामेगजवाजिनरक्षये ॥ ८१ ॥नराश्वनागदेहेभ्यःप्रसृतालोहितापगा ॥गजाश्वनरदेहान्साव्युवाहपतिता
न्बहून् ॥ ८२ ॥ नराश्वगजसंबाधेनराश्वगजसादिनां ॥ लोहितोदामहाघोरामांसशोणितकर्दमा ॥ ८३॥ नराश्वगजदेहानांवहंतीभीरुभीषणा ॥ तस्याःपारम
पारंचव्रजंतिविजयैषिणः ॥ ८४ ॥ गाधेनचोत्प्लुवंतश्चनिमज्योन्मज्यचापरे ॥ तेतुलोहितदिग्धांगारक्तवर्मायुधांबराः ॥ ८५ ॥ सस्नुस्तस्यांपपुश्चास्यांमम्लुश्च
भरतर्षभ ॥ रथानश्वान्नरान्नागानायुधाभरणानिच ॥ ८६ ॥ वसनान्यथवर्माणिवध्यमानान्हतानपि ॥ भूमिंखंद्यांदिशश्चैवप्रायःपश्यामलोहितं ॥ ८७॥
लोहितस्यतुगंधेनस्पर्शेनचरसेनच ॥ रूपेणचातिरक्तेनशब्देनचविसर्पता ॥ ८८ ॥ विषादःसुमहानासीत्प्रायःसैन्यस्यभारत ॥ तत्तुविप्रहतंसैन्यंभीमसेनमु
खास्तदा ॥ ८९ ॥ भूयःसमाद्रवन्वीराःसात्यकिप्रमुखास्तदा ॥ तेषामापततांवेगमविषह्यंनिरीक्ष्यच ॥ ९० ॥ पुत्राणांतेमहासैन्यमासीद्राजन्पराङ्मुखं ॥ तत्प्र
कीर्णरथाश्वेभंनरवाजिसमाकुलं ॥ ९१ ॥

॥ ९२ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेऊनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ ७ ॥ ॥ ७ ॥ तानिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

विध्वस्तवर्मकवचंप्रविल्यायुधकार्मुकं ॥व्यद्रवत्तावकंसैन्यंलोड्यमानंसमंततः॥सिंहार्दितमिवारण्येयथागजकुलंतथा॥ ९२॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेऊनपंचाशत्तमोऽध्यायः॥४९॥ ॥७॥ ॥७॥ संजयउवाच तानभिद्रवतोदृष्ट्वापांडवांस्तावकंबलं॥दुर्योधनोमहाराजवारयामास सर्वशः॥ १ ॥ योधांश्चस्वबलंचैवसमंताद्भरतर्षभ॥ क्रोशतस्तवपुत्रस्यनस्मराजन्यवर्तत॥२॥ततःपक्षःप्रपक्षश्चशकुनिश्चापिसौबलः॥ तदासशस्त्राःकुरवोभीममभ्यद्रवन्रणे॥ ३॥ कर्णोपिदृष्ट्वाद्रवतोधार्तराष्ट्रान्सराजकान्॥ मद्रराजमुवाचेदंयाहिभीमरथंप्रति ॥ ४ ॥ एवमुक्तश्चकर्णेनशल्योमद्राधिपस्तदा ॥ हंसवर्णान्हयानग्र्यान्प्रैषीद्यत्रवृकोदरः ॥ ५ ॥ तेप्रेरितामहाराजशल्येनाहवशोभिना॥ भीमसेनरथंप्राप्यसमसज्जंतवाजिनः॥ ६॥ दृष्ट्वाकर्णसमायांतंभीमःक्रोधसमन्वितः ॥ मतिंचक्रेविनाशायकर्णस्यभरतर्षभ ॥ ७॥ सोब्रवीत्सात्यकिंवीरंधृष्टद्युम्नंचपार्षतं ॥ यूयंरक्षतराजानंधर्मात्मानंयुधिष्ठिरं ॥ ८ ॥ संशयान्महतोमुक्तंकथंचित्प्रेक्षतोमम ॥ अग्रतोमेकृतोराजाछिन्नसर्वपरिच्छदः ॥ ९ ॥ दुर्योधनस्यप्रीत्यर्थंराधेयेनदुरात्मना ॥ अंतमद्यगमिष्यामितस्यदुःखस्यपार्षत॥ १० ॥ हंतास्म्यद्यरणेकर्णंसवामांनिहनिष्यति॥ संग्रामेणसुघोरेणसत्यमेतद्ब्रवीमिते ॥ ११ ॥ राजानमद्यभवतांन्यासभूतंददानिवै॥तस्यसंरक्षणेसर्वेयतध्वंविगतज्वराः॥ १२॥ एवमुक्त्वामहाबाहुःप्रायादाधिरथिंप्रति॥ सिंहनादेनमहतासर्वाःसन्नादयन्दिशः ॥ १३ ॥ दृष्ट्वात्वरितमायांतंभीमंयुद्धाभिनंदिनं॥ सूतपुत्रमथोवाचमद्राणामीश्वरोविभुः॥ १४ ॥ शल्यउवाच पश्यकर्णमहाबाहुंसंक्रुद्धंपांडुनंदनं॥ दीर्घकालार्जितंक्रोधंमोक्तुकामंत्वयिध्रुवं॥ १५॥ ईदृशंनास्यरूपंमेदृष्टपूर्वंकदाचन॥ अभिमन्यौहतेकर्णराक्षसेचघटोत्कचे॥ १६ ॥ त्रैलोक्यस्यसमस्तस्यशक्तःक्रुद्धोनिवारणे ॥ बिभर्त्तिसदृशंरूपंयुगांताग्निसमप्रभं॥ १७॥ संजयउवाच इतिब्रुवतिराधेयंमद्राणामीश्वरेनृप॥ अभ्यवर्तंतवैकर्णंक्रोधदीप्तोवृकोदरः॥ १८॥ अथागतंतुसंप्रेक्ष्यभीमंयुद्धाभिनंदिनं॥ अब्रवीद्वचनंशल्यंराधेयःप्रहसन्निव॥ १९॥ यदुक्तंवचनंमेद्यत्वयामद्रजनेश्वर॥ भीमसेनंप्रतिविभोतत्सत्यंनात्रसंशयः॥ २० ॥ एषशूरश्चवीरश्चक्रोधनश्चवृकोदरः॥ निरपेक्षःशरीरेचप्राणतश्चबलाधिकः॥ २१॥ अज्ञातवासंवसताविराटनगरेतदा॥ द्रौपद्याःप्रियकामेनकेवलंबाहुसंश्रयात्॥ ॥२२॥ गूढभावंसमाश्रित्यकीचकःसगणोहतः॥ सोद्यसंग्राममशिरसिसन्नद्धःक्रोधमूर्छितः॥ २३॥ ॥ १४ ॥ १५॥ १६ ॥ १७॥१८॥ १९॥२०॥२१॥ २२॥२३॥

किंकरोयतदंडेन करेणोद्यतोदंडोयेनतेनमृत्युनासंमः किंशब्दउपमार्थे ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥४०॥

किंकरोद्यतदंडेनमृत्युनापिव्रजेद्रणं॥ चिरकालाभिलषितोममायंतुमनोरथः॥ २४॥ अर्जुनंसमरेहन्यांमांवाहन्याद्धनंजयः॥ समेकदाचिदद्यैवभवेद्भीमस मागमात्॥ २५॥ निहतेभीमसेनेवायदिवाविरथीकृते॥ अभियास्यतिमांपार्थस्तन्मेसाधुभविष्यति॥ २६॥ अत्रयन्मन्यसेप्राप्तंतच्छीघ्रंसंप्रधारय॥ एत च्छुत्वातुवचनंराधेयस्यामितौजसः॥ २७॥ उवाचवचनंशल्यःसूतपुत्रंतथागतं॥ अभियाहिमहाबाहोभीमसेनंमहाबलं॥ २८॥ निरस्यभीमसेनंतुततःप्रा प्स्यसिफाल्गुनं॥ यस्तेकामोभिलषितश्चिरात्प्रभृतिसूतज॥ २९॥ सवैसंपत्स्यतेकर्णसत्यमेतद्ब्रवीमिते॥ एवमुक्तेततःकर्णःशल्यंपुनरभाषत॥ ३०॥ हंताहम र्जुनंसंख्येमांवाहन्याद्धनंजयः॥ युद्धेमनःसमाधाययाहियत्रवृकोदरः॥ ३१॥ संजयउवाच ततःप्रायाद्रथेनाशुशल्यस्तत्रविशांपते॥ यत्रभीमोमहे ष्वासोव्यद्रावयतवाहिनीं॥ ३२॥ ततस्तूर्यनिनादश्चभेरीणांचमहास्वनः॥ उदतिष्ठन्नराजेंद्रकर्णभीमसमागमे॥ ३३॥ भीमसेनोथसंक्रुद्धस्तस्यसैन्यंदुरास दं॥ नाराचैर्विमलैस्तीक्ष्णैर्दिशःप्राद्रावयद्बली॥ ३४॥ ससन्निपातस्तुमुलोघोररूपोविशांपते॥ आसीद्रौद्रोमहाराजकर्णपांडवयोर्मृधे॥ ३५॥ ततोमुहूर्त्ताद्रा जेंद्रपांडवःकर्णमाद्रवत्॥ समापतंतंसंप्रेक्ष्यकर्णोवैकर्तनोवृषः॥ ३६॥ आजघानसुसंक्रुद्धोनाराचेनस्तनांतरे॥ पुनश्चैनममेयात्माशरवर्षैरवाकिरत्॥ ३७ सविद्धःसूतपुत्रेणच्छादयामासपत्रिभिः॥ विव्याधनिशितैःकर्णनवभिर्नतपर्वभिः॥ ३८॥ तस्यकर्णोधनुर्मध्येद्विधाचिच्छेदपत्रिभिः॥ अथैनंछिन्नधन्वानं प्रत्यविध्यत्स्तनांतरे॥ ३९॥ नाराचेनसुतीक्ष्णेनसर्वावरणभेदिना॥ सोन्यत्कार्मुकमादायसूतपुत्रंवृकोदरः॥ ४०॥ राजन्मर्मसुमर्मज्ञोविव्याधनिशितैः शरैः॥ ननादबलवन्नादंकंपयन्निवरोदसी॥ ४१॥ तंकर्णःपंचविंशत्यानाराचेनसमार्पयत्॥ मदोत्कटंवनेदृप्तमुल्काभिरिवकुंजरं॥ ४२॥ ततःसायकभि न्नांगःपांडवःक्रोधमूर्छितः॥ संरंभामर्षताम्राक्षःसूतपुत्रवधेप्सया॥ ४३॥ सकार्मुकेमहावेगंभारसाधनमुत्तमं॥ गिरीणामपिभेत्तारंसायकंसमयोजयत्॥ ॥ ४४॥ विकृष्यबलवच्चापमाकर्णादतिमारुतिः॥ तंमुमोचमहेष्वासःक्रुद्धःकर्णजिघांसया॥ ४५॥ सविसृष्टोबलवताबाणोवज्राशनिस्वनः॥ अदारयद्रणे कर्णवज्रवेगोयथाचलं॥ ४६॥ सभीमसेनाभिहतःसूतपुत्रःकुरूद्वह॥ निषसादरथोपस्थेविसंज्ञःपृतनापतिः॥ ४७॥

॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

॥ ४८ ॥ ४९ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ७ ॥ ॥ ७ ॥ सुदुष्करमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

ततोमद्राधिपोदृष्ट्वाविसंज्ञंसूतनंदनं ॥ अपोवाहरथेनाजौकर्णमाहवशोभिनं ॥ ४८ ॥ ततःपराजितेकर्णेधार्तराष्ट्रींमहाचमूं ॥ व्यद्रावयद्भीमसेनोयथेंद्रोदानवान्पुरा ॥ ४९ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णापयानेपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ७ ॥ ॥ ७ ॥ धृतराष्ट्रउवाच सुदुष्करमिदंकर्मकृतंभीमेनसंजय ॥ येनकर्णोमहाबाहुरथोपस्थेनिपातितः ॥ १ ॥ कर्णोह्येकोरणेहंतापांडवान्सृंजयैःसह ॥ इतिदुर्योधनःसूतप्राब्रवीन्मांमुहुर्मुहुः ॥ २ ॥ पराजितंतुराधेयंदृष्ट्वाभीमेनसंयुगे ॥ ततःपरंकिमकरोत्पुत्रोदुर्योधनोमम ॥ ३ ॥ संजयउवाच विमुखंप्रेक्ष्यराधेयंसूतपुत्रंमहाहवे ॥ पुत्रस्तवमहाराजसोदर्यान्समभाषत ॥ ४ ॥ शीघ्रंगच्छतभद्रंवोराधेयंपरिरक्षत ॥ भीमसेनभयागाधेमज्जंतंव्यसनार्णवे ॥ ५ ॥ तेतुराज्ञासमादिष्टाभीमसेनंजिघांसवः ॥ अभ्यवर्तंतसंक्रुद्धाःपतंगाःपावकंयथा ॥ ६ ॥ श्रुतर्वादुर्धरःक्राथोविवित्सुर्विकटःसमः ॥ निषंगीकवचीपाशीतथानंदोपनंदकौ ॥ ७ ॥ दुष्प्रधर्षःसुबाहुश्चवातवेगसुवर्चसौ ॥ धनुर्ग्राहोदुर्मदश्चजलसंधःशलःसहः ॥ ८ ॥ एतेरथैःपरिवृतावीर्यवंतोमहाबलाः ॥ भीमसेनंसमासाद्यसमंतात्पर्यवारयन् ॥ ९ ॥ तेव्यमुंचञ्छरव्रातान्नानालिंगान्समंततः ॥ सतैरभ्यर्द्यमानस्तुभीमसेनोमहाबलः ॥ १० ॥ तेषामापततांक्षिप्रंसुतानांतजनाधिप ॥ रथैःपंचदशैःसार्द्धंपंचाशदहनद्रथान् ॥ ११ ॥ विवित्सोस्तुततःक्रुद्धोभल्लेनापाहरच्छिरः ॥ भीमसेनोमहाराजतत्पपातहतंभुवि ॥ १२ ॥ सकुंडलशिरस्त्राणंपूर्णचंद्रोपमंतथा ॥ तंदृष्ट्वानिहतंशूरंभ्रातरःसर्वतःप्रभो ॥ ॥ १३ ॥ अभ्यद्रवंतसमरेभीमंभीमपराक्रमं ॥ ततोपराभ्यांभल्लाभ्यांपुत्रयोस्तेमहाहवे ॥ १४ ॥ जहारसमरेप्राणान्भीमोभीमपराक्रमः ॥ तौधरामनुपद्येतांवातरुग्णाविवद्रुमौ ॥ १५ ॥ विकटश्चसहश्चोभौदेवपुत्रोपमौनृप ॥ ततस्तुत्वरितोभीमःक्राथंनिन्येयमक्षयं ॥ १६ ॥ नाराचेनसुतीक्ष्णेनसहतोन्यपतद्भुवि ॥ हाहाकारस्ततस्तीव्रःसंबभूवजनेश्वर ॥ १७ ॥ वध्यमानेषुवीरेषुतवपुत्रेषुधन्विषु ॥ तेषांसुलुलितेसैन्येपुनर्भीमोमहाबलः ॥ १८ नंदोपनंदौसमरेप्रैषयद्यमसादनं ॥ ततस्तेप्राद्रवन्भीताःपुत्रास्तेविह्वलीकृताः ॥ १९ ॥ भीमसेनंरणेदृष्ट्वाकालांतकयमोपमं ॥ पुत्रांस्तेनिहतान्दृष्ट्वासूतपुत्रःसुदुर्मनाः ॥ २० ॥ हंसवर्णान्हयान्भूयःप्रैषयद्यत्रपांडवः ॥ तेप्रेषितामहाराजमद्रराजेनवाजिनः ॥ २१ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

[illegible]

[illegible] ॥ सस[illegible]पाततुमुल[illegible]घोर[illegible]विशांपते ॥ २२ ॥ आसीद्रौद्रोमहाराजकर्णपांडवयोर्मृधे ॥ [illegible]

[illegible] ॥ २३ ॥ आसीद्बुद्धिः कथंयुद्धमेतद्यथभविष्यति ॥ ततोभीमोरण[illegible]छादयामासपत्रिभिः ॥ २४ ॥ कर्णस्तेमहाराज[illegible]

[illegible]भीमंनवभिरापसैः ॥ २५ ॥ विव्याधपरमा[illegible]संनतपर्वभिः ॥ आहतःसमहाबाहुर्भीमोभीमपराक्रमः ॥ २६ ॥ आकर्णपूर्णैर्विशिखैः[illegible]

[illegible]विव्याधपसंनभिः ॥ ततःकर्णोमहाराजआशीविषइवश्वसन् ॥ २७ ॥ शरवर्षेणमहताच्छादयामासपांडवं ॥ भीमोपितंशरव्रातैश्छादयित्वामहारथं ॥ २८ ॥ प

[illegible]तांकौरवेयाणांविननर्दमहाबलः ॥ ततःकर्णो[illegible]कार्मुकं ॥ २९ ॥ भीमंविव्याधदशभिःकंकपत्रैःशिलाशितैः ॥ कार्मुकंचास्य[illegible]

[illegible]निशितेनच ॥ ३० ॥ ततोभीमोमहाबाहुर्हेमपट्टविभूषितं ॥ परिघंघोरमादायमृत्युदंडमिवापरं ॥ ३१ ॥ कर्णस्यनिधनाकांक्षीचिक्षेपाति[illegible] ॥ तमा

[illegible]परिघंवज्राशनिसमस्वनं ॥ ३२ ॥ चिच्छेदबहुधाकर्णःशरैराशीविषोपमैः ॥ ततःकार्मुकमादायभीमोदृढतरंतदा ॥ ३३ ॥ छादयामासविशिखैः[illegible]

[illegible] ॥ ततोयुद्धमभूद्घोरंकर्णपांडवयोर्मृधे ॥ ३४ ॥ हरींद्रयोरिवमुहुःपरस्परवधैषिणोः ॥ ततःकर्णोमहाराजभीमसेनंत्रिभिःशरैः ॥ ३५ ॥ आकर्णमूलवि

[illegible]मायम्यकार्मुकं ॥ सोतिविद्धोमहेष्वासःकर्णेनबलिनांवरः ॥ ३६ ॥ घोरमादत्तविशिखंकर्णकायावदारणं ॥ तस्यभित्वातनुत्राणं[illegible]

[illegible] ॥ ३७ ॥ प्राविशद्धरणींराजन्वल्मीकमिवपन्नगः ॥ सतेनातिप्रहारेणव्यथितोविह्वलन्निव ॥ ३८ ॥ संचचालरथेकर्णःक्षितिकंपेयथाचलः ॥ ततःकर्णोमहा

[illegible]समन्वितः ॥ ३९ ॥ पांडवंपंचविंशत्यानाराचानांसमार्पयत् ॥ आजघ्नेबहुभिर्बाणैर्ध्वजमेकेषुणाहनत् ॥ ४० ॥ सारथिंचास्य[illegible]प्रेषयामास

[illegible] ॥ छित्वा[illegible]कार्मुकंतूर्णंपांडवस्याशुपत्रिणा ॥ ४१ ॥ ततोमुहूर्त्ताद्राजेंद्रनातिकृच्छ्राद्धसन्निव ॥ विरथंभीमकर्माणंभीमंकर्णश्चकारह ॥ ४२ ॥ विरथोभ

[illegible]निलोपमः ॥ गदांगृह्यमहाबाहुरपतत्स्यंदनोत्तमात् ॥ ४३ ॥ अवप्लुत्य[illegible]सैन्यंविशांपते ॥ व्यधमद्गदयाभीमः[illegible] ॥ ४४ ॥

[illegible] ॥ व्यधमत्सहसाभीमः[illegible]परंतपः ॥ ४५ ॥ दंतवेष्टु[illegible] ॥ [illegible]

[illegible] ॥ ४६ ॥ [illegible]पुनः ॥ [illegible]वद्दिवाकरं ॥ ४७ ॥

[illegible]

तांन्ससप्तशतान्नागान्सारोहायुधकेतनान् ॥ भूमिष्ठोगदयाजघ्नेवज्रेणेंद्रइवाचलान् ॥ ४८ ॥ ततःसुबलपुत्रस्यनागानतिबलान्पुनः ॥ पोथयामासकौंतेयोद्वि
पंचाशदरिंदमः ॥ ४९ ॥ तथारथशतंसाग्रंपत्तींश्चशतशोपरान् ॥ न्यहनत्पांडवोयुद्धेतापयंस्तववाहिनीं ॥ ५० ॥ प्रताप्यमानंसूर्येणभीमेनचमहात्मना ॥ तव
सैन्यंसंचुकोचचर्माग्नावाहितंयथा ॥ ५१ ॥ तेभीमभयसंत्रस्तास्तावकाभरतर्षभ ॥ विहायसमरेभीमंदुद्रुवुर्वैदिशोदश ॥ ५२ ॥ रथाःपंचशताश्चान्येह्रादिन
श्चर्मवर्मिणः ॥ भीममभ्यद्रवन्घ्नंतःशरपूगैःसमंततः ॥ ५३ ॥ तान्सपंचशतान्वीरान्सपताकध्वजायुधान् ॥ पोथयामासगदयाभीमोविष्णुरिवासुरान् ॥ ५४ ॥
ततःशकुनिनिर्दिष्टाःसादिनःशूरसंमताः ॥ त्रिसाहस्राभ्ययुर्भीमंशक्त्यृष्टिप्रासपाणयः ॥ ५५ ॥ प्रत्युद्गम्यजवेनाशुसाश्वारोहांस्तदारिहा ॥ विविधान्विचरन्मा
र्गान्गदयासमपोथयत् ॥ ५६ ॥ तेषामासीन्महाञ्छब्दस्तडितानांचसर्वशः ॥ अश्मभिर्विध्यमानानांनगानामिवभारत ॥ ५७ ॥ एवंसुबलपुत्रस्यत्रिसाह
स्रान्हयोत्तमान् ॥ हत्वान्यंरथमास्थायक्रुद्धोराधेयमभ्ययात् ॥ ५८ ॥ कर्णोपिसमरेराजन्धर्मपुत्रमरिंदमं ॥ सशरैश्छादयामाससारथिंचाप्यपातयत् ॥ ५९ ॥
ततःसप्रद्रुतःसंख्येरथंदृष्ट्वामहारथः ॥ अन्वधावत्किरन्बाणैःकंकपत्रैरजिह्मगैः ॥ ६० ॥ राजानमभिधावंतंशरैरावृत्यरोदसी ॥ क्रुद्धःप्रच्छादयामासशरजा
लेनमारुतिः ॥ ६१ ॥ सन्निवृत्तस्ततस्तूर्णंराधेयःशत्रुकर्शनः ॥ भीमंप्रच्छादयामाससमंतान्निशितैःशरैः ॥ ६२ ॥ भीमसेनरथव्यग्रंकर्णंभारतसात्यकिः ॥ अ
भ्यर्दयदमेयात्मापार्ष्णिग्रहणकारणात् ॥ ६३ ॥ अभ्यवर्ततकर्णस्तमर्दितोपिशरैर्भृशं ॥ तावन्योन्यंसमासाद्यवृषभौसर्वधन्विनां ॥ ६४ ॥ विसृजंतौशरान्दीप्ता
न्विभ्राजेतांमनस्विनौ ॥ ताभ्यांवियतिराजेंद्रविततंभीमदर्शनं ॥ ६५ ॥ क्रौंचपृष्ठारुणंरौद्रंबाणजालंव्यदृश्यत ॥ नैवसूर्यप्रभाराजन्नदिशःप्रदिशस्तथा ॥ ६६ ॥
प्राज्ञासिष्मवयंतेवाशरैर्मुक्तैःसहस्रशः ॥ मध्याह्नेतपतोराजन्भास्करस्यमहाप्रभाः ॥ ६७ ॥ हृताःसर्वाःशरौघैस्तैःकर्णपांडवयोस्तदा ॥ सौबलंकृतवर्माणंद्रौ
णिमाधिरथिंकृपं ॥ ६८ ॥ संसक्तान्पांडवैर्दृष्ट्वानिवृत्ताःकुरवःपुनः ॥ तेषामापततांशब्दस्तीव्रआसीद्विशांपते ॥ ६९ ॥ उद्धृतानांयथावृष्ट्यासागराणांभयावहः ॥
तेसेनेभृशसंसक्तेदृष्ट्वान्योन्यंमहाहवे ॥ ७० ॥ हर्षेणमहतायुक्तेपरिगृह्यपरस्परं ॥ ततःप्रववृतेयुद्धंमध्यंप्राप्तेदिवाकरे ॥ ७१ ॥ तादृशंनकदाचिद्धिदृष्टपूर्वंनचश्रु
तं ॥ बलौघस्तुसमासाद्यबलौघंसहसारणे ॥ ७२ ॥ उपासर्पतवेगेनवार्योघइवसागरं ॥ आसीन्निनादःसुमहान्बाणौघानांपरस्परं ॥ ७३ ॥

गर्जतांसागरौघाणांयथास्यान्निःस्वनोमहान्॥ तेतुसेनेसमासाद्यवेगवत्यौपरस्परं ॥ ७४ ॥ एकीभावमनुप्राप्तेनद्याविवसमागमे ॥ ततःप्रववृतेयुद्धंघोररूपं विशांपते॥ ७५॥ कुरूणांपांडवानांचलिप्सतांसुमहद्यशः॥ शूराणांगर्जतांतत्रत्व्यविच्छेदकृतागिरः ॥ ७६ ॥ श्रूयंतेविविधाराजन्नामान्युद्दिश्यभारत ॥ यस्य यद्धिरणेव्यंगंपितृतोमातृतोपिवा॥ ७७॥ कर्मतःशीलतोवापिसतच्छ्रावयतेयुधि ॥ तान्दृष्ट्वासमरेशूरांस्तर्जमानान्परस्परं ॥ ७८॥ अभवन्मेमतीराजन्नैषा मस्तीतिजीवितं॥ तेषांदृष्ट्वातुक्रुद्धानांवपूंष्यमिततेजसां ॥ ७९॥ अभवन्मेभयंतीव्रंकथमेतद्भविष्यति ॥ ततस्तेपांडवाराजन्कौरवाश्चमहारथाः ॥ ८० ॥ तत क्षुःसायकैस्तीक्ष्णैर्निघ्नंतोहिपरस्परं॥८१॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेएकपंचाशत्तमोऽध्यायः॥५१॥ ॥५॥ ॥५॥ संजयउवाच क्षत्रियास्तेमहाराजपरस्परवधैषिणः॥ अन्योन्यंसमरेजघ्नुःकृतवैराःपरस्परं ॥ १॥ रथौघाश्चहयौघाश्चनरौघाश्चसमंततः॥ गजौघाश्चमहाराजसंसक्ताश्चपर स्परं॥ २॥ गदानांपरिघाणांचकणपानांचक्षिप्यतां॥प्रासानांभिंदिपालानांभुशुंडीनांचसर्वशः॥ ३॥ संपातंचानुपश्यामसंग्रामेभृशदारुणे॥ शलभाइवसं पेतुःशरवृष्ट्यःसमंततः॥ ४॥ नागान्नागाःसमासाद्यव्यधमंतपरस्परं॥ हयाहयांश्चसमरेरथिनोरथिनस्तथा॥५॥ पत्तयःपत्तिसंघांश्चहयसंघांश्चपत्तयः ॥ प त्तयोरथमातंगान्रथाहस्त्यश्चमेवच॥ ६॥ नागाश्चसमरेत्र्यंगंममृदुःशीघ्रगान्नृप ॥ वध्यतांतत्रशूराणांक्रोशतांचपरस्परं ॥ ७॥ घोरमायोधनंजज्ञेपशूनांवै शसंयथा॥ रुधिरेणसमास्तीर्णाभातिभारतमेदिनी॥ ८॥ शक्रगोपगणाकीर्णाप्रावृषीवयथाधरा॥ यथावावाससीशुक्लेमहारंजनरंजिते॥ ९॥बिभृयाद्युवती श्यामातद्वदासीद्वसुंधरा॥ मांसशोणितचित्रेवशातकुंभमयीवच॥ १०॥ भिन्नानांचोत्तमांगानांबाहूनांचोरुभिःसह॥ कुंडलानांप्रवृद्धानांभूषणानांचभा रत॥ ११॥ निष्काणामथशूराणांशरीराणांचधन्विनां॥ चर्मणांसपताकानांसंघास्तत्रापतन्भुवि॥ १२॥ गजागजान्समासाद्यविषाणैरार्दयन्नृप॥विषाणा भिहतास्तत्रभ्राजंतेद्विरदास्तथा॥ १३॥ रुधिरेणावसिक्तांगागैरिकप्रस्रवाइव॥ यथाभ्राजंतिस्यंदंतःपर्वताधातुमंडिताः॥ १४॥तोमरान्सादिभिर्मुक्तान्प्रती पानास्थितान्बहून्॥ हस्तैर्विचेरुस्तेनागावभंजुश्चापरेतथा॥ १५॥नाराचैश्छिन्नवर्माणोभ्राजंतिस्मगजोत्तमाः॥ हिमागमेयथाराजन्व्यभ्राइवमहीधराः॥ ॥१६॥शरैःकनकपुंखैश्चचित्रारेजुर्गजोत्तमाः॥ उल्काभिःसंप्रदीप्ताग्राःपर्वताइवभारत॥ १७॥ ॥४॥५॥६॥ ७॥८॥ ९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥

नगनिभोपमाः नगेषुनितरांभांतितेनगनिभाःपर्वतोत्तमास्तेउपमायेषामित्यर्थः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ धनुःशरगदाएवभा

केचिदभ्याहतानागैर्नागानगनिभोपमाः ॥ विनेशुःसमरेतस्मिन्पक्षवंतइवाद्रयः ॥ १८ ॥ अपरेप्राद्रवन्नागाःशल्यार्त्ताव्रणपीडिताः ॥ प्रतिमानैश्चकुंभैश्चपे
तुरुर्व्यांमहाहवे ॥ १९ ॥ विनेदुःसिंहवच्चान्येनदंतोभैरवान्रवान् ॥ बभ्रमुर्बहवोराजंश्चुकुशुश्चापरेगजाः ॥ २० ॥ हयाश्चनिहतावाणैर्हेमभांडविभूषिताः ॥ नि
षेदुश्चैवमम्लुश्चबभ्रमुश्चदिशोदश ॥ २१ ॥ अपरेकृष्यमाणाश्चविचेष्टंतोमहीतले ॥ भावान्बहुविधांश्चकुस्ताडिताःशरतोमरैः ॥ २२ ॥ नरास्तुनिहताभूमौकू
जंतस्तत्रमारिष ॥ दृष्ट्वाचबांधवानन्येपितॄनन्येपितामहान् ॥ २३ ॥ धावमानान्परांश्चान्येदृष्ट्वान्येतत्रभारत ॥ गोत्रनामानिख्यातानिशशंसुरितरेतरं ॥ २४ ॥
तेषांछिन्नामहाराजभुजाःकनकभूषणाः ॥ उद्वेष्टंतेविचेष्टंतेपतंतेचोत्पतंतिच ॥ २५ ॥ निपतंतितथैवान्येस्फुरंतिचसहस्रशः ॥ वेगांश्चान्येरणेचक्रुःपंचास्याइ
वपन्नगाः ॥ २६ ॥ तेभुजाभोगिभोगाभाश्चंदनाक्ताविशांपते ॥ लोहितार्द्राभृशंरेजुस्तपनीयध्वजाइव ॥ २७ ॥ वर्तमानेतथाघोरेसंकुलेसर्वतोदिशं ॥ अवि
ज्ञाताःस्मयुध्यंतेविनिघ्नंतःपरस्परं ॥ २८ ॥ भौमेनरजसाकीर्णेशस्त्रसंपातसंकुले ॥ नैवस्वेनपरेराजन्व्यज्ञायंततमोवृताः ॥ २९ ॥ तथातदभवद्युद्धंघोररूपंभ
यानकं ॥ लोहितोदामहानद्यःप्रसस्रुस्तत्रचासकृत् ॥ ३० ॥ शीर्षपाषाणसंछन्नाःकेशशैवलशाद्वलाः ॥ अस्थिमीनसमाकीर्णाधनुःशरगदोडुपाः ॥ ३१ ॥
मांसशोणितपंकिन्योघोररूपाःसुदारुणाः ॥ नदीःप्रवर्तयामासुःशोणितौघविवर्धिनीः ॥ ३२ ॥ भीरुवित्रासकारिण्यःशूराणांहर्षवर्धनाः ॥ तानद्योघोररूपास्तु
नयंत्योयमसादनं ॥ ३३ ॥ अवगाढान्मज्जयंत्यःक्षत्रस्याजनयन्भयं ॥ क्रव्यादानांनरव्याघ्रनर्दतांतत्रतत्रह ॥ ३४ ॥ घोरमायोधनंजज्ञेप्रेतराजपुरोपमं ॥
उत्थितान्यगणेयानिकबंधानिसमंततः ॥ ३५ ॥ नृत्यंतिवैभूतगणाःसुतृप्तामांसशोणितैः ॥ पीत्वाचशोणितंतत्रवसांपीत्वाचभारत ॥ ३६ ॥ मेदोमज्जावसा
मत्तास्तृप्तामांसस्यचैवह ॥ धावमानाःस्मदृश्यंतेकाकगृध्रबकास्तथा ॥ ३७ ॥ शूरास्तुसमरेराजन्भयंत्यक्त्वासुदुस्त्यजं ॥ योधव्रतसमाख्याताश्चक्रुःकर्माण्यभी
तवत् ॥ ३८ ॥ शरशक्तिसमाकीर्णेक्रव्यादगणसंकुले ॥ व्यचरंतरणेशूराःख्यापयंतःस्वपौरुषं ॥ ३९ ॥ अन्योन्यंश्रावयंतिस्मनामगोत्राणिभारत ॥ पितृनामा
निचरणेगोत्रनामानिवाविभो ॥ ४० ॥ श्रावयाणाश्चबहवस्तत्रयोधाविशांपते ॥ अन्योन्यमवमृद्नंतःशक्तितोमरपट्टिशैः ॥ ४१ ॥ स्वरत्वाद्दुडुपचक्षत्रसदृशीःपांतीत्युडुपाः

धनुरादिवडुडुपःशोभायासांताइतिवा उडुपस्तुप्लवेचंद्रेप्रतापेस्वेदतेजसोः शोभायांचेतिविश्वः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ अगणेयानिगणयितुमशक्यानि ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

वर्त्तमानेतथायुद्धेघोररूपेसुदारुणे ॥ व्यशीदत्कौरवीसेनाभिन्नानौरिवसागरे॥४२॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेद्विपंचाशत्तमोऽध्यायः॥५२॥
संजयउवाच वर्त्तमानेतथायुद्धेक्षत्रियाणांनिमज्जने॥ गांडीवस्यमहाघोषःश्रूयतेयुधिमारिष॥१॥ संशप्तकानांकदनमकरोद्यत्रपांडवः॥ कोसलानांत
थाराजन्नारायणबलस्यच॥ २॥ संशप्तकास्तुसमरेशरवृष्टीःसमंततः॥ अपातयन्पार्थमूर्ध्निजयगृद्धाःप्रमन्यवः॥३॥ तावृष्टीःसहसाराजंस्तरसाधारयन्प्रभुः॥
व्यगाहतरणेपार्थोविनिघ्नन्रथिनांवरान्॥ ४॥ विगाह्यतद्रथानीकंकंकपत्रैःशिलाशितैः॥ आससादततःपार्थःसुशर्माणंवरायुधं॥ ५॥ सतस्यशरवर्षाणि
ववर्षरथिनांवरः॥ तथासंशप्तकाश्चैवपार्थंबाणैःसमार्पयन॥ ६॥ सुशर्मातुततःपार्थंविध्वादशभिराशुगैः॥ जनार्दनंत्रिभिर्बाणैरहनद्दक्षिणेभुजे॥ ७॥ ततो
परेणभल्लेनकेतुंविव्याधमारिष॥ सवानरवरोराजन्विश्वकर्मकृतोमहान्॥८॥ ननादसुमहानादंभीषयाणोजगर्जच॥ कपेस्तुनिनदंश्रुत्वासंत्रस्तानववाहिनी
॥९॥ भयंविपुलमाधायनिश्चेष्टासमपद्यत॥ ततःसाशुशुभेसेनानिश्चेष्टावस्थितानृप॥ १०॥ नानापुष्पसमाकीर्णंयथाचैत्ररथंवनं॥ प्रतिलभ्यततःसंज्ञांयो
धास्तेकुरुसत्तम॥ ११॥ अर्जुनंसिषिचुर्बाणैःपर्वतंजलदाइव॥ परिवव्रुस्ततःसर्वेपांडवस्यमहारथं॥ १२॥ निगृह्यतंप्रचुक्रुशुर्वध्यमानाःशितैःशरैः॥ तेहया
न्रथचक्रेचरथेषांचापिमारिष॥ १३॥ निग्रहीतुमुपाक्रामन्क्रोधाविष्टाःसमंततः॥ निगृह्यतंरथंतस्ययोधास्तेतुसहस्रशः॥ १४॥ निगृह्यबलवत्सर्वेसिंहना
दमथानदन्॥ अपरेजगृहुश्चैवकेशवस्यमहाभुजौ॥ १५॥ पार्थमन्येमहाराजरथस्थंजगृहुर्मुदा॥ केशवस्तुततोबाहूविधुन्वन्रणमूर्धनि॥ १६॥ पातयामास
तान्सर्वान्दुष्टहस्तीवहस्तिपान्॥ ततःक्रुद्धोरणेपार्थःसंवृतस्तैर्महारथैः॥ १७॥ निगृहीतंरथंदृष्ट्वाकेशवंचाप्यभिद्रुतं॥ रथारूढांस्तुसुबहून्पदातींश्चाप्यपातयत्
॥ १८॥ आसन्नांश्चततोयोधान्शरैरासन्नयोधिभिः॥ छादयामाससमरेकेशवंचेदमब्रवीत्॥ १९॥ पश्यकृष्णमहाबाहोसंशप्तकगणान्बहून्॥ कुर्वाणान्दारु
णंकर्मवध्यमानान्सहस्रशः॥ २०॥ रथबंधमिमंघोरंपृथिव्यांनास्तिकश्चन॥ यःसहेतपुमाँल्लोकेमदन्योयदुपुंगव॥ २१॥ इत्येवमुक्त्वाबीभत्सुर्देवदत्तमथाध
मत्॥ पांचजन्यंचकृष्णोपिपूरयन्निवरोदसी॥ २२॥ तंतुशंखस्वनंश्रुत्वासंशप्तकवरूथिनी॥ संचचालमहाराजवित्रस्ताचाद्रवद्भृशं॥ २३॥

पादबंधंततश्चक्रेपांडवःपरवीरहा॥ नागमस्त्रंमहाराजसंप्रकीर्यमुहुर्मुहुः॥ २४॥ तेबद्धाःपादबंधेनपांडवेनमहात्मना॥ निश्चेष्टाश्चाभवन्राजन्नश्मसारमया इव॥ २५॥ निश्चेष्टांस्तुततोयोधानवधीत्पांडुनंदनः॥ यथेंद्रःसमरेदैत्यांस्तारकस्यवधेपुरा॥ २६॥ तेवध्यमानाःसमरेमुमुचुस्तंरथोत्तमं ॥ आयुधानिचसर्वाणिविस्रष्टुमुपचक्रमुः॥ २७॥ तेबद्धाःपादबंधेननशेकुश्चेष्टितुंनृप॥ ततस्तानवधीत्पार्थःशरैःसन्नतपर्वभिः॥ २८॥ सर्वेयोधाहिसमरेभुजगैर्वेष्टिताभवन्॥ यानुद्दिश्यरणेपार्थःपादबंधंचकारह॥ २९॥ ततःसुशर्माराजेंद्रगृहीतांवीक्ष्यवाहिनीं॥ सौपर्णमस्त्रंत्वरितःप्रादुश्चक्रेमहारथः॥३०॥ ततःसुपर्णाःसंपेतुर्भक्षयंतोभुजंगमान्॥ तेवैविदुद्रुवुर्नागादृष्ट्वातान्खचरान्नृप॥ ३१॥ बभौबलंतद्विमुक्तंपादबंधाद्विशांपते॥ मेघवृंदाद्यथामुक्तोभास्करस्तापयन्प्रजाः॥ ३२॥ विप्रमुक्तास्तुतेयोधाःफाल्गुनस्यरथंप्रति॥ ससृजुर्बाणसंघांश्चशस्त्रसंघांश्चमारिष॥ ३३॥ विविधानिचशस्त्राणिप्रत्यविध्यंतसर्वशः॥ तांमहास्त्रमयींवृष्टिंसंछिद्यशरवृष्टिभिः॥ ३४॥ न्यवधींच्चततोयोधान्वासविःपरवीरहा॥ सुशर्मातुततोराजन्बाणेनानतपर्वणा॥ ३५॥ अर्जुनंहृदयेविध्वाविव्याधान्यैस्त्रिभिःशरैः॥ सगाढविद्धोव्यथितोरथोपस्थउपाविशत्॥ ३६॥ ततउच्चुकुशुःसर्वेहतःपार्थइतिस्मह॥ ततःशंखनिनादाश्चभेरीशब्दाश्चपुष्कलाः॥३७॥ नानावादित्रनिनदाःसिंहनादाश्चजज्ञिरे॥ प्रतिलभ्यततःसंज्ञांश्वेताश्वःकृष्णसारथिः॥ ३८॥ ऐंद्रमस्त्रममेयात्माप्रादुश्चक्रेत्वरान्वितः॥ ततोबाणसहस्राणिसमुत्पन्नानिमारिष॥ ॥ ३९॥ सर्वदिक्षुव्यदृश्यंतनिघ्नंतितववाहिनीं॥ हयान्रथांश्चसमरेशस्त्रैःशतसहस्रशः॥ ४०॥ वध्यमानेततःसैन्येभयंसुमहदाविशत्॥ संशप्तकगणानांचगोपालानांचभारत॥ ४१॥ नहितत्रपुमान्कश्चिद्योर्जुनंप्रत्यविध्यत॥ पश्यतांतत्रवीराणामहन्यतबलंतव॥ ४२॥ हन्यमानमपश्यंश्चनिश्चेष्टास्स्मपराक्रमे॥ अयुतंतत्रयोधानांहत्वापांडुसुतोरणे॥ ४३॥ व्यभ्राजतमहाराजविधूमोग्निरिवज्वलन्॥ चतुर्दशसहस्राणियानिशिष्टानिभारत॥ ४४॥ रथानामयुतंचैवत्रिसाहस्राश्चदंतिनः॥ ततःसंशप्तकाभूयःपरिवव्रुर्धनंजयं॥ ४५॥ मर्तव्यमितिनिश्चित्यजयंवाप्यनिवर्तनं॥ तत्रयुद्धंमहच्चासीत्तावकानांविशांपते॥ शूरेणबलिनासार्धंपांडवेनकिरीटिना॥४६ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेत्रिपंचाशत्तमोऽध्यायः॥ ५३॥ ॥ ७॥ ॥ ७॥

भावदीपेत्रिपंचाशत्तमोऽध्यायः॥ ५३॥ ॥ ५॥ ॥ ७॥ ॥ ५॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

संजयउवाच कृतवर्माकृपोद्रौणिःसूतपुत्रश्चमारिष ॥ उलूकःसौबलश्चैवराजाचसहसोदरैः ॥ १ ॥ सीदमानांचमूंदृष्ट्वापांडुपुत्रभयार्दितां ॥ समुज्जन्हुःस्मवे
गेनभिन्नांनावमिवार्णवे ॥ २ ॥ ततोयुद्धमतीवासीन्मुहूर्त्तमिवभारत ॥ भीरूणांत्रासजननंशूराणांहर्षवर्धनं ॥ ३ ॥ कृपेणशरवर्षाणिप्रतिमुक्तानिसंयुगे ॥ सृं
जयांश्छादयामासुःशलभानांव्रजाइव ॥ ४ ॥ शिखंडीचततःक्रुद्धोगौतमंत्वरितोययौ ॥ ववर्षशरवर्षाणिसमंताद्द्विजपुंगवं ॥ ५ ॥ कृपस्तुशरवर्षंतद्विनिहत्यम
हास्त्रवित् ॥ शिखंडिनंरणेक्रुद्धोविव्याधदशभिःशरैः ॥ ६ ॥ ततःशिखंडीकुपितःशरैःसप्तभिराहवे ॥ कृपंविव्याधकुपितंकंकपत्रैरजिह्मगैः ॥ ७ ॥ ततःकृपःशरै
स्तीक्ष्णैःसोतिविद्धोमहारथः ॥ व्यश्वसूतरथंचक्रेशिखंडिनमथोद्विजः ॥ ८ ॥ हताश्वात्तुततोयानादवप्लुत्यमहारथः ॥ खड्गंचर्मतथागृह्यसत्वरंब्राह्मणंययौ ॥ ९ ॥
तमापतंतंसहसाशरैःसन्नतपर्वभिः ॥ छादयामाससमरेतदद्भुतमिवाभवत ॥ १० ॥ तत्राद्भुतमपश्यामशिलानांप्लवनंयथा ॥ निश्चेष्टस्तद्रणेराजंछिखंडीस
मतिष्ठत ॥ ११ ॥ कृपेणच्छादितंदृष्ट्वानृपोत्तमशिखंडिनं ॥ प्रत्युद्ययौकृपंतूर्णंधृष्टद्युम्नोमहारथः ॥ १२ ॥ धृष्टद्युम्नंततोयांतंशारद्वतरथंप्रति ॥ प्रतिजग्राहवेगेन
कृतवर्मामहारथः ॥ १३ ॥ युधिष्ठिरमथायांतंशारद्वतरथंप्रति ॥ सपुत्रंसहसैन्यंचद्रोणपुत्रोन्यवारयत् ॥ १४ ॥ नकुलंसहदेवंचत्वरमाणौमहारथौ ॥ प्रतिजग्रा
हसुतपुत्रःशरवर्षेणवारयन् ॥ १५ ॥ भीमसेनंकरूषांश्चकेकयान्सहसृंजयैः ॥ कर्णोवैकर्तनोयुद्धेवारयामासभारत ॥ १६ ॥ शिखंडिनस्ततोबाणान्कृपःशारद्वतो
युधि ॥ प्राहिणोत्त्वरयायुक्तोदिधक्षुरिवमारिष ॥ १७ ॥ तान्छरान्प्रेषितांस्तेनसमंतात्स्वर्णभूषितान् ॥ चिच्छेदखड्गमाविध्यभ्रामयंश्चपुनःपुनः ॥ १८ ॥ शत
चंद्रंचतच्चर्मगौतमस्तस्यभारत ॥ व्यधमत्सायकैस्तूर्णंततउच्चुक्रुशुर्जनाः ॥ १९ ॥ सविचर्मामहाराजखड्गपाणिरुपाद्रवत् ॥ कृपस्यवशमापन्नोमृत्योरास्यमि
वातुरः ॥ २० ॥ शारद्वतशरैर्ग्रस्तंक्लिश्यमानंमहाबलः ॥ चित्रकेतुसुतोराजन्सुकेतुस्त्वरितोययौ ॥ २१ ॥ विकिरन्ब्राह्मणंयुद्धेबहुभिर्निशितैःशरैः ॥ अभ्यापत
दमेयात्मागौतमस्यरथंप्रति ॥ २२ ॥ दृष्ट्वाचयुक्तंतंयुद्धेब्राह्मणंचरितव्रतं ॥ अपयातस्ततस्तूर्णंशिखंडीराजसत्तम ॥ २३ ॥ सुकेतुस्तुततोराजन्गौतमंनवभिः
शरैः ॥ विध्वाविव्याधसप्तत्यापुनश्चैनंत्रिभिःशरैः ॥ २४ ॥ अथास्यसशरंचापंपुनश्चिच्छेदमारिष ॥ सारथिंचशरेणास्यभृशंमर्मस्वताडयत् ॥ २५ ॥ गौतमस्तु
ततःक्रुद्धोधनुर्गृह्यनवंदृढं ॥ सुकेतुंत्रिंशताबाणैःसर्वमर्मस्वताडयत् ॥ २६ ॥ सविह्वलितसर्वांगःप्रचचालरथोत्तमे ॥ भूमिकंपेयथावृक्षश्चचालकंपितोभृशं ॥ २७ ॥

चलतस्तस्यकायात्तुशिरोज्वलितकुंडलं ॥ सोष्णीषंसशिरस्त्राणंक्षुरप्रेणव्यपातयत् ॥ २८ ॥ तच्छिरःप्रापतद्भूमौश्येनाहृतमिवामिषं ॥ ततोस्यकायोवसुधांप श्चात्प्रापतदच्युत ॥ २९ ॥ तस्मिन्हतेमहाराजत्रस्तास्तस्यपुरोगमाः ॥ गौतमंसमरेत्यक्त्वादुद्रुवुस्तेदिशोदश ॥ ३० ॥ धृष्टद्युम्नंतुसमरेसंनिवार्यमहारथः ॥ कृत वर्माब्रवीद्धृष्टस्तिष्ठतिष्ठेतिभारत ॥ ३१ ॥ तदभूत्तुमुलंयुद्धंवृष्णिपार्षतयोरणे ॥ आमिषार्थेयथायुद्धंश्येनयोःक्रुद्धयोर्नृप ॥ ३२ ॥ धृष्टद्युम्नस्तुसमरेहार्दिक्यंनव भिःशरैः ॥ आजघानोरसिक्रुद्धःपीडयन्हृदिकात्मजं ॥ ३३ ॥ कृतवर्मातुसमरेपार्षतेनदृढाहतः ॥ पार्षतंसरथंसाश्वंछादयामाससायकैः ॥ ३४ ॥ सरथश्छादि तोराजन्धृष्टद्युम्नोनदृश्यते ॥ मेघैरिवपरिच्छन्नोभास्करोजलधारिभिः ॥ ३५ ॥ विधूयतंबाणगणंशरैःकनकभूषणैः ॥ व्यरोचतरणेराजन्धृष्टद्युम्नःकृतव्रणः ॥ ॥ ३६ ॥ ततस्तुपार्षतःक्रुद्धःशस्त्रवृष्टिंसुदारुणां ॥ कृतवर्माणमासाद्यव्यसृजत्पृतनापतिः ॥ ३७ ॥ तामापतंतींसहसाशस्त्रवृष्टिंसुदारुणां ॥ शरैरनेकसाहस्रैर्हार्दि क्योऽवारयद्युधि ॥ ३८ ॥ दृष्ट्वातुवारितांयुद्धेशस्त्रवृष्टिंदुरासदां ॥ कृतवर्माणमासाद्यवारयामासपार्षतः ॥ ३९ ॥ सारथिंचास्यतरसाप्राहिणोद्यमसादनं ॥ भ ल्लेनशितधारेणसहतःप्रापतद्रथात् ॥ ४० ॥ धृष्टद्युम्नस्तुबलवान्जित्वाशत्रुंमहाबलं ॥ कौरवान्समरेतूर्णंवारयामाससायकैः ॥ ४१ ॥ ततस्तेतावकायोधाधृष्टद्यु म्नमुपाद्रवन् ॥ सिंहनादरवंकृत्वाततोयुद्धमवर्त्तत ॥ ४२ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेचतुष्पंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ ७ ॥ ॥

संजयउवाच द्रौणिर्युधिष्ठिरंदृष्ट्वाशैनेयेनाभिरक्षितं ॥ द्रौपदेयैस्तथाशूरैरभ्यवर्त्ततहृष्टवत् ॥ १ ॥ किरन्निषुगणान्घोरान्स्वर्णपुंखान्शिलाशितान् ॥ दर्शय न्विविधान्मार्गान्शिक्षाश्चलघुहस्तवत् ॥ २ ॥ ततःखंपूरयामासशरैर्दिव्यास्त्रमंत्रितैः ॥ युधिष्ठिरंचसमरेपरिवार्यमहास्त्रवित् ॥ ३ ॥ द्रोणायनिशरच्छन्नंनप्रा ज्ञायतकिंचन ॥ बाणभूतमभूत्सर्वमायोधनशिरोमहत् ॥ ४ ॥ बाणजालंदिविच्छन्नंस्वर्णजालविभूषितं ॥ शुशुभेभरतश्रेष्ठवितानमिवधिष्ठितं ॥ ५ ॥ तेनच्छ न्नंनभोराजन्बाणजालेनभास्वता ॥ अभ्रच्छायेवसंजज्ञेबाणरुद्धेनभस्तले ॥ ६ ॥ तत्राश्चर्यमपश्यामबाणभूतेतथाविधे ॥ नस्मसंपततेभूतंकिंचिदेवांतरिक्ष गं ॥ ७ ॥ सात्यकिर्यतमानस्तुधर्मराजश्चपांडवः ॥ तथेतराणिसैन्यानिनस्मचक्रुःपराक्रमं ॥ ८ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

स्तापवंद्रोणपुत्रस्यदृष्ट्वातत्रमहारथाः ॥ व्यस्मयंतमहाराजनचैनंप्रत्युदीक्षितुं ॥ ९ ॥ शेकुस्तेसर्वराजानस्तपंतमिवभास्करं ॥ वध्यमानेततःसैन्येद्रौपदेयामहा
रथाः ॥ १० ॥ सात्यकिर्धर्मराजश्चपंचालाश्चापिसंगताः ॥ त्यक्त्वामृत्युभयंघोरंद्रौणायनिमुपाद्रवन् ॥ ११ ॥ सात्यकिःसप्तविंशत्याद्रौणिंविध्वाशिलीमुखैः ॥
पुनर्विव्याधनाराचैःसप्तभिःस्वर्णभूषितैः ॥ १२ ॥ युधिष्ठिरस्त्रिसप्तत्याप्रतिविंध्यश्चसप्तभिः ॥ श्रुतकर्मात्रिभिर्बाणैःश्रुतकीर्त्तिश्चसप्तभिः ॥ १३ ॥ सुतसोमस्तु
नवभिःशतानीकश्चसप्तभिः ॥ अन्येचबहवःशूराविव्यधुस्तंसमंततः ॥ १४ ॥ सतुक्रुद्धस्ततोराजन्नाशीविषइवश्वसन् ॥ सात्यकिंपंचविंशत्याप्राविध्यतशिली
मुखैः ॥ १५ ॥ श्रुतकीर्त्तिंचनवभिःसुतसोमंचपंचभिः ॥ अष्टभिःश्रुतकर्माणंप्रतिविंध्यंत्रिभिःशरैः ॥ १६ ॥ शतानीकंचनवभिर्धर्मपुत्रंचपंचभिः ॥ तथेतरां
स्ततःशूरान्द्वाभ्यांद्वाभ्यामताडयत् ॥ १७ ॥ श्रुतकीर्त्तेस्तथाचापंचिच्छेदनिशितैःशरैः ॥ अथान्यद्धनुरादायश्रुतकीर्त्तिर्महारथः ॥ १८ ॥ द्रौणायनिंत्रिभिर्विध्वा
विव्याधान्यैःशितैःशरैः ॥ ततोद्रौणिर्महाराजशरवर्षेणमारिष ॥ १९ ॥ छादयामासतत्सैन्यंसमंताद्भरतर्षभ ॥ ततःपुनरमेयात्माधर्मराजस्यकार्मुकं ॥ २० ॥
द्रौणिश्चिच्छेदविहसन्विव्याधचशरैस्त्रिभिः ॥ ततोधर्मसुतोराजन्प्रगृह्यान्यन्महद्धनुः ॥ २१ ॥ द्रौणिंविव्याधसप्तत्याबाह्वोरुरसिचार्पयत् ॥ सात्यकिस्तुततःक्रुद्धो
द्रौणेःप्रहरतोरणे ॥ २२ ॥ अर्धचंद्रेणतीक्ष्णेनधनुश्छित्वानदद्भृशं ॥ छिन्नधन्वाततोद्रौणिःशक्त्याशक्तिमतांवरः ॥ २३ ॥ सारथिंपातयामासशैनेयस्यरथाद्द्रु
तं ॥ अथान्यद्धनुरादायद्रोणपुत्रःप्रतापवान् ॥ २४ ॥ शैनेयंशरवर्षेणच्छादयामासभारत ॥ तस्याश्वाःप्रद्रुताःसंख्येपतितेरथसारथौ ॥ २५ ॥ तत्रतत्रैवधावं
तःसमदृश्यंतभारत ॥ युधिष्ठिरपुरोगास्तुद्रौणिंशस्त्रभृतांवरं ॥ २६ ॥ अभ्यवर्षंतवेगेनविसृजंतःशिताञ्छरान् ॥ आगच्छमानांस्तान्दृष्ट्वाक्रुद्धरूपान्परंतपः ॥
॥ २७ ॥ प्रहसन्प्रतिजग्राहद्रोणपुत्रोमहारणे ॥ ततःशरशतज्वालःसेनाकक्षंमहारथः ॥ २८ ॥ द्रौणिर्ददाहसमरेकक्षमग्निर्यथावने ॥ तद्बलंपांडुपुत्रस्यद्रोणपुत्र
प्रतापितं ॥ २९ ॥ चुक्षुभेभरतश्रेष्ठतिमिनेवनदीमुखं ॥ दृष्ट्वाचैवमहाराजद्रोणपुत्रपराक्रमं ॥ ३० ॥ निहतान्मेनिरेसर्वान्पांडून्द्रोणसुतेनवै ॥ युधिष्ठिरस्तुत्वरि
तोद्रोणशिष्योमहारथः ॥ ३१ ॥ अब्रवीद्द्रोणपुत्रायरोषामर्षसमन्वितः ॥ नैवनामतवप्रीतिर्नैवनामकृतज्ञता ॥ ३२ ॥ यतस्त्वंपुरुषव्याघ्रमामेवाद्यजिघांससि ॥
ब्राह्मणेनतपःकार्यंदानमध्ययनंतथा ॥ ३३ ॥ क्षत्रियेणधनुर्नाम्यंसभवान्ब्राह्मणब्रुवः ॥ मिषतस्तेमहाबाहोयुधिजेष्यामिकौरवान् ॥ ३४ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ५ ॥ ॥ ५ ॥ भिमसेनमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

कुरुष्वसमरेकर्मब्रह्मबंधुरसिध्रुवं ॥ एवमुक्तोमहाराजद्रोणपुत्रःस्मयन्निव ॥ ३५ ॥ युक्तंतत्त्वंचसंचिंत्यनोत्तरंकिंचिदब्रवीत् ॥ अनुक्त्वाचततःकिंचिच्छरवर्षेणपांडवं ॥ ३६ ॥ छादयामाससमरेक्रुद्धोंतकइवप्रजाः ॥ सच्छाद्यमानस्तुतदाद्रोणपुत्रेणमारिष ॥ ३७ ॥ पार्थोऽपयातःशीघ्रंवैविहायमहतींचमूं ॥ अपयातेततस्तस्मिन्धर्मपुत्रेयुधिष्ठिरे ॥ ३८ ॥ द्रोणपुत्रस्ततोराजन्प्रत्यगात्समहामनाः ॥ ततोयुधिष्ठिरोराजंस्त्यक्त्वाद्रौणिंमहाहवे ॥ प्रययौतावकंसैन्यंयुक्तःक्रूरायकर्मणे ॥ ३९ ॥ इतिश्रीमहाभारतेकर्णपर्वणिपार्थापयानेपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ५ ॥ संजयउवाच भीमसेनंचपांचाल्यंचेदिकेकयसंवृतं ॥ वैकर्त्तनःस्वयंरुध्वावारयामाससायकैः ॥ १ ॥ ततस्तुचेदिकारूषान्सृंजयांश्चमहारथान् ॥ कर्णोजघानसमरेभीमसेनस्यपश्यतः ॥ २ ॥ भीमसेनस्ततःकर्णंविहायरथसत्तमं ॥ प्रययौकौरवंसैन्यंकक्षमग्निरिवज्वलन् ॥ ३ ॥ सूतपुत्रोपिसमरेपंचालान्केकयांस्तथा ॥ सृंजयांश्चमहेष्वासान्निजघानसहस्रशः ॥ ४ ॥ संशप्तकेषुपार्थश्चकौरवेषुवृकोदरः ॥ पंचालेषुतथाकर्णःक्षयंचक्रुर्महारथाः ॥ ५ ॥ तेक्षत्रियादह्यमानास्त्रिभिस्तैःपावकोपमैः ॥ जग्मुर्विनाशंसमरेराजन्दुर्मंत्रितेतव ॥ ६ ॥ ततोदुर्योधनःक्रुद्धोनकुलंनवभिःशरैः ॥ विव्याधभरतश्रेष्ठचतुरश्चास्यवाजिनः ॥ ७ ॥ ततःपुनरमेयात्मातवपुत्रोजनाधिप ॥ क्षुरेणसहदेवस्यध्वजंचिच्छेदकांचनं ॥ ८ ॥ नकुलस्तुततःक्रुद्धस्तवपुत्रंचसप्तभिः ॥ जघानसमरेराजन्सहदेवश्चपंचभिः ॥ ९ ॥ तावुभौभरतश्रेष्ठौज्येष्ठौसर्वधनुष्मतां ॥ विव्याधोरसिसंक्रुद्धःपंचभिःपंचभिःशरैः ॥ १० ॥ ततोपराभ्यांभल्लाभ्यांधनुषीसमकृंतत ॥ यमयोःसहसाराजन्विव्याधचत्रिसप्तभिः ॥ ११ ॥ तावन्येधनुषीश्रेष्ठेशक्रचापनिभेशुभे ॥ प्रगृह्यरेजतुःशूरौदेवपुत्रसमौयुधि ॥ १२ ॥ ततस्तौरभसौयुद्धेभ्रातरौभ्रातरंयुधि ॥ शरैर्ववृषतुर्घोरैर्महामेघौयथाचलं ॥ १३ ॥ ततःक्रुद्धोमहाराजतवपुत्रोमहारथः ॥ पांडुपुत्रौमहेष्वासौवारयामासपत्रिभिः ॥ १४ ॥ धनुर्मंडलमेवास्यदृश्यतेयुधिभारत ॥ सायकाश्चैवदृश्यंतेनिश्चरंतःसमंततः ॥ १५ ॥ आच्छादयन्दिशःसर्वाःसूर्यस्येवांशवोयथा ॥ बाणभूतेततस्तस्मिन्संछन्नेचनभस्तले ॥ १६ ॥ यमाभ्यांददृशेरूपंकालांतकयमोपमं ॥ पराक्रमंतुतंदृष्ट्वातवसूनोर्महारथाः ॥ १७ ॥ मृत्योरुपांतिकंप्राप्तौमाद्रीपुत्रौस्ममेनिरे ॥ ततःसेनापतीराजन्पांडवस्यमहारथः ॥ १८ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

॥ १९॥ २०॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥२८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३॥ ४४॥

पार्षतःप्रययौतत्रयत्रराजासुयोधनः॥ माद्रीपुत्रौततःशूरौव्यतिक्रम्यमहारथौ॥ १९॥ धृष्टद्युम्नस्तवसुतंवारयामाससायकैः॥ तमविध्यदमेयात्मातवपुत्रोत्य
मर्षणः॥ २०॥ पांचाल्यंपंचविंशत्याप्रहस्यपुरुषर्षभः॥ ततःपुनरमेयात्मातवपुत्रोत्यमर्षणः॥ २१॥ विध्वाननादपांचाल्यंषष्ट्यापंचभिरेवच॥ तथास्यसशरं
चापंहस्तावापंचमारिष॥ २२॥ क्षुरप्रेणसुतीक्ष्णेनराजाचिच्छेदसंयुगे॥ तदपास्यधनुश्छिन्नंपांचाल्यःशत्रुकर्शनः॥ २३॥ अन्यदादत्तवेगेनधनुर्भारसहंन
वं॥ प्रज्वलन्निववेगेनसंरंभाद्रुधिरेक्षणः॥ २४॥ अशोभतमहेष्वासोधृष्टद्युम्नःकृतव्रणः॥ सपंचदशनाराचान्श्वसतःपन्नगानिव॥ २५॥ जिघांसुर्भरतश्रेष्ठं
धृष्टद्युम्नोव्यपासृजत्॥ तेवर्महेमविकृतंभित्वाराज्ञःशिलाशिताः॥ २६॥ विविशुर्वसुधांवेगात्कंकबर्हिणवाससः॥ सोतिविद्धोमहाराजपुत्रस्तेतिव्यराजत॥
॥ २७॥ वसंतकालेसुमहान्प्रफुल्लइवकिंशुकः॥ सच्छिन्नवर्मानाराचप्रहारैर्जर्जरीकृतः॥ २८॥ धृष्टद्युम्नस्यभल्लेनक्रुद्धश्चिच्छेदकार्मुकं॥ अथैनंछिन्नधन्वा
नंत्वरमाणोमहीपतिः॥ २९॥ सायकैर्दशभीराजन्भ्रुवोर्मध्येसमार्पयत्॥ तस्यतेऽशोभयन्वक्त्रंकर्मारपरिमार्जिताः॥ ३०॥ प्रफुल्लंपंकजंयद्वद्भ्रमरामधुलिप्स
वः॥ तदपास्यधनुश्छिन्नंधृष्टद्युम्नोमहामनाः॥ ३१॥ अन्यदादत्तवेगेनधनुर्भल्लांश्चषोडश॥ ततोदुर्योधनस्याश्वान्हत्वासूतंचपंचभिः॥ ३२॥ धनुश्चिच्छेदभ
ल्लेनजातरूपपरिष्कृतं॥ रथंसोपस्करंछत्रंशक्तिंखड्गंगदांध्वजं॥ ३३॥ भल्लैश्चिच्छेददशभिःपुत्रस्यतवपार्षतः॥ तपनीयांगदंचित्रंनागंमणिमयंशुभं॥ ३४॥
ध्वजंकुरुपतेश्छिन्नंददृशुःसर्वपार्थिवाः॥ दुर्योधनंतुविरथंछिन्नवर्मायुधंरणे॥ ३५॥ भ्रातरःपर्यरक्षंतसोदराभरतर्षभ॥ तमारोप्यरथेराजन्दंडधारोजनाधि
पः॥ ३६॥ अपाहरदसंभ्रांतोधृष्टद्युम्नस्यपश्यतः॥ कर्णस्तुसात्यकिंजित्वाराजगृद्धीमहाबलः॥ ३७॥ द्रोणहंतारमुग्रेषुंससाराभिमुखोरणे॥ तंपृष्ठतोभ्ययात्तू
र्णंशैनेयोवितुदंश्छरैः॥ ३८॥ वारणंजघनोपांतेविषाणाभ्यामिवद्विपः॥ सभारतमहानासीद्योधानांसुमहात्मनां॥ ३९॥ कर्णपार्षतयोर्मध्येत्वदीयानांमहा
रणः॥ नपांडवानांनास्माकंयोधःकश्चित्पराङ्मुखः॥ ४०॥ प्रत्यदृश्यत्ततःकर्णःपंचालांस्त्वरितोययौ॥ तस्मिन्क्षणेनरश्रेष्ठगजवाजिजनक्षयः॥ ४१॥ प्रादु
रासीदुभयतोराजन्मध्यगतेहनि॥ पंचालास्तुमहाराजत्वरिताविजिगीषवः॥ ४२॥ तेसर्वेभ्यद्रवन्कर्णंपतत्रिणइवद्रुमं॥ तांस्तथाधिरथिःक्रुद्धोयतमानान्मन
स्विनः॥ ४३॥ विचिन्वन्निवबाणाग्रैःसमासादयदग्रगान्॥ व्याघ्रकेतुंसुशर्माणंचित्रंचोग्रायुधंजयं॥ ४४॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ६८ ॥ ६९ ॥ ७० ॥

शुक्लंचरोचमानंचसिंहसेनंचदुर्जयं ॥ तेवीरारथमार्गेणपरिवव्रुर्नरोत्तमं ॥ ४५ ॥ सृजंतंसायकान्क्रुद्धंकर्णमाहवशोभिनं ॥ युध्यमानांस्तुतान्शूरान्मनुजेंद्रप्र तापवान् ॥ ४६ ॥ अष्टाभिरष्टौराधेयोऽभ्यर्दयन्निशितैःशरैः ॥ अथापरान्महाराजसूतपुत्रःप्रतापवान् ॥ ४७ ॥ जघानबहुसाहस्रान्योधान्युद्धविशारदान् ॥ जिष्णुंचजिष्णुकर्माणंदेवापिंभद्रमेवच ॥ ४८ ॥ दंडंचराजन्समरेचित्रंचित्रायुधंहरिं ॥ सिंहकेतुंरोचमानंशलभंचमहारथं ॥ ४९ ॥ निजघानसुसंक्रुद्धश्चेदी नांचमहारथान् ॥ तेषांमाददतःप्राणानासीदाधिरथेर्वपुः ॥ ५० ॥ शोणिताभ्युक्षितांगस्यरुद्रस्येवोर्जितंमहत् ॥ तत्रभारतकर्णेनमातंगास्ताडिताःशरैः ॥ ५१ ॥ सर्वतोऽभ्यद्रवन्भीताःकुर्वंतोमहदाकुलं ॥ निपेतुरुर्व्यांसमरेकर्णसायकताडिताः ॥ ५२ ॥ कुर्वंतोविविधान्नादान्वज्रनुन्नाइवाचलाः ॥ गजवाजिमनुष्यैश्चनि पतद्भिःसमंततः ॥ ५३ ॥ रथैश्चाधिरथेर्मार्गेसमास्तीर्यतमेदिनी ॥ नैवंभीष्मोनचद्रोणोनान्येयुधिचतावकाः ॥ ५४ ॥ चक्रुःस्मतादृशंकर्मयादृशंवैकृतंरणे ॥ सू तपुत्रेणनागेषुहयेषुचरथेषुच ॥ ५५ ॥ नरेषुचमहाराजकृतंस्मकदनंमहत् ॥ मृगमध्येयथासिंहोदृश्यतेनिर्भयश्चरन् ॥ ५६ ॥ पंचालानांतथामध्येकर्णोऽचरदभी तवत् ॥ यथामृगगणांस्त्रस्तान्सिंहोद्रावयतेदिशः ॥ ५७ ॥ पंचालानांरथव्रातान्कर्णोव्यद्रावयत्तथा ॥ सिंहास्यंचयथाप्राप्यनजीवंतिमृगाःक्वचित् ॥ ५८ ॥ त थाकर्णमनुप्राप्यनजिजीवुर्महारथाः ॥ वैश्वानरंयथाप्राप्यप्रतिदह्यंतिवैजनाः ॥ ५९ ॥ कर्णाग्निनावनेतद्वद्दग्धाभारतसृंजयाः ॥ कर्णेनचेदिकैकेयपांचालेषुच भारत ॥ ६० ॥ विश्राव्यनामनिहताबहवःशूरसंमताः ॥ ममचासीन्मतीराजन्दृष्ट्वाकर्णस्यविक्रमं ॥ ६१ ॥ नैकोप्याधिरथेर्जीवन्मोक्ष्यतेयुधि ॥ पंचा लान्व्यधमत्संख्येसूतपुत्रःपुनःपुनः ॥ ६२ ॥ पंचालानथनिघ्नंतंकर्णंदृष्ट्वामहारणे ॥ अभ्यधावत्सुसंक्रुद्धोधर्मराजोयुधिष्ठिरः ॥ ६३ ॥ धृष्टद्युम्नश्चसर्वेयंद्रौपदेयाश्च मारिष ॥ परिवव्रुरमित्रघ्नंशतशश्चापरेजनाः ॥ ६४ ॥ शिखंडीसहदेवश्चनकुलोनाकुलिस्तथा ॥ जनमेजयःशिनेर्नप्ताबहवश्चप्रभद्रकाः ॥ ६५ ॥ एतेपुरोग माभूत्वाधृष्टद्युम्नश्चसंयुगे ॥ कर्णमस्यंतमिष्वस्त्रैर्विचेरुरमितौजसः ॥ ६६ ॥ तांस्तत्राधिरथिःसंख्येचेदिपांचालपांडवान् ॥ एकोबहूनभ्यपतद्गरुत्मान्पन्नगानिव ॥ ६७ ॥ तैःकर्णस्याभवद्युद्धंघोररूपंविशांपते ॥ यादृश्यादृवपुरावृत्तंदेवानांदानवैःसह ॥ ६८ ॥ तान्समेतान्महेष्वासान्शरवर्षौघवर्षिणः ॥ एकोव्यधमदव्यग्रस्त मांसीवदिवाकरः ॥ ६९ ॥ भीमसेनस्तुसंसक्तेराधेयेपांडवैःसह ॥ सर्वतोऽभ्यहनत्क्रुद्धोयमदंडनिभैःशरैः ॥ वाह्लीकान्केकयान्मत्स्यान्वासात्यान्मद्रसैंधवान् ॥ ७० ॥

॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ९७ ॥

एकःसंख्येमहेष्वासोयोधयन्बह्वशोभत ॥ तत्रमर्मसुभीमेननाराचैस्ताडितागजाः ॥ ७१ ॥ प्रपतंतोहतारोहाःकंपयंतिस्ममेदिनीं ॥ वाजिनश्चहतारोहाःपत्तय
श्वगतासवः ॥ ७२ ॥ शेरतेयुधिनिर्भिन्नावमंतोरुधिरंबहु ॥ सहस्रशश्चरथिनःपातिताःपतितायुधाः ॥ ७३ ॥ तेक्षताःसमदृश्यंतभीमभीतागतासवः ॥ रथिभिः
सादिभिःसूतैःपादातैर्वाजिभिर्गजैः ॥ ७४ ॥ भीमसेनशरैश्छिन्नैराच्छन्नावसुधाभवत् ॥ तत्स्तंभितमिवातिष्ठद्भीमसेनभयार्दितं ॥ ७५ ॥ दुर्योधनबलंसर्वंनि
रुत्साहंकृतव्रणं ॥ निश्चेष्टंतुमुलंदीनंबभौतस्मिन्महारणे ॥ ७६ ॥ प्रसन्नसलिलेकालेयथास्यात्सागरोनृप ॥ तद्वत्तवबलंतद्वैनिश्चलंसमवस्थितं ॥ ७७ ॥ मन्युवी
र्यबलोपेतंदर्पात्प्रत्यवरोपितं ॥ अभवत्तवपुत्रस्यतत्सैन्यंनिष्प्रभंतदा ॥ ७८ ॥ तद्बलंभरतश्रेष्ठवध्यमानंपरस्परं ॥ रुधिरौघपरिक्लिन्नंरुधिरार्द्रंबभूवह ॥ ७९ ॥ ज
गामभरतश्रेष्ठवध्यमानंपरस्परं ॥ सूतपुत्रोरणेक्रुद्धःपांडवानामनीकिनीं ॥ ८० ॥ भीमसेनःकुरूंश्चापिद्रावयंतौविरेजतुः ॥ वर्तमानेतथारौद्रेसंग्रामेद्भुतदर्शने
॥ ८१ ॥ निहत्यपृतनामध्येसंशप्तकगणान्बहून् ॥ अर्जुनोजयतांश्रेष्ठोवासुदेवमथाब्रवीत् ॥ ८२ ॥ प्रभग्नंबलमेतद्धियोत्स्यमानंजनार्दन ॥ एतेद्रवंतिसगणाः
संशप्तकमहारथाः ॥ ८३ ॥ अपारयंतोमद्बाणान्सिंहशब्दंमृगाइव ॥ दीर्यतेचमहत्सैन्यंसृंजयानांमहारणे ॥ ८४ ॥ हस्तिकक्ष्योत्स्यसौकृष्णकेतुःकर्णस्यधीमतः ॥
दृश्यतेराजसैन्यस्यमध्येविचरतोमुदा ॥ ८५ ॥ नचकर्णंरणेशक्ताजेतुमन्येमहारथाः ॥ जानीतेहिभवान्कर्णंवीर्यवंतंपराक्रमे ॥ ८६ ॥ तत्रयाहियतःकर्णोद्राव
यत्येपनोबलं ॥ वर्जयित्वारणेयाहिसूतपुत्रंमहारथं ॥ ८७ ॥ एतन्मेरोचतेकृष्णयथावातवरोचते ॥ एतच्छ्रुत्वावचस्तस्यगोविंदःप्रहसन्निव ॥ ८८ ॥ अब्रवीदर्जु
नंतूर्णंकौरवान्जहिपांडव ॥ ततस्तवमहासैन्यंगोविंदप्रेरिताहयाः ॥ ८९ ॥ हंसवर्णाःप्रविविशुर्वहंतःकृष्णपांडवौ ॥ केशवप्रेरितैरश्वैःश्वेतैःकांचनभूषणैः ॥ ९० ॥
प्रविशद्भिस्तवबलंचतुर्दिशमभिद्यत ॥ मेघस्तनितनिर्ह्रादःसरथोवानरध्वजः ॥ ९१ ॥ चलत्पताकस्तांसेनांविमानंद्यामिवाविशत् ॥ तौविदार्यमहासेनांप्रवि
ष्टौकेशवार्जुनौ ॥ ९२ ॥ क्रुद्धौसंरंभरक्ताक्षौविभ्राजेतांमहाद्युती ॥ युद्धशौंडौसमाहूतावागतौतौरणाध्वरं ॥ ९३ ॥ यज्वभिर्विधिनाहूतौमखेदेवाविवाश्विनौ ॥
क्रुद्धौतौतुनरव्याघ्रौयोगवंतौबभूवतुः ॥ ९४ ॥ तलशब्देनरुषितौयथानागौमहावने ॥ विगाह्यतुरथानीकमश्वसंघांश्चफाल्गुनः ॥ ९५ ॥ व्यचरत्पृतनामध्ये
पाशहस्तइवांतकः ॥ तंदृष्ट्वायुधिविक्रांतंसेनायांतवभारत ॥ ९६ ॥ संशप्तकगणान्भूयःपुत्रस्तेसमचूचुदत् ॥ ततोरथसहस्रेणद्विरदानांत्रिभिःशतैः ॥ ९७ ॥

॥ ९८ ॥ ९९ ॥ १०० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ किंकरवद्दंडंबिभर्तिकिंकरनामानंवादंडं बिभर्तिसः

चतुर्दशसहस्रैस्तुतुरगाणांमहाहवे ॥ द्वाभ्यांशतसहस्राभ्यांपदातीनांच्चधन्विनां ॥ ९८ ॥ शूराणांलब्धलक्षाणांविदितानांसमंततः ॥ अभ्यवर्तनकौंतेयंछादयंतोमहारथाः ॥ ९९ ॥ शरवर्षैर्महाराजसर्वतःपांडुनंदनं ॥ सच्छाद्यमानःसमरेशरैःपरबलार्दनः ॥ १०० ॥ दर्शयन्रौद्रमात्मानंपाशहस्तइवांतकः ॥ निघ्नन्संशप्तकान्पार्थःप्रेक्षणीयतरोऽभवत् ॥ १०१ ॥ ततोविद्युत्प्रभैर्बाणैःकार्तस्वरविभूषितैः ॥ निरंतरमिवाकाशमासीच्छन्नंकिरीटिना ॥ २ ॥ किरीटिभुजनिर्मुक्तैःसंपतद्भिर्महाशरैः ॥ समाच्छन्नंबभौसर्वंकाद्रवेयैरिवप्रभो ॥ ३ ॥ रुक्मपुंखान्प्रसन्नाग्राञ्छरान्सन्नतपर्वणः ॥ अवासृजदमेयात्मादिक्षुसर्वासुपांडवः ॥ ४ ॥ महीवियद्दिशःसर्वाःसमुद्रागिरयोपिवा ॥ स्फुटंतीतिजनाजज्ञुःपार्थस्यतलनिःस्वनात् ॥ ५ ॥ हत्वादशसहस्राणिपार्थिवानांमहारथः ॥ संशप्तकानांकौंतेयःप्रत्यक्षंत्वरितोऽभ्ययात् ॥ ६ ॥ प्रत्यक्षंचसमासाद्यपार्थःकांबोजरक्षितं ॥ प्रममाथबलाद्बाणैर्दानवानिववासवः ॥ ७ ॥ प्रचिच्छेदाशुभल्लैनद्विषतामाततायिनां ॥ शस्त्रपाणिंतथाबाहुंतथापिचशिरांस्युत ॥ ८ ॥ अंगांगावयवैश्छिन्नैर्व्यायुधास्तेऽपतन्भुवि ॥ विष्वग्वाताभिसंभग्नाबहुशाखाइवद्रुमाः ॥ ९ ॥ हस्त्यश्वरथपत्तीनांव्रातान्निघ्नंतमर्जुनं ॥ सुदक्षिणादवरजःशरवृष्ट्याभ्यवीवृषत् ॥ १० ॥ तस्यास्यतोर्धचंद्राभ्यांबाहूपरिघसन्निभौ ॥ पूर्णचंद्राभवक्त्रंचक्षुरेणाभ्यहरच्छिरः ॥ ११ ॥ सपपाततततोवाहात्स्वलोहितपरिस्रवः ॥ मनःशिलागिरेःशृंगंवज्रेणेवावदारितं ॥ १२ ॥ सुदक्षिणादवरजंकांबोजंददृशुर्हतं ॥ प्रांशुंकमलपत्राक्षमत्यर्थप्रियदर्शनं ॥ १३ ॥ कांचनस्तंभसदृशंभिन्नंहेमगिरिंयथा ॥ ततोऽभवत्पुनर्युद्धंघोरमत्यर्थमद्भुतं ॥ १४ ॥ नानावस्थाश्चयोधानांबभूवुस्तत्रयुध्यतां ॥ एकेषुनिहतैरश्वैःकांबोजैर्यवनैःशकैः ॥ १५ ॥ शोणिताक्तैस्तदारक्तंसर्वमासीद्विशांपते ॥ रथैर्हताश्वसूतैश्चहतारोहैश्चवाजिभिः ॥ १६ ॥ द्विरदैश्चहतारोहैर्महामात्रैर्हतद्विपैः ॥ अन्योन्येनमहाराजकृतोघोरोजनक्षयः ॥ १७ ॥ तस्मिन्प्रपक्षेपक्षेचनिहतेसव्यसाचिना ॥ अर्जुनंजयतांश्रेष्ठंत्वरितोद्रौणिरभ्ययात् ॥ १८ ॥ विधुन्वानोमहच्चापंकार्तस्वरविभूषितं ॥ आददानःशरान्घोरान्स्वरश्मीनिवभास्करः ॥ १९ ॥ क्रोधामर्षविवृत्तास्योलोहिताक्षोबभौबली ॥ अंतकालेयथाक्रुद्धोमृत्युःकिंकरदंडभृत् ॥ २० ॥ ततःप्रासृजदुग्राणिशरवर्षाणिसंघशः ॥ तैर्विस्पष्टैर्महाराजव्यद्रवत्पांडवीचमूः ॥ २१ ॥ सदृष्ट्वैवतुदाशार्हस्यंदनस्थंविशांपते ॥ पुनःप्रासृजदुग्राणिशरवर्षाणिमारिष ॥ २२ ॥ तैःपतद्भिर्महाराजद्रौणिमुक्तैःसमंततः ॥ संछादितौरथस्थौतावुभौकृष्णधनंजयौ ॥ २३ ॥ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ इतिकर्णपर्व

ततःशरशतैस्तीक्ष्णैरश्वत्थामाप्रतापवान् ॥ निश्चेष्टौतावुभौयुद्धेकृत्वामाधवपांडवौ ॥ २४ ॥ हाहाकृतमभूत्सर्वंस्थावरंजंगमंतथा ॥ चराचरस्यगोप्तारौदृष्ट्वा
संछादितौशरैः ॥ २५ ॥ सिद्धचारणसंघाश्चसंपेतुस्तेसमंततः ॥ चिंतयंतोभवेदद्यलोकानांस्वस्त्यपीतिच ॥ २६ ॥ नमयातादृशोराजन्दृष्टपूर्वःपराक्रमः ॥ संग्रा
मेयादृशोद्रौणेःकृष्णौसंछादयिष्यतः ॥ २७ ॥ द्रौणेस्तुधनुषःशब्दमहितत्रासनंरणे ॥ अश्रौषंबहुशोराजन्सिंहस्येवनिनदोयथा ॥ २८ ॥ ज्याचास्यचरतोयुद्धे
सव्यदक्षिणमस्यतः ॥ विद्युदंबुदमध्यस्थाभ्राजमानेवसाभवत् ॥ २९ ॥ सतथाक्षिप्रकारीचदृढहस्तश्चपांडवः ॥ प्रमोहंपरमंगत्वाप्रैक्षततंद्रोणजंततः ॥ ३० ॥
विक्रमंविहतंमेनेआत्मनःसमहायशाः ॥ तस्यास्यसमरेराजन्वपुरासीत्सुदुर्दृशं ॥ ३१ ॥ द्रौणिपांडवयोरेवंवर्तमानेमहारणे ॥ वर्धमानेचराजेंद्रद्रोणपुत्रेमहाब
ले ॥ ३२ ॥ हीयमानेचकौंतेयेकृष्णंरोषःसमाविशत् ॥ सरोषान्निःश्वसन्राजन्निर्दहन्निवचक्षुषा ॥ ३३ ॥ द्रौणिंह्यपश्यत्संग्रामेफाल्गुनंचमुहुर्मुहुः ॥ ततःक्रुद्धो
ब्रवीत्कृष्णःपार्थंसप्रणयंतदा ॥ ३४ ॥ अत्यद्भुतमिदंपार्थतवपश्यामिसंयुगे ॥ अतिशेतेहियत्र्वांद्रोणपुत्रोद्यभारत ॥ ३५ ॥ कच्चिद्वीर्यंयथापूर्वंभुजयोर्वाबलंत
व ॥ कच्चित्तेगांडिवंहस्तेरथेतिष्ठसिचार्जुन ॥ ३६ ॥ कच्चित्कुशलिनौबाहूमुष्टिर्वानव्यशीर्यत ॥ उदीर्यमाणंहिरणेपश्यामिद्रौणिमाहवे ॥ ३७ ॥ गुरुपुत्रइति
ह्येनंमानयन्भरतर्षभ ॥ उपेक्षांकुरुमापार्थनायंकालउपेक्षितुं ॥ ३८ ॥ एवमुक्तस्तुकृष्णेनगृह्यभल्लांश्चतुर्दश ॥ त्वरमाणस्त्वराकालेद्रौणेर्धनुरथाच्छिनत् ॥
॥ ३९ ॥ ध्वजंछत्रंपताकाश्चरथंशक्तिंगदांतथा ॥ जत्रुदेशेचसुभृशंवत्सदंतैरताडयत् ॥ ४० ॥ समूर्छांपरमांगत्वाध्वजयष्टिंसमाश्रितः ॥ तंविसंज्ञंमहाराजश
त्रुणाभृशपीडितम ॥ ४१ ॥ अपोवाहरणात्सूतोरक्षमाणोधनंजयात् ॥ एतस्मिन्नेवकालेचविजयःशत्रुतापनः ॥ ४२ ॥ व्यहनत्तावकंसैन्यंशतशोथसहस्रशः
पश्यतस्तस्यवीरस्यतवपुत्रस्यभारत ॥ ४३ ॥ एवमेषक्षयोवृत्तस्तावकानांपरैःसह ॥ क्रूरोविशसनोघोरोराजन्दुर्मंत्रितेनतव ॥ ४४ ॥ संशप्तकांश्चकौंतेयःकुरू
श्चापिवृकोदरः ॥ वसुषेणश्चपंचालान्क्षणेनव्यधमद्रणे ॥ ४५ ॥ वर्तमानेतथारौद्रेराजन्वीरवरक्षये ॥ उत्थितान्यगणेयानिकबंधानिसमंततः ॥ ४६ ॥ युधि
ष्ठिरोपिसंग्रामेप्रहारैर्गाढवेदनः ॥ क्रोशमात्रमपक्रम्यतस्थौभरतसत्तम ॥ ४७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥

णिनैलकंठीयेभारतभावदीपेषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ १ ॥ ॥ १ ॥ ॥ १ ॥ ॥ १ ॥ ॥ १ ॥

दुर्योधनइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ पांडवाअपिकौरवानभ्यद्रवंनेतिशेषः ॥ ११ ॥ कालयुगांतःमहाप्रलयः ॥ १२ ॥ १३ ॥ स्वकर्मआभिमुख्येनप्रहारसहनादि उद्वहतोनिर्वोढ़न्

संजयउवाच दुर्योधनस्ततःकर्णमुपेत्यभरतर्षभ ॥ अब्रवीन्मद्रराजंचतथैवान्यांश्चपार्थिवान् ॥ १ ॥ यदृच्छयैतत्संप्राप्तंस्वर्गद्वारमपावृतं ॥ सुखिनःक्षत्रियाःकर्णलभंतेयुद्धमीदृशं ॥ २ ॥ सदृशैःक्षत्रियैःशूरैःशूराणांयुध्यतांयुधि ॥ इष्टंभवतिराधेयतदिदंसमुपस्थितम् ॥ ३ ॥ हत्वाचपांडवान्युद्धेस्फीतामुर्वीमवाप्स्यथ ॥ निहतावापरैर्युद्धेवीरलोकमवाप्स्यथ ॥ ४ ॥ दुर्योधनस्यतच्छ्रुत्वावचनंक्षत्रियर्षभाः ॥ हृष्टानादानुदक्रोशन्वादित्राणिचसर्वशः ॥ ५ ॥ ततःप्रमुदितेतस्मिन्दुर्योधनबलेतदा ॥ हर्षयंस्तावकान्योधान्द्रौणिर्वचनमब्रवीत् ॥ ६ ॥ प्रत्यक्षंसर्वसैन्यानांभवतांचापिपश्यतां ॥ न्यस्तशस्त्रोममपिताधृष्टद्युम्नेनपातितः ॥ ७ ॥ सतेनाहममर्षेणमित्रार्थेचापिपार्थिवाः ॥ सत्यंवःप्रतिजानामितद्वाक्यंमेनिबोधत ॥ ८ ॥ धृष्टद्युम्नमहत्वाहंनविमोक्ष्यामिदंशनं ॥ अनृतायांप्रतिज्ञायांनाहंस्वर्गमवाप्नुयां ॥ ९ ॥ अर्जुनोभीमसेनश्चयोधोयोरक्षितारणे ॥ धृष्टद्युम्नस्यतंसंख्येनिहनिष्यामिसायकैः ॥ १० ॥ एवमुक्तेततःसर्वासहिताभारतीचमूः ॥ अभ्यद्रवतकौंतेयांस्तथातेचापिपांडवाः ॥ ११ ॥ सम्मंनिपातोरथयूथपानांबभूवराजन्नतिभीमरूपः ॥ जनक्षयःकालयुगांतकल्पःप्रावर्त्ततानाग्रेकुरुसंजयानां ॥ १२ ॥ ततःप्रवृत्तेयुधिसंप्रहारेभूतानिसर्वाणिसदैवतानि ॥ आसन्समेतानिसहाप्सरोभिर्दिदृक्षमाणानिनरप्रवीरान् ॥ १३ ॥ दिव्यैश्चमाल्यैर्विविधैश्चगंधैर्दिव्यैश्चरत्नैर्विविधैर्नराग्र्यान् ॥ रणेस्वकर्मोद्वहतःप्रवीरानवाकिरन्नप्सरसःप्रहृष्टाः ॥ १४ ॥ समीरणस्तांश्चनिषेव्यगंधान्सिषेवसर्वानपियोधमुख्यान् ॥ निषेव्यमाणास्त्वनिलेनयोधाःपरस्परघ्नाधरणीनिपेतुः ॥ १५ ॥ सादिव्यमाल्यैरवकीर्यमाणासुवर्णपुंखैश्चशरैर्विचित्रैः ॥ नक्षत्रसंघैरिवचित्रिताद्यौःक्षितिर्बभौयोधवरैर्विचित्रा ॥ १६ ॥ ततोंतरिक्षादपिसाधुवादैर्वादित्रघोषैःसमुदीर्यमाणः ॥ ज्याघोषनेमिस्वननादचित्रःसमाकुलःसोभवत्संप्रहारः ॥ १७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिअश्वत्थामप्रतिज्ञायांसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ७ ॥ संजयउवाच एवमेषमहानासीत्संग्रामःपृथिवीक्षिताम् ॥ क्रुद्धेर्जुनेतथाकर्णेभीमसेनेचपांडवे ॥ १ ॥ द्रोणपुत्रंपराजित्यजित्वाचान्यान्महारथान् ॥ अब्रवीदर्जुनोराजन्वासुदेवमिदंवचः ॥ २ ॥ पश्यकृष्णमहाबाहोद्रवंतींपांडवींचमूं ॥ कर्णपश्यचसंग्रामेकालयंतंमहारथान् ॥ ३ ॥ नचपश्यामिदाशार्हधर्मराजंयुधिष्ठिरं ॥ नापिकेतुर्युधांश्रेष्ठधर्मराजस्यदृश्यते ॥ ४ ॥

॥ १४ ॥ समीरणःसिषेवेत्यन्वयः परस्परघ्नंतिनेपरस्परेणमारिताइत्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ५ ॥ एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१॥ २२॥२३॥२४॥ किंकिणिनः किंकिणीमंतः व्रीहादित्वादिनिः ॥ २५ ॥ २६ ॥

त्रिभागश्चावशिष्टोयंदिवसस्यजनार्दन ॥ नचमांधार्त्तराष्ट्रेषुकश्चिद्युध्यतिसंयुगे ॥ ५ ॥ तस्मात्त्वंमत्प्रियंकुर्वन्याहियत्रयुधिष्ठिरः ॥ दृष्ट्वाकुशलिनंयुद्धेधर्मपुत्रं सहानुजं ॥ ६ ॥ पुनर्योद्धास्मिवार्ष्णेयशत्रुभिःसहसंयुगे ॥ ततःप्रायाद्रथेनाशुबीभत्सोर्वचनाद्धरिः ॥ ७ ॥ यतोयुधिष्ठिरोराजास्तंजयाश्चमहारथाः ॥ अयुध्यंस्ता वकैःसार्धंमृत्युंकृत्वानिवर्तनम् ॥ ८ ॥ ततःसंग्रामभूमिंतांवर्तमानेजनक्षये ॥ अवेक्षमाणोगोविंदःसव्यसाचिनमब्रवीत् ॥ ९ ॥ पश्यपार्थमहारौद्रोवर्ततेभ रतक्षयः ॥ पृथिव्यांक्षत्रियाणांवैदुर्योधनकृतेमहान् ॥ १० ॥ पश्यभारतचापानिरुक्मपृष्ठानिधन्विनाम् ॥ मृतानामपविद्धानिकलापांश्चमहाधनान् ॥ ११ ॥ जातरूपमयैःपुंखैःशरांश्चानतपर्वणः ॥ तैलधौतांश्चनाराचान्निर्मुक्तान्पन्नगानिव ॥ १२ ॥ हस्तिदंतत्सरून्खड्गान्जातरूपपरिष्कृतान् ॥ वर्माणिचापविद्धानि रुक्मगर्भाणिभारत ॥ १३ ॥ सुवर्णविकृतान्प्रासान्शक्तीःकनकभूषणाः ॥ जांबूनदमयैःपट्टैर्बद्धाश्चविपुलागदाः ॥ १४ ॥ जातरूपमयीश्चर्ष्टीःपट्टिशान्हे मभूषणान् ॥ दंडैःकनकचित्रैश्चविप्रविद्धान्परश्वधान् ॥ १५ ॥ अयःकुंतांश्चपतितान्मुसलानिगुरूणिच ॥ शतघ्नीःपश्यचित्राश्चविपुलान्परिघांस्तथा ॥ १६ ॥ चक्राणिचापविद्धानितोमरांश्चमहारणे ॥ नानाविधानिशस्त्राणिप्रगृह्यजयगृद्धिनः ॥ १७ ॥ जीवंतइवदृश्यंतेगतसत्वास्तरस्विनः ॥ गदाविमथितैर्गात्रैर्मुस लैर्भिन्नमस्तकान् ॥ १८ ॥ गजवाजिरथक्षुण्णान्पश्ययोधान्सहस्रशः ॥ मनुष्यहयनागानांशरशक्त्यृष्टिपट्टिशैः ॥ १९ ॥ परिघैरायसैर्घोरैरयस्कुंतैःपरश्वधैः ॥ शरीरैर्बहुभिश्छिन्नैःशोणितौघपरिप्लुतैः ॥ २० ॥ गतासुभिरमित्रघ्नसंवृतारणभूमयः ॥ बाहुभिश्चंदनादिग्धैःसांगदैर्हेमभूषितैः ॥ २१ ॥ सतलत्रैःसकेयूरैर्भा तिभारतमेदिनी ॥ सांगुलित्रैर्भुजाग्रैश्चविप्रविद्धैरलंकृतैः ॥ २२ ॥ हस्तिहस्तोपमैश्छिन्नैरूरुभिश्चतरस्विनां ॥ बद्धचूडामणिवरैःशिरोभिश्चसकुंडलैः ॥ २३ ॥ पतितैर्ऋषभाक्षाणांविराजतिवसुंधरा ॥ कबंधैःशोणितादिग्धैश्छिन्नगात्रशिरोधरैः ॥ २४ ॥ भूर्भातिभरतश्रेष्ठशांतार्चिर्भिरिवाग्निभिः ॥ रथांश्चबहुधाभग्नान् हेमकिंकिणिनःशुभान् ॥ २५ ॥ वाजिनश्चहतान्पश्यनिष्कीर्णांत्रान्शराहतान् ॥ अनुकर्षानुपासंगान्पताकाविविधध्वजान् ॥ २६ ॥ रथिनांचमहाशंखान् पांडुरांश्चप्रकीर्णकान् ॥ निरस्तजिह्वान्मातंगान्शयानान्पर्वतोपमान् ॥ २७ ॥

प्रकीर्णकान्चामरान् प्रकीर्णकंचामरेस्याद्विस्तरेनातुरंगमेइतिमेदिनी ॥ २७ ॥

वैजयंतीर्विचित्राश्च हतांश्च गजवाजिनः ॥ वारणानां परिस्तोमांस्तथैवाजिनकंबलान् ॥ २८ ॥ विपाटितविचित्रांश्च रूप्यचित्रान्कुथांकुशान् ॥ भिन्नाश्च बहुधा घंटा महद्भिः पतितैर्गजैः ॥ २९ ॥ वैदूर्यदंडांश्च शुभान्पतितानंकुशान्भुवि ॥ बद्धाः सादिभुजाग्रेषु सुवर्णविकृताः कशाः ॥ ३० ॥ विचित्रमणिचित्रांश्च जातरूपपरिष्कृतान् ॥ अश्वास्तरपरिस्तोमान्रांकवान्पतितान्भुवि ॥ ३१ ॥ चूडामणीन्नरेंद्राणां विचित्राः कांचनस्रजः ॥ छत्राणि चापविद्धानि चामरव्यजनानि च ॥ ॥ ३२ ॥ चंद्रनक्षत्रभासैश्च वदनैश्चारुकुंडलैः ॥ कॢप्तश्मश्रुभिरत्यर्थं वीराणां समलंकृतैः ॥ ३३ ॥ वदनैः पश्य संछन्नां महीं शोणितकर्दमां ॥ सजीवांश्चापरान्पश्य कूजमानान्समंततः ॥ ३४ ॥ उपास्यमानान्बहुशो न्यस्तशस्त्रैर्विशांपते ॥ ज्ञातिभिः सहितांस्तत्र रोदमानैर्मुहुर्मुहुः ॥ ३५ ॥ व्युत्क्रांतानपरान्योधांश्छादयित्वा तरस्विनः ॥ पुनर्युद्धाय गच्छंति जयगृद्धाः प्रमन्यवः ॥ ३६ ॥ अपरे तत्र तत्रैव परिधावंति मानवाः ॥ ज्ञातिभिः पतितैः शूरैर्याच्यमानास्तथोदकं ॥ ३७ ॥ जलार्थं च गताः केचिन्निष्प्राणा बहवोऽर्जुन ॥ सन्निवृत्ताश्च ते शूरास्तान्दृष्ट्वा विचेतसः ॥ ३८ ॥ जलं त्यक्त्वा प्रधावंति क्रोशमानाः परस्परं ॥ जलं पीत्वा मृतान्पश्य पिबंतोऽन्यांश्च मारिष ॥ ३९ ॥ परित्यज्य प्रियानन्ये बांधवान्बांधवप्रियाः ॥ व्युत्क्रांताः समदृश्यंत तत्र तत्र महारणे ॥ ४० ॥ तथापरान्नरश्रेष्ठ संदष्टौष्ठपुटान्पुनः ॥ भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षमाणान्समंततः ॥ ४१ ॥ एवं ब्रुवंस्तदा कृष्णो ययौ यत्र युधिष्ठिरः ॥ अर्जुनश्चापि नृपतेर्दर्शनार्थं महारणे ॥ ४२ ॥ याहि याहीति गोविंदं मुहुर्मुहुरचोदयत् ॥ तां युद्धभूमिं पार्थस्य दर्शयित्वा च माधवः ॥ ४३ ॥ त्वरमाणस्ततः कृष्णः पार्थमाह शनैरिदं ॥ पश्य पांडव राजानमुपयातांश्च पार्थिवान् ॥ ४४ ॥ कर्णं पश्य महारंगे ज्वलंतमिव पावकं ॥ असौ भीमो महेष्वासः सन्निवृत्तो रणं प्रति ॥ ४५ ॥ तमेते विनिवर्तंत धृष्टद्युम्नपुरोगमाः ॥ पांचालसृंजयानां च पांडवानां च यन्मुखं ॥ ४६ ॥ निवृत्तैश्च पुनः पार्थैर्भग्नं शत्रुबलं महत् ॥ कौरवान्द्रवतो ह्येष कर्णो रोधयतेऽर्जुन ॥ ४७ ॥ अंतकप्रतिमो वेगे शक्रतुल्यपराक्रमः ॥ असौ गच्छति कौरव्य द्रौणिः शस्त्रभृतां वरः ॥ ४८ ॥ तमेव प्रद्रुतं संख्ये धृष्टद्युम्नो महारथः ॥ अनुप्रयाति संग्रामे हतान्पश्य च सृंजयान् ॥ ४९ ॥ सर्वमाह सुदुर्धर्षो वासुदेवः किरीटिने ॥ ततो राजन्महाघोरः प्रादुरासीन्महारणः ॥ ५० ॥ सिंहनादरवाश्चैव प्रादुरासन्समागमे ॥ उभयोः सेनयो राजन्मृत्युं कृत्वा निवर्त्तनं ॥ ५१ ॥

॥ ५२ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ ७ ॥ ततःपुनःसमाजग्मुरिति॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

एवमेषक्षयोवृत्तःपृथिव्यांपृथिवीपते॥तावकानांपरेषांचराजन्दुर्मंत्रितेतव॥५२॥ इतिश्रीमहाभारतेकर्णप० वासुदेववाक्ये अष्टपंचाशत्तमोऽध्यायः॥५८॥
संजयउवाच ततःपुनःसमाजग्मुरभीताःकुरुसृंजयाः॥ युधिष्ठिरमुखाःपार्थाःसूतपुत्रमुखावयं॥ १ ॥ ततःप्रववृतेभीमःसंग्रामोलोमहर्षणः ॥ कर्णस्यपांडवानांचयमराष्ट्रविवर्धनः॥ २ ॥ तस्मिन्प्रवृत्तेसंग्रामेतुमुलेशोणितोदके॥ संशप्तकेषुशूरेषुकिंचिच्छिष्टेषुभारत॥३॥ धृष्टद्युम्नोमहाराजसहितःसर्वराजभिः॥ कर्णमेवाभिदुद्रावपांडवाश्चमहारथाः॥ ४ ॥ आगच्छमानांस्तान्संख्येप्रहृष्टान्विजयैषिणः॥ दधारैकोरणेकर्णोजलौघानिवपर्वतः॥ ५ ॥ समासाद्यतुतेकर्णंव्यशीर्यंतमहारथाः॥ यथाचलंसमासाद्यवार्योघाःसर्वतोदिशं॥ ६॥ तयोरासीन्महाराजसंग्रामोलोमहर्षणः॥ धृष्टद्युम्नस्तुराधेयंशरेणानतपर्वणा॥ ७॥ ताडयामाससमरेतिष्ठतिष्ठेतिचाब्रवीत्॥ विजयंचधनुःश्रेष्ठंविधुन्वानोमहारथः॥ ८॥ पार्षतस्यधनुश्छित्वाशरांश्चाशीविषोपमान्॥ ताडयामाससंक्रुद्धःपार्षतंनवभिःशरैः॥ ९॥ तेवर्महेमविकृतंभित्वातस्यमहात्मनः॥ शोणिताक्ताव्यराजंतशक्रगोपाइवानघ॥ १०॥ तदपास्यधनुश्छिन्नंधृष्टद्युम्नोमहारथः॥ अथान्यद्धनुरादायशरांश्चाशीविषोपमान्॥ ११ ॥ कर्णंविव्याधसप्तत्याशरैःसन्नतपर्वभिः॥ तथैवराजन्कर्णोपिपार्षतंशत्रुतापनं ॥ १२ ॥ छादयामाससमरेशरैराशीविषोपमैः॥ द्रोणशत्रुर्महेष्वासोविव्याधनिशितैःशरैः॥ १३ ॥ तस्यकर्णोमहाराजशरंकनकभूषणं॥ प्रेषयामाससंक्रुद्धोमृत्युदंडमिवापरं॥ १४॥ तमापतंतंसहसाघोररूपंविशांपते॥ चिच्छेदशतधाराजन्शैनेयःकृतहस्तवत्॥ १५॥ दृष्ट्वाविनिहतंबाणंशरैःकर्णोविशांपते॥सात्यकिंशरवर्षेणसमंतात्पर्यवारयत्॥ १६॥ विव्याधचैनंसमरेनाराचैस्सप्तभिः॥ तंप्रत्यविध्यच्छैनेयःशरैर्हेमपरिष्कृतैः॥ १७॥ ततोयुद्धंमहाराजचक्षुःश्रोत्रभयानकं॥ आसीद्घोरंचचित्रंचप्रेक्षणीयंसमंततः॥ १८॥ सर्वेषांतत्रभूतानांलोमहर्षोभ्यजायत॥ तद्दृष्ट्वासमरेकर्मकर्णशैनेययोर्नृप॥ १९॥ एतस्मिन्नंतरेद्रौणिरभ्ययात्सुमहाबलं॥ पार्षतंशत्रुदमनंशत्रुवीर्यासुनाशनं॥ २०॥ अभ्यभाषतसंक्रुद्धोद्रौणिःपरपुरंजयः॥ तिष्ठतिष्ठाद्यब्रह्मघ्ननमेजीवन्विमोक्ष्यसे॥ २१॥ इत्युक्त्वासुभृशंवीरंशीघ्रकृन्निशितैःशरैः॥ पार्षतंछादयामासघोररूपैःसुतेजनैः॥ २२॥ यतमानंपरंशक्त्यायतमानोमहारथः॥ यथाहिसमरेद्रोणःपार्षतंवीक्ष्यमारिष॥ २३॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥४७॥४८॥ ४९ ॥

तथाद्रौणिंरणेदृष्ट्वापार्षतःपरवीरहा ॥ नातिहृष्टमनाभूत्वामन्यतेमृत्युमात्मनः ॥ २४ ॥ सज्ञात्वासमरेत्मानंशस्त्रेणावध्यमेवतु ॥ जवेनाभ्याययौद्रौणिंकालः
कालमिवक्षये ॥ २५ ॥ द्रौणिस्तुदृष्ट्वाराजेंद्र धृष्टद्युम्नमवस्थितं ॥ क्रोधेननिःश्वसन्वीरःपार्षतंसमुपाद्रवत् ॥ २६ ॥ तावन्योन्यंतुदृष्ट्वैवसंरंभंजग्मतुःपरं ॥ अथाब्र
वीन्महाराजद्रोणपुत्रःप्रतापवान् ॥ २७ ॥ धृष्टद्युम्नंसमीपस्थंत्वरमाणोविशांपते ॥ पंचालापसदाद्यत्वांप्रेपयिष्यामिमृत्यवे ॥ २८ ॥ पापंहियत्त्वयाकर्मघ्नताद्रो
णंपुराकृतं ॥ अद्यत्वांतप्स्यतेतद्वैयथानकुशलंतथा ॥ २९ ॥ अरक्ष्यमाणःपार्थेनयदितिष्ठसिसंयुगे ॥ नापक्रामसिवामूढसत्यमेतद्ब्रवीमिते ॥ ३० ॥ एवमुक्तःप्र
त्युवाचधृष्टद्युम्नःप्रतापवान् ॥ प्रतिवाक्यंसएवासिर्मामकोदास्यतेतव ॥ ३१ ॥ येनैवतेपितुर्दत्तंयतमानस्यसंयुगे ॥ यदितावन्मयाद्रोणोनिहतोब्राह्मणब्रुवः ॥
॥ ३२ ॥ त्वामिदानींकथंयुद्धेनहनिष्यामिविक्रमात् ॥ एवमुक्त्वामहाराजसेनापतिरमर्षणः ॥ ३३ ॥ निशितेनातिबाणेनद्रौणिंविव्याधपार्षतः ॥ ततोद्रौणिः
सुसंक्रुद्धःशरैःसंनतपर्वभिः ॥ ३४ ॥ आच्छादयद्दिशोराजन्धृष्टद्युम्नस्यसंयुगे ॥ नैवांतरिक्षंनदिशोनापियोधाःसमंततः ॥ ३५ ॥ दृश्यंतेवैमहाराजशरैश्छन्नाः
सहस्रशः ॥ तथैवपार्षतोराजन्द्रौणिमाहवशोभिनं ॥ ३६ ॥ शरैःसंछादयामाससूतपुत्रस्यपश्यतः ॥ राधेयोपिमहाराजपंचालान्सहपांडवैः ॥ ३७ ॥ द्रौपदेया
न्युधामन्युंसात्यकिंचमहारथं ॥ एकःसंवारयामासप्रेक्षणीयःसमंततः ॥ ३८ ॥ धृष्टद्युम्नस्तुसमरेद्रौणेश्चिच्छेदकार्मुकं ॥ तदपास्यधनुर्द्रौणिरन्यदादायकार्मुकं
॥ ३९ ॥ वेगवान्समरेघोरेशरांश्चाशीविषोपमान् ॥ सपार्षतस्यराजेंद्रधनुःशक्तिंगदांध्वजं ॥ ४० ॥ हयान्सूतंरथंचैवनिमेषाद्व्यधमच्छरैः ॥ सच्छिन्नधन्वाविर
थोहताश्वोहतसारथिः ॥ ४१ ॥ खड्गमादत्तविपुलंशतचंद्रंचभानुमत् ॥ द्रौणिस्तदपिराजेंद्रभल्लैःक्षिप्रंमहारथः ॥ ४२ ॥ चिच्छेदसमरेवीरःक्षिप्रहस्तोदृढायुधः ॥
रथादनवरूढस्यतदद्भुतमिवाभवत् ॥ ४३ ॥ धृष्टद्युम्नंहिविरथंहताश्वंछिन्नकार्मुकं ॥ शरैश्चबहुधाविद्धमस्त्रैश्चशकलीकृतं ॥ ४४ ॥ नाशक्नद्भरतश्रेष्ठयतमानोम
हारथः ॥ तस्यांतमिषुभीराजन्यदाद्रौणिर्नजग्मिवान् ॥ ४५ ॥ अथत्यक्त्वाधनुर्वीरःपार्षतंत्वरितोन्वगात् ॥ आसीदाप्लवतोवेगस्तस्यराजन्महात्मनः ॥ ४६ ॥ ग
रुडस्येवपततोजिघृक्षोःपन्नगोत्तमं ॥ एतस्मिन्नेवकालेतुमाधवोर्जुनमब्रवीत् ॥ ४७ ॥ पश्यपार्थयथाद्रौणिःपार्षतस्यवधंप्रति ॥ यत्नंकरोतिविपुलंहन्याच्चैनंन
संशयः ॥ ४८ ॥ तंमोचयमहाबाहोपार्षतंशत्रुकर्शन ॥ द्रौणेरास्यमनुप्राप्तंमृत्योरास्यगतंयथा ॥ ४९ ॥

॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेऊनषष्टितमो

एवमुक्तामहाराजवासुदेवःप्रतापवान्॥ प्रेषयत्तुरगांस्तत्रयत्रद्रौणिर्व्यवस्थितः॥ ५० ॥ तेहयाश्चंद्रसंकाशाःकेशवेनप्रचोदिताः ॥ आपिबंतइवव्योमजग्मुर्द्रौणिरथंप्रति॥ ५१ ॥ दृष्ट्वायातौमहावीर्यावुभौकृष्णधनंजयौ॥ धृष्टद्युम्नवधेयत्तंचक्रेराजन्महाबलः॥ ५२ ॥ विकृष्यमाणंदृष्ट्वैवधृष्टद्युम्नंनरेश्वर ॥ शरांश्चिक्षेपवैपार्थोद्रौणिंप्रतिमहाबलः॥ ५३ ॥ तेशराहेमविकृतागांडीवप्रेषिताभृशं॥ द्रौणिमासाद्यविविशुर्वल्मीकमिवपन्नगाः ॥ ५४ ॥ सविद्धस्तैःशरैर्घोरैर्द्रोणपुत्रःप्रतापवान्॥ उत्सृज्यसमरेराजन्पांचाल्यममितौजसं॥ ५५ ॥ रथमारुरुहेवीरोधनंजयशरार्दितः॥ प्रगृह्यचधनुःश्रेष्ठंपार्थंविव्याधसायकैः॥ ५६॥ एतस्मिन्नंतरेवीरःसहदेवोजनाधिप ॥ अपोवाहरथेनाजौपार्षतंशत्रुतापनं॥ ५७॥ अर्जुनोपिमहाराजद्रौणिंविव्याधपत्रिभिः ॥ तंद्रोणपुत्रःसंक्रुद्धोवाह्वोरुरस्यचार्पयत्॥ ५८॥ क्रोधितस्तुरणेपार्थोनाराचंकालसंमितं॥ द्रोणपुत्रायचिक्षेपकालदंडमिवापरं॥ ५९॥ ब्राह्मणस्यांसदेशेसनिपपातमहाद्युतिः॥ सविह्वलोमहाराजशरवेगेनसंयुगे॥ ६०॥ निषसादरथोपस्थेवैक्लव्यंचपरंययौ॥ ततःकर्णोमहाराजव्याक्षिपद्विजयंधनुः॥ ६१ ॥ अर्जुनंसमरेक्रुद्धःप्रेक्षमाणोमुहुर्मुहुः॥ द्वैरथंचापिपार्थेनकामयानोमहारणे॥ ६२ ॥ विह्वलंतंतुवीक्ष्याथद्रोणपुत्रंचसारथिः॥ अपोवाहरथेनाजौत्वरमाणोरणाजिरात्॥ ६३ ॥ अथोत्कृष्टंमहाराजपंचालैर्जितकाशिभिः॥ मोक्षितंपार्षतंदृष्ट्वाद्रोणपुत्रंचपीडितं॥ ६४॥ वादित्राणिचदिव्यानिप्रावाद्यंतसहस्रशः॥ सिंहनादांश्चचक्रुस्तेदृष्ट्वासंख्येतदद्भुतं॥ ६५॥ एवंकृत्वाब्रवीत्पार्थोवासुदेवंधनंजयः॥ याहिसंशप्तकान्कृष्णकार्यमेतत्परंमम ॥ ६६ ॥ ततःप्रयातोदाशार्हःश्रुत्वापांडवभाषितं ॥ रथेनातिपताकेनमनोमारुतरंहसा॥ ६७॥ इतिश्रीमहाभारतेकर्णपर्वणिद्रौण्यपयानेऊनषष्टितमोऽध्यायः॥ ५९॥ ॥ ७॥ ॥ ७॥ संजयउवाच एतस्मिन्नंतरेकृष्णःपार्थवचनमब्रवीत्॥ दर्शयन्निवकौंतेयंधर्मराजंयुधिष्ठिरं॥ १ ॥ एषपांडवतेभ्राताधार्तराष्ट्रैर्महाबलैः॥ जिघांसुभिर्महेष्वासैर्द्रुतंपार्थानुसार्यते ॥ २॥ तंचानुयांतिसंरब्धाःपंचालायुद्धदुर्मदाः॥ युधिष्ठिरंमहात्मानंपरीप्संतोमहाबलाः॥ ३ ॥ एषदुर्योधनःपार्थरथानीकेनदंशितः॥ राजासर्वस्यलोकस्यराजानमनुधावति॥ ४॥ जिघांसुःपुरुषव्याघ्रभ्रातृभिःसहितोबली॥ आशीविषसमस्पर्शैःसर्वयुद्धविशारदैः॥ ५॥

ऽध्यायः ॥ ५९ ॥ ॥ ७ ॥ ॥ ७ ॥ एतस्मिन्निति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

नरोत्तमंवदान्यं रत्नोत्तममितिपाठे कांचनंतद्धिउत्कृष्टानांमध्येऽत्युत्तमं ॥६ ॥ जिहीर्षवोयुधिष्ठिरंहर्तुमिच्छंतः निरुद्धाःसंतोपिअधिष्ठिताः ॥ ७॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५॥ तस्ययुधिष्ठिरस्यकर्मकर्तव्यंपराजयाख्यं एभिर्दुर्योधनादिभिः कृतंनिष्पादितं ॥ १६ ॥ तत्रहेतुः ब्राह्मबलेक्षमायां क्षात्रेबलेनिष्ठुरत्वे ॥ १७ ॥१८॥१९॥२०॥ हतनाशयतेतिकर्णश्चोदयतीतिसंबंधः॥२१॥

एतेजिघृक्षवोयांतिद्विपाश्वरथपत्तयः॥ युधिष्ठिरंधार्तराष्ट्रानरोत्तममिवार्थिनः॥ ६॥ पश्यसात्वतभीमाभ्यांनिरुद्धाधिष्ठिताःपुनः ॥ जिहीर्षवोऽमृतंदैत्याःश क्राग्निभ्यामिवासकृत्॥ ७॥ एतेवहुत्वात्त्वरिताःपुनर्गच्छंतिपांडवं॥ समुद्रमिववार्योघाःप्रावृट्कालेमहारथाः ॥८ ॥ नदंतःसिंहनादांश्चधमंतश्चापिवारिजा न्॥ बलवंतोमहेष्वासाविधुन्वंतोधनूंषिच ॥ ९ ॥ मृत्योर्मुखगतंमन्येकुंतीपुत्रंयुधिष्ठिरं॥ हुतमग्नौचकौंतेयंदुर्योधनवशंगतं॥ १० ॥ यथाविधमनीकंतुधार्त्तरा ष्ट्रस्यपांडव॥ नास्यशक्रोपिमुच्येतसंप्राप्तोवाणगोचरं॥ ११ ॥ दुर्योधनस्यवीरस्यशरौघान्शीघ्रमस्यतः॥ संक्रुद्धस्यांतकस्येवकोवेगंसंसहेद्रणे॥१२॥ दुर्यो धनस्यवीरस्यद्रौणेःशारद्वतस्यच॥ कर्णस्यचेषुवेगोवैपर्वतानपिशातयेत्॥ १३॥ कर्णेनचकृतोराजाविमुखःशत्रुतापनः ॥ बलवांल्लघुहस्तश्चकृतीयुद्धविशा रदः॥ १४॥ राधेयःपांडवश्रेष्ठंशक्तःपीडयितुंरणे॥ सहितोधृतराष्ट्रस्यपुत्रैःशूरैर्महाबलैः॥ १५ ॥ तस्यैभिर्युध्यमानस्यसंग्रामेशंसितात्मनः ॥ अन्यैरपिचपा र्थस्यकृतंकर्ममहारथैः॥ १६॥ उपवासकृशोराजाभृशंभरतसत्तमः॥ ब्राह्मेबलेस्थितोह्येषनक्षात्रेहिबलेविभुः॥ १७॥ कर्णेनचाभियुक्तोयंभूपतिःशत्रुताप नः॥ संशयंसमनुप्राप्तःपांडवोवैयुधिष्ठिरः॥ १८॥ नजीवतिमहाराजोमन्येपार्थयुधिष्ठिरः॥ यद्भीमसेनःसहतेसिंहनादममर्षणः॥ १९ ॥ नर्दतांधार्तराष्ट्राणां पुनःपुनररिंदमः॥ धमतांचमहाशंखान्संग्रामेजितकाशिनां॥ २० ॥ युधिष्ठिरंपांडवेयंहतेतिभरतर्षभ॥ संचोदयत्यसौकर्णोधार्तराष्ट्रान्महाबलान्॥ २१ ॥ स्थू णाकर्णेंद्रजालेनपार्थपाशुपतेनच॥ प्रच्छादयंतिराजानंशस्त्रजालैर्महारथाः॥ २२॥ आतुरोहिकृतोराजासंनिषेव्यश्चभारत॥ यथैनमनुवर्ततेपंचालाःसहपां डवैः॥ २३॥ त्वरमाणास्त्वराकालेसर्वशस्त्रभृतांवरः॥ मज्जंतमिवपातालेबलिनोप्युज्जिहीर्षवः॥ २४॥ नकेतुर्दृश्यतेराज्ञःकर्णेननिहतःशरैः॥ पश्यतोर्यमयोः पार्थसात्यकेश्चशिखंडिनः॥ २५॥ धृष्टद्युम्नस्यभीमस्यशतानीकस्यवाविभो॥ पंचालानांचसर्वेषांचेदीनांचैवभारत॥ २६ ॥ एषकर्णोरणेपार्थपांडवानाम नीकिनीं॥ शरैर्विध्वंसयतिवैनलिनीमिवकुंजरः॥ २७॥ एतेद्रवंतिरथिनस्त्वदीयाःपांडुनंदन॥ पश्यपश्ययथापार्थगच्छंत्येतेमहारथाः॥ २८॥

स्थूणाकर्णोगंधर्वस्तस्यास्त्रंस्थूणाकर्णगांधर्वं इंद्रजालमयंतत् ॥ २२ ॥ निषेव्यःचिकित्स्यकैरागाध्यःसन्निषण्णइतिपाठेअवसन्नः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

॥ २९ ॥ ३०॥ हस्तिकक्ष्यांकेतुमिति संबंधः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ छत्रेणोपलक्षितः ॥४१ ॥ ४२ ॥ ४३ ॥ प्रार्थयन्युद्धमिति शेषः ॥ ४४ ॥

एतेभारतमातंगाःकर्णेनाभिहताःशरैः॥ आर्तनादान्विकुर्वाणाविद्रवंतिदिशोदश॥ २९॥ रथानांद्रवतेवृंदमेतच्चैवसमंततः॥द्राव्यमाणंरणेपार्थकर्णेनामि
त्रकर्षिणा॥३०॥ हस्तिकक्ष्यांरणेपश्यचरंतींतत्रतत्रह॥ रथस्थंसूतपुत्रस्यकेतुंकेतुमतांवर॥ ३१ ॥ असौधावतिराधेयोभीमसेनरथंप्रति॥ किरन्शरशतान्ये
वविनिघ्नंस्तववाहिनीं॥ ३२ ॥ एतान्पश्यचपंचालान्द्राव्यमाणान्महारथान्॥ शक्रेणेवयथादैत्यान्हन्यमानान्महाहवे ॥ ३३॥ एषकर्णोरणेजित्वापंचाला
न्पांडुसृंजयान्॥ दिशोविप्रेक्षतेसर्वास्त्वदर्थमितिमेमतिः॥ ३४॥ पश्यपार्थधनुःश्रेष्ठंविकर्षन्साधुशोभते॥ शत्रुंजित्वायथाशक्रोदेवसंघैःसमावृतः॥ ३५॥
एतेनर्दंतिकौरव्यादृष्ट्वाकर्णस्यविक्रमं॥त्रासयंतोरणेपांडून्सृंजयांश्चसमंततः॥३६॥ एषसर्वात्मनापांडूंस्त्रासयित्वामहारणे॥अभिभाषतिराधेयःसर्वसैन्या
निमानद॥ ३७॥ अभिद्रवतभद्रंवोद्रुतंद्रवतकौरवाः॥ यथाजीवन्नवःकश्चिन्मुच्येतयुधिसृंजयः॥ ३८॥ तथाकुरुतसंयत्तावयंयास्यामपृष्ठतः॥एवमुक्त्वा
गतोह्येषपृष्ठतोविकिरञ्छरान॥ ३९॥ पश्यकर्णंरणेपार्थश्वेतच्छत्रविराजितं॥ उदयंपर्वतंयद्वच्छशांकेनाभिशोभितं॥ ४० ॥ पूर्णचंद्रनिकाशेनमूर्ध्निच्छत्रे
णभारत॥ ध्रियमाणेनसमरेश्रीमच्छतशलाकिना॥ ४१ ॥ एषत्वांप्रेक्षतेकर्णःसकटाक्षंविशांपते॥ उत्तमंजवमास्थायध्रुवमेष्यतिसंयुगे॥ ४२ ॥ पश्यत्वेनं
महाबाहोविधुन्वानंमहद्धनुः॥ शरांश्चाशीविषाकारान्विसृजंतंमहारणे॥ ४३॥ असौनिवृत्तोराधेयोदृश्यतेवानरध्वज ॥ प्रार्थयन्समरंपार्थत्वयासहपरंतप॥
॥ ४४॥ वधायचात्मनोभ्येतिदीपास्यंशलभोयथा॥ कर्णमेकाकिनंदृष्ट्वारथानीकेनभारत॥ ४५॥ रिरक्षिषुःसुसंवृत्तोधार्तराष्ट्रोनिवर्तते ॥ सर्वैःसहैभिर्दुष्टा
त्मावध्यतांचप्रयत्नतः॥४६॥ त्वयायशश्चराज्यंचसुखंचोत्तममिच्छता॥ अदीनयोर्विश्रुतयोर्युवयोर्युध्यमानयोः॥ ४७॥ देवासुरेपार्थमृधेदेवदानवयोरि
व॥ पश्यंतुकौरवाःसर्वेतत्रपार्थपराक्रमं॥ ४८॥ त्वांचदृष्ट्वातिसंरब्धंकर्णंचभरतर्षभ॥ असौदुर्योधनःक्रुद्धोनोत्तरंप्रतिपद्यते॥४९॥आत्मानंचकृतात्मानंममर्ष
क्ष्यभरतर्षभ॥ कृतागसंचराधेयंधर्मात्मनियुधिष्ठिरे॥ प्रतिपद्यस्वकौंतेयप्राप्तकालमनंतरं ॥५०॥ आर्यायुद्धेमतिंकृत्वाप्रत्येहिरथयूथपं॥ पंचत्वेतानिमुख्या
निरथानांरथसत्तम॥ ५१ ॥ शतान्यायांतिसमरेबलिनांतिग्मतेजसां॥ पंचनागसहस्राणिद्विगुणावाजिनस्तथा॥ ५२॥

॥ ४५ ॥ ४६ ॥ युवयोःकर्णार्जुनयोः ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

अभिसंहत्यकौंतेयपदातिप्रयुतानिच ॥ अन्योन्यरक्षितंवीरबलंत्वामभिवर्तते ॥ ५३ ॥ द्रोणपुत्रंपुरस्कृत्यनच्छीघ्रंसंनिपत्य ॥ निकृत्यैनद्रथानीकंबलिनंलोक
विश्रुतं ॥ ५४ ॥ सूतपुत्रंमहेष्वासंदर्शयात्मानमात्मना ॥ उत्तमंजवमास्थायप्रत्येहिभरतर्षभ ॥ ५५ ॥ असौकर्णःसुसंरब्धःपंचालानभिधावति ॥ केतुमस्यहिप
श्यामिधृष्टद्युम्नरथंप्रति ॥ ५६ ॥ समुपैष्यतिपंचालानितिमन्येपरंतप ॥ आचचक्षेप्रियंपार्थतवेदंभरतर्षभ ॥ ५७ ॥ राजासौकुशलीश्रीमान्धर्मपुत्रोयुधिष्ठिरः
असौभीमोमहाबाहुःसन्निवृत्तश्चमूमुखे ॥ ५८ ॥ वृतःसृंजयसैन्येनशैनेयेनचभारत ॥ वध्यंतएतेसमरेकौरवानिशितैःशरैः ॥ ५९ ॥ भीमसेनेनकौंतेयपंचा
लैश्चमहात्मभिः ॥ सेनाहिधार्तराष्ट्रस्यविमुखाविद्रवद्रणा ॥ ६० ॥ विप्रधावतिवेगेनभीमस्याभिहताशरैः ॥ विपन्नसस्येवमहीरुधिरेणसमुक्षिता ॥ ६१ ॥ भा
रतीभरतश्रेष्ठसेनाकृपणदर्शना ॥ निवृत्तंपश्यकौंतेयभीमसेनंयुधांपतिं ॥ ६२ ॥ आशीविषमिवक्रुद्धंद्रावयंतंवरूथिनीं ॥ पीतरक्तासितसितास्ताराचंद्रार्कमं
डिताः ॥ ६३ ॥ पताकाविप्रकीर्यंतेछत्राण्येतानिचार्जुन ॥ सौवर्णाराजताश्चैवतैजसाश्चपृथग्विधाः ॥ ६४ ॥ केतवोभिनिपात्यंतेहस्त्यश्वंचप्रकीर्यते ॥ रथेभ्यः
प्रपतंत्येतेरथिनोविगतासवः ॥ ६५ ॥ नानावर्णैर्हताबाणैःपंचालैरपलायिभिः ॥ निर्मनुष्यान्गजानश्वान्रथांश्चैवधनंजय ॥ ६६ ॥ समाद्रवंतिपंचालाधार्तरा
ष्ट्रांस्तरस्विनः ॥ विमृद्नंतिनरव्याघ्राभीमसेनबलाश्रयात् ॥ ६७ ॥ बलंपरेषांदुर्धर्षास्त्यक्त्वाप्राणानरिंदम ॥ एतेनदंतिपंचालाध्मापयंतिचवारिजान् ॥ ६८ ॥ अ
भिद्रवंतिचरणेमृद्नंतःसायकैःपरान् ॥ पश्यस्वैपांचमाहात्म्यंपंचालाहिपराक्रमात् ॥ ६९ ॥ धार्तराष्ट्रान्विनिघ्नंतिक्रुद्धाःसिंहाइवद्विपान् ॥ शस्त्रमाच्छिद्यशत्रूणां
सायुधानांनिरायुधाः ॥ ७० ॥ तैनैवतानमोघास्त्रानिघ्नंतिचनदंतिच ॥ शिरांस्येतानिपात्यंतेशत्रूणांबाहवोपिच ॥ ७१ ॥ रथनागहयावीरायशस्याःसर्वएव
च ॥ सर्वतश्चाभिपन्नैषाधार्तराष्ट्रीमहाचमूः ॥ ७२ ॥ पंचालैर्मानसादेत्यहंसैर्गंगेववेगितैः ॥ सुभृशंचपराक्रांताःपंचालानांनिवारणे ॥ ७३ ॥ कृपकर्णादयोवी
राऋषभाणामिवर्षभाः ॥ भीमास्त्रेणसुनिर्भग्नान्धार्तराष्ट्रान्महारथान् ॥ ७४ ॥ धृष्टद्युम्नमुखावीराघ्नंतिशत्रून्सहस्रशः ॥ पंचालेष्वभिभूतेषुद्विपद्भिरपभीर्नदन्
॥ ७५ ॥ शत्रुपक्षमवस्कंद्यशरानस्यतिमारुतिः ॥ विपण्णभूयिष्ठनराधार्तराष्ट्रीमहाचमूः ॥ ७६ ॥ रथाश्वैतेसुवित्रस्ताभीमसेनभयार्दिताः ॥ पश्यभीमेननाराचै
र्भिन्नानागाःपतंत्यमी ॥ ७७ ॥ वज्रिवज्राहतानीवशिखराणिधराभृतां ॥ भीमसेनस्यनिर्विद्धाबाणैःसन्नतपर्वभिः ॥ ७८ ॥

स्वान्यनीकानिमृद्गंतोद्रवंत्येतेमहागजाः॥ अभिजानीहिभीमस्यसिंहनादंसुदुःसहं॥ ७९॥ नदतोर्जुनसंग्रामेवीरस्यजितकाशिनः॥ एषनैषादिरभ्येतिद्विपमुख्येनपांडवं॥ ८०॥ जिघांसुस्तोमरैःक्रुद्धोदंडपाणिरिवांतकः॥ सतोमरावस्यभुजौछिन्नौभीमेनगर्जतः॥ ८१॥ तीक्ष्णैरग्निरविप्रख्यैर्नाराचैर्दशभिर्हतः॥ हत्वैनंपुनरायातिनागानन्यान्प्रहारिणः॥ ८२॥ पश्यनीलांबुदनिभान्महामात्रैरधिष्ठितान्॥ शक्तितोमरसंघातैर्विनिघ्नंतंवृकोदरं॥ ८३॥ सप्तसप्तचनागांस्तान्वैजयंतीश्चसध्वजाः॥ निहत्यनिशितैर्बाणैश्छिन्नाःपार्थाग्रजेनते॥ ८४॥ दशभिर्दशभिश्चैकोनाराचैर्निहतोगजः॥ नचासौधार्तराष्ट्राणांश्रूयतेनिनदस्तथा॥ ८५॥ पुरंदरसमेक्रुद्धेनिवृत्तेभरतर्षभ॥ अक्षौहिण्यस्तथातिस्रोधार्तराष्ट्रस्यसंहताः॥ क्रुद्धेनभीमसेनेननरसिंहेनवारिताः॥ ८६॥ नशक्नुवंतिवैपार्थंपार्थिवाःसमुदीक्षितुं॥ मध्यंदिनगतंसूर्यंयथादुर्बलचक्षुषः॥ ८७॥ एतेभीमस्यसंत्रस्ताःसिंहस्येवेतरेमृगाः॥ शरैःसंत्रासिताःसंख्येनलभंतेसुखंकंचित्॥ ८८॥
संजयउवाच एतच्छ्रुत्वामहाबाहुर्वासुदेवाद्धनंजयः॥ भीमसेनेनतत्कर्मकृतंदृष्ट्वासुदुष्करं॥ ८९॥ अर्जुनोव्यधमच्छिष्टानहितान्निशितैःशरैः॥ तेवध्यमानाःसमरेसंशप्तकगणाःप्रभो॥ ९०॥ प्रभग्नाःसमरेभीतादिशोदशमहाबलाः॥ शक्रस्यातिथितांगत्वाविशोकाह्यभवंस्तदा॥ ९१॥ पार्थश्चपुरुषव्याघ्रःशरैःसन्नतपर्वभिः॥ जघानधार्तराष्ट्रस्यचतुर्विधबलांचमूं॥ ९२॥ इतिश्रीमहाभारतेकर्णपर्वणिकृष्णार्जुनसंवादेषष्टितमोऽध्यायः॥ ६०॥ ॥६१॥

धृतराष्ट्रउवाच निवृत्तेभीमसेनेचपांडवेचयुधिष्ठिरे॥ वध्यमानेबलेचापिमामकेपांडुसृंजयैः॥ १॥ द्रवमाणेबलौघेचनिरानंदेमुहुर्मुहुः॥ किमकुर्वंतकुरवस्तन्ममाचक्ष्वसंजय॥ २॥ संजयउवाच दृष्ट्वाभीमंमहाबाहुंसूतपुत्रःप्रतापवान्॥ क्रोधरक्तेक्षणोराजन्भीमसेनमुपाद्रवत्॥ ३॥ तावकंतुबलंदृष्ट्वाभीमसेनात्पराङ्मुखं॥ यत्नेनमहताराजन्पर्यवस्थापयद्बली॥ ४॥ व्यवस्थाप्यमहाबाहुस्तवपुत्रस्यवाहिनीं॥ प्रत्युद्ययौतदाकर्णःपांडवान्युद्धदुर्मदान्॥ ५॥ प्रत्युद्ययुस्तुराधेयंपांडवानांमहारथाः॥ धुन्वानाःकार्मुकाण्याजौविक्षिपंतश्चसायकान्॥ ६॥ भीमसेनःशिनेर्नप्ताशिखंडीजनमेजयः॥ धृष्टद्युम्नश्चबलवान्सर्वेचापिप्रभद्रकाः॥ ७॥ जिघांसंतोनरव्याघ्राःसमंतात्तववाहिनीं॥ अभ्यद्रवंतसंक्रुद्धाःसमरेजितकाशिनः॥ ८॥ तथैवतावकाराजन्पांडवानामनीकिनीं॥ अभ्यद्रवंतत्वरिताजिघांसंतोमहारथाः॥ ९॥ रथनागाश्वकलिलंपत्तिध्वजसमाकुलं॥ बभूवपुरुषव्याघ्रसैन्यमद्भुतदर्शनं॥ १०॥ ॥५॥६॥७॥८॥९॥१०॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

शिखंडीचययौकर्णंधृष्टद्युम्नःसुतंतव ॥ दुःशासनंमहाराजमहत्यासेनयावृतं ॥ ११ ॥ नकुलोवृषसेनंतुचित्रसेनंयुधिष्ठिरः ॥ उलूकंसमरेराजन्सहदेवःसमभ्य
यात् ॥ १२ ॥ सात्यकिःशकुनिंचापिद्रौपदेयाश्चकौरवान् ॥ अर्जुनंचरणेयत्तोद्रोणपुत्रोमहारथः ॥ १३ ॥ युधामन्युंमहेष्वासंगौतमोऽभ्यपतद्रणे ॥ कृतवर्माच
बलवानुत्तमौजसमाद्रवत् ॥ १४ ॥ भीमसेनःकुरून्सर्वान्पुत्रांश्चतवमारिष ॥ सहानीकान्महाबाहुरेकएवन्यवारयत् ॥ १५ ॥ शिखंडीतुततःकर्णंविचरंतमभीत
वत् ॥ भीष्महंतामहाराजवारयामासपत्रिभिः ॥ १६ ॥ प्रतिरुद्धस्ततःकर्णोरोषात्प्रस्फुरिताधरः ॥ शिखंडिनंत्रिभिर्बाणैर्भ्रुवोर्मध्येऽभ्यताडयत् ॥ १७ ॥ धारयंस्तु
सतान्बाणान्शिखंडीबहुशोभत ॥ राजतःपर्वतोयद्वत्त्रिभिःशृंगैरिवोच्छ्रितः ॥ १८ ॥ सोतिविद्धोमहेष्वासःसूतपुत्रेणसंयुगे ॥ कर्णंविव्याधसमरेनवत्यानिशितैः
शरैः ॥ १९ ॥ तस्यकर्णोहयान्हत्वासारथिंचत्रिभिःशरैः ॥ उन्ममाथध्वजंचास्यक्षुरप्रेणमहारथः ॥ २० ॥ हताश्वात्तुततोयानादवप्लुत्यमहारथः ॥ शक्तिंचिक्षे
पकर्णायसंक्रुद्धःशत्रुतापनः ॥ २१ ॥ तांछित्वासमरेकर्णस्त्रिभिर्भारतसायकैः ॥ शिखंडिनमथाविध्यन्नवभिर्निशितैःशरैः ॥ २२ ॥ कर्णचापच्युतान्बाणान्व
र्जयंस्तुनरोत्तमः ॥ अपयातस्ततस्तूर्णंशिखंडीभृशविक्षतः ॥ २३ ॥ ततःकर्णोमहाराजपांडुसैन्यान्यशातयत् ॥ तूलराशिंसमासाद्ययथावायुर्महाबलः ॥ २४ ॥
धृष्टद्युम्नोमहाराजतवपुत्रेणपीडितः ॥ दुःशासनंत्रिभिर्बाणैःप्रत्यविध्यत्स्तनांतरे ॥ २५ ॥ तस्यदुःशासनोबाहुंसव्यंविव्याधमारिष ॥ शितेनरुक्मपुंखेनभल्लेना
नतपर्वणा ॥ २६ ॥ धृष्टद्युम्नस्तुनिर्विद्धःशरंघोरममर्षणः ॥ दुःशासनायसंक्रुद्धःप्रेषयामासभारत ॥ २७ ॥ आपतंतंमहावेगंधृष्टद्युम्नसमीरितं ॥ शरैश्चिच्छेदपु
त्रस्तेत्रिभिरेवविशांपते ॥ २८ ॥ अथापरैःसप्तदशैर्भल्लैःकनकभूषणैः ॥ धृष्टद्युम्नंसमासाद्यबाह्वोरुरसिचार्पयत् ॥ २९ ॥ ततःसपार्षतःक्रुद्धोधनुश्चिच्छेदमारिष ॥
क्षुरप्रेणसुतीक्ष्णेनततउच्चुक्रुशुर्जनाः ॥ ३० ॥ अथान्यद्धनुरादायपुत्रस्तेप्रहसन्निव ॥ धृष्टद्युम्नंशरव्रातैःसमंतात्पर्यवारयत् ॥ ३१ ॥ तवपुत्रस्यतेदृष्ट्वाविक्रमंसु
महात्मनः ॥ व्यस्मयंतरणेयोधाःसिद्धाश्चाप्सरसांगणाः ॥ ३२ ॥ धृष्टद्युम्नंनपश्यामघटमानंमहाबलं ॥ दुःशासनेनसंरुद्धंसिंहेनेवमहागजं ॥ ३३ ॥ ततःसरथ
नागाश्वाःपंचालाःपांडुपूर्वज ॥ सेनापतिंपरीप्संतोरुरुधुस्तनयंतव ॥ ३४ ॥ ततःप्रववृतेयुद्धंतावकानांपरैःसह ॥ घोरंप्राणभृतांकालेभीमरूपंपरंतप ॥ ३५ ॥ न
कुलंवृषसेनस्तुभित्वापंचभिरायसैः ॥ पितुःसमीपेतिष्ठन्वैत्रिभिरन्यैरविध्यत ॥ ३६ ॥

नकुलस्तुततःशूरोवृपसेनंहसन्निव ॥ नाराचेनसुतीक्ष्णेनविव्याधहृदयेभृशं ॥ ३७ ॥ सोतिविद्धोबलवताशत्रुणाशत्रुकर्पण ॥ शत्रुंविव्याधविंशत्यासचतंपं
चभिःशरैः ॥ ३८ ॥ ततःशरसहस्रेणतावुभौपुरुपर्पभौ ॥ अन्योन्यमाच्छादयतामथोभज्यतवाहिनी ॥ ३९ ॥ महृत्वाप्रद्रुतांसेनांधार्तराष्ट्रस्यसूतजः ॥ निवारया
मासबलादनुसृत्यविशांपते ॥ ४० ॥ निवृत्तेतुततःकर्णेनकुलःकौरवान्ययौ ॥ कर्णपुत्रस्तुसमरेहित्वानकुलमेवतु ॥ ४१ ॥ जुगोपचक्रंत्वरितोराधेयस्यैवमारि
प ॥ उलूकस्तुरणेक्रुद्धःसहदेवेनवारितः ॥ ४२ ॥ तस्याश्वांश्चतुरोहत्वासहदेवःप्रतापवान् ॥ सारथिंप्रेषयामासयमस्यसदनंप्रति ॥ ४३ ॥ उलूकस्तुततोयानादव
पुत्यविशांपते ॥ त्रिगर्तानांबलंतूर्णंजगामपितृनंदनः ॥ ४४ ॥ सात्यकिःशकुनिंविध्वाविंशत्यानिशितैःशरैः ॥ ध्वजंचिच्छेदभल्लेनसौबलस्यहसन्निव ॥ ४५ ॥
सौबलस्तस्यसमरेक्रुद्धोराजन्प्रतापवान् ॥ विदार्यकवचंभूयोध्वजंचिच्छेदकांचनं ॥ ४६ ॥ तथैनंनिशितैर्बाणैःसात्यकिःप्रत्यविध्यत ॥ सारथिंचमहाराजत्रि
भिरेवसमार्पयत् ॥ ४७ ॥ अथास्यवाहांस्त्वरितःशरैर्निन्येयमक्षयं ॥ ततोवप्लुत्यसहसाशकुनिर्भरतर्पभ ॥ ४८ ॥ आरुरोहरथंतूर्णमुलूकस्यमहात्मनः ॥ अपोवा
हाथशीघ्रंसशैनेयाद्युद्धशालिनः ॥ ४९ ॥ सात्यकिस्तुरणेराजंस्तावकानामनीकिनीं ॥ अभिदुद्रावबेगेनततोनीकमभज्यत ॥ ५० ॥ शैनेयशरसंछन्नंतवसैन्यं
विशांपते ॥ भेजेदशदिशस्तूर्णंन्यपतच्चगतासुवत् ॥ ५१ ॥ भीमसेनंतवसुतोवारयामाससंयुगे ॥ तंतुभीमोमुहूर्त्तेनव्यश्वसूतरथध्वजं ॥ ५२ ॥ चक्रेलोकेश्वरंत
त्रतेनातुष्यंतवैजनाः ॥ ततोपायान्नृपस्तत्रभीमसेनस्यगोचरात् ॥ ५३ ॥ कुरुसैन्यंततःसर्वंभीमसेनमुपाद्रवत् ॥ तत्रनादोमहानासीद्भीमसेनंजिघांसतां ॥ ५४ ॥
युधामन्युःकृपंविध्वाधनुरस्याशुचिच्छिदे ॥ अथान्यद्धनुरादायकृपःशस्त्रभृतांवरः ॥ ५५ ॥ युधामन्योर्ध्वजंसूतंछत्रंचापातयत्क्षितौ ॥ ततोपायाद्रथेनैवयुधा
मन्युर्महारथः ॥ ५६ ॥ उत्तमौजाश्चहार्दिक्यंभीमंभीमपराक्रमं ॥ छादयामाससहसामेघोवृष्ट्येवपर्वतं ॥ ५७ ॥ तद्युद्धमासीत्सुमहद्घोररूपंपरंतप ॥ यादृशंनमया
युद्धदृष्टपूर्वंविशांपते ॥ ५८ ॥ कृतवर्माततोराजन्नुत्तमौजसमाहवे ॥ हृदिविव्याधसहसारथोपस्थउपाविशत् ॥ ५९ ॥ सारथिस्तमपोवाहरथेनरथिनांवरं ॥
कुरुसैन्यंततःसर्वंभीमसेनमुपाद्रवत् ॥ ६० ॥ दुःशासनःसौबलश्चगजानीकेनपांडवं ॥ महतापरिवार्यैवक्षुद्रकैरभ्यताडयत् ॥ ६१ ॥ ततोभीमःशरशतैर्दुर्योध
नममर्पणं ॥ विमुखीकृत्यतरसागजानीकमुपाद्रवत् ॥ ६२ ॥ तमापतंतंसहसागजानीकंवृकोदरः ॥ दृष्ट्वैवसुभृशंक्रुद्धोदिव्यमस्त्रमुदैरयत् ॥ ६३ ॥

॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ५ ॥ ॥ ५ ॥

गजैर्गजानभ्यहनद्वज्रेणेंद्रइवासुरान् ॥ ततोंतरिक्षंबाणौघैःशलभैरिवपादपं ॥ ६४ ॥ छादयामाससमरेगजान्निघ्नन्वृकोदरः ॥ ततःकुंजरयूथानिसमेतानि सहस्रशः ॥ ६५ ॥ व्यधमत्तरसाभीमोमेघसंघानिवानिलः ॥ सुवर्णजालापिहितामणिजालैश्चकुंजराः ॥ ६६ ॥ रेजुरभ्यधिकंसंख्येविद्युत्वंतइवांबुदाः ॥ तेव ध्यमानाभीमेनगजाराजन्विदुद्रुवुः ॥ ६७ ॥ केचिद्विभिन्नहृदयाःकुंजरान्यपतन्भुवि ॥ पतितैर्निपतद्भिश्चगजैर्हेमविभूषितैः ॥ ६८ ॥ अशोभतमहीतत्रविशी र्णैरिवपर्वतैः ॥ दीप्ताभैरत्नवद्भिश्चपतितैर्गजयोधिभिः ॥ ६९ ॥ रराजभूमिःपतितैःक्षीणपुण्यैरिवग्रहैः ॥ ततोभिन्नकटानागाभिन्नकुंभकरास्तथा ॥ ७० ॥ दु द्रुवुःशतशःसंख्येभीमसेनशराहताः ॥ केचिद्वमंतोरुधिरंभयार्ताःपर्वतोपमाः ॥ ७१ ॥ व्यद्रवन्क्षरविद्धांगाधातुचित्राइवाचलाः ॥ महाभुजगसंकाशौचंदना गुरुरूषितौ ॥ ७२ ॥ अपश्यंभीमसेनस्यधनुर्विक्षिपतोभुजौ ॥ तस्यज्यातलनिर्घोषंश्रुत्वाशनिसमस्वनं ॥ ७३ ॥ विमुंचंतःशकृन्मूत्रंगजाःप्राद्रवुर्भृशं ॥ भीम सेनस्यतत्कर्मराजन्नेकस्यधीमतः ॥ निघ्नतःसर्वभूतानिरुद्रस्येवचनिर्बभौ ॥ ७४ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेएकषष्टितमोऽध्यायः ॥ ६१ ॥

संजयउवाच ततःश्वेताश्वसंयुक्तेनारायणसमाहिते ॥ तिष्ठन्रथवरेश्रीमानर्जुनःसमपद्यत ॥ १ ॥ तद्बलंनृपतिश्रेष्ठतावकंविजयोरणे ॥ व्यक्षोभयदुदीर्णाश्वं महोदधिमिवानिलः ॥ २ ॥ दुर्योधनस्तवसुतःप्रमत्तेश्वेतवाहने ॥ अभ्येत्यसहसाक्रुद्धःसैन्यार्धेनाभिसंवृतः ॥ ३ ॥ पर्यवारयदायांतंयुधिष्ठिरममर्षणं ॥ क्षुरप्रा णांत्रिसप्तत्याततोविध्यतपांडवं ॥ ४ ॥ अक्रुध्यतभृशंतत्रकुंतीपुत्रोयुधिष्ठिरः ॥ सभल्लांस्त्रिंशतस्तूर्णंतवपुत्रेन्यवेशयत् ॥ ५ ॥ ततोधावंतकौरव्याजिघृक्षंतोयुधि ष्ठिरं ॥ दुष्टभावान्परान्ज्ञात्वासमवेतामहारथाः ॥ ६ ॥ आजग्मुस्तंपरीप्संतःकुंतीपुत्रंयुधिष्ठिरं ॥ नकुलःसहदेवश्चधृष्टद्युम्नश्चपार्षतः ॥ ७ ॥ अक्षौहिण्यापरिवृ तास्तेभ्यधावन्युधिष्ठिरं ॥ भीमसेनश्चसमरेमृद्नंस्तवमहारथान् ॥ ८ ॥ अभ्यधावदभिप्रेप्सूराजानंशत्रुभिर्वृतं ॥ तांस्तुसर्वान्महेष्वासान्कर्णोवैकर्तनोनृप ॥ ९ ॥ शरवर्षेणमहताप्रत्यवारयदागतान् ॥ शरौघान्विसृजंतस्तेप्रेरयंतश्चतोमरान् ॥ १० ॥ नशेकुर्यत्नवंतोपिराधेयंप्रतिवीक्षितुं ॥ तांश्चसर्वान्महेष्वासान्सर्वशस्त्रा स्त्रपारगः ॥ ११ ॥ महताशरवर्षेणराधेयःप्रत्यवारयत् ॥ दुर्योधनंचविंशत्याशीघ्रमस्त्रमुदीरयन् ॥ १२ ॥

ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

अविध्यत्तूर्णमभ्येत्यसहदेवःप्रतापवान्॥ सविद्धःसहदेवेनरराजाचलसन्निभः॥ १३ ॥ प्रभिन्नइवमातंगोरुधिरेणपरिप्लुतः ॥ दृष्ट्वातवसुतंतत्रगाढविद्धंसु तेजनैः॥ १४॥ अभ्यधावद्दृढंक्रुद्धोराधेयोरथिनांवरः॥ दुर्योधनंतथादृष्ट्वाशीघ्रमस्त्रमुदैरयत्॥ १५ ॥ तेनयौधिष्ठिरंसैन्यमवधीत्पार्षतंतथा ॥ ततोयौधिष्ठि रंसैन्यंवध्यमानंमहात्मना॥ १६॥ सहसाप्राद्रवद्राजन्सूतपुत्रशरार्दितं॥ विविधाविशिखास्तत्रसंपतंतःपरस्परं ॥ १७ ॥ फलैःपुंखान्समाजघ्नुःसूतपुत्रधनु श्च्युताः॥ अंतरिक्षेशरौघाणांपततांचपरस्परं॥ १८॥ संघर्षेणमहाराजपावकःसमजायत॥ ततोदशदिशःकर्णःशलभैरिवयायिभिः॥१९ ॥ अभ्यघ्नंस्तरसा राजन्शरैःपरशरीरगैः॥ रक्तचंदनसंदिग्धौमणिहेमविभूषितौ॥ २० ॥ बाहूव्यत्यक्षिपत्कर्णःपरमास्त्रंविदर्शयन्॥ ततःसर्वादिशोराजन्सायकैर्विप्रमोहयन्॥ ॥ २१ ॥ अपीडयद्भृशंकर्णोधर्मराजंयुधिष्ठिरं॥ ततःक्रुद्धोमहाराजधर्मपुत्रोयुधिष्ठिरः॥ २२ ॥ निशितैरिषुभिःकर्णपंचाशद्भिःसमार्पयत्॥बाणांधकारमभव त्तद्युद्धंघोरदर्शनं॥ २३ ॥ हाहाकारोमहानासीत्तावकानांविशांपते ॥ वध्यमानेतदासैन्येधर्मपुत्रेणमारिष ॥ २४॥ सायकैर्विविधैस्तीक्ष्णैःकंकपत्रैःशिला शितैः॥ भल्लैरनेकैर्विविधैःशक्त्यृष्टिमुसलैरपि॥ २५॥ यत्रयत्रसधर्मात्मादुष्टांदृष्टिंव्यसर्जयत् ॥ तत्रतत्रव्यशीर्यंततावकाभरतर्षभ ॥ २६ ॥ कर्णोपिभृशसं क्रुद्धोधर्मराजंयुधिष्ठिरं॥ नाराचैरर्धचंद्रैश्चवत्सदंतैश्चसंयुगे॥ २७॥ अमर्षीक्रोधनश्चैवरोषप्रस्फुरिताननः॥ सायकैरप्रमेयात्मायुधिष्ठिरमभिद्रवत्॥ २८॥ युधिष्ठिरश्चापिशतंस्वर्णपुंखैःशितैःशरैः॥ प्रहसन्निवतंकर्णःकंकपत्रैःशिलाशितैः॥ २९॥ उरस्यविध्यद्राजानंत्रिभिर्भल्लैश्चपांडवं॥ सपीडितोभृशंतेनधर्मरा जोयुधिष्ठिरः॥ ३० ॥उपविश्यरथोपस्थेसूतंयाहीत्यनोदयत्॥ अक्रोशंतततःसर्वेधार्तराष्ट्राःसराजकाः॥ ३१ ॥ गृह्णीध्वमितिराजानमभ्यधावंतसर्वशः॥ त तःशतासमदशकेकयानांप्रहारिणां॥ ३२ ॥ पंचालैःसहिताराजन्धार्तराष्ट्रान्न्यवारयन् ॥ तस्मिन्सुतुमुलेयुद्धेवर्तमानेजनक्षये॥ ३३ ॥ दुर्योधनश्चभीमश्च समेयातांमहाबलौ॥ ३४॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेद्विषष्टितमोऽध्यायः॥ ६२॥ संजयउवाच कर्णोपिशरजालेनकेकयानांमहार थान्॥ व्यधमत्परमेष्वासानग्रतःपर्यवस्थितान्॥ १ ॥ तेषांप्रयतमानानांराधेयस्यनिवारणे ॥ रथान्पंचशतान्कर्णःप्राहिणोद्यमसादनं॥ २॥

॥ १ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

अविषह्यंततोदृष्ट्वाराधेयंयुधियोधिनः ॥ भीमसेनमुपागच्छन्कर्णबाणप्रपीडिताः ॥ ३ ॥ रथानीकंविदार्यैवशरजालैरनेकधा ॥ कर्णएकरथेनैवयुधिष्ठिरमु
पाद्रवत् ॥ ४ ॥ सेनानिवेशमार्छंतंमार्गणैःक्षतविक्षतं ॥ यमयोर्मध्यगंवीरंशनैर्यांतंविचेतसं ॥ ५ ॥ समासाद्यतुराजानंदुर्योधनहितेप्सया ॥ सूतपुत्रस्त्रिभिस्ती
क्ष्णैर्विव्याधपरमेषुभिः ॥ ६ ॥ तथैवराजाराधेयंप्रत्यविध्यत्स्तनांतरे ॥ शरैस्त्रिभिश्चयंतारंचतुर्भिश्चतुरोहयान् ॥ ७ ॥ चक्ररक्षौतुपार्थस्यमाद्रीपुत्रौपरंतपौ ॥ ता
वप्यधावतांकर्णंराजानंमावधीरिति ॥ ८ ॥ तौपृथक्शरवर्षाभ्यांराधेयमभ्यवर्षतां ॥ नकुलःसहदेवश्चपरमंयत्नमास्थितौ ॥ ९ ॥ तथैवतौप्रत्यविध्यत्सूतपुत्रः
प्रतापवान् ॥ भल्लाभ्यांशितधाराभ्यांमहात्मानावरिंदमौ ॥ १० ॥ दंतवर्णांस्तुराधेयोनिजघानमनोजवान् ॥ युधिष्ठिरस्यसंग्रामेकालवालान्हयोत्तमान् ॥ ११ ॥
ततोपरेणभल्लेनशिरस्त्राणमपातयत् ॥ कौंतेयस्यमहेष्वासःप्रहसन्निवसूतजः ॥ १२ ॥ तथैवनकुलस्यापिहयान्हत्वाप्रतापवान् ॥ ईषांधनुश्चचिच्छेदमाद्रीपुत्र
स्यधीमतः ॥ १३ ॥ तौहताश्वौहतरथौपांडवौभृशविक्षतौ ॥ भ्रातरावारुरुहतुःसहदेवरथंतदा ॥ १४ ॥ तौदृष्ट्वामातुलस्तत्रविरथौपरवीरहा ॥ अभ्यभाषतरा
धेयंमद्रराजोनुकंपया ॥ १५ ॥ योद्धव्यमद्यपार्थेनफाल्गुनेनत्वयासह ॥ किमर्थंधर्मराजेनयुध्यसेभृशरोषित ॥ १६ ॥ क्षीणशस्त्रास्त्रकवचःक्षीणबाणोविबाण
धिः ॥ श्रांतसारथिवाहश्चच्छन्नोस्त्रैररिभिस्तथा ॥ १७ ॥ पार्थमासाद्यराधेयउपहास्योभविष्यसि ॥ एवमुक्तोपिकर्णस्तुमद्रराजेनसंयुगे ॥ १८ ॥ तथैवकर्णःसंरब्धो
युधिष्ठिरमताडयत् ॥ शरैस्तीक्ष्णैःपराविध्यमाद्रीपुत्रौचपांडवौ ॥ १९ ॥ प्रहस्यसमरेकर्णश्चकारविमुखंशरैः ॥ ततःशल्यःप्रहस्येदंकर्णंपुनरुवाचह ॥ २० ॥ र
थस्थमतिसंरब्धंयुधिष्ठिरवधेधृतं ॥ यदर्थंधार्तराष्ट्रेणसततंमानितोभवान् ॥ २१ ॥ तंपार्थंजहिराधेयकिंतेहत्वायुधिष्ठिरं ॥ शंखयोर्ध्मायतोःशब्दःसुमहाने
षकृष्णयोः ॥ २२ ॥ श्रूयतेचापघोषोयंप्रावृषीवांबुदस्यह ॥ असौनिघ्नन्रथोदारानर्जुनःशरवृष्टिभिः ॥ २३ ॥ सर्वांग्रसतिनःसेनांकर्णपश्यैनमाहवे ॥ पृष्ठरक्षौ
चशूरस्ययुधामन्यूत्तमौजसौ ॥ २४ ॥ उत्तरंचास्यवैशूरश्चक्रंरक्षतिसात्यकिः ॥ धृष्टद्युम्नस्तथाचास्यचक्रंरक्षतिदक्षिणं ॥ २५ ॥ भीमसेनश्चवैराज्ञाधार्तराष्ट्रे
णयुध्यते ॥ यथानहन्यात्तंभीमःसर्वेषांनोद्यपश्यतां ॥ २६ ॥ तथाराधेयक्रियतांराजामुच्येतनोयथा ॥ पश्यैनंभीमसेनेनग्रस्तमाहवशोभिनं ॥ २७ ॥ यदित्वा
साद्यमुच्येतविस्मयःसुमहान्भवेत् ॥ परित्रात्स्वेनमभ्येत्यसंशयंपरमंगतं ॥ किंनुमाद्रीसुतौहत्वाराजानंचयुधिष्ठिरं ॥ २८ ॥

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥३५॥३६ ॥ ३७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ ७ ॥ ॥ ७ ॥ द्रौणिरिति ॥ १ ॥ २ ॥ ३ ॥

इतिशल्यवचःश्रुत्वाराधेयःपृथिवीपते ॥ दृष्ट्वादुर्योधनंचैवभीमग्रस्तंमहाहवे ॥ २९ ॥ राजगृद्धीभृशंचैवशल्यवाक्यप्रचोदितः ॥ अजातशत्रुमुत्सृज्यमाद्रीपुत्रौचपांडवौ ॥ ३० ॥ तवपुत्रंपरित्रातुमभ्यधावतवीर्यवान् ॥ मद्रराजप्रणुदितैरश्वैराकाशगैरिव ॥ ३१ ॥ गतेकर्णेतुकौंतेयःपांडुपुत्रोयुधिष्ठिरः ॥ अप्रायाज्जवनैरश्वैःसहदेवश्चमारिष ॥ ३२ ॥ ताभ्यांससहितस्तूर्णंव्रीडन्निवनरेश्वरः ॥ प्राप्यसेनानिवेशंचमार्गणैःक्षतविक्षतः ॥३३ ॥ अवतीर्णोरथात्तूर्णमाविशच्छयनंशुभं ॥ अपनीतशल्यःसुभृशंहृच्छल्याभिनिपीडितः ॥ ३४ ॥ सोऽब्रवीद्भ्रातरौराजामाद्रीपुत्रौमहारथौ ॥ अनीकंभीमसेनस्यपांडवावाशुगच्छतां ॥ ३५ ॥ जीमूतइवनर्दंस्तुयुध्यतेसवृकोदरः ॥ ततोन्यंरथमास्थायनकुलोरथपुंगवः ॥ ३६ ॥ सहदेवश्चतेजस्वीभ्रातरौशत्रुकर्षणौ ॥ तुरगैरग्र्यरंहोभिर्यात्वाभीमस्यशुष्मिणौ ॥ अनीकैःसहितौतत्रभ्रातरौसमवस्थितौ ॥ ३७॥ इतिश्रीमहाभारतेकर्णपर्वणिधर्मापयानेत्रिषष्टितमोध्यायः ॥६३॥ ॥७॥ ॥ ७॥

संजयउवाच द्रौणिस्तुरथवंशेनमहतापरिवारितः ॥ अपतत्सहसाराजन्यत्रपार्थोव्यवस्थितः ॥ १ ॥ तमापतंतंसहसाशूरःशौरिसहायवान् ॥ दधारसहसापार्थोवेलेवमकरालयं ॥ २ ॥ ततःक्रुद्धोमहाराजद्रोणपुत्रःप्रतापवान ॥ अर्जुनंवासुदेवंचच्छादयामाससायकैः ॥ ३ ॥ अवच्छन्नौततःकृष्णौदृष्ट्वातत्रमहारथाः ॥ विस्मयंपरमंगत्वाप्रैक्षंतकुरवस्तदा ॥ ४ ॥ अर्जुनस्तुततोदिव्यमस्त्रंचक्रेहसन्निव ॥ तदस्त्रंवारयामासब्राह्मणोयुधिभारत ॥ ५ ॥ यद्यद्धिव्याक्षिपद्युद्धेपांडवोस्त्रंजिघांसया ॥ तत्तदस्त्रंमहेष्वासोद्रोणपुत्रोव्यशातयत् ॥ ६ ॥ अस्त्रयुद्धेततोराजन्वर्तमानेमहाभये ॥ अपश्यामरणेद्रौणिंव्यात्ताननमिवांतकं ॥ ७॥ सदिशःप्रदिशश्चैवच्छादयित्वाजिह्मगैः ॥ वासुदेवंत्रिभिर्बाणैरविध्यद्दक्षिणेभुजे ॥ ८ ॥ ततोर्जुनोहयान्हत्वासर्वांस्तस्यमहात्मनः ॥ चकारसमरेभूमिंशोणितौघतरंगिणीं ॥ ९ ॥ सर्वलोकवहांरौद्रांपरलोकवहांनदीं ॥ सरथान्रथिनःसर्वान्पार्थचापच्युतैःशरैः ॥ १० ॥ द्रौणेरपहतान्संख्येददृशुःसचतांतथा ॥ प्रावर्तयन्महाघोरांनदींपरवहांतदा ॥ ११ ॥ तयोस्तुव्याकुलेयुद्धेद्रौणेःपार्थस्यदारुणे ॥ अमर्यादंयोधयंतःपर्यधावंतपृष्ठतः ॥ १२॥ रथैर्हताश्वसूतैश्चहतारोहैश्चवाजिभिः ॥ द्विरदैश्चहतारोहैर्महामात्रैर्हतद्विपैः ॥ १३ ॥ पार्थेनसमरेराजन्कृतोघोरोजनक्षयः ॥ निहतारथिनःपेतुःपार्थचापच्युतैःशरैः ॥ १४ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ द्रौणेःसंबंधिनोरथिनः शरैरपहतान्ददृशुरित्युत्तरश्लोकेनसंबंधः लोकाइतिशेषः ॥ १० ॥ ११ ॥ १२ ॥ १३॥ ॥ १४ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

हयाश्वपर्यधावंतमुक्तयोक्त्रास्ततस्ततः ॥ तद्दृष्ट्वाकर्मपार्थस्यद्रौणिराहवशोभिनः ॥ १५ ॥ अर्जुनंजयतांश्रेष्ठंत्वरितोभ्येत्यवीर्यवान् ॥ विधुन्वानोमहच्चापंकार्तस्व
रविभूषितं ॥ १६ ॥ अवाकिरत्ततोद्रौणिःसमंतान्निशितैःशरैः ॥ भूयोर्जुनंमहाराजद्रौणिरायम्यपत्रिणा ॥ १७ ॥ वक्षोदेशेभृशंपार्थंताडयामासनिर्दयं ॥ सो
तिविद्धोरणेतेनद्रोणपुत्रेणभारत ॥ १८ ॥ गांडीवधन्वाप्रसभंशरवर्षैरुदारधीः ॥ संछाद्यसमरेद्रौणिंचिच्छेदास्यचकार्मुकं ॥ १९ ॥ सच्छिन्नधन्वापरिघंवज्र
स्पर्शसमंयुधि ॥ आदायचिक्षेपतदाद्रोणपुत्रःकिरीटिने ॥ २० ॥ तमापतंतंपरिघंजांबूनदपरिष्कृतं ॥ चिच्छेदसहसाराजन्प्रहसन्निवपांडवः ॥ २१ ॥ सपपात
तदाभूमौनिकृत्तःपार्थसायकैः ॥ विकीर्णःपर्वतोराजन्यथावज्रेणताडितः ॥ २२ ॥ ततःक्रुद्धोमहाराजद्रोणपुत्रोमहारथः ॥ ऐंद्रेणचास्त्रवेगेनबीभत्सुंसमवाकि
रत् ॥ २३ ॥ तस्येंद्रजालावततंसमीक्ष्यपार्थोराजन्गांडिवमाददेसः ॥ ऐंद्रंजालंप्रत्यहरत्तरस्वीवरास्त्रमादायमहेंद्रसृष्टं ॥ २४ ॥ विदार्यतज्जालमथैंद्रमुक्तंपार्थ
स्ततोद्रौणिरथंक्षणेन ॥ प्रच्छादयामासततोभ्युपेत्यद्रौणिस्तदापार्थशराभिभूतः ॥ २५ ॥ विगाह्यतांपांडवबाणवृष्टिंशरैःपरंनामततःप्रकाश्य ॥ शतेनकृष्णं
सहसाभ्यविद्ध्यत्त्रिभिःशतैरर्जुनंक्षुद्रकाणां ॥ २६ ॥ ततोर्जुनःसायकानांशतेनगुरोःसुतंमर्मसुनिर्बिभेद ॥ अश्वांश्वसूतंचतथाधनुर्ज्यामवाकिरत्पश्यतांताव
कानां ॥ २७ ॥ सविध्वामर्मसुद्रौणिंपांडवःपरवीरहा ॥ सारथिंचास्यभल्लेनरथनीडादपातयत् ॥ २८ ॥ ससंगृह्यस्वयंवाहान्कृष्णौप्राच्छादयच्छरैः ॥ तत्राद्भु
तमपश्यामद्रौणेराशुपराक्रमं ॥ २९ ॥ प्रायच्छत्तुरगान्यच्चफाल्गुनंचाप्ययोधयत् ॥ तदस्यसमरेराजन्सर्वेयोधाअपूजयन् ॥ ३० ॥ ततःप्रहस्यबीभत्सुर्द्रौण
पुत्रस्यसंयुगे ॥ क्षिप्रंरश्मीनथाश्वानांक्षुरप्रैश्चिच्छिदेजयः ॥ ३१ ॥ प्राद्रवंस्तुरगास्तेतुशरवेगप्रपीडिताः ॥ ततोभून्निनदोघोरस्तवसैन्यस्यभारत ॥ ३२ ॥ पां
डवास्तुजयंलब्ध्वातवसैन्यंसमाद्रवन् ॥ समंतान्निशितान्बाणान्विमुंचंतोजयैषिणः ॥ ३३ ॥ पांडवैस्तुमहाराजधार्तराष्ट्रीमहाचमूः ॥ पुनःपुनरथोवीरैःसंयुगे
जितकाशिभिः ॥ ३४ ॥ पश्यतांतेमहाराजपुत्राणांचित्रयोधिनां ॥ शकुनेःसौबलेयस्यकर्णस्यचविशांपते ॥ ३५ ॥ वार्यमाणामहासेनापुत्रैस्तवजनेश्वर ॥ न
चातिष्ठतसंग्रामेपीड्यमानासमंततः ॥ ३६ ॥ ततोयोधैर्महाराजपलायद्भिःसमंततः ॥ अभवद्व्याकुलंभीतंपुत्राणांतेमहद्बलं ॥ ३७ ॥ तिष्ठतिष्ठेतिचततःसूतपुत्र
स्यजल्पतः ॥ नावतिष्ठतिसासेनावध्यमानामहात्मभिः ॥ ३८ ॥ अथोत्क्रुष्टंमहाराजपांडवैर्जितकाशिभिः ॥ धार्तराष्ट्रबलंदृष्ट्वाविद्रुतंवैसमंततः ॥ ३९ ॥

ततोदुर्योधनःकर्णमब्रवीत्प्रणयादिव ॥ पश्यकर्णमहासेनापंचालैरर्दिताभृशं ॥ ४० ॥ त्वयितिष्ठतिसंत्रासात्पलायनपरायणा ॥ एतज्ज्ञात्वामहाबाहोकुरुष्वा
समरिंदम ॥ ४१ ॥ सहस्राणिचयोधानांत्वामेवपुरुषोत्तम ॥ क्रोशंतिसमरेवीरद्राव्यमाणानिपांडवैः ॥ ४२ ॥ एतच्छ्रुत्वापिराधेयोदुर्योधनवचोमहान् ॥ मद्र
राजमिदंवाक्यमब्रवीत्प्रहसन्निव ॥ ४३ ॥ पश्यमेभुजयोर्वीर्यमस्त्राणांचजनेश्वर ॥ अद्यहन्मिरणेसर्वान्पंचालान्पांडुभिःसह ॥ ४४ ॥ वाहयाश्वान्नरव्याघ्रभद्रे
णैवनसंशयः ॥ एवमुक्त्वामहाराजसूतपुत्रःप्रतापवान् ॥ ४५ ॥ प्रगृह्यविजयंवीरोधनुःश्रेष्ठंपुरातनं ॥ सज्जंकृत्वामहाराजसंमृज्यचपुनःपुनः ॥ ४६ ॥ सन्निवा
र्यचयोधान्स्वान्सत्येनशपथेनच ॥ प्रायोजयदमेयात्माभार्गवास्त्रंमहाबलः ॥ ४७ ॥ ततोराजन्सहस्राणिप्रयुतान्यर्बुदानिच ॥ कोटिशश्चशरास्तीक्ष्णानिरगच्छ
न्महामृधे ॥ ४८ ॥ ज्वलितैस्तैःशरैर्घोरैःकंकबर्हिणवाजितैः ॥ संछन्नापांडवीसेनानप्राज्ञायतकिंचन ॥ ४९ ॥ हाहाकारोमहानासीत्पंचालानांविशांपते ॥ पी
डितानांबलवताभार्गवास्त्रेणसंयुगे ॥ ५० ॥ निपतद्भिर्गजैराजन्नश्वैश्चापिसहस्रशः ॥ रथैश्चापिनरव्याघ्रनरैश्चैवसमंततः ॥ ५१ ॥ प्राकंपतमहीराजन्निहतैस्तैः
समंततः ॥ व्याकुलंसर्वमभवत्पांडवानांमहद्बलं ॥ ५२ ॥ कर्णस्त्वेकोयुधांश्रेष्ठोविधूमइवपावकः ॥ दहन्शत्रून्नरव्याघ्रशुशुभेसपरंतपः ॥ ५३ ॥ तेवध्यमानाः
कर्णेनपंचालाश्चेदिभिःसह ॥ तत्रतत्रव्यमुह्यंतवनदाहेयथाद्विपाः ॥ ५४ ॥ चुक्रुशुस्तेनरव्याघ्रयथाव्याघ्रानरोत्तमाः ॥ तेषांतुक्रोशतामासीद्भीतानांरणमूर्द्ध
नि ॥ ५५ ॥ धावतांचततोराजंस्त्रस्तानांचसमंततः ॥ आर्त्तनादोमहांस्तत्रभूतानामिवसंप्लवे ॥ ५६ ॥ वध्यमानांस्तुतान्दृष्ट्वासूतपुत्रेणमारिष ॥ वित्रेसुःसर्वभू
तानितिर्यग्योनिगतान्यपि ॥ ५७ ॥ तेवध्यमानाःसमरेसूतपुत्रेणसृंजयाः ॥ अर्जुनंवासुदेवंचक्रोशंतिचमुहुर्मुहुः ॥ ५८ ॥ प्रेतराजपुरेयद्वत्प्रेतराजंविचेतसः ॥
श्रुत्वातुनिनदंतेषांवध्यतांकर्णसायकैः ॥ ५९ ॥ अथाब्रवीद्वासुदेवंकुंतीपुत्रोधनंजयः ॥ भार्गवास्त्रंमहाघोरंदृष्ट्वातत्रसमीरितं ॥ ६० ॥ पश्यकृष्णमहाबाहोभा
र्गवास्त्रस्यविक्रमं ॥ नैतदस्त्रंहिसमरेशक्यंहंतुंकथंचन ॥ ६१ ॥ सूतपुत्रंचसंरब्धंपश्यकृष्णमहारणे ॥ अंतकप्रतिमंवीर्येकुर्वाणंकर्मदारुणं ॥ ६२ ॥ अभीक्ष्णंचो
दयन्नश्वान्प्रेक्षतेमांमुहुर्मुहुः ॥ नचपश्यामिसमरेकर्णंप्रतिपलायितुं ॥ ६३ ॥ जीवन्प्राप्नोतिपुरुषःसंख्येजयपराजयौ ॥ मृतस्यतुहृषीकेशभंगएवकुतोजयः ॥
॥ ६४ ॥ एवमुक्तस्तुपार्थेनकृष्णोमतिमतांवरः ॥ धनंजयमुवाचेदंप्राप्तकालमरिंदमं ॥ ६५ ॥

कृत्यपलायितुंनपश्यामिनिषिद्धत्वात् ॥ ६३ ॥ ६४ ॥ ६५ ॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ इतिकर्णपर्वणिनैलकण्ठीयेभारतभावदीपेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ६५ ॥ ॥ ६५ ॥ द्रौणिमिति ततोग्रधन्वाविस्तारितोग्रचापः ॥ १ ॥

कर्णेनदृढविद्धोराजाकुंतीपुत्रःपरिक्षतः ॥ तंदृष्ट्वाश्वास्यचपुनःकर्णंपार्थवधिष्यसि ॥ ६६ ॥ एवमुक्त्वापुनःप्रायाद्द्रष्टुमिच्छन्युधिष्ठिरं ॥ श्रमेणग्राहयिष्यंश्चयुद्धेक र्णंविशांपते ॥ ६७ ॥ ततोधनंजयोद्रष्टुंराजानंबाणपीडितं ॥ रथेनप्रययौक्षिप्रंसंग्रामात्केशवाज्ञया ॥ ६८ ॥ गच्छन्नेवतुकौंतेयोधर्मराजदिदृक्षया ॥ सैन्यमा लोकयामासनापश्यत्तत्रचाग्रजं ॥ ६९ ॥ युद्धंकृत्वातुकौंतेयोद्रोणपुत्रेणभारत ॥ दुःसहंवज्रिणासंख्येपराजित्यगुरोःसुतं ॥ ७० ॥ इतिश्रीमहाभारतेकर्णप र्वणिधर्मराजशोधनेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ६५ ॥ संजयउवाच द्रौणिंपराजित्यततोग्रधन्वाकृत्वामहद्दुष्करंशूरकर्म ॥ आलोकयामासत तःस्वसैन्यंधनंजयःशत्रुभिरप्रधृष्यः ॥ १ ॥ अयुध्यमानान्पृतनामुखस्थाञ्शूरःशूरान्हर्षयन्सव्यसाची ॥ पूर्वप्रहारैर्मथितान्प्रशंसन्स्थिरान्स्वरथानने कान् ॥ २ ॥ अपश्यमानस्तुकिरीटमालीयुधिष्ठिरंभ्रातरमाजमीढं ॥ उवाचभीमंतरसाभ्युपेत्यराज्ञःप्रवृत्तिंत्विहकुत्रराजा ॥ ३ ॥ भीमसेनउवाच अप यातइतोराजाधर्मपुत्रोयुधिष्ठिरः ॥ कर्णबाणाभितप्तांगोयदिजीवेत्कथंचन ॥ ४ ॥ अर्जुनउवाच तस्माद्भवाञ्शीघ्रमितःप्रयातुराज्ञःप्रवृत्त्यैकुरुस त्तमस्य ॥ नूनंसविद्धोतिभृशंपृषत्कैःकर्णेनराजाशिबिरंगतोसौ ॥ ५ ॥ यःसंप्रहारेनिशितैःपृषत्कैर्द्रोणेनविद्धोतिभृशंतरस्वी ॥ तस्थौसतत्रापिजयप्रतीक्षोद्रो णोपियावन्नहतःकिलासीत् ॥ ६ ॥ ससंशयंगमितःपांडवाग्र्यःसंख्येद्यकर्णेनमहानुभावः ॥ ज्ञातुंप्रयाह्याशुतमद्यभीमस्थास्याम्यहंशत्रुगणान्निरुध्य ॥ ७ ॥ भीमसेनउवाच त्वमेवजानीहिमहानुभावराज्ञःप्रवृत्तिंभरतर्षभस्य ॥ अहंहियद्यर्जुनयाम्यमित्रावदंतिमांभीतइतिप्रवीराः ॥ ८ ॥ ततोब्रवीदर्जुनोभीमसे नंसंशप्तकाःप्रत्यनीकस्थिताम ॥ एतानहत्वाद्यमयानशक्यमितोपयातुंरिपुसंघगोष्ठात् ॥ ९ ॥ अथाब्रवीदर्जुनंभीमसेनःस्ववीर्यमासाद्यकुरुप्रवीर ॥ संशप्तका न्प्रतियोत्स्यामिसंख्येसर्वानहंयाहिधनंजयत्वं ॥ १० ॥ तद्भीमसेनस्यवचोनिशम्यसुदुष्करंभ्रातुरमित्रमध्ये ॥ संशप्तकानीकमसह्यमेकःसुदुष्करंधारयामी तिपार्थः ॥ ११ ॥ उवाचनारायणमप्रमेयंकपिध्वजःसत्यपराक्रमस्य ॥ श्रुत्वावचोभ्रातुरदीनसत्वस्तदाहवेसत्यवचोमहात्मा ॥ द्रष्टुंकुरुश्रेष्ठमभिप्रयास्यन्प्रो वाचवृष्णिप्रवरंतदानीं ॥ १२ ॥ अर्जुनउवाच चोदयाश्वान्हृषीकेशविहायैतद्बलार्णवं ॥ अजातशत्रुंराजानंद्रष्टुमिच्छामिकेशव ॥ १३ ॥

अनेकानवहन ॥ २ ॥ उवाचतंपप्रच्छ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ गोष्ठात्स्थानात् ॥ ९ ॥ १० ॥ ११ ॥ भ्रातुर्वचःश्रुत्वातदेवसत्यंवचोनारायणंप्रतिकपिध्वजउवाचेत्यन्वयः ॥ १२ ॥ १३ ॥

॥ १४ ॥ १५ ॥ प्रत्यनीकेशत्रुसैन्यसमीपे ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥६५॥ ॥६५॥
स्वागतमिति भोअच्युतार्जुनौयुवयोर्दर्शनंमेगाढंप्रियं कुशलमितिपाठेयुवयोःकुशलंयत्तन्मेगाढंप्रियमितियोज्यं ॥ १ ॥ अरिष्टाभ्यांशुभाभ्यां ॥ २ ॥ ३ ॥ अनुज्ञातंअनुगृहीतं ॥ ४ ॥ ५ ॥ ६ ॥ अनला

संजयउवाच ततोहयान्सर्वदाशार्हमुख्यःप्रचोदयन्भीममुवाचचेदं ॥ नैतच्चित्रंतवकर्माद्यभीमयास्याम्यहंजहिपार्थारिसंघान् ॥ १४ ॥ ततोययौहृषीकेशो
यत्रराजायुधिष्ठिरः ॥ शीघ्राच्छीघ्रतरंराजन्वाजिभिर्गरुडोपमैः ॥ १५ ॥ प्रत्यनीकेव्यवस्थाप्यभीमसेनमरिंदमं ॥ संदिश्यचैनंराजेंद्रयुद्धंप्रतिवृकोदरं ॥ १६ ॥
ततस्तुगत्वापुरुषप्रवीरौराजानमासाद्यशयानमेकं ॥ रथादुभौप्रत्यवरुह्यतस्माद्ववंदतुर्धर्मराजस्यपादौ ॥ १७ ॥ तंदृष्ट्वापुरुषव्याघ्रंक्षेमिणंपुरुषर्षभं ॥ मुदाभ्यु
पगतौकृष्णावश्विनाविववासवं ॥ १८ ॥ तावभ्यनंदद्राजापिविवस्वानश्विनाविव ॥ हतेमहासुरेजंभेशक्रविष्णूयथागुरुः ॥ १९ ॥ मन्यमानोहतंकर्णंधर्मरा
जोयुधिष्ठिरः ॥ हर्षगद्गदयावाचाप्रीतःप्राहपरंतपः ॥ २० ॥ संजयउवाच अथोपयातौपृथुलोहिताक्षौशराचितांगौरुधिरप्रदिग्धौ ॥ समीक्ष्यसेनाग्रनर
प्रवीरौयुधिष्ठिरोवाक्यमिदंबभाषे ॥ २१ ॥ महासत्त्वौहितौदृष्ट्वासहितौकेशवार्जुनौ ॥ हतमाधिरथिंमेनेसंख्येगांडीवधन्वना ॥ २२ ॥ तावभ्यनंदत्कौंतेयःसा
म्नापरमवल्गुना ॥ स्मितपूर्वममित्रघ्नःपूजयन्भरतर्षभ ॥ २३ ॥ इतिश्रीमहाभारतेकर्णपर्वणियुधिष्ठिरंप्रतिकृष्णार्जुनगमनेपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥

युधिष्ठिरउवाच स्वागतंदेवकीमातःस्वागतंतेधनंजय ॥ प्रियंमेदर्शनंगाढंयुवयोरच्युतार्जुनौ ॥ १ ॥ अक्षताभ्यामरिष्टाभ्यांहतःकर्णोमहारथः ॥ आशीवि
षसमंयुद्धेसर्वशस्त्रविशारदं ॥ २ ॥ अग्रगंधार्तराष्ट्राणांसर्वेषांशर्मवर्मच ॥ रक्षितंवृषसेनेनसुषेणेनचधन्विना ॥ ३ ॥ अनुज्ञातंमहावीर्यंरामेणास्त्रेषुदुर्जयं ॥ अ
ग्र्यंसर्वस्यलोकस्यरथिनंलोकविश्रुतं ॥ ४ ॥ त्रातारंधार्तराष्ट्राणांगंतारंवाहिनीमुखे ॥ हंतारंपरसैन्यानाममित्रगणमर्दनम् ॥ ५ ॥ दुर्योधनहितेयुक्तमस्मद्दुःखा
यचोद्यतं ॥ अप्रधृष्यंमहायुद्धेदेवैरपिसवासवैः ॥ ६ ॥ अनलानिलयोस्तुल्यंतेजसाचबलेनच ॥ पातालमिवगंभीरंसुहृदानंदवर्धनं ॥ ७ ॥ अंतकंममामित्रा
णांहत्वाकर्णंमहामृधे ॥ दिष्ट्यायुवामनुप्राप्तौजित्वासुरमिवामरौ ॥ ८ ॥ घोरंयुद्धमदीनेनमयाह्यद्याच्युतार्जुनौ ॥ कृतंतेनांतकेनेवप्रजाःसर्वाजिघांसता ॥ ९ ॥
तेनकेतुश्चमेछिन्नोहतौचपार्ष्णिसारथी ॥ हतवाहस्ततश्चास्मियुयुधानस्यपश्यतः ॥ १० ॥

निलयोरितिक्रमात्तेजोबलाभ्यां ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ मरणेउपस्थितेसतियानःपलायितोस्मि वार्ध्राणसःमेषविशेषः यस्यनासापुटयोर्वर्ध्रासदृशंचर्मभवति द्विपःद्वाभ्यांवक्रकर्णाभ्यांपिबतीति द्विजइतिपाठे कृष्णग्रीवो

धृष्टद्युम्नस्ययमयोर्वीरस्यचशिखंडिनः ॥ पश्यतांद्रौपदेयानांपंचालानांचसर्वशः ॥ ११ ॥ एतान्जित्वामहावीर्यःकर्णःशत्रुगणान्बहून् ॥ जितवान्मांमहाबा
होयतमानोमहारणे ॥ १२ ॥ अभिसृत्यचभांयुद्धेपरुषाण्युक्तवान्बहु ॥ तत्रतत्रयुधांश्रेष्ठपरिभूयनसंशयः ॥ १३ ॥ भीमसेनप्रभावात्तुयज्जीवामिधनंजय ॥
बहुनात्रकिमुक्तेननाहंतत्सोढुमुत्सहे ॥ १४ ॥ त्रयोदशाहंवर्षाणियस्माद्भीतोधनंजय ॥ तस्मान्निद्रांलभेरात्रौनचाहनिसुखंक्वचित् ॥ १५ ॥ तस्यद्वेषेणसंयुक्तःप
रिदह्येधनंजय ॥ आत्मनोमरणंयानोवार्ध्राणसइवद्विपः ॥ १६ ॥ तस्यायमगमत्कालश्चिंतयानस्यमेचिरं ॥ कथंकर्णोमयाशक्योयुद्धेक्षपयितुंभवेत् ॥ १७ ॥
जाग्रत्स्वपंश्चकौंतेयकर्णमेवसदाह्यहं ॥ पश्यामितत्रतत्रैवकर्णभूतमिदंजगत् ॥ १८ ॥ यत्रयत्रहिगच्छामिकर्णाद्भीतोधनंजय ॥ तत्रतत्रहिपश्यामिकर्णमेवा
ग्रतःस्थितं ॥ १९ ॥ सोहंतेनैववीरेणसमरेष्वपलायिना ॥ सहयःसरथःपार्थजित्वाजीवन्विसर्जितः ॥ २० ॥ कोनुमेजीवितेनार्थोराज्येनार्थोभवेत्पुनः ॥ ममै
वंधिक्कृतस्याद्यकर्णेनाहवशोभिना ॥ २१ ॥ नप्राप्तपूर्वंयद्भीष्मात्कृपाद्द्रोणाच्चसंयुगे ॥ तत्प्राप्तमद्ययुद्धेमेसूतपुत्रान्महारथात् ॥ २२ ॥ सत्वांपृच्छामिकौंतेयय
थाद्यकुशलंतथा ॥ तन्ममाचक्ष्वकार्त्स्न्येनयथाकर्णोहतस्त्वया ॥ २३ ॥ शक्रतुल्यबलोयुद्धेयमतुल्यःपराक्रमे ॥ रामतुल्यस्तथास्त्रेणसकथंवैनिषूदितः ॥ २४ ॥
महारथःसमाख्यातःसर्वयुद्धविशारदः ॥ धनुर्धराणांप्रवरःसर्वेषामेकपूरुषः ॥ २५ ॥ पूजितोधृतराष्ट्रेणसपुत्रेणविशांपते ॥ त्वदर्थमेवराधेयःसकथंनिहतस्त्व
या ॥ २६ ॥ धार्तराष्ट्रोहियोधेषुसर्वेष्वेवसदार्जुन ॥ तवमृत्युंरणेकर्णमन्यतेपुरुषर्षभ ॥ २७ ॥ सत्वयापुरुषव्याघ्रकथंयुद्धेनिषूदितः ॥ तन्ममाचक्ष्वकौंतेययथा
कर्णोहतस्त्वया ॥ २८ ॥ युध्यमानस्यचशिरःपश्यतांसुहृदांहृतं ॥ त्वयापुरुषशार्दूलसिंहेनेवयथारुरोः ॥ २९ ॥ यःपर्युपासीत्प्रदिशोदिशश्चत्वांसूतपुत्रःसम
रेपरीप्सन् ॥ दित्सुःकर्णःसमरेहस्तिपद्मवंसहीदानींकंकपत्रैःसुतीक्ष्णैः ॥ ३० ॥ त्वयारणेनिहतःसूतपुत्रःकच्चिच्छेतेभूमितलेदुरात्मा ॥ प्रियश्चमेपरमोविकृतोयं
त्वयारणेसूतपुत्रंनिहत्य ॥ ३१ ॥ यःसर्वतःपर्यपतत्त्वदर्थेमदान्वितोगर्वितःसूतपुत्रः ॥ सशूरमानीसमरेसमेत्यकच्चित्त्वयानिहतःसंयुगेसौ ॥ ३२ ॥ रौक्मंवरंह
स्तिगजाश्वयुक्तंरथंप्रदित्सुर्यःपरेभ्यस्त्वदर्थे ॥ सदारणेस्पर्धतेयःसपापःकच्चित्त्वयानिहतस्तातयुद्धे ॥ ३३ ॥

रक्तशिराःश्वेतपक्षोविहंगमः सवैवार्ध्राणसःप्रोक्तोयाज्ञिकैःपितृकर्मणीतिपाठः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ अयंसूतपुत्रः ॥ ३१ ॥ ३२ ॥ ३३ ॥

॥३४॥ विहंगैर्बाणैः॥३५॥३६॥३७॥३८॥३९॥४०॥४१॥ बाणेभ्यःसमर्पितेनकर्णबाणैरत्यंतंप्रविद्धेनेत्यर्थः॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेषट्षष्टित

योसौसदाशूरमदेनमत्तोविकत्थतेसंसदिकौरवाणां॥ प्रियोत्यर्थंतस्यसुयोधनस्यकच्चित्सपापोनिहतस्त्वयाद्य॥ ३४ ॥ कच्चित्समागम्यधनुःप्रयुक्तैस्त्वत्प्रेषितैर्लोहितांगैर्विहंगैः॥ शेतेसपापःसुविभिन्नगात्रःकच्चिद्भग्नौधार्तराष्ट्रस्यबाहू॥ ३५ ॥ योसौसदाश्लाघतेराजमध्येदुर्योधनंहर्षयन्दर्पपूर्णः ॥ अहंहंताफाल्गुनस्येतिमोहात्कच्चिद्वचस्तस्यनवैतथातत्॥ ३६॥ नाहंपादौधावयिष्येकदाचिद्यावत्स्थितःपार्थइत्यल्पबुद्धेः॥ व्रतंतस्यैतत्सर्वदाशक्रसूनोकच्चित्त्वयानिहतःसोद्यकर्णः॥ ३७॥ योसौकृष्णामब्रवीद्दुष्टबुद्धिःकर्णःसभायांकुरुवीरमध्ये॥ किंपांडवांस्त्वंनजहासिकृष्णेसुदुर्बलान्पतितान्हीनसत्वान्॥ ३८ ॥ योसौकर्णःप्रत्यजानात्त्वदर्थेनाहंहत्वासहकृष्णेनपार्थं॥ इहोपयातेतिसपापबुद्धिःकच्चिच्छेतेशरसंभिन्नगात्रः॥ ३९ ॥ कच्चित्संग्रामोविदितोवैतवायंसमागमेसृंजयकौरवाणां॥ यत्रावस्थामीदृशींप्रापितोहंकच्चित्त्वयासोद्यहतोदुरात्मा॥४०॥ कच्चित्त्वयातस्यसुमंदबुद्धेर्गांडीवमुक्तैर्विशिखैर्ज्वलद्भिः॥ सकुंडलंभानुमदुत्तमांगंकायात्प्रकृत्तंयुधिसव्यसाचिन्॥ ४१ ॥ यत्तन्मयाबाणसमर्पितेनध्यातोसिकर्णस्यवधायवीर॥ तन्मेत्वयाकच्चिदमोघमद्यध्यानंकृतंकर्णनिपातनेन॥ ४२॥ यद्दर्पपूर्णःससुयोधनोस्मानुदीक्षतेकर्णसमाश्रयेण॥ कच्चित्त्वयासोद्यसमाश्रयोस्यभग्नःपराक्रम्यसुयोधनस्य॥ ४३ ॥ योनःपुराषंढतिलानवोचत्सभामध्येकौरवाणांसमक्षं॥ सदुर्मतिःकच्चिदुपेत्यसंख्येत्वयाहतःसूतपुत्रोत्यमर्षी॥ ४४॥ यःसूतपुत्रःप्रहसन्दुरात्मापुराब्रवीन्निर्जितांसौबलेन ॥ स्वयंप्रसह्यानययाज्ञसेनीमपीहकच्चित्सहतस्त्वयाद्य॥ ४५ ॥ यःशस्त्रभृच्छ्रेष्ठतमंपृथिव्यांपितामहंव्याक्षिपदल्पचेताः ॥ संख्यायमानोर्द्धरथःसकच्चित्त्वयाहतोद्याधिरथिर्महात्मन्॥ ॥ ४६॥ अमर्षजंनिकृतिसमीरणेरितंहृदिस्थितंज्वलनमिमंसदामम॥ हतोमयासोद्यसमेत्यकर्णइतिब्रुवन्प्रशमयसेद्यफाल्गुन॥ ४७॥ ब्रवीहिमेदुर्लभमेतदद्यकथंत्वयानिहतःसूतपुत्रः॥ अनुध्यायेत्वांसततंप्रवीरवृत्रेहतेसौभगवानिवेंद्रः॥ ४८॥ इ० महाभारतेकर्णपर्वणियुधिष्ठिरवाक्येषट्षष्टितमोध्यायः ६६

संजयउवाच तद्धर्मशीलस्यवचोनिशम्यराज्ञःक्रुद्धस्यातिरथोमहात्मा॥ उवाचदुर्धर्षमदीनसत्वंयुधिष्ठिरंजिष्णुरनंतवीर्यः॥ १ ॥ अर्जुनउवाच संशप्तकैर्युध्यमानस्यमेद्यसेनाग्रयायीकुरुसैन्यपुराजन्॥ आशीविषाभान्खगमान्प्रमुंचन्द्रौणिःपुरस्तात्सहसाभ्यतिष्ठत्॥ २॥

मोऽध्यायः ॥ ६६॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ तद्धर्मेति ॥ १ ॥ खगमान्बाणान् ॥ २ ॥

॥३॥ वध्यतांव ध्यमानानांकौरवाणांउज्जिहीर्षांउद्धर्तुमिच्छामकार्षान् ॥ ४ ॥५॥ अष्टौगावोयस्मिन्तदष्टागवंशकटंतेषामष्टागवामष्टअष्टसंख्यानिशकटानिनुडभावआर्षः॥शेनानिबाणान्अनेकशतसंख्या

दृष्ट्वारथंमेघरवंममैवसमस्तसेनावरणेभ्यतिष्ठत्॥ तेषामहंपंचशतानिहत्वाततोद्रौणिमगमंपार्थिवाग्र्य॥३॥समांसमासाद्यनरेंद्रयत्तःसमभ्ययास्तिंहमिवद्वि पेंद्रः ॥ अकार्षीच्चरथिनामुज्जिहीर्षांमहाराजवध्यतांकौरवाणां ॥ ४ ॥ ततोरणेभारतदुष्प्रकंप्यअचार्यपुत्रःप्रवरःकुरूणां ॥ मामर्दयामासशिनैःपृषत्कैर्जनार्दनंचैवविषाग्निकल्पैः ॥ ५ ॥ अष्टागवामष्टशतानिबाणान्मयाप्रयुद्धस्यवहंतितस्य ॥ तांस्तेनमुक्तानहमस्यबाणैर्व्यनाशयंवायुरिवाभ्रजालं ॥ ६ ॥ ततोपराण्बाणसंघाननेकानाकर्णपूर्णायतविप्रमुक्तान्॥ ससर्जशिक्षास्त्रबलप्रयत्नैस्तथाययथाप्रावृषिकालमेघः ॥ ७॥ नैवाददानंनचसंदधानंजानीमहेकतरेणास्यतीति ॥ वामेनवायदिवादक्षिणेनसद्रोणपुत्रःसमरेपर्यवर्तत् ॥ ८ ॥ तस्याततंमंडलमेवसज्यंप्रदृश्यतेकार्मुकंद्रोणसूनोः ॥सोविध्यन्मांपंचभिर्द्रोणपुत्रःशितैःशरैः पंचभिर्वासुदेवं ॥ ९ ॥ अहंहितंत्रिंशतावज्रकल्पैःसमार्दयंनिमिषस्यांतरेण ॥ क्षणान्श्वावित्समरूपोबभूवसमार्दितोमद्विसृष्टैःपृषत्कैः ॥ १० ॥ सविक्षरन्रुधिरंसर्वगात्रैरथानीकंसूतसूनोर्विवेश ॥ मयाभिभूतान्सैनिकानांप्रबर्हानसौप्रपश्यन्रुधिरप्रदिग्धान्॥ ११ ॥ ततोभिभूतंयुधिवीक्ष्यसैन्यंवित्रस्तयोधंद्रुतवाजिनागं॥ पंचाशतारथमुख्यैःसमेत्यकर्णस्त्वरन्मामुपयात्प्रमाथी ॥ १२ ॥ तान्सूदयित्वाहमपास्यकर्णंद्रष्टुंभवंतंत्वरयाभियातः ॥ सर्वेपंचालात्युद्विजंतेस्मकर्णंदृष्ट्वागावःकेसरिणंयथैव ॥ १३ ॥ मृत्योरास्यंव्यात्तमिवाभिपद्यप्रभद्रकाःकर्णमासाद्यराजन् ॥ रथांस्तुतान्सप्तशतान्निमग्नांस्तदाकर्णःप्राहिणोन्मृत्युसद्म ॥ ॥ १४ ॥ नचाप्यभूत्क्लांतमनाःसराजन्यावन्नास्मान्दृष्टवान्सूतपुत्रः ॥ श्रुत्वातुत्वांतेनदृष्टंसमेतमश्वत्थाम्नापूर्वतरंक्षतंच ॥ १५ ॥ मन्येकालमपयानस्यराजन्क्रूरात्कर्णात्तेहमचिंत्यकर्मन् ॥ मयाकर्णस्यास्त्रमिदंपुरस्ताद्युद्धेदृष्टंपांडवचित्ररूपं ॥ १६ ॥ नह्यन्ययोद्धाविद्यतेसृंजयानांमहारथंयोद्यसहेतकर्णं ॥ शैनेयोमेसात्यकिश्चक्ररक्षौधृष्टद्युम्नश्चापितथैवराजन् ॥ १७ ॥ युधामन्युश्चोत्तमौजाश्चशूरौपृष्ठतोमांरक्षतांराजपुत्रौ ॥ रथप्रवीरेणमहानुभावद्विषत्सैन्येवर्ततादुस्तरेण ॥ १८ ॥ समेत्याहंसूतपुत्रेणसंख्येवृत्रेणवज्रीवनरेंद्रमुख्य ॥ योत्स्याम्यहंभारतसूतपुत्रमस्मिन्संग्रामेयदिवैदृश्यतेद्य ॥ १९ ॥ आयाहिपश्याद्ययुयुत्समानंमांसूतपुत्रस्यरणेजयाय ॥ महर्षभस्येवमुखंप्रपन्नाःप्रभद्रकाःकर्णमभिद्रवंति ॥ २० ॥

न्वहंति ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ९ ॥ श्रुत्वाकर्णमितिस्पष्टार्थोष्टषष्टितमः ॥ १॥२॥३॥४॥५ ॥६ ॥ ७ ॥ ८ ॥ ९॥१०॥

षट्साहस्राभारतराजपुत्राःस्वर्गायलोकायरणेनिमग्नाः॥ कर्णनचेदद्यनिहन्मिराजन्सबांधवंयुध्यमानंप्रसह्य॥२१॥ प्रतिश्रुत्याकुर्वतोवैगतिर्याकष्टायाताता महंराजसिंह॥ आमंत्रयेत्वांब्रूहिजयंरणेमेपुराभीमंधार्तराष्ट्राग्रसंते॥ २२॥ सौतिंहनिष्यामिनरेंद्रसिंहसैन्यंतथाशत्रुगणांश्वसर्वान्॥ २३॥ इतिश्रीमहाभारतेकर्णपर्वणिअर्जुनवाक्येसप्तषष्टितमोऽध्यायः॥ ६७॥ ॥ ९॥ संजयउवाच श्रुत्वाकर्णंकल्यमुदारवीर्यंक्रुद्धःपार्थःफाल्गुनस्यामितौजाः॥ धनंजयंवाक्यमुवाचचेदंयुधिष्ठिरःकर्णशराभितप्तः॥ १॥ विप्रद्रुतातातचमूस्त्वदीयातिरस्कृताचाद्ययथानसाधु॥ भीतोभीमंत्यज्यचायास्तथात्वंयन्नाशकःकर्णमथोनिहंतुं॥ २॥ स्नेहस्त्वयापार्थकृतःपृथायागर्भेसमाविश्यययथानसाधु॥ त्यक्त्वारणेयदपायाःसभीमंयन्नाशकःसूतपुत्रंनिहंतुं॥ ३॥ यत्तद्वाक्यंद्वैतवनेत्वयोक्तंकर्णंहंतास्म्येकरथेनसत्यं॥ त्यक्त्वातंवैकथमद्यापयातःकर्णाद्भीतोर्भीमसेनंविहाय॥ ४॥ इदंयदिद्वैतवनेप्यवक्ष्यःकर्णंयोद्धुंनप्रशक्ष्येनृपेति॥ वयंततःप्राप्तकालंचसर्वेकृत्यान्युपैप्यामतथैवपार्थ॥ ५॥ मयिप्रतिश्रुत्यवधंहितस्यनवैकृतंतच्चतथैववीर॥ आनीयनःशत्रुमध्यंसकस्मात्समुत्क्षिप्यस्थंडिलेप्रत्यपिष्ठाः॥६॥ अप्याशिप्मवयमर्जुनत्वयियियासवोबहुकल्याणमिष्टं॥ तन्नःसर्वंविफलंराजपुत्रफलार्थिनांविफलइवातिपुष्पः॥ ७॥ प्रच्छादितंबडिशमिवामिषेण संच्छादितंगरलमिवाशनेन॥ अनर्थकंमेदर्शितवानसित्वंराज्यार्थिनोराज्यरूपंविनाशं॥ ८॥ त्रयोदशेमाहिसमाःसदावयंत्वामन्वजीविष्मधनंजयाशया॥ कालेवर्षंदेवमिवोप्तबीजंतन्नःसर्वान्नरकेत्वंन्यमज्जः॥ ९॥ यत्तत्पृथांवागुवाचांतरिक्षेसप्ताहजातेत्वयिमंदबुद्धौ॥ जातःपुत्रोवासवविक्रमोयंसर्वाञ्छूरान्शात्रवान्जेष्यतीति॥ १०॥ अयंजेताखांडवेदेवसंघान्सर्वाणिभूतान्यपिचोत्तमौजाः॥ अयंजेतामद्रकलिंगकेकयानयंकुरूनराजमध्येनिहंता॥ ११॥ अस्मात्परोनोभविताधनुर्धरोनैनंभूतंकिंचनजातुजेता॥ इच्छन्नयंसर्वभूतानिकुर्याद्वशेवशीसर्वसमाप्तविद्यः॥ १२॥ कांत्याशशांकस्यजवेनवायोःस्थैर्येणमेरोःक्षमयापृथिव्याः॥ सूर्यस्यभासाधनदस्यलक्ष्म्याशौर्येणशक्रस्यबलेनविष्णोः॥ १३॥ तुल्योमहात्मातवकुंतिपुत्रोजातोऽदितेर्विष्णुरिवारिहंता॥ स्वेषांजयायद्विषतांवधायख्यातोमितौजाःकुलतंतुकर्ता॥ १४॥ इत्यंतरिक्षेशतशृंगमूर्ध्निंतपस्विनांश्रृण्वतांवागुवाच॥ एवंविधंतच्चनाभूत्तथाचदेवापिनूनमनृतंवदंति॥ ॥ १५॥ तथापरेपामृषिसत्तमानांश्रुत्वागिरःपूजयतांसदात्वां॥ नसंनतिंप्रैमिसुयोधनस्यनत्वांजानाम्याधिरथेर्भयार्तं॥ १६॥ ॥११॥१२॥१३॥१४॥१५॥१६॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेअष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ७ ॥

पूर्वंयदुक्तंहिसुयोधनेननफाल्गुनःप्रमुखेस्यास्यतीति ॥ कर्णस्ययुद्धेहिमहाबलस्यमौर्ख्यात्तुतन्नावबुद्धंमयासीत् ॥ १७ ॥ तेनाद्यतप्स्येभृशमप्रमेयंयच्छत्रुवर्गे नरकंप्रविष्टः ॥ तदैववाच्योस्मिननुत्वयाहंनयोत्स्येहंसूतपुत्रंकथंचित् ॥ १८ ॥ ततोनाहंसृंजयान्केकयांश्चसमानयेयंसुहृदोरणाय ॥ एवंगतेकिंचमयाद्यशक्यंकार्यंकर्तुंविग्रहेसूतजस्य ॥ १९ ॥ तथैवराज्ञश्चसुयोधनस्ययेवापिमांयोद्धुकामाःसमेताः ॥ धिगस्तुमज्जीवितमद्यकृष्णयोहंवशंसूतपुत्रस्ययातः ॥ २० ॥ मध्येकुरूणांसुहृदांचमध्येयेचाप्यन्येयोद्धुकामाःसमेताः ॥ यदिस्मजीवेत्सभवेन्निहंतामहारथानांप्रवरोरथोत्तमः ॥ तवाभिमन्युस्तनयोद्यपार्थनचास्मिगंतासमरेपराभवं ॥ २१ ॥ अथापिजीवेत्समरेघटोत्कचस्तथापिनाहंसमरेपराङ्मुखः ॥ ममत्वभाग्यानिपुराकृतानिपापानिनूनंबलवंतियुद्धे ॥ २२ ॥ तृणंचकृत्वासमरेभवंततोहमेवंनिकृतोदुरात्मना ॥ वैकर्तनेनैवतथाकृतोहंयथात्यशक्तःक्रियतेत्यबांधवः ॥ २३ ॥ आपद्गतंकश्चनयोविमोक्षेत्सबांधवःस्नेहयुक्तंसुहृच्च ॥ एवंपुराणामुनयोवदंतिधर्मःसदासद्भिरनुष्ठितश्च ॥ २४ ॥ त्वष्ट्राकृतंवाहमकूजनाक्षंशुभंसमास्थायकपिध्वजंतं ॥ खड्गंगृहीत्वाहेमपट्टानुबद्धंधनुश्चेदंगांडिवंतालमात्रं ॥ २५ ॥ सकेशवेनोह्यमानःकथंत्वंकर्णाद्भीतोव्यपयातोसिपार्थ ॥ धनुश्चतत्केशवायप्रयच्छयंताभविष्यस्त्वंरणेकेशवस्य ॥ २६ ॥ तदाहनिष्यत्केशवःकर्णमुग्रंमरुत्पतिर्वृत्रमिवात्तवज्रः ॥ राधेयमेतंयदिनाद्यशक्तश्चरंतमुग्रंप्रतिबाधनाय ॥ २७ ॥ प्रयच्छान्यस्मैगांडिवमेतदद्यत्वत्तोयोस्त्रैरभ्यधिकोवानरेंद्रः ॥ अस्मान्नैवंपुत्रदारैर्विहीनान्सुखाद्भ्रष्टान्राज्यनाशाच्चभूयः ॥ २८ ॥ द्रष्टालोकःपतितानप्यगाधेपापैर्जुष्टेनरकेपांडवेय ॥ मासेऽपतिष्यःपंचमेत्वंसुकृच्छ्रेनवागर्भेआभविष्यःपृथायाः ॥ २९ ॥ तत्तेश्रेयोराजपुत्राभविष्यन्नचेत्संग्रामादपयानंदुरात्मन् ॥ धिग्गांडीवंधिक्चतेबाहुवीर्यमसंख्येयान्बाणगणांश्चधिक्ते ॥ धिक्तेकेतुंकेसरिणःसुतस्यकृशानुदत्तंचरथंचधिक्ते ॥ ३० ॥ इतिश्रीमहाभारतेकर्णपर्वणियुधिष्ठिरक्रोधवाक्येअष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ ६९ ॥ संजयउवाच

युधिष्ठिरेणैवमुक्तःकौंतेयःश्वेतवाहनः ॥ असिंजग्राहसंक्रुद्धोजिघांसुर्भरतर्षभं ॥ १ ॥ तस्यकोपंसमुद्वीक्ष्यचित्तज्ञःकेशवस्तदा ॥ उवाचकिमिदंपार्थगृहीतःखड्गइत्युत ॥ २ ॥ नहिपश्यामियोद्धव्यंत्वयाकिंचिद्धनंजय ॥ तेग्रस्ताधार्तराष्ट्राहिभीमसेनेनधीमता ॥ ३ ॥

युधिष्ठिरेणेति ॥ १ ॥ २ ॥ ३ ॥

॥ ४ ॥ ५ ॥ ६ ॥७ ॥८॥९॥१० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ भवान्यत्संरंभंअगान्तत्कालेनअकालेइत्यर्थः ॥१६ ॥ १७ ॥ कर्तुमयोग्यानांकर्मणांसंयोगंकर्तुंयोग्यानामपिअक्रियाणांनि

अपयातोसिकौंतेयराजाद्रष्टव्यइत्यपि ॥ सराजाभवतादृष्टःकुशलीचयुधिष्ठिरः ॥४॥ सदृष्ट्वानृपशार्दूलंशार्दूलसमविक्रमं ॥ हर्षकालेचसंप्राप्तेकिमिदंमोहकारितं ॥ ५ ॥ नतंपश्यामिकौंतेययस्तेवध्योभविष्यति ॥ प्रहर्तुमिच्छसेकस्मात्किंवानेचित्तविभ्रमः ॥ ६ ॥ कस्माद्भवान्महाखड्गंपरिगृह्णातिसत्वरः ॥ तत्त्वांपृच्छामिकौंतेयकिमिदंतेचिकीर्षितं ॥ ७ ॥ परामृशसियत्क्रुद्धःखड्गमद्भुतविक्रम ॥ एवमुक्तस्तुकृष्णेनप्रेक्षमाणोयुधिष्ठिरं ॥ ८ ॥ अर्जुनःप्राहगोविंदंक्रुद्धःसर्पइवश्वसन् ॥ अन्यस्मैदेहिगांडीवमितिमांयोभिचोदयेत् ॥ ९ ॥ भिंद्यामहंतस्यशिरइत्युपांशुव्रतंमम ॥ तदुक्तंममचानेनराज्ञामितपराक्रम ॥ १० ॥ समक्षंतवगोविंदनतत्क्षंतुमिहोत्सहे ॥ तस्माद्देनंवधिष्यामिराजानंधर्मभीरुकं ॥ ११ ॥ प्रतिज्ञांपालयिष्यामिहत्वैनंनरसत्तमं ॥ एतदर्थंमयाखड्गोगृहीतोयदुनंदन ॥ १२ ॥ सोहंयुधिष्ठिरंहत्वासत्यस्यानृण्यतांगतः ॥ विशोकोविज्वरश्चापिभविष्यामिजनार्दन ॥ १३ ॥ किंवात्वंमन्यसेप्राप्तमस्मिन्कालउपस्थिते ॥ त्वमस्यजगतस्तातवेत्थसर्वंगतागतं ॥ १४ ॥ तत्तथाप्रकरिष्यामियथामांवक्ष्यतेभवान् ॥ संजयउवाच धिग्धिगित्येवगोविंदःपार्थमुक्त्वाब्रवीत्पुनः ॥ १५ ॥ कृष्णउवाच इदानींपार्थजानामिनवृद्धाःसेवितास्त्वया ॥ कालेनपुरुषव्याघ्रसंरंभंयद्भवानगात् ॥ १६ ॥ नहिधर्मविभागज्ञःकुर्यादेवंधनंजय ॥ यथात्वंपांडवाद्येहधर्मभीरुरपंडितः ॥ १७ ॥ अकार्याणांक्रियाणांचसंयोगंयःकरोतिवै ॥ कार्याणामक्रियाणांचसपार्थपुरुषाधमः ॥ १८ ॥ अनुसृत्यतुयेधर्मंकथयेयुरुपस्थिताः ॥ समासविस्तरविदांनतेषांवेत्सिनिश्चयं ॥ १९ ॥ अनिश्चयज्ञोहिनरःकार्याकार्यविनिश्चये ॥ अवशोमुह्यतेपार्थयथात्वंमूढएवतु ॥ २० ॥ नहिकार्यमकार्यंवासुखंज्ञातुंकथंचन ॥ श्रुतेनज्ञायतेसर्वंतच्चत्वंनावबुध्यसे ॥ २१ ॥ अविज्ञानाद्भवान्यच्चधर्मंरक्षतिधर्मवित् ॥ प्राणिनांत्वंवधंपार्थधार्मिकोनावबुध्यसे ॥ २२ ॥ प्राणिनामवधस्तातसर्वज्यायान्मतोमम ॥ अनृतांवावदेद्वाचंनतुहिंस्यात्कथंचन ॥ २३ ॥ सकथंभ्रातरंज्येष्ठंराजानंधर्मकोविदं ॥ हन्याद्भवान्नरश्रेष्ठप्राकृतोन्यःपुमानिव ॥ २४ ॥ अयुध्यमानस्यवधस्तथाऽशत्रोश्चमानद ॥ पराङ्मुखस्यद्रवतःशरणंचापिगच्छतः ॥ २५ ॥

षिद्धक्रियाणांसंयोगंयःकरोतिसपुरुषाधमइत्याह अकार्याणामिति ॥ १८ ॥ उपस्थिताःशिष्यैरनुसृताःगुरवः ॥ १९ ॥ २० ॥ सुखं अनधीत्येत्यर्थः श्रुतेनशास्त्रेण ॥ २१ ॥ यत्भवान्धर्मंरक्षतितद्विज्ञानात् अधर्ममेवधर्ममनुषेइत्यर्थः यतःप्राणिनांवधंदोषकरंइत्येतन्नावबुध्यसे ॥ २२ ॥ २३ ॥ २४ ॥ अशत्रोःअगारनीयस्यअवध्यस्य ॥ २५ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३०॥ सत्यंतत्त्वेनयाथातथ्येनसुदुर्ज्ञेयंपश्यकचित्सत्यमप्यधर्मायभवतीत्यर्थः ॥ ३१ ॥ ३२ ॥ ३३ ॥ यस्ययेनहेतुनासत्यमेवसत्यतयाअनुष्ठितंतादृशमेवपश्यतिसत्यवा

कृतांजलेःप्रपन्नस्यप्रमत्तस्यतथैवच ॥ नवधःपूज्यतेसद्भिस्तच्चसर्वंगुरौनव ॥ २६ ॥ त्वयाचैवंव्रतंपार्थबालेनैवकृतंपुरा ॥ तस्माद्धर्मसंयुक्तंमौर्ख्यात्कर्मव्यव स्यसि ॥ २७ ॥ सगुरुंपार्थकस्मात्त्वंहंतुकामोभिधावसि ॥ असंप्रधार्यधर्माणांगतिंसूक्ष्मांदुरत्ययां ॥ २८ ॥ इदंधर्मरहस्यंचनववक्ष्यामिपांडव ॥ यद्ब्रूयात्तव भीष्मोहिपांडवोवायुधिष्ठिरः ॥ २९ ॥ विदुरोवातथाक्षत्ताकुंतीवापियशस्विनी ॥ तत्तेवक्ष्यामितत्त्वेननिबोधैतद्धनंजय ॥ ३० ॥ सत्यस्यवदितासाधुर्नसत्याद्वि द्यतेपरं ॥ तत्त्वेनैवसुदुर्ज्ञेयंपश्यसत्यमनुष्ठितं ॥ ३१ ॥ भवेत्सत्यमवक्तव्यंवक्तव्यमनृतंभवेत् ॥ यत्रानृतंभवेत्सत्यंसत्यंचाप्यनृतंभवेत् ॥ ३२ ॥ विवाहकालेरति संप्रयोगेप्राणात्ययेसर्वधनापहारे ॥ विप्रस्यचार्थेह्यनृतंवदेतपंचानृतान्याहुरपातकानि ॥ ३३ ॥ सर्वस्वस्यापहारेतुवक्तव्यमनृतंभवेत् ॥ तत्रानृतंभवेत्सत्यंस त्यंचाप्यनृतंभवेत् ॥ तादृशंपश्यतेबालोयस्यसत्यमनुष्ठितं ॥ ३४ ॥ भवेत्सत्यमवक्तव्यंनवक्तव्यमनुष्ठितं ॥ सत्यानृतेविनिश्चित्यततोभवतिधर्मवित् ॥ ३५ ॥ किमाश्चर्यंकृतप्रज्ञःपुरुषोपिसुदारुणः ॥ सुमहत्प्राप्नुयात्पुण्यंबलाकोंधवधादिव ॥ ३६ ॥ किमाश्चर्यंपुनर्मूढोधर्मकामोह्यपंडितः ॥ सुमहत्प्राप्नुयात्पापमाप गास्विवकौशिकः ॥ ३७ ॥ अर्जुनउवाच आचक्ष्वभगवन्नेनयथाविंदाम्यहंतथा ॥ बलाकस्यानुसंबद्धंनदीनांकौशिकस्यच ॥ ३८ ॥ वासुदेवउ वाच पुराव्याधोभवत्कश्चिद्बलाकोनामभारत ॥ यात्रार्थंपुत्रदारस्यमृगान्हंतिनकामतः ॥ ३९ ॥ वृद्धौचमातापितरौबिभर्त्यन्यांश्चसंश्रितान् ॥ स्वधर्म निरतोनित्यंसत्यवागनसूयकः ॥ ४० ॥ सकदाचिन्मृगंलिप्सुर्नान्वविंदन्मृगंक्वचित् ॥ अपःपिबंतंददृशेश्वापदंघ्राणचक्षुषं ॥ ४१ ॥ अदृष्टपूर्वमपितत्सत्वंतेनहतंतदा ॥ अंधेहतेततोव्योम्नःपुष्पवर्षंपपातच ॥ ४२ ॥ अप्सरोगीतवादित्रैर्नादितंचमनोरमं ॥ विमानमगमत्स्वर्गान्मृगव्याधनिनीषया ॥ ४३ ॥ तद्भूतंसर्वभूता नामभावायकिलार्जुन ॥ तपस्तप्त्वावरंप्राप्तंकृतमंधंस्वयंभुवा ॥ ४४ ॥ तद्धत्वासर्वभूतानामभावकृतनिश्चयं ॥ ततोबलाकःस्वरगादेवंधर्मःसुदुर्विदः ॥ ४५ ॥ कौशिकोप्यभवद्विप्रस्तपस्वीनोबहुश्रुतः ॥ नदीनांसंगमेग्रामाददूरात्सकिलावसत् ॥ ४६ ॥ सत्यंमयासदावाच्यमितितस्याभवद्व्रतं ॥ सत्यवादीतिविख्यातः सतदासीद्धनंजय ॥ ४७ ॥ अथदस्युभयात्केचित्तदातद्वनमाविशन् ॥ तत्रापिदस्यवःक्रुद्धास्तानमार्गंतयत्नतः ॥ ४८ ॥

दितयातेनहेतुनाबालःअज्ञः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ तपस्वीनः तपस्विनामिनःश्रेष्ठः ॥ ४६ ॥ ४७ ॥ ४८ ॥

॥ ४९ ॥ ५० ॥ ५१॥५२॥५३ ॥ श्वभ्रमिवनरकमिव अपृष्ट्वाप्रश्नमकृत्वार्हति तत्रधर्माधर्मयोस्तत्त्वेनिश्चेतव्येलक्षणस्यउद्देशः वचनंभविष्यति ॥५४॥ कचित्तर्केणापिधर्मस्वरूपंनिर्णेयमित्याह दुष्क रमिति ॥ ५५ नप्रत्यसूयामिनदूषयामि अनुमानतोपिधर्मोज्ञेयइत्याशयेनाह नचेति लक्षणोद्देशमाह प्रभवेति ॥ ५६ ॥ अहिंसैवधारणाधर्मइत्याहाहिंसार्थायेति ॥ ५७ ॥ ५८ ॥ न्यायेनसंतोषंजनये त्याज्ञस्तदेवेश्वरंपूजनमित्यादिवाक्यावष्टंभेनअन्योन्यमुखहेतुत्वात्पारदार्यादिकमपिधर्मइतिवदंतोधर्मापहारमिच्छंतितेअकूजनेनवेदशब्दराहित्येनतद्विरुद्धंधर्ममोक्षंवावेदवाह्यमिच्छंतितान्प्रतिनानुकूजेततैः

अथकौशिकमभ्येत्यप्राहुस्तेसत्यवादिनं॥ कतमेनपथायाताभगवन्ब्रहवोजनाः॥ ४९ ॥ सत्येनपृष्टःप्रब्रूहियदितान्वेत्थशंसनः॥ सपृष्टःकौशिकःसत्यंवचनं तानुवाचह॥ ५० ॥ बहुवृक्षलतागुल्ममेतद्वनमुपाश्रिताः॥ इतितान्स्थापयामासतेभ्यस्तत्त्वंसकौशिकः॥ ५१ ॥ ततस्तेतान्समासाद्यक्रूराजघ्नुरितिश्रुतिः॥ ते नाधर्मेणमहतावाग्दुरुक्तेनकौशिकः॥ ५२ ॥ गतःसकष्टंनरकंसूक्ष्मधर्मेष्वकोविदः॥ यथाचाल्पश्रुतोमूढोधर्माणामविभागवित्॥ ५३ ॥ वृद्धानपृष्ट्वासंदेहं महच्छ्वभ्रमिवार्हति ॥ तत्रतेलक्षणोद्देशःकश्चिदेवंभविष्यति॥ ५४ ॥ दुष्करंपरमंज्ञानंतर्केणानुव्यवस्यति॥ श्रुतेर्धर्मइतिह्येकेवदंतिबहवोजनाः॥ ५५ ॥ तत्ते नप्रत्यसूयामिनचसर्वंविधीयते॥ प्रभवार्थायभूतानांधर्मप्रवचनंकृतं॥ ५६ ॥ यत्स्यादहिंसासंयुक्तंसधर्मइतिनिश्चयः ॥ अहिंसार्थायहिंस्राणांधर्मप्रवचनं कृतं॥ ५७ ॥ धारणाद्धर्ममित्याहुर्धर्मोधारयतेप्रजाः॥ यत्स्याद्धारणसंयुक्तंसधर्मइतिनिश्चयः॥ ५८ ॥ येन्यायेनजिहीर्षंतोधर्ममिच्छंतिकर्हिचित् ॥ अकूजनेनमोक्षंवानानुकूजेत्कथंचन॥ ५९ ॥ अवश्यंकूजितव्येवाशंकेरन्नप्यकूजतः॥ श्रेयस्तत्रानृतंवक्तुंतत्सत्यमविचारितं॥ ६० ॥ यःकार्येभ्योव्रतंकृत्वातस्यना नोपपादयेत्॥ नतत्फलमवाप्नोतिएवमाहुर्मनीषिणः॥ ६१ ॥ प्राणात्ययेविवाहेवासर्वज्ञातिवधात्यये॥ नर्मण्यभिप्रवृत्तेवानचप्रोक्तंमृषाभवेत्॥ ६२॥ अध र्मनात्रपश्यंतिधर्मतत्त्वार्थदर्शिनः॥ यस्तेनैःसहसंबंधान्मुच्यतेशपथैरपि॥ ६३ ॥ श्रेयस्तत्रानृतंवक्तुंतत्सत्यमविचारितं॥ नचतेभ्योधनंदेयंशक्येसतिकथंचन ॥ ६४ ॥ पापेभ्योहिधनंदत्तंदातारमपिपीडयेत्॥ तस्माद्धर्मार्थमनृतमुक्त्वानानृतभाग्भवेत्॥ ६५ ॥

सहसंवादमपिनकुर्यादसंभाष्यास्ते' तेनवेदाविरोधेमनियदन्यस्यसुखकरंतद्धर्मइत्यर्थः ॥ ५९ ॥ यत्रतुधर्मसंदेहेवेदशब्दोनास्तिनापिलौकिकीयुक्तिरस्ति तत्रकिंकर्तव्यमित्याशंक्याह अवश्यमिति यत्रब्राह्मणस्तेनत्वेन ज्ञातः तत्रैतेषांस्तेनोयमस्तेनोवेतिसंशयेपक्षद्वयेऽपिहिंसाप्राप्तौमौनमेवाश्रयेत् मौनेनाप्यसिद्धौअनृतमपिवदेदित्यर्थः ॥ ६० ॥ यइति कार्येभ्यःयत्किंचित्कार्यमनस्युद्दिश्यव्रतंकृत्वात स्यव्रतस्यनानाअन्येनप्रकारेणोपपादनंकरोतिसदांभिकोव्रतफलंनाप्नोतीत्यर्थः ॥ ६१ ॥ ६२ ॥ ६३ ॥ तेभ्यः स्तेनेभ्यः पीडयेत्नरकंप्रापयेत् ॥ ६४ ॥ ६५॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ अविदितमितिच्छेदः ॥ ६९ ॥ ७० ॥ अनुग्रहंअवधेनप्रतिज्ञारक्षणं ॥ ७१ ॥ ७२ ॥ तूबरकः बह्वभोजनः ॥ ७३ ॥ तंहन्यामितिस्थातानस्थास्ये एनसामुक्तोपिकृतप्राय

एषतेलक्षणोद्देशोमयोद्दिष्टोयथाविधि ॥ यथाधर्मंयथाबुद्धिमयाद्यंवैहितार्थिना ॥६६॥ एतच्छ्रुत्वाब्रूहिपार्थयदिवध्योयुधिष्ठिरः॥ अर्जुनउवाच यथा ब्रूयान्महाप्राज्ञोयथाब्रूयान्महामतिः ॥ ६७॥ हितंचैवयथास्माकंतथैतद्वचनंतव ॥ भवान्मातृसमोस्माकंतथापितृसमोपिच ॥ ६८ ॥ गतिश्चपरमाकृष्णत्व मेवचपरायणं ॥ नहितेत्रिषुलोकेषुविद्यतेऽविदितंक्वचित् ॥ ६९ ॥ तस्माद्भवान्परंधर्मंवेदसर्वंयथातथं ॥ अवध्यंपांडवंमन्येधर्मराजंयुधिष्ठिरं ॥ ७० ॥ अस्मिं स्तुममसंकल्पेब्रूहिकिंचिदनुग्रहं ॥ इदंवापरमत्रैवश्रृणुत्वत्स्थंविवक्षितं ॥ ७१ ॥ जानासिदाशार्हममव्रतंत्वंयोमांब्रूयात्कश्चनमानुषेषु ॥ अन्यस्मैत्वंगांडिवंदे हिपार्थत्वत्तोस्त्रैर्वावीर्यतोवाविशिष्टः ॥ ७२ ॥ हन्यामहंकेशवतंप्रसह्यभीमोहन्यात्तूबरकेतिचोक्तः ॥ तन्मेराजाप्रोक्तवांस्तेसमक्षंधनुर्देहीत्यसकृद्वृष्णिवीर ॥ ७३ ॥ तंहन्यांचेत्केशवजीवलोकेस्थातानाहंकालमप्यल्पमात्रं ॥ ध्यात्वानूनंत्वेनसाचापिमुक्तोवधंराज्ञोभ्रष्टवीर्योविचेताः ॥ ७४॥ यथाप्रतिज्ञाममलोक बुद्धौभवेत्सत्याधर्मभृतांवरिष्ठ ॥ यथाजीवेत्पांडवोहंचकृष्णतथाबुद्धिंदातुमप्यर्हसित्वं ॥ ७५॥ वासुदेवउवाच राजाश्रांतोविक्षतोदुःखितश्चकर्णेनसं ख्येनिशितैर्बाणसंघैः ॥ यश्चानिशंसूतपुत्रेणवीरशरैर्भृशंताडितोयुध्यमानः ॥ ७६॥ अतस्त्वमेतेनसरोषमुक्तोदुःखान्वितेनेदमयुक्तरूपं॥ अकोपितोह्येषयदि स्मसंख्येकर्णंनहन्यादितिचाब्रवीत्सः॥ ७७॥ जानातितंपांडवएषचापिपापंलोकेकर्णमसह्यमन्यैः ॥ ततस्त्वमुक्तोभृशरोषितेनराज्ञासमक्षंपरुषाणिपार्थ ॥ ७८ ॥ नित्योद्युक्तेसततंचाप्रसह्येकर्णेद्यूतंह्यद्यरणेनिबद्धं ॥ तस्मिन्हतेकुरवोनिर्जिताःस्युरेवंबुद्धिःपार्थिवेधर्मपुत्रे ॥ ७९ ॥ ततोवधंनार्हतिधर्मपुत्रस्त्वयाप्रति ज्ञार्जुनपालनीया ॥ जीवन्नयंयेनमृतोभवेद्धितन्मेनिबोधेहतवानुरूपं ॥ ८० ॥ यदामानंलभतेमाननार्हस्तदासवैजीवतिजीवलोके ॥ यदावमानंलभतेमहांतं तदाजीवन्मृतइत्युच्यतेसः ॥ ८१ ॥ संमानितःपार्थिवोयंसदैवत्वयाचभीमेनतथायमाभ्यां ॥ वृद्धैश्चलोकेपुरुषैश्चशूरैस्तस्यापमानंकलयाप्रयुंक्ष्व ॥८२॥ त्व मित्यत्रभवंतंहिब्रूहिपार्थयुधिष्ठिरं॥त्वमित्युक्तोहिनिहतोगुरुर्भवतिभारत॥८३॥एवमाचरकौंतेयधर्मराजेयुधिष्ठिरे ॥अधर्मयुक्तंसंयोगंकुरुष्वैनंकुरूद्वह॥८४॥

श्चित्तोपिनस्थास्येइत्यर्थः ॥ किंकृत्वाराज्ञोवधंध्यात्वा ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ समक्षंआवयोरितिशेषः ॥ ७८ ॥ कर्णेपणीकृतेद्यूतंयुद्धरूपं ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ अत्रभवंतंमान्यं त्वमितिब्रूहि तावतैवनद्वधःकृतोभवतीत्यर्थः ॥ ८३ ॥ एवंपूज्यावमानरूपंसंयोगंआत्मनानुष्ठितंकुरुष्व ॥ ८४ ॥

नत्रमानमाह अथर्वेति ॥ ८५ ॥ यत्गुरुस्त्वमितिप्रोक्तस्तत्अवधेनशब्दपातनमंतरेणैववधःवधकरंभवतीत्यर्थः ॥८६ ॥ अयुक्तमेवंत्वत्तोवधंवेत्स्यते अनेनाहंहतइतिज्ञास्यतीत्यर्थः समंवैषम्यपरिहारं॥८७॥

अथर्वांगिरसीह्येषाश्रुतीनामुत्तमाश्रुतिः ॥ अविचार्यैवकार्यैषाश्रेयस्कामैर्नरैःसदा ॥ ८५ ॥ अवधेनवधःप्रोक्तोयद्गुरुस्त्वमितिप्रभुः ॥ तद्ब्रूहित्वंयन्मयोक्तंध
र्मराजस्यधर्मवित् ॥ ८६ ॥ वधंह्येवंपांडवधर्मराजस्त्वत्तोऽयुक्तंवेत्स्यतेचैवमेषः ॥ ततोऽस्यपादावभिवाद्यपश्चात्समंब्रूयाःसांत्वयित्वाचपार्थ ॥ ८७ ॥ भ्राताप्रा
ज्ञस्तवकोपंनजातुकुर्याद्राजाधर्ममवेक्ष्यचापि ॥ मुक्तोऽनृताद्भ्रातृवधाच्चपार्थह्रष्टःकर्णंत्वंजहिसूतपुत्रं ॥ ८८ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकृष्णार्जुनसंवा
देऊनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ ७० ॥ संजयउवाच इत्येवमुक्तस्तुजनार्दनेनपार्थःप्रशस्याथसुहृद्वचस्तत् ॥ ततोऽब्रवीदर्जुनोधर्मराजम
नुक्तपूर्वंपरुषंप्रसह्य ॥ १ ॥ अर्जुनउवाच माल्वंराजन्व्याहरव्याहरस्त्वयस्तिष्ठसेक्रोशमात्रेरणाद्वै ॥ भीमस्तुमामर्हतिगर्हणाययोयुध्यतेसर्वलोकप्रवीरैः
॥ २ ॥ कालेहिशत्रून्परिपीड्यसंख्येहत्वाचशूरान्पृथिवीपतींस्तान् ॥ रथप्रधानोत्तमनागमुख्यान्सादिप्रवेकानमितांश्चवीरान् ॥ ३ ॥ यःकुंजराणामधिकंसह
स्रंहत्वानदंस्तुमुलंसिंहनादं ॥ कांबोजानामयुतंपार्वतीयान्मृगान्सिंहोविनिहत्येवचाजौ ॥ ४ ॥ सुदुष्करंकर्मकरोतिवीरःकर्तुंयथानार्हसित्वंकदाचित् ॥ रथाद
वप्लुत्यगदांपरामृशंस्तयानिहंत्यश्वरथद्विपान्रणे ॥ ५ ॥ वरासिनावाजिरथाश्वकुंजरांस्तथारथांगैर्धनुषादहत्यरीन् ॥ प्रगृह्यपद्भ्यामहितान्निहंतिपुनस्तुदोर्भ्यां
शतमन्युविक्रमः ॥ ६ ॥ महाबलोवैश्रवणांतकोपमःप्रसह्यहंताद्विषतामनीकिनीं ॥ सभीमसेनोऽर्हतिगर्हणांमेनत्वंनित्यंरक्ष्यसेयःसुहृद्भिः ॥ ७ ॥ महारथान्ना
गवरान्हयांश्चपदातिमुख्यानपिचप्रमथ्य ॥ एकोभीमोधार्तराष्ट्रेषुमग्नःसमामुपालब्धुमरिंदमोर्हति ॥ ८ ॥ कलिंगवंगांगनिषादमागधान्सदामदान्नीलबलाह
कोपमान् ॥ निहंतियःशत्रुगणाननेकान्ससमामुपालब्धुमरिंदमोर्हति ॥ ९ ॥ सयुक्तमास्थायरथंहिकालेधनुर्विधुन्वन्शरपूर्णमुष्टिः ॥ सृजत्यसौशरवर्षाणिवी
रोमहाहवेमेघइवांबुधाराः ॥ १० ॥ शतान्यष्टौवारणानामपश्यंविशातितैःकुंभकराग्रहस्तैः ॥ भीमेनाजौनिहतान्यद्यबाणैःसमांक्रूरंवक्तुमर्हत्यरिघ्नः ॥ ११ ॥ ब
लंतुवाचिद्विजसत्तमानांक्षात्रंतुधाबाहुबलंवदंति ॥ त्वंवाग्बलोभारतनिष्ठुरश्चत्वमेवमांवेत्थयथाबलोहं ॥ १२ ॥ यतेहनित्यंतवकर्तुमिष्टंदारैःसुतैर्जीवितेना
त्मनाच ॥ एवंयन्मांवाग्विशिखेनहंसित्वत्तःसुखंनवयंविद्मकिंचित् ॥ १३ ॥ ॥ ८८ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेऊनसप्ततितमोऽध्यायः ॥ ६९ ॥

इत्येवमिति ॥ १ ॥ व्याहरंव्याहरस्ववचनं क्रोशमात्रेननिष्ठसेअपितुततोपिदूरेइत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

॥ १४ ॥ सत्यसंधेनभीष्मेण ॥ १५ ॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥ अनुतेपेअनुतापंप्राप्तवान् उद्ववर्हकोशान्निष्कासितवान् ॥२३॥२४॥२५॥२६॥२७॥ आत्मत्स्ववादात्महत्यापरहत्यास्यकु

मांमावमंस्थाद्रौपदीतल्पमंस्थोमहारथात्प्रतिहन्मित्वदर्थे ॥ तेनाभिशंकीभारतनिष्ठुरोसित्वत्तःसुखंनाभिजानामिकिंचित् ॥ १४ ॥ प्रोक्तःस्वयंसत्यसंधेनमृत्युस्तवप्रियार्थंनरदेवयुद्धे॥वीरःशिखंडीद्रौपदोसौमहात्मामयाभिगुप्तेनहतश्चतेन॥१५॥नचाभिनंदामितवाधिराज्यंयतस्त्वमक्षेष्वहितायसक्तः॥स्वयंकृत्वापापमनार्यजुष्टमस्माभिर्वातर्तुमिच्छस्यरींस्त्वं॥ १६॥ अक्षेपुदोषावहवोविधर्माःश्रुतास्त्वयासहदेवोब्रवीद्यान्॥तान्नैपित्वंत्यक्तुमसाधुजुष्टांस्तेनस्मसर्वेनिरयंप्रपन्नाः॥ १७ ॥ सुखंवत्तोनाभिजानामिकिंचिद्यतस्त्वमक्षैर्देवितुंसंप्रवृत्तः॥ स्वयंकृत्वाव्यसनंपांडवत्वमस्मांस्तीव्राःश्रावयस्यद्यवाचः॥ १८ ॥ शेतेस्माभिर्निहताशत्रुसेनाछिन्नैर्गात्रैर्भूमितलेनदंती ॥ त्वयाहितत्कर्मकृतंनृशंसंयस्माद्दोषःकौरवाणांवधश्च ॥ १९ ॥ हताउदीच्यानिहताःप्रतीच्यानष्टाःप्राच्यादाक्षिणात्याविशस्ताः॥कृतंकर्माप्रतिरूपंमहद्भिस्तेषांयोधैरस्मदीयैश्चयुद्धे॥२०॥त्वंदेविताभूत्वत्कृतेराज्यनाशस्त्वत्संभवंनोव्यसनंनरेंद्र॥मास्मानकूरैर्वाकप्रतोदैस्तुदंस्त्वंभूयोराजन्कोपयेस्त्वल्पभाग्यः॥ २१॥ संजयउवाच एतावाचःपरुषाःसव्यसाचीस्थिरप्रज्ञःश्रावयित्वातुरूक्षाः॥ बभूवासौविमनाधर्मभीरुःकृत्वाप्राज्ञःपातकंकिंचिदेवं॥ २२॥ तदानुतेपेसुरराजपुत्रोविनिःश्वसंश्चासिमथोद्ववर्ह॥ तमाहकृष्णःकिमिदंपुनर्भवान्विकोशमाकाशनिभंकरोत्यसिं॥ ॥ २३॥ ब्रवीहिमांत्वंपुनरुत्तरंवचस्तथाप्रवक्ष्याम्यहमर्थसिद्धये॥ इत्येवमुक्तःपुरुषोत्तमेनसुदुःखितःकेशवमर्जुनोब्रवीत्॥ २४ ॥ अहंहनिष्येस्वशरीरमेवप्रसह्ययेनाहितमाचरंवै॥ निशम्यतत्पार्थवचोब्रवीदिदंधनंजयंधर्मभृतांवरिष्ठः॥२५॥ राजानमेनंत्वमितीदमुक्त्वाकिंकश्मलंप्राविशःपार्थघोरं॥ त्वंचात्मानंहंतुमिच्छस्यरिघ्ननेदंसद्भिःसेवितंवैकिरीटिन्॥ २६॥ धर्मात्मानंभ्रातरंज्येष्ठमद्यखड्गेनचैनंयदिहन्यान्नृवीर ॥ धर्माद्भीतस्तत्कथंनामतेस्यात्किंचोत्तरंवाकरिष्यस्त्वमेव॥ २७॥ सूक्ष्मोधर्मोदुर्विदश्चापिपार्थविशेषतोऽज्ञैःप्रोच्यमानंनिबोध॥ हत्वात्मानमात्मनाप्राप्नुयास्त्वंवधाद्भ्रातुर्नरकंचातिघोरं॥२८॥ ब्रवीहिवाचाद्यगुणानिहात्मनस्तथाहतात्माभविताप्तिपार्थ॥ तथास्तुकृष्णेत्यभिनंद्यतद्वचोधनंजयःप्राहधनुर्विनाम्य ॥ २९ ॥ युधिष्ठिरंधर्मभृतांवरिष्ठंशृणुष्वराजन्निशक्रसूनुः॥ नमादृशोन्योनरदेवविद्यतेधनुर्धरोदेवमृतेपिनाकिनं॥ ३० ॥

त्मनादित्यध्यायतात्पर्यं ॥ २८ ॥ २९ ॥ ३० ॥

॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

अहंहितेनानुमतोमहात्माक्षणेनहन्यांसचराचरंजगत् ॥ मयाहिराजन्सदिगीश्वरादिशोविजित्यसर्वाभवतःकृतावशे ॥ ३१ ॥ सराजसूयश्चसमाप्तदक्षिणःस
भाचदिव्याभवतोममौजसा ॥ पाणौपृषत्कानिशिताममैवधनुश्चसज्यंविततंसबाणं ॥ ३२ ॥ पादौचमेसरथौसध्वजौचनमादृशंयुद्धगतंजयंति ॥ हताउदी
च्यानिहताःप्रतीच्याःप्राच्यानिरस्तादाक्षिणात्याविशस्ताः ॥ ३३ ॥ संशप्तकानांकिंचिदेवास्तिशिष्टंसर्वस्यसैन्यस्यहतंमयार्धं ॥ शेतेमयानिहताभारतीयंचमूरा
जन्देवचमूप्रकाशा ॥ ३४ ॥ येचास्त्रज्ञास्तानहंहन्मिचास्त्रैस्तस्माल्लोकानेपकरोमिभस्म ॥ जैत्रंरथंभीममास्थायकृष्णयावःशीघ्रंसूतपुत्रंनिहंतुं ॥ ३५ ॥ राजाभ
वत्वद्यसुनिर्वृतोयंकर्णंरणेनाशयितास्मिबाणैः ॥ इत्येवमुक्त्वापुनराहपार्थोयुधिष्ठिरंधर्मभृतांवरिष्ठं ॥ ३६ ॥ अद्यापुत्रामृतमाताभवित्रीकुंतीवाथोवामयातेन
वापि ॥ सत्यंवदाम्यद्यनकर्णमाजौशरैरहत्वाकवचंविमोक्ष्ये ॥ ३७ ॥ संजयउवाच इत्येवमुक्त्वापुनरेवपार्थोयुधिष्ठिरंधर्मभृतांवरिष्ठं ॥ विमुच्यशस्त्राणि
धनुर्विसृज्यकोशेचखड्गंविनिधायतूर्णं ॥ ३८ ॥ सव्रीडयानम्रशिराःकिरीटीयुधिष्ठिरंप्रांजलिरभ्युवाच ॥ प्रसीदराजन्क्षमयन्मयोक्तंकालेभवान्वेत्स्यतितन्न
मस्ते ॥ ३९ ॥ प्रसाद्यराजानममित्रसाहःस्थितोब्रवीच्चैवपुनःप्रवीरः ॥ नेदंचिरात्क्षिप्रमिदंभविष्यत्यावर्ततेसाभ्यभियामिचैनं ॥ ४० ॥ यास्येपभीमंसमरात्प्र
मोक्तुंसर्वात्मनासूतपुत्रंचहंतुं ॥ तवप्रियार्थंममजीवितंहिब्रवीमिसत्यंतदवेहिराजन् ॥ ४१ ॥ इतिप्रयास्यन्नुपगृह्यपादौसमुत्थितोदीप्ततेजाःकिरीटी ॥ एतच्छ्रु
त्वापांडवोधर्मराजोभ्रातुर्वाक्यंपरुषंफाल्गुनस्य ॥ ४२ ॥ उत्थायतस्माच्छयनादुवाचपार्थंततोदुःखपरीतचेताः ॥ कृतंमयापार्थयथानसाधुयेनप्राप्तंव्यसनं
वःसुघोरं ॥ ४३ ॥ तस्माच्छिरश्छिंधिममेदमद्यकुलांतकस्याधमपूरुषस्य ॥ पापस्यपापव्यसनान्वितस्यविमूढबुद्धेरलसस्यभीरोः ॥ ४४ ॥ वृद्धावमंतुःपरुष
स्यचैवकिंतेचिरमत्यनुसृत्यरूक्षं ॥ गच्छाम्यहंवनमेवाद्यपापःसुखंभवान्वर्ततांमद्विहीनः ॥ ४५ ॥ योग्योराजाभीमसेनोमहात्माक्लीबस्यवाममकिंराज्यकृत्यं ॥
नचापिशक्तःपरुषाणिसोढुंपुनस्तवेमानिरुषान्वितस्य ॥ ४६ ॥ भीमोस्तुराजाममजीवितेननकार्यमद्यावमतस्यवीर ॥ इत्येवमुक्त्वासहसोत्पपातराजातत
स्तच्छयनंविहाय ॥ ४७ ॥ इयेषनिर्गंतुमथोवनायतंवासुदेवःप्रणतोभ्युवाच ॥ ४८ ॥ राजन्विदितमेतद्धियथागांडीवधन्वनः ॥ प्रतिज्ञासत्यसंधस्यगांडीवंप्रति
विश्रुता ॥ ब्रूयाद्यएवंगांडीवमन्यस्मैदेयमित्युत ॥ ४९ ॥ वध्योस्यसपुमाँल्लोकेत्वयाचोक्तोयमीदृशं ॥ ततःसत्यांप्रतिज्ञांतांपार्थेनप्रतिरक्षता ॥ ५० ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेसप्ततितमोऽध्यायः ॥ ७० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ७ ॥

मच्छंदादवमानोयंकृतस्तवमहीपते ॥ गुरूणामवमानोहिवधइत्यभिधीयते ॥ ५१ ॥ तस्मात्त्वंवैमहाबाहोममपार्थस्यचोभयोः ॥ व्यतिक्रममिमंराजन्सत्यसंरक्षणंप्रति ॥ ५२ ॥ शरणंत्वांमहाराजप्रपन्नौस्वउभावपि ॥ क्षंतुमर्हसिमेराजन्प्रणतस्याभियाचतः ॥ ५३ ॥ राधेयस्याद्यपापस्यभूमिःपास्यतिशोणितं ॥ सत्यंतेप्रतिजानामिहतंविद्ध्यद्यसूतजं ॥ ५४ ॥ यस्येच्छसिवधंतस्यगतमप्यस्यजीवितं ॥ इतिकृष्णवचःश्रुत्वाधर्मराजोयुधिष्ठिरः ॥ ५५ ॥ ससंभ्रमंहृषीकेशमुत्थाप्यप्रणतंतदा ॥ कृतांजलिस्ततोवाक्यमुवाचानंतरंवचः ॥ ५६ ॥ एवमेवयथात्थत्वमस्त्येषोतिक्रमोमम ॥ अनुनीतोस्मिगोविंदतारितश्चास्मिमाधव ॥ ॥ ५७ ॥ मोचिताव्यसनाद्धोराद्वयमद्यत्वयाच्युत ॥ भवंतंनाथमासाद्यत्वावांव्यसनसागरात् ॥ ५८ ॥ घोरादद्यसमुत्तीर्णावुभावज्ञानमोहितौ ॥ त्वद्बुद्धिप्लवमासाद्यदुःखशोकार्णवाद्वयं ॥ ५९ ॥ समुत्तीर्णाःसहामात्याःसनाथाःस्मत्वयाच्युत ॥ ६० ॥ इतिश्रीमहाभारतेकर्णपर्वणियुधिष्ठिरसमाश्वासनेसप्ततितमोध्यायः ॥ ७० ॥ ॥ ७ ॥ संजयउवाच धर्मराजस्यतच्छ्रुत्वाप्रीतियुक्तंवचस्ततः ॥ पार्थंप्रोवाचधर्मात्मागोविंदोयदुनंदनः ॥ १ ॥ इतिस्मकृष्णवचनात्प्रत्युच्चार्ययुधिष्ठिरं ॥ बभूवविमनाःपार्थःकिंचित्कृत्वेवपातकं ॥ २ ॥ ततोब्रवीद्वासुदेवःप्रहसन्निवपांडवं ॥ कथंनामभवेदेतद्यदित्वंपार्थधर्मजं ॥ ३ ॥ असिनातीक्ष्णधारेणहन्याधर्मेव्यवस्थितं ॥ त्वमित्युक्काथराजानमेवंकश्मलमाविशः ॥ ४ ॥ हत्वातुनृपतिंपार्थआकरिष्यःकिमुत्तरं ॥ एवंहिदुर्विदोधर्मोमंदप्रज्ञैर्विशेषतः ॥ ५ ॥ सभवान्धर्मभीरुत्वाद्ध्रुवंमेप्यन्महत्तमः ॥ नरकंघोररूपंचभ्रातुर्ज्येष्ठस्यवैवधात् ॥ ६ ॥ सत्वंधर्मभृतांश्रेष्ठंराजानंधर्मसंहितं ॥ प्रसादयकुरुश्रेष्ठमेतदत्रमतंमम ॥ ७ ॥ प्रसाद्यभक्त्याराजानंप्रीतेचैवयुधिष्ठिरे ॥ प्रयावस्त्वरितौयोद्धुंसूतपुत्ररथंप्रति ॥ ८ ॥ हत्वातुसमरेकर्णंत्वमद्यनिशितैःशरैः ॥ विपुलांप्रीतिमाधत्स्वधर्मपुत्रस्यमानद ॥ ९ ॥ एतदत्रमहाबाहोप्राप्तकालंमतंमम ॥ एवंकृतेकृतंचैवतवकार्यंभविष्यति ॥ १० ॥ ततोर्जुनोमहाराजलज्जयावैसमन्वितः ॥ धर्मराजस्यचरणौप्रपद्यशिरसाननः ॥ ११ ॥ उवाचभरतश्रेष्ठंप्रसीदेतिपुनःपुनः ॥ क्षमस्वराजन्यत्प्रोक्तंधर्मकामेनभीरुणा ॥ १२ ॥

धर्मराजस्येतिस्पष्टार्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥
इतिस्मेत्यारभ्यभ्रातुर्ज्येष्ठस्यवैवधादित्यंतंश्लोकपंचकंक्षिप्तंपार्थंप्रोवाचेत्यस्यततोब्रवीदित्यनेनपौनरुक्त्यात्कचित्पुस्तकांतरेष्वनुपलंभाच्चपूर्वमेवराजानमेनंत्वमितीदमित्यादिश्लोकैरेवैतदर्थस्यकोडीकाराच्च

पद्मांपादयोः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८॥२९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥३४ ॥३५॥३६॥३७॥

दृष्ट्वानुपतितंपद्मांधर्मराजोयुधिष्ठिरः ॥ धनंजयममित्रघ्नंरुदंतंभरतर्षभ ॥ १३ ॥ उत्थाप्यभ्रातरंराजाधर्मराजोधनंजयं ॥ समाश्लिष्यचसस्नेहंप्ररुरोदमहीप
तिः ॥ १४ ॥ रुदित्वातुचिरंकालंभ्रातरौसुमहाद्युती ॥ कृतशौचौमहाराजप्रीतिमंतौबभूवतुः ॥ १५ ॥ ततआश्लिष्यतंप्रेम्णामूर्ध्निचाघ्रायपांडवः ॥ प्रीत्यापर
मयायुक्तोविस्मयंश्चपुनःपुनः ॥ अब्रवीत्तंमहेष्वासंधर्मराजोधनंजयं ॥ १६ ॥ कर्णेनमेमहाबाहोसर्वसैन्यस्यपश्यतः ॥ कवचंचध्वजंचैवधनुःशक्तिर्हयाःशराः
॥ १७ ॥ शरैःकृत्तामहेष्वासयतमानस्यसंयुगे ॥ सोहंज्ञात्वारणेतस्यकर्मदृष्ट्वाचफाल्गुन ॥ १८ ॥ व्यवसीदामिदुःखेननचमेजीवितंप्रियं ॥ नचेदद्यहितंवीरं
निहनिष्यसिसंयुगे ॥ १९ ॥ प्राणानेवपरित्यक्ष्येजीवितार्थोहिकोमम ॥ एवमुक्तःप्रत्युवाचविजयोभरतर्षभ ॥ २० ॥ सत्येनतेशपेराजन्प्रसादेनतथैवच ॥ भी
मेनचनरश्रेष्ठयमाभ्यांचमहीपते ॥ २१ ॥ यथाद्यसमरेकर्णंहनिष्यामिहतोपिवा ॥ महीतलेपतिष्यामिसत्येनायुधमालभे ॥ २२ ॥ एवमाभाष्यराजानमब्रवी
त्माधवंवचः ॥ अद्यकर्णंरणेकृष्णसूदयिष्येनसंशयः ॥ २३ ॥ नवबुध्याहिभद्रंतेवधस्तस्यदुरात्मनः ॥ एवमुक्तोब्रवीत्पार्थंकेशवोराजसत्तम ॥ २४ ॥ शक्तोसि
भरतश्रेष्ठहंतुंकर्णंमहाबलं ॥ एषचापिहिमेकामोनित्यमेवमहारथ ॥ २५ ॥ कथंभवान्रणेकर्णंनिहन्यादितिसत्तम ॥ भूयश्चोवाचमतिमान्माधवोधर्मनंदनं ॥
॥ २६ ॥ युधिष्ठिरमंवीभत्सुंत्वंसांत्वयितुमर्हसि ॥ अनुज्ञातुंचकर्णस्यवधायाद्यदुरात्मनः ॥ २७ ॥ श्रुत्वात्त्यहमयंचैवत्वांकर्णशरपीडितं ॥ प्रवृत्तिंज्ञातुमायाता
विहावांपांडुनंदन ॥ २८ ॥ दिष्ट्यासिराजन्नहतोदिष्ट्यानग्रहणंगतः ॥ परिसांत्वयवीभत्सुंजयमाशाधिचानघ ॥ २९ ॥ युधिष्ठिरउवाच एह्येहिपार्थवीभ
त्सोमांपरिष्वजपांडव ॥ वक्तव्यमुक्तोस्मिहितंत्वयात्क्षांतंचतन्मया ॥ ३० ॥ अहंत्वामनुजानामिजहिकर्णंधनंजय ॥ मन्युंचमाकृथाःपार्थयन्मयोक्तोसिदा
रुणं ॥ ३१ ॥ संजयउवाच ततोधनंजयोराजन्शिरसाप्रणतस्तदा ॥ पादौजग्राहपाणिभ्यांभ्रातुर्ज्येष्ठस्यमारिष ॥ ३२ ॥ तमुत्थाप्यततोराजापरिष्वज्यचपी
डितं ॥ मूर्ध्न्युपाघ्रायचैवैनमिदंपुनरुवाचह ॥ ३३ ॥ धनंजयमहाबाहोमानितोस्मिदृढंत्वया ॥ माहात्म्यंविजयंचैवंभूयःप्राप्नुहिशाश्वतं ॥ ३४ ॥ अर्जुनउवाच
अद्यतंपापकर्माणंसानुबंधंरणेशरैः ॥ नयाम्यंतंममासाद्यराधेयंबलगर्वितं ॥ ३५ ॥ येनत्वंपीडितोबाणैर्दृढमायम्यकार्मुकं ॥ तस्याद्यकर्मणःकर्णःफलमाप्स्यति
दारुणं ॥ ३६ ॥ अद्यत्वामनुपश्यामिकर्णंहत्वामहीपते ॥ सभाजयितुमाक्रंदादितिसत्यंब्रवीमिते ॥ ३७ ॥

॥ ३८ ३९॥ ४० ॥ इतिश्रीमहाभारतेकर्णपर्वणिएकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ ७ ॥ ॥ ७१ ॥ प्रसाद्येति ॥ १॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

नाहत्वाविनिवर्त्तिष्येकर्णमद्यरणाजिरात् ॥ इतिसत्येननेपादौस्पृशामिजगतीपते॥ ३८ ॥ संजयउवाच इतिब्रुवाणंसुमनाःकिरीटिनंयुधिष्ठिरः प्राहवचोबृहत्तरं ॥ यशोऽक्षय्यंजीवितंमीप्सितंतेजयंसदावीर्यमरिक्षयंतदा ॥ ३९ ॥ प्रयाहिवृद्धिंचदिशंतुदेवनायथाहमिच्छामितवास्तुतत्तथा ॥ प्रयाहि शीघ्रंजहिकर्णमाहवेपुरंदरोवृत्रमिवात्मवृद्धये ॥ ४० ॥ इतिश्रीमहाभारतेकर्णपर्वणिअर्जुनप्रतिज्ञायांएकसप्ततितमोऽध्यायः॥ ७१॥ संजयउवाच प्रसाद्यधर्मराजानंप्रहृष्टेनांतरात्मना॥ पार्थःप्रोवाचगोविंदंसूतपुत्रवधोद्यतः॥ १ ॥ कल्पतांमेरथोभूयोयुज्यतांचहयोत्तमाः॥ आयुधानिचसर्वाणिसज्जंतांमे महारथे॥ २॥उपावृत्ताश्चतुरगाःशिक्षिताश्चाश्वसादिभिः॥ रथोपकरणैःसज्जाउपायांतुत्वरान्विताः॥३॥प्रयाहिशीघ्रंगोविंदसूतपुत्रजिघांसया॥एवमुक्तोम हाराजफाल्गुनेनमहात्मना ॥ ४ ॥ उवाचदारुकंकृष्णःकुरुसर्वंयथाब्रवीत् ॥ अर्जुनोभरतःश्रेष्ठश्रेष्ठःसर्वधनुष्मतां॥ ५॥ आज्ञप्तस्त्वथकृष्णेनदारुकोराजस त्तम॥ योजयामाससरथंवैयाघ्रंशत्रुतापनं॥ ६॥ सज्जंनिवेदयामासपांडवस्यमहात्मनः ॥ युक्तंतुतंरथंदृष्ट्वादारुकेणमहात्मना ॥ ७ ॥ आपृच्छ्यधर्मराजा नंब्राह्मणान्स्वस्तिवाच्यच॥ सुमंगलंस्वस्त्ययनमारुरोहरथोत्तमं ॥ ८॥ तस्यराजामहाप्राज्ञोधर्मराजोयुधिष्ठिरः ॥ आशिषोऽयुंक्तसततःप्रायात्कर्णरथंप्रति॥ ॥ ९॥ तमायांतंमहेष्वासंदृष्ट्वाभूतानिभारत॥ निहतंमेनिरेकर्णंपांडवेनमहात्मना॥ १० ॥ बभूवुर्विमलाःसर्वादिशोराजन्समंततः ॥ चाषाश्चशतपत्राश्चक्रौं चाश्चैवजनेश्वर॥ ११ ॥ प्रदक्षिणमकुर्वंततदावैपांडुनंदनं॥ बहवःपक्षिणोराजन्पुन्नामानःशुभाःशिवाः॥१२॥ त्वरयंतोर्जुनंयुद्धेहृष्टरूपाववाशिरे ॥ कंकागृ ध्रावकाःश्येनावायसाश्चविशांपते॥ १३॥ अग्रतस्तस्यगच्छंतिमांसहेतोर्भयानकाः॥ निमित्तानिचधन्यानिपांडवस्यशशंसिरे॥ १४ ॥ विनाशमरिसैन्या नांकर्णस्यचवधंप्रति॥ प्रयातस्याथपार्थस्यमहान्स्वेदोव्यजायत ॥ १५ ॥ चिंताचविपुलाजज्ञेकथंचेदंभविष्यति॥ ततोगांडीवधन्वानमब्रवीन्मधुसूदनः॥ दृष्ट्वापार्थंतथायांतंचितापरिगतंतदा॥ १६॥ वासुदेवउवाच गांडीवधन्वन्संग्रामेयेत्वयाधनुषाजिताः ॥ नतेषांमानुषोजेतात्वदन्यइहविद्यते॥ १७॥ दृष्टाहिबहवःशूराःशक्रतुल्यपराक्रमाः॥ त्वांप्राप्यसमरेशूरंतेगताःपरमांगतिं॥१८॥ कोहिद्रोणंचभीष्मंचभगदत्तंचमारिष ॥ विंदानुविंदावावंत्यौकांबोजंच सुदक्षिणं॥ १९॥ श्रुतायुषंमहावीर्यमच्युतायुषमेवच॥ प्रत्युद्गम्यभवेत्क्षेमीयोनस्यात्त्वमिवप्रभो॥ २०॥ ॥ १२ ॥ १३ ॥ १४ ॥ १५॥१६॥१७॥१८॥१९॥२०॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ अष्टरत्निरित्यस्य विवरणंमहाबाहुर्व्यूढोरस्कइति तथाहिसर्वस्यपुरुषस्यव्याममात्रंदैर्घ्यंनत्रचपंचहस्तंविंशत्यधिकंशतांगुलं रत्निस्त्वेकविंशत्यंगुलः अष्टानांरत्नीनांअष्टषष्ट्यधिकंशतंअंगुलानित्रभवंति आजानुबाहुपुरुषस्यव्यामंअष्टरत्निमितंभवति अष्टाचत्वारिंशदंगुलातत्रवृद्धिः तत्रापिपंचमांशेनवक्षसिविशालता शेषंअंसादार

तवह्यस्त्राणिदिव्यानिलाघवंबलमेवच ॥ असंमोहश्चयुद्धेषुविज्ञानस्यचसंनतिः ॥ २१ ॥ वेधःपातश्चलक्षेपुयोगश्चैवतथार्जुन ॥ भवान्देवान्सगंधर्वान्हन्यात्सहचराचरान् ॥ २२ ॥ पृथिव्यांतुरणेपार्थनयोद्धात्वत्समःपुमान् ॥ धनुर्ग्राहाहियेकेचित्क्षत्रियायुद्धदुर्मदाः ॥ २३ ॥ आदेवात्त्वत्समंनेपांनपश्यामिश्टणोमि च ॥ ब्रह्मणाचप्रजाःसृष्टागांडीवंचमहद्धनुः ॥ २४ ॥ येनत्वंयुध्यसेपार्थनस्मान्नास्तित्वयासमः ॥ अवश्यंतुमयावाच्यंयत्पथ्यंतवपांडव ॥ २५ ॥ मावमंस्था महाबाहोकर्णमाहवशोभिनं ॥ कर्णोहिबलवान्दृप्तःकृतास्त्रश्चमहारथः ॥ २६ ॥ कृतीचचित्रयोधीचदेशकालस्यकोविदः ॥ बहुनात्रकिमुक्तेनसंक्षेपाच्छृणुपांडव ॥ २७ ॥ त्वत्समंत्वद्विशिष्टंवाकर्णमन्येमहारथं ॥ परमंयत्नमास्थायत्वयावध्योमहाहवे ॥ २८ ॥ तेजसावह्निसदृशोवायुवेगसमोजवे ॥ अंतकप्रतिमःक्रोधेसिंहसंहननोबली ॥ २९ ॥ अष्टरत्निर्महाबाहुर्व्यूढोरस्कःसुदुर्जयः ॥ अभिमानीचशूरश्चप्रवीरःप्रियदर्शनः ॥ ३० ॥ सर्वयोधगुणैर्युक्तोमित्राणामभयंकरः ॥ सततंपांडवद्वेषीधार्तराष्ट्रहितेरतः ॥ ३१ ॥ सर्वैरवध्योराधेयोदेवैरपिसवासवैः ॥ ऋतेत्वामितिमेबुद्धिस्तदद्यजहिसूतजं ॥ ३२ ॥ देवैरपिहिसंयत्तैर्बिभ्रद्भिर्मांसशोणितं ॥ अशक्यःसरथोजेतुंसर्वैरपियुयुत्सुभिः ॥ ३३ ॥ दुरात्मानंपापवृत्तंनृशंसंदुष्टप्रज्ञंपांडवेयेषुनित्यं ॥ हीनस्वार्थंपांडवेयैर्विरोधेहत्वाकर्णंनिश्चितार्थोभवाद्य ॥ ३४ ॥ तंसूतपुत्रंरथिनांवरिष्ठंनिष्कालिकंकालवशंनयाद्य ॥ तंमृतपुत्रंरथिनांवरिष्ठंहत्वाप्रीतिंधर्मराजेकुरुष्व ॥ ३५ ॥ जानामितेपार्थवीर्यंयथावद्दुर्वारणीयंचसुरासुरैश्च ॥ सदावजानातिहिपांडुपुत्रानसौदर्पात्सूतपुत्रोदुरात्मा ॥ ३६ ॥ आत्मानंमन्यतेवीरंयेनपापःसुयोधनः ॥ तमद्यमूलंपापानांजहिसौतिं धनंजय ॥ ३७ ॥ खड्गजिह्वंधनुरास्यंशरदंष्ट्रंतरस्विनं ॥ दृप्तंपुरुषशार्दूलंजहिकर्णंधनंजय ॥ ३८ ॥ अहंत्वामनुजानामिवीर्येणचबलेनच ॥ जहिकर्णंरणेशूरंमातंगमिवकेसरी ॥ ३९ ॥ यस्यवीर्येणवीर्यंतधार्तराष्ट्रोवमन्यते ॥ तमद्यपार्थसंग्रामेकर्णंवैकर्तनंजहि ॥ ४० ॥ इतिश्रीमहाभारतेकर्णपर्वणिकृष्णार्जुनसंवादेद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥

भ्यवाह्वोर्देद्धिरितिज्ञेयं ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ निष्कालिकंनिर्गतःकालयिताजेतास्येतितं ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेद्विसप्ततितमोऽध्यायः ॥ ७२ ॥

नवइति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥ यदित्वंत्रातानभवेस्तर्हितद्धार्तराष्ट्रंबलंकोनुप्रतीयादितिसंबंधः ॥२३॥२४॥२५॥२६॥

संजय उवाच ततःपुनरमेयात्माकेशवोर्जुनमब्रवीत् ॥ कृतसंकल्पमायांतंवधेकर्णस्यभारत ॥१॥ अद्यसप्तदशाहानिवर्तमानस्यभारत॥ विनाशस्यातिघोरस्यनरवारणवाजिनां ॥ २ ॥ भूत्वाहिविपुलासेनानावकानांपरैःसह ॥ अन्योन्यंसमरंप्राप्यकिंचिच्छेषाविशांपते ॥ ३॥ भूत्वावैकौरवाःपार्थप्रभूतगजवाजिनः ॥ त्वांवैशत्रुंसमासाद्यविनष्टारणमूर्धनि ॥ ४ ॥ एतेतपृथिवीपालाःसृंजयाश्चसमागताः ॥ त्वांसमासाद्यदुर्धर्षपांडवाश्चव्यवस्थिताः॥ ५ ॥ पंचालैःपांडवैर्मत्स्यैःकारूषैश्चेदिभिःसह ॥ त्वयागुप्तैरमित्रघ्नैःकृतःशत्रुगणक्षयः ॥ ६ ॥ कोहिशक्तोरणेजेतुंकौरवांस्तातसंयुगे ॥ अन्यत्रपांडवान्युद्धेत्वयागुप्तान्महारथान् ॥ ॥ ७ ॥ शक्तस्त्वंहिरणेजेतुंससुरासुरमानुषान् ॥ त्रींल्लोकान्समरेयुक्तान्किंपुनःकौरवंबलं ॥ ८ ॥ भगदत्तंचराजानंकोन्यःशक्तस्त्वयाविना ॥ जेतुंपुरुषशार्दूल योपिस्याद्वासवोपमः ॥ ९ ॥ तथेमांविपुलांसेनांगुप्तांपार्थत्वयानघ ॥ नशेकुःपार्थिवाःसर्वेचक्षुर्भिरपिवीक्षितुं ॥ १० ॥ तथैवसततंपार्थरक्षिताभ्यांत्वयारणे ॥ धृष्टद्युम्नशिखंडिभ्यांभीष्मद्रोणौनिपातितौ ॥ ११ ॥ कोहिशक्तोरणेपार्थभारतानांमहारथौ ॥ भीष्मद्रोणौयुधाजेतुंशक्रतुल्यपराक्रमौ ॥ १२ ॥ कोहिशांतनवंभीष्मंद्रोणंवैकर्तनंकृपं॥ द्रौणिंचसौमदत्तिंचकृतवर्माणमेवच ॥१३॥ सैंधवंमद्रराजानंराजानंचसुयोधनं ॥ वीरानकृतास्त्रान्समरेसर्वानेवानिवर्तिनः ॥१४॥ अक्षौहिणीपतीनुग्रान्संहतान्युद्धदुर्मदान् ॥ त्वामृतेपुरुषव्याघ्रजेतुंशक्तःपुमानिह ॥ १५ ॥ श्रेण्यश्चबहुलाःक्षीणाःप्रदीर्णाश्वरथद्विपाः ॥ नानाजनपदाश्चोग्राःक्षत्रियाणाममर्षिणां ॥ १६ ॥ गोवासदासमीयानांवसातीनांचभारत ॥ प्राच्यानांवाटधानानांभोजानांचाभिमानिनां ॥ १७॥ उदीर्णाश्वगजासेनासर्वक्षत्रस्यभारत ॥ त्वांसमासाद्यनिधनंगताभीमंचभारत ॥ १८ ॥ उग्राश्चभीमकर्माणस्तुषारायवनाःखशाः ॥ दार्वाभिसारादरदाःशकामाठरतंगणाः ॥ १९ ॥ आंध्रकाश्चपुलिंदाश्चकिरातश्चोग्रविक्रमाः ॥ म्लेच्छाश्चपर्वतीयाश्चसागरानूपवासिनः ॥ २० ॥ संरंभिणोयुद्धशौंडाबलिनोदंडपाणयः॥एतेसुयोधनस्यार्थेसंरब्धाःकुरुभिःसह ॥ २१ ॥ नशक्यायुधिनिर्जेतुंत्वदन्येनपरंतप ॥ धार्तराष्ट्रमुदग्रंहिव्यूढंदृष्ट्वामहद्बलं ॥ २२ ॥ यदित्वंनभवेस्त्राताप्रतीयात्कोनुमानवः ॥ तत्सागरमिवोद्धूतंरजसासंवृतंबलं ॥ २३ ॥ विदार्यपांडवैःक्रुद्धैस्त्वयागुप्तैर्हतंविभो ॥ मागधानामधिपतिर्जयत्सेनोमहाबलः ॥ २४ ॥ अद्यसप्तैवचाहानिहतःसंख्येभिमन्युना ॥ ततोदशसहस्राणिगजानांभीमकर्मणां ॥ २५॥ जघानगदयाभीमस्तस्यराज्ञःपरिच्छदं ॥ ततोन्येभिहतानागारथाश्चशतशोबलात् ॥ २६॥

॥ २७ ॥ २८॥२९॥३०॥३१ ॥३२ ॥ ३३ ॥ ३४ ॥ ३५॥ ३६.॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥४२ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७॥ ४८ ॥ ४९ ॥ त्वांहीति क्षणेनसर्वंभस्मीकर्तुं

तदेवंसमरेपार्थवर्तमानेमहाभये॥ भीमसेनंसमासाद्यत्वांचपांडवकौरवाः॥ २७॥ सवाजिरथमातंगामृत्युलोकमितोगताः ॥ तथासेनामुखेतत्रनिहतेपार्थ पांडवैः॥ २८॥ भीष्मःप्रासृजदुग्राणिशरजालानिमारिष॥ सचेदिकाशिपांचालान्करूषान्मत्स्यकेकयान्॥ २९॥ शरैःप्रच्छाद्यनिधनमनयत्परमास्त्रवित्॥ तस्यचापच्युतैर्बाणैःपरदेहविदारणैः॥ ३०॥ पूर्णमाकाशमभवद्रुक्मपुंखैरजिह्मगैः॥ हन्याद्रथसहस्राणिएकैकेनैवमुष्टिना॥ ३१॥ लक्षंनरद्विपान्हत्वासमेता न्समहाबलान्॥ गत्यादशम्यांतेगत्वाजघ्नुर्वाजिरथद्विपान्॥ ३२॥ हित्वानवगतीर्दुष्टाःसबाणानाहवेत्यजन्॥ दिनानिदशभीष्मेणनिघ्नतानावकंबलं॥ ३३॥ शून्याःकृतारथोपस्थाहताश्वगजवाजिनः॥ दर्शयित्वात्मनोरूपंरुद्रोपेंद्रसमंयुधि॥ ३४॥ पांडवानामनीकानिप्रगृह्यासौव्यशातयत्॥ विनिघ्नन्पृथिवीपा लांश्चेदिपांचालकेकयान्॥ ३५॥ अदहत्पांडवींसेनांरथाश्वगजसंकुलां ॥ मज्जंतमप्लुवेमंदमुज्जिहीर्षुःसुयोधनं॥ ३६॥ तथाचरंतंसमरेतपंतमिवभास्करं पदातिकोटिसाहस्राःप्रवरायुधपाणयः॥ ३७॥ नशेकुःसृंजयाद्रष्टुंतथैवान्येमहीक्षितः॥ विचरंतंतथातंतुसंग्रामेजितकाशिनं॥ ३८॥ सर्वोद्यमेनमहतापांड वान्समभिद्रवत्॥ सतुविद्राव्यसमरेपांडवान्सृंजयानपि॥ ३९॥ एकएवरणेभीष्मएकवीरत्वमागतः॥ तंशिखंडीसमासाद्यत्वयागुप्तोमहाव्रतं॥ ४०॥ जघा नपुरुषव्याघ्रंशरैःसन्नतपर्वभिः॥ सएषपतितःशेतेशरतल्पेपितामहः॥ ४१॥ त्वांप्राप्यपुरुषव्याघ्रंवृत्रःप्राप्येववासवं॥ द्रोणःपंचदिनान्युग्रोविधम्यरिपुवा हिनीं॥ ४२॥ कृत्वाव्यूहमभेद्यंचपातयित्वामहारथान्॥ जयद्रथस्यसमरेकृत्वारक्षांमहारथः॥ ४३॥ अंतकप्रतिमश्चोग्रोरात्रियुद्धेऽदहत्प्रजाः॥ दग्ध्वायोधा न्छरैर्वीरोभारद्वाजःप्रतापवान्॥ ४४॥ धृष्टद्युम्नंसमासाद्यसगतःपरमांगतिं॥ यदिवाद्यभवान्युद्धेसूतपुत्रमुखान्रथान्॥ ४५॥ नावारयिष्यःसंग्रामेनस्मद्रो णोव्यनंक्ष्यत॥ भवतातुबलंसर्वंधार्तराष्ट्रस्यवारितं॥ ४६॥ ततोद्रोणोहतोयुद्धेपार्षतेनधनंजय॥ एवंवाकोरणेकुर्यात्त्वदन्यःक्षत्रियोयुधि॥ ४७॥ यादृशंतेकृतं पार्थजयद्रथवधंप्रति॥ निवार्यसेनांमहतींहत्वाशूरांश्चपार्थिवान्॥ ४८॥ निहतःसैंधवोराजात्वयास्त्रबलतेजसा॥ आश्चर्यंसिंधुराजस्यवधंजानंतिपार्थिवाः ॥ ४९॥ अनाश्चर्यंहितत्त्वत्तस्त्वंहिपार्थमहारथः॥ त्वांहिप्राप्यरणेक्षत्रमेकाहादितिभारत॥ ५०॥

सप्रर्थंत्वांप्राप्यएकाहान्नश्यमानंक्षत्रंयुकंबलवत्तरंमन्येयंजानीयांक्षणेननाश्यमपिपूर्वैकाहपर्यंतंस्थायित्वादितिभावसार्द्धः ॥ ५० ॥

॥ ५१ ॥ ५२ ॥ ५३॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६०॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२॥७३॥७४॥७५ ॥ ७६ ॥

नश्यमानमहंयुक्तंमन्येयमितिमेमतिः ॥ सेयंपार्थचमूर्घोराधार्तराष्ट्रस्यसंयुगे ॥ ५१ ॥ हतसर्वस्ववीराहिभीष्मद्रोणौयदाहतौ ॥ शीर्णप्रवरयोधाद्यहतवाजिरथ
द्विपा ॥ ५२ ॥ हीनासूर्येंदुनक्षत्रैर्द्यौरिवाभातिभारती ॥ विध्वस्ताहिरणेपार्थसेनेयंभीमविक्रम ॥ ५३ ॥ आसुरीवपुरासेनाशक्रस्येवपराक्रमैः ॥ तेषांहतावशि
ष्टास्तुसंतिपंचमहारथाः ॥ ५४ ॥ अश्वत्थामाकृतवर्माकर्णोमद्राधिपःकृपः ॥ तांस्त्वमद्यनरव्याघ्रहत्वापंचमहारथान् ॥ ५५ ॥ हतामित्रःप्रयच्छोर्वींराज्ञेसद्वी
पपत्तनां ॥ साकाशजलपातालांसपर्वतमहावनां ॥ ५६ ॥ प्राप्नोत्वमितवीर्यश्रीरद्यपार्थोवसुंधरां ॥ एतांपुराविष्णुरिवहत्वादैतेयदानवान् ॥ ५७ ॥ प्रयच्छमेदि
नींराज्ञेशक्रायैवहरिर्यथा ॥ अद्यमोदंतुपंचालानिहतेष्वरिपुत्वया ॥ विष्णुनानिहतेष्वेवदानवेयेपुदेवताः ॥ ५८ ॥ यदिवाद्विपदांश्रेष्ठद्रोणंमानयतोगुरुं ॥ अश्व
त्थाम्निकृपातेस्तिकृपेवाचार्यगौरवात् ॥ ५९ ॥ अत्यंतापचितान्बंधून्मानयन्मातृबांधवान् ॥ कृतवर्माणमासाद्यननेष्यसियमक्षयं ॥ ६० ॥ भ्रातरंमातुरासाद्य
शल्यंमद्रजनाधिपं ॥ यदित्वमरविंदाक्षदयावान्नजिघांससि ॥ ६१ ॥ इमंपापमतिंक्षुद्रमत्यंतंपांडवान्प्रति ॥ कर्णमद्यनरश्रेष्ठजत्याःसुनिशितैःशरैः ॥ ६२ ॥
एतत्तेसुकृतंकर्मनात्रकिंचनयुज्यते ॥ वयमप्यनुजानीमोनात्रदोषोस्तिकश्चन ॥ ६३ ॥ दहनेयत्सपुत्रायानिशिमातुस्त्वानघ ॥ द्यूतार्थेयच्चयुष्मासुप्रावर्त्तत
सुयोधनः ॥ ६४ ॥ तस्यसर्वस्यदुष्टात्माकर्णोवैमूलमित्युत ॥ कर्णाद्धिमन्यतेत्राणंनित्यमेवसुयोधनः ॥ ६५ ॥ ततोमामपिसंरब्धोनिग्रहीतुंप्रचक्रमे ॥ स्थिरावु
द्धिर्नरेंद्रस्यधार्तराष्ट्रस्यमानद ॥ ६६ ॥ कर्णःपार्थान्रणेसर्वान्विजेष्यतिनसंशयः ॥ कर्णमाश्रित्यकौंतेयधार्तराष्ट्रेणविग्रहः ॥ ६७ ॥ रोचितोभवतासार्धंजानता
पिबलंतव ॥ कर्णोहिभाषतेनित्यमहंपार्थान्समागतान् ॥ ६८ ॥ वासुदेवंचदाशार्हंविजेष्यामिमहारथं ॥ प्रोत्साहयन्दुरात्मानंधार्तराष्ट्रंसुदुर्मतिं ॥ ६९ ॥ समि
तौगर्जतेकर्णस्तमद्यजहिभारत ॥ यच्चयुष्मासुपापंवैधार्तराष्ट्रःप्रयुक्तवान् ॥ ७० ॥ तत्रसर्वत्रदुष्टात्माकर्णःपापमतिर्मुखं ॥ यच्चतद्धार्तराष्ट्रस्यक्रूरैःषड्भिर्महार
थैः ॥ ७१ ॥ अपश्यंनिहतंवीरंसौभद्रमृषभेक्षणं ॥ द्रोणद्रौणिकृपान्वीरान्कर्षयंतंनरर्षभान् ॥ ७२ ॥ निर्मनुष्यांश्चमातंगान्विरथांश्चमहारथान् ॥ व्यश्वारोहांश्च
तुरगान्पत्तीन्व्यायुधजीविनः ॥ ७३ ॥ कुर्वंतमृषभस्कंधंकुरुवृष्णियशस्करं ॥ विधमंतमनीकानिव्यथयंतंमहारथान् ॥ ७४ ॥ मनुष्यवाजिमातंगान्प्राहिण्वंतं
यमक्षयं ॥ शरैःसौभद्रमायांतंदहंतमिववाहिनीं ॥ ७५ ॥ तन्मेदहतिगात्राणिसखेसत्येनतेशपे ॥ यत्तत्रापिचदुष्टात्माकर्णोभ्यद्रुत्यतप्रभो ॥ ७६ ॥

अशक्नुवंश्चाभिमन्योःकर्णःस्थातुंरणेग्रतः ॥ सौभद्रशरनिर्भिन्नोविसंज्ञःशोणितोक्षितः ॥ ७७ ॥ निःश्वसन्क्रोधसंदीप्तोविमुखःसायकार्दितः ॥ अपयान
कृतोत्साहोनिराशश्चापिजीविते ॥ ७८ ॥ तस्यौसुविह्वलःसंख्येप्रहारजनितश्रमः ॥ अथद्रोणस्यसमरेतत्कालसदृशंतदा ॥ ७९ ॥ श्रुत्वाकर्णोवचःक्रूरंततश्चि
च्छेदकार्मुकं ॥ ततश्छिन्नायुधंतेनरणेपंचमहारथाः ॥ ८० ॥ तंचैवनिकृतिप्रज्ञाःप्राहरञ्छरवृष्टिभिः ॥ तस्मिन्विनिहतेवीरेसर्वेपांडुःखमाविशन् ॥ ८१ ॥ प्राह
सस्तुदुष्टात्माकर्णःसचसुयोधनः ॥ यच्चकर्णोब्रवीत्कृष्णांसभायांपरुषंवचः ॥ ८२॥ प्रमुखेपांडवेयानांकुरूणांचनृशंसवत् ॥ विनष्टाःपांडवाःकृष्णेशाश्वतंन
रकंगताः ॥ ८३ ॥ पतिमन्यंवृणुश्रोणिवृणीष्वमृदुभाषिणि ॥ एषात्वंधृतराष्ट्रस्यदासीभूतानिवेशनं ॥ ८४॥ प्रविशारालपक्ष्माक्षिनसंतिपतयस्तव ॥ नपांडवाः
प्रभवंतितवकृष्णेकथंचन ॥ ८५ ॥ दासभार्याचपांचालिस्वयंदासीचशोभने ॥ अद्यदुर्योधनोह्येकःपृथिव्यांनृपतिःस्मृतः ॥ ८६ ॥ सर्वेचास्यमहीपालायोग
क्षेममुपासते ॥ पश्येदानींयथाभद्रेविनष्टाःपांडवाःसमं ॥ ८७ ॥ अन्योन्यंसमुदीक्षंतेधार्तराष्ट्रस्यतेजसा ॥ व्यक्तंपंढतिलास्त्वेतेनपुरेवनिमंज्जिताः ॥ ८८ ॥ प्रे
ष्यवच्चापिराजानमुपस्थास्यंतिकौरवं ॥ इत्युक्तवानधर्मज्ञस्तदापरमदुर्मतिः ॥ ८९ ॥ पापःपापवचःकर्णःशृण्वतस्तवभारत ॥ अद्यपापस्यतद्वाक्यंसुवर्णविकृ
ताःशराः ॥ ९० ॥ शमयंतुशिलाधौतास्त्वयास्ताजीवितच्छिदः ॥ यानिचान्यानिदुष्टात्मापापानिकृतवांस्त्वयि ॥ ९१ ॥ तान्यद्यजीवितंचास्यशमयंतुशरास्त
व ॥ गांडीवप्रहितान्घोरानद्यगात्रैःस्पृशञ्छरान् ॥ ९२॥ कर्णःस्मरतुदुष्टात्मावचनंद्रोणभीष्मयोः॥ सुवर्णपुंखानाराचाःशत्रुघ्नावैद्युतप्रभाः॥ ९३॥ त्वयाऽस्ता
स्तस्यवर्माणिभित्वापास्यंतिशोणितं ॥ उग्रास्त्वद्भुजनिर्मुक्तामर्मभित्वामहाशराः ॥ ९४॥ अद्यकर्णमहावेगाःप्रेषयंतुयमक्षयं ॥ अद्यहाहाकृताःदीनाविषण्णा
स्त्वच्छरार्दिताः ॥ ९५ ॥ प्रपतंतंरथात्कर्णंपश्यंतुवसुधाधिपाः ॥ अद्यशोणितसंमग्नंशयानंपतितंभुवि ॥ अपविद्धायुधंकर्णंदीनाःपश्यंतुबांधवाः ॥ ९६ ॥ ह
स्तिकक्षोमहानस्यभल्लेनोन्मथितस्त्वया ॥ प्रकंपमानःपततुभूमावपिरथध्वजः॥ ९७॥ त्वयाशरशतैश्छिन्नंरथंहेमविभूषितं ॥ हतयोधाश्वमुत्सृज्यभीतःशल्यः
पलायतां ॥ ९८ ॥ नचेत्कर्णसुतंपार्थसूतपुत्रस्यपश्यतः ॥ प्रतिज्ञावारणार्थायनिहनिष्यसिसायकैः ॥ ९९ ॥ हतंकर्णस्तुतंदृष्ट्वाप्रियंपुत्रंदुरात्मवान् ॥ स्मरतांद्रो
णभीष्माभ्यांवचःक्षत्तुश्चमानद ॥ १००॥ ततःसुयोधनोदृष्ट्वाहतमाधिरथिंत्वया ॥ निराशोजीवितेत्वद्यराज्येचैवभवत्वरिः ॥ १०१ ॥

एतेद्रवंतिपंचालावध्यमानाःशितैःशरैः ॥ कर्णेनभरतश्रेष्ठपांडवानुज्जिहीर्षवः ॥ १०२॥ पंचालान्द्रौपदेयांश्चधृष्टद्युम्नशिखंडिनौ॥ धृष्टद्युम्नतनूजांश्चशतानीकं चनाकुलिं ॥ १०३ ॥ नकुलंसहदेवंचदुर्मुखंजनमेजयं ॥ सुधर्माणंसात्यकिंचविद्धिकर्णवशंगतान् ॥ १०४ ॥ अभ्याहतानांकर्णेनपंचालानामसौरणे ॥ श्रूय तेनिनदोघोरस्त्वद्बंधूनांपरंतप ॥ १०५ ॥ नत्वेवभीताःपंचालाःकथंचित्स्युःपराङ्मुखाः॥ नहिमृत्युंमहेष्वासागणयंतिमहारणे ॥ १०६॥ यएकःपांडवींसेनांश रौघैःसमवेष्टयत् ॥ तंसमासाद्यपंचालाभीष्मान्नासन्पराङ्मुखाः ॥ १०७॥ तेकथंकर्णमासाद्यविद्रवेयुर्महारथाः ॥ यस्त्वेकःसर्वपंचालानहन्यहनिनाशयन् ॥ १०८॥ कालवच्चरत्वीरःपंचालानांरथव्रजे ॥ तमप्यासाद्यसमरेमित्रार्थेमित्रवत्सलाः ॥ १०९ ॥ तथाज्वलंतमस्त्राग्निंगुरुंसर्वधनुष्मतां ॥ निर्दहंतंचसमरेदु र्धर्षंद्रोणमोजसा ॥ ११० ॥ तेनित्यमुदिताजेतुंमृधेशत्रूनरिंदम ॥ नजात्वाधिरथेर्भीताःपंचालाःस्युःपराङ्मुखाः ॥ १११ ॥ तेषामापततांशूरःपंचालानांतर स्विनां ॥ आदत्तासूञ्शरैःकर्णःपतंगानामिवानलः ॥ ११२॥ एतेद्रवंतिपंचालाद्राव्यंतेयोधिभिर्ध्रुवं ॥ कर्णेनभरतश्रेष्ठपश्यपश्यतथाकृतान् ॥ ११३॥ तांस्तथा भिमुखान्वीरान्मित्रार्थेत्यक्तजीवितान् ॥ क्षयंनयतिराधेयःपंचालाञ्छतशोरणे ॥ १४॥ तद्भारतमहेष्वासानगाधेमज्जतोऽप्लुवे ॥ कर्णार्णवेप्लवोभूत्वापंचालां स्त्रातुमर्हसि ॥ १५ ॥ अस्त्रंहिरामात्कर्णेनभार्गवादृषिसत्तमात् ॥ यदुपात्तंमहाघोरंतस्यरूपमुदीर्यते ॥ १६ ॥ तापनंसर्वसैन्यानांघोररूपंसुदारुणं ॥ समावृत्यम हासेनांज्वलंतंस्वेनतेजसा ॥ १७॥ एतेचरंतिसंग्रामेकर्णचापच्युताःशराः ॥ भ्रमराणामिवव्रातास्तापयंतिस्मतावकान् ॥ १८ ॥ एतेद्रवंतिपंचालादिक्षुसर्वा सुभारत ॥ कर्णास्त्रंसमरेप्राप्यदुर्निवार्यमनात्मभिः ॥ १९ ॥ एषभीमोदृढक्रोधोवृतःपार्थसमंततः ॥ सृंजयैर्योधयन्कर्णंपीड्यतेनिशितैःशरैः ॥ १२०॥ पांडवा न्सृंजयांश्चैवपंचालांश्चैवभारत ॥ हन्यादुपेक्षितःकर्णोरोगोदेहमिवागतः ॥ २१ ॥ नान्यंत्वत्तोहिपश्यामियोधंयौधिष्ठिरेबले ॥ यःसमासाद्यराधेयंस्वस्तिमाना व्रजेद्गृहं ॥ २२ ॥ तमद्यनिशितैर्बाणैर्विनिहत्यनरर्षभ ॥ यथाप्रतिज्ञंपार्थत्वंकृत्वाकीर्तिमवाप्नुहि ॥ २३ ॥ त्वंहिशक्तोरणेजेतुंसकर्णानपिकौरवान् ॥ नान्योयु धियुधांश्रेष्ठसत्यमेतद्ब्रवीमिते ॥ २४ ॥ एतत्कृत्वामहत्कर्महत्वाकर्णंमहारथं ॥ कृतार्थःसफलःपार्थःसुखीभवनरोत्तम ॥ १२५॥ इतिश्रीमहाभारतेकर्णप र्वणिकृष्णवाक्येत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ ७३ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ ७ ॥ ॥ ७ ॥

सकेशवस्येति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ज्वलंतंपुंस्त्वमार्षं ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ स्मरतांस्मरतु ॥ १४ ॥ मंडलंघूतेशारीस्थापनपट्टं दुरोदरंपाशं ॥ १५ ॥ १६ ॥

संजयउवाच सकेशवस्यबीभत्सुःश्रुत्वाभारतभाषितं ॥ विशोकःसंप्रहृष्टश्चक्षणेनसमपद्यत ॥ १ ॥ ततोज्याममिमृज्याशुव्याक्षिपद्गांडिवंधनुः ॥ दध्रेकर्ण
विनाशायकेशवंचाभ्यभाषत ॥ २ ॥ त्वयानाथेनगोविंदध्रुवएवजयोमम ॥ प्रसन्नोयस्यमेद्यत्वंलोकेभूतभविष्यकृत् ॥ ३ ॥ त्वत्सहायोह्यहंकृष्णत्रींल्लोकान्वै
समागतान् ॥ प्रापयेयंपरंलोकंकिमुकर्णंमहाहवे ॥ ४ ॥ पश्यामिद्रवतींसेनांपंचालानांजनार्दन ॥ पश्यामिकर्णंसमरेविचरंतमभीतवत् ॥ ५ ॥ भार्गवास्त्रंचप
श्यामिज्वलंतंकृष्णसर्वशः ॥ सृष्टंकर्णेनवार्ष्णेयशक्रेणेवयथाशनिं ॥ ६ ॥ अयंखलुससंग्रामोयत्रकर्णमयाहतं ॥ कथयिष्यंतिभूतानियावद्भूमिर्धरिष्यति ॥ ७ ॥
अद्यकृष्णविकर्णामेकर्णंनेष्यंतिमृत्यवे ॥ गांडीवमुक्ताःक्षिण्वंतोममहस्तप्रचोदिताः ॥ ८ ॥ अद्यराजाधृतराष्ट्रःस्वांबुद्धिमवमंस्यते ॥ दुर्योधनमराज्यार्हंययाराग
ज्येभ्यषेचयत् ॥ ९ ॥ अद्यराज्यात्सुखाच्चैवश्रियोराष्ट्रात्तथापुरात् ॥ पुत्रेभ्यश्चमहाबाहोधृतराष्ट्रोविमोक्ष्यति ॥ १० ॥ गुणवंतंहियोद्वेष्टिनिर्गुणंकुरुतेप्रभुं ॥ सशो
चतिनृपःकृष्णक्षिप्रमेवागतेक्षये ॥ ११ ॥ यथाचपुष्पःकश्चिच्छित्वाचाम्रवणंमहत् ॥ फलंदृष्ट्वाभृशंदुःखीभविष्यतिजनार्दन ॥ सूतपुत्रेहतेत्वद्यनिराशोभवि
ताप्रभुः ॥ १२ ॥ अद्यदुर्योधनोराज्याज्जीविताच्चनिराशकः ॥ भविष्यतिहतेकर्णेकृष्णसत्यंब्रवीमिते ॥ १३ ॥ अद्यदृष्ट्वामयाकर्णंशरैर्विशकलीकृतं ॥ स्मरतांत
ववाक्यानिशमंप्रतिजनेश्वरः ॥ १४ ॥ अद्यासौसौबलःकृष्णग्लहान्जानातुवैशरान् ॥ दुरोदरंचगांडीवंमंडलंचरथंप्रति ॥ १५ ॥ अद्यकुंतीसुतस्याहंदृढंगत्नः
प्रजागरं ॥ व्यपनेष्यामिगोविंदहत्वाकर्णंशितैःशरैः ॥ १६ ॥ अद्यकुंतीसुतोराजाहतेसूतसुतेमया ॥ सुप्रहृष्टमनाःप्रीतश्चिरंसुखमवाप्स्यति ॥ १७ ॥ अद्यचाह
मनाधृष्यंकेशवाप्रतिमंशरं ॥ उत्स्रक्ष्यामीहयःकर्णंजीविताद्भ्रंशयिष्यति ॥ १८ ॥ यस्यचैतद्व्रतंमत्यंवधेकिलदुरात्मनः ॥ पादौनधावयेतावद्यावद्धन्यांनफाल्गु
नं ॥ १९ ॥ मृषाकृत्वाव्रतंतस्यपापस्यमधुसूदन ॥ पातयिष्येरथात्कायंशरैःसन्नतपर्वभिः ॥ २० ॥ योसौरणेनरंनान्यंपृथिव्यामनुमन्यते ॥ तस्याद्यसूतपुत्रस्य
भूमिःपास्यतिशोणितम ॥ २१ ॥ अपतिस्त्वमिकृष्णेतिसूतपुत्रोयदब्रवीत् ॥ धृतराष्ट्रमतेकर्णःश्लाघमानःस्वकान्गुणान् ॥ २२ ॥ अनृतंतत्करिष्यंतिमामका
निशिताःशराः ॥ आशीविषाइवक्रुद्धास्तस्यपास्यंतिशोणितं ॥ २३ ॥ मयाहस्तवतामुक्तानाराचाविद्युत्त्विषः ॥ गांडीवसृष्टादास्यंतिकर्णस्यपरमांगतिं ॥ २४ ॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

अद्यतप्स्यतिराधेयःपांचालींयत्तदाब्रवीत्॥सभामध्येवचःक्रूरंकुत्सयन्पांडवान्प्रति॥ २५॥ येवैपंढतिलास्तत्रभवितारोद्यतेतिलाः॥ हतेवैकर्तनेकर्णेसूतपुत्रेदु
रात्मनि॥ २६॥ अहंवःपांडुपुत्रेभ्यस्त्रास्यामीतियदब्रवीत्॥ धृतराष्ट्रसुतान्कर्णःश्लाघमानोत्मनोगुणान्॥ अनृतंतत्करिष्यंतिमामकानिशिताःशराः॥ २७॥
उद्योगःपांडुपुत्राणांसमाप्तिमुपयास्यति॥ हंताहंपांडवान्सर्वान्सपुत्रानितियोब्रवीत्॥ २८॥ तमद्यकर्णंहंतास्मिमिपतांसर्वधन्विनां॥ यस्यवीर्यंसमाश्रित्यधा
र्तराष्ट्रोमहामनाः॥ २९॥ अवामन्यतदुर्बुद्धिर्नित्यमस्मान्दुरात्मवान्॥ हत्वाहंकर्णमाजौहितोपयिष्यामिभ्रातरं॥ ३० ॥ शरान्नानाविधान्मुक्त्वात्रासयिष्या
मिशात्रवान्॥ आकर्णमुक्तैरिपुभिर्यमराष्ट्रविवर्धनैः॥ ३१ ॥ भूमिंशोभांकरिष्यामिपातितैरथकुंजरैः॥ तत्राहंवैमहासंख्येसंपन्नंयुद्धदुर्मदं॥ ३२॥ अद्यकर्णं
महद्घोरंसूदयिष्यामिसायकैः॥ अद्यकर्णेहतेकृष्णधार्तराष्ट्राःसराजकाः॥३३॥ विद्रवंतुदिशोभीताःसिंहत्रस्तामृगाइव॥ अद्यदुर्योधनोराजाआत्मानंचानुशो
चतां॥ ३४॥ हतेकर्णेमयासंख्येसपुत्रेससुहृज्जने॥ अद्यकर्णंहतंदृष्ट्वाधार्तराष्ट्रोत्यमर्पणः॥ ३५॥ जानातुमांरणेकृष्णप्रवरंसर्वधन्विनां॥ सपुत्रपौत्रंसामात्यं
सभृत्यंचनिराशिषं॥ ३६॥ अद्यराज्यंकरिष्यामिधृतराष्ट्रंजनेश्वरं॥ अद्यकर्णस्यचक्रांगाःक्रव्यादाश्चपृथग्विधाः॥ ३७॥शरैश्छिन्नानिगात्राणिविचरिष्यंति
केशव॥ अद्यराधासुतस्याहंसंग्राममधुसूदन॥ ३८॥ शिरश्छेत्स्यामिकर्णस्यमिषतांसर्वधन्विनां॥ अद्यतीक्ष्णैर्विपाठैश्चक्षुरैश्चमधुसूदन॥३९॥ रणेछेत्स्या
मिगात्राणिराधेयस्यदुरात्मनः॥ अद्यराजामहत्कृच्छ्रंसंत्यक्ष्यतियुधिष्ठिरः॥ ४०॥ संतापंमानसंवीरश्चिरसंभृतमात्मनः॥ अद्यकेशवराधेयमहंहत्वासबांधवं
॥ ४१ ॥ नंदयिष्यामिराजानंधर्मपुत्रंयुधिष्ठिरं॥ अद्याहमनुगान्कृष्णकर्णस्यकृपणान्युधि॥ ४२॥ हंताज्वलनसंकाशैःशरैःसर्पविपोपमैः॥ अद्याहंहेमकवचै
राबद्धमणिकुंडलैः॥ ४३॥ संस्तरिष्यामिगोविंदवसुधांवसुधाधिपैः॥ अद्याभिमन्योःशत्रूणांसर्वेषांमधुसूदन॥ ४४ ॥ प्रमथिष्यामिगात्राणिसिरांशिचशि
तैःशरैः॥ अद्यनिर्धार्तराष्ट्रांचभ्रात्रेदास्यामिमेदिनीं॥ ४५॥ निरर्जुनांवापृथिवींकेशवानुचरिष्यसि॥ अद्याहमनृणःकृष्णभविष्यामिधनुर्भृतां॥ ४६ ॥ कोप
स्यचकुरूणांचशराणांगांडिवस्यच॥ अद्यदुःखमहंमोक्ष्येत्रयोदशसमार्जितं॥ ४७॥ हत्वाकर्णंरणेकृष्णशंबरंमघवानिव ॥ अद्यकर्णेहतेयुद्धेसोमकानांमहा
रथाः॥ ४८॥ कृतंकार्यंचमन्यंतांमित्रकार्येप्सवोयुधि॥ ममचैवकथंप्रीतिःशैनेयस्याद्यमाधव॥ ४९॥

॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ १ ॥ ॥ १ ॥ ॥ १ ॥

भविष्यतिहतेकर्णेमयिचापिजयाधिके ॥ अहंहत्वारणेकर्णपुत्रंचास्यमहारथं ॥ ५० ॥ प्रीतिंदास्यामिभीमस्ययमयोःसात्यकस्यच ॥ धृष्टद्युम्नशिखंडिभ्यांपं
चालानांचमाधव ॥ ५१ ॥ अद्यानृण्यंगमिष्यामिहत्वाकर्णंमहाहवे ॥ अद्यपश्यंतुसंग्रामेधनंजयममर्षणं ॥ ५२ ॥ युध्यंतंकौरवान्संख्येपातयंतंचसूतजं ॥ भव
त्सकाशेवक्ष्येचपुनरेवात्मसंस्तवं ॥ ५३ ॥ धनुर्वेदेमत्समोनास्तिलोकेपराक्रमेवाममकोस्तितुल्यः ॥ कोवाप्यन्योमत्समोस्तिक्षमावांस्तथाक्रोधेमत्सदृशोन्योनमे
स्ति ॥ ५४ ॥ अहंधनुष्मानसुरान्सुरांश्चसर्वाणिभूतानिचसंगतानि ॥ स्वबाहुवीर्याद्गमयेपराभवंमत्पौरुषंविद्धिपरंपरेभ्यः ॥ ५५ ॥ शरार्चिषागांडिवेनाहमेकः
सर्वान्कुरून्बाह्लिकांश्चाभिहत्य ॥ हिमात्ययेकक्षगतोयथाग्निस्तथादहेयंसगणान्प्रसह्य ॥ ५६ ॥ पाणौपृषत्कालिखितानममैतेधनुश्चसव्येविततंसबाणं ॥ पादौ
चमेसरथौसध्वजौचनमादृशंयुद्धगतंजयंति ॥ ५७ ॥ इत्येवमुक्त्वार्जुनमेकवीरःक्षिप्रंरिपुघ्नःक्षतजोपमाक्षः ॥ भीमंमुमुक्षुःसमरप्रयातःकर्णस्यकायाच्चशिरो
जिहीर्षुः ॥ ५८ ॥ इतिश्रीमहाभारतेकर्णपर्वणिअर्जुनवाक्येचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ १ ॥ धृतराष्ट्रउवाच समागमेपांडवसृंजयानां
महाभयेमामकानामगाधे ॥ धनंजयेतातरणाययातेकर्णेनतद्युद्धमथोत्रकीदृक् ॥ १ ॥ संजयउवाच तेषामनीकानिबृहद्ध्वजानिरणेसमृद्धानिसमाग
तानि ॥ गर्जंतिभेरीनिनदोन्मुखानिनादैर्यथामेघगणास्तपांते ॥ २ ॥ महागजाभ्राकुलमस्त्रतोयंवादित्रनेमीतलशब्दवच्च ॥ हिरण्यचित्रायुधविद्युतंचशरासि
नाराचमहास्त्रधारं ॥ ३ ॥ तद्भीमवेगंरुधिरौघवाहिखड्गाकुलंक्षत्रियजीवघाति ॥ अनार्तवंक्रूरमनिष्टवर्षंबभूवतत्संहरणंप्रजानां ॥ ४ ॥ एकंरथंसंपरिवार्यमृत्युं
नयंत्यनेकेचरथाःसमेताः ॥ एकस्तथैकंरथिनंरथाग्र्यांस्तथारथश्चापिरथाननेकान् ॥ ५ ॥ रथंससूतंसहयंचकंचित्कश्चिद्रथीमृत्युवशंनिनाय ॥ निनायचाप्ये
कगजेनकश्चिद्रथान्बहून्मृत्युवशेतथाश्वान् ॥ ६ ॥ रथान्ससूतान्सहयान्गजांश्चसर्वानरीन्मृत्युवशंशरौघैः ॥ निन्येहयांश्चैवतथाससादीन्पदातिसंघांश्चतथैव
पार्थः ॥ ७ ॥ कृपःशिखंडीचरणेसमेतौदुर्योधनंसात्यकिरभ्यगच्छत् ॥ श्रुतस्तथाद्रोणपुत्रेणसार्धंयुधामन्युश्चित्रसेनेनसार्धं ॥ ८ ॥ कर्णस्यपुत्रंतुरथीसुषेणंस
मागतंसृंजयश्चोत्तमौजाः ॥ गांधारराजंसहदेवःक्षुधार्तोमहर्षभंसिंहइवाभ्यधावत् ॥ ९ ॥

समागमेइति समागमेकर्णेनसहकीदृग्युद्धमभूदितिशेषः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

पांचालेयंपांचालीतनयंनाकुलि ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ७५ ॥

शतानीकोनाकुलिःकर्णपुत्रंयुवायुवानंवृषसेनंशरौघैः ॥ समार्पयत्कर्णपुत्रश्चशूरःपांचालेयंशरवर्षैरनेकैः ॥ १० ॥ रथर्षभःकृतवर्माणमार्च्छन्माद्रीपुत्रोनकुल श्चित्रयोधी ॥ पंचालानामधिपोयाज्ञसेनिःसेनापतिःकर्णमार्च्छत्ससैन्यं ॥ ११ ॥ दुःशासनोभारतभारतीचसंशप्तकानांपृतनासमृद्धा ॥ भीमंरणेशस्त्रभृतांवरि ष्ठंभीमंसमार्च्छत्तमसह्यवेगं ॥ १२ ॥ कर्णात्मजंतत्रजघानवीरस्तथाच्छिनच्चोत्तमौजाःप्रसह्य ॥ तस्योत्तमांगंनिपपातभूमौनिनादयद्द्यांनिनदेनखंच ॥ १३ ॥ सुषेणशीर्षंपतितंपृथिव्यांविलोक्यकर्णोथतदार्तरूपः ॥ क्रोधाद्धयांस्तस्यरथंध्वजंचबाणैःसुधारैर्निशितैरकृंतत ॥ १४ ॥ सतूत्तमौजानिशितैःपृषत्कैर्विव्याधखड्गेनचभास्वरेण ॥ पार्ष्णिग्रहांश्चैवकृपस्यहत्वाशिखंडिवाहंसततोध्यरोहत् ॥ १५ ॥ कृपंतुदृष्ट्वाविरथंरथस्थोनैच्छच्छरैस्ताडयितुंशिखंडी ॥ तंद्रौणिरावार्यरथंकृपस्यसमुज्जह्रेपंकगतांयथागां ॥ १६ ॥ हिरण्यवर्मानिशितैःपृषत्कैस्तवात्मजानामनिलात्मजोवै ॥ अतापयत्सैन्यमतीवभीमःकालेशुचौमध्यगतोयथार्कः ॥ ॥ १७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलद्वंद्वयुद्धेपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ७५ ॥ संजयउवाच अथत्विदानींतुमुलेविमर्देद्विपद्भिरेकोबहुभिःसमावृतः ॥ महारणेसारथिमित्युवाचभीमश्चमूंवाहयधार्तराष्ट्रीं ॥ १ ॥ त्वंसारथेयाहिजवेनवाहैर्नयाम्येतान्धार्तराष्ट्रान्यमाय ॥ संचोदितोभीमसेनेनचैवंससारथिःपुत्रबलंत्वदीयं ॥ २ ॥ प्रायात्ततःसत्वरमुग्रवेगोयतोभीमस्तद्बलंगंतुमैच्छत् ॥ ततोपरेनागरथाश्वपत्तिभिःप्रत्युद्ययुस्तंकुरवःसमंतात् ॥ ॥ ३ ॥ भीमस्यवाहाग्र्यमुदारवेगंसमंततोबाणगणैर्निजघ्नुः ॥ ततःशरानापततोमहात्माचिच्छेदबाणैस्तपनीयपुंखैः ॥ ४ ॥ तेवैनिपेतुस्तपनीयपुंखाद्विधात्रिधाभीमशरैर्निकृत्ताः ॥ ततोराजन्नागरथाश्वयूनांभीमाहतानांवरराजमध्ये ॥ ५ ॥ घोरोनिनादःप्रबभौनरेंद्रवज्राहतानामिवपर्वतानां ॥ तेवध्यमानाश्चनरेंद्रमुख्यानिर्भिन्नाभीमशरप्रवेकैः ॥ ६ ॥ भीमंसमंतात्समरेऽध्यरोहन्वृक्षंशकुंताइवपुष्पहेतोः ॥ ततोभियातंतवसैन्यमध्येभीमःप्रादुश्चक्रेवेगमनंतवेगः ॥ ७ ॥ यथांतकालेक्षपयन्दिधक्षुर्भूतांतकृत्कालइवात्तदंडः ॥ तस्यातिवेगस्यरणेतिवेगंनाशक्नुवन्धारयितुंत्वदीयाः ॥ ८ ॥ व्यात्ताननस्यापततोयथैवकालस्यकालेहरतःप्रजावै ॥ ततोबलंभारतभारतानांप्रदह्यमानंसमरेमहात्मना ॥ ९ ॥ भीतंदिशोऽकीर्यतभीमनुन्नंमहानिलेनाभ्रगणायथैव ॥ ततोधीमान्सारथिमब्रवीद्बलीसभीमसेनःपुनरेवहृष्टः ॥ १० ॥

अथेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

सूताभिजानीहिस्वकान्परान्वारथान्ध्वजांश्चापततःसमेतान्॥ युध्यन्त्यहंनाभिजानामिकिंचिन्मासैन्यंस्वंछादयिष्येपृषत्कैः॥ ११ ॥ अरीन्विशोकाभिनिरी
क्ष्यसर्वतोरथांध्वजाग्राणिधुनोतिमेभृशं ॥ राजातुरोनागमद्यत्किरीटीबहूनिदुःखान्यभियातोस्मिसूत ॥ १२ ॥ एतद्दुःखंसारथेधर्मराजोयन्मांहित्वायातवा
न्शत्रुमध्ये॥ नैनंजीवंनाद्यजानाम्यजीवंबीभत्सुंवातन्ममाद्यातिदुःखं॥ १३॥ सोहंद्विषत्सैन्यमुदग्रकल्पंविनाशयिष्येपरमप्रतीतः॥ एतन्निहत्याजिमध्येसमे
तंप्रीतोभविष्यामिसहत्वयाद्य॥ १४॥ सर्वास्तूणान्सायकानामवेक्ष्यकिंशिष्टंस्यात्सायकानांरथेमे ॥ कावाजातिःकिंप्रमाणंचतेषांज्ञात्वाव्यक्तंतत्समाचक्ष्व
सूत॥ १५॥ विशोकउवाच षण्मार्गणानामयुतानिवीरक्षुराश्चभल्लाश्चतथायुतारव्याः॥ नाराचानांद्वेसहस्रेचवीरत्रीण्येवचप्रदराणांस्मपार्थ॥ १६॥
अस्त्यायुधंपांडवेयावशिष्टंनयद्वहेच्छकटंषड्गवीयं॥ एतद्विद्वन्मुंचसहस्रशोपिगदासिबाहुद्रविणंचतेस्ति ॥ १७ ॥ प्रासाश्चमुद्गराःशक्तयस्तोमराश्चमाभैषीस्त्वं
संक्षयादायुधानां॥ १८॥ भीमसेनउवाच सूताद्येनंपश्यभीमप्रयुक्तैःसंछिंदद्भिःपार्थिवानांसुवेगैः॥ छन्नंबाणैराहवंघोररूपंनष्टादित्यंमृत्युलोकेनतुल्यं
॥ १९ ॥ अद्यैतद्वैविदितंपार्थिवानांभविष्यतित्याकुमारंचसूत॥ निमग्नोवासमरेभीमसेनएकःकुरून्वासमरेव्यजैषीत्॥ २० ॥ सर्वेसंख्येकुरवोनिष्पतंतुमांवा
लोकाःकीर्तयंत्वाकुमारं॥ सर्वानेकस्तानहंपातयिष्येतेवासर्वेभीमसेनंतुदंतु॥ २१॥आशास्तारःकर्मचाप्युत्तमंयेतन्मेदेवाःकेवलंसाधयंतु॥ आयात्विहाद्यार्जु
नःशत्रुघातीशक्रस्तूर्णंयज्ञइवोपहूतः॥ २२॥ ईक्षस्वैनांभारतींदीर्यमाणामेतेकस्मांद्विद्रवंतेनरेंद्राः॥व्यक्तंधीमान्सव्यसाचीनराग्र्यःसैन्यंह्येतच्छादयत्याशुबा
णैः॥ २३॥ पश्यध्वजांश्चद्रवतोविशोकनागाहयान्पत्तिसंघांश्चसंख्ये॥ रथान्विकीर्णान्शरशक्तिताडितान्पश्यस्वैतान्रथिनश्चैवसूत ॥ २४ ॥ आपूर्यतेकौर
वीचाप्यभीक्ष्णंसेनाह्यसौसुभृशंहन्यमाना॥ धनंजयस्याशनितुल्यवेगैर्ग्रस्ताशरैःकांचनबर्हिजालैः॥ २५॥ एतेद्रवंतिस्मरथाश्वनागाःपदातिसंघानतिमर्द
यंतः॥ संमुह्यमानाःकौरवाःसर्वएवद्रवंतिनागाइवदाहभीताः ॥ २६ ॥ हाहाकृताश्चैवरणेविशोकमुंचंतिनादान्विपुलान्गजेंद्राः॥ २७॥ विशोकउवाच
किंभीमनैनंत्वमिहाश्रृणोषिविस्फारितंगांडिवस्यातिघोरं॥ क्रुद्धेनपार्थेनविकृष्यतेद्यकच्चिन्नेमौतवकर्णौविनष्टौ॥ २८॥ सर्वेकामाःपांडवतेसमृद्धाःकपिर्ह्य
सौदृश्यतेहस्तिसैन्ये॥ नीलाद्घनाद्विद्युतमुच्चरंतींतथापश्यविस्फुरंतींधनुर्ज्यां॥ २९॥

॥ ८७॥ ८

कपिर्ध्वमौवीक्षतेसर्वतोवैध्वजाग्रमारुह्यधनंजयस्य ॥ वित्रासयन्रिपुसंघान्विमर्दैबिभेम्यस्मादात्मनैवाभिवीक्ष्य॥३०॥विभ्राजतेचातिमात्रंकिरीटंविचि त्रमेतच्चधनंजयस्य॥ दिवाकराभोमणिरेषदिव्योविभ्राजतेचैवकिरीटसंस्थः॥ ३१॥ पार्श्वेभीमंपांडुराभ्रप्रकाशंपश्यस्वशंखंदेवदत्तंसुघोषं॥ अभीषुहस्तस्य जनार्दनस्यविगाहमानस्यचमूंपरेषां॥ ३२॥ रविप्रभंवज्रनाभंक्षुरांतंपार्श्वेस्थितंपश्यजनार्दनस्य ॥ चक्रंयशोवर्धनंकेशवस्यसदार्चितंयदुभिःपश्यवीर ॥ ॥ ३३॥ महाद्विपानांसरलद्रुमोपमाःकरानिकृत्ताःप्रपतंत्यमीक्षुरैः॥ किरीटिनातेनपुनःससादिनःशरैर्निकृत्ताःकुलिशैरिवाद्रयः॥३४॥ तथैवकृष्णस्यचपांच जन्यंमहार्हमेतंद्विजराजवर्णं॥ कौंतेयपश्योरसिकौस्तुभंचजाज्वल्यमानंविजयांस्रजंच॥ ३५॥ ध्रुवंरथाग्र्यःसमुपैतिपार्थोविद्रावयन्सैन्यमिदंपरेषां॥ सिता भ्रवर्णैरसितप्रयुक्तैर्हयैर्महार्हैरथिनांवरिष्ठः॥ ३६॥ रथान्हयान्पत्तिगणांश्चसायकैर्विदारितान्पश्यपतंत्यमीयथा॥ तवानुजेनामरराजतेजसामहावनानीव सुपर्णवायुना॥ ३७॥ चतुःशतान्पश्यरथानिमान्हतान्सवाजिसूतान्समरेकिरीटिना॥ महेषुभिःसप्तशतानिदंतिनांपदातिसादींश्चरथाननेकशः॥ ३८ ॥ अयंसमभ्येतितवांतिकंबलीनिघ्नन्कुरूंश्चित्रइवग्रहोर्जुनः॥ समृद्धकामोसिहतास्तवाहिताबलंतवायुश्चचिरायवर्धतां॥ ३९॥ भीमसेनउवाच ददानि तेग्रामवरांश्चतुर्दशप्रियाख्यानेसारथेसुप्रसन्नः॥ दासीशतंचापिरथांश्चविंशतिंयदर्जुनंवेदयसेविशोक॥ ४०॥ इतिश्रीमहाभारतेकर्णपर्वणिभीमसेनवि शोकसंवादेषट्सप्ततितमोऽध्यायः॥७६॥ ॥७॥ संजयउवाच श्रुत्वातुरथनिर्घोषंसिंहनादंचसंयुगे॥ अर्जुनःप्राहगोविंदंशीघ्रंनोदयवाजिनः ॥ १ ॥ अर्जुनस्यवचःश्रुत्वागोविंदोर्जुनमब्रवीत्॥ एषगच्छामिसुक्षिप्रंयत्रभीमोव्यवस्थितः ॥ २ ॥ तंयांतमश्वैर्हिमशंखवर्णैःसुवर्णमुक्तामणिजालनद्धैः॥ जंभंजिघांसुंप्रगृहीतवज्रंजयायदेवेंद्रमिवोग्रमन्युं॥ ३॥ रथाश्वमातंगपदातिसंघाबाणस्वनैर्नेमिखुरस्वनैश्च॥ संनादयंतोवसुधांदिशश्चक्रुद्धान्नृसिंहाजयम भ्युदीयुः॥ ४॥ तेषांचपार्थस्यचमारिषासीद्देहासुपाप्मक्षपणंसुयुद्धं॥ त्रैलोक्यहेतोरसुरैर्यथासीद्देवस्यविष्णोर्जयतांवरस्य॥ ५॥ तैरस्तमुच्चावचमायुधंतदेकः प्रचिच्छेदकिरीटमाली॥ क्षुरार्धचंद्रैर्निशितैश्चभल्लैःशिरांसितेषांबहुधाचबाहून्॥ ६॥ छत्राणिवालव्यजनानिकेतूनश्वान्रथान्पत्तिगणान्द्विपांश्च॥ तेपेतुरु र्व्यांबहुधाविरूपावातप्रणुन्नानियथावनानि॥ ७॥ श्रुत्वेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

सुवर्णजालावततामहागजाःसर्वैजयंतीध्वजयोधकल्पिताः ॥ सुवर्णपुंखैरिषुभिःसमाचिताश्वकाशिरेप्रज्वलितायथाचलाः ॥ ८ ॥ विदार्यनागाश्वरथान्ध
नंजयःशरोत्तमैर्वासववज्रसन्निभैः ॥ द्रुतंययौकर्णजिघांसयातथायथामरुत्वान्बलभेदनेपुरा ॥ ९ ॥ ततःसपुरुषव्याघ्रस्तवसैन्यमरिंदमः ॥ प्रविवेशमहा
बाहुर्मकरःसागरंयथा ॥ १० ॥ तंहृष्टास्तावकाराजन्रथपत्तिसमन्विताः ॥ गजाश्वसादिबहुलाःपांडवंसमुपाद्रवन् ॥ ११ ॥ तेषामापततांपार्थमारावःसुमहान
भून् ॥ सागरस्येवक्षुब्धस्ययथास्यात्सलिलस्वनः ॥ १२ ॥ तेतुतंपुरुषव्याघ्रंव्याघ्राइवमहारथाः ॥ अभ्यद्रवंतसंग्रामेत्यक्त्वाप्राणकृतंभयं ॥ १३ ॥ तेषामापत
तांतत्रशरवर्षाणिमुंचतां ॥ अर्जुनोव्यधमत्सैन्यंमहावातोघनानिव ॥ १४ ॥ तेर्जुनंसहिताभूत्वारथवंशैःप्रहारिणः ॥ अभियायमहेष्वासाविव्यधुर्निशितैःश
रैः ॥ १५ ॥ ततोर्जुनःसहस्राणिरथवारणवाजिनां ॥ प्रेषयामासविशिखैर्यमस्यसदनंप्रति ॥ १६ ॥ तेवध्यमानाःसमरेपार्थचापच्युतैःशरैः ॥ तत्रतत्रस्मलीयं
तेभयेजातेमहारथाः ॥ १७ ॥ तेषांचतुःशतान्वीरान्यतमानान्महारथान् ॥ अर्जुनोनिशितैर्बाणैरनयद्यमसादनं ॥ १८ ॥ तेवध्यमानाःसमरेनानालिंगैःशितैः
शरैः ॥ अर्जुनंसमभित्यज्यदुद्रुवुर्वैदिशोदश ॥ १९ ॥ तेषांशब्दोमहानासीद्द्रवतांवाहिनीमुखे ॥ महौघस्येवजलधेर्गिरिमासाद्यदीर्यतः ॥ २० ॥ तांतुसेनांभृशं
विध्वांद्रावयित्वार्जुनःशरैः ॥ प्रायादभिमुखःपार्थःसूतानीकंहिमारिष ॥ २१ ॥ तस्यशब्दोमहानासीत्परानभिमुखस्यवै ॥ गरुडस्येवपततःपन्नगार्थेयथापुरा
॥ २२ ॥ तंतुशब्दमभिश्रुत्यभीमसेनोमहाबलः ॥ बभूवपरमप्रीतःपार्थदर्शनलालसः ॥ २३ ॥ श्रुत्वैवपार्थमायांतंभीमसेनःप्रतापवान् ॥ त्यक्त्वाप्राणान्महारा
जसेनांतवममर्दह ॥ २४ ॥ सवायुवीर्यप्रतिमोवायुवेगसमोजवे ॥ वायुवच्चचरद्भीमोवायुपुत्रःप्रतापवान् ॥ २५ ॥ तेनार्द्यमानाराजेंद्रसेनानवविशांपते ॥
व्यभ्रश्यतमहाराजभिन्नानौरिवसागरे ॥ २६ ॥ तांतुसेनांतदाभीमोदर्शयन्पाणिलाघवं ॥ शरैरवचकर्तोग्रैःप्रेषयिष्यन्यमक्षयं ॥ २७ ॥ तत्रभारतभीमस्यब
लंदृष्ट्वातिमानुषं ॥ व्यभ्रमंतरणेयोधाःकालस्येवयुगक्षये ॥ २८ ॥ तथार्दितान्भीमबलान्भीमसेनेनभारत ॥ दृष्ट्वादुर्योधनोराजाइदंवचनमब्रवीत् ॥ २९ ॥ सै
निकांश्चमहेष्वासान्योधांश्चभरतर्षभ ॥ समादिशन्रणेसर्वान्हतभीममितिस्मह ॥ ३० ॥ तस्मिन्हतेहतंमन्येपांडुसैन्यमशेषतः ॥ प्रतिगृह्यचतामाज्ञांतवपुत्र
स्यपार्थिवाः ॥ ३१ ॥ भीमंप्रच्छादयामासुःशरवर्षैःसमंततः ॥ गजाश्वबहुलाराजन्नराश्चजयगृद्धिनः ॥ ३२ ॥

रथेस्थिताश्वराजेंद्रपरिवव्रुर्वृकोदरं ॥ सतैःपरिवृतःशूरैःशूरोराजन्समंततः ॥ ३३ ॥ शुशुभेभरतश्रेष्ठोनक्षत्रैरिवचंद्रमाः ॥ परिवेषीयथासोमःपरिपूर्णोविराजते ॥ ३४ ॥ सरराजतथासंख्येदर्शनीयोनरोत्तमः ॥ निर्विशेषोमहाराजयथाहिविजयस्तथा ॥ ३५ ॥ तस्यतेपार्थिवाःसर्वेशरवृष्टिंसमासृजन् ॥ क्रोधरक्तेक्षणाःशूराहंतुकामावृकोदरं ॥ ३६ ॥ तांविदार्यमहासेनांशरैःसन्नतपर्वभिः ॥ निश्चक्रामरणाद्भीमोमत्स्योजालादिवांभसि ॥ ३७ ॥ हत्वादशसहस्राणिगजानामनिवर्तिनां ॥ नृणांशतसहस्रेद्वेद्वेशतेचैवभारत ॥ ३८ ॥ पंचचाश्वसहस्राणिरथानांशतमेवच ॥ हत्वाप्रास्यंदयद्भीमोनदींशोणितवाहिनीं ॥ ३९ ॥ शोणितोदांरथावर्तांहस्तिग्राहसमाकुलां ॥ नरमीनाश्वनक्रांतांकेशशैवलशाद्वलां ॥ ४० ॥ संछिन्नभुजनागेंद्रांबहुरत्नापहारिणीं ॥ ऊरुग्राहांमज्जपंकांशीर्षोपलसमावृतां ॥ ४१ ॥ धनुःकाशांशरावापांगदापरिघकेतनां ॥ हंसछत्रध्वजोपेतामुष्णीषवरफेनिलां ॥ ४२ ॥ हारपद्माकरांचैवभूमिरेणूर्मिमालिनीं ॥ आर्यवृत्तवतींसंख्येसुतरांभीरुदुस्तरां ॥ ४३ ॥ योधग्राहवतींसंख्येवहंतींपितृसादनं ॥ क्षणेनपुरुषव्याघ्रःप्रावर्तयतनिम्नगां ॥ ४४ ॥ यथावैतरणीमुग्रांदुस्तरामकृतात्मभिः ॥ तथादुस्तरणींघोरांभीरूणांभयवर्धनीं ॥ ४५ ॥ यतोयतःपांडवेयःप्रविष्टोरथसत्तमः ॥ ततस्ततोघातयतयोधान्शतसहस्रशः ॥ ४६ ॥ एवंदृष्ट्वाकृतंकर्मभीमसेनेनसंयुगे ॥ दुर्योधनोमहाराजशकुनिंवाक्यमब्रवीत् ॥ ४७ ॥ जयमातुलसंग्रामेभीमसेनंमहाबलं ॥ अस्मिन्जितेजितंमन्येपांडवेयंमहाबलं ॥ ४८ ॥ ततःप्रायान्महाराजसौबलेयःप्रतापवान् ॥ रणायमहतेयुक्तोभ्रातृभिःपरिवारितः ॥ ४९ ॥ ससमासाद्यसंग्रामेभीमंभीमपराक्रमं ॥ वारयामासतंवीरोवेलेवमकरालयं ॥ ५० ॥ संन्यवर्ततंभीमोवार्यमाणःशितैःशरैः ॥ शकुनिस्तस्यराजेंद्रवामपार्श्वेस्तनांतरे ॥ ५१ ॥ प्रेषयामासनाराचान्रुक्मपुंखान्शिलाशितान् ॥ वर्मभित्वातुतेघोराःपांडवस्यमहात्मनः ॥ ५२ ॥ न्यमज्जंतमहाराजकंकबर्हिणवाससः ॥ सोतिविद्धोरणेभीमःशरंरुक्मविभूषितं ॥ ५३ ॥ प्रेषयामाससरुषासौबलंप्रतिभारत ॥ तमायांतंशरंघोरंशकुनिःशत्रुतापनः ॥ ५४ ॥ चिच्छेदसप्तधाराजन्कृतहस्तोमहाबलः ॥ तस्मिन्निपतितेभूमौभीमःक्रुद्धोविशांपते ॥ ५५ ॥ धनुश्चिच्छेदभल्लेनसौबलस्यहसन्निव ॥ तदपास्यधनुश्छिन्नंसौबलेयःप्रतापवान् ॥ ५६ ॥ अन्यदादायवेगेनधनुर्भल्लांश्चषोडश ॥ तैस्तस्यतुमहाराजभल्लैःसन्नतपर्वभिः ॥ ५७ ॥ द्वाभ्यांससारथिंत्वार्छद्भीमंसप्तभिरेवच ॥ ध्वजमेकेनचिच्छेदद्वाभ्यांछत्रंविशांपते ॥ ५८ ॥

॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ इतिकर्णपर्वणिनैलकंठीये

चतुर्भिश्चतुरोवाहान्विव्याध सुबलात्मजः ॥ ततः क्रुद्धोमहाराजभीमसेनः प्रतापवान् ॥ ५९ ॥ शक्तिंचिक्षेपसमरेरुक्मदंडामयस्मयीं ॥ साभीमभुजनिर्मुक्ता नागजिह्वेवचंचला ॥ ६० ॥ निपपातरणेतूर्णंसौबलस्यमहात्मनः ॥ ततस्तामेवसंगृह्यशक्तिंकनकभूषणां ॥ ६१ ॥ भीमसेनायचिक्षेपक्रुद्धरूपोविशांपते ॥ सा निर्भिद्यभुजंसव्यंपांडवस्यमहात्मनः ॥ ६२ ॥ निपपाततदाभूमौयथाविद्युन्नभश्च्युता ॥ अथोत्क्रुष्टंमहाराजधार्तराष्ट्रैःसमंततः ॥ ६३ ॥ नतुतंममृषेभीमःसिंह नादंतरस्विनां ॥ अन्यद्गृह्यधनुःसज्यंत्वरमाणोमहाबलः ॥ ६४ ॥ मुहूर्तादिवराजेंद्रच्छादयामाससायकैः ॥ सौबलस्यबलंसंख्येत्यक्त्वात्मानंमहाबलः ॥ ६५ ॥ तस्याश्वांश्चतुरोहत्वासूतंचैवविशांपते ॥ ध्वजंचिच्छेदभल्लेनत्वरमाणःपराक्रमी ॥ ६६ ॥ हताश्वंरथमुत्सृज्यत्वरमाणोनरोत्तमः ॥ तस्थौविस्फारयंश्चापंक्रोध रक्तेक्षणःश्वसन् ॥ ६७ ॥ शरैश्चबहुधाराजन्भीममाच्छत्समंततः ॥ प्रतिहत्यतुवेगेनभीमसेनःप्रतापवान् ॥ ६८ ॥ धनुश्चिच्छेदसंक्रुद्धोविव्याधचशितैःशरैः ॥ सोतिविद्धोबलवताशत्रुणाशत्रुकर्शनः ॥ ६९ ॥ निपपाततदाभूमौकिंचित्प्राणोनराधिपः ॥ ततस्तंविह्वलंज्ञात्वापुत्रस्तवविशांपते ॥ ७० ॥ अपोवाहरथेनाजौ भीमसेनस्यपश्यतः ॥ रथस्थेतुनरव्याघ्रेधार्तराष्ट्राःपराङ्मुखाः ॥ ७१ ॥ प्रदुद्रुवुर्दिशोभीताभीमाज्जातेमहाभये ॥ सौबलेनिर्जितेराजन्भीमसेनेनधन्विना ॥ ॥ ७२ ॥ भयेनमहताविष्टःपुत्रोदुर्योधनस्तव ॥ अपायाज्जवनैरश्वैःसापेक्षोमातुलंप्रति ॥ ७३ ॥ पराङ्मुखंतुराजानंदृष्ट्वासैन्यानिभारत ॥ विप्रजग्मुःसमुत्सृ ज्यद्वैरथानिसमंततः ॥ ७४ ॥ तान्दृष्ट्वाविद्रुतान्सर्वान्धार्तराष्ट्रान्पराङ्मुखान् ॥ जवेनाभ्यपतद्भीमःकिरन्शरशतान्बहून् ॥ ७५ ॥ तेवध्यमानाभीमेनधार्तरा ष्ट्राःपराङ्मुखाः ॥ कर्णमासाद्यसमरेस्थितारजन्समंततः ॥ ७६ ॥ सहितेषांमहावीर्योद्वीपोभूत्सुमहाबलः ॥ भिन्ननौकायथाराजन्द्वीपमासाद्यनिर्वृताः ॥ ७७ ॥ भवंतिपुरुषव्याघ्रनाविकाःकालपर्यये ॥ तथाकर्णंसमासाद्यतावकाःपुरुषर्षभ ॥ ७८ ॥ समाश्वस्ताःस्थितराजन्संप्रहृष्टाःपरस्परं ॥ समाजग्मुश्चयुद्धायमृत्युं कृत्वानिवर्तनं ॥ ७९ ॥ इतिश्रीमहाभारतेकर्णपर्वणिशकुनिपराजयेसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ छ ॥ ॥ छ ॥ धृतराष्ट्रउवाच ततोभग्ने षुसैन्येषुभीमसेनेनसंयुगे ॥ दुर्योधनोब्रवीत्किंनुसौबलोवापिसंजय ॥ १ ॥ कर्णोवाजयतांश्रेष्ठोयोधावामामकायुधि ॥ कृपोवाकृतवर्मावाद्रौणिर्दुःशासनो पिवा ॥ २ ॥ अत्यद्भुतमहंमन्येपांडवेयस्यविक्रमं ॥ यदेकःसमरेसर्वान्योधयामाससामकान् ॥ ३ ॥ भारतभावदीपेसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ छ ॥ ॥ततइति ॥ १ ॥ २ ॥ ३ ॥

यथाप्रतिज्ञंयोधानांराधेयःकृतवानपि ॥ कुरूणामथसर्वेषांकर्णःशत्रुनिषूदनः ॥ ४ ॥ शर्मवर्मप्रतिष्ठाचजीविताशाचसंजय ॥ तत्प्रभग्नंबलंदृष्ट्वाकौंतेयेनामि
तौजसा ॥ ५ ॥ राधेयोवाप्याधिरथिःकर्णःकिमकरोद्युधि ॥ पुत्रावाममदुर्धर्षाराजानोवामहारथाः ॥ एतन्मेसर्वमाचक्ष्वकुशलोह्यसिसंजय ॥ ६ ॥ संजयउवाच
अपराह्णेमहाराजसूतपुत्रःप्रतापवान् ॥ जघानसोमकान्सर्वान्भीमसेनस्यपश्यतः ॥ ७ ॥ भीमोप्यतिबलंसैन्यंधार्तराष्ट्रंव्यपोथयत् ॥ अथकर्णोब्रवीच्छल्यंपं
चालान्प्रापयस्वमां ॥ ८ ॥ द्राव्यमाणंबलंदृष्ट्वाभीमसेनेनधीमता ॥ यंतारमब्रवीत्कर्णःपंचालानेवमांवह ॥ ९ ॥ मद्रराजस्ततःशल्यःश्वेतानश्वान्महाजवान् ॥
प्राहिणोच्चेदिपंचालान्करूषांश्चमहाबलः ॥ १० ॥ प्रविश्यचमहत्सैन्यंशल्यःपरबलार्दनः ॥ न्ययच्छत्तुरगान्हृष्टोयत्रयत्रैच्छदग्रणीः ॥ ११ ॥ तंरथंमेघसंकाशंवै
याघ्रपरिवारणं ॥ संदृश्यपांडुपंचालास्त्रस्ताह्यासन्विशांपते ॥ १२ ॥ ततोरथस्यनिनदःप्रादुरासीन्महारणे ॥ पर्जन्यसमनिर्घोषःपर्वतस्येवदीर्यतः ॥ १३ ॥ ततः
शरशतैस्तीक्ष्णैःकर्णआकर्णनिःसृतैः ॥ जघानपांडवबलंशतशोथसहस्रशः ॥ १४ ॥ तत्तथासमरेकर्मकुर्वाणमपराजितं ॥ परिवव्रुर्महेष्वासाःपांडवानांमहार
थाः ॥ १५ ॥ तंशिखंडीचभीमश्चधृष्टद्युम्नश्चपार्षतः ॥ नकुलःसहदेवश्चद्रौपदेयाश्चसात्यकिः ॥ १६ ॥ परिवव्रुर्जिघांसंतोराधेयंशरवृष्टिभिः ॥ सात्यकिस्तुनदा
कर्णंविंशत्यानिशितैःशरैः ॥ १७ ॥ अताडयद्रणेशूरोजत्रुदेशेनरोत्तमः ॥ शिखंडीपंचविंशत्याधृष्टद्युम्नश्चसप्तभिः ॥ १८ ॥ द्रौपदेयाश्चतुःषष्ट्यासहदेवश्चसप्त
भिः ॥ नकुलश्चशतेनाजौकर्णंविव्याधसायकैः ॥ १९ ॥ भीमसेनस्तुराधेयंनवत्यानतपर्वणां ॥ विव्याधसमरेक्रुद्धोजत्रुदेशेमहाबलः ॥ २० ॥ अथप्रहस्याधि
रथिर्व्याक्षिपद्धनुरुत्तमं ॥ मुमोचनिशितान्बाणान्पीडयन्सुमहाबलः ॥ २१ ॥ तान्प्रत्यविध्यद्राधेयःपंचभिःपंचभिःशरैः ॥ सात्यकेस्तुधनुश्छित्वाध्वजंचभरत
र्षभ ॥ २२ ॥ तंतथानवभिर्बाणैराजघानस्तनांतरे ॥ भीमसेनंततःक्रुद्धोविव्याधत्रिंशताशरैः ॥ २३ ॥ सहदेवस्यभल्लेनध्वजंचिच्छेदमारिष ॥ सारथिंचत्रिभि
र्बाणैराजघानपरंतपः ॥ २४ ॥ विरथान्द्रौपदेयांश्चचकारभरतर्षभ ॥ अक्ष्णोर्निमेषमात्रेणतदद्भुतमिवाभवत् ॥ २५ ॥ विमुखीकृत्यतान्सर्वान्शरैःसन्नतपर्व
भिः ॥ पंचालानहनच्छूरांश्चेदीनांचमहारथान् ॥ २६ ॥ तेवध्यमानाःसमरेचेदिमत्स्याविशांपते ॥ कर्णमेकमभिद्रुत्यशरसंघैःसमार्पयन् ॥ २७ ॥ तानजघान
शितैर्बाणैःसूतपुत्रोमहारथः ॥ तेवध्यमानाःसमरेचेदिमत्स्याविशांपते ॥ २८ ॥ प्राद्रवंतरणेभीताःसिंहत्रस्तामृगाइव ॥ एतदत्यद्भुतंकर्मदृष्टवानस्मिभारत ॥ २९ ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१॥५२॥५३ ॥५४॥ ५५॥

यदेकःसमरेशूरान्सूतपुत्रःप्रतापवान्॥ यततानान्परंशक्त्यायोधयानांश्चधन्विनः॥ ३० ॥ पांडवेयान्महाराजशरैर्वारितवान्रणे ॥ तत्रभारतकर्णस्यलाघवे
नमहात्मनः॥ ३१ ॥ तुतुषुर्देवताःसर्वाःसिद्धाश्चसहचारणैः॥ अपूजयन्महेष्वासाधार्तराष्ट्रानरोत्तमं॥ ३२ ॥ कर्णंरथवरश्रेष्ठंश्रेष्ठंसर्वधनुष्मतां॥ ततःकर्णोमहा
राजददाहरिपुवाहिनीं॥ ३३ ॥ कक्षमिद्धोयथावह्निर्निदाघेज्वलितोमहान्॥ तेवध्यमानाःकर्णेनपांडवेयास्ततस्ततः॥ ३४ ॥ प्राद्रवंतरणेभीताःकर्णंदृष्ट्वामहा
रथं॥ तत्राक्रंदोमहानासीत्पंचालानांमहारणे॥ ३५॥ वध्यतांसायकैस्तीक्ष्णैःकर्णचापवरच्युतैः॥ तेनशब्देनवित्रस्तापांडवानांमहाचमूः॥ ३६ ॥ कर्णमेकंर
णेयोधंमेनिरेतत्रशात्रवाः॥ तत्राद्भुतंपुनश्चक्रेराधेयःशत्रुकर्शनः॥ ३७॥ यदेनंपांडवाःसर्वेनशेकुरभिवीक्षितुं॥ यथौघःपर्वतश्रेष्ठमासाद्याभिप्रदीर्यते॥ ३८॥
तथातत्पांडवंसैन्यंकर्णमासाद्यदीर्यते॥ कर्णोपिसमरेराजन्विधूमोग्निरिवज्वलन्॥ ३९॥ दहंस्तस्थौमहाबाहुःपांडवानांमहाचमूं॥ शिरांसिचमहाराजकर्णां
श्चैवसकुंडलान्॥ ४० ॥ बाहूंश्चवीरोवीराणांचिच्छेदलघुचेषुभिः॥ हस्तिदंतत्सरून्खड्गान्ध्वजान्शक्तीर्हयान्गजान्॥ ४१ ॥ रथांश्चविविधान्राजन्पताकाव्य
जनानिच॥ अक्षांश्चयुगयोक्त्राणिचक्राणिविविधानिच॥ ४२ ॥ चिच्छेदबहुधाकर्णोयोधव्रतमनुष्ठितः॥ तत्रभारतकर्णेननिहतैर्गजवाजिभिः॥ ४३ ॥ अग
म्यरूपापृथिवीमांसशोणितकर्दमा॥ विषमंचसमंचैवहतैरश्वपदातिभिः॥ ४४॥ रथैश्चकुंजरैश्चैवनप्राज्ञायतकिंचन॥ नापिस्वेनपरेयोधाःप्राज्ञायंतपरस्परं
॥ ४५॥ घोरेशरांधकारेतुकर्णास्त्रेचविजृंभिते॥ राधेयचापनिर्मुक्तैःशरैःकांचनभूषणैः॥ ४६ ॥ संछादितामहाराजपांडवानांमहारथाः॥ तेपांडवेयाःसमरेरा
धेयेनपुनःपुनः॥ ४७॥ अभज्यंतमहाराजयतमानामहारथाः॥ मृगसंघायथाक्रुद्धःसिंहोद्रावयतेवने॥ ४८ ॥ पंचालानांरथश्रेष्ठान्द्रावयन्शात्रवांस्तथा॥
कर्णस्तुसमरेयोधांस्त्रासयन्सुमहायशाः॥ ४९ ॥ कालयामासतत्सैन्यंयथापशुगणान्वृकः॥ दृष्ट्वातुपांडवींसेनांधार्तराष्ट्राःपराङ्मुखीं॥ ५० ॥ तत्राजग्मुर्महे
ष्वासारुवंतोभैरवान्रवान्॥ दुर्योधनोहिराजेंद्रमुदापरमयायुतः॥ ५१ ॥ वादयामाससंहृष्टोनानावाद्यानिसर्वशः॥ पंचालापिमहेष्वासाभग्नास्तत्रनरोत्त
माः॥ ५२ ॥ न्यवर्ततयथाशूरंमृत्युंकृत्वानिवर्तनं॥ तान्निवृत्तान्रणेशूरान्राधेयःशत्रुतापनः॥ ५३॥ अनेकशोमहाराजबभंजपुरुषर्षभः॥ तत्रभारतकर्णेनपं
चालाविंशतीरथाः॥ ५४॥ निहताःसायकैःक्रोधाच्चेदयश्चपरंशताः॥ कृत्वाशून्यान्रथोपस्थान्वाजिपृष्ठांश्चभारत॥ ५५॥

॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेअष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ ९ ॥ ॥ ५ ॥ अर्जुनइति ॥ १ ॥

निर्मनुष्यान्गजस्कंधान्पादातांश्चैवविद्रुतान ॥ आदित्यइवमध्याह्नेदुर्निरीक्ष्यःपरंतपः ॥ ५६ ॥ कालांतकवपुःशूरःसूतपुत्रोऽभ्यराजत ॥ एवमेतन्महाराजनर
वाजिरथद्विपान् ॥ ५७ ॥ हत्वातस्थौमहेष्वासःकर्णोरिगणसूदनः ॥ यथाभूतगणान्हत्वाकालस्त्रिपुरन्महाबलः ॥ ५८ ॥ तथासमोमकान्हत्वातस्थावेकोमहारथः ॥
तत्राद्भुतमपश्यामपंचालानांपराक्रमं ॥ ५९ ॥ वध्यमानापियत्कर्णंनाजहूरणमूर्धनि ॥ राजादुःशासनश्चैवकृपःशारद्वतस्तथा ॥ ६० ॥ अश्वत्थामाकृतवर्मा
शकुनिश्चमहाबलः ॥ न्यहनन्पांडवींसेनांशतशोथसहस्रशः ॥ ६१ ॥ कर्णपुत्रौतुराजेंद्रभ्रातरौसत्यविक्रमौ ॥ निजघ्नतुर्बलंक्रुद्धौपांडवानामितस्ततः ॥ ६२ ॥
तत्रयुद्धंमहच्चासीत्क्रूरंविशसनंमहत ॥ तथैवपांडवाःशूराधृष्टद्युम्नशिखंडिनौ ॥ ६३ ॥ द्रौपदेयाश्चसंक्रुद्धाअभ्यघ्नंस्तावकंबलं ॥ एवमेषक्षयोवृत्तःपांडवानांतत
स्ततः ॥ तावकानामपिरणेभीमंप्राप्यमहाबलं ॥ ६४ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेअष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ ९ ॥ ॥ ९ ॥

संजयउवाच अर्जुनस्तुमहाराजहत्वासैन्यंचतुर्विधं ॥ सूतपुत्रंचसंक्रुद्धंदृष्ट्वाचैवमहारणे ॥ १ ॥ शोणितोदांमहींकृत्वामांसमज्जास्थिपंकिलां ॥ मनुष्यशी
र्षपाषाणांहस्त्यश्वकृतरोधसं ॥ २ ॥ शूरास्थिचयसंकीर्णांकाकगृध्रानुनादितां ॥ छत्रहंसप्लवोपेतांवीरवृक्षापहारिणीं ॥ ३ ॥ हारपद्माकरवतीमुष्णीषवरफेनिलां ॥
धनुःशरध्वजोपेतांनरक्षुद्रकपालिनीं ॥ ४ ॥ चर्मवर्मभ्रमोपेतांरथोडुपसमाकुलां ॥ जयैषिणांचसुतरांभीरूणांचसुदुस्तरां ॥ ५ ॥ नदींप्रावर्तयित्वाचबीभत्सुः
परवीरहा ॥ वासुदेवमिदंवाक्यमब्रवीत्पुरुषर्षभः ॥ ६ ॥ अर्जुनउवाच एषकेतूरणेकृष्णसूतपुत्रस्यदृश्यते ॥ भीमसेनादयश्चैतेयोधयंतिमहारथं ॥ ७ ॥ ए
तेद्रवंतिपंचालाःकर्णत्रस्ताजनार्दन ॥ एषदुर्योधनोराजाश्वेतच्छत्रेणधार्यता ॥ ८ ॥ कर्णेनभग्नान्पंचालान्द्रावयन्बहुशोभते ॥ कृपश्चकृतवर्माचद्रौणिश्चैवम
हारथः ॥ ९ ॥ एतेरक्षंतिराजानंसूतपुत्रेणरक्षिताः ॥ अवध्यमानास्तेस्माभिर्घातयिष्यंतिसोमकान ॥ १० ॥ एषशल्योरथोपस्थेरश्मिसंचारकोविदः ॥ सूतपुत्र
रथंकृष्णवाहयन्बहुशोभते ॥ ११ ॥ तत्रमेबुद्धिरुत्पन्नावाहयात्रमहारथं ॥ नाहत्वासमरेकर्णंनिवर्तिष्येकथंचन ॥ १२ ॥ राधेयोप्यन्यथापार्थान्सृंजयांश्चम
हारथान् ॥ निःशेषान्समरेकुर्यात्पश्यतांनोजनार्दन ॥ १३ ॥ ततःप्रायाद्रथेनाशुकेशवस्तववाहिनीं ॥ कर्णंप्रतिमहेष्वासंद्वैरथेसव्यसाचिना ॥ १४ ॥ प्रयातश्च
महाबाहुःपांडवानुज्ञयाहरिः ॥ आश्वासयन्रथेनैवपांडुसैन्यानिसर्वशः ॥ १५ ॥ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

रथघोषःससंग्रामेपांडवेयस्यसंबभौ ॥ वासवाशनितुल्यस्यमेघौघस्येवमारिष ॥ १६ ॥ महतारथघोषेणपांडवःसत्यविक्रमः ॥ अभ्ययादप्रमेयात्मानिर्जयं
स्तववाहिनीं ॥ १७ ॥ तमायांतंसमीक्ष्यैवश्वेताश्वंकृष्णसारथिं ॥ मद्रराजोब्रवीत्कर्णंकेतुंदृष्ट्वामहात्मनः ॥ १८ ॥ अयंसरथआयातिश्वेताश्वःकृष्णसारथिः ॥
निघ्नन्नमित्रान्समरेयंकर्णपरिपृच्छसि ॥ १९ ॥ एषतिष्ठतिकौंतेयःसंस्पृशन्गांडिवंधनुः ॥ तंहनिष्यसिचेदद्यतन्नःश्रेयोभविष्यति ॥ २० ॥ धनुर्ज्याचंद्रतारांका
पताकाकिंकिणीयुता ॥ पश्यकर्णार्जुनस्यैषासौदामन्यंबरेयथा ॥ २१ ॥ एषध्वजाग्रेपार्थस्यप्रेक्षमाणःसमंततः ॥ दृश्यतेवानरोभीमोवीराणांभयवर्धनः ॥ २२ ॥
एतच्चक्रंगदाशंखःशार्ङ्गंकृष्णस्यचप्रभो ॥ दृश्यतेपांडवरथेवाहयानस्यवाजिनः ॥ २३ ॥ एतत्कूजतिगांडीवंविसृष्टंसव्यसाचिना ॥ एतेहस्तवतामुक्ताघ्नंत्यमि
त्रान्शिताःशराः ॥ २४ ॥ विशालायतताम्राक्षैःपूर्णचंद्रनिभाननैः ॥ एषाभूःकीर्यतेराज्ञांशिरोभिरपलायिनां ॥ २५ ॥ एतेपरिघसंकाशाःपुण्यगंधानुलेपनाः ॥
उद्यतारणशूराणांपात्यंतेसायुधाभुजाः ॥ २६ ॥ निरस्तजिह्वानेत्रांतावाजिनःसहसादिभिः ॥ पतिताःपात्यमानाश्चक्षितौक्षीणाविशेरते ॥ २७ ॥ एतेपर्वत
शृंगाणांतुल्याहिमवतोगजाः ॥ संछिन्नकुंभाःपार्थेनप्रपतंत्यद्रयोयथा ॥ २८ ॥ गंधर्वनगराकारायथावानेनरेश्वराः ॥ विमानादिवपुण्यांतेस्वर्गिणोनिपतंत्य
मी ॥ २९ ॥ व्याकुलीकृतमत्यर्थंपरसैन्यंकिरीटिना ॥ नानामृगसहस्राणांयूथंकेसरिणायथा ॥ ३० ॥ त्वामभिप्रेप्सुरायातिकर्णनिघ्नन्वरान्रथान् ॥ असह्यमा
नोराधेयतंयाहिप्रतिभारत ॥ ३१ ॥ एषाविदीर्यतेसेनाधार्तराष्ट्रीसमंततः ॥ अर्जुनस्यभयात्तूर्णंनिघ्नतःशात्रवान्बहून् ॥ ३२ ॥ वर्जयन्सर्वसैन्यानित्वरतेहिध
नंजयः ॥ त्वदर्थमितिमन्येहंयथास्योदीर्यतेवपुः ॥ ३३ ॥ नत्ववस्थास्यतेपार्थोयुयुत्सुःकेनचित्सह ॥ त्वामृतेक्रोधदीप्तोहिपीड्यमानेवृकोदरे ॥ ३४ ॥ विरथंधर्म
राजंतुदृष्ट्वासुदृढविक्षतं ॥ शिखंडिनंसात्यकिंचधृष्टद्युम्नंचपार्षतं ॥ ३५ ॥ द्रौपदेयान्युधामन्युमुत्तमौजसमेवच ॥ नकुलंसहदेवंचभ्रातरौद्वौसमीक्ष्यच ॥ ३६ ॥
सहसैकरथःपार्थस्त्वामभ्येतिपरंतप ॥ क्रोधरक्तेक्षणःक्रुद्धोजिघांसुःसर्वपार्थिवान् ॥ ३७ ॥ त्वरितोभिपतत्यस्मांस्त्यक्त्वासैन्यान्यसंशयं ॥ त्वंकर्णप्रतियाह्ये
नंनास्त्यन्योहिधनुर्धरः ॥ ३८ ॥ नतंपश्यामिलोकेस्मिंस्त्वत्तोप्यन्यंधनुर्धरं ॥ अर्जुनंसमरेक्रुद्धंयोवेलामिवधारयेत् ॥ ३९ ॥ नचास्यरक्षांपश्यामिपार्श्वतोनच
पृष्ठतः ॥ एकएवाभियातित्वांपश्यसाफल्यमात्मनः ॥ ४० ॥ त्वंहिकृष्णौरणेशक्तःसंसाधयितुमाहवे ॥ तवैवभारोराधेयप्रत्युद्याहिधनंजयं ॥ ४१ ॥

॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

समानोत्यसिभीष्मेणद्रोणद्रौणिकृपेणच ॥ सव्यसाचिनमायांतंनिवारयमहारणे ॥ ४२ ॥ लेलिहानंयथासर्पंगर्जंतमृषभंयथा ॥ वनस्थितंयथाव्याघ्रंजहिक
र्णधनंजयं ॥ ४३ ॥ एतेद्रवंतिसमरेधार्तराष्ट्रामहारथाः ॥ अर्जुनस्यभयात्तूर्णंनिरपेक्षाजनाधिपाः ॥ ४४ ॥ द्रवतामथतेषांतुनान्योस्तियुधिमानव ॥ भयहा
योभवेद्वीरस्त्वामृतेसूतनंदन ॥ एतेत्वांकुरवःसर्वेद्वीपमासाद्यसंयुगे ॥ ४५ ॥ धिष्ठिताःपुरुषव्याघ्रत्वत्तःशरणकांक्षिणः ॥ वैदेहांबष्ठकांबोजास्तथानग्नजितस्त्व
या ॥ ४६ ॥ गांधाराश्चययाधृत्याजिताःसंख्येसुदुर्जयाः ॥ तांधृतिंकुरुराधेयततःप्रत्येहिपांडवं ॥ ४७ ॥ वासुदेवंचवार्ष्णेयंप्रीयमाणंकिरीटिना ॥ प्रत्युद्याहिम
हाबाहोपौरुषेमहतिस्थितः ॥ ४८ ॥ कर्णउवाच प्रकृतिस्थोसिमेशल्यइदानींसंमतस्तथा ॥ प्रतिभासिमहाबाहोमाभैषीस्त्वंधनंजयात् ॥ ४९ ॥ पश्यबा
ह्वोर्बलंमेद्यशिक्षितस्यचपश्यमे ॥ एकोद्यनिहनिष्यामिपांडवानांमहाचमूं ॥ ५० ॥ कृष्णौचपुरुषव्याघ्रौततःसत्यंब्रवीमिते ॥ नाहत्वायुधितौवीरौव्यपयास्येक
थंचन ॥ ५१ ॥ शिष्येवानिहतस्ताभ्यामनित्योहिरणेजयः ॥ कृतार्थोद्यभविष्यामिहत्वावाप्यथवाहतः ॥ ५२ ॥ शल्यउवाच अजय्यमेनंप्रवदंतियुद्धेम
हारथाःकर्णरथप्रवीरं ॥ एकाकिनंकिमुकृष्णाभिगुप्तंविजेतुमेनंकइहोत्सहेत ॥ ५३ ॥ कर्णउवाच नैतादृशोजातुबभूवलोकेरथोत्तमोयावदुपश्रुतंनः ॥
तमीदृशंप्रतियोत्स्यामिपार्थंमहाहवेपश्यचपौरुषंमे ॥ ५४ ॥ रणेचरत्येपरथप्रवीरःसितैर्हयैःकौरवराजपुत्रः ॥ सवाद्यमांनेष्यतिकृच्छ्रमेतत्कर्णस्यांतादेतदंता
स्तुसर्वे ॥ ५५ ॥ अस्वेदिनौराजपुत्रस्यहस्ताववेपमानौजातकिणौबृहंतौ ॥ दृढायुधःकृतिमान्क्षिप्रहस्तोनपांडवेयेनसमोस्तियोधः ॥ ५६ ॥ गृह्णात्यनेकानपिकं
कपत्रानेकंयथातान्प्रतियोज्यचाशु ॥ तेक्रोशमात्रेनिपतंत्यमोघाःकस्तेनयोधोस्तिसमःपृथिव्यां ॥ ५७ ॥ अतोषयत्खांडवेयोहुताशंकृष्णद्वितीयोतिरथस्तर
स्वी ॥ लेभेचक्रंयत्रकृष्णोमहात्माधनुर्गांडीवंपांडवःसव्यसाची ॥ ५८ ॥ श्वेताश्वयुक्तंचसुघोषमुग्रंरथंमहाबाहुरदीनसत्वः ॥ महेपुधीचाक्षयेदिव्यरूपेशस्त्रा
णिदिव्यानिचहव्यवाहात् ॥ ५९ ॥ तथेंद्रलोकेनिजघानदैत्यानसंख्येयान्कालकेयांश्चसर्वान् ॥ लेभेशंखंदेवदत्तंस्मतत्रकोनामतेनाभ्यधिकःपृथिव्यां ॥ ६० ॥
महादेवंतोषयामासयोस्त्रैःसाक्षात्सुयुद्धेनमहानुभावः ॥ लेभेततःपाशुपतंसुघोरंत्रैलोक्यसंहारकरंमहास्त्रं ॥ ६१ ॥ पृथक्पृथग्लोकपालाःसमेताददुर्महास्त्राण्य
प्रमेयाणिसंख्ये ॥ यैस्तान्जघानाशुरणेनृसिंहःसकालकेयानसुरान्समेतान् ॥ ६२ ॥

॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ शुचिशुक्रयोःआषाढज्येष्ठयोर्मध्येगतः ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥

तथाविराटस्यपुरेसमेतान्सर्वानस्मानेकरथेनजित्वा ॥ जहारनद्रोधनमाजिमध्येवस्त्राणिचादत्तमहारथेभ्यः ॥ ६३ ॥ नमीदृशंवीर्यगुणोपपन्नंकृष्णद्वितीयंपरमंनृपाणां ॥ नमाह्वयन्साहसमुत्तमंवैजानेस्वयंसर्वलोकस्यशल्य ॥ ६४ ॥ अनंतवीर्येणचकेशवेननारायणेनाप्रतिमेनगुप्तः ॥ वर्षायुतैर्यस्यगुणानशक्यावक्तुंसमेतैरपिसर्वलोकैः ॥ ६५ ॥ महात्मनःशंखचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य ॥ भयंचमेजायतेसाध्वसंचदृष्ट्वाकृष्णावेकरथेसमेतौ ॥ ६६ ॥ अतीवपार्थोयुधिकार्मुकिभ्योनारायणश्चाप्रतिचक्रयुद्धे ॥ एवंविधौपांडववासुदेवौचलेत्स्वदेशाद्धिमवान्नकृष्णौ ॥ ६७ ॥ उभौहिशूरौबलिनौदृढायुधौमहारथौसंहननोपपन्नौ ॥ एतादृशौफाल्गुनवासुदेवौकोन्यःप्रतीयान्मदृतेनुशल्य ॥ ६८ ॥ मनोरथोयस्तुममाद्यनस्यमद्रेशयुद्धंप्रतिपांडवस्य ॥ नैतच्चिरादाशुभविष्यतीदमत्यद्भुतंचित्रमतुल्यरूपं ॥ ६९ ॥ एतौचहत्वायुधिपातयिष्येमांवापिकृष्णौनिहनिष्यतोद्य ॥ इतिब्रुवनशल्यममित्रहंताकर्णोरणेमेघइवोन्ननाद ॥ ७० ॥ अभ्येत्यपुत्रेणनवाभिनंदितःसमेत्यचोवाचकुरुप्रवीरं ॥ कृपंचभोजंचमहाभुजावुभौतथैवगांधारपतिंसहानुजं ॥ ७१ ॥ गुरोःसुतंचावरजंतथात्मनःपदातिनोथद्विपसादिनश्चतान् ॥ निरुध्यताभिद्रवताच्युतार्जुनौश्रमेणसंयोजयताशुसर्वशः ॥ ७२ ॥ यथाभवद्भिर्भृशविक्षितावुभौसुखेनहन्यामहमद्यभूमिपाः ॥ नथेतिचोक्त्वात्वरिताःस्मतेर्जुनंजिघांसवोवीरतराःसमाययुः ॥ ७३ ॥ शरैश्चजघ्नुर्युधितंमहारथाधनंजयंकर्णनिदेशकारिणः ॥ नदीनदंभूरिजलोमहार्णवोयथातथातान्समरेर्जुनोग्रसत् ॥ ७४ ॥ नसंदधानोनतथाशरोत्तमान्प्रमुंचमानोरिपुभिःप्रदृश्यते ॥ धनंजयास्त्रैस्तुशरैर्विदारिताहतानिपेतुर्नरवाजिकुंजराः ॥ ७५ ॥ शरार्चिषंगांडिवचारुमंडलंयुगांतसूर्यप्रतिमानतेजसं ॥ नकौरवाःशेकुरुदीक्षितुंजयंयथारविंव्याधितचक्षुषोजनाः ॥ ७६ ॥ शरोत्तमान्संप्रहितान्महारथैश्चिच्छेदपार्थःप्रहसञ्छरौघैः ॥ भूयश्चतानहनद्बाणसंघान्गांडीवधन्वायतपूर्णमंडलं ॥ ७७ ॥ यथोग्ररश्मिःशुचिशुक्रमध्यगःसुखंविवस्वान्हरतेजलौघान् ॥ तथार्जुनोबाणगणान्निरस्यददाहसेनांतवपार्थिवेंद्र ॥ ७८ ॥ नमभ्यधावद्विसृजन्कृपःशरांस्तथैवभोजस्तवचात्मजःस्वयं ॥ महारथोद्रोणसुतश्चसायकैरवाकिरंस्तोयधरायथाचलं ॥ ७९ ॥ जिघांसुभिस्तानकुशलःशरोत्तमान्महाहवेसंप्रहितान्प्रयत्नतः ॥ शरैःप्रचिच्छेदसपांडवस्त्वरन्पराभिनद्वक्षसिचेषुभिस्त्रिभिः ॥ ॥ ८० ॥ सगांडिवव्यायतपूर्णमंडलस्तपन्रिपून्जुनभास्करोबभौ ॥ शराग्ररश्मिःशुचिशुक्रमध्यगोयथैवसूर्यःपरिवेषवांस्तथा ॥ ८१ ॥

॥ ८२ ॥ ८३ ॥ ८४ ॥ आयुधंआयुधजातं उपनिकीर्यनिषंगकोशादिभ्योनिष्काश्यभूतले भूतलतुल्येहताश्वसारथिध्वजस्यरथस्योपस्थे ॥८५॥८६॥८७॥८८ ॥ ८९ ॥ ९०॥ ९१ ॥ ९२ ॥ ९३ ॥

अथाश्ववाणैर्दशभिर्धनंजयंपराभिनद्द्रोणसुतोच्युतंत्रिभिः ॥ चतुर्भिरश्वांश्चतुरःकपिंततःशरैश्चनाराचवरैरवाकिरत् ॥ ८२ ॥ तथापितंप्रस्फुरदात्तकार्मुकंत्रिभिःशरैर्यंतृशिरःक्षुरेण ॥ हयांश्चतुर्भिश्चपुनस्त्रिभिर्ध्वजंधनंजयोद्रौणिरथादपातयत् ॥ ८३ ॥ सरोषपूर्णोमणिवज्रहाटकैरलंकृतंतक्षकभोगवर्चसं ॥ महाधनंकार्मुकमन्यदाददेयथामहाहिप्रवरंगिरेस्तटात् ॥ ८४ ॥ स्वमायुधंचोपनिकीर्यभूतलेधनुश्चकृत्वासगुणंगुणाधिकः ॥ समार्दयत्तावजितौनरोत्तमौशरोत्तमैर्द्रौणिरविध्यदंतिकात् ॥ ८५ ॥ कृपश्चभोजश्चतवात्मजश्चतेशरैरनेकैर्युधिपांडवर्षभं ॥ महारथाःसंयुगमूर्धनिस्थितास्तमोनुदंवारिधराइवापतन् ॥ ८६ ॥ कृपस्यपार्थःसशरंशरासनंहयान्ध्वजान्सारथिमेवपत्रिभिः ॥ समार्पयद्बाहुसहस्रविक्रमस्तथायथावज्रधरःपुराबलेः ॥ ८७ ॥ सपार्थबाणैर्विनिपातितायुधोध्वजावमर्देचकृतेमहाहवे ॥ कृतःकृपोबाणसहस्रयंत्रितोयथापगेयःप्रथमंकिरीटिना ॥८८॥ शरैःप्रचिच्छेदतवात्मजस्यध्वजंधनुश्चप्रचकर्तनर्दतः ॥ जघानचाश्वान्कृतवर्मणःशुभान्ध्वजंचचिच्छेदततःप्रतापवान् ॥८९॥ सवाजिसूतेष्वसनान्सकेतनान्जघाननागाश्वरथांस्त्वरंश्चसः ॥ ततःप्रकीर्णंसुमहद्बलंतवप्रदारितंसेतुरिवांभसायथा ॥ ९० ॥ ततोर्जुनस्याशुरथेनकेशवश्चकारशत्रूनपसव्यमातुरान् ॥ ततःप्रयातंत्वरितंधनंजयंशतक्रतुंवृत्रनिजघ्नुषंयथा ॥ ९१ ॥ समन्वधावन्पुनरुत्थितैर्ध्वजैरथैःसुयुक्तैरपरेयुयुत्सवः ॥ अथाभिसृत्यप्रतिवार्यतानरीन्धनंजयस्याभिमुखंमहारथाः ॥ ९२ ॥ शिखंडिशैनेययमाःशितैःशरैर्विदारयंतोव्यनदन्सुभैरवं ॥ ततोभिजघ्नुःकुपिताःपरस्परंशरैस्तदांजोगतिभिःसुतेजनैः ॥ ९३ ॥ कुरुप्रवीराःसहसृंजयैर्यथाऽसुराःपुरादेवगणैस्तथाहवे ॥ जयेप्सवःस्वर्गमनायचोत्सुकाःपतंतिनागाश्वरथाःपरंतप ॥ ९४ ॥ जगर्जुरुच्चैर्बलवच्चविव्यधुःशरैःसुमुक्तैरितरेतरंपृथक् ॥ शरांधकारेतुमहात्मभिःकृतेमहाम्रधेयोधवरैःपरस्परं ॥ चतुर्दिशोवैविदिशश्चपार्थिवप्रभाचसूर्यस्यतमोवृतनाभवत् ॥ ९५ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धे ऊनाशीतितमोऽध्यायः ॥ ७९ ॥

संजयउवाच राजन्कुरूणांप्रवरैर्बलैर्भीममभिद्रुतं ॥ मज्जंतमिवकौंतेयमुज्जिहीर्षुर्धनंजयः ॥ १ ॥ विमृद्यसूतपुत्रस्यसेनांभारतसायकैः ॥ प्राहिणोन्मृत्युलोकायपरवीरान्धनंजयः ॥ २ ॥ ततोस्यांबरमाश्रित्यशरजालानिभागशः ॥ अदृश्यंततथान्येचनिजघ्नुस्तववाहिनीं ॥ ३ ॥

॥ ९४ ॥ ९५ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेऊनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ राजन्निति ॥ १ ॥ २ ॥ ३ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७॥ विनिर्दहन्नित्यत्राडभावआर्षः ॥१८ ॥ १९ ॥२०॥२१॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥

सपक्षिसंघाचरितमाकाशंपूरयन्शरैः ॥ धनंजयोमहाबाहुःकुरूणामंतकोभवत् ॥ ४ ॥ ततोभल्लैःक्षुरप्रैश्चनाराचैर्विमलैरपि ॥ गात्राणिप्राच्छिनत्पार्थःशिरां
सिचचकर्तह ॥ ५ ॥ छिन्नगात्रैर्विकवचैर्विशिरस्कैःसमंततः ॥ पातितैश्चपतद्भिश्चयोधैरासीत्समावृता ॥ ६ ॥ धनंजयशराभ्यस्तैःस्यंदनाश्वरथद्विपैः ॥ संछि
न्नभिन्नविध्वस्तैर्व्यंगांगावयवैस्तृता ॥ ७॥ सुदुर्गमासुविषमाघोरात्यर्थंसुदुर्दृशा ॥ रणभूमिरभूद्राजन्महावैतरणीयथा ॥ ८ ॥ ईषाचक्राक्षभग्नैश्चव्यश्वैःसा
श्वैश्चयुध्यतां ॥ ससूतैर्हतसूतैश्चरथैस्तीर्णाभवन्मही ॥ ९ ॥ सुवर्णवर्णसन्नाहैर्योधैःकनकभूषणैः ॥ आस्थिताःकृप्तवर्माणोभद्रान्नित्यमदाद्विपाः ॥ १० ॥ क्रुद्धाः
क्रूरैर्महामात्रैःपार्ष्ण्यंगुष्ठप्रचोदिताः ॥ चतुःशताःशरवरैर्हताःपेतुःकिरीटिना ॥ ११ ॥ पर्यस्तानीवशृंगाणिसमृद्धानिमहागिरेः ॥ धनंजयशराभ्यस्तैस्तीर्णाभूर्व
रवारणैः ॥ १२ ॥ समंताज्जलदप्रख्यान्वारणान्मदवर्षिणः ॥ अभिपेदेर्जुनरथोघनान्भिंदन्निवांशुमान् ॥ १३ ॥ हतैर्गजमनुष्याश्वैर्भिन्नैश्चबहुधारथैः ॥ विश
स्त्रयंत्रकवचैर्युद्धशौंडैर्गतासुभिः ॥ १४ ॥ अपविद्धायुधैर्मार्गःस्तीर्णोभूत्फाल्गुनेनवै ॥ व्यस्फारयद्वैगांडीवंसुमहद्भैरवारवं ॥ १५ ॥ घोरवज्रविनिष्पेषंस्तनयि
त्नुरिवांबरे ॥ ततःप्रादीर्यतचमूर्धनंजयशराहता ॥ १६ ॥ महावातसमाविद्धामहानौरिवसागरे ॥ नानारूपाःप्राणहराःशरागांडीवचोदिताः ॥ १७ ॥ अलातो
ल्काशनिप्रख्यास्तवसैन्यंविनिर्दहन् ॥ महागिरौवेणुवनंनिशिप्रज्वलितंयथा ॥ १८ ॥ तथातवमहासैन्यंप्रास्फुरच्छरपीडितं ॥ संपिष्टदग्धविध्वस्तंतवसैन्यंकि
रीटिना ॥ १९ ॥ कृतंप्रविहतंबाणैःसर्वतःप्रद्रुतंदिशः ॥ महावनेमृगगणादावाग्नित्रासितायथा ॥ २० ॥ कुरवःपर्यवर्तंतनिर्दग्धाःसव्यसाचिना ॥ उत्सृज्यचम
हाबाहुंभीमसेनंतथारणे ॥ २१ ॥ बलंकुरूणामुद्विग्नंसर्वमासीत्पराङ्मुखं ॥ ततःकुरुषुभग्नेषुबीभत्सुरपराजितः ॥ २२ ॥ भीमसेनंसमासाद्यमुहूर्तंसोभ्यवर्तत ॥
समागम्यचभीमेनमंत्रयित्वाचफाल्गुनः ॥ २३ ॥ विशल्यमरुजंचास्मैकथयित्वायुधिष्ठिरं ॥ भीमसेनाभ्यनुज्ञातस्ततःप्रायाद्धनंजयः ॥ २४ ॥ नादयन्रथ
घोषेणपृथिवींद्यांचभारत ॥ ततःपरिवृतोवीरैर्दशभिर्योधपुंगवैः ॥ २५ ॥ दुःशासनादवरजैस्तवपुत्रैर्धनंजयः ॥ तेतमभ्यर्दयन्बाणैरुल्काभिरिवकुंजरं ॥ २६ ॥
आततेष्वसनाःशूरानृत्यंतइवभारत ॥ अपसव्यांस्तुतांश्चक्रेरथेनमधुसूदनः ॥ २७ ॥ नियुक्तान्हिसतान्मेनेयमायाशुकिरीटिना ॥ ततस्तेप्राद्रवन्शूराःपराङ्मु
खरथेर्जुने ॥ २८ ॥ तेषामापततांकेतूनश्वांश्चापानिसायकान् ॥ नाराचैरर्धचंद्रैश्चक्षिप्रंपार्थोन्यपातयत् ॥ २९ ॥

॥ २० ॥ २१ ॥ २२ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेअशीतितमोऽध्यायः ॥ ८० ॥ ॥ ५ ॥ ॥ ५ ॥ तमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८॥ ९ ॥ १० ॥ ११ ॥

अथान्यैर्दशभिर्भल्लैःशिरांस्येषामपातयत् ॥ रोपसंरक्तनेत्राणिसंदष्टौष्ठानिभूतले॥ ३० ॥ तानिवक्त्राणिविबभुःकमलानीवभूरिशः ॥ तांस्तुभल्लैर्महावेगैर्दश भिर्दशकौरवान॥ ३१ ॥ रुक्मांगदान्रुक्मपुंखैर्हत्वाप्रायादमित्रहा ॥ ३२ ॥ इतिश्रीमहाभारतेकर्णपर्वणिसंकुलयुद्धेअशीतितमोऽध्यायः ॥ ८० ॥ ॥ ५ ॥

संजयउवाच तंप्रयांतंमहावेगैरश्वैःकपिवरध्वजं ॥ युद्धायाभ्यद्रवन्वीराःकुरूणांनवतीरथाः ॥ १ ॥ कृत्वासंशप्तकाघोरंशपथंपारलौकिकं ॥ परिवव्रुर्नरव्या घ्रानरव्याघ्रंरणेर्जुनं ॥ २ ॥ कृष्णःश्वेतान्महावेगानश्वान्कांचनभूषणान् ॥ मुक्ताजालप्रतिच्छन्नान्प्रैषीत्कर्णरथंप्रति ॥ ३ ॥ ततःकर्णरथंयांतमरिघ्नंतंधनंजयं ॥ बाणवर्षैरभिघ्नंतःसंशप्तकरथाययुः ॥ ४ ॥ त्वरमाणांस्तुतान्सर्वान्ससूतेष्वसनध्वजान् ॥ जघाननवतिंवीरानर्जुनोनिशितैःशरैः ॥ ५ ॥ तेपतंतहतावाणैर्नानारू पैःकिरीटिना ॥ सविमानायथासिद्धाःस्वर्गात्पुण्यक्षयेतथा ॥ ६ ॥ ततःसरथनागाश्वाःकुरवःकुरुसत्तमं ॥ निर्भयाभरतश्रेष्ठमभ्यवर्तंतफाल्गुनं ॥ ७ ॥ तदाय स्तमनुष्याश्वमुदीर्णवरवारणं ॥ पुत्राणांतेमहासैन्यंसमरौत्सीद्धनंजयं ॥ ८ ॥ शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः ॥ प्राच्छादयन्महेष्वासाःकुरवःकुरुनंद नं ॥ ९ ॥ तामंतरिक्षेविततांशस्त्रवृष्टिंसमंततः ॥ व्यधमत्पांडवोबाणैस्तमःसूर्यइवांशुभिः ॥ १० ॥ ततोम्लेच्छाःस्थितामत्तैस्त्रयोदशशतैर्गजैः ॥ पार्श्वतोभ्यहन न्पार्थंतवपुत्रस्यशासनात् ॥ ११ ॥ कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः ॥ मुसलैर्भिंदिपालैश्चरथस्थंपार्थमार्दयन् ॥ १२ ॥ तांशस्त्रवृष्टिमतुलांद्विपहस्तैः प्रवेरितां ॥ चिच्छेदनिशितैर्भल्लैरर्धचंद्रैश्चफाल्गुनः ॥ १३ ॥ अथतान्द्विरदान्सर्वान्नानालिंगैःशरोत्तमैः ॥सपताकध्वजारोहान्गिरीन्वज्रैरिवाहनत् ॥ १४ ॥ ते हेमपुंखैरिपुभिरर्दिताहेममालिनः ॥ हताःपेतुर्महानागाःसाग्निज्वालाइवाद्रयः ॥ १५ ॥ ततोगांडीवनिर्घोषोमहानासीद्विशांपते ॥ स्तनतांकूजतांचैवमनुष्यग जवाजिनां ॥ १६ ॥ कुंजराश्चहताराजन्दुद्रुवुस्तेसमंततः ॥ अश्वाश्चपर्यधावंतहतारोहादिशोदश ॥ १७ ॥ रथाहीनामहाराजरथिभिर्वाजिभिस्तथा ॥ गंधर्व नगराकारादृश्यंतेस्मसहस्रशः ॥ १८ ॥ अश्वारोहामहाराजधावमानाइतस्ततः ॥ तत्रतत्रैवदृश्यंतेनिहताःपार्थसायकैः ॥ १९ ॥ तस्मिन्क्षणेपांडवस्यबाह्वोर्ब लमदृश्यत ॥ यत्सादिनोवारणांश्चरथांश्चैकोजयद्युधि ॥ २० ॥ ततस्त्र्यंगेणमहताबलेनभरतर्षभ ॥ दृष्ट्वापरिवृतंराजन्भीमसेनःकिरीटिनं ॥ २१ ॥ हतावशेषानु त्सृज्यत्वदीयान्कतिचिद्रथान् ॥ जवेनाभ्यद्रवद्राजन्धनंजयरथंप्रति ॥ २२ ॥ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

ततस्तत्प्राद्रवत्सैन्यंहतभूयिष्ठमातुरं॥ दृष्ट्वार्जुनंतदाभीमोजगामभ्रातरंप्रति ॥ २३ ॥ हतावशिष्टांस्तुरगानर्जुनेनमहाबलान् ॥ भीमोव्यधमदश्रांतोगदापा
णिर्महाहवे॥ २४॥ कालरात्रिमिवात्युग्रांनरनागाश्वभोजनां॥ प्राकाराट्टपुरद्वारदारणीमतिदारुणां ॥ २५ ॥ ततोगदांनृनागाश्वेष्वाशुभीमोव्यवासृजत् ॥
साजघानबहूनश्वानश्वारोहांश्चमारिष॥ २६॥ कार्ष्णायसतनुत्राणान्नरानश्वांश्चपांडवः॥ पोथयामासगदयासशब्दंतेऽपतन्हताः॥ २७॥ दंतैर्दशंतोवसुधां
शेरतेक्षतजोक्षिताः॥ भग्नमूर्धास्थिचरणाःक्रव्यादगणभोजनाः॥ २८॥ असृङ्मांसवसाभिश्चतृप्तिमभ्यागतागदा॥ अस्थीन्यप्यश्नतीतस्थौकालरात्रीवदु
र्दृशा॥ २९॥ सहस्राणिदशाश्वानांहत्वापत्तींश्चभूयसः॥ भीमोभ्यधावत्संक्रुद्धोगदापाणिरितस्ततः॥ ३० ॥ गदापाणिंततोभीमंदृष्ट्वाभारततावकाः॥ मेनिरे
समनुप्राप्तंकालदंडोद्यतंयमं॥ ३१ ॥ समत्तइवमातंगःसंक्रुद्धःपांडुनंदनः॥ प्रविवेशगजानीकंमकरःसागरंयथा॥ ३२॥ विगाह्यचगजानीकंप्रगृह्यमहतीं
गदां॥ क्षणेनभीमःसंक्रुद्धस्तन्निन्येयमसादनं॥ ३३ ॥ गजान्सकंटकान्मत्तान्सारोहान्सपताकिनः॥ पततःसमपश्यामसपक्षान्पर्वतानिव॥ ३४ ॥ हत्वातुतद्ग
जानीकंभीमसेनोमहाबलः॥ पुनःस्वरथमास्थायपृष्ठतोर्जुनमभ्ययात्॥ ३५॥ हतंपराङ्मुखप्रायंनिरुत्साहंपरंबलं ॥ व्यालंबतमहाराजप्रायशःशस्त्रवेष्टितं ॥
॥ ३६॥ विलंबमानंतत्सैन्यमप्रगल्भमवस्थितं॥ दृष्ट्वाप्राच्छादयद्बाणैरर्जुनःप्राणतापनैः॥३७॥ नराश्वरथमातंगायुधिगांडीवधन्वना॥ शरव्रातैश्चितारेजुः
कदंबाइवकेसरैः॥ ३८ ॥ ततःकुरूणामभवदार्तनादोमहान्नृप॥ नराश्वनागासुहरैर्वध्यतामर्जुनेषुभिः॥ ३९ ॥ हाहाकृतंभृशंत्रस्तंलीयमानंपरस्परं ॥ अलात
चक्रवत्सैन्यंतदाभ्रमततावकं॥ ४० ॥ ततस्तद्युद्धमभवत्कुरूणांसुमहद्बलैः॥ नत्यत्रासीदनिर्भिन्नोरथःसादीहयोगजः ॥ ४१ ॥ आदीप्तमिवतत्सैन्यंशरैश्छि
न्नतनुच्छदं॥ आसीत्स्वशोणितक्लिन्नंफुल्लाशोकवनंयथा॥ ४२ ॥ तंदृष्ट्वाकुरवस्तत्रविक्रांतंसव्यसाचिनं॥ निराशाःसमपद्यंतसर्वेकर्णस्यजीविते ॥४३ ॥ अ
विषह्यंतुपार्थस्यशरसंपातमाहवे॥ मत्वान्यवर्तन्कुरवोजितागांडीवधन्वना॥ ४४॥ तेहित्वासमरेकर्णंवध्यमानाश्चसायकैः ॥ प्रदुद्रुवुर्दिशोभीताश्चुक्रुशुश्चा
पिसूतजं॥ ४५॥ अभ्यद्रवततान्पार्थःकिरन्शरशतान्बहून्॥ हर्षयन्पांडवान्योधान्भीमसेनपुरोगमान् ॥ ४६ ॥ पुत्रास्तुतेमहाराजजग्मुःकर्णरथंप्रति ॥ अ
गाधमज्जतांतेषांद्वीपःकर्णोभवत्तदा॥ ४७॥ कुरवोहिमहाराजनिर्विषाःपन्नगाइव॥ कर्णमेवोपलीयंतभयाद्गांडीवधन्वनः॥ ४८॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेएकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥

यथासर्वाणिभूतानिमृत्योर्भीतानिमारिष ॥ धर्ममेवोपलीयंतेकर्मवंतिहियानिच ॥ ४९ ॥ तथाकर्णमहेष्वासंपुत्रास्तवनराधिप ॥ उपालीयंतसंत्रासात्पांडवस्यमहात्मनः ॥ ५० ॥ तान्शोणितपरिक्लिन्नान्विषमस्थान्शरातुरान् ॥ माभैष्टेत्यब्रवीत्कर्णोह्यभीतोमामितेतिच ॥ ५१ ॥ संभग्नंहिबलंदृष्ट्वाबलात्पार्थेनतावकं ॥ धनुर्विस्फारयन्कर्णस्तस्थौशत्रुजिघांसया ॥ ५२ ॥ तान्प्रद्रुतान्कुरून्दृष्ट्वाकर्णःशस्त्रभृतांवरः ॥ संचिंतयित्वापार्थस्यवधेदध्रेमनःश्वसन् ॥ ५३ ॥ विस्फार्यसुमहच्चापंततश्चाधिरथिर्वृषः ॥ पंचालान्पुनराधावत्पश्यतःसव्यसाचिनः ॥ ५४ ॥ ततःक्षणेनक्षितिपाःक्षतजप्रतिमेक्षणाः ॥ कर्णववर्षुर्बाणौघैर्यथामेघामहीधरं ॥ ५५ ॥ ततःशरसहस्राणिकर्णमुक्तानिमारिष ॥ व्ययोजयंतपंचालान्प्राणैःप्राणभृतांवर ॥ ५६ ॥ तत्रशब्दोमहानासीत्पंचालानांमहामते ॥ वध्यतांसूतपुत्रेणमित्रार्थेमित्रगृद्धिना ॥ ५७ ॥ इतिश्रीम० कर्णपर्वणिसंकुलयुद्धेएकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ९ ॥ ॥ ९ ॥ संजयउवाच ततःकर्णःकुरुषुप्रद्रुतेषुवरूथिनाश्वेतहयेनराजन् ॥ पांचालपुत्रान्व्यधमत्सूतपुत्रोमहेषुभिर्वातइवाभ्रसंघान् ॥ १ ॥ सूतंरथादंजलिकैर्निपात्यजघानचाश्वान्जनमेजयस्य ॥ शतानीकंसुतसोमंचभल्लैरवाकिरद्धनुषीचाप्यकृंतत् ॥ २ ॥ धृष्टद्युम्नंनिर्बिभेदाथषड्भिर्जघानाश्वांस्तरसातस्यसंख्ये ॥ हत्वाचाश्वान्सात्यकेःसूतपुत्रःकैकेयपुत्रंन्यवधीद्विशोकं ॥ ३ ॥ तमभ्यधावन्निहतेकुमारेकैकेयसेनापतिरुग्रकर्मा ॥ शरैर्विधुन्वन्भृशमुग्रवेगैःकर्णात्मजंचाप्यहनत्प्रसेनं ॥ ४ ॥ तस्यार्धचंद्रैस्त्रिभिरुच्चकर्तप्रहस्यबाहूचशिरश्चकर्णः ॥ सस्यंदनाद्गामगमद्गतासुःपरश्वधैःशालइवावरुग्णः ॥ ५ ॥ हताश्वमंजोगतिभिःप्रसेनःशिनिप्रवीरंनिशितैःपृषत्कैः ॥ प्रच्छाद्यनृत्यन्निवकर्णपुत्रःशैनेयबाणाभिहतःपपात ॥ ६ ॥ पुत्रेहतेक्रोधपरीतचेताःकर्णःशिनीनामृषभंजिघांसुः ॥ हतोसिशैनेयइतिब्रुवन्सव्यवासृजद्बाणममित्रसाहं ॥ ७ ॥ तमस्यचिच्छेदशरंशिखंडीत्रिभिस्त्रिभिश्चप्रतुतोदकर्णं ॥ शिखंडिनःकार्मुकंचध्वजंचछित्वाक्षुराभ्यांन्यपतत्सुजातः ॥ ८ ॥ शिखंडिनंषड्भिरविध्यदुग्रोधार्ष्टद्युम्नेःसशिरश्चोच्चकर्त ॥ तथाभिनत्सुतसोमंशरेणसुसंशितेनाधिरथिर्महात्मा ॥ ९ ॥ अथाक्रंदेतुमुलेवर्तमानेधार्ष्टद्युम्नेनिहतेतत्रकृष्णः ॥ अपांचाल्यंक्रियतेयाहिपार्थकर्णंजहीत्यब्रवीद्राजसिंह ॥ १० ॥ ततःप्रहस्याशुनरप्रवीरोरथंरथेनाधिरथेजगाम ॥ भयेतेषांत्राणमिच्छन्सुबाहुरभ्याहतानांरथयूथपेन ॥ ११ ॥

ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ अंजोगतिभिःपूर्णायतोत्सृष्टैः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ १२॥ प्रतिश्रुतःप्रतिस्वनः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

विस्फार्यगांडीवमथोग्रघोषंज्ययासमाहत्यतलेभृशंच ॥ बाणांधकारंसहसैवकृत्वाजघाननागाश्वरथध्वजांश्च ॥ १२ ॥ प्रतिश्रुतःप्राचरदंतरिक्षेगुहागिरीणा
मपतन्वयांसि ॥ यन्मंडलज्येनविजृंभमाणोरौद्रेमुहूर्तेभ्यपतत्किरीटी ॥ १३ ॥ तंभीमसेनोनुययौरथेनपृष्ठेरक्षन्पांडवमेकवीरः ॥ तौराजपुत्रौत्वरितौरथाभ्यां
कर्णाययातावरिभिर्विपक्तौ ॥ १४ ॥ तत्रांतरेसुमहान्सूतपुत्रश्चक्रेयुद्धंसोमकान्संप्रमृद्य ॥ रथाश्वमातंगगणान्जघानप्रच्छादयामासशरैर्दिशश्च ॥ १५ ॥
तमुत्तमौजाजनमेजयश्चक्रुद्धौयुधामन्युशिखंडिनौच ॥ कर्णंविभेदुःसहिताःपृषत्कैःसन्नर्दमानाःसहपार्षतेन ॥ १६ ॥ तेपंचपंचालरथप्रवीरावैकर्तनंकर्णमभि
द्रवंतः ॥ तस्माद्रथाच्च्यावयितुंनशेकुर्धैर्यात्कृतात्मानमिवेंद्रियार्थाः ॥ १७ ॥ तेषांधनूंषिध्वजवाजिसूतांस्तूर्णंपताकाश्चनिकृत्यबाणैः ॥ तान्पंचभिस्त्वभ्यहनत्पृ
षत्कैःकर्णस्ततःसिंहइवोन्ननाद ॥ १८ ॥ तस्यास्यतस्तानभिनिघ्नतश्चज्याबाणहस्तस्यधनुःस्वनेन ॥ साद्रिद्रुमास्यात्पृथिवीविशीर्णेत्यतीवमत्वाजनताव्यषीद
त् ॥ १९ ॥ सशक्रचापप्रतिमेनधन्वनाभृशायतेनाधिरथिःशरान्सृजन् ॥ बभौरणेदीप्तमरीचिमंडलोयथांशुमालीपरिवेषवांस्तथा ॥ २० ॥ शिखंडिनंद्वादश
भिःपराभिनच्छितैःशरैःषड्भिरथोत्तमौजसं ॥ त्रिभिर्युधामन्युमविध्यदाशुगैस्त्रिभिस्त्रिभिःसोमकपार्षतात्मजौ ॥ २१ ॥ पराजिताःपंचमहारथास्तुतेमहाहवेसू
तसुतेनमारिष ॥ निरुद्यमास्तस्थुरमित्रनंदनायथेंद्रियार्थात्मवतापराजिताः ॥ २२ ॥ निमज्जतस्तानथकर्णसागरेविपन्ननावोवणिजोयथार्णवे ॥ उद्दध्रिरेनौ
भिरिवार्णवाद्रथैःसुकल्पितैर्द्रौपदिजाःस्वमातुलान् ॥ २३ ॥ ततःशिनीनामृषभःशितैःशरैर्निकृत्यकर्णप्रहितानिषून्बहून् ॥ विदार्यकर्णंनिशितैरयस्मयैस्तवा
त्मजंज्येष्ठमविध्यदष्टभिः ॥ २४ ॥ कृपोथभोजश्चतवात्मजस्तथास्वयंचकर्णोनिशितैरताडयत् ॥ सतैश्चतुर्भिर्युयुधेयदूत्तमोदिगीश्वरैर्दैत्यपतिर्यथातथा ॥ २५ ॥
समाततेनेष्वसनेनकूजताभृशायतेनामितबाणवर्षिणा ॥ बभूवदुर्धर्षतरःससात्यकिःशरन्नभोमध्यगतोयथारविः ॥ २६ ॥ पुनःसमास्थायरथान्सुदंशिताः
शिनिप्रवीरंजुगुपुःपरंतपाः ॥ समेत्यपंचालमहारथारणेमरुद्गणाःशक्रमिवारिनिग्रहे ॥ २७ ॥ ततोभवद्युद्धमतीवदारुणंतवाहितानांतवसैनिकैःसह ॥ रथा
श्वमातंगविनाशनंतथायथासुराणामसुरैःपुराभवत् ॥ २८ ॥ रथाद्विपावाजिपदातयस्तथाभवंतिनानाविधशस्त्रवेष्टिताः ॥ परस्परेणाभिहताश्चचस्खलुर्विने
दुरार्ताव्यसवोपतंस्तथा ॥ २९ ॥ तथागतंभीममभीस्तवात्मजःससारराजावरजःकिरन्शरैः ॥ तमभ्यधावत्त्वरितोवृकोदरोमहारुरुंसिंहइवाभिपेदिवान् ॥ ३० ॥

॥ ३१ ॥ ३२ ॥ ३३ ॥३४ ॥ ३५ ॥३६॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ९ ॥ ॥ ९ ॥ तत्रेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

ततस्तयोर्युद्धमतीवदारुणंप्रदीव्यतोःप्राणदुरोदरंद्वयोः॥ परस्परेणाभिनिविष्टरोषयोरुदग्रयोःशंबरशक्रयोर्यथा॥३१॥ शरैःशरीरार्तिकरैःसुतेजनैर्निजघ्नतुस्तावितरेतरंभृशं॥ सकृत्प्रभिन्नाविववासितांतरमहागजौमन्मथसक्तचेतसौ॥३२॥तवात्मजस्याथवृकोदरस्त्वरन्धनुःक्षुराभ्यांध्वजमेवचाच्छिनत्॥ ललाटमप्यस्यबिभेदपत्रिणाशिरश्चकायात्प्रजहारसारथेः॥३३॥ सराजपुत्रोन्यदवाप्यकार्मुकंवृकोदरंद्वादशभिःपराभिनत्॥स्वयंनियच्छंस्तुरगानजिह्मगैःशरैश्चभीमंपुनरप्यवीवृषत्॥ ३४॥ ततःशरंसूर्यमरीचिसप्रभंसुवर्णवज्रोत्तमरत्नभूषितं॥ महेंद्रवज्राशनिपातदुःसहंमुमोचभीमांगविदारणक्षमं ॥ ३५॥ सतेननिर्विद्धतनुर्वृकोदरोनिपातितःस्रस्ततनुर्गतासुवत्॥ प्रसार्यबाहूरथवर्यमाश्रितःपुनःससंज्ञामुपलभ्यचानदत्॥ ३६॥ इतिश्रीमहाभारतेकर्णपर्वणिदुःशासनभीमसेनयुद्धेद्व्यशीतितमोऽध्यायः॥ ८२॥ ॥ ९॥ ॥ ९॥ संजयउवाच तत्राकरोद्दुष्करंराजपुत्रोदुःशासनस्तुमुलंयुद्ध्यमानः॥ चिच्छेदभीमस्यधनुःशरेणषड्भिःशरैःसारथिमप्यविध्यत्॥ १ ॥ सतत्कृत्वाराजपुत्रस्तरस्वीविव्याधभीमंनवभिःपृषत्कैः॥ ततोभिनद्बहुभिःक्षिप्रमेववरेषुभिर्भीमसेनंमहात्मा॥ २ ॥ ततःक्रुद्धोभीमसेनस्तरस्वीशक्तिंचोग्रांप्राहिणोत्तेसुताय॥ तामापतंतींसहसातिघोरांदृष्ट्वासुतस्तेज्वलितामिवोल्कां॥ ३॥ आकर्णपूर्णैरिषुभिर्महात्माचिच्छेदपुत्रोदशभिःपृषत्कैः॥ दृष्ट्वातुतत्कर्मकृतंसुदुष्करंप्रापूजयन्सर्वयोधाःप्रहृष्टाः॥ ४॥ अथाशुभीमंचशरेणभूयोगाढंसविव्याधसुतस्त्वदीयः॥ चुक्रोधभीमःपुनराशुतस्मैभृशंप्रजज्वालरुषाभिवीक्ष्य॥५॥ विद्धोस्मिवीराशुभृशंत्वयाद्यसहस्वभूयोपिगदाप्रहारं॥ उक्त्वैवमुच्चैःकुपितोथभीमोजग्राहतांभीमगदांवधाय॥ ६॥ उवाचचाद्याहमहंदुरात्मन्पास्यामितेशोणितमाजिमध्ये॥ अथैवमुक्तस्तनयस्तवोग्रांशक्तिंवेगात्प्राहिणोन्मृत्युरूपां॥ ७॥ आविध्यभीमोपिगदांसुघोरांविचिक्षिपेरोषपरीतमूर्तिः॥ सातस्यशक्तिंसहसाविरुज्यपुत्रंतवाजौताडयामासमूर्ध्नि॥ ८॥ सविक्षरन्नागइवप्रभिन्नोगदामस्मैतुमुलेप्राहिणोद्वै॥ तयाहरद्दशधन्वंतराणिदुःशासनंभीमसेनःप्रसह्य॥९॥ तयाहतःपतितोवेपमानोदुःशासनोगदयावेगवत्या॥ विध्वस्तवर्माभरणांबरस्रग्विचेष्टमानोभृशवेदनातुरः॥ १०॥ हयाःससूतानिहतानरेंद्रचूर्णीकृतश्चास्यरथःपतंत्या॥ दुःशासनंपांडवाःप्रेक्ष्यसर्वेहृष्टाःपंचालाःसिंहनादानमुंचन्॥ ११ ॥ तंपातयित्वाथवृकोदरोथजगर्जहर्षेणविनादयन्दिशः॥ नादेनतेनाखिलपार्श्ववर्तिनोमूर्छाकुलाःपतितास्त्वाजमीढ॥ १२॥ ॥ ६ ॥ ७॥ ८ ॥ ९॥१०॥११॥१२॥

भीमोपिवेगादवतीर्ययानाद्दुःशासनंवेगवानभ्यधावत् ॥ ततःस्मृत्वाभीमसेनस्तरस्वीसापत्नकंयत्प्रयुक्तंसुतैस्ते ॥ १३ ॥ तस्मिन्सुघोरेतुमुलेवर्तमानेप्रधानभू
यिष्ठतरैःसमंतात् ॥ दुःशासनंतत्रसमीक्ष्यराजन्भीमोमहाबाहुरचिंत्यकर्मा ॥ १४ ॥ स्मृत्वाथकेशग्रहणंचदेव्यावस्त्रापहारंचरजस्वलायाः ॥ अनागसोभर्तृप
राङ्मुखायादुःखानिदत्तान्यपिविप्रचिंत्य ॥ १५ ॥ जज्वालक्रोधादथभीमसेनआज्यप्रसिक्तोहियथाहुताशः ॥ तत्राहकर्णंचसुयोधनंचकृपंद्रौणिंकृतवर्माण
मेव ॥ १६ ॥ निहन्मिदुःशासनमद्यपापंसंरक्ष्यतामद्यसमस्तयोधाः ॥ इत्येवमुक्त्वासहसाभ्यधावन्निहंतुकामोतिबलस्तरस्वी ॥ १७ ॥ तथातुविक्रम्यरणेवृकोद
रोमहागजंकेसरिकोयथैव ॥ निगृह्यदुःशासनमेकवीरःसुयोधनस्याधिरथेःसमक्षं ॥ १८ ॥ रथादवप्लुत्यगतःसभूमौयत्नेनतस्मिन्प्रणिधायचक्षुः ॥ असिंसमु
द्यम्यसितंसुधारंकंठेपदाक्रम्यचवेपमानं ॥ १९ ॥ उवाचतद्गौरितियद्ब्रुवाणोहृष्टोवदेःकर्णसुयोधनाभ्यां ॥ येराजसूयावभृथेपवित्राजाताःकचायाज्ञसेन्यादु
रात्मन् ॥ २० ॥ तेपाणिनाकतरेणावकृष्टास्तद्ब्रूहित्वांपृच्छतिभीमसेनः ॥ श्रुत्वातुतद्भीमवचःसुघोरंदुःशासनोभीमसेनंनिरीक्ष्य ॥ २१ ॥ जज्वालभीमंसतदा
स्मयेनसंशृण्वतांकौरवसोमकानां ॥ उक्तस्तदाजौसतथासरोषंजगादभीमंपरिवर्तनेत्रः ॥ २२ ॥ अयंकरिकराकारःपीनस्तनविमर्दनः ॥ गोसहस्रप्रदाताचक्ष
त्रियांतकरःकरः ॥ २३ ॥ अनेनयाज्ञसेन्यामेभीमकेशाविकर्षिताः ॥ पश्यतांकुरुमुख्यानांयुष्माकंचसभासदां ॥ २४ ॥ एवंत्वसौराजसुतंनिशम्यब्रुवंतमा
जौविनिपीड्यवक्षः ॥ भीमोबलात्तंप्रतिगृह्यदोर्भ्यामुच्चैर्ननादाथसमस्तयोधान् ॥ २५ ॥ उवाचयस्यास्तिबलंसरक्षत्वसौभवेदद्यनिरस्तबाहुः ॥ दुःशासनंजी
वितंप्रोत्सृजंतमाक्षिप्ययोधांस्तरसामहाबलः ॥ २६ ॥ एवंक्रुद्धोभीमसेनःकरेणउत्पाटयामासभुजंमहात्मा ॥ दुःशासनंतेनसवीरमध्येजघानवज्राशनिस
न्निभेन ॥ २७ ॥ उत्कृत्यवक्षःपतितस्यभूमावथापिबच्छोणितमस्यकोष्णं ॥ ततोनिपात्यास्यशिरोपकृत्यतेनासिनातवपुत्रस्यराजन् ॥ २८ ॥ सत्यांचिकीर्षु
र्मतिमान्प्रतिज्ञांभीमोपिबच्छोणितमस्यकोष्णं ॥ आस्वाद्यचास्वाद्यचवीक्षमाणःक्रुद्धोहिचैनंनिजगादवाक्यं ॥ २९ ॥ स्तन्यस्यमातुर्मधुसर्पिषोर्वामाध्वीकपा
नस्यचसत्कृतस्य ॥ दिव्यस्यवातोयरसस्यपानात्पयोदधिभ्यांमथिताच्चमुख्यात् ॥ ३० ॥ अन्यानिपानानिचयानिलोकेसुधामृतस्वादुरसानितेभ्यः ॥ सर्वेभ्य
एवाभ्यधिकोरसोयंममाद्यचास्याहितलोहितस्य ॥ ३१ ॥

॥ २१ ॥ २२ ॥ २३ ॥२४ ॥ २५ ॥२६॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ९ ॥ ॥ ९ ॥ तत्रेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

वदस्तयोर्युद्धमतीवदारुणंप्रदीव्यतोःप्राणदुरोदरंद्वयोः॥ परस्परेणाभिनिविष्टरोषयोरुदग्रयोःशंबरशक्रयोर्यथा॥३१॥ शरैःशरीरार्तिकरैःसुतेजनैर्निजघ्नतु
स्तावितरेतरंभृशं॥ सकृत्प्रभिन्नाविववासितांतरेमहागजौमन्मथसक्तचेतसौ॥३२॥तवात्मजस्याथवृकोदरस्त्वरन्धनुःक्षुराभ्यांध्वजमेवचाच्छिनत्॥ ललाट
मप्यस्यबिभेदपत्रिणाशिरश्चकायात्प्रजहारसारथेः॥३३॥ सराजपुत्रोन्यदवाप्यकार्मुकंवृकोदरंद्वादशभिःपराभिनत्॥स्वयंनियच्छंस्तुरगानजिह्मगैःशरैश्च
भीमंपुनरप्यवीवृषत्॥ ३४॥ ततःशरंसूर्यमरीचिसप्रभंसुवर्णवज्रोत्तमरत्नभूषितं॥ महेंद्रवज्राशनिपातदुःसहंमुमोचभीमांगविदारणक्षमं॥ ३५॥ सतेन
निर्विद्धतनुर्वृकोदरोनिपातितःस्रस्ततनुर्गतासुवत्॥ प्रसार्यबाहूरथवर्यमाश्रितःपुनःससंज्ञामुपलभ्यचानदत्॥ ३६॥ इतिश्रीमहाभारतेकर्णपर्वणिदुःशा
सनभीमसेनयुद्धेद्व्यशीतितमोऽध्यायः॥८२॥ ॥ ९ ॥ ॥ ९ ॥ संजयउवाच तत्राकरोद्दुष्करंराजपुत्रोदुःशासनस्तुमुलंयुध्यमानः॥ चिच्छेदभी
मस्यधनुःशरेणषष्ट्याशरैःसारथिमप्यविध्यत्॥ १॥ सतत्कृत्वाराजपुत्रस्तरस्वीविव्याधभीमंनवभिःपृषत्कैः॥ ततोभिनद्बहुभिःक्षिप्रमेववरेषुभिर्भीमसेनं
महात्मा॥ २॥ ततःक्रुद्धोभीमसेनस्तरस्वीशक्तिंचोग्रांप्राहिणोत्तेसुताय॥ तामापतंतींसहसातिघोरांदृष्ट्वासुतस्तेज्वलितामिवोल्कां॥ ३॥ आकर्णपूर्णैरिषुभि
र्महात्माचिच्छेदपुत्रोदशभिःपृषत्कैः॥ दृष्ट्वातुतत्कर्मकृतंसुदुष्करंप्रापूजयन्सर्वयोधाःप्रहृष्टाः॥ ४॥ अथाशुभीमंचशरेणभूयोगाढंसविव्याधसुतस्त्वदीयः॥
चुक्रोधभीमःपुनराशुतस्मैभृशंप्रजज्वालरुषाभिवीक्ष्य॥५॥ विद्धोस्मिवीराशुभृशंत्वयाद्यसहस्वभूयोपिगदाप्रहारं॥ उक्त्वैवमुच्चैःकुपितोथभीमोजग्राहतांभी
मगदांवधाय॥ ६॥ उवाचचाद्याहमहंदुरात्मन्पास्यामितेशोणितमाजिमध्ये॥ अथैवमुक्तस्तनयस्तवोग्रांशक्तिंवेगात्प्राहिणोन्मृत्युरूपां॥ ७॥ आविध्यभी
मोपिगदांसुघोरांविचिक्षिपेरोषपरीतमूर्तिः॥ सातस्यशक्तिंसहसाविरुज्यपुत्रंतवाजौताडयामासमूर्ध्नि॥ ८॥ सविक्षरन्नागइवप्रभिन्नोगदामस्मैतुमुलेप्रा
हिणोद्वै॥ तयाहरद्दशधन्वंतराणिदुःशासनंभीमसेनःप्रसह्य॥ ९॥ तयाहतःपतितोवेपमानोदुःशासनोगदयावेगवत्या॥ विध्वस्तवर्माभरणांबरस्रक्विचेष्टमा
नोभृशवेदनातुरः॥ १०॥ हयाःससूतानिहतानरेंद्रचूर्णीकृतश्चास्यरथःपतंत्या॥ दुःशासनंपांडवाःप्रेक्ष्यसर्वेहृष्टाःपंचालाःसिंहनादानमुंचन्॥ ११॥ तंपात
यित्वाथवृकोदरोथजगर्जहर्षेणविनादयन्दिशः॥ नादेनतेनाखिलपार्श्ववर्तिनोमूर्छाकुलाःपतितास्त्वाजमीढ॥ १२॥ ॥ ६ ॥ ७ ॥ ८ ॥ ९॥१०॥११॥१२॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

भीमोपिवेगादवतीर्ययानाद्दुःशासनंवेगवानभ्यधावत् ॥ ततःस्मृत्वाभीमसेनस्तरस्वीसापत्नकंयत्प्रयुक्तंसुतैस्ते ॥ १३ ॥ तस्मिन्सुघोरेतुमुलेवर्तमानेप्रधानभू
यिष्ठतरैःसमंतात् ॥ दुःशासनंतत्रसमीक्ष्यराजन्भीमोमहाबाहुरचिंत्यकर्मा ॥ १४ ॥ स्मृत्वाथकेशग्रहणंचदेव्यावस्त्रापहारंचरजस्वलायाः ॥ अनागसोभर्तृप
राङ्मुखायादुःखानिदत्तान्यपिविप्रचिंत्य ॥ १५ ॥ जज्वालक्रोधादथभीमसेनआज्यप्रसिक्तोहियथाहुताशः ॥ तत्राहकर्णंचसुयोधनंचकृपंद्रौणिंकृतवर्माण
मेव ॥ १६ ॥ निहन्मिदुःशासनमद्यपापंसंरक्ष्यतामद्यसमस्तयोधाः ॥ इत्येवमुक्त्वासहसाभ्यधावन्निहंतुकामोतिबलस्तरस्वी ॥ १७ ॥ तथातुविक्रम्यरणेवृकोद
रोमहागजंकेसरिकोयथैव ॥ निगृह्यदुःशासनमेकवीरःसुयोधनस्याधिरथेःसमक्षं ॥ १८ ॥ रथादवप्लुत्यगतःसभूमौयत्नेनतस्मिन्प्रणिधायचक्षुः ॥ असिंसमु
द्यम्यसितंसुधारंकंठेपदाक्रम्यचवेपमानं ॥ १९ ॥ उवाचतद्गौरितियद्ब्रुवाणोहृष्टोवदेःकर्णसुयोधनाभ्यां ॥ येराजसूयावभृथेपवित्राजाताःकचायाज्ञसेन्यादु
रात्मन् ॥ २० ॥ तेपाणिनाकतरेणावकृष्टास्तद्ब्रूहित्वांपृच्छतिभीमसेनः ॥ श्रुत्वातुतद्भीमवचःसुघोरंदुःशासनोभीमसेनंनिरीक्ष्य ॥ २१ ॥ जज्वालभीमंसतदा
स्मयेनसंशृण्वतांकौरवसोमकानां ॥ उक्तस्तदाजौसतथासरोषंजगादभीमंपरिवर्तनेत्रः ॥ २२ ॥ अयंकरिकराकारःपीनस्तनविमर्दनः ॥ गोसहस्रप्रदाताचक्ष
त्रियांतकरःकरः ॥ २३ ॥ अनेनयाज्ञसेन्यामेभीमकेशाविकर्षिताः ॥ पश्यतांकुरुमुख्यानांयुष्माकंचसभासदां ॥ २४ ॥ एवंत्वसौराजसुतंनिशम्यब्रुवंतमा
जौविनिपीड्यवक्षः ॥ भीमोबलात्तंप्रतिगृह्यदोर्भ्यामुच्चैर्ननादाथसमस्तयोधान् ॥ २५ ॥ उवाचयस्यास्तिबलंसरक्षत्वसौभवेदद्यनिरस्तबाहुः ॥ दुःशासनंजी
वितंप्रोत्सृजंतमाक्षिप्ययोधांस्तरसामहाबलः ॥ २६ ॥ एवंक्रुद्धोभीमसेनःकरेणउत्पाटयामासभुजंमहात्मा ॥ दुःशासनंतेनसवीरमध्येजघानवज्राशनिस
न्निभेन ॥ २७ ॥ उत्कृत्यवक्षःपतितस्यभूमावथापिबच्छोणितमस्यकोष्णं ॥ ततोनिपात्यास्यशिरोपकृत्यतेनासिनातवपुत्रस्यराजन् ॥ २८ ॥ सत्यांचिकीर्षु
र्मतिमान्प्रतिज्ञांभीमोपिबच्छोणितमस्यकोष्णं ॥ आस्वाद्यचास्वाद्यचवीक्षमाणःक्रुद्धोहिचैनंनिजगादवाक्यं ॥ २९ ॥ स्तन्यस्यमातुर्मधुसर्पिषोर्वामाध्वीकपा
नस्यचसत्कृतस्य ॥ दिव्यस्यवातोयरसस्यपानात्पयोदधिभ्यांमथिताच्चमुख्यात् ॥ ३० ॥ अन्यानिपानानिचयानिलोकेसुधामृतस्वादुरसानितेभ्यः ॥ सर्वेभ्य
एवाभ्यधिकोरसोयंममाद्यचास्याहितलोहितस्य ॥ ३१ ॥

॥३२॥३३॥३४॥३५॥३६॥३७॥३८॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥५२॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेत्र्यशीतितमोऽध्यायः ॥ ८३ ॥

अथाहभीमःपुनरुग्रकर्मादुःशासनंक्रोधपरीतचेताः ॥ गतासुमालोक्यविहस्यसुस्वरंकिंवाकुर्यांमृत्युनारक्षितोसि॥३२॥ एवंब्रुवाणंपुनराद्रवंतमास्वाद्यमानं तमतिप्रहृष्टं॥ येभीमसेनंददृशुस्तदानींभयेनतेपिव्यथितानिपेतुः॥ ३३॥ येचापिनासन्व्यथितामनुष्यास्तेषांकरेभ्यःपतितंहिशस्त्रं॥भयाच्चसंचुक्रुशुरस्वरैस्ते निमीलिताक्षाददृशुश्चसमंततः॥ ३४॥ तंतत्रभीमंददृशुःसमंताद्दौःशासनंतद्रुधिरंपिबंतं॥ सर्वेपलायंतभयाभिपन्नानवैमनुष्योयमितिब्रुवाणाः ॥ ३५ ॥ तस्मिन्कृतेभीमसेनेनरूपेदृष्ट्वाजनाःशोणितंपीयमानं॥ संप्राद्रवंश्चित्रसेनेनसार्धंभीमंरक्षोभाषमाणाभयार्ताः ॥ ३६ ॥ युधामन्युःप्रद्रुतंचित्रसेनंसहानीकस्त्वभ्ययाद्राजपुत्रः॥ विव्याधचैनंनिशितैःपृषत्कैर्व्यपेतभीःसप्तभिराशुमुक्तैः॥ ३७॥ संक्रांतभोगइवलेलिहानोमहोरगःक्रोधविषंसिसृक्षुः ॥ निवृत्यपांचालजमभ्यविध्यत्रिभिःशरैःसारथिमस्यषड्भिः॥ ३८॥ ततःसुपुंखेनसुयंत्रितेनसुसंशिताग्रेणशरेणशूरः॥ आकर्णमुक्तेनसमाहितेनयुधामन्युस्तस्यशिरोजहार॥ ३९॥तस्मिन्हतेभ्रातरिचित्रसेनेक्रुद्धःकर्णःपौरुषंदर्शयानः॥ व्यद्रावयत्पांडवानामनीकंप्रत्युद्यातोनकुलेनामितौजाः ॥ ४० ॥ भीमोपिहत्वातत्रैवदुःशासनममर्षणं॥ पूरयित्वांजलिंभूयोरुधिरस्योग्रनिःस्वनः॥ ४१ ॥शृण्वतांलोकवीराणामिदंवचनमब्रवीत्॥ एषतेरुधिरंकंठात्पिबामिपुरुषाधम॥ ४२॥ ब्रूहीदानींतुसंहृष्टःपुनर्गौरितिगौरिति॥ येतदास्मान्प्रनृत्यंतिपुनर्गौरितिगौरिति॥ ४३॥ तान्वयंप्रतिनृत्यामःपुनर्गौरितिगौरिति॥ प्रमाणकोट्यांशयनंकालकूटस्यभोजनं॥ ४४॥ दंशनंचाहिभिःकृष्णैर्दाहंचजतुवेश्मनि॥ द्यूतेनराज्यहरणमरण्येवसतिश्चया॥ ४५॥ द्रौपद्याःकेशपक्षस्यग्रहणंचसुदारुणं॥ इष्वस्त्राणिचसंग्रामेष्वसुखानिचवेश्मनि॥ ४६॥ विराटभवनेयश्चक्लेशोस्माकंपृथग्विधः॥ शकुनेर्धार्तराष्ट्रस्यराधेयस्यचमंत्रिते॥ ४७॥ अनुभूतानिदुःखानितेषांहेतुस्त्वमेवहि॥ दुःखान्येतानिजानीमोनसुखानिकदाचन॥ धृतराष्ट्रस्यदौरात्म्यात्सपुत्रस्यसदावयं॥ ४८॥ इत्युक्त्वावचनंराजन्जयंप्राप्यवृकोदरः॥ पुनराहमहाराजस्मयंस्तौकेशवार्जुनौ॥ ४९ ॥असृग्दिग्धोविस्रवल्लोहितास्यःक्रुद्धोत्यर्थंभीमसेनस्तरस्वी॥ दुःशासनेयद्रणेसंश्रुतंमेतद्वैसत्यंकृतमद्येहवीरौ॥ ५० ॥ अत्रैवदास्याम्यपरंद्वितीयंदुर्योधनंयज्ञपशुंविशस्य॥ शिरोमृदित्वाचपदादुरात्मनःशांतिंलप्स्येकौरवाणांसमक्षं॥ ५१ ॥एतावदुक्त्वावचनंप्रहृष्टोननादचोच्चैरुधिरार्द्रगात्रः॥ ननर्दचैवातिबलोमहात्मावृत्रंनिहत्येवसहस्रनेत्रः॥५२॥ इतिश्रीमहाभारतेकर्णपर्वणिदुःशासनवधेत्र्यशीतितमोऽध्यायः॥८३॥

दुःशासनेइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

संजयउवाच दुःशासनेतुनिहतेतवपुत्रामहारथाः ॥ महाक्रोधविषावीराःसमरेष्वपलायिनः ॥ १ ॥ दशराजन्महावीर्याभीमंप्राच्छादयन्शरैः ॥ निषंगी
कवचीपाशीदंडधारोधनुर्धरः ॥ २ ॥ अलोलुपःसहःषंढोवातवेगसुवर्चसौ ॥ एतेसमेत्यसहिताभ्रातृव्यसनकर्शिताः ॥ ३ ॥ भीमसेनंमहाबाहुंमार्गणैःसमवार
यन् ॥ सवार्यमाणोविशिखैःसमंतात्तैर्महारथैः ॥ ४ ॥ भीमःक्रोधाग्निरक्ताक्षःक्रुद्धःकालइवाबभौ ॥ तांस्तुभल्लैर्महावेगैर्दशभिर्दशभारतान् ॥ ५ ॥ रुक्मांगदा
नरुक्मपुंखैःपार्थोनिन्येयमक्षयं ॥ हतेषुतेषुवीरेषुप्रदुद्राववलंतव ॥ ६ ॥ पश्यतःसूतपुत्रस्यपांडवस्यभयार्दितं ॥ ततःकर्णोमहाराजप्रविवेशमहद्भयं ॥ ७ ॥ दृ
ष्ट्वाभीमस्यविक्रांतमंतकस्यप्रजास्विव ॥ तस्याकारभावज्ञःशल्यःसमितिशोभनः ॥ ८ ॥ उवाचवचनंकर्णंप्राप्तकालमरिंदमं ॥ माव्यथांकुरुराधेयनैवंत्व
य्युपपद्यते ॥ ९ ॥ एतेद्रवंतिराजानोभीमसेनभयार्दिताः ॥ दुर्योधनश्चसंमूढोभ्रातृव्यसनकर्शितः ॥ १० ॥ दुःशासनस्यरुधिरेपीयमानेमहात्मना ॥ व्यापन्न
चेतसश्चैवशोकोपहतचेतसः ॥ ११ ॥ दुर्योधनमुपासंतेपरिवार्यसमंततः ॥ कृपप्रभृतयश्चैवहतशेषाःसहोदराः ॥ १२ ॥ पांडवाल्लब्धलक्षाश्चधनंजयपुरोगमाः ॥
त्वामेवाभिमुखाःशूरायुद्धायसमुपस्थिताः ॥ १३ ॥ सत्वंपुरुषशार्दूलपौरुषेणसमास्थितः ॥ क्षत्रधर्मंपुरस्कृत्यप्रत्युद्याहिधनंजयं ॥ १४ ॥ भारोहिधार्तराष्ट्रेणत्व
यिसर्वःसमाहितः ॥ तमुद्वहमहाबाहोयथाशक्तियथाबलं ॥ १५ ॥ जयेस्याद्विपुलाकीर्तिर्ध्रुवःस्वर्गःपराजये ॥ वृषसेनश्चराधेयसंक्रुद्धस्तनयस्तव ॥ १६ ॥ त्वयि
मोहंसमापन्नेपांडवानभिधावति ॥ एतच्छ्रुत्वातुवचनंशल्यस्यामिततेजसः ॥ हृदिचावश्यकंभावंचक्रेयुद्धायसुस्थिरं ॥ १७ ॥ ततःक्रुद्धोवृषसेनोभ्यधावदव
स्थितंप्रमुखेपांडवंतं ॥ वृकोदरंकालमिवात्तदंडंगदाहस्तंयोधयंतंत्वदीयान् ॥ १८ ॥ तमभ्यधावन्नकुलःप्रवीरोरोषादमित्रंप्रतुदन्पृषत्कैः ॥ कर्णस्यपुत्रंसमरे
प्रहृष्टंपुराजिघांसुर्मघवेवजंभं ॥ १९ ॥ ततोध्वजंस्फाटिकचित्रकंबुकंचिच्छेदवीरोनकुलःक्षुरेण ॥ कर्णात्मजस्येष्वसनंचचित्रंभल्लेनजांबूनदचित्रनद्धं ॥ २० ॥
अथान्यदादायधनुःसशीघ्रंकर्णात्मजःपांडवमभ्यविध्यत् ॥ दिव्यैरस्त्रैरभ्यवर्षच्चसोपिकर्णस्यपुत्रोनकुलंकृतास्त्रः ॥ २१ ॥ अस्त्राभिपाताच्चरुषाचराजन्स्वयाच
भासाचसमीरणाच्च ॥ जज्वालकर्णस्यसुतोतिमात्रंसमिद्धोयथाज्याहुतिभिर्हुताशः ॥ २२ ॥ कर्णस्यपुत्रोनकुलस्यराजन्सर्वानश्वानक्षिणोदुत्तमास्त्रैः ॥ वनायु
जान्वैनकुलस्यशुभ्रानुदग्रगान्हेममजालावनद्धान् ॥ २३ ॥

ततोहताश्वादवरुह्ययानादादायचर्मामलरुक्मचंद्रं ॥ आकाशसंकाशमसिंप्रगृह्यदोधूयमानःखगवच्चचार॥२४॥ ततोंतरिक्षेचरथाश्वनागंच्छिद्रत्तूर्णं नकुलश्चित्रयोधी॥ तेप्रापतन्नसिनागांविशस्तायथाश्वमेधेपशवःशमित्रा॥ २५॥ द्विसाहस्राःपातितायुद्धशौंडानानादेश्याःसुभृताःसत्यसंधाः॥ एकेनसंख्येनकुलेनकृत्ताजयेप्सुनानुत्तमचंदनांगाः॥ २६॥ तमापतंतंनकुलंसोभिपत्यसमंततःसायकैःप्रत्यविध्यत्॥ सतुद्यमानोनकुलःपृषत्कैर्विव्याधवीरंसचुकोपविद्धः॥ २७॥ महाभयेरक्ष्यमाणोमहात्माभ्रात्राभीमेनाकरोत्तत्रभीमं॥ तंकर्णपुत्रोव्यधमंतमेकंनराश्वमातंगरथाननेकान्॥ २८॥ क्रीडंतमष्टादशभिःपृषत्कैर्विव्याधवीरंनकुलंसरोपः॥ सतेनविद्धोतिभृशंतरस्वीमहाहवेवृषसेनेनराजन्॥ २९॥ क्रुद्धेनधावन्समरेजिघांसुःकर्णात्मजंपांडुसुतोन्ववीरः॥ वितत्यपक्षौसहसापतंतंश्येनंयथैवामिषलुब्धमाजौ॥ ३०॥ अवाकिरद्वृषसेनस्ततस्तंशितैःशरैर्नकुलमुदारवीर्यं॥सतान्मोघांस्तस्यकुर्वन्शरौघान्चचारमार्गान्नकुलश्चित्ररूपान्॥ ३१॥ अथास्यतूर्णंचरतोनरेंद्रखड्गंनचित्रंनकुलस्यतस्य॥ महेषुभिर्व्यधमत्कर्णपुत्रोमहाहवेचर्मसहस्रतारं॥ ३२॥ तंचायसंनिशितंतीक्ष्णधारंविकोशमुग्रंगुरुभारसाहं॥ द्विषच्छरीरांतकरंसुघोरमाधुन्वतःसर्पमिवोग्ररूपं॥ ३३॥ क्षिप्रंशरैःषड्भिरमित्रसाहश्चकर्तखड्गंनिशितैःसुवेगैः॥ पुनश्चदीप्तैर्निशितैःपृषत्कैःस्तनांतरेगाढमथाभ्यविध्यत्॥ ३४॥ कृत्वातुतद्दुष्करमार्यजुष्टमन्यैर्नरैःकर्मरणेमहात्मा॥ ययौरथंभीमसेनस्यराजन्शराभितप्तोनकुलस्त्वरावान्॥ ३५॥ सभीमसेनस्यरथंहताश्वोमाद्रीसुतःकर्णसुताभितप्तः॥ आपुप्लुवेसिंहइवाचलाग्रंसंप्रेक्ष्यमाणस्यधनंजयस्य॥ ३६॥ ततःक्रुद्धोवृषसेनोमहात्मावर्षंताविषुजालेनवीरः॥ महारथावेकरथेसमेतौशरैःप्रभिंदन्निवपांडवेयौ॥३७॥ तस्मिन्रथेनिहतेपांडवस्यक्षिप्रंचखड्गेविशिखैर्निकृत्ते॥अन्येचसंहत्यकुरुप्रवीरास्ततोन्यघ्नन्शरवर्षैरुपेत्य॥ ३८॥ तौपांडवेयौपरितःसमेतान्संहूयमानाविवहव्यवाहौ॥ भीमार्जुनौवृषसेनायक्रुद्धाववर्षतुःशरवर्षंसुघोरं॥ ३९॥ अथाब्रवीन्मारुतिःफाल्गुनंचपश्यस्वैनंनकुलंपीड्यमानं॥ अयंचनोबाधतकर्णपुत्रस्तस्माद्भवान्प्रत्युपयातुकार्ष्णिं॥४०॥ सतन्निशम्यैववचःकिरीटीरथंसमासाद्यवृकोदरस्य॥ अथाब्रवीन्नकुलोवीक्ष्यवीरमुपागतंशातयशीघ्रमेनं॥४१॥ इत्येवमुक्तःसहसाकिरीटीभ्रात्रासमक्षंनकुलेनसंख्ये॥ कपिध्वजंकेशवसंगृहीतंप्रैषीदुदग्रोवृषसेनायवाहम्॥ ४२॥ इतिश्रीमहाभारतेकर्णपर्वणिवृषसेनयुद्धेनकुलपराजयेचतुरशीतितमोऽध्यायः॥८४॥ ॥५॥ ॥५॥

नकुलमिति॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

संजयउवाच नकुलमथविदित्वाछिन्नबाणासनासिंविरथमरिशरार्तंकर्णपुत्रास्त्रभग्नं ॥ पवनधुतपताकान्हादिनोवल्गिताश्वावरपुरुषनियुक्तास्तेरथैःशी
घ्रमीयुः॥ १ ॥ द्रुपदसुतवरिष्ठाःपंचशैनेयषष्ठाद्रुपददुहितृपुत्राःपंचचामित्रसाहाः॥ द्विरदरथनराश्वान्सूदयंतस्त्वदीयान्भुजगपतिनिकाशैर्मार्गणैरात्तशस्त्राः
॥ २ ॥ अथतवरथमुख्यास्तान्प्रतीयुस्त्वरंतःकृपहृदिकसुतौचद्रौणिदुर्योधनौच ॥ शकुनिसुतवृकौचक्राथदेवावृधौचद्विरदजलदघोषैःस्यंदनैःकार्मुकैश्च ॥ ३ ॥
तवनृपरथिवीरास्तान्दशैकंचवीरान्नृवरशरवराग्रैस्ताडयंतोभ्यरुंधन् ॥ नवजलदसवर्णैर्हस्तिभिस्तानुदीयुर्गिरिशिखरनिकाशैर्भीमवेगैःकुलिंदाः ॥ ४ ॥ सुक
ल्पिताहैमवतामदोत्कटारणाभिकामैःकृतिभिःसमास्थिताः ॥ सुवर्णजालैर्विततावभुर्गजास्तथायथाखेजलदाःसविद्युतः॥ ५ ॥ कुलिंदपुत्रोदशभिर्महायसैः
कृपंससूताश्वमपीडयद्भृशं ॥ ततःशरद्वत्सुतसायकैर्हतःसहैवनागेनपपातभूतले ॥ ६ ॥ कुलिंदपुत्रावरजस्तुतोमरैर्दिवाकरांशुप्रतिमैरयस्मयैः ॥ रथंचविक्षोभ्य
ननादनर्दतस्ततोस्यगांधारपतिःशिरोऽहरत् ॥ ७ ॥ ततःकुलिंदेषुहतेषुतेष्वथप्रहृष्टरूपास्तवतेमहारथाः ॥ भृशंप्रदध्मुर्लवणांबुसंभवान्परांश्चबाणासनपाणयो
भ्ययुः ॥ ८ ॥ अथाभवद्युद्धमतीवदारुणंपुनःकुरूणांसहपांडुसृंजयैः ॥ शरासिशक्त्यृष्टिगदापरश्वधैर्नराश्वनागासुहरंभृशाकुलं ॥ ९ ॥ रथाश्वमातंगपदातिभि
स्ततःपरस्परंविप्रहताःपतन्क्षितौ ॥ यथासविद्युत्स्तनितावलाहकाःसमाहतादिग्भ्यइवोग्रमारुतैः॥ १० ॥ ततःशतानीकहतान्महागजांस्तथारथान्पत्तिगणां
श्चतानवहून्॥ जघानभोजस्तुहयानथापतन्क्षणाद्विशस्ताःकृतवर्मणःशरैः ॥ ११ ॥ अथापरेद्रौणिहतामहाद्विपास्त्रयःससर्वायुधयोधकेतनाः॥ निपेतुरुर्व्यां
व्यसवोनिपातितास्तथायथावज्रहतामहाचलाः॥ १२॥ कुलिंदराजावरजादनंतरःस्तनांतरेपत्रिवरैरताडयत् ॥ तवात्मजंतस्यतवात्मजःशरैःशितैःशरीरंव्यहनद्
द्विपंचतं ॥ १३ ॥ सनागराजःसहराजसूनुनापपातरक्तंबहुसर्वतःक्षरन् ॥ महेंद्रवज्रप्रहतोंबुदागमेयथाजलंगैरिकपर्वतस्तथा ॥ १४ ॥ कुलिंदपुत्रप्रहितोपरोद्वि
पःक्राथंससूताश्वरथंव्यपोथयत् ॥ ततोपतत्क्राथशराभिघातितःसहेश्वरोवज्रहतोयथागिरिः॥ १५॥ रथीद्विपस्थेनहतोपतच्छरैःक्राथाधिपःपर्वतजेनदुर्जयः॥
सवाजिसूतेष्वसनध्वजस्तथायथामहावातहतोमहाद्रुमः ॥ १६ ॥ वृकोद्विपस्थंगिरिराजवासिनंभृशंशरैर्द्वादशभिःपराभिनत् ॥ ततोवृकंसाश्वरथंमहाद्विपोद्रु
तंचतुर्भिश्चरणैर्व्यपोथयत् ॥ १७॥ सनागराजःसनियंतृकोपतत्तथाहतोबभ्रुसुतेषुभिर्भृशं ॥ सचापिदेवावृधसूनुरर्दितःपपातनुन्नःसहदेवसूनुना ॥ १८ ॥

॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

विषाणगात्रावरयोधपातिनागजेनहंतुंशकुनिंकुलिंदजः ॥ जगामवेगेनभृशार्दयंश्चतंततोस्यगांधारपतिःशिरोहरत् ॥ १९ ॥ ततःशतानीकहतामहागजाः
हयारथाःपत्तिगणाश्चतावकाः ॥ सुपर्णवातप्रहतायथोरगास्तथागतागांविवशाविचूर्णिताः ॥ २० ॥ ततोभ्यविध्यद्बहुभिःशितैःशरैःकलिंगपुत्रोनकुलात्मजं
स्मयन् ॥ ततोस्यकोपाद्विचकर्तनाकुलिःशिरःक्षुरेणांबुजसन्निभाननं ॥ २१ ॥ ततःशतानीकमविध्यदायसैस्त्रिभिःशरैःकर्णसुतोर्जुनंत्रिभिः ॥ त्रिभिश्चभी
मंनकुलंचसप्तभिर्जनार्दनंद्वादशभिश्चसायकैः ॥ २२ ॥ तदस्यकर्मातिमनुष्यकर्मणःसमीक्ष्यहृष्टाःकुरवोभ्यपूजयन् ॥ पराक्रमज्ञास्तुधनंजयस्यतेहुतोयम
ग्नावितितेतुमेनिरे ॥ २३ ॥ ततःकिरीटीपरवीरघातीहताश्वमालोक्यनरप्रवीरः ॥ माद्रीसुतंनकुलंलोकमध्येसमीक्ष्यकृष्णंभृशविक्षतंच ॥ २४ ॥ समभ्यधावद्वृ
षसेनमाहवेसमूतजस्यप्रमुखेस्थितस्तदा ॥ तमापतंतंनरवीरमुग्रंमहाहवेबाणसहस्रधारिणं ॥ २५ ॥ अभ्यापतत्कर्णसुतोमहारथंयथामहेंद्रंनमुचिःपुरातथा ॥
ततोद्भुतंचैकशरेणपार्थंशितेनविध्वायुधिकर्णपुत्रः ॥ २६ ॥ ननादनादंसुमहानुभावोविध्वेवशक्रंनमुचिःसवीरः ॥ पुनःसपार्थंवृषसेनउग्रैर्बाणैरविध्यद्भुजमू
लेतुसव्ये ॥ २७ ॥ तथैवकृष्णंनवभिःसमार्दयत्पुनश्चपार्थंदशभिर्जघान ॥ पूर्वंयथावृषसेनप्रयुक्तैरभ्याहतःश्वेतहयःशरैस्तैः ॥ २८ ॥ संरंभमीषद्गमितोवधाय
कर्णात्मजस्याथमनःप्रदध्रे ॥ ततःकिरीटीरणमूर्ध्निकोपात्कृत्वात्रिशाखांभ्रुकुटिंललाटे ॥ २९ ॥ मुमोचतूर्णंविशिखान्महात्मावधेधृतःकर्णसुतस्यसंख्ये ॥
आरक्तनेत्रोंतकशत्रुहंताउवाचकर्णंभृशमुत्स्मयंस्तदा ॥ ३० ॥ दुर्योधनंद्रौणिमुखांश्चसर्वानहंरणेवृषसेनंतमुग्रं ॥ संपश्यतःकर्णतवाद्यसंख्येनयामिलोकंनि
शितैःपृषत्कैः ॥ ३१ ऊनंचतावाद्विजनावदंतिसर्वैर्भवद्भिर्ममसूनुर्हतोसौ ॥ एकोरथोमद्विहीनस्तरस्वीअहंहनिष्येभवतांसमक्षं ॥ ३२ ॥ संरक्ष्यतांरथसंस्थाःसुतो
यंअहंहनिष्येवृषसेनमुग्रं ॥ पश्चाद्वधिष्येत्वामपिसंप्रमूढमहंहनिष्येर्जुनआजिमध्ये ॥ ३३ ॥ तमद्यमूलंकलहस्यसंख्येदुर्योधनापाश्रयजातदर्पं ॥ त्वामद्यहं
तास्मिरणेप्रसह्यअस्यैवहंतायुधिभीमसेनः ॥ ३४ ॥ दुर्योधनस्याधमपूरुषस्ययस्यानयादेषमहान्क्षयोभवत् ॥ सएवमुक्त्वाविनिमृज्यचापंलक्ष्यंहिकृत्वावृ
षसेनमाजौ ॥ ३५ ॥ ससर्जबाणान्विशिखान्महात्मावधायराजन्कर्णसुतस्यसंख्ये ॥ विव्याधचैनंदशभिःपृषत्कैर्मर्मस्वशंकंप्रहसन्किरीटी ॥ ३६ ॥ चिच्छेदचा
स्येष्वसनंभुजौचक्षुरैश्चतुर्भिर्निशितैःशिरश्च ॥ सपार्थबाणाभिहतःपपातरथाद्विबाहुर्विशिराधरायां ॥ ३७ ॥

सुपुष्पितोवृक्षवरोतिकायोवातेरितःशालइवाद्रिशृंगात् ॥ संप्रेक्ष्यवाणाभिहतंपतंतंरथात्सुतंसूतजःक्षिप्रकारी ॥ ३८ ॥ रथंरथेनाशुजगामरोषात्किरीटिनःपु
त्रवधाभितप्तः ॥ ततःसमक्षंस्वसुतंविलोक्यकर्णोहतंश्वेतहयेनसंख्ये ॥ संरंभमागम्यपरंमहात्माकृष्णार्जुनौसहसैवाभ्यधावत् ॥ ३९ ॥ इतिश्रीमहाभारतेक
र्णपर्वणिवृषसेनवधेपंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥१॥ संजयउवाच तमायांतमभिप्रेक्ष्यवेलोद्वृत्तमिवार्णवं ॥ गर्जंतंसुमहाकायंदुर्निवारंसु
रैरपि ॥ १ ॥ अर्जुनंप्राहदाशार्हःप्रहस्यपुरुषर्षभः ॥ अयंसरथआयातिश्वेताश्वःशल्यसारथिः ॥ २ ॥ येनतेसहयोद्धव्यंस्थिरोभवधनंजय ॥ पश्यचैनंसमायुक्तं
रथंकर्णस्यपांडव ॥ ३ ॥ श्वेतवाजिसमायुक्तंयुक्तंराधासुतेनच ॥ नानापताकाकलिलंकिंकिणीजालमालिनं ॥ ४ ॥ उह्यमानमिवाकाशेविमानंपांडुरैर्हयैः ॥
ध्वजंचपश्यकर्णस्यनागकक्षंमहात्मनः ॥ ५ ॥ आखंडलधनुःप्रख्यमुल्लिखंतमिवांबरं ॥ पश्यकर्णसमायांतंधार्तराष्ट्रप्रियैषिणं ॥ ६ ॥ शरधाराविमुंचंतंधारासा
रमिवांबुदं ॥ एषमद्रेश्वरोराजारथाग्रेपर्यवस्थितः ॥ ७ ॥ नियच्छतिहयानस्यराधेयस्यामितौजसः ॥ शृणुदुंदुभिनिर्घोषंशंखशब्दंचदारुणं ॥ ८ ॥ सिंहनादां
श्चविविधान्शृणुपांडवसर्वतः ॥ अंतर्धायमहाशब्दान्कर्णेनामिततेजसा ॥ ९ ॥ दोधूयमानस्यभृशंधनुषःशृणुनिःस्वनं ॥ एतेदीर्यंतिसगणाःपंचालानांमहा
रथाः ॥ १० ॥ दृष्ट्वाकेसरिणंक्रुद्धंमृगाइवमहावने ॥ सर्वयत्नेनकौंतेयहंतुमर्हसिसूतजं ॥ ११ ॥ नहिकर्णशरानन्यःसोढुमुत्सहतेनरः ॥ सदेवासुरगंधर्वांस्त्रीँल्लो
कान्सचराचरान् ॥ १२ ॥ त्वंहिजेतुंरणेशक्तस्तथैवविदितंमम ॥ भीममुग्रंमहात्मानंत्र्यक्षंशर्वंकपर्दिनं ॥ १३ ॥ नशक्ताद्रष्टुमीशानंकिंपुनर्योधितुंप्रभुं ॥ त्व
यासाक्षान्महादेवःसर्वभूतशिवःशिवः ॥ १४ ॥ युद्धेनाराधितःस्थाणुर्देवाश्चवरदास्तव ॥ तस्यपार्थप्रसादेनदेवदेवस्यशूलिनः ॥ १५ ॥ जहिकर्णमहाबाहोन
मुचिंवृत्रहायथा ॥ श्रेयस्तेस्तुसदापार्थयुद्धेजयमवाप्नुहि ॥ १६ ॥ अर्जुनउवाच ध्रुवएवजयःकृष्णममनात्यत्रसंशयः ॥ सर्वलोकगुरुर्यस्त्वंतुष्टोसिम
धुसूदन ॥ १७ ॥ चोदयाश्वान्हृषीकेशरथंममहारथ ॥ नाहत्वासमरेकर्णंनिवर्तिष्यतिफाल्गुनः ॥ १८ ॥ अद्यकर्णंहतंपश्यमच्छरैःशकलीकृतं ॥ मांवाद्रक्ष्यसि
गोविंदकर्णेननिहतंशरैः ॥ १९ ॥ उपस्थितमिदंघोरंयुद्धंत्रैलोक्यमोहनं ॥ यज्जनाःकथयिष्यंतियावद्भूमिर्धरिष्यति ॥ २० ॥ एवंब्रुवंस्तदापार्थःकृष्णमक्लिष्ट
कारिणं ॥ प्रत्युद्ययौरथेनाशुगजंप्रतिगजोयथा ॥ २१ ॥ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

विशःशूद्राश्चसूताश्चयेचसंकरजातयः॥सर्वशस्तेमहाराजराधेयमभजंस्तदा॥ ४८ ॥ देवास्तुपितृभिःसार्धंसगणाःसपदानुगाः॥यमोवैश्रवणश्चैववरुणश्चय
तोर्जुनः॥ ४९ ॥ ब्रह्मक्षत्रंचयज्ञाश्चदक्षिणाश्चार्जुनंश्रिताः॥ प्रेताश्चैवपिशाचाश्चक्रव्यादाश्चमृगांडजाः॥ ५० ॥ राक्षसाःसहयादोभिःश्वसृगालाश्चकर्णतः॥
देवब्रह्मनृपर्षीणांगणाःपांडवतोभवन्॥ ५१ ॥ तुंबुरुप्रमुखाराजन्गंधर्वाश्चयतोर्जुनः॥ प्राधेयाःसहमौनेयागंधर्वाप्सरसांगणाः ॥ ५२ ॥ ईहामृगाःपक्षिग
णाद्विपाश्चरथपत्तिभिः॥ उह्यमानास्तथामेघैर्वायुनाचमनीषिणः॥ ५३ ॥ दिदृक्षवःसमाजग्मुःकर्णार्जुनसमागमं ॥ देवदानवगंधर्वानागयक्षाःपतत्रिणः
॥ ५४ ॥ महर्षयोवेदविदःपितरश्चस्वधाभुजः॥ तपोविद्यास्तथौषध्योनानारूपबलान्विताः॥ ५५ ॥ अंतरिक्षेमहाराजविनदंतोवतस्थिरे ॥ ब्रह्माब्रह्मर्षिभिःसा
र्धंप्रजापतिभिरेवच॥ ५६ ॥ भवश्चैवस्थितोयानेदिव्यंतंदेशमागमत्॥ समेतौतौमहात्मानौदृष्ट्वाकर्णधनंजयौ ॥ ५७ ॥ अर्जुनोजयतांकर्णमितिशक्रोब्रवी
त्तदा॥जयतामर्जुनंकर्णइतिसूर्योभ्यभाषत॥ ५८ ॥ हत्वार्जुनंममसुतःकर्णोजयतुसंयुगे॥ हत्वाकर्णंजयत्वद्यममपुत्रोधनंजयः॥ ५९ ॥ इतिसूर्यस्यचैवासीद्वि
वादोवासवस्यच॥ पक्षसंस्थितयोस्तत्रतयोर्विबुधसिंहयोः॥ द्वैपक्ष्यमासीद्देवानामसुराणांचभारत॥ ६० ॥ समेतौतौमहात्मानौदृष्ट्वाकर्णधनंजयौ॥ अकंपंत
त्रयोलोकाःसहदेवर्षिचारणाः॥ ६१ ॥ सर्वेदेवगणाश्चैवसर्वभूतानियानिच॥ यतःपार्थस्ततोदेवायतःकर्णस्ततोसुराः ॥ ६२ ॥ रथयूथपयोःपक्षौकुरुपांडव
वीरयोः॥ दृष्ट्वाप्रजापतिंदेवाःस्वयंभुवमचोदयन्॥ ६३ ॥ कोनयोर्विजयीदेवकुरुपांडवयोधयोः॥ समोस्तुविजयोदेवएतयोर्नरसिंहयोः॥ ६४ ॥ कर्णार्जुनवि
वादेनसर्वंसंशयितंजगत्॥ स्वयंभोब्रूहिनस्तथ्यमेनयोर्विजयंप्रभो॥ ६५ ॥ स्वयंभोब्रूहितद्वाक्यंसमोस्तुविजयोनयोः॥ तदुपश्रुत्यमघवाप्रणिपत्यपितामहं॥
॥ ६६ ॥ व्यज्ञापयतदेवेशमिदंमतिमतांवरः॥ पूर्वंभगवताप्रोक्तंकृष्णयोर्विजयोध्रुवः ॥ ६७ ॥ तत्तथास्तुनमस्तेस्तुप्रसीदभगवन्मम ॥ ब्रह्मेशानावथोवाक्य
मूचतुस्त्रिदशेश्वरं॥ ६८ ॥ विजयोध्रुवमेवास्यविजयस्यमहात्मनः॥ खांडवेयेनहुतभुक्तोषितःसव्यसाचिना॥ ६९ ॥ स्वर्गंचसमनुप्राप्यसाहाय्यंशक्रतेकृतं॥
कर्णश्चदानवःपक्षअतःकार्यःपराजयः॥ ७० ॥ एवंकृतेभवेत्कार्यंदेवानामेवनिश्चितं॥ आत्मकार्यंचसर्वेषांगरीयस्त्रिदशेश्वर॥ ७१ ॥ महात्माफाल्गुनश्चापि
सत्यधर्मरतःसदा॥ विजयस्तस्यनियतंजायतेनात्रसंशयः॥ ७२ ॥ तोषितोभगवान्येनमहात्मावृषभध्वजः॥ कथंवातस्यनजयोजायतेशतलोचन॥ ७३ ॥

॥ ७४ ॥७५॥७६ दिष्टमपिदैवविहितमपि ॥ ७७ ॥ व्यवस्थानंमर्यादा ॥७८॥ ७९॥८०॥८१॥८२॥८३॥८४॥८५॥८६॥८७॥८८॥८९॥९०॥९१॥९२॥९३॥९४॥९५॥९६॥९७॥९८॥९९॥

यस्यचक्रेस्वयंविष्णुःसारथ्यंजगतःप्रभुः॥ मनस्वीबलवान्शूरःकृतास्त्रोयतपोधनः॥ ७४॥ बिभर्तिचमहातेजाधनुर्वेदमशेषतः॥ पार्थःसर्वगुणोपेतोदेवका
र्यमिदंयतः॥ ७५॥ क्लिश्यंतेपांडवानित्यंवनवासादिभिर्भृशं॥ संपन्नस्तपसाचैवपर्याप्तःपुरुषर्षभः॥ ७६॥ अतिक्रमेच्चमाहात्म्याद्दिष्टमप्यर्थपर्ययं॥ अतिक्रां
तेचलोकानामभावोनियतंभवेत्॥ ७७॥ नविद्यतेव्यवस्थानंक्रुद्धयोःकृष्णयोःक्वचित्॥ स्रष्टारौजगतश्चैवसततंपुरुषर्षभौ॥ ७८ ॥ नरनारायणावेतौपुराणा
वृषिसत्तमौ॥ अनियम्यौनियंतारावेतौतस्मात्परंतपौ॥ ७९ ॥ नैतयोस्तुसमःकश्चिद्दिविवामानुषेषुवा॥ अनुगम्यास्त्रयोलोकाःसहदेवर्षिचारणैः॥८०॥ सर्व
देवगणाश्चापिसर्वभूतानियानिच॥ अनयोस्तुप्रभावेनवर्ततेनिखिलंजगत्॥ ८१ ॥ कर्णोलोकानयंमुख्यानाप्नोतुपुरुषर्षभः॥ कर्णोवैकर्तनःशूरोविजय
स्त्वस्तुकृष्णयोः॥ ८२॥ वसूनांसमलोकत्वंमरुतांवासमाप्नुयात्॥ सहितोद्रोणभीष्माभ्यांनाकलोकमवाप्नुयात्॥ ८३ ॥इत्युक्तोदेवदेवाभ्यांसहस्राक्षोब्रवीद्व
चः॥ आमंत्र्यसर्वभूतानिब्रह्मेशानानुशासनं॥ ८४॥ श्रुतंभवद्भिर्यत्प्रोक्तंभगवद्भ्यांजगद्धितं॥ तत्तथानान्यथातद्धितिष्ठध्वंविगतज्वराः॥ ८५ ॥ इतिश्रुत्वेंद्र
वचनंसर्वभूतानिमारिष॥ विस्मितान्यभवन्राजन्पूजयांचक्रिरेतदा॥ ८६॥ व्यसृजंश्चसुगंधीनिपुष्पवर्षाणिहर्षिताः॥ नानारूपाणिविबुधादेवतूर्याण्यवा
दयन्॥ ८७॥ दिदृक्षवश्चाप्रतिमंद्वैरथंनरसिंहयोः॥ देवदानवगंधर्वाःसर्वएवावतस्थिरे॥ ८८॥ रथौतयोःश्वेतहयौदिव्यौयुक्तौमहात्मनोः॥ यौतौकर्णार्जुनौ
राजन्प्रहृष्टौव्यवतिष्ठतां॥ ८९॥ समागतालोकवीराःशंखान्दध्मुःपृथक्पृथक्॥वासुदेवार्जुनौवीरौकर्णशल्यौचभारत॥९०॥ तद्भीरुसंत्रासकरंयुद्धंसमभ
वत्तदा॥ अन्योन्यस्पर्धिनोरुग्रंशक्रशंवरयोरिव॥ ९१॥ तयोर्ध्वजौवीतमलौशुशुभातेरथेस्थितौ॥ राहुकेतूयथाकाशेउदितौजगतःक्षये॥ ९२ ॥ कर्णस्याशी
विषनिभारत्नसारमयीदृढा॥ पुरंदरधनुःप्रख्याहस्तिकक्ष्याविराजते॥ ९३॥ कपिश्रेष्ठस्तुपार्थस्यव्यादितास्यइवांतकः॥दंष्ट्राभिर्भीषयन्भाभिर्दुर्निरीक्ष्योरवि
र्यथा॥ ९४॥ युद्धाभिलाषुकोभूत्वाध्वजोगांडीवधन्वनः॥ कर्णध्वजमुपातिष्ठत्स्वस्थानाद्वेगवान्कपिः॥ ९५॥ उत्पपातमहावेगःकक्ष्यामभ्याहनत्तदा॥ नखै
श्चदशनैश्चैवगरुडःपन्नगंयथा॥ ९६॥ साकिंकिणीकाभरणाकालपाशोपमायसी॥ अभ्यद्रवत्सुसंरब्धाहस्तिकक्ष्यायनंकपिं॥ ९७॥ तयोर्घोरतरेयुद्धेद्वैरथे
द्यूतआहिते॥ प्राकुर्वतांध्वजौयुद्धंपूर्वंपूर्वतरंतदा॥ ९८॥ हयाहयानभ्यहनन्स्पर्धमानाःपरस्परं॥ अविध्यत्पुंडरीकाक्षःशल्यंनयनसायकैः॥ ९९॥

विशःशूद्राश्चसूताश्चयेचसंकरजातयः॥सर्वशस्तेमहाराजराधेयमभजंस्तदा॥४८॥देवास्तुपितृभिःसार्धसगणाःसपदानुगाः॥यमोवैश्रवणश्चैववरुणश्चय
तोर्जुनः॥ ४९ ॥ ब्रह्मक्षत्रंचयज्ञाश्चदक्षिणाश्चार्जुनंश्रिताः॥ प्रेताश्चैवपिशाचाश्चक्रव्यादाश्चमृगांडजाः॥ ५०॥ राक्षसाःसहयादोभिःश्वसृगालाश्चकर्णतः॥
देवब्रह्मनृपर्षीणांगणाःपांडवतोभवन्॥ ५१ ॥ तुंबुरुप्रमुखाराजन्गंधर्वाश्चयतोर्जुनः॥ प्राधेयाःसहमौनेयागंधर्वाप्सरसांगणाः ॥ ५२ ॥ईहामृगाःपक्षिग
णाद्विपाश्चरथपत्तिभिः॥ उह्यमानास्तथामेघैर्वायुनाचमनीषिणः॥ ५३ ॥ दिदृक्षवःसमाजग्मुःकर्णार्जुनसमागमं ॥ देवदानवगंधर्वानागयक्षाःपतत्रिणः
॥ ५४ ॥ महर्षयोवेदविदःपितरश्चस्वधाभुजः॥ तपोविद्यास्तथौषध्योनानारूपबलान्विताः॥ ५५॥ अंतरिक्षेमहाराजविनदंतोवतस्थिरे ॥ ब्रह्माब्रह्मर्षिभिःसा
र्धप्रजापतिभिरेवच॥ ५६॥ भवश्चैवस्थितोयानेदिव्यंतंदेशमागमत्॥ समेतौतौमहात्मानौदृष्ट्वाकर्णधनंजयौ ॥ ५७॥ अर्जुनोजयतांकर्णमितिशक्रोब्रवी
त्तदा॥जयतामर्जुनंकर्णइतिसूर्योभ्यभाषत॥ ५८॥ हत्वार्जुनंममसुतःकर्णोजयतुसंयुगे॥ हत्वाकर्णजयत्वद्यममपुत्रोधनंजयः॥५९॥इतिसूर्यस्यचैवासीद्वि
वादोवासवस्यच॥ पक्षसंस्थितयोस्तत्रतयोर्विबुधसिंहयोः॥ द्वैपक्ष्यमासीद्देवानामसुराणांचभारत॥ ६०॥ समेतौतौमहात्मानौदृष्ट्वाकर्णधनंजयौ॥ अकंपंत
त्रयोलोकाःसहदेवर्षिचारणाः॥ ६१ ॥ सर्वेदेवगणाश्चैवसर्वभूतानियानिच॥ यतःपार्थस्ततोदेवायतःकर्णस्ततोसुराः ॥ ६२ ॥ रथयूथपयोःपक्षौकुरुपांडव
वीरयोः॥ दृष्ट्वाप्रजापतिंदेवाःस्वयंभुवमचोदयन्॥ ६३॥ कोनयोर्विजयीदेवकुरुपांडवयोधयोः॥ समोस्तुविजयोदेवएतयोर्नरसिंहयोः॥६४॥ कर्णार्जुनवि
वादेनसर्वसंशयितंजगत्॥ स्वयंभोब्रूहिनस्तथ्यमेतयोर्विजयंप्रभो॥ ६५॥ स्वयंभोब्रूहितद्वाक्यंसमोस्तुविजयोनयोः॥ तदुपश्रुत्यमघवाप्रणिपत्यपितामहं॥
॥ ६६॥ व्यज्ञापयतदेवेशमिदंमतिमतांवरः॥ पूर्वंभगवताप्रोक्तंकृष्णयोर्विजयोध्रुवः ॥ ६७॥ तत्तथास्तुनमस्तेस्तुप्रसीदभगवन्मम ॥ ब्रह्मेशानावथोवाक्य
मूचतुस्त्रिदशेश्वरं॥ ६८॥ विजयोध्रुवमेवास्यविजयस्यमहात्मनः॥ खांडवेयेनहुतभुक्तोषितःसव्यसाचिना॥ ६९॥ स्वर्गंचसमनुप्राप्यसाहाय्यंशक्रतेकृतं॥
कर्णश्चदानवःपक्षअतःकार्यःपराजयः॥ ७०॥ एवंकृतेभवेत्कार्यंदेवानामेवनिश्चितं॥ आत्मकार्यंचसर्वेषांगरीयस्त्रिदशेश्वर॥ ७१ ॥ महात्माफाल्गुनश्चापि
सत्यधर्मरतःसदा॥ विजयस्तस्यनियतंजायतेनात्रसंशयः॥ ७२॥ तोषितोभगवान्येनमहात्मावृषभध्वजः॥ कथंवातस्यनजयोजायतेशतलोचन॥ ७३ ॥

॥ ७४ ॥७५॥७६ दिष्टमपिदैवविहितमपि ॥ ७७ ॥ व्यवस्थानंमर्यादा ॥७८॥ ७९॥८०॥८१॥८२॥८३॥८४॥८५॥८६॥८७॥८८॥८९॥९०॥९१॥९२॥९३॥९४॥९५॥९६॥९७॥९८॥९९॥

यस्यचक्रेस्वयंविष्णुःसारथ्यंजगतःप्रभुः॥ मनस्वीबलवान्शूरःकृतास्त्रोयतपोधनः॥ ७४ ॥ बिभर्तिचमहातेजाधनुर्वेदमशेषतः ॥ पार्थःसर्वगुणोपेतोदेवकार्यमिदंयतः॥ ७५॥ क्लिश्यंतेपांडवानित्यंवनवासादिभिर्भृशं॥ संपन्नस्तपसाचैवपर्याप्तःपुरुषर्षभः॥ ७६॥ अतिक्रमेच्चमाहात्म्याद्दिष्टमप्यर्थपर्ययं॥ अतिक्रांतेचलोकानामभावोनियतंभवेत्॥ ७७॥ नविद्यतेव्यवस्थानंक्रुद्धयोःकृष्णयोःक्वचित्॥ स्रष्टारौजगतश्चैवसततंपुरुषर्षभौ॥ ७८ ॥ नरनारायणावेतौपुराणावृषिसत्तमौ॥ अनियम्यौनियंतारावेतौनस्मात्परंतपौ॥ ७९ ॥ नैतयोस्तुसमःकश्चिद्दिविवामानुषेषुवा॥ अनुगम्यास्त्रयोलोकाःसहदेवर्षिचारणैः॥ ८० ॥ सर्वदेवगणाश्चापिसर्वभूतानियानिच॥ अनयोस्तुप्रभावेनवर्तंतेनिखिलंजगत् ॥ ८१ ॥ कर्णोलोकानयंमुख्यानाप्नोतुपुरुषर्षभः ॥ कर्णोवैकर्तनःशूरोविजयस्त्वस्तुकृष्णयोः॥ ८२ ॥ वसूनांसमलोकत्वंमरुतांवासमाप्नुयात्॥ सहितोद्रोणभीष्माभ्यांनाकलोकमवाप्नुयात्॥ ८३ ॥इत्युक्तोदेवदेवाभ्यांसहस्राक्षोब्रवीद्वचः॥ आमंत्र्यसर्वभूतानिब्रह्मेशानानुशासनं॥ ८४॥ श्रुतंभवद्भिर्यत्प्रोक्तंभगवद्भ्यांजगद्धितं॥ तत्तथानान्यथातद्धितिष्ठध्वंविगतज्वराः॥ ८५ ॥इतिश्रुत्वेंद्रवचनंसर्वभूतानिमारिष॥ विस्मितान्यभवन्राजन्पूजयांचक्रिरेतदा॥ ८६॥ व्यसृजंश्चसुगंधीनिपुष्पवर्षाणिहर्षिताः॥ नानारूपाणिविबुधादेवतूर्याण्यवादयन्॥ ८७॥ दिदृक्षवश्चाप्रतिमंद्वैरथंनरसिंहयोः॥ देवदानवगंधर्वाःसर्वएवावतस्थिरे॥ ८८॥ रथौतयोःश्वेतहयौदिव्यौयुक्तौमहात्मनोः॥ यौतौकर्णार्जुनौराजन्प्रहृष्टौव्यवतिष्ठतां॥ ८९॥ समागतालोकवीराःशंखान्दध्मुःपृथक्पृथक्॥वासुदेवार्जुनौवीरौकर्णशल्यौचभारत॥ ९०॥ तद्भीरुसंत्रासकरंयुद्धंसमभवत्तदा॥ अन्योन्यस्पर्धिनोरुग्रंशक्रशंबरयोरिव॥ ९१॥ तयोर्ध्वजौवीतमलौशुशुभातेरथेस्थितौ॥ राहुकेतूयथाकाशेउदितौजगतःक्षये॥ ९२ ॥ कर्णस्याशीविषनिभारत्नसारमयीदृढा॥ पुरंदरधनुःप्रख्याहस्तिकक्ष्याविराजते॥ ९३ ॥ कपिश्रेष्ठस्तुपार्थस्यव्यादितास्यइवांतकः॥दंष्ट्राभिर्भीषयन्भाभिर्दुर्निरीक्ष्योरविर्यथा॥ ९४॥ युद्धाभिलाषुकोभूत्वाध्वजोगांडीवधन्वनः॥ कर्णध्वजमुपातिष्ठत्स्वस्थानाद्भगवान्कपिः॥ ९५॥ उत्पपातमहावेगःकक्ष्यामभ्याहनत्तदा ॥ नखैश्चदशनैश्चैवगरुडःपन्नगंयथा॥ ९६॥ साकिंकिणीकाभरणाकालपाशोपमायसी॥ अभ्यद्रवत्सुसंरब्धाहस्तिकक्ष्याथतंकपिं ॥ ९७ ॥ तयोर्घोरतरेयुद्धेद्वैरथेद्यूतआहिते॥ प्राकुर्वतांध्वजौयुद्धंपूर्वंपूर्वतरंतदा॥ ९८॥ हयाहयानभ्यहृषन्स्पर्धमानाःपरस्परं॥ अविध्यत्पुंडरीकाक्षःशल्यंनयनसायकैः॥ ९९॥

॥ १००॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६॥ १७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेसप्ताशीतितमोऽध्यायः ॥८७॥

शल्यश्चपुंडरीकाक्षंतथैवाभिसमैक्षत ॥ तत्राजयद्वासुदेवःशल्यंनयनसायकैः ॥ १००॥ कर्णंचाप्यजयद्दृष्ट्वाकुंतीपुत्रोधनंजयः ॥ अथाब्रवीत्सूतपुत्रःशल्यमाभाष्यसस्मितं ॥ १०१ ॥ यदिपार्थोरणेहन्यादद्यमामिहकर्हिचित् ॥ किंकरिष्यसिसंग्रामेशल्यसत्यमथोच्यतां ॥ १०२॥ शल्यउवाच यदिकर्णरणेहन्यादद्यत्वांश्वेतवाहनः ॥ उभावेकरथेनाहंहन्यांमाधवपांडवौ ॥ ३॥ संजयउवाच एवमेवतुगोविंदमर्जुनःप्रत्यभाषत ॥ तंप्रहस्याब्रवीत्कृष्णःसत्यंपार्थमिदंवचः ॥ ४ ॥ पतेद्दिवाकरःस्थानाच्छुष्येदपिमहोदधिः ॥ शैत्यमग्निरियान्नत्वांहन्यात्कर्णोधनंजय ॥ ५॥ यदिचैतत्कथंचित्स्याल्लोकपर्यासनंभवेत् ॥ हन्यांकर्णंतथाशल्यंबाहुभ्यामेवसंयुगे ॥ ६ ॥ इतिकृष्णवचःश्रुत्वाप्रहसन्कपिकेतनः ॥ अर्जुनःप्रत्युवाचेदंकृष्णमक्लिष्टकारिणं ॥ ७ ॥ ममतावदपर्याप्तौकर्णशल्यौजनार्दन ॥ सपताकध्वजंकर्णंसशल्यंरथवाजिनं ॥ ८ ॥ सच्छत्रकवचंचैवसशक्तिशरकार्मुकं ॥ द्रष्टास्यद्यरणेकृष्णशरैश्छिन्नमनेकधा ॥ ९ ॥ अद्यैवसरथंसाश्वंसशक्तिकवचायुधं ॥ संचूर्णितमिवारण्येपादपंदंतिनायथा ॥ १० ॥ अद्यराधेयभार्याणांवैधव्यंसमुपस्थितं ॥ ध्रुवंस्वप्नेष्वनिष्टानिनाभिदृष्टानिमाधव ॥ ॥ ११ ॥ द्रष्टासिध्रुवमद्यैवविधवाःकर्णयोषितः ॥ नहिमेशाम्यतेमन्युर्यदनेनपुराकृतं ॥ १२॥ कृष्णांसभागतांदृष्ट्वामूढेनादीर्घदर्शिना ॥ अस्मांस्तथावहसताक्षिपताचपुनःपुनः ॥ १३ ॥ अद्यद्रष्टासिगोविंदकर्णमुन्मथितंमया ॥ वारणेनेवमत्तेनपुष्पितंजगतीरुहं ॥ १४ ॥ अद्यतामधुराःवाचःश्रोतासिमधुसूदन ॥ दिष्ट्याजयसिवार्ष्णेयइतिकर्णेनिपातिते ॥ १५ ॥ अद्याभिमन्युजननींप्रहृष्टःसांत्वयिष्यसि ॥ कुंतींपितृष्वसारंचप्रहृष्टःसन्जनार्दन ॥ १६ ॥ अद्यवाष्पमुखींकृष्णांसांत्वयिष्यसिमाधव ॥ वाग्भिश्चामृतकल्पाभिर्धर्मराजंचपांडवं ॥ १७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णार्जुनसमागमेद्वैरथेसप्ताशीतितमोऽध्यायः ॥८७॥

संजयउवाच तद्देवनागासुरसिद्धयक्षैर्गंधर्वरक्षोप्सरसांचसंघैः ॥ ब्रह्मर्षिराजर्षिसुपर्णजुष्टंबभौवियद्विस्मयनीयरूपं ॥ १ ॥ नानद्यमानंनिनदैर्मनोज्ञैर्वादित्रगीतस्तुतिनृत्यहासैः ॥ सर्वेंतरिक्षंददृशुर्मनुष्याःखस्थाश्चतद्विस्मयनीयरूपं ॥ २ ॥ ततःप्रहृष्टाःकुरुपांडुयोधावादित्रशंखस्वनसिंहनादैः ॥ विनादयंतोवसुधांदिशश्चस्वनेनसर्वान्द्विषतोनिजघ्नुः ॥ ३ ॥ नराश्वमातंगरथैःसमाकुलंशरासिशक्त्यृष्टिनिपातदुःसहं ॥ अभीरुजुष्टंहतदेहसंकुलंरणाजिरंलोहितमाबभौतदा ॥ ॥ ४ ॥ बभूवयुद्धंकुरुपांडवानांयथासुराणामसुरैःसहाभवत् ॥ तथाप्रवृत्तेतुमुलेसुदारुणेधनंजयस्याधिरथेश्चसायकैः ॥ ५॥ तदिति ॥ १ ॥ २ ॥ द्विषतःशत्रून् ॥ ३ ॥ ४ ॥ ५ ॥

॥ ६ ॥ एकौमुख्यौरथौरथिनौकर्णार्जुनौ एकौचतौरथौचेतिविग्रहः ॥ ७ ॥ तमोनुदौसूर्यचंद्रौनचअभिसर्तव्यंनापयातव्यमितिनियमेनप्रचोदिताःप्रेरिताः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ विसस्रुः

दिशश्चसैन्यंचशितैरजिह्मगैःपरस्परंप्रावृणुतांसुदंशितैः ॥ ततस्त्वदीयाश्चपरेचसायकैःकृतेंधकारेददृशुर्नकिंचन ॥ ६ ॥ भयातुराएकरथौसमाश्रयंस्ततोऽभव
त्त्वद्भुतमेवसर्वतः ॥ ततोस्त्रमस्त्रेणपरस्परंतौविधूयवाताविवपूर्वपश्चिमौ ॥ ७ ॥ घनांधकारेविततेतमोनुदौयथोदितौतद्वदतीवरेजतुः ॥ नचाभिसर्तव्यमितिप्र
चोदिताःपरेत्वदीयाश्चतथावतस्थिरे ॥ ८ ॥ महारथौतौपरिवार्यसर्वतःसुरासुराःशंबरवासवाविव ॥ मृदंगभेरीपणवानकस्वनैःससिंहनादैर्नदतुर्नरोत्तमौ ॥ ९ ॥
शशांकसूर्याविवमेघनिःस्वनैर्विरेजतुस्तौपुरुषर्षभौतदा ॥ महाधनुर्मंडलमध्यगावुभौसुवर्चसौबाणसहस्रदीधिनी ॥ १० ॥ दिधक्षमाणौसचराचरंजगद्युगां
तसूर्याविवदुःसहौरणे ॥ उभावजेयावहितांतकावुभावुभौजिघांसूकृतिनौपरस्परं ॥ ११ ॥ महाहवेवीतभयौसमीयतुर्महेंद्रजंभाविवकर्णपांडवौ ॥ ततोमहा
स्त्राणिमहाधनुर्धरौविमुंचमानाविषुभिर्भयानकैः ॥ १२ ॥ नराश्वनागानमितान्निजघ्नतुःपरस्परंचापिमहारथौनृप ॥ ततोविसस्रुःपुनरर्दितानराःनरोत्तमाभ्यां
कुरुपांडवाश्रयाः ॥ १३ ॥ सनागपत्त्यश्वरथादिशोदशतथायथासिंहहतावनौकसः ॥ ततस्तुदुर्योधनभोजसौबलाःकृपेणशारद्वतसूनुनासह ॥ १४ ॥ महार
थाःपंचधनंजयाच्युतौशरैःशरीरांतिकरैरताडयन् ॥ धनूंषितेषामिषुधीन्ध्वजान्हयान्रथांश्चसूतांश्चधनंजयःशरैः ॥ १५ ॥ समंप्रमथ्याशुपरान्समंततःशरो
त्तमैर्द्वादशभिश्चसूतजं ॥ अथाभ्यधावंस्त्वरिताःशतंरथाःशतंगजाश्चार्जुनमाततायिनः ॥ १६ ॥ शकास्तुषारायवनाश्चसादिनःसहैवकांबोजवरैर्जिघांसवः ॥
वरायुधान्पाणिगतैःशरैःसहक्षुरैर्न्यकृंतन्प्रपतनशिरांसिच ॥ १७ ॥ हयांश्चनागांश्चरथांश्चयुध्यतोधनंजयःशत्रुगणानलिनौक्षिणोत् ॥ ततोंतरिक्षेसुरतूर्यनिः
स्वनाःससाधुवादाहर्षितैःसमीरिताः ॥ १८ ॥ निपेतुरप्युत्तमपुष्पवृष्टयःसुगंधिगंधाःपवनेरिताःशुभाः ॥ तदद्भुतंदेवमनुष्यसाक्षिकंसमीक्ष्यभूतानिविसिस्मि
युस्तदा ॥ १९ ॥ नवात्मजःसूतसुतश्चनव्यथांनविस्मयंजग्मतुरेकनिश्चयौ ॥ अथाब्रवीद्द्रोणसुतस्तवात्मजंकरंकरेणप्रतिपीड्यसांत्वयन् ॥ २० ॥ प्रसीददुर्योध
नशाम्यपांडवैरलंविरोधेनधिगस्तुविग्रहं ॥ हतोगुरुर्ब्रह्मसमोमहास्त्रवित्तथैवभीष्मप्रमुखामहारथाः ॥ २१ ॥ अहंत्ववध्योममचापिमातुलःप्रशाधिराज्यंसह
पांडवैश्चिरं ॥ धनंजयःशाम्यतिवारितोमयाजनार्दनोनैवविरोधमिच्छति ॥ २२ ॥

विप्रद्रुताः ॥ १३ ॥ पंचैवावशिष्टाइत्याह ततइति ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥२५॥२६॥२७॥२८॥ निसर्गतइतिसहजमित्रत्वोपपादनं साम्नाप्रीत्या प्रसन्नैराज्यार्धदानेनहितंअर्जुनकोपशमनेनेतिचतुर्धापक्षोपिविद्यतः॥२९॥३०॥वचःदुर्योधनस्यहनस्यशिरःपदाता

युधिष्ठिरोभूतहितेरतःसदावृकोदरस्तद्वशगस्तथायमौ॥त्वयातुपार्थैश्चकृतेचसंविदंप्रजाःशिवंप्राप्नुयुरिच्छयातव ॥ २३ ॥ व्रजंतुशेषाःस्वपुराणिबांधवानि वृत्तयुद्धाश्चभवंतुसैनिकाः ॥ नचेद्वचःश्रोप्यसिमेनराधिपध्रुवंप्रतप्तासिहतोरिभिर्युधि॥ २४ ॥ इदंचदृष्टंजगतासहत्वयाकृतंयदेकेनकिरीटमालिना॥ यथांन कुर्याद्बलभिन्नचांतकोनचापिधाताभगवान्नयक्षराट्॥ २५ ॥ अतोपिभूयान्स्वगुणैर्धनंजयोनचातिवर्तिष्यतिमेवचोखिलं ॥ तवानुयात्रांचसदाकरिष्यति प्रसीदराजेंद्रशमंत्वमाप्नुहि॥ २६ ॥ ममापिमानःपरमःसदात्वयिब्रवीम्यतस्त्वांपरमाच्चसौहृदात्॥ निवारयिष्यामिचकर्णमप्यहंयदाभवान्सप्रणयोभविष्य ति॥ २७ ॥ वदंतिमित्रंसहजंविचक्षणास्तथैवसाम्नाचधनेनचार्जितं॥ प्रतापतश्चोपनतंचतुर्विधंतदस्तिसर्वंतवपांडवेषु॥ २८ ॥ निसर्गतस्तेतववीरबांधवाः पुनश्चसाम्नासमवाप्नुहिप्रभो॥ त्वयिप्रसन्नेयदिमित्रतांगतेहितंकुरुष्वाज्जगतस्त्वयातुलं॥ २९ ॥ सएवमुक्तःसुहृदावचोहितंविचिंत्यनिःश्वस्यचदुर्मनाब्रवी त्॥ यथाभवानाहसखेनथैवतन्ममापिविज्ञापयतोवचःशृणु॥ ३० ॥ निहत्यदुःशासनमुक्तवान्वचःप्रसह्यशार्दूलवदेषदुर्मतिः ॥ वृकोदरस्तद्धृदयेममस्थितं नतत्परोक्षंभवतःकुतःशमः॥ ३१ ॥नचापिकर्णंप्रसहेद्रणेर्जुनोमहागिरिंमेरुमिवोग्रमारुतः॥नचाश्वसिष्यंतिपृथात्मजामयिप्रसह्यवैरंबहुशोविचिंत्य॥ ३२ ॥ नचापिकर्णंगुरुपुत्रसंयुगादुपारमेत्यर्हसिवक्तुमच्युत॥ श्रमेणयुक्तोमहताद्यफाल्गुनस्तमेषकर्णःप्रसभंहनिष्यति ॥ ३३ ॥ तमेवमुक्त्वाप्यनुनीयचासकृत्तवा त्मजःस्वाननुशास्तिसैनिकान्॥ समाहिताभिद्रवताहितान्ममसबाणहस्ताःकिमुजोपमासत॥ ३४ ॥ इतिश्रीमहाभारतेकर्णपर्वणिअश्वत्थामवाक्येअष्टाशी तितमोऽध्यायः॥ ८८ ॥ ॥ ९ ॥ ॥ ९ ॥ संजयउवाच तौशंखभेरीनिनदेसमृद्धेसमीयतुःश्वेतहयौनराग्र्यौ॥ वैकर्तनःसूतपुत्रोर्जुनश्च दुर्मंत्रितेतवपुत्रस्यराजन्॥ १ ॥यथागजौहैमवतौप्रभिन्नौप्रवृद्धदंताविववासितार्थे॥तथासमाजग्मतुरुग्रवीर्यौधनंजयश्चाधिरथिश्चवीरौ॥ २ ॥बलाहकेनेवम हाबलाहकोयदृच्छयावागिरिणायथागिरिः॥ तथाधनुर्ज्यातलनेमिनिःस्वनैःसमीयतुस्ताविषुवर्षवर्षिणौ॥ ३ ॥ प्रवृद्धशृंगद्रुमवीरुदोषधीप्रवृद्धनानाविधनि र्झरौकसौ॥ यथाचलावाचलितौमहाबलौतथामहास्त्रैरितरेतरंहतः॥ ४ ॥

दयिष्यामीत्येवंरूपं ॥ ३१ ॥यथार्जुनःकर्णंनप्रसहेत्तदपिभवतःपरोक्षंनेतिपूर्वेणान्वयः॥ ३२ ॥ ३३ ॥ ३४ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेअष्टाशीतितमोऽध्यायः॥ ८८ ॥ ताविति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ केतार्थं स्थानार्थं नीडेपक्षिमणाइवदेहेबाणालीयंतइत्यर्थः ॥१५॥संघान्बाणसंघान्॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥२३

ससन्निपातस्तुतयोर्महानभूत्सुरेशवैरोचनयोर्यथापुरा ॥ शरैर्विनुन्नांगनियंतृवाहयोः सुदुःसहोन्यैः कटुशोणितोदकः ॥ ५ ॥ प्रभूतपद्मोत्पलमत्स्यकच्छपौमहाह्रदौपक्षिगणैरिवावृतौ ॥ सुसन्निकृष्टावनिलोद्धतौयथातथारथौतौध्वजिनौसमीयतुः ॥ ६ ॥ उभौमहेंद्रस्यसमानविक्रमावुभौमहेंद्रप्रतिमौमहारथौ ॥ महेंद्रवज्रप्रतिमैश्चसायकैर्महेंद्रवृत्राविवसंप्रजघ्नतुः ॥ ७॥ सनागपत्त्यश्वरथेशुभेबलेविचित्रवर्माभरणांबरायुधे ॥ चकंपतुर्विस्मयनीयरूपेवियद्गताश्चार्जुनकर्णसंयुगे ॥ ८ ॥ भुजाःसवस्त्रांगुलयःसमुच्छ्रिताःससिंहनादैर्हृषितैर्दिदृक्षुभिः॥ यदर्जुनोमत्तइवद्विपोद्विपंसमभ्ययादाधिरथिंजिघांसया॥ ९॥उदक्रोशन्सोमकास्तत्रपार्थंपुरःसराश्चार्जुनाभिधिकर्णं ॥ छिंध्यस्यमूर्धानमलंचिरेणश्रद्धांचराज्याद्धृतराष्ट्रसूनोः ॥ १० ॥ तथास्माकंबहवस्तत्रयोधाःकर्णंतथायाहियाहीत्यवोचन् ॥ जह्यर्जुनंकर्णशरैःसुतीक्ष्णैःपुनर्वनंयांतुचिरायपार्थाः॥ ११ ॥ तथाकर्णःप्रथमंतत्रपार्थंमहेषुभिर्दशभिःप्रत्यविध्यत्॥तंचार्जुनःप्रत्यविध्यच्छिताग्रैःकक्षांतरेदशभिःसंप्रहस्य ॥ १२ ॥ परस्परंतौविशिखैःसुपुंखैस्ततक्षतुःसूतपुत्रोर्जुनश्च ॥ परस्परंतौविभिदुर्विमर्देसुभीममभ्यापततुश्चहृष्टौ ॥ १३ ॥ ततोर्जुनःप्रासृजदुग्रधन्वाभुजावुभौगांडिवंचानुमृज्य ॥ नाराचनालीकवराहकर्णान्क्षुरांस्तथासांजलिकार्धचंद्रान्॥ १४॥ तेसर्वतःसमकीर्यंतराजन्पार्थेषवःकर्णरथंविशंतः ॥ अवाङ्मुखाःपक्षिगणादिनांतेविशंतिकेतार्थमिवाशुवृक्षं॥ १५॥ यानर्जुनःसभ्रुकुटीकटाक्षंकर्णायराजन्नसृजज्जितारिः ॥ तान्सायकैर्ग्रसतेसूतपुत्रःक्षिप्तान्क्षिप्तान्पांडवस्याशुसंघान्॥ १६ ॥ ततोस्त्रमाग्नेयममित्रसाधनंमुमोचकर्णायमहेंद्रसूनुः ॥ भूम्यंतरिक्षेचदिशोर्कमार्गंप्रावृत्यदेहोस्यबभूवदीप्तः ॥ १७ ॥ योधाश्चसर्वेज्वलितांबराभृशंप्रदुद्रुवुस्तत्रविदग्धवस्त्राः ॥ शब्दश्चघोरोतिबभूवतत्रयथावनेवेणुवनस्यदह्यतः ॥ १८ ॥ तद्वीक्ष्यकर्णोज्वलनास्त्रमुद्यतंसवारुणंतत्प्रशमार्थमाहवे ॥ समुत्सृजन्सूतसुतःप्रतापवान्सतेनवह्निंशमयांबभूव ॥ १९ ॥ बलाहकौघश्चदिशस्तरस्वीचकारसर्वास्तिमिरेणसंवृताः ॥ ततोधरित्रीधरतुल्यरोधसःसमंततोवैपरिवार्यवारिणा ॥ २० ॥ तैश्चातिवेगात्सतथाविधोपिनीतःशमंवह्निरतिप्रचंडः ॥ बलाहकैरेवदिगंतराणिव्याप्तानिसर्वाणियथानभश्च॥ २१॥तथाचसर्वास्तिमिरेणवैदिशोमेघैर्वृतानप्रदृश्यतकिंचित्॥अथापोवाह्याभ्रसंघान्समस्तान्वायव्यास्त्रेणापततःसकर्णात्॥ २२॥ ततोप्यसह्यंदयितंदेवराज्ञःप्रादुश्चक्रेवज्रमतिप्रभावं ॥ गांडीवंज्यांविशिखांश्चानुमंत्र्यधनंजयःशत्रुभिरप्रधृष्यः ॥ २३॥

ततःक्षुरप्रांजलिकार्धचंद्रानालीकनाराचवराहकर्णाः ॥ गांडीवतःप्रादुरासन्सुतीक्ष्णाःसहस्रशोवज्रसमानवेगाः ॥ २४ ॥ तेकर्णमासाद्यमहाप्रभावाःसुतेज
नाग्धपत्राःसुवेगाः ॥ गात्रेषुमर्वेषुहयेषुचापिशरासनेयुगचक्रेध्वजेच ॥ २५ ॥ निर्भिद्यतूर्णंविविशुःसुतीक्ष्णास्तार्क्ष्यत्रस्ताभूमिमिवोरगास्ते ॥ शराचितां
गोरुधिरार्द्रगात्रःकर्णस्तदारोषविवृत्तनेत्रः ॥ २६ ॥ दृढज्यमानाम्यसमुद्रघोषंप्रादुश्चक्रेभार्गवास्त्रंमहात्मा ॥ महेंद्रशस्त्राभिमुखान्विमुक्तांश्छित्वाकर्णःपांडव
स्येषुसंघान् ॥ २७ ॥ तस्यास्त्रमस्त्रेण निहत्यसोथजघानसंख्येरथनागपत्तीन् ॥ अमृष्यमाणश्चमहेंद्रकर्मामहारणेभार्गवास्त्रप्रतापात् ॥ २८ ॥ पंचालानांप्रवरांश्चापि
योधान्क्रोधाविष्टःसूतपुत्रस्तरस्वी ॥ बाणैर्विव्याधाहवेसुप्रमुक्तैःशिलाशितैरुक्मपुंखैःप्रसह्य ॥ २९ ॥ तत्पंचालाःसोमकाश्चापिराजन्कर्णेनार्जौपीड्यमानाः
शरौघैः ॥ क्रोधाविष्टाविव्यधुस्तंसमंतात्तीक्ष्णैर्बाणैःसूतपुत्रंसमेताः ॥ ३० ॥ तान्सूतपुत्रोनिजघानबाणैःपंचालानांरथनागाश्वसंघान् ॥ अभ्यर्दयद्बाणगणैः
प्रसह्यविध्वाहर्षात्संगरेसूतपुत्रः ॥ ३१ ॥ तेभिन्नदेहाव्यसवोनिपेतुःकर्णेषुभिर्भूमितलेस्वनंतः ॥ क्रुद्धेनसिंहेनयथेभयूथामहावनेभीमबलेनतद्वत् ॥ ३२ ॥ पंचा
लानांप्रवरान्संनिहत्यप्रसह्ययोधानखिलानदीनः ॥ ततःसराजन्विरराजकर्णोयथांबरेभास्करउग्ररश्मिः ॥ ३३ ॥ कर्णस्यमंत्वातुजयंत्वदीयाःपरांमुदंसिंह
नादांश्चचक्रुः ॥ सर्वेह्यमन्यंतभृशाहतौचकर्णेनकृष्णाविति कौरवेंद्र ॥ ३४ ॥ तत्तादृशंप्रेक्ष्यमहारथस्यकर्णस्यवीर्यंचपरैरसह्यं ॥ दृष्ट्वाचकर्णेनधनंजयस्यत
थाजिमध्येनिहतंतदस्त्रं ॥ ३५ ॥ ततस्त्वमर्षीक्रोधसंदीप्तनेत्रोवातात्मजःपाणिनापाणिमाघ्नन् ॥ भीमोब्रवीदर्जुनंसत्यसंधममर्षितोनिःश्वसन्जातमन्युः ॥
॥ ३६ ॥ कथंनुपापोयमपेतधर्मःसूतात्मजःसमरेद्यप्रसह्य ॥ पंचालानांयोधमुख्याननेकान्निजघ्निवांस्तवजिष्णोसमक्षं ॥ ३७ ॥ पूर्वंदेवैरजितंकालकेयैःसा
क्षात्स्थाणोर्बाहुसंस्पर्शमेत्य ॥ कथंनुत्वांसूतपुत्रःकिरीटिन्नथेषुभिर्दशभिःप्रागविध्यत् ॥ ३८ ॥ त्वयाक्षिप्तांश्चाग्रसद्बाणसंघानाश्चर्यमेतत्प्रतिभातिमेद्य ॥ कृ
ष्णापरिक्लेशंमनुस्मरत्वंयथाब्रवीत्षंढतिलान्स्मवाचः ॥ ३९ ॥ रूक्षाःसुतीक्ष्णाश्चहिपापबुद्धिःसूतात्मजोयंगतभीर्दुरात्मा ॥ संस्मृत्यसर्वंतदिहाद्यपापंजह्याशु
कर्णंयुधिसव्यसाचिन् ॥ ४० ॥ कस्मादुपेक्षांकुरुषेकिरीटिन्नुपेक्षितुंनायमिहाद्यकालः ॥ ययाधृत्यासर्वभूतान्यजैषीर्ग्रासंददत्खांडवेपावकाय ॥ ४१ ॥ तया
धृत्यासूतपुत्रंजहित्वमहंचैनंगदयापोथयिष्ये ॥ अथाब्रवीद्वासुदेवोपिपार्थंदृष्ट्वारथेषून्प्रतिहन्यमानान् ॥ ४२ ॥

अमीमृदत्सर्वपातेद्यकर्णोत्यस्त्रैरस्त्रंकिमिदंभोकिरीटिन्॥ सवीरकिंमुत्यसिनावधत्सेनदंत्येतेकुरवःसंप्रहृष्टाः ॥ ४३ ॥ कर्णपुरस्कृत्यविदुर्हिसर्वेतवास्त्रमस्त्रैर्वि
निपात्यमानं॥ ■याधृत्यानिहतंतामसास्त्रंयुगेयुगेराक्षसाश्चापिघोराः॥ ४४ ॥ दंभोद्भवाश्चासुराश्चाहवेषुतयाधृत्याजहिकर्णत्वमद्य ॥ अनेनचास्यक्षुरनेमि
नाद्यसंछिंधिमूर्धानमरेःप्रसह्य॥ ४५॥ मयाविसृष्टेनसुदर्शनेनवज्रेणशक्रोनमुचेरिवारेः॥ किरातरूपीभगवान्सुधृत्यात्वयामहात्मापरितोपितोभूत्॥४६॥
तांत्वंपुनर्वीरधृतिंगृहीत्वासहानुबंधंजहिसूतपुत्रं॥ ततोमहींसागरमेखलांत्वंसपत्तनांग्रामवतींसमृद्धां॥ ४७॥ प्रयच्छराज्ञेनिहतारिसंघांयशश्चपार्थातुलमा
प्नुहित्वं॥ सएवमुक्तोतिवलोमहात्माचकारबुद्धिंहिवधायसौतेः॥ ४८ ॥ सचोदितोभीमजनार्दनाभ्यांस्मृत्वातथात्मानमवेक्ष्यसर्वं ॥ इहात्मनश्चागमनेविदि
त्वाप्रयोजनंकेशवमित्युवाच॥ ४९ ॥ प्रादुष्करोम्येषमहास्त्रमुग्रंशिवायलोकस्यवधायसौतेः॥ तन्मेनुजानातुभवान्सुराश्चब्रह्माभवोवेदविदश्चसर्वे ॥५० ॥
इत्युच्यदेवंसतुसव्यसाचीनमस्कृत्वाब्रह्मणेसोमितात्मा॥ तदुत्तमंब्राह्ममसत्यमस्त्रंप्रादुश्चक्रेमनसायद्विधेयं॥५१ ॥ तदस्यहत्वाविरराजकर्णोमुक्ताशरान्मेघ
इवांबुधाराः॥ समीक्ष्यकर्णेनकिरीटिनस्तुतथाजिमध्येनिहतंतदस्त्रं॥ ५२ ॥ ततोमर्षीबलवान्क्रोधदीप्तोभीमोब्रवीदर्जुनंसत्यसंधं ॥ ननुत्वाहुर्वेदितारंमहास्त्रं
ब्राह्मंविधेयंपरमंजनास्त्वत्॥ ५३ ॥ तस्मादन्यद्योजयसव्यसाचिन्नितिस्मोक्तोयोजयत्सव्यसाची॥ ततोदिशःप्रदिशश्चापिसर्वाःसमावृणोत्सायकैर्भूरितेजाः
॥ ५४ ॥ गांडीवमुक्तैर्भुजगैरिवोग्रैर्दिवाकरांशुप्रतिमैर्ज्वलद्भिः ॥ सृष्टास्तुबाणाभरतर्षभेणशतंशतानीवसुवर्णपुंखाः ॥ ५५ ॥ प्राच्छादयन्कर्णरथंक्षणेनयु
गांतवन्ह्यर्ककरप्रकाशाः॥ततश्चशूलानिपरश्वधानिचक्राणिनाराचशश्वतानिचैव॥५६॥निश्चक्रमुर्घोरतराणियोधास्ततोत्यहन्यंतसमंततोपि॥छिन्नंशिरः
कस्यचिदाजिमध्येपपातयोधस्यपरस्यकायात्॥ ५७ ॥ भयेनसोप्याशुपपातभूमावन्यःप्रनष्टःपतितंविलोक्य ॥ अन्यस्यसासिर्निपपातकृत्तोयोधस्यबाहुः
करिहस्ततुल्यः ॥ ५८ ॥ अन्यस्यसव्यःसहवर्मणाचक्षुरप्रकृत्तःपतितोधरण्यां॥ एवंसमस्तानपियोधमुख्यान्विध्वंसयामासकिरीटमाली॥ ५९ ॥ शरैःशरीरां
तकरैःसुघोरैर्दौर्योधनंसैन्यमशेषमेवं॥ वैकर्तनेनापितथाजिमध्येसहस्रशोबाणगणाविसृष्टाः॥६०॥तेघोषिणःपांडवमभ्युपेयुःपर्जन्यमुक्ताइववारिधाराः॥
ततःसकृष्णंचकिरीटिनंचवृकोदरंचाप्रतिमप्रभावः॥ ६१ ॥

॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥

त्रिभिस्त्रिभिर्भीमबलोनिहत्यननादघोरंमहतास्वरेण ॥ सकर्णबाणाभिहतःकिरीटीभीमंतथाप्रेक्ष्यजनार्दनंच ॥ ६२ ॥ अमृष्यमाणःपुनरेवपार्थःशरान्दशाष्टौ
चसमुद्ववर्ह ॥ सकेतुमेकेनशरेणविध्वाशल्यंचतुर्भिस्त्रिभिरेवकर्णं ॥ ६३ ॥ ततःसमुक्तैर्दशभिर्जघानसभापतिंकांचनवर्मनद्धं ॥ सराजपुत्रोविशिराविबाहुर्वि
वाजिसूतोविधनुर्विकेतुः ॥ ६४ ॥ हतोरथाग्रादपतत्सरुग्णःपरश्वधैःशालइवावकृत्तः ॥ पुनश्चकर्णंत्रिभिरष्टभिश्चद्वाभ्यांचतुर्भिर्दशभिश्चविध्वा ॥ ६५ ॥ चतुः
शतान्द्विरदान्सायुधान्वैहत्वारथानष्टशतान्जघान ॥ सहस्रशोश्वांश्चपुनःससादीनष्टौसहस्राणिचपत्तिवीरान् ॥ ६६ ॥ कर्णंससूतंसरथंसकेतुमदृश्यमंजोगति
भिःप्रचक्रे ॥ अथाक्रोशन्कुरवोवध्यमानाधनंजयेनाधिरथिंसमंतात् ॥ ६७ ॥ मुंचाभिविध्यार्जुनमाशुकर्णबाणैःपुराहंतिकुरून्समग्रान् ॥ सचोदितःसर्वयत्ने
नकर्णोमुमोचबाणान्सुबहूनभीक्ष्णं ॥ ६८ ॥ तेपांडुपांचालगणान्निजघ्नुर्मर्मच्छिदःशोणितपांसुदिग्धाः ॥ तावुत्तमौसर्वधनुर्धराणांमहाबलौसर्वसपत्नसाहौ
॥ ६९ ॥ निजघ्नतुश्चाहितसैन्यमुग्रमन्योन्यमप्यस्त्रविदौमहास्त्रैः ॥ अथोपयातस्त्वरितोदिदृक्षुर्मंत्रौपधीभिर्निरुजोविशल्यः ॥ ७० ॥ कृतःसुहृद्भिर्भिपजांवरिष्ठै
र्युधिष्ठिरस्तत्रसुवर्णवर्मा ॥ तथापयातंयुधिधर्मराजंदृष्ट्वामुदासर्वभूतान्यनंदन् ॥ ७१ ॥ राहोर्विमुक्तंविमलंसमग्रंचंद्रंयथैवाभ्युदितंतथैव ॥ दृष्ट्वातुमुख्यावथ
युध्यमानौदिदृक्षवःशूरवरावरिघ्नौ ॥ ७२ ॥ कर्णंचपार्थंचविलोकयंतःस्वस्थामहीस्थाश्चजनावतस्थुः ॥ सकार्मुकज्यातलसंनिपातःसुमुक्तबाणस्तुमुलोबभूव
॥ ७३ ॥ घ्नतोस्तथान्योन्यमिषुप्रवेकैर्धनंजयस्याधिरथेश्चतत्र ॥ ततोधनुर्ज्यासहसातिकृष्टासुघोपमच्छिद्यतपांडवस्य ॥ ७४ ॥ तस्मिन्क्षणेपांडवंसूतपुत्रःस
माचिनोत्क्षुद्रकाणांशतेन ॥ निर्मुक्तसर्पप्रतिमैरभीक्ष्णंतैलप्रधौतैःखगपत्रवाजैः ॥ ७५ ॥ पष्ट्याविभेदाशुचवासुदेवमनंतरंफाल्गुनमष्टभिश्च ॥ पूषात्मजो
मर्मसुनिर्बिभेदमरुत्सुतंचायुतशःशराग्र्यैः ॥ ७६ ॥ कृष्णंचपार्थंचतथाध्वजंचपार्थानुजान्सोमकान्पातयंश्च ॥ प्राच्छादयंस्तेविशिखैःपृपत्कैर्जीमूतसंघान
भसीवसूर्यं ॥ ७७ ॥ आगच्छतस्तान्विशिखैरनेकैर्व्यष्टंभयत्सूतपुत्रःकृतास्त्रः ॥ तैरस्तमस्त्रंविनिहत्यसर्वंजघानतेषांरथवाजिनागान् ॥ ७८ ॥ तथातुसैन्यप्रवरां
श्चराजन्नभ्यर्दयन्मार्गणैःसूतपुत्रः ॥ तेभिन्नदेहाव्यसवोनिपेतुःकर्णेषुभिर्भूमितलेस्वनंतः ॥ ७९ ॥ सिंहेनकुद्धेनयथाश्वयूथ्यामहाबलाभीमबलेनतद्वत् ॥ पुन
श्चपांचालवरास्तथान्येतदंतरेकर्णधनंजयाभ्यां ॥ ८० ॥

॥८१॥८२॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ स्नात्वेत्यनेनपातालगंगायास्तलंप्राप्यतदभिघातेनपरावृत्ताइत्यर्थः ॥ ८९ ॥ तक्षकपुत्रपक्षाइतितेसर्पबाणाःअश्वसेनप्रयुक्ताः ॥ ९० ॥ ९१॥

प्रस्कंदंतोवलिनासाधुमुक्ताःकर्णेनबाणैर्निहताःप्रसह्य॥ जयंमत्वाविपुलंवैत्वदीयास्तलान्निजघ्नुःसिंहनादांश्चनेदुः॥ ८१ ॥ सर्वेत्वमन्यंतवशेकृतौतौकर्णेन कृष्णाविति तेविमर्दे॥ ततोधनुर्ज्यामवनाम्यशीघ्रंशरानस्तानाधिरथेर्विधम्य ॥ ८२ ॥ सुसंरब्धःकर्णशरक्षतांगोरणेपार्थःकौरवान्प्रत्यगृह्णात् ॥ ज्यांचानुमृ ज्याभ्यहनत्तलत्रेबाणांधकारंसहसाचचक्रे॥ ८३॥ कर्णंचशल्यंचकुरूंश्चसर्वान्बाणैर्विध्यत्प्रसभंकिरीटी॥ नपक्षिणःसंपतंत्यंतरिक्षेतदामहास्त्रेणकृतेंधकारे ॥८४॥ वायुर्वियत्स्थैरीरितोभूतसंघैरुवाहदिव्यःसुरभिस्तदानीं ॥ शल्यंचपार्थोदशभिःपृषत्कैर्भृशंतनुत्रेप्रहसन्नविध्यत् ॥ ८५ ॥ ततःकर्णंद्वादशभिःसुमु क्तैर्विध्वापुनःसप्तभिरभ्यविध्यत्॥ सपार्थबाणासनवेगमुक्तैर्दृढाहतःपत्रिभिरुग्रवेगैः॥ ८६ ॥ विभिन्नगात्रःक्षतजोक्षितांगःकर्णोबभौरुद्रइवाततेषुः ॥ प्र क्रीडमानोथश्मशानमध्येरौद्रेमुहूर्तेरुधिरार्द्रगात्रः॥ ८७॥ ततस्त्रिभिस्तंत्रिदशाधिपोपमंशरैर्बिभेदाधिरथिर्धनंजयं ॥ शरांश्चपंचज्वलितानिवोरगान्प्रवेश यामासजिघांसयाऽच्युतं॥८८॥ तेवर्मभित्वापुरुषोत्तमस्यसुवर्णचित्रान्यपतन्सुमुक्ताः॥ वेगेनगामाविविशुःसुवेगाःस्नात्वाचकर्णाभिमुखाःप्रतीयुः॥ ८९॥ तान्पंचभल्लैर्दशभिःसुमुक्तैस्त्रिधात्रिधैकैकमथोचकर्त॥ धनंजयास्तेन्यपतन्पृथिव्यांमहाहयस्तक्षकपुत्रपक्षाः॥ ९० ॥ ततःप्रजज्वालकिरीटमालीक्रोधेनक क्षंप्रदहन्निवाग्निः॥ तथाविनुन्नांगमवेक्ष्यकृष्णंसर्पैःपृषत्कैःकर्णभुजप्रसृष्टैः॥ ९१ ॥ सकर्णमाकर्णविकृष्टसृष्टैःशरैःशरीरांतकरैर्ज्वलद्भिः ॥ मर्मस्वविध्यत्सच चालदुःखाद्धैर्याद्वातिष्ठतधैर्यबुद्धिः॥ ९२ ॥ ततःशरौघैःप्रदिशोदिशश्चरवेःप्रभाकर्णरथश्चराजन्॥ अदृश्यमासीत्कुपितेधनंजयेतुषारनीहारवृतंयथानभः॥ ॥ ९३ ॥ सचक्ररक्षानथपादरक्षान्पुरःसरान्पृष्ठगोपांश्चसर्वान्॥ दुर्योधनेनानुमतानरिघ्नःसमुच्चितान्सरथान्सारभूतान्॥ ९४॥ द्विसाहस्रान्समरेसव्यसाची कुरुप्रवीरानृषभःकुरूणां॥ क्षणेनसर्वान्सरथाश्वसूतान्निनायराजन्क्षयमेकवीरः॥ ९५॥ ततोऽपलायंतविहायकर्णंतवात्मजाःकुरवोयेऽवशिष्टाः॥ हतानपा कीर्यशरक्षतांश्चलालप्यमानांस्तनयान्पितॄंश्च ॥ ९६ ॥ ससर्वतःप्रेक्ष्यदिशोविशून्याभयावदीर्णैःकुरुभिर्विहीनः ॥ नविव्यथेभारततत्रकर्णःप्रहृष्टएवार्जुन मभ्यधावत्॥ ९७॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णार्जुनद्वैरथेऊननवतितमोऽध्यायः॥८९॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेऊननवतितमोऽध्यायः ॥ ८९ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

तत इति॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ बाणजालैकमयं दृष्ट्वेति शेषः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

संजयउवाच ततःप्रयाताःशरपातमात्रमवस्थिताःकुरवोभिन्नसेनाः॥विद्युत्प्रकाशंददृशुःसमंताद्धनंजयास्त्रंसमुदीर्यमाणं॥ १ ॥तदर्जुनास्त्रंग्रसतिस्मकर्णोवियद्गतंघोरतरैःशरैस्तत्॥क्रुद्धेनपार्थेनभृशाभिसृष्टंवधायकर्णस्यमहाविमर्दे॥ २ ॥उदीर्यमाणंस्मकुरून्दहंतंसुवर्णपुंखैर्विशिखैर्ममर्द॥ कर्णस्त्वमोघेष्वसनंदृढज्यंविस्फारयित्वाविसृजञ्छरौघान्॥ ३ ॥ रामादुपात्तेनमहामहिम्नाह्याथर्वणेनारिविनाशनेन॥तदर्जुनास्त्रंव्यधमद्दहंतंकर्णस्तुबाणैर्निशितैर्महात्मा॥ ॥ ४ ॥ ततोविमर्दःसुमहान्बभूवतत्रार्जुनस्याधिरथेश्चराजन्॥ अन्योन्यमासादयतोःपृषत्कैर्विषाणघातैर्द्विपयोरिवोग्रैः ॥ ५ ॥ तत्रास्त्रसंघातसमावृतंतदाबभूवराजंस्तुमुलंस्मसर्वतः॥ तत्कर्णपार्थौशरवृष्टिसंघैर्निरंतरंचक्रतुरंबरंतदा ॥ ६ ॥ ततोजालंबाणमयंमहांतंसर्वेऽद्राक्षुःकुरवःसोमकाश्च ॥ नान्यंस्मभूतंददृशुस्तदानेबाणांधकारेतुमुलेथकिंचित् ॥ ७ ॥ तौसंदधानावनिशंचराजन्समस्यंतौचापिशराननेकान् ॥ संदर्शयेतांयुधिमार्गान्विचित्रान्धनुर्धरौतौविविधैःकृतास्त्रैः ॥ ८ ॥ तयोरेवंयुध्यतोराजिमध्येसूतात्मजोभूदधिकःकदाचित् ॥ पार्थःकदाचित्त्वधिकःकिरीटीवीर्यास्त्रमायाबलपौरुषेण ॥ ९ ॥ दृष्ट्वातयोस्तंयुधिसंप्रहारंपरस्परस्यांतरमीक्षमाणयोः ॥ घोरंतयोर्दुर्विषहंरणेऽन्यैर्योधाःसर्वेविस्मयमभ्यगच्छन् ॥ १० ॥ ततोभूतान्यंतरिक्षस्थितानितौकर्णपार्थौप्रशशंसुर्नरेंद्र ॥ भोःकर्णसाध्वर्जुनसाधुचेतिवियत्सुवाणीश्रूयतेसर्वतोपि ॥ ११ ॥ तस्मिन्विमर्देरथवाजिनागैस्तदाभिघातैर्दलितेहिभूतले ॥ ततस्तुपातालतलेशयानोनागोऽश्वसेनःकृतवैरोर्जुनेन ॥ १२ ॥ राजंस्तदाखांडवदाहमुक्तोविवेशकोपाद्वसुधातलंयः ॥ अथोत्पपातोर्ध्वगतिर्जवेनसंदृश्यकर्णार्जुनयोर्विमर्दं ॥ १३ ॥ अयंहिकालोस्यदुरात्मनोवैपार्थस्यवैरप्रतियाननाय ॥ संचिंत्यतूर्णंप्रविवेशचैवकर्णस्यराजन्शररूपधारी ॥ १४ ॥ ततोस्त्रसंघातसमाकुलंतदाबभूवजन्यंविततांशुजालं ॥ तत्कर्णपार्थौशरसंघवृष्टिभिर्निरंतरंचक्रतुरंबरंतदा ॥ १५ ॥ तद्बाणजालैकमयंमहांतंसर्वेत्रसन्कुरवःसोमकाश्च ॥ नान्यत्किंचिद्ददृशुःसंपतद्वैबाणांधकारेतुमुलेतिमात्रं ॥ १६ ॥ ततस्तौपुरुषव्याघ्रौसर्वलोकधनुर्धरौ ॥ त्यक्तप्राणौरणेवीरौयुद्धश्रममुपागतौ ॥ समुत्क्षेपैर्वीक्षमाणौसिक्तौचंदनवारिणा ॥ १७ ॥ सवालव्यजनैर्दिव्यैर्दिविस्थैरप्सरोगणैः ॥ शक्रसूर्यकराब्जाभ्यांप्रमार्जितमुखावुभौ ॥ १८ ॥ कर्णोथपार्थंनविशेषयद्यदाभृशंचपार्थेनशराभितप्तः ॥ ततस्तुवीरःशरविक्षतांगोदध्रेमनोह्येकशयस्यतस्य ॥ १९ ॥ ततोरिपुघ्नंसमधत्तकर्णःसुसंचितंसर्पमुखंज्वलंतं ॥ रौद्रंशरंसन्नतमुग्रधौतंपार्थार्थमत्यर्थचिराभिगुप्तं ॥ २० ॥

॥ २१ ॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥अथेति मूर्ध्नःसकाशात् व्यालास्त्रस्यसर्गश्रेष्ठेनमयतनश्चमन्युश्चतैःप्रयुक्तेनशरेणोत्तमगात्रभूषणमुत्तमांगभूषणंप्रजहारेतिद्वयोःसंबंधः॥ ३२ ॥

सदार्चितंचंदनचूर्णशायिनंसुवर्णतूणीशयंमहाविषं॥ आकर्णपूर्णंचविकृष्यकर्णःपार्थोन्मुखःसंदधेचोत्तमौजाः॥ २१ ॥ प्रदीप्तमैरावतवंशसंभवंशिरोजि
हीर्षुर्युधिसव्यसाचिनः॥ ततःप्रजज्वालदिशोनभश्चउल्काश्चघोराःशतशःप्रपेतुः ॥ २२ ॥ तस्मिंस्तुनागेधनुषिप्रयुक्तेहाहाकृतालोकपालाःसशक्राः ॥ नचा
पितंबुबुधेसूतपुत्रोबाणेप्रविष्टंयोगबलेननागं॥ २३ ॥ दशशततनयनोहिदृष्ट्वाबाणेप्रविष्टंनिहतइतिसुतोमेस्रस्तगात्रोबभूव ॥ जलजकुसुमयोनिःश्रेष्ठभावो
जितात्मात्रिदशपतिमवोचन्माव्यथिष्ठाजयश्रीः॥ २४॥ ततोब्रवीन्मद्रराजोमहात्माद्दृष्ट्वाकर्णंप्रहितंपुंनमुग्रं॥ नकर्णग्रीवामिषुरेषलप्स्यतेसमीक्ष्यसंधत्स्वश
रंशिरोघ्नं॥ २५॥ अथाब्रवीत्क्रोधसंरक्तनेत्रोमद्राधिपंसूतपुत्रस्तरस्वी॥ नसंधत्तेद्विःशरंशल्यकर्णोनमादृशाजिह्मयुद्धाभवंति॥ २६ ॥ इतीदमुक्त्वाविससर्ज
तंशरंप्रयत्नतोवर्षगणाभिपूजितं॥ हतोसिवैफाल्गुनइत्यधिक्षिपन्नुवाचचोच्चैर्गिरमूर्जितांदृषः॥ २७॥ससायकःकर्णभुजप्रसृष्टोहुताशनार्कप्रतिमःसुघोरः॥
गुणच्युतःकर्णधनुःप्रमुक्तोवियद्गतःप्राज्वलदंतरिक्षे॥ २८ ॥ तंप्रेक्ष्यदीप्तंयुधिमाधवस्तुत्वरान्वितंसत्वरयैवलीलया ॥ पदाविनिष्पिष्यरथोत्तमंसप्रावेशयत्पृ
थिवींकिंचिदेव॥ २९॥ क्षितिंगताजानुभिस्तेऽथवाहाहेमच्छन्नाश्चंद्रमरीचिवर्णाः॥ ततोंतरिक्षेसुमहान्निनादःसंपूजनार्थंमधुसूदनस्य ॥ ३० ॥ दिव्याश्चवा
चःसहसाप्रसूतादिव्यानिपुष्पाण्यथसिंहनादाः॥ तस्मिंस्तथावैधरणींनिमग्नेरथेप्रयत्नान्मधुसूदनस्य॥ ३१ ॥ ततःशरःसोभ्यहनत्किरीटंतस्येंद्रदत्तंसुदृढंचधी
मतः॥ अथार्जुनस्योत्तमगात्रभूषणंधरावियद्द्योसलिलेषुविश्रुतं॥ ३२॥ व्यालास्त्रसर्गोत्तमयत्नमन्युभिःशरेणमूर्ध्नःप्रजहारसूतजः॥ दिवाकरेंदुज्वलनप्रभ
त्विषंसुवर्णमुक्तामणिवज्रभूषितं॥ ३३ ॥ पुरंदरार्थंतपसाप्रयत्नतःस्वयंकृतंयद्विभुनास्वयंभुवा ॥ महार्हरूपंद्विषतांभयंकरंबिभर्तुरत्यर्थसुखंसुगंधिनं ॥ ३४ ॥
जिघांसतेदेवरिपून्सुरेश्वरःस्वयंददौयत्सुमनाःकिरीटिने॥ हरांबुपाखंडलवित्तगोप्तृभिःपिनाकपाशाशनिसायकोत्तमैः॥ ३५ ॥ सुरोत्तमैरप्यविषह्यमर्दितुं
प्रसह्यनागेनजहारयद्दृषः॥ सदुष्प्रभावोवितथप्रतिज्ञःकिरीटमत्यद्भुतमर्जुनस्य॥ ३६॥ नागोमहार्हंतपनीयचित्रंपार्थोत्तमांगात्प्रहरत्तरस्वी ॥ सद्धेमजालाव
ततंसुघोषंजाज्वल्यमानंनिपपातभूमौ॥३७॥तदुत्तमंपृस्मथितंविषाग्निनाप्रदीप्तमर्चिष्मदथोक्षितौप्रियं॥पपातपार्थस्यकिरीटमुत्तमंदिवाकरोस्तादिवरक्तमं
डलः॥३८॥सवैकिरीटंबहुरत्नभूषितंजहारनागोर्जुनमूर्धतोबलात्॥गिरेःसुजातांकुरपुष्पितद्रुमंमहेंद्रवज्रःशिखरोत्तमंयथा॥३९॥३३॥३४॥३५॥३६॥३७॥३८॥३९

॥ ४० ॥ ४१ ॥ गोकर्णामुकुटंजहारेत्यन्वयः अर्जुनस्यमुकुटहरणमतिमहत्कर्मेतिसूचयन्मुकुटंविशिनष्टि गविचक्षुषिकर्णौयस्याःसागोकर्णाचक्षुःश्रवाःसर्पिणीअर्जुनेनखांडवेनिहतासतीइहनिमित्तभूता
तस्यमुकुटमेवजहारेत्युत्तरत्रानुषंगः कथंहतायाहननेनिमित्तत्वमतआह सुमुखीकृतेनइषुणागोपुत्रसंप्रेषिता संधिरविवक्षितत्वान्नभवति शोभनंपुत्रजीवनकरंमुखंयस्याःसासुमुखी साहिपुत्रंनिगीर्यवह्नि
मानात्खांडवादुत्पतंतीशिरोदेशेअर्जुनेनच्छिन्नासतीस्वयंमृतापुत्रंचरक्षितवतीत्यादिपर्वण्युपाख्यायते कृतेनस्वयंनिर्मितेनपुत्रेणचानेनइषुणाइषुत्वावंगतेन आत्मैवपुत्रनामासीतिश्रुतेरिष्वाकारपुत्ररूपेणसंप्र
न्नासती गोमतोरश्मिमतोऽर्कस्यपुत्रेणकर्णेनप्रेषिताइषुणेत्यर्थंवातृतीयागोपुत्रेतिमतुब्लोपआर्षः किंकृत्वामुकुटंजहारेत्यतआह सुव्यक्तगोऽसुप्रभं गोगतकंदृष्ट्वा सुव्यक्ताःअतिशयेनाविर्भूताःगावोरश्मय
स्तेजइतियावत् सुव्यक्तैर्गोभिरसुभिश्चप्रकर्षेणभासमानंनिरतिशयतेजोबलमर्जुनं गोगतकंगोशब्देनहयरश्मीनांप्रदेशोलक्ष्यते तत्रगतंविद्यमानंकंशिरोयस्यतं अर्जुनस्यग्रीवादेशंकर्णेनलक्षीकृतंविज्ञायग

महीवियद्द्यौःसलिलंचवायुनाप्रसह्यसर्वंविनिघूर्णितंयथा॥ अतीवशब्दोभुवनेष्ववर्तततदाजनाध्यवस्यन्व्यथिताश्चसस्खलुः॥४०॥ विनाकिरीटंशुशुभेसपा
र्थःश्यामोयुवानीलइवोच्चशृंगः॥ ततःसमुद्ग्रथ्यसितेनवाससास्वमूर्धजानव्यथितस्तदार्जुनः॥विभासितःसूर्यमरीचिनादृढंशिरोगतेनोदयपर्वतोयथा॥४१॥
गोकर्णासुमुखीकृतेनइषुणागोपुत्रसंप्रेषितागोशब्दात्मजभूषणंसुविहितंसुव्यक्तगोऽसुप्रभं॥ दृष्ट्वागोगतकंजहारमुकुटंगोशब्दगोपूरिवैगोकर्णासनमर्दन
श्चनययावप्राप्यमृत्योर्वशं॥ ४२ ॥ सस्मायकःकर्णभुजप्रसृष्टोहुताशनार्कप्रतिमोमहार्हः॥ महोरगःकृतवैरोर्जुनेनकिरीटमाहत्यततोव्यतीयात्॥ ४३ ॥ तं
चापिदग्ध्वातपनीयचित्रंकिरीटमाकृष्यतदर्जुनस्य॥ इयेषगंतुंपुनरेवतूर्णंदृष्टश्चकर्णेनततोब्रवीत्तं॥ ४४ ॥

गवनाम्नाऽरेणअश्वैर्जानुभ्यामवनींगमितेपूर्वरश्मिभिःसमस्तप्रदेशेअर्जुनस्यशिरोदृष्ट्वापिवेगातिशयात्स्वयंनीचीभवितुमशक्तामनीतिदेशस्थंमुकुटंजहारेत्यर्थः गोशब्दात्मजभूषणंसुविहितमिति गौःपृथिवीत
याशब्द्यतेगोशब्दाअदितिः उर्वीवाअदितिरितिपृथिव्याअदितेर्निर्देशात् तस्याआत्मजस्येंद्रस्यभूषणंसुविहितंवेधसेतिशेषः तथाचाग्रेवोक्तंपुरंदरार्थंतपसाप्रयत्नतःस्वयंकृतंयद्विधिनास्वयंभुवेति कीदृशंमुकुटं
वेनिश्चितंप्रसिद्धंवा गोशब्दगोपूरिति गोभिःरश्मिभिःशब्द्यतेरश्मिमानितिकथ्यतइतिसूर्यःतस्येवभुवनगर्भव्यापिनोगावःकिरणास्तैर्भुवनंपूरयितुंशीलमस्यतत्तथा सूर्यसमप्रभमित्यर्थः ननुचेतनाधिष्ठितोबाणःपु
नरत्यार्जुनंकुतोनहतवानित्यतआह गोकर्णासनमर्दनश्चनययावप्राप्यमृत्योर्वशमिति गोकर्णासर्पपुनरर्जुनंहंतुंइच्छंतंअसनेनबाणक्षेपेणमर्दयतियःसतथाभूतोऽर्जुनश्चतमेवसर्पमनवाप्यमृत्योर्वशंनययौ सर्पस्य
पुनरागमनंवधश्चाग्रेवक्ष्यते गौर्नादित्येबलीवर्देक्रतुभेदर्षिभेदयोः स्त्रीतुस्यादिशिभारत्यांभूमौचसुरभावपि नृस्त्रियोःस्वर्गवज्रांबुरश्मिदृग्बाणलोमसु इतिकोशः ॥ ४२ ॥ ४३ ४४॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ कर्णेनवाक्यंउक्तःसंस्तद्वाक्यमसहन्असहमानःस्वयंप्रायादित्युत्तरेणान्वयः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ महोल्कामितिपाठेइवेत्यध्याहृत्ययोज्यं ॥ ५३ ॥ ५४ ॥

मुक्तस्त्वयाहंत्वसमीक्ष्यकर्णशिरोहृतंयन्नमयार्जुनस्य ॥ समीक्ष्यमांमुंचरणेत्वमाशुहंतास्मिशत्रुंतवचात्मनश्च ॥ ४५ ॥ सएवमुक्तोयुधिसूतपुत्रस्तमब्रवीत्को भवानुग्ररूपः ॥ नागोब्रवीद्विद्धिकृतागसंमांपार्थेनमातुर्वधजातवैरं ॥ ४६ ॥ यदिस्वयंवज्रधरोस्यगोप्तातथापियातापितृराजवेश्मनि ॥ कर्णउवाच न नागकर्णोद्यरणेपरस्यबलंसमास्थायजयंबुभूषेत् ॥ ४७ ॥ नसंदध्यांद्विःशरंचैवनागयद्यर्जुनानांशतमेवहन्यां ॥ तमाहकर्णःपुनरेवनागंतदाजिमध्येरविसूनुसत्तमः ॥ ४८ ॥ व्यालास्त्रसर्गोत्तमयत्नमन्युभिर्हंतास्मिपार्थंसुसुखीव्रजत्वं ॥ इत्येवमुक्तोयुधिनागराजःकर्णेनरोषादसहंस्तस्यवाक्यं ॥ ४९ ॥ स्वयंप्रायात्पार्थवधायराजन्कृत्वास्वरूपंविजिघांसुरुग्रः ॥ ततःकृष्णःपार्थमुवाचसंख्येमहोरगंकृतवैरंजहित्वं ॥ ५० ॥ सएवमुक्तोमधुसूदनेनगांडीवधन्वारिपुवीर्यसाहः ॥ उवाचकोह्येषममाद्यनागःस्वयंयआयाद्गरुडस्यवक्रं ॥ ५१ ॥ कृष्णउवाच योसौत्वयाखांडवेचित्रभानुंसंतर्पयाणेनधनुर्धरेण ॥ वियद्गतोजननीगुप्तदेहोमत्वैकरूपंनिहतास्यमाता ॥ ५२ ॥ सएपतद्वैरमनुस्मरन्वैत्वांप्रार्थयत्यात्मवधायनूनं ॥ नभश्च्युतांप्रज्वलितामिवोल्कांपश्यैनमायांतममित्रसाह ॥ ५३ ॥ संजयउवाच ततःसजिष्णुःपरिवृत्यरोपाच्चिच्छेदपड्भिर्निशितैःसुधारैः ॥ नागंवियत्तिर्यगिवोत्पतंतंसच्छिन्नगात्रोनिपपातभूमौ ॥ ५४ ॥ गतेचतस्मिन्भुजगेकिरीटिनास्वयंविभुःपार्थिवभूतलादथ ॥ समुज्जहाराशुपुनःपतंतंरथंभुजाभ्यांपुरुषोत्तमस्ततः ॥ ५५ ॥ तस्मिन्मुहूर्तेदशभिःपृषत्कैःशिलाशितैर्बर्हिणबर्हवाजितैः ॥ विव्याधकर्णःपुरुषप्रवीरोधनंजयंतिर्यगवेक्षमाणः ॥ ५६ ॥ ततोर्जुनोद्वादशभिःसुमुक्तैर्वराहकर्णैर्निशितैःसमर्प्य ॥ नाराचमाशीविषतुल्यवेगमाकर्णपूर्णायतमुत्ससर्ज ॥ ५७ ॥ सचित्रवर्मेषुवरोविदार्यप्राणान्निरस्यन्निवसाधुमुक्तः ॥ कर्णस्यपीत्वारुधिरंविवेशवसुंधरांशोणितदिग्धवाजः ॥ ५८ ॥ ततोवृषोबाणनिपातकोपितोमहोरगोदंडविघट्टितोयथा ॥ तदाशुकारीव्यसृजच्छरोत्तमान्महाविषःसर्पइवोत्तमंविषं ॥ ५९ ॥ जनार्दनंद्वादशभिःपराभिनन्नवैर्नवत्याचशरैस्तथार्जुनं ॥ शरेणघोरेणपुनश्चपांडवंविदार्यकर्णोव्यनदज्जहासच ॥ ६० ॥ तमस्यहर्षममृष्यपांडवोबिभेदमर्माणिततोस्यमर्मवित् ॥ परःशतैःपत्रिभिरिंद्रविक्रमस्तथायथेंद्रोबलमोजसारणे ॥ ६१ ॥ ततःशराणांनवतिंतदार्जुनःससर्जकर्णेंऽतकदंडसंनिभां ॥ तैःपत्रिभिर्विद्धतनुःसविव्यथेतथायथावज्रविदारितोचलः ॥ ६२ ॥

गतेगमिते विभुःसमर्थः ॥ ५५ ॥ बर्हिणांबर्हाएववाजाःपक्षाःसंजातायेषां तैर्बर्हिणबर्हवाजितैः ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

मणिप्रवेकोत्तमवज्रहाटकैरलंकृतंचास्यवरांगभूषणं ॥ प्रविद्धमुर्व्यांनिपपातपत्रिभिर्धनंजयेनोत्तमकुंडलेपिच ॥ ६३ ॥ महाधनंशिल्पिवरैःप्रयत्नतःकृतंयद
स्योत्तमवर्मभास्वरं ॥ सुदीर्घकालेनततोस्यपांडवःक्षणेनबाणैर्बहुधाव्यशातयत् ॥ ६४ ॥ सतंविवर्माणमथोत्तमेषुभिःशितैश्चतुर्भिःकुपितःपराभिनत् ॥ स
विव्यथेऽत्यर्थमरिप्रताडितोयथातुरःपित्तकफानिलज्वरैः॥६५॥ महाधनुर्मंडलनिःसृतैःशितैःक्रियाप्रयत्नप्रहितैर्बलेनच ॥ ततक्षकर्णंबहुभिःशरोत्तमैर्बिभेद
मर्मस्वपिचार्जुनस्त्वरन् ॥ ६६ ॥ दृढाहतःपत्रिभिरुग्रवेगैःपार्थेनकर्णोविविधैःशिताग्रैः ॥ बभौगिरिर्गैरिकधातुरक्तःक्षरन्प्रपातैरिवरक्तमंभः ॥६७॥ ततोर्जुनः
कर्णमवक्रगैर्नवैःसुवर्णपुंखैःसुदृढैरयस्मयैः ॥ यमाग्निदंडप्रतिमैस्स्तनांतरेपराभिनत्क्रौंचमिवाद्रिमग्निजः ॥ ६८ ॥ ततःशरावापमपास्यसूतजोधनुश्चतच्छक्र
शरासनोपमं ॥ ततोरथस्थःसमुमोहचस्खलन्प्रशीर्णमुष्टिःसुभृशाहतःप्रभो ॥ ६९ ॥ नचार्जुनस्तंव्यसनेतदेषिवान्निहंतुमार्यःपुरुषव्रतेस्थितः ॥ ततस्तमिंद्रा
वरजःसुसंभ्रमादुवाचकिंपांडवहेप्रमाद्यसे ॥ ७० ॥ नैवाहितानांसततंविपश्चितःक्षणंप्रतीक्षंत्यपिदुर्बलीयसां ॥ विशेषतोरीन्व्यसनेषुपंडितोनिहत्यधर्मंचय
शश्चविंदते ॥ ७१ ॥ तदेकवीरंतवचाहितंसदात्वरस्वकर्णंसहसाभिमर्दितुं ॥ पुरासमर्थःसमुपैतिसूतजोभिंधित्वमेनंनमुचिंयथाहरिः ॥ ७२ ॥ ततस्तदेवेत्यभि
पूज्यसत्वरंजनार्दनंकर्णमविध्यदर्जुनः ॥ शरोत्तमैःसर्वकुरूत्तमस्त्वरंस्तथायथाशंबरहापुराबलिं॥ ७३॥ साश्वंतुकर्णंसरथंकिरीटीसमाचिनोद्भारतवत्सदंतैः॥
प्रच्छादयामासदिशश्चबाणैःसर्वप्रयत्नात्तपनीयपुंखैः ॥ ७४ ॥ सवत्सदंतैःपृथुपीनवक्षाःसमाचितःसोधिरथिर्विभाति ॥ सुपुष्पिताशोकपलाशशाल्मलिर्य
थाऽचलश्चंदनकाननायुतः ॥ ७५ ॥ शरैःशरीरेबहुभिःसमर्पितैर्विभातिकर्णःसमरेविशांपते ॥ महीरुहैराचितसानुकंदरोयथागिरींद्रःस्फुटकर्णिकारवान् ॥
॥ ७६ ॥ सबाणसंघान्बहुधाव्यवासृजन्विभातिकर्णःशरजालरश्मिवान् ॥ सलोहितोरक्तगभस्तिमंडलोदिवाकरोस्ताभिमुखोयथातथा ॥ ७७ ॥ बाह्वंतरा
दाधिरथेर्विमुक्तान्बाणान्महाहीनिवदीप्यमानान् ॥ व्यध्वंसयन्नर्जुनबाहुमुक्ताःशराःसमासाद्यदिशःशिताग्राः ॥ ७८ ॥ ततःसकर्णःसमवाप्यधैर्यंबाणान्वि
मुंचन्कुपिताहिकल्पान् ॥ विव्याधपार्थंदशभिःपृषत्कैःकृष्णंचषड्भिःकुपिताहिकल्पैः ॥ ७९ ॥ ततःकिरीटीभृशमुग्रनिःस्वनंमहाशरंसर्पविषानलोपमं ॥ अय
स्मयंरौद्रमहास्त्रसंभृतंमहाहवेक्षेप्तुमनामहामतिः ॥ ८० ॥

कालइति हेतुष कर्णवधंअभिलक्ष्येतिशेषः ब्रुवाणःवक्ता ॥ ८१ ॥ वामंचक्रंग्रसते नृवीरित्यत्रात्तिसौनेरितिपाठग्रसतेअत्तिचनतुनिगीर्णमुद्वमतीत्यर्थः ॥ ८२ ॥ ८३ ॥ चैत्यःसवेदिकोग्रामसूचकोमहाद्रु

कालोव्यदृश्योनृपविप्रकोपान्निदर्शयन्कर्णवधंब्रुवाणः ॥ भूमिस्तुचक्रंग्रसतीत्यवोचत्कर्णस्यतस्मिन्वधकालआगते ॥ ८१ ॥ ततस्तदस्त्रंमनसःप्रनष्टंयद्भार्गवोस्मैप्रददौमहात्मा ॥ चक्रंचवामंग्रसतेभूमिरस्यप्रामेतस्मिन्वधकालेनृवीर ॥ ८२ ॥ ततोरथोघूर्णितवान्नरेंद्रशापात्तदाब्राह्मणसत्तमस्य ॥ ततश्चक्रमपतत्तस्यभूमौसविह्वलःसमरेसूतपुत्रः ॥ ८३ ॥ सवेदिकश्चैत्यइवातिमात्रःसुपुष्पितोभूमितलेनिमग्नः ॥ घूर्णेरथेब्राह्मणस्याभिशापाद्रामादुपात्तेत्वविभातिचास्त्रे ॥ ८४ ॥ छिन्नेशरेसर्पमुखेचघोरेपार्थेनतस्मिन्विषसादकर्णः ॥ अमृष्यमाणोव्यसनानितानिहस्तौविधुन्वन्सविगर्हमाणः ॥ ८५ ॥ धर्मप्रधानंकिलपातिधर्मइत्यब्रुवन्धर्मविदःसदैव ॥ वयंचधर्मेप्रयतामनित्यंचर्तुंयथाशक्तियथाश्रुतंच ॥ ८६ ॥ सचापिनिघ्नातिनपातिभक्तान्मन्येननित्यंपरिपातिधर्मः ॥ एवंब्रुवन्प्रस्खलिताश्वसूतोविचाल्यमानोर्जुनबाणपातैः ॥ मर्माभिघाताच्छिथिलःक्रियासुपुनःपुनर्धर्ममसौजगर्ह ॥ ८७ ॥ ततःशरैर्भीमतरैरविध्यत्त्रिभिराहवे ॥ हस्तेकृष्णंतथापार्थमभ्यविध्यच्चसप्तभिः ॥ ८८ ॥ ततोर्जुनःसप्तदशतिग्मवेगानजिह्मगान् ॥ इंद्राशनिसमान्घोरानसृजत्पावकोपमान् ॥ ८९ ॥ निर्भिद्यतेभीमवेगात्यपतन्पृथिवीतले ॥ कंपितात्माततःकर्णःशक्त्याचेष्टामदर्शयत् ॥ ९० ॥ बलेनाथससंस्तभ्यब्रह्मास्त्रंसमुदैरयत् ॥ ऐंद्रंततोर्जुनश्चापितंदृष्ट्वाभ्युपमंत्रयत् ॥ ९१ ॥ गांडीवंज्यांचबाणांश्चसोनुमंत्र्यपरंतपः ॥ व्यसृजच्छरवर्षाणिवर्षाणीवपुरंदरः ॥ ९२ ॥ ततस्तेजोमयाबाणारथात्पार्थस्यनिःसृताः ॥ प्रादुरासन्महावीर्याःकर्णस्यरथमंतिकात् ॥ ९३ ॥ तान्कर्णस्त्वग्रतोन्यस्तान्मोघांश्चक्रेमहारथः ॥ ततोब्रवीद्वृष्णिवीरस्तस्मिन्नस्त्रेविनाशिते ॥ ९४ ॥ विसृजास्त्रंपरंपार्थराधेयोग्रसतेशरान् ॥ ततोब्रह्मास्त्रमत्युग्रंसंमंत्र्यसमयोजयत् ॥ ९५ ॥ छादयित्वाततोबाणैःकर्णंप्रत्यस्यदर्जुनः ॥ ततःकर्णःशितैर्बाणैर्ज्यांचिच्छेदसुतेजनैः ॥ ९६ ॥ द्वितीयांचतृतीयांचचतुर्थींपंचमींतथा ॥ षष्ठीमथास्यचिच्छेदसप्तमींचतथाष्टमीं ॥ ९७ ॥ नवमींदशमींचास्यतथाचैकादशींवृषः ॥ ज्याशतंशतसंधानःसकर्णोनावबुध्यते ॥ ९८ ॥ ततोज्यांविनिधायान्यामभिमंत्र्यचपांडवः ॥ शरैरवाकिरत्कर्णंदीप्यमानैरिवाहिभिः ॥ ९९ ॥ तस्यज्याच्छेदनंकर्णोज्यावधानंचसंयुगे ॥ नान्वबुध्यतशीघ्रत्वात्तदद्भुतमिवाभवत् ॥ १०० ॥ अस्त्रैरस्त्राणिसंवार्यप्रनिघ्नन्सव्यसाचिनः ॥ चक्रेचाप्यधिकंपार्थात्स्ववीर्यमतिदर्शयन् ॥ १ ॥

मः ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ अभ्युपमंत्रयत्गांडीवमित्युत्तरान्वयि ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ प्रत्यस्यत्प्रतिप्राक्षिपत् ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १ ॥

अभ्यसपुन.पुनः अस्त्रंआतिष्ठव्रजप्रेरयेत्यब्रवीदितियोजना० ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ इतिकर्णपर्वणिनैलकंठी

ततःकृष्णोर्जुनंदृष्ट्वाकर्णास्त्रेणचपीडितं ॥ अभ्यसेत्यब्रवीत्पार्थमातिष्ठास्त्रंव्रजेतिच ॥ १०२ ॥ ततोग्निसदृशंघोरंशरंसर्पविषोपमं ॥ अश्मसारमयंदिव्यमभि मंत्र्यपरंतपः ॥ ३ ॥ रौद्रमस्त्रंसमाधायक्षेप्तुकामःकिरीटवान् ॥ ततोग्रसन्महीचक्रंराधेयस्यतदानृप ॥ ४ ॥ ततोवतीर्यराधेयोरथादाशुसमुद्यतः ॥ चक्रंभुजा भ्यामालंब्यसमुत्क्षेप्तुमियेषसः ॥ ५ ॥ सप्तद्वीपावसुमतीसशैलवनकानना ॥ गीर्णचक्रासमुत्क्षिप्ताकर्णेनचतुरंगुलं ॥ ६ ॥ ग्रस्तचक्रस्तुराधेयःक्रोधादश्रूण्यव र्तयत् ॥ अर्जुनंवीक्ष्यसंरब्धमिदंवचनमब्रवीत् ॥ ७ ॥ भोभोपार्थमहेष्वासमुहूर्तंपरिपालय ॥ यावच्चक्रमिदंग्रस्तमुद्धरामिमहीतलात् ॥ ८ ॥ सव्यंचक्रंमहीग्रस्तं दृष्ट्वादैवादिदंमम ॥ पार्थकापुरुषाचीर्णमभिसंधिंविसर्जय ॥ ९ ॥ नत्वंकापुरुषाचीर्णंमार्गमास्थातुमर्हसि ॥ ख्यातस्त्वमसिकौंतेयविशिष्टोरणकर्मसु ॥ १० ॥ विशिष्टतरमेवत्वंकर्तुमर्हसिपांडव ॥ प्रकीर्णकेशेविमुखेब्राह्मणेथकृतांजलौ ॥ ११ ॥ शरणागतेन्यस्तशस्त्रेयाचमानेतथार्जुन ॥ अबाणेभ्रष्टकवचेभ्रष्टभग्नायु धेतथा ॥ १२ ॥ नविमुंचंतिशस्त्राणिशूराःसाधुव्रतेस्थिताः ॥ त्वंचशूरतमोलोकेसाधुवृत्तश्चपांडव ॥ १३ ॥ अभिज्ञोयुद्धधर्माणांवेदांतावभृथाप्लुतः ॥ दिव्यास्त्र विद्मेयात्माकार्तवीर्यसमोयुधि ॥ १४ ॥ यावच्चक्रमिदंग्रस्तमुद्धरामिमहाभुज ॥ नमांरथस्थोभूमिष्ठंविकलंहंतुमर्हसि ॥ १५ ॥ नवासुदेवात्त्वत्तोवापांडवेयबि भेम्यहं ॥ त्वंहिक्षत्रियदायादोमहाकुलविवर्धनः ॥ अतस्त्वांप्रब्रवीम्येषमुहूर्तंक्षमपांडव ॥ १६ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्णरथचक्रग्रसनेनवतितमो ऽध्यायः ॥ ९० ॥ ॥ ७ ॥ संजयउवाच तमब्रवीद्वासुदेवोरथस्थोराधेयदिष्ट्यास्मरसीहधर्मं ॥ प्रायेणनीचाव्यसनेषुमग्नानिंदंतिदैवंकुकृतंनतु स्वं ॥ १ ॥ यद्द्रौपदीमेकवस्त्रांसभायामानाययेस्त्वंचसुयोधनश्च ॥ दुःशासनःशकुनिःसौबलश्चनतेकर्णप्रत्यभात्तत्रधर्मः ॥ २ ॥ यदासभायांराजानमनक्ष ज्ञंयुधिष्ठिरं ॥ अजैषीच्छकुनिर्ज्ञानात्क्वतेधर्मस्तदागतः ॥ ३ ॥ वनवासेव्यतीतेचकर्णवर्षेत्रयोदशे ॥ नप्रयच्छसियद्राज्यंक्वतेधर्मस्तदागतः ॥ ४ ॥ यद्भीमसेनं सर्पैश्चविषयुक्तैश्चभोजनैः ॥ आचरत्त्वन्मतेराजाक्वतेधर्मस्तदागतः ॥ ५ ॥ यद्वारणावतेपार्थान्सुप्तान्जतुगृहेतदा ॥ आदीपयस्त्वंराधेयक्वतेधर्मस्तदागतः ॥ ६ ॥ यदारजस्वलांकृष्णांदुःशासनवशेस्थितां ॥ सभायांप्राहसःकर्णक्वतेधर्मस्तदागतः ॥ ७ ॥

येभारतभावदीपेनवतितमोऽध्यायः ॥ ९० ॥ ॥ ७ ॥ ॥ ७ ॥ तमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

यदनार्यैःपुराकृष्णांक्लिश्यमानामनागसं॥ उपप्रेक्षसिराधेयक्वतेधर्मस्तदागतः॥ ८ ॥ विनष्टाःपांडवाःकृष्णेशाश्वतंनरकंगताः॥ पतिमन्यंवृणीष्वेतिवदंस्त्वं
गजगामिनीं॥ ९॥ उपप्रेक्षसिराधेयक्वतेधर्मस्तदागतः॥ राज्यलुब्धःपुनःकर्णसमाव्हयसिपांडवान्॥ १०॥ यदाशकुनिमाश्रित्यक्वतेधर्मस्तदागतः॥ यदा
भिमन्युंबहवोयुद्धेजघ्नुर्महारथाः॥ परिवार्यरणेबालंक्वतेधर्मस्तदागतः॥ ११॥ यद्येषधर्मस्तत्रनविद्यतेहिकिंसर्वथातालुविशोषणेन॥ १२॥ अद्येहधर्म्याणिवि
धत्स्वसूततथापिजीवन्नविमोक्ष्यसेहि॥ नलोह्यक्षैर्निर्जितःपुष्करेणपुनर्यशोराज्यमवापवीर्यात्॥ १३॥ प्राप्तास्तथापांडवाबाहुवीर्यात्सर्वैःसमेताःपरिवृत्तलो
भाः॥ निहत्यशत्रून्समरेप्रवृद्धान्ससोमकाराज्यमवाप्नुयुस्ते॥ १४॥ तथागताधार्तराष्ट्राविनाशंधर्माभिगुप्तैःसततंनृसिंहैः॥ संजयउवाच एवमुक्तस्त
दाकर्णोवासुदेवेनभारत॥ १५॥ लज्जयावनतोभूत्वानोत्तरंकिंचिदुक्तवान्॥ क्रोधात्प्रस्फुरमाणौष्ठोधनुरुद्यम्यभारत॥ १६॥ योधयामाससवैपार्थंमहावेगप
राक्रमः॥ ततोऽब्रवीद्वासुदेवःफाल्गुनंपुरुषर्षभं॥ १७॥ दिव्यास्त्रेणैवनिर्भिद्यपातयस्वमहाबल॥ एवमुक्तस्तुदेवेनक्रोधमागात्तदार्जुनः॥ १८॥ मन्युमभ्याविश
द्घोरंस्मृत्वातत्तुधनंजयः॥ तस्यक्रुद्धस्यसर्वेभ्यःस्रोतोभ्यस्तेजसोर्चिषः॥ १९॥ प्रादुरासंस्तदाराजंस्तदद्भुतमिवाभवत्॥ तत्समीक्ष्यततःकर्णोब्रह्मास्त्रेणधनंज
यं॥ २०॥ अभ्यवर्षत्पुनर्यत्नमकरोद्रथमज्जने॥ ब्रह्मास्त्रेणैवतंपार्थोववर्षशरवृष्टिभिः॥ २१॥ तदस्त्रमस्त्रेणावार्यप्रजहारचपांडवः॥ ततोन्यदस्त्रंकौंतेयोदयितं
जातवेदसः॥ २२॥ मुमोचकर्णमुद्दिश्यतत्प्रजज्वालतेजसा॥ वारुणेनततःकर्णःशमयामासपावकं॥ २३॥ जीमूतैश्चदिशःसर्वाश्चक्रेतिमिरदुर्दिनाः॥ पांडवे
यस्त्वसंभ्रांतोवायव्यास्त्रेणवीर्यवान्॥ २४॥ अपोवाहतदाभ्राणिराधेयस्यप्रपश्यतः॥ ततःशरंमहाघोरंज्वलंतमिवपावकं॥ २५॥ आददेपांडुपुत्रस्यसूतपु
त्रोजिघांसया॥ योज्यमानेततस्तस्मिन्बाणेधनुषिपूजिते॥ २६॥ चचालपृथिवीराजन्सशैलवनकानना॥ ववौसशर्करोवायुर्दिशश्चरजसावृताः॥ २७॥
हाहाकारश्चसंजज्ञेसुराणांदिविभारत॥ तमिषुंसंधितंदृष्ट्वासूतपुत्रेणमारिष॥ विषादंपरमंजग्मुःपांडवादीनचेतसः॥ २८॥ ससायकःकर्णभुजप्रमुक्तःशक्रा
शनिप्रख्यरुचिःशिताग्रः॥ २९॥ भुजांतरंप्राप्यधनंजयस्यविवेशवल्मीकमिवोरगोत्तमः॥ सगाढविद्धःसमरेमहात्माविघूर्णमानःश्लथहस्तगांडिवः॥ ३०॥
चचालबीभत्सुरमित्रमर्दनःक्षितेःप्रकंपेचयथाचलोत्तमः॥ तदंतरंप्राप्यवृषोमहारथोरथांगमुर्वीगतमुज्जिहीर्षुः॥ ३१॥

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

रथाद्वपुत्यनिगृत्यदोर्भ्यांशशाकदेवान्नमहाबलोपि ॥ ततःकिरीटीप्रतिलभ्यसंज्ञांजग्राहबाणंयमदंडकल्पं ॥ ३२ ॥ ततोर्जुनःप्रांजलिकंमहात्माततोब्रवीद्दा
सुदेवोपिपार्थ ॥ छिंध्यस्यमूर्धानमरेःशरेणनयावदारोहतिवैरथंत्वपः ॥ ३३ ॥ तथैवसंपूज्यसतद्वचःप्रभोस्ततःशरंप्रज्वलितंप्रगृह्य ॥ जघानकक्षाममलार्कव
र्णांमहारथेरथचक्रेविमग्ने ॥ ३४ ॥ तंहस्तिकक्षाप्रवरंचकेतुंसुवर्णमुक्तामणिवज्रपृष्ठं ॥ ज्ञानप्रकर्षोत्तमशिल्पियुक्तैःकृतंसुरूपंतपनीयचित्रं ॥ ३५ ॥ जयास्प
दंतवसैन्यस्यनित्यममित्रवित्रासनमीड्यरूपं ॥ विख्यातमादित्यसमंस्मलोकेत्विषासमंपावकभानुचंद्रैः ॥ ३६ ॥ ततःक्षुरप्रेणसुसंशितेनसुवर्णपुंखेनहुताग्नि
वर्चसा ॥ श्रियाज्वलंतंध्वजमुन्ममाथमहारथस्याधिरथेःकिरीटी ॥ ३७ ॥ यशश्चदर्पश्चतथाप्रियाणिसर्वाणिकार्याणिचतेनकेतुना ॥ साकंकुरूणांहृदयानि
चापतन्बभूवहाहेतिचनिःस्वनोमहान् ॥ ३८ ॥ दृष्ट्वाध्वजंपातितमाशुकारिणाकुरुप्रवीरेणनिकृत्तमाहवे ॥ नाशंसिरेसूतपुत्रस्यसर्वेजयंतदाभारतयेत्वदीयाः
॥ ३९ ॥ अथत्वरन्कर्णवधायपार्थोमहेंद्रवज्रानलदंडसन्निभं ॥ आदत्तचाथांजलिकंनिषंगात्सहस्ररश्मेरिवरश्मिमुत्तमं ॥ ४० ॥ मर्मच्छिदंशोणितमांसदिग्धं
वैश्वानरार्कप्रतिमंमहार्हं ॥ नराश्वनागासुहरंत्र्यरत्निंषड्वाजमंजोगतिमुग्रवेगं ॥ ४१ ॥ सहस्रनेत्राशनितुल्यवीर्यंकालानलंव्यात्तमिवातिघोरं ॥ पिनाकनारा
यणचक्रसन्निभंभयंकरंप्राणभृतांविनाशनं ॥ ४२ ॥ जग्राहपार्थःसशरंप्रहृष्टोयोदेवसंघैरपिदुर्निवार्यः ॥ संपूजितोयःसततंमहात्मादेवासुरान्योविजयेन्महे
पुः ॥ ४३ ॥ तंवैप्रमृष्टंप्रसमीक्ष्ययुद्धेचचालसर्वंसचराचरंजगत् ॥ स्वस्तिजगत्स्यादृषयःप्रचुक्रुशुस्तमुद्यतंप्रेक्ष्यमहाहवेपुं ॥ ४४ ॥ ततस्तुतंवैशरमप्रमेयंगांडीव
धन्वाधनुषिव्ययोजयत् ॥ युक्त्वामहास्त्रेणपरेणचापंविकृष्यगांडीवमुवाचसत्वरं ॥ ४५ ॥ अयंमहास्त्रप्रहितोमहाशरःशरीरहच्चासुहरश्चदुर्हृदः ॥ तपोस्तितप्तंगु
रवश्चतोषितामयायदीष्टंसुहृदांश्रुतंतथा ॥ ४६ ॥ अनेनसत्येननिहंत्वयंशरःसुसंश्रितःकर्णमरिंममोर्जितं ॥ इत्यूचिवांस्तंप्रमुमोचबाणंधनंजयःकर्णवधाय
घोरं ॥ ४७ ॥ कृत्यामथर्वांगिरसीमिवोग्रांदीप्तामसह्यांयुधिमृत्युनापि ॥ ब्रुवन्किरीटीनमतिप्रहृष्टोह्ययंशरोमेविजयावहोस्तु ॥ ४८ ॥ जिघांसुरर्केंदुसमप्र
भावःकर्णंमयास्तोनयतांयमाय ॥ तेनेषुवर्येणकिरीटमालीप्रहृष्टरूपोविजयावहेन ॥ ४९ ॥ जिघांसुरर्केंदुसमप्रभेणचक्रेविपक्तंरिपुमाततायी ॥ तथाविमुक्तो
बलिनार्कतेजाःप्रज्वालयामासदिशोनभश्च ॥ ततोर्जुनस्तस्यशिरोजहारवृत्रस्यवज्रेणयथामहेंद्रः ॥ ५० ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ अपराह्णेदिवसस्यपश्चिमेभागेअपरंचरमं अहःमरणदिनंयस्य ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

शरोत्तमेनांजलिकेनराजन्तदामहास्त्रप्रतिमंत्रितेन ॥ पार्थोपराह्णेशिरउच्चकर्तवैकर्तनस्याथमहेंद्रसूनुः ॥ ५१ ॥ तदापतच्चांजलिकेनच्छिन्नमथास्यकायान्नि
पपातपश्चात् ॥ तदुद्यतादित्यसमानतेजसंशरन्नभोमध्यगभास्करोपमं ॥ ५२ ॥ वरांगमुर्व्यामपतच्चमूमुखेदिवाकरोस्तादिवरक्तमंडलः ॥ ततोस्यदेहंसततंसु
खोचितंसुरूपमत्यर्थमुदारकर्मणः ॥ ५३ ॥ परेणकृच्छ्रेणशिरःसमत्यजद्गृहंमहर्द्धीवसुसंगमीश्वरः ॥ शरैर्विभिन्नंव्यसुतत्सुवर्चसःपपातकर्णस्यशरीरमुच्छ्रितं
॥ ५४ ॥ स्रवद्व्रणंगैरिकतोयविस्रवंगिरेर्यथावज्रहतंमहाशिरः ॥ देहाच्चकर्णस्यनिपातितस्यतेजःसूर्यंखंवितत्याविवेश ॥ ५५ ॥ तदद्भुतंसर्वमनुष्ययोधाःसंदृष्ट
वंतोनिहतेस्मकर्णे ॥ ततःशंखान्पांडवादध्मुरुच्चैर्दृष्ट्वाकर्णंपातितंफाल्गुनेन ॥ ५६ ॥ तथैवकृष्णश्चधनंजयश्चहृष्टौयमौदध्मतुर्वारिजातौ ॥ तंसोमकाःप्रेक्ष्यह
तंशयानंसैन्यैःसार्धंसिंहनादान्प्रचक्रुः ॥ ५७ ॥ तूर्याणिसंजघ्नुरतीवहृष्टावासांसिचैवादुधुवुर्भुजांश्च ॥ संवर्धयंतश्चनरेंद्रयोधाःपार्थंसमाजग्मुरतीवहृष्टाः ॥
॥ ५८ ॥ बलान्विताश्चापरेत्वप्यनृत्यन्नन्योन्यमाश्लिष्यनदंतऊचुः ॥ दृष्ट्वातुकर्णंभुविवाविपन्नंकृत्तंरथात्सायकैरर्जुनस्य ॥ ५९ ॥ महानिलेनाद्रिमिवापविद्धं
यज्ञावसानेग्निमिवप्रशांतं ॥ रराजकर्णस्यशिरोनिकृत्तमस्तंगतंभास्करस्येवबिंबं ॥ ६० ॥ शरैराचितसर्वांगःशोणितौघपरिप्लुतः ॥ विभातिदेहःकर्णस्यस्वर
श्मिभिरिवांशुमान् ॥ ६१ ॥ प्रताप्यसेनामामित्रींदीप्तैःशरगभस्तिभिः ॥ बलिनार्जुनकालेननीतोस्तंकर्णभास्करः ॥ ६२ ॥ अस्तंगच्छन्यथादित्यःप्रभामा
दायगच्छति ॥ तथाजीवितमादायकर्णस्येषुर्जगामसः ॥ अपराह्णेऽपराह्णोऽस्यसूतपुत्रस्यमारिष ॥ ६३ ॥ छिन्नमंजलिकेनाजौसोत्सेधमपतच्छिरः ॥ उपर्युप
रिसैन्यानामस्यशत्रोस्तदंजसा ॥ शिरःकर्णस्यसोत्सेधमिषुःसोप्यहरद्द्रुतं ॥ ६४ ॥ कर्णंतुशूरंपतितंपृथिव्यांशराचितंशोणितदिग्धगात्रं ॥ दृष्ट्वाशयानंभुविमं
द्रराजश्छिन्नध्वजेनाथययौरथेन ॥ ६५ ॥ हतेकर्णेकुरवःप्राद्रवंतभयार्दितागाढविद्धाश्चसंख्ये ॥ अवेक्षमाणामुहुरर्जुनस्यध्वजंमहांतंवपुषाज्वलंतं ॥ ६६ ॥
सहस्रनेत्रप्रतिमानकर्मणःसहस्रपत्रप्रतिमाननंशुभं ॥ सहस्ररश्मिर्दिनसंक्षयेयथातथापतत्कर्णशिरोवसुंधरां ॥ ६७ ॥ इतिश्रीमहाभारतेकर्णपर्वणिकर्ण
वधेएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ ७ ॥ संजयउवाच शल्यस्तुकर्णार्जुनयोर्विमर्देबलानिदृष्ट्वाम्रदितानिबाणैः ॥ ययौहतेचाधिरथौपदा
नुगेरथेनसंछिन्नपरिच्छदेन ॥ १ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ ७ ॥ शल्यइति रथेनयस्तचक्रेणहतुनापदानुगेपदचारिणि ॥ १ ॥

॥२॥३॥प्रहृष्टाअर्जुनादयः वित्रस्ताःकौरवाः विषण्णाः शल्यादयः विस्मिताःप्रेक्षकाः॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेद्विनवतितमोऽध्यायः॥९२॥

निपातितस्यंदनवाजिनागंबलंचदृष्ट्वाहतसूतपुत्रं॥ दुर्योधनोश्रुप्रतिपूर्णनेत्रोदीनोमुहुर्निश्वसंश्चार्तरूपः ॥ २ ॥ कर्णंतुशूरंपतितंपृथिव्यांशराचितंशोणितदि ग्धगात्रं॥ यदृच्छयासूर्यमिवावनिस्थंदिदृक्षवःसंपरिवार्यतस्थुः॥ ३॥ प्रहृष्टवित्रस्तविषण्णविस्मितास्तथापरेशोकहताइवाभवन॥परेत्वदीयाश्चपरस्परेणय थायथैषांप्रकृतिस्तथाऽभवन ॥ ४॥ प्रविद्धवर्माभरणांबरायुधंधनंजयेनाभिहतंमहौजसं ॥ निशाम्यकर्णंकुरवःप्रदुद्रुवुर्हतर्षभागावइवाजनेवने॥५॥ भीम श्चभीमेननदास्वनेननादंकृत्वारोदसीकंपयानः॥ आस्फोटयन्वल्गनेनृत्यतेचहतेकर्णेत्रासयन्धार्तराष्ट्रान॥६॥ तथैवराजन्सोमकाःसृंजयाश्चशंखान्दध्मुः सस्वजुश्चापिसर्वे॥ परस्परंक्षत्रियाहृष्टरूपाःसूतात्मजेवैनिहतेतदानीं ॥ ७॥ कृत्वाविमर्दंमहदर्जुनेनकर्णोहतःकेसरिणेवनागः ॥ तीर्णप्रतिज्ञापुरुषर्षभेण वैरस्यांतंगतवांश्चापिपार्थः॥ ८॥ मद्राधिपश्चापिविमूढचेतास्तूर्णंरथेनापकृतध्वजेन॥ दुर्योधनस्यांतिकमेत्यराजन्सबाष्पदुःखाद्वचनंबभाषे॥९॥ विशीर्ण नागाश्वरथप्रवीरंबलंत्वदीयंयमराष्ट्रकल्पं॥ अन्योन्यमासाद्यहतंमहद्भिर्नराश्वनागैर्गिरिकूटकल्पैः॥१०॥नैतादृशंभारतयुद्धमासीद्यथातुकर्णार्जुनयोर्बभूव॥ ग्रस्तौहिकर्णेनसमेत्यकृष्णावन्येचसर्वेतवशत्रवोये॥ ११ ॥ दैवंध्रुवंपार्थवशात्प्रवृत्तंयत्पांडवान्पातिहिनस्तिचास्मान ॥ तवार्थसिद्ध्यर्थकरास्तुसर्वेप्रसह्यवी रानिहताद्विषद्भिः॥ १२॥ कुबेरवैवस्वतवासवानांतुल्यप्रभावाम्नृपतेसुवीराः॥ वीर्येणशौर्येणबलेनतेजसानैस्तैस्तुयुक्ताविविधैर्गुणौघैः॥ १३॥ अवध्यकल्पा निहतानरेंद्रास्तवार्थकामायुधिपांडवेयैः॥ तान्माशुचोभारतदिष्टमेतत्पर्याश्वसत्वंनसदास्तिसिद्धिः॥ १४॥एतद्वचोमद्रपतेर्निशम्यस्वंचाप्यनीतंमनसानिरी क्ष्य॥ दुर्योधनोदीनमनाविसंज्ञःपुनःपुनर्न्यश्वसदार्तरूपः॥ १५॥ इतिश्रीमहाभारतेकर्णपर्वणिद्विनवतितमोऽध्यायः ॥ ९२॥ ॥ ९३॥ ॥ ९३॥

धृतराष्ट्रउवाच तस्मिंस्तुकर्णार्जुनयोर्विमर्देदग्धस्यरौद्रेहनिविद्रुतस्य॥ बभूवरूपंकुरुसृंजयानांबलस्यबाणोन्मथितस्यकीदृक्॥१॥ संजयउवाच शृ णुराजन्नवहितोयथावृत्तोमहाक्षयः॥ घोरोमनुष्यदेहानामाजौचगजवाजिनां॥ २॥ यत्रकर्णेहतेपार्थःसिंहनादमथाकरोत्॥तदातवसुतान्राजन्नाविवेशम हद्भयं॥ ३॥ नसंधातुमनीकानिनचैवाशुपराक्रमे॥ आसीद्बुद्धिर्हतेकर्णेतवयोधस्यकर्हिचित्॥४॥ वणिजोनाविभिन्नायामगाधेविप्लवेयथा॥ अपारेपारमि च्छंतोहतेद्वीपेकिरीटिना॥ ५॥ सूतपुत्रेहतेराजन्वित्रस्ताःशस्त्रविक्षताः॥ अनाथानाथमिच्छंतोमृगाःसिंहैरिवार्दिताः॥६॥ तस्मिन्निति ॥ १ ॥ २ ॥ ३॥ ४॥५॥६॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

भग्नशृंगाद्वृषायद्वद्भग्नदंष्ट्राइवोरगाः ॥ प्रत्यपायामसायाह्ने निर्जिताःसव्यसाचिना ॥ ७ ॥ हतप्रवीराविध्वस्तानिकृत्तानिशितैःशरैः ॥ सूतपुत्रेहतेराजन्पुत्रास्ते
दुद्रुवुर्भयात् ॥ ८ ॥ विस्रस्तयंत्रकवचाःकांदिग्भूताविचेतसः ॥ अन्योन्यमवमृद्नंतोवीक्षमाणाभयार्दिताः ॥ ९ ॥ मामेवनूनंबीभत्सुर्मामेवचवृकोदरः ॥ अभि
यातीतिमन्वानाःपेतुर्मम्लुश्चसंभ्रमात ॥ १० ॥ हयानन्येगजानन्येरथानन्येमहारथाः ॥ आरुह्यजवसंपन्नाःपदातीन्प्रजहुर्भयात् ॥ ११ ॥ कुंजरैःस्यंदनाःक्षु
ण्णाःसादिनश्चमहारथैः ॥ पदातिसंघाश्चाश्वौघैःपलायद्भिर्भयार्दितैः ॥ १२ ॥ व्यालतस्करसंकीर्णेसार्थहीनायथावने ॥ सूतपुत्रेहतेराजंस्तवयोधास्तथाभवन्
॥ १३ ॥ हतारोहायथानागाश्छिन्नहस्तायथानराः ॥ सर्वंपार्थमयंलोकंसंपश्यंतोभयार्दिताः ॥ १४ ॥ संप्रेक्ष्यद्रवतःसर्वान्भीमसेनभयार्दितान् ॥ दुर्योधनोथ
स्वंसूतंहाहाकृत्वेदमब्रवीत ॥ १५ ॥ नातिक्रमेच्चमांपार्थोधनुष्पाणिमवस्थितं ॥ जघनेसर्वसैन्यानांशनैरश्वान्प्रचोदय ॥ १६ ॥ युध्यमानंहिकौंतेयंहनिष्यामि
नसंशयः ॥ नोत्सहेन्मामतिक्रांतुंवेलामिवमहोदधिः ॥ १७ ॥ अद्यार्जुनंसगोविंदंमानिनंचवृकोदरं ॥ हन्यांशिष्टांस्तथाशत्रून्कर्णस्यानृण्यमाप्नुयां ॥ १८ ॥
तच्छ्रुत्वाकुरुराजस्यशूरार्यसदृशंवचः ॥ सूतोहेमपरिच्छन्नान्शनैरश्वानचोदयत् ॥ १९ ॥ रथाश्वनागहीनास्तुपादातास्तवमारिष ॥ पंचविंशतिसाहस्रायुद्धा
यैवव्यवस्थिताः ॥ २० ॥ तान्भीमसेनःसंक्रुद्धोधृष्टद्युम्नश्चपार्षतः ॥ बलेनचतुरंगेणसंवृत्याजघ्नतुःशरैः ॥ २१ ॥ प्रत्ययुध्यंतसमरेभीमसेनंसपार्षतं ॥ पार्थपा
र्षतयोश्चान्येजगृहुस्तत्रनामनी ॥ २२ ॥ अक्रुध्यत्रणेभीमस्तैस्तदापर्यवस्थितैः ॥ सोवतीर्यरथात्तूर्णंगदापाणिरयुध्यत ॥ २३ ॥ नतान्रथस्थोभूमिष्ठान्धर्मा
पेक्षीवृकोदरः ॥ योधयामासकौंतेयोभुजवीर्यव्यपाश्रयः ॥ २४ ॥ जातरूपपरिच्छन्नांप्रगृह्यमहतींगदां ॥ अवधीत्तावकान्सर्वान्दंडपाणिरिवांतकः ॥ २५ ॥
पदातिनोपिसंत्यक्त्वाप्रियंजीवितमात्मनः ॥ भीममभ्यद्रवन्संख्येपतंगाज्वलनंयथा ॥ २६ ॥ आसाद्यभीमसेनंतुसंरब्धायुद्धदुर्मदाः ॥ विनेशुःसहसादृष्ट्वा
भूतग्रामाइवांतकं ॥ २७ ॥ श्येनवद्विचरन्भीमोगदाहस्तोमहाबलः ॥ पंचविंशतिसाहस्रांस्तावकानवपोथयत् ॥ २८ ॥ हत्वातत्पुरुषानीकंभीमःसत्यपराक्रमः ॥
धृष्टद्युम्नंपुरस्कृत्यतस्थौतत्रमहाबलः ॥ २९ ॥ धनंजयोरथानीकमभ्यवर्ततवीर्यवान् ॥ माद्रीपुत्रौतुशकुनिंसात्यकिश्चमहारथः ॥ ३० ॥ जवेनाभ्यपतन्हृष्टा
घ्नंतोदौर्योधनंबलं ॥ तस्याश्वसादीन्सुबहूंस्तेनिहत्यशितैःशरैः ॥ ३१ ॥ समभ्यधावंस्त्वरितास्तत्रयुद्धमभून्महत् ॥ धनंजयोपिचाभ्येत्यरथानीकंतवप्रभो ॥ ३२ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

विश्रुतंत्रिपुलोकेपुगांडीवंविक्षिपन्धनुः ॥ कृष्णसारथिमायांतंदृष्ट्वाश्वेतहयंरथं ॥ ३३ ॥ अर्जुनंचापियोद्धारंत्वदीयाःप्राद्रवन्भयात् ॥ विप्रहीणरथाश्चैवशरैश्चपरिकंपिताः ॥ ३४ ॥ पंचविंशतिसाहस्राःकालमार्छन्पदातयः ॥ हत्वातान्पुरुषव्याघ्रःपंचालानांमहारथः ॥ ३५ ॥ पुत्रःपांचालराजस्यधृष्टद्युम्नोमहामनाः ॥ भीमसेनंपुरस्कृत्यनचिरात्प्रत्यदृश्यत ॥ ३६ ॥ महाधनुर्धरःश्रीमानमित्रगणतापनः ॥ पारावतसवर्णाश्वंकोविदारमयध्वजं ॥ ३७ ॥ धृष्टद्युम्नंरणेदृष्ट्वात्वदीयाःप्राद्रवन्भयात् ॥ गांधारराजंशीघ्रास्त्रमनुसृत्ययशस्विनौ ॥ ३८ ॥ नचिरात्प्रत्यदृश्येतांमाद्रीपुत्रौससात्यकी ॥ चेकितानःशिखंडीचद्रौपदेयाश्चमारिष ॥ ३९ ॥ हत्वात्वदीयंसुमहत्सैन्यंशंखांस्तथाधमन् ॥ तेसर्वेतावकान्प्रेक्ष्यद्रवतोपिपराङ्मुखान् ॥ ४० ॥ अभ्यवर्ततसंरब्धान्वृषान्जित्वाययावृषाः ॥ सेनावशेषंतंदृष्ट्वातवसैन्यस्यपांडवः ॥ ४१ ॥ व्यवस्थितःसव्यसाचीचुक्रोधबलवान्नृप ॥ धनंजयोरथानीकमभ्यवर्ततवीर्यवान् ॥ ४२ ॥ विश्रुतंत्रिपुलोकेपुव्याक्षिपद्गांडिवंधनुः ॥ ततएनान्शरव्रातैःसहसासमवाकिरत् ॥ ४३ ॥ तमसासंवृतेनाथनस्मकिंचिद्व्यदृश्यत ॥ अंधकारीकृतेलोकेरजोभूतेमहीतले ॥ ४४ ॥ योधाःसर्वेमहाराजतावकाःप्राद्रवन्भयात् ॥ संभज्यमानेसैन्येतुकुरुराजोविशांपते ॥ ४५ ॥ परानभिमुखांश्चैवसुतस्तेसमुपाद्रवत् ॥ ततोदुर्योधनःसर्वानाजुहावाथपांडवान् ॥ ४६ ॥ युद्धायभरतश्रेष्ठदेवानिवपुराबलिः ॥ तएनमभिगर्जंतःसहिताःसमुपाद्रवन् ॥ ४७ ॥ नानाशस्त्रभृतःक्रुद्धाभर्त्सयंतोमुहुर्मुहुः ॥ दुर्योधनोप्यसंभ्रांतस्तान्रणेनिशितैःशरैः ॥ ४८ ॥ तत्रावधीत्ततःक्रुद्धःशतशोथसहस्रशः ॥ तत्सैन्यंपांडवेयानांयोधयामाससर्वतः ॥ ४९ ॥ तत्राद्भुतमपश्यामतवपुत्रस्यपौरुषं ॥ यदेकःसहितान्सर्वान्रणेयुध्यतपांडवान् ॥ ५० ॥ ततोपश्यन्महात्मासस्वसैन्यंभृशदुःखितं ॥ ततोवस्थाप्यराजेंद्रकृतबुद्धिस्तवात्मजः ॥ ५१ ॥ हर्षयन्निवतान्योधानिदंवचनमब्रवीत् ॥ नतंदेशंप्रपश्यामियत्रयाताभयार्दिताः ॥ ५२ ॥ गतानांयत्रवैमोक्षःपांडवात्किंगतेनवः ॥ अल्पंचबलमेतेषांकृष्णौचभृशविक्षतौ ॥ ५३ ॥ अद्यसर्वान्हनिष्यामिध्रुवोहिविजयोभवेत् ॥ विप्रयातांस्तुवोभिन्नान्पांडवाःकृतकिल्बिषान् ॥ ५४ ॥ अनुसृत्यवधिष्यंतिश्रेयान्नःसमरेवधः ॥ सुखंसांग्रामिकोमृत्युःक्षत्रधर्मेणयुध्यतां ॥ ५५ ॥ मृतोदुःखंनजानीतेप्रेत्यचानंत्यमश्नुते ॥ शृणुध्वंक्षत्रियाःसर्वेयावंतःस्थसमागताः ॥ ५६ ॥ यदाशूरंचभीरुंचमारयत्यंतकोयमः ॥ कोनमृढानयुध्येतमादृशःक्षत्रियव्रतः ॥ ५७ ॥ द्विषतोभीमसेनस्यक्रुद्धस्यवशमेष्यथ ॥ पितामहैराचरितंनधर्मंहातुमर्हथ ॥ ५८ ॥

नत्यधर्मोस्तिपापीयान्क्षत्रियस्यपलायनात् ॥ नयुद्धधर्माच्छ्रेयोहिपंथाःस्वर्गस्यकौरवाः ॥ अचिरेणहतालोकान्सद्योयोधाःसमश्नुत ॥ ५९ ॥ संजयउवाच एवंब्रुवतिपुत्रेतेसैनिकाभृशविक्षताः ॥ अनवेक्ष्यैवतद्वाक्यंप्राद्रवन्सर्वतोदिशः ॥ ६० ॥ इतिश्रीमहाभारतेकर्णपर्वणिकौरवसैन्यपलायनेत्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ ५ ॥ ॥ ५ ॥ संजयउवाच दृष्ट्वातुसैन्यंपरिवृत्यमानंपुत्रेणतेमद्रपतिस्तदानीं ॥ संत्रस्तरूपःपरिमूढचेतादुर्योधनंवाक्यमिदंबभाषे ॥ १ ॥ शल्यउवाच पश्येदमुग्रंनरवाजिनागैरायोधनंवीरशतैःसुपूर्णं ॥ महीधराभैःपतितैश्चनागैःसकृद्विभिन्नैःशरभिन्नदेहैः ॥ २ ॥ संविह्वलद्भिश्चगतासुभिश्चप्रध्वस्तवर्मायुधचर्मखड्गैः ॥ वज्रापविद्धैरिवचाचलोत्तमैर्विभिन्नपाषाणमहाद्रुमौषधैः ॥ ३ ॥ प्रविद्धघंटांकुशतोमरध्वजैःसहेमजालैरुधिरौघसंप्लुतैः ॥ शरावभिन्नैःपतितैस्तुरंगमैःश्वसद्भिरार्तैःक्षतजंवमद्भिः ॥ ४ ॥ दीनंस्तनद्भिःपरिवृत्तनेत्रैर्महींदशद्भिःकृपणंनदद्भिः ॥ तथापविद्धैर्गजवाजियोधैर्बलापविद्धैरथवीरसंघैः ॥ ५ ॥ मंदासुभिश्चैवगतासुभिश्चनराश्वनागैश्चरथैश्चमर्दितैः ॥ मंदांशुभिश्चैवमहीमहाहवेनूनंयथावैतरणीवभाति ॥ ६ ॥ गजैर्निकृत्तैर्वरहस्तगात्रैरुद्वेपमानैःपतितैःपृथिव्यां ॥ विशीर्णदंतैःक्षतजंवमद्भिःस्फुरद्भिरार्तैःकरुणंनदद्भिः ॥ ७ ॥ निकृत्तचक्रेषुयुगैःसयोक्त्रैःभिःप्रविद्धतूणीरपताककेतुभिः ॥ सुवर्णजालावततैर्भृशाहतैर्महारथौघैर्जलदैरिवावृता ॥ ८ ॥ यशस्विभिर्नागरथाश्वयोधिभिःपदातिभिश्चाभिमुखैर्हतैःपरैः ॥ विशीर्णवर्माभरणांबरायुधैर्वृताप्रशांतैरिवपावकैर्मही ॥ ९ ॥ शरप्रहाराभिहतैर्महाबलैरवेक्षमाणैःपतितैःसहस्रशः ॥ दिवश्च्युतैर्भूर्गतिदीप्तिमद्भिर्नक्तंग्रहैर्द्यौरमलप्रदीप्तैः ॥ १० ॥ प्रनष्टसंज्ञैःपुनरुच्छ्वसद्भिर्महीवभूवानुगतैरिवार्चिभिः ॥ कर्णार्जुनाभ्यांशरभिन्नगात्रैर्हतैःप्रवीरैःकुरुसृंजयानां ॥ ११ ॥ शरास्तुकर्णार्जुनबाहुमुक्ताविदार्यनागाश्वमनुष्यदेहान् ॥ प्राणान्निरस्याशुमहींप्रतीयुर्महोरगावासमिवाभिनघाः ॥ १२ ॥ हतैर्मनुष्याश्वगजैश्चसंख्येशरापविद्धैश्चरथैर्नरेंद्र ॥ धनंजयस्याधिरथेश्चमार्गणैरगम्यरूपावसुधावभूव ॥ १३ ॥ रथैर्वरेषून्मथितैःसुकल्पैःसयोधशस्त्रैश्चवरायुधैर्ध्वजैः ॥ विशीर्णयोक्त्रैर्विनिकृत्यबंधनैर्निकृत्तचक्राक्षयुगत्रिवेणुभिः ॥ १४ ॥ विमुक्तशस्त्रैश्चतथाप्युपस्करैर्हतानुकर्षैर्विनिषंगबंधनैः ॥ प्रभग्ननीडैर्मणिहेमभूषितैस्तृतामहीद्यौरिवशारदैर्घनैः ॥ १५ ॥

विरुप्यमाणैर्जवनैस्तुरंगमैर्हतेश्वरैराजरथैः सुकल्पितैः॥ मनुष्यमातंगरथाश्वराशिभिर्द्रुतंव्रजंतो बहुधाविचूर्णिताः ॥ १६ ॥ सहेमपट्टाः परिघाः परश्वधाः शिताश्चशूलामुसलानिमुद्गराः॥ पतुश्चखड्गाविमलाविकोशागदाश्चजांबूनदपट्टनद्धाः ॥ १७॥ चापानिरुक्मांगदभूषणानिशराश्चकार्तस्वरचित्रपुंखाः॥ ऋष्ट्यश्चपीताविमलाविकोशाःप्रासाश्चदंडैः कनकावभासैः॥ १८॥ छत्राणिवालव्यजनानिशंखाश्छिन्नापविद्धाश्चस्रजोविचित्राः॥ कुथाः पताकांबरभूषणानिकिरीटमालामुकुटाश्चशुभ्राः॥ १९॥ प्रकीर्णकाविप्रकीर्णाश्चराजन्प्रवालमुक्तातरलाश्चहाराः॥ आपीडकेयूरवरांगदानिग्रैवेयनिष्काः ससुवर्णसूत्राः॥ ॥ २०॥ मण्युत्तमावज्रसुवर्णमुक्तारत्नानिचोच्चावचमंगलानि॥ गात्राणिचात्यंतसुखोचितानिशिरांसिचेंदुप्रतिमाननानि ॥ २१ ॥ देहांश्चभोगांश्चपरिच्छदांश्चत्यक्कामनोज्ञानिसुखानिचैव॥ स्वधर्मनिष्ठांमहतीमवाप्यव्याप्याशुलोकान्यशसागतास्ते॥ २२ ॥ निवर्तदुर्योधनयांतुसैनिकाव्रजस्वराजन्शिबिरायमानद॥ दिवाकरोप्यपविलंबतेप्रभोपुनस्त्वमेवात्रनरेंद्रकारणं॥ २३॥ इत्येवमुक्काविरराम शल्योदुर्योधनंशोकपरीतचेताः॥ हाकर्णहाकर्णइतिब्रुवाणमार्तविसंज्ञंभृशमश्रुनेत्रं॥ २४॥ तंद्रोणपुत्रप्रमुखानरेंद्राः सर्वेसमाश्वास्यमुहुःप्रयांति॥ निरीक्षमाणामुहुरर्जुनस्यध्वजंमहांतंयशसाज्वलंतं॥ २५ ॥ नराश्वमातंगशरीरजेनरक्तेनसिक्तांचतथैवभूमिं॥ रक्तांबरस्रक्तपनीययोगान्नारींप्रकाशामिवसर्वगम्यां॥ २६॥ प्रच्छन्नरूपांरुधिरेणराजन्रौद्रेमुहूर्तेतिविराजमाने॥ नैवावतस्थुःकुरवः समीक्ष्यप्रव्राजितादेवलोकायसर्वे॥ २७॥ वधेनकर्णस्यतुदुःखितास्तेहाकर्णहाकर्णइतिब्रुवाणाः॥ द्रुतंप्रयाताः शिबिराणिराजन्दिवाकरंरक्तमवेक्षमाणाः॥ २८ ॥ गांडीवमुक्तैस्तुसुवर्णपुंखैः शिलाशितैः शोणितदिग्धवाजैः ॥ शरैश्चितांगोयुधिभातिकर्णोहतोपिसन्सूर्यइवांशुमाली॥ ॥ २९॥ कर्णस्यदेहंरुधिरावसिक्तंभक्तानुकंपीभगवान्विवस्वान्॥ स्पृष्ट्वांशुभिर्लोहितरक्तरूपःसिष्णासुरभ्येतिपरंसमुद्रं॥ ३०॥ इतीवसंचिंत्यसुरर्षिसंघाःसंप्रास्थितायांतियथानिकेतनं॥ संचिंतयित्वाजनताविसस्रुर्यथासुखंखंचमहीतलंच॥ ३१ ॥ तदद्भुतंप्राणभृतांभयंकरंनिशाम्ययुद्धंकुरुवीरमुख्ययोः॥ धनंजयस्याधिरथेश्चविस्मिताःप्रशंसमानाःप्रययुस्तदाजनाः॥ ३२॥ शरसंकृत्तवर्माणंरुधिरोक्षितवाससं॥ गतासुमपिराधेयंनैवलक्ष्मीर्विमुंचति॥३३॥ तप्तजांबूनदनिभंज्वलनार्कसमप्रभं॥ जीवंतमिवतंशूरंसर्वभूतानिमेनिरे॥ ३४॥

हतस्यापिमहाराजसूतपुत्रस्यसंयुगे॥ वित्रेसुःसर्वतोयोधाःसिंहस्येवेतरेमृगाः॥ ३५॥ हतोपिपुरुषव्याघ्रोजीववानिवलक्ष्यते॥ नाभवद्विकृतिःकाचिद्धतस्या
पिमहात्मनः॥ ३६॥ चारुवेषधरंवीरंचारुमौलिशिरोधरं॥ तन्मुखंसूतपुत्रस्यपूर्णचंद्रसमद्युति॥ ३७॥ नानाभरणवान्राजंस्तप्तजांबूनदांगदः॥ हतोवैकर्त
नःशेतेपादपोंकुरवानिव॥ ३८॥ कनकोत्तमसंकाशोज्वलन्निवविभावसुः॥ सशांतःपुरुषव्याघ्रपार्थसायकवारिणा॥३९॥ यथाहिज्वलनोदीप्तोजलमासा
द्यशाम्यति॥ कर्णाग्निःसमरेतद्वत्पार्थमेघेनशामितः॥ ४०॥ आहृत्यचयशोदीप्तंसुयुद्धेनात्मनोभुवि॥ विसृज्यशरवर्षाणिप्रताप्यचदिशोदश॥ ४१॥ सपु
त्रःसमरेकर्णःसशांतःपार्थतेजसा॥ प्रताप्यपांडवान्सर्वान्पंचालांश्चास्त्रतेजसा॥ ४२॥ वर्षित्वाशरवर्षेणप्रताप्यरिपुवाहिनीं॥ श्रीमानिवसहस्रांशुर्जगत्सर्वं
प्रताप्यच॥ ४३॥ हतोवैकर्तनःकर्णःसपुत्रःसहवाहनः॥ अर्थिनांपक्षिसंघस्यकल्पवृक्षोनिपातितः॥४४॥ ददानीत्येवयोऽवोचन्ननास्तीत्यर्थितोर्थिभिः॥ स
द्भिःसदासत्पुरुषःसहतोद्वैरथेवृषः॥४५॥ यस्यब्राह्मणसात्सर्वंवित्तमासीन्महात्मनः॥ नादेयंब्राह्मणेष्वासीद्यस्यस्वमपिजीवितं॥४६॥ सदास्त्रीणांप्रियोनित्यं
दाताचैवमहारथः॥ सवैपार्थास्त्रनिर्दग्धोगतःपरमिकांगतिं॥ ४७॥ यमाश्रित्याकरोद्वैरंपुत्रस्तेसगतोदिवं॥ आदायतवपुत्राणांजयाशांशर्मवर्मच॥ ४८॥
हतेकर्णेसरितोनप्रसस्रुर्जगामचास्तंसवितादिवाकरः॥ ग्रहश्चतिर्यक्ज्वलनार्कवर्णःसोमस्यपुत्रोभ्युदियायतिर्यक्॥ ४९॥ नभःपफालेवननादचोर्वीववुश्च
वाताःपरुषाःसुघोराः॥ दिशोवभूवुर्ज्वलिताःसधूमामहार्णवाःसस्वनुश्चुक्षुभुश्च॥ ५०॥ सकाननाश्चाद्रिचयाश्चकंपिरेप्रविव्यथुर्भूतगणाश्चसर्वे॥ बृहस्पतिः
संपरिवार्यरोहिणींवभूवचंद्रार्कसमोविशांपते॥ ५१॥ हतेतुकर्णेविदिशोपिजज्वलुस्तमोवृताद्यौर्विचचालभूमिः॥ पपातचोल्काज्वलनप्रकाशानिशाचरा
श्चाप्यभवन्प्रहृष्टाः॥ ५२॥ शशिप्रकाशाननमर्जुनोयदाक्षुरेणकर्णस्यशिरोन्यपातयत्॥ तदांतरिक्षेसहसैवशब्दोवभूवहाहेतिसुरैर्विमुक्तः॥ ५३॥ सदेवगं
धर्वमनुष्यपूजितंनिहत्यकर्णंरिपुमाहवेर्जुनः॥ रराजराजन्परमेणवर्चसायथापुरावृत्रवधेशतक्रतुः॥५४॥ ततोरथेनांबुदवृंदनादिनाशरन्नभोमध्यदिवाकरा
र्चिषा॥ पताकिनाभीमनिनादकेतुनाहिमेंदुशंखस्फटिकावभासिना॥५५॥ महेंद्रवाहप्रतिमेनतावुभौमहेंद्रवीर्यप्रतिमानपौरुषौ॥सुवर्णमुक्तामणिवज्रवि
द्रुमैरलंकृतावप्रतिमेनरंहसा॥५६॥नरोत्तमौकेशवपांडुनंदनौतदाहितावग्निदिवाकराविव॥रणाजिरेवीतभयौविरेजतुःसमानयानाविवविष्णुवासवौ॥५७॥

॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेचतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ ९५ ॥ हतेइति ॥ १ ॥ २ ॥ ३ ॥

ततोधनुर्ज्यातलघाणनिःस्वनैःप्रसह्यकृत्वाचरिपून्हतप्रभान् ॥ संछादयित्वातुकुरून्शरोत्तमैःकपिध्वजःपक्षिवरध्वजश्च ॥ ५८ ॥ दध्मौततस्तावमितप्रभावौ मनांस्यरीणामवदारयंतौ ॥ सुवर्णजालावततौमहास्वनौहिमावदातौपरिगृह्यपाणिभिः ॥ चुचुंबतुःशंखवरौनृणांवरौवराननाभ्यांयुगपच्चदध्मतुः ॥ ५९ ॥ पांचजन्यस्यनिर्घोषोदेवदत्तस्यचोभयोः ॥ पृथिवींचांतरिक्षंचदिशश्चैवान्वनादयत् ॥ ६० ॥ वित्रस्ताश्चाभवन्सर्वेकौरवाराजसत्तम ॥ शंखशब्देनतेनाथमाधवस्यार्जुनस्यच ॥ ६१ ॥ तौशंखशब्देननिनादयंतौवनानिशैलान्सरितोगुहाश्च ॥ वित्रासयंतौतवपुत्रसेनांयुधिष्ठिरंनंदयतांवरिष्ठौ ॥ ६२ ॥ ततःप्रयाताःकुरवोजवेनश्रुत्वैवशंखस्वनमीर्यमाणं ॥ विहायमद्राधिपतिंपतिंचदुर्योधनंभारतभारतानां ॥ ६३ ॥ महाहवेतंबहुशोचमानंधनंजयंभूतगणाःसमेताः ॥ तदान्वमोदंतजनार्दनंचदिवाकरावभ्युदितौयथैव ॥ ६४ ॥ समाचितौकर्णशरैःपरंतपावुभौव्यभातांसमरेच्युतार्जुनौ ॥ तमोनिहत्याभ्युदितौयथामलौशशांकसूर्यौदिविरश्मिमालिनौ ॥ ६५ ॥ विहायतान्बाणगणानथागतौसुहृद्वृतावप्रतिमानविक्रमौ ॥ सुखंप्रविष्टौशिबिरंस्वमीश्वरौसदस्यहूताविवविष्णुवासवौ ॥ ६६ ॥ तौदेवगंधर्वमनुष्यचारणैर्महर्षिभिर्यक्षमहोरगैरपि ॥ जयाभिवृद्ध्यापरयाभिपूजितौहतेतुकर्णेपरमाहवेतदा ॥ ६७ ॥ यथानुरूपंप्रतिपूजितावुभौप्रशस्यमानौस्वकृतैर्गुणौघैः ॥ ननंदतुस्तौससुहृद्गणौतदाबलंनियम्येवसुरेशकेशवौ ॥ ६८ ॥ इतिश्रीम० कर्णपर्वणिरणभूमिवर्णनंनामचतुर्नवतितमोऽध्यायः ॥ ९४ ॥

संजयउवाच हतेवैकर्तनेराजन्कुरवोभयपीडिताः ॥ वीक्षमाणादिशःसर्वाःपर्यपेतुःसहस्रशः ॥ १ ॥ कर्णंतुनिहतंदृष्ट्वाशत्रुभिःपरमाहवे ॥ भीतादिशोव्यकीर्यंततावकाःक्षतविक्षताः ॥ २ ॥ ततोवहारंचक्रुस्तेयोधाःसर्वेसमंततः ॥ निवार्यमाणाश्चोद्विग्नास्तावकाभृशदुःखिताः ॥ ३ ॥ तेषांतन्मतमाज्ञायपुत्रोदुर्योधनस्तव ॥ अवहारंततश्चक्रेशल्यस्यानुमतेनृप ॥ ४ ॥ कृतवर्मारथैस्तूर्णंवृतोभारततावकैः ॥ नारायणावशेषैश्चशिबिरायैवदुद्रुवे ॥ ५ ॥ गांधाराणांसहस्रेणशकुनिःपरिवारितः ॥ हतमाधिरथिंदृष्ट्वाशिबिरायैवदुद्रुवे ॥ ६ ॥ कृपःशारद्वतोराजन्नागानीकेनभारत ॥ महामेघनिभेनाशुशिबिरायैवदुद्रुवे ॥ ७ ॥ अश्वत्थामाततःशूरोविनिःश्वस्यपुनःपुनः ॥ पांडवानांजयंदृष्ट्वाशिबिरायैवदुद्रुवे ॥ ८ ॥ संशप्तकावशिष्टेनबलेनमहतावृतः ॥ सुशर्मापिययौराजन्वीक्षमाणोभयार्दितः ॥ ९ ॥ दुर्योधनोपिनृपतिर्हतसर्वस्वबांधवः ॥ ययौशोकसमाविष्टश्चिंतयन्विमनाबहु ॥ १० ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ इतिकर्णपर्वणिनैलकंठीयेभारतभावदीपेपंचनवतितमोऽध्यायः ९५ ॥ ॥ ९५ ॥ तथेति ॥१॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

छिन्नध्वजेनशल्यस्तुरथेनरथिनांवरः ॥ प्रययौशिबिरायैववीक्षमाणोदिशोदश ॥ ११ ॥ ततोपरेसुबहवोभारतानांमहारथाः ॥ प्राद्रवंतभयत्रस्ताःक्रियाविप्रविचेतसः ॥ १२ ॥ अस्रक्क्षरंतःसोद्विग्नावेपमानास्तथातुराः ॥ कुरवोदुद्रुवुःसर्वेदृष्ट्वाकर्णंनिपातितं ॥ १३ ॥ प्रशंसंतोर्जुनंकेचित्केचित्कर्णंमहारथाः ॥ व्यद्रवंतदिशोभीताःकुरवःकुरुसत्तम ॥ १४ ॥ तेषांयोधसहस्राणांतावकानांमहामृधे ॥ नासीत्तत्रपुमान्कश्चिद्योयुद्धायमनोदधे ॥ १५ ॥ हतेकर्णेमहाराजनिराशाःकुरवोभवन् ॥ जीवितेप्यपिराज्येपुदारेपुचधनेपुच ॥ १६ ॥ तान्समानीयपुत्रस्तेयत्नेनमहताविभुः ॥ निवेशायमनोदध्रेदुःखशोकसमन्वितः ॥ १७ ॥ तस्याज्ञांशिरसायोधाःपरिगृह्यविशांपते ॥ विवर्णवदनाराजन्व्यविशंतमहारथाः ॥ १८ ॥ इतिश्रीमहाभारतेकर्णपर्वणिशिबिरप्रयाणेपंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ ९५ ॥ ॥ ९५ ॥ संजयउवाच तथानिपातितेकर्णेपरसैन्येचविद्रुते ॥ आश्लिष्यपार्थंदाशार्होहर्षाद्वचनमब्रवीत् ॥ १ ॥ हतोवज्रभृतावृत्रस्त्वयाकर्णोधनंजय ॥ वृत्रकर्णवधंघोरंकथयिष्यंतिमानवाः ॥ २ ॥ वज्रेणनिहतोवृत्रःसंयुगेभूरितेजसा ॥ त्वयातुनिहतःकर्णोधनुषानिशितैःशरैः ॥ ३ ॥ तमिमंविक्रमंलोकेप्रथितंतेयशस्करं ॥ निवेदयावःकौंतेयकुरुराजस्यधीमतः ॥ ४ ॥ वधंकर्णस्यसंग्रामेदीर्घकालचिकीर्षितं ॥ निवेद्यधर्मराजायत्वमानृण्यंगमिष्यसि ॥ ५ ॥ वर्तमानेमहायुद्धेतवकर्णस्यचोभयोः ॥ द्रष्टुमायोधनंपूर्वमागतोधर्मनंदनः ॥ ६ ॥ भृशंतुगाढविद्धत्वान्नाशकत्स्थातुमाहवे ॥ ततःसशिबिरंगत्वास्थितवान्पुरुषर्षभः ॥ ७ ॥ तथेत्युक्तःकेशवस्तुपार्थेनयदुपुंगवः ॥ पर्यावर्तयदव्यग्रोरथंरथवरस्यतं ॥ ८ ॥ एवमुक्त्वार्जुनंकृष्णःसैनिकानिदमब्रवीत् ॥ परानभिमुखायत्तास्तिष्ठध्वंभद्रमस्तुवः ॥ ९ ॥ धृष्टद्युम्नंयुधामन्युंमाद्रीपुत्रौवृकोदरं ॥ युयुधानंचगोविंदइदंवचनमब्रवीत् ॥ १० ॥ यावदावेद्यतेराज्ञेहतःकर्णोर्जुननवै ॥ तावद्भवद्भिर्यत्तैस्तुभवितव्यंनराधिपः ॥ ११ ॥ सतैःशूरैरनुज्ञातोययौराजनिवेशनं ॥ पार्थमादायगोविंदोददर्शचयुधिष्ठिरं ॥ १२ ॥ शयानंराजशार्दूलंकांचनेशयनोत्तमे ॥ अगृह्णीतांचमुदितौचरणौपार्थिवस्यतौ ॥ १३ ॥ तयोःप्रहर्षमालक्ष्यहर्षादश्रूण्यवर्तयत् ॥ राधेयंनिहतंमत्वासमुत्तस्थौयुधिष्ठिरः ॥ १४ ॥ उवाचचमहाबाहुःपुनःपुनररिंदमः ॥ वासुदेवार्जुनौप्रेम्णातावुभौपर्यष्वजे ॥ १५ ॥ तत्तस्मैतद्यथावृत्तंवासुदेवःसहार्जुनः ॥ कथयामासकर्णस्यनिधनंयदुपुंगवः ॥ १६ ॥ ईषदुत्स्मयमानस्तुकृष्णोराजानमब्रवीत् ॥ युधिष्ठिरंहतामित्रंकृतांजलिरथाच्युतः ॥ १७ ॥ ॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

दिष्ट्यागांडीवधन्वाचपांडवश्चवृकोदरः ॥ त्वंचापिकुशलीराजन्माद्रीपुत्रौचपांडवौ ॥ १८ ॥ मुक्तावीरक्षयादस्मात्संग्रामाल्लोमहर्षणात् ॥ क्षिप्रमुत्तरकालानि
कुरुकार्याणिपांडव ॥ १९ ॥ हतोवैकर्तनोराजन्सूतपुत्रोमहारथः ॥ दिष्ट्याजयसिराजेंद्रदिष्ट्यावर्धसिभारत ॥ २० ॥ यस्तुद्यूतजितांकृष्णांप्राहसत्पुरुषाधमः ॥
तस्याद्यसूतपुत्रस्यभूमिःपिबतिशोणितं ॥ २१ ॥ शेतेसौशरपूर्णांगःशत्रुस्तेकुरुपुंगव ॥ तंपश्यपुरुषव्याघ्रविभिन्नंबहुभिःशरैः ॥ २२ ॥ हतामित्रामिमामुर्वी
मनुशाधिमहाभुज ॥ यत्तोभूत्वासहास्माभिर्भुंक्ष्वभोगांश्चपुष्कलान् ॥ २३ ॥ संजय उवाच इतिश्रुत्वावचस्तस्यकेशवस्यमहात्मनः ॥ धर्मपुत्रःप्रहृष्टा
त्मादाशार्हंवाक्यमब्रवीत् ॥ २४ ॥ दिष्ट्यादिष्ट्येतिराजेंद्रवाक्यंचेदमुवाचह ॥ नैतच्चित्रंमहाबाहोत्वयिदेवकिनंदन ॥ २५ ॥ त्वयासारथिनापार्थोयत्नवानहनच्च
तं ॥ नतच्चित्रंमहाबाहोयुष्मद्बुद्धिप्रसादजं ॥ २६ ॥ प्रगृह्यचकुरुश्रेष्ठसांगदंदक्षिणंभुजं ॥ उवाचधर्मभृत्पार्थउभौतौकेशवार्जुनौ ॥ २७ ॥ नरनारायणौदेवौ
कथितौनारदेनमे ॥ धर्मात्मानौमहात्मानौपुराणावृषिसत्तमौ ॥ २८ ॥ असकृच्चापिमेधावीकृष्णद्वैपायनोमम ॥ कथामेतांमहाभागांकथयामासतत्त्ववित् ॥
॥ २९ ॥ तवकृष्णप्रसादेनपांडवोयंधनंजयः ॥ जिगायाभिमुखःशत्रून्नचासीद्विमुखःक्वचित् ॥ ३० ॥ जयश्चैवध्रुवोस्माकंनत्वस्माकंपराजयः ॥ यदात्वंयुधिपा
र्थस्यसारथ्यमुपजग्मिवान् ॥ ३१ ॥ भीष्मोद्रोणश्चकर्णश्चमहात्मागौतमःकृपः ॥ अन्येचबहवःशूरायेचतेषांपदानुगाः ॥ ३२ ॥ त्वद्बुद्ध्यानिहतेकर्णेहतागोविंद
सर्वथा ॥ इत्युक्त्वाधर्मराजस्तुरथंहेमविभूषितं ॥ ३३ ॥ श्वेतवर्णैर्हयैर्युक्तंकालवालैर्मनोजवैः ॥ आस्थायपुरुषव्याघ्रःस्वबलेनाभिसंवृतः ॥ ३४ ॥ प्रययौसमहा
बाहुर्द्रष्टुमायोधनंतदा ॥ कृष्णार्जुनाभ्यांवीराभ्यामनुमंत्र्यततःप्रियं ॥ ३५ ॥ आभाषमाणस्तौवीरावुभौमाधवफाल्गुनौ ॥ सददर्शरणेकर्णंशयानंपुरुषर्षभं ॥
॥ ३६ ॥ यथाकदंबकुसुमंकेसरैःसर्वतोवृतं ॥ चितंशरशतैःकर्णंधर्मराजोददर्शसः ॥ ३७ ॥ गंधतैलावसिक्ताभिःकांचनीभिःसहस्रशः ॥ दीपिकाभिःकृतोद्यो
तंपश्यंतेवैवृषंतदा ॥ ३८ ॥ संछिन्नभिन्नकवचंबाणैश्चविदलीकृतं ॥ सपुत्रंनिहतंदृष्ट्वाकर्णंराजायुधिष्ठिरः ॥ ३९ ॥ संजातप्रत्ययोतीववीक्ष्यचैवंपुनःपुनः ॥
प्रशशंसनरव्याघ्रावुभौमाधवपांडवौ ॥ ४० ॥ अद्यराजास्मिगोविंदपृथिव्यांभ्रातृभिःसह ॥ त्वयानाथेनवीरेणविदुषापरिपालितः ॥ ४१ ॥ हतंश्रुत्वानरव्या
घ्रंराधेयमतिमानिनं ॥ निराशोद्यदुरात्मासौधार्तराष्ट्रोभविष्यति ॥ ४२ ॥ जीवितेचैवराज्येचहतेराधात्मजेरणे ॥ त्वत्प्रसादाद्वयंचैवकृतार्थाःपुरुषर्षभ ॥ ४३ ॥

दिष्ट्याजयसिगोविंददिष्ट्याशत्रुर्निपातितः॥ दिष्ट्यागांडीवधन्वाचविजयीपांडुनंदनः॥४४॥ त्रयोदशसमास्तीर्णाजागरेणसुदुःखिताः॥ स्वप्स्यामोद्यसुखं
रात्रौत्वत्प्रसादान्महाभुज॥ ४५॥ एवंसबहुशोराजाप्रशशंसजनार्दनं॥ अर्जुनंचकुरुश्रेष्ठंधर्मराजोयुधिष्ठिरः॥ ४६॥ संजयउवाच दृष्ट्वाचनिहतंक
र्णंसपुत्रंपार्थसायकैः॥ पुनर्जातमिवात्मानंमेनेचसमहीपतिः॥ ४७॥ समेत्यचमहाराजकुंतीपुत्रंयुधिष्ठिरं॥ हर्षयंतिस्मराजानंहर्षयुक्तामहारथाः॥४८॥ न
कुलःसहदेवश्चपांडवश्चवृकोदरः॥ सात्यकिश्चमहाराजवृष्णीनांप्रवरोरथः॥ ४९॥ धृष्टद्युम्नःशिखंडीचपांडुपांचालसृंजयाः॥ पूजयंतिस्मकौंतेयंनिहतेसूत
नंदने॥ ५०॥ तेवर्धयित्वानृपतिंधर्मात्मानंयुधिष्ठिरं॥ जितकाशिनोलब्धलक्ष्यायुद्धशौंडाःप्रहारिणः॥ ५१॥ स्तुवंतस्तवयुक्ताभिर्वाग्भिःकृष्णौपरंतपौ॥ ज
ग्मुःस्वशिबिरायैवमुदायुक्तामहारथाः॥ ५२॥ एवमेषक्षयोवृत्तःसुमहाँल्लोमहर्षणः॥ तवदुर्मंत्रितेराजन्किमर्थमनुशोचसि॥ ५३॥ वैशंपायनउवाच
श्रुत्वैतदप्रियंराजाधृतराष्ट्रोंबिकासुतः॥ पपातभूमौनिश्चेष्टश्छिन्नमूलइवद्रुमः॥५४॥ तथासापतितादेवीगांधारीदीर्घदर्शिनी॥ शुशोचबहुलालापैःकर्णस्य
निधनंयुधि॥ ५५॥ तांपर्यगृह्णाद्विदुरोनृपतिंसंजयस्तथा॥ पर्याश्वासयतांचैवतावुभावेवभूमिपं॥ ५६॥ तथैवोत्थापयामासुर्गांधारींकुरुयोषितः॥ सदैवंप
रमंमत्वाभवितव्यंचपार्थिवः॥ ५७॥ परांपीडांसमाश्रित्यनष्टचित्तोमहातपाः॥ चिंताशोकपरीतात्मानजज्ञेमोहपीडितः॥ ससमाश्वासितोराजातूष्णीमासी
द्विचेतनः॥ ५८॥ इमंमहायुद्धमखंमहात्मनोधनंजयस्याधिरथेश्चयःपठेत्॥ ससम्यगिष्टस्यमखस्ययत्फलंतदाप्नुयात्संश्रवणाच्चभारत॥ ५९॥ मखोहिविष्णु
र्भगवान्सनातनोवदंतितच्चास्यनिलेंदुभानवः॥ अतोनसूयुःशृणुयात्पठेच्चयःससर्वलोकानुचरःसुखीभवेत्॥ ६०॥ तांसर्वदाभक्तिमुपागतानराःपठंतिपु
ण्यांवरसंहितामिमां॥ धनेनधान्येनयशसाचमानुषानंदंतितेनात्रविचारणास्ति॥६१॥ अतोनसूयुःशृणुयात्सदातुवैनरःससर्वाणिसुखानिचाप्नुयात्॥ वि
ष्णुःस्वयंभूर्भगवान्भवश्चतुष्यंतितेतस्यनरोत्तमस्य॥६२॥ वेदावाप्तिर्ब्राह्मणस्येहदृष्टारणेबलंक्षत्रियाणांजयोयुधि॥ धनज्येष्ठाश्चापिसर्वेतिवैश्याःशूद्राआरोग्यं
प्राप्नुवंतीहसर्वे॥ ६३॥ तथैवविष्णुर्भगवान्सनातनःसचात्रदेवःपरिकीर्त्यतेयतः॥ ततःसकामाँल्लभतेसुखीनरोमहामुनेस्तस्यवचोर्चितंयथा॥ ६४॥

कपिलानांमवत्सानांवर्षमेकंनिरंतरं ॥ योऽदद्यात्सुकृतंतद्धिश्रवणात्कर्णपर्वणः ॥ ६५॥ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांकर्णपर्वणियुधिष्ठिरहर्षेपपणवतितमोऽध्यायः॥ ९६ ॥ कर्णपर्वसमाप्तं ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥


अतःपरंशल्यपर्वभविष्यति तस्यायमाद्यःश्लोकः जनमेजयउवाच एवंनिपातितेकर्णेसमरेसव्यसाचिना ॥ अल्पावशिष्टाःकुरवःकिमकुर्वतवैद्विज ॥ १ ॥

अत्रादिपर्वोक्ताध्यायसंख्यावैषम्यंश्लोकसंख्यावैषम्यंलिपिकरप्रमादादिनाद्रष्टव्यं

इदं कर्णपर्व मुंबय्याख्यराजधान्यां गणपतकृष्णाजीत्यभिधानां मुद्रायंत्रालये मुद्रितं शकाब्दाः १७८५

॥ इति श्रीमहाभारते कर्णपर्व समाप्तम् ॥

॥ अथ श्रीमहाभारते शल्यपर्व प्रारभ्यते ॥


शैल्यसेनाधिपति अभिषेक

श्रीगणेशायनमः ॥ उक्तासंगतिःकर्णपर्वादौ एवंनिपातितइति उद्यमंपलायनंवाचकुरितिप्रष्टुरभिप्रायः अल्पाःअवशिष्टाइतिच्छेदः अत्राकारलोपआर्षः ॥१ ॥ तत्रद्वितीयमेवमत्वाह उदीर्यमाणमिति पांडव बलस्योत्कर्षंदृष्ट्वाकिंप्रापद्यत पलायनमेवास्यश्रेयइतिभावः ॥ २ ॥ ३ ॥ कृत्स्नसैन्यवधेनदुर्योधनःपलायनमेवकृतवानित्याह ततःकर्णेहतेइत्यादिनाप्राङ्मुखःप्राद्रवद्भयादित्यंतेनग्रंथेन ॥४॥ ५ ॥ ६ ॥

श्रीगणेशायनमः॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥देवींसरस्वतींचैवततोजयमुदीरयेत् ॥ १ ॥ जनमेजयउवाच एवंनिपातितेकर्णेसमरेसव्यसाचिना॥ अल्पावशिष्टाःकुरवःकिमकुर्वतवैद्विज ॥ १ ॥ उदीर्यमाणंचबलंदृष्ट्वाराजासुयोधनः ॥ पांडवैःप्राप्तकालंचकिंप्रापद्यतकौरवः ॥ २ ॥ एतदिच्छाम्यहंश्रोतुंतदाचक्ष्वद्विजोत्तम ॥ नहितृप्यामिपूर्वेषांशृण्वानश्चरितंमहत् ॥ ३ ॥ वैशंपायनउवाच ततःकर्णेहतेराजन्धार्त्तराष्ट्रःसुयोधनः ॥ भृशंशोकार्णवेमग्नोनिराशःसर्वतोभवत्॥४॥हाकर्णहाकर्णइतिशोचमानःपुनःपुनः॥कृच्छ्रात्स्वशिबिरंप्रायाद्धतशेषैर्नृपैःसह॥५॥ससमाश्वास्यमानोपिहेतुभिःशास्त्रनिश्चितैः॥राजभिर्नालभच्छर्मसूतपुत्रवधंस्मरन्॥ ६ ॥ सदैवंबलवन्मत्वाभवितव्यंचपार्थिवः ॥ संग्रामेनिश्चयंकृत्वापुनर्युद्धायनिर्ययौ ॥ ७ ॥ शल्यंसेनापतिंकृत्वाविधिवद्राजपुंगवः ॥ रणायनिर्ययौराजाहतशेषैर्नृपैःसह ॥ ८ ॥ ततःसुतुमुलंयुद्धंकुरुपांडवसेनयोः ॥ बभूवभरतश्रेष्ठदेवासुररणोपमं ॥ ९ ॥ ततःशल्योमहाराजकृत्वाकदनमाहवे ॥ ससैन्योथसमध्याह्नेधर्मराजेनघातितः ॥ १० ॥ ततोदुर्योधनोराजाहतबंधूरणाजिरात् ॥ अपसृत्यह्रदंघोरंविवेशरिपुजाद्भयात् ॥ ११ ॥ अथापराह्णेतस्याह्नःपरिवार्यसुयोधनः ॥ ह्रदादाहूययुद्धायभीमसेनेनपातितः ॥ १२ ॥ तस्मिन्हतेमहेष्वासेहतशिष्टास्त्रयोरथाः ॥ संरंभान्निशिराजेंद्रजघ्नुःपांचालसोमकान् ॥ १३ ॥ ततःपूर्वाह्णसमयेशिबिरादेत्यसंजयः ॥ प्रविवेशपुरींदीनोदुःखशोकसमन्वितः ॥ १४ ॥ सप्रविश्यपुरींसूतोभुजावुच्छ्रित्यदुःखितः ॥ वेपमानस्ततोराज्ञःप्रविवेशनिकेतनं ॥ १५ ॥ रुरोदचनरव्याघ्रहाराजन्निितिदुःखितः ॥ अहोबतविनष्टाःस्मनिधनेनमहात्मनः ॥ १६ ॥ विधिश्चबलवानत्रपौरुषंतुनिरर्थकं ॥ शक्रतुल्यबलाःसर्वेयथाऽवध्यंतपांडवैः ॥ १७ ॥ दृष्ट्वैवचपुरेराजन्जनःसर्वःससंजयं ॥ क्लेशेनमहतायुक्तंसर्वतोराजसत्तमं ॥ १८ ॥ रुरोदचभृशोद्विग्नोहाराजन्निितिविस्वरं ॥ आकुमारंनरव्याघ्रतत्रतत्रसमंततः ॥ १९ ॥ आर्त्तनादंततश्चक्रेश्रुत्वाविनिहतंनृपं ॥ धावतश्चाप्यपश्यामस्तत्रतान्पुरुषर्षभान् ॥ २० ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ एवंसर्वान्घातयित्वापलायनेदुर्योगंलब्ध्वापिमरणमेवप्रापेत्याह अथेति अपराह्णेअहरर्धे ॥ १२ ॥ १३ ॥ ततःरात्रिवृत्तदर्शनानंतरं ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ जनःरुरोदेतिद्वयोरन्वयः ॥ १८ ॥ १९ ॥ अपश्यामःअडागमोविसर्गोवाआर्षः वैशंपायनवाक्यमिदं ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ वाक्येनवचनेनसंदिग्धयावाक्यसंदिग्धया ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

नष्टचित्तानिवोन्मत्तान्शोकेनभृशपीडितान् ॥ तथासविक्लवःसूतःप्रविश्यनृपतिक्षयं ॥ २१ ॥ ददर्शनृपतिश्रेष्ठंप्रज्ञाचक्षुषमीश्वरं ॥ तथाचासीनमनघंसमंतात्परिवारितं ॥ २२ ॥ स्नुषाभिर्भरतश्रेष्ठगांधार्याविदुरेणच ॥ तथान्यैश्चसुहृद्भिश्चज्ञातिभिश्चहितैषिभिः ॥ २३ ॥ तमेवचार्थंध्यायंतंकर्णस्यनिधनंप्रति ॥ रुदन्नेवाब्रवीद्वाक्यंराजानंजनमेजय ॥ २४ ॥ नातिहृष्टमनाःसूतोवाक्यसंदिग्धयागिरा ॥ संजयोऽहंनरव्याघ्रनमस्तेभरतर्षभ ॥ २५ ॥ मद्राधिपोहतःशल्यःशकुनिःसौबलस्तथा ॥ उलूकःपुरुषव्याघ्रकैतव्योदृढविक्रमः ॥ २६ ॥ संशप्तकाहताःसर्वेकांबोजाश्चशकैःसह ॥ म्लेच्छाश्चपार्वतीयाश्चयवनाविनिपातिताः ॥ २७ ॥ प्राच्याहतामहाराजदाक्षिणात्याश्चसर्वशः ॥ उदीच्याश्चहताःसर्वेप्रतीच्याश्चनरोत्तमाः ॥ २८ ॥ राजानोराजपुत्राश्चसर्वेतेनिहतानृप ॥ दुर्योधनोहतोराजायथोक्तंपांडवेनह ॥ २९ ॥ भग्नसक्थोमहाराजशेतेपांसुपुरूषितः ॥ धृष्टद्युम्नोमहाराजशिखंडीचापराजितः ॥ ३० ॥ उत्तमौजायुधामन्युस्तथाराजन्प्रभद्रकाः ॥ पंचालश्चनरव्याघ्रचेदयश्चनिषूदिताः ॥ ३१ ॥ तवपुत्राहताःसर्वेद्रौपदेयाश्चभारत ॥ कर्णपुत्रोहतःशूरोवृषसेनःप्रतापवान् ॥ ३२ ॥ नराविनिहताःसर्वेगजाश्चविनिपातिताः ॥ रथिनश्चनरव्याघ्रहयाश्चनिहतायुधि ॥ ३३ ॥ किंचिच्छेषंचशिबिरंतावकानांकृतंप्रभो ॥ पांडवानांकुरूणांचसमासाद्यपरस्परं ॥ ३४ ॥ प्रायःस्त्रीशेषमभवज्जगत्कालेनमोहितं ॥ सप्तपांडवतःशेषाधार्तराष्ट्रास्त्रयोरथाः ॥ ३५ ॥ तेचैवभ्रातरःपंचवासुदेवोथसात्यकिः ॥ कृपश्चकृतवर्माचद्रौणिश्चजयतांवरः ॥ ३६ ॥ तथाप्येतेमहाराजरथिनोनृपसत्तम ॥ अक्षौहिणीनांसर्वासांसमेतानांजनेश्वर ॥ ३७ ॥ एतेशेषामहाराजसर्वेन्येनिधनंगताः ॥ कालेननिहतंसर्वंजगद्वैभरतर्षभ ॥ ३८ ॥ दुर्योधनंवैपुरतःकृत्वावैरंचभारत ॥ वैशंपायनउवाच एतच्छ्रुत्वावचःक्रूरंधृतराष्ट्रोजनेश्वरः ॥ ३९ ॥ निपपातसराजेंद्रोगतसत्वोमहीतले ॥ तस्मिन्निपतितेभूमौविदुरोपिमहायशाः ॥ ४० ॥ निपपातमहाराजशोकव्यसनकर्शितः ॥ गांधारीचनृपश्रेष्ठसर्वाश्चकुरुयोषितः ॥ ४१ ॥ पतिताःसहसाभूमौश्रुत्वाक्रूरंवचस्तदा ॥ निःसंज्ञंपतितंभूमौतदासीद्राजमंडलं ॥ ४२ ॥ प्रलापयुक्तामहतीचित्रन्यस्तापटेयथा ॥ कृच्छ्रेणतुततोराजाधृतराष्ट्रोमहीपतिः ॥ ४३ ॥ शनैरलभतप्राणान्पुत्रव्यसनकर्शितः ॥ लब्ध्वातुसनृपःसंज्ञांवेपमानःसुदुःखितः ॥ ४४ ॥ उदीक्ष्यचदिशःसर्वाःक्षत्तारंवाक्यमब्रवीत् ॥ विद्वन्क्षत्तर्महाप्राज्ञत्वंगतिर्भरतर्षभ ॥ ४५ ॥

॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेप्रथमोऽध्यायः ॥ १ ॥ ॥ ५ ॥ ॥ ५ ॥ विसृष्टास्वि

ममानाथस्यसुभृशंपुत्रैर्हीनस्यसर्वशः ॥ एवमुक्त्वाततोभूयोविसंज्ञोनिपपातह ॥ ४६ ॥ तंतथापतितंदृष्ट्वाबांधवायेस्यकेचन ॥ शीतैस्तेसिषिचुस्तोयैर्विव्यजु व्यंजनैरपि ॥ ४७॥ सतुदीर्घेणकालेनप्रत्याश्वस्तोनराधिपः ॥ तूष्णींदध्यौमहीपालःपुत्रव्यसनकर्शितः ॥ ४८ ॥ निःश्वसन्जिह्मगइवकुंभक्षिप्तोविशांपते ॥ संजयोप्यरुदत्तत्रदृष्ट्वाराजानमातुरं ॥ ४९ ॥ तथासर्वाःस्त्रियश्चैवगांधारीचयशस्विनी ॥ ततोदीर्घेणकालेनविदुरंवाक्यमब्रवीत् ॥ ५० ॥ धृतराष्ट्रोनरश्रेष्ठमुह्यमानोमुहुर्मुहुः ॥ गच्छंतुयोपितःसर्वागांधारीचयशस्विनी ॥ ५१ ॥ तथेमेसुहृदःसर्वेभ्राम्यतेमेमनोभृशं ॥ एवमुक्तस्ततःक्षत्ताताःस्त्रियोभरतर्षभ ॥ ५२ ॥ विसर्जयामासशनैर्वेपमानःपुनःपुनः ॥ निश्चक्रमुस्ततःसर्वाःस्त्रियोभरतसत्तम ॥ ५३ ॥ सुहृदश्चतथासर्वेदृष्ट्वाराजानमातुरं ॥ ततोनरपतिंतूर्णलब्धसंज्ञंपरंतप ॥ ॥ ५४ ॥ अवैक्षत्संजयोदीनंरोदमानंभृशातुरं ॥ प्रांजलिर्निःश्वसंतंचतंनरेंद्रंमुहुर्मुहुः ॥ समाश्वासयतक्षत्तावचसामधुरेणच ॥ ५५ ॥ इतिश्रीमहाभारतेशल्यपर्वणिधृतराष्ट्रप्रमोहेप्रथमोऽध्यायः ॥ १ ॥ ॥ ५ ॥ ॥ ५ ॥ वैशंपायनउवाच विसृष्टास्वथनारीषुधृतराष्ट्रोंबिकासुतः ॥ विललापमहाराजदुःखाद्दुःखांतरंगतः ॥ १ ॥ सधूममिवनिःश्वस्यकरौधुन्वन्पुनःपुनः ॥ विचिंत्यचमहाराजवचनंचेदमब्रवीत् ॥ २ ॥ धृतराष्ट्रउवाच · अहोबतमहद्दुःखंयदहंपांडवान्रणे ॥ क्षेमिणश्चाव्ययांश्चैवत्वत्तःसूतशृणोमिवै ॥ ३ ॥ वज्रसारमयंनूनंहृदयंसुदृढंमम ॥ यच्छ्रुत्वानिहतान्पुत्रान्दीर्यतेनसहस्रधा ॥ ४ ॥ चिंतयित्वावयस्तेषांबालक्रीडांचसंजय ॥ हतान्पुत्रानशेषेणदीर्यतेमेभृशंमनः ॥ ५ ॥ अनेत्रत्वाद्यदेतेषांनमेरूपनिदर्शनं ॥ पुत्रस्नेहकृताप्रीतिर्नित्यमेतेषुधारिता ॥ ६ ॥ बालभावमतिक्रम्ययौवनस्थांश्चतानहं ॥ मध्यप्राप्तांस्तथाश्रुत्वाहृष्टआसंतदानघ ॥ ७ ॥ तानद्यनिहतान्श्रुत्वाहतैश्वर्यान्हतौजसः ॥ नलभेवैक्वचिच्छांतिंपुत्राधिभिरभिप्लुतः ॥ ८ ॥ एह्येहिपुत्रराजेंद्रममानाथस्यसांप्रतं ॥ त्वयाहीनोमहाबाहोकांनुयास्याम्यहंगतिं ॥ ९ ॥ कथंत्वंपृथिवीपालांस्त्यक्त्वातातसमागतान् ॥ शेषेविनिहतोभूमौप्राकृतःकुनृपोयथा ॥ १० ॥ गतिर्भूत्वामहाराजज्ञातीनांसुहृदांतथा ॥ अंधंवृद्धंचमांवीरविहायक्वनुयास्यसि ॥ ११ ॥

ति ॥ १ ॥ सधूममिव अत्युष्णमित्यर्थः ॥ २ ॥ पांडवाःक्षेमिणइत्येकंदुःखंस्वीयाश्चसर्वेनिहताइत्यपरंतेद्वेआहद्वाभ्यां अहोइति ॥ ३ ॥ ४ ॥ वयःएतावत्कालपर्यंतंप्रौढत्वं ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ प्राकृतोनीचः कुनृपःकुत्सितान्नरान्पातीतिनीचपरिजनइत्यर्थः ॥ १० ॥ ११ ॥

साकृपासाचतेप्रीतिःसाचराजन्सुमानिता॥कथंविनिहतःपार्थैःसंयुगेष्वपराजितः॥१२॥कोनुमामुत्थितंवीरतातताततितिवक्ष्यति॥ महाराजेतिसततंलोकना
थेतिचासकृत्॥१३॥परिष्वज्यचमांकंठेस्नेहेनक्लिन्नलोचनः॥अनुशाधीतिकौरव्यतत्साधुवदमेवचः॥१४॥ननुनामाहमश्रौषंवचनंतवपुत्रक॥भूयसी
ममपृथ्वीयंयथापार्थस्यनोतथा॥१५॥भगदत्तःकृपःशल्यआवंत्योथजयद्रथः॥भूरिश्रवाःसोमदत्तोमहाराजश्चबाह्लिकः॥१६॥अश्वत्थामाचभोजश्च
मागधश्चमहाबलः॥बृहद्बलश्चकाशीशःशकुनिश्चापिसौबलः॥१७॥म्लेच्छाश्चशतसाहस्राःशकाश्चयवनैःसह॥सुदक्षिणश्चकांबोजस्त्रिगर्ताधिपतिस्तथा॥
॥१८॥भीष्मःपितामहश्चैवभारद्वाजोथगौतमः॥श्रुतायुश्चायुतायुश्चशतायुश्चापिवीर्यवान्॥१९॥जलसंधोथार्ष्यशृंगीराक्षसश्चाप्यलायुधः॥अलंबुषो
महाबाहुःसुबाहुश्चमहारथः॥२०॥एतेचान्येचबहवोराजानोराजसत्तम॥ मदर्थमुद्यताःसर्वेप्राणांस्त्यक्त्वाधनानिच ॥ २१ ॥ तेषांमध्येस्थितोयुद्धेभ्रातृ
भिःपरिवारितः॥योधयिष्याम्यहंपार्थान्पंचालांश्चैवसर्वशः॥२२॥चेदींश्चनृपशार्दूलद्रौपदेयांश्चसंयुगे॥सात्यकिंकुंतिभोजंचराक्षसंचघटोत्कचं॥ २३॥
एकोप्येषांमहाराजसमर्थःसन्निवारणे॥समरेपांडवेयानांसंक्रुद्धोह्यभिधावतां॥२४॥किंपुनःसहितावीराःकृतवैराश्चपांडवैः॥अथवासर्वएवैतेपांडवस्या
नुयायिभिः॥२५॥योत्स्यंतेसहराजेंद्रहनिष्यंतिचतान्मृधे॥कर्णएकोमयासार्द्धंनिहनिष्यतिपांडवान्॥२६॥ततोनृपतयोवीराःस्थास्यंतिममशासने॥य
श्चतेषांप्रणेतावैवासुदेवोमहाबलः॥२७॥नससंनह्यतेराजन्निति मामब्रवीद्वचः॥तस्याथवदतःसूतबहुशोममसन्निधौ॥२८॥शक्तितोह्यनुपश्यामिनि
हतान्पांडवान्रणे॥तेषांमध्येस्थितायत्रहन्यंतेममपुत्रकाः॥२९॥व्यायच्छमानाःसमरेकिमन्यद्भागधेयतः॥भीष्मश्चनिहतोयत्रलोकनाथःप्रतापवान्॥
॥३०॥शिखंडिनंसमासाद्यमृगेंद्रइवजंबुकं॥द्रोणश्चब्राह्मणोयत्रसर्वशस्त्रास्त्रपारगः ॥ ३१ ॥ निहतःपांडवैःसंख्येकिमन्यद्भागधेयतः॥कर्णश्चनिहतःसं
ख्येदिव्यास्त्रज्ञोमहाबलः॥३२॥ भूरिश्रवाहतोयत्रसोमदत्तश्चसंयुगे॥बाह्लिकश्चमहाराजकिमन्यद्भागधेयतः ॥ ३३ ॥ भगदत्तोहतोयत्रगजयुद्धविशार
दः॥जयद्रथश्चनिहतःकिमन्यद्भागधेयतः ॥३४॥ सुदक्षिणोहतोयत्रजलसंधश्चपौरवः॥श्रुतायुश्चायुतायुश्चकिमन्यद्भागधेयतः॥ ३५॥ महाबलस्तथा
पांड्यःसर्वशस्त्रभृतांवरः॥निहतःपांडवैःसंख्येकिमन्यद्भागधेयतः॥३६॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

प्रतिमानंकेतुभूतं॥ ३७॥३८॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥५२॥५३॥५४॥५५॥५६॥५७॥५८॥५९॥६०॥ सम्यगवेक्ष्यनिपुणंविभाव्या

बृहद्बलोहतोयत्रमागधश्चमहाबलः॥ उग्रायुधश्चविक्रांतःप्रतिमानंधनुष्मतां ॥ ३७ ॥ आवंत्योनिहतोयत्रत्रैगर्त्तश्चजनाधिपः ॥ संशप्तकाश्चनिहताःकिम
न्यद्भागधेयतः ॥ ३८ ॥ अलंबुपस्तथाराजन्राक्षसश्चाप्यलायुधः ॥ आर्ष्यशृंगिश्चनिहतःकिमन्यद्भागधेयतः ॥ ३९ ॥ नारायणाहतायत्रगोपालायुद्धदु
र्मदाः॥ म्लेच्छाश्चबहुसाहस्राःकिमन्यद्भागधेयतः॥४०॥ शकुनिःसौबलोयत्रकैतव्यश्चमहाबलः॥ निहतःसबलोवीरःकिमन्यद्भागधेयतः॥४१॥ एतेचान्ये
चबहवःकृतास्त्रायुद्धदुर्मदाः॥ राजानोराजपुत्राश्चशूराःपरिघबाहवः॥ ४२ ॥ निहताबहवोयत्रकिमन्यद्भागधेयतः॥ यत्रशूरामहेष्वासाःकृतास्त्रायुद्धदुर्मदाः
॥ ४३ ॥ बहवोनिहतासूतमहेंद्रसमविक्रमाः॥ नानादेशसमावृत्ताःक्षत्रियायत्रसंजय॥ ४४॥ निहताःसमरेसर्वेकिमन्यद्भागधेयतः ॥ पुत्राश्चमेविनिहताः
पौत्राश्चैवमहाबलाः॥ ४५॥ वयस्याभ्रातरश्चैवकिमन्यद्भागधेयतः॥ भागधेयसमायुक्तोध्रुवमुत्पद्यतेनरः ॥ ४६ ॥ यस्तुभाग्यसमायुक्तःसशुभंप्राप्नुयान्न
रः॥ अहंवियुक्तःस्तैर्भाग्यैःपुत्रैश्चैवहसंजय॥ ४७॥ कथमद्यभविष्यामिवृद्धःशत्रुवशंगतः ॥ नान्यदत्रपरंमन्येवनवासादृतेप्रभो ॥ ४८ ॥ सोहंवनंगमिष्या
मिनिर्बंधुर्ज्ञातिसंक्षये॥ नहिमेऽन्यद्भवेच्छ्रेयोवनाभ्युपगमादृते॥४९॥ इमामवस्थांप्राप्तस्यलूनपक्षस्यसंजय॥ दुर्योधनोहतोयत्रशल्यश्चनिहतोयुधि॥५०॥
दुःशासनोविविंशश्चविकर्णश्चमहाबलः॥ कथंहिभीमसेनस्यश्रोष्येहंशब्दमुत्तमं ॥ ५१ ॥ एकेनसमरेयेनहतंपुत्रशतंमम ॥ असकृद्वदतस्तस्यदुर्योधनवधे
नच॥ ५२ ॥ दुःखशोकाभिसंतप्तोनश्रोष्येपरुषागिरः॥ वैशंपायनउवाच एवंवृद्धश्चसंतप्तःपार्थिवोहतबांधवः॥ ५३॥ मुहुर्मुहुर्मुह्यमानःपुत्राधिभि
रभिप्लुतः॥ विलप्यसुचिरंकालंधृतराष्ट्रोंबिकासुतः ॥ ५४॥ दीर्घमुष्णंसनिःश्वस्यचिंतयित्वापराभवं॥ दुःखेनमहताराजन्संतप्तोभरतर्षभः ॥ ५५ ॥ पुनर्गा
वल्गणिंसूतंपर्यपृच्छद्यथातथं॥ धृतराष्ट्रउवाच भीष्मद्रोणौहतौश्रुत्वासूतपुत्रंचघातितं ॥ ५६ ॥ सेनापतिंप्रणेतारंकमकुर्वतमामकाः ॥ यंयंसेनाप्रणे
तारंयुधिकुर्वंतिमामकाः॥ ५७॥ अचिरेणैवकालेनतंतंनिघ्नंतिपांडवाः॥ रणमूर्ध्निहतोभीष्मःपश्यतांवःकिरीटिना ॥ ५८ ॥ एवमेवहतोद्रोणःसर्वेषामेवपश्य
तां॥ एवमेवहतःकर्णःसूतपुत्रःप्रतापवान्॥ ५९॥ सराजकानांसर्वेषांपश्यतांवःकिरीटिना॥ पूर्वमेवाहमुक्तोवैविदुरेणमहात्मना॥ ६०॥ दुर्योधनापराधेनप्र
जेयंविनशिष्यति॥ केचिन्नसम्यक्पश्यंतिमूढाःसम्यगवेक्ष्यच॥ ६१॥ पिमूढास्तथाभूतंतद्वचः केचिन्नपश्यंतीत्युत्तरेणसंबंधः ॥ ६१ ॥

तथाभूतंयथार्थं ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥ शृणिवति ॥

तदिदंममसूढस्यतथाभूतंवचःस्मतत् ॥ यदब्रवीत्सधर्मात्माविदुरोदीर्घदर्शिवान् ॥ तत्तथासमनुप्राप्तंवचनंसत्यवादिनः ॥ ६२ ॥ दैवोपहतचित्तेनयन्मयात
कृतंपुरा ॥ अनयस्यफलंतस्यब्रूहिगावल्गणेपुनः ॥ ६३ ॥ कोवामुखमनीकानामासीत्कर्णेनिपातिते ॥ अर्जुनंवासुदेवंचकोवाप्रत्युद्ययौरथी ॥ ६४ ॥ केऽर
क्षन्दक्षिणंचक्रंमद्रराजस्यसंयुगे ॥ वामंचयोद्धुकामस्यकेवावीरस्यपृष्ठतः ॥ ६५ ॥ कथंचवःसमेतानांमद्रराजोमहारथः ॥ निहतःपांडवैःसंख्येपुत्रोवामम
संजय ॥ ६६ ॥ ब्रूहिसर्वंयथातत्वंभरतानांमहाक्षयं ॥ यथाचनिहतःसंख्येपुत्रोदुर्योधनोमम ॥ ६७ ॥ पंचालाश्चयथासर्वेनिहताःसपदानुगाः ॥ धृष्टद्युम्नःशि
खंडीचद्रौपद्याःपंचचात्मजाः ॥ ६८ ॥ पांडवाश्चयथामुक्तास्तथोभौमाधवौयुधि ॥ कृपश्चकृतवर्माचभारद्वाजस्यचात्मजः ॥ ६९ ॥ यद्यथायादृशंचैवयुद्धं
वृत्तंचसांप्रतं ॥ अखिलंश्रोतुमिच्छामिकुशलोह्यसिसंजय ॥ ७० ॥ इतिश्रीमहाभारतेशल्यपर्वणिधृतराष्ट्रविलापेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥

संजयउवाच शृणुराजन्नवहितोयथावृत्तोमहान्क्षयः ॥ कुरूणांपांडवानांचसमासाद्यपरस्परं ॥ १ ॥ निहतेसूतपुत्रेतुपांडवेनमहात्मना ॥ विद्रुतेषुचसैन्ये
पुसमानीतेपुचासकृत् ॥ २ ॥ घोरेमनुष्यदेहानामाजौनरवरक्षये ॥ यत्तत्कर्णेहतेपार्थःसिंहनादमथाकरोत् ॥ ३ ॥ तदानवसुतान्राजन्प्राविशत्सुमहद्भयं ॥ नसं
धातुमनीकानिनचैवाथपराक्रमे ॥ ४ ॥ आसीद्बुद्धिर्हतेकर्णेतवयोधस्यकस्यचित् ॥ वणिजोनाविभिन्नायामगाधेऽविप्लवाइव ॥ ५ ॥ अपारेपारमिच्छंतोहते
द्वीपेकिरीटिना ॥ सूतपुत्रेहतेराजन्वित्रस्ताःशरविक्षताः ॥ ६ ॥ अनाथानाथमिच्छंतोमृगाःसिंहार्दिताइव ॥ भग्नशृंगाइववृषाःशीर्णदंष्ट्राइवोरगाः ॥ ७ ॥ प्रत्यु
पायामसायाह्नेनिर्जिताःसव्यसाचिना ॥ हतप्रवीराविध्वस्तानिकृत्तानिशितैःशरैः ॥ ८ ॥ सूतपुत्रेहतेराजन्पुत्रास्तेप्राद्रवंस्ततः ॥ विध्वस्तकवचाःसर्वेकांदिशी
काविचेतसः ॥ ९ ॥ अन्योन्यमभिनिघ्नंतोवीक्षमाणाभयाद्दिशः ॥ मामेवनूनंबीभत्सुर्मामेवचवृकोदरः ॥ १० ॥ अभियातीतिमन्वानाःपेतुर्मम्लुश्चभारत ॥
अश्वानन्येगजानन्येरथानन्येमहारथाः ॥ ११ ॥ आरुह्यजवसंपन्नाःपादातान्प्रजहुर्भयात् ॥ कुंजरैःस्यंदनाभग्नाःसादिनश्चमहारथैः ॥ १२ ॥ पदातिसंघा
श्चाश्वौघैःपलायद्भिर्भृशंहताः ॥ व्यालतस्करसंकीर्णेसार्थहीनायथावने ॥ १३ ॥ तथात्वदीयानिहतेसूतपुत्रेतदाभवन् ॥ हतारोहास्तथानागाश्छिन्नहस्तास्तथा
परे ॥ १४ ॥

॥ १ ॥ समानीतेषुयुद्धोन्मुखीकृतेषु ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

॥ १५ ॥ १६ ॥ जघनेअंते प्राणपणेनयुध्यंतमित्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

सर्वपार्थमयंलोकमपश्यन्वैभयार्दिताः ॥ तान्प्रेक्ष्यद्रवतःसर्वान्भीमसेनभयार्दितान् ॥ १५ ॥ दुर्योधनोथस्वंसूतंहाहाकृत्वैवमब्रवीत् ॥ नातिक्रमिष्यतेपार्थोध
नुष्पाणिमवस्थितं ॥ १६ ॥ जघनेयुद्ध्यमानंमांतूर्णमश्वान्प्रचोदय ॥ समरेयुद्ध्यमानंहिकौंतेयोमांधनंजयः ॥ १७ ॥ नोत्सहेताप्यतिक्रांतुंवेलामिवमहार्ण
वः ॥ अद्यार्जुनंसगोविंदंमानिनंचवृकोदरं ॥ १८ ॥ निहत्यशिष्टान्शत्रूंश्चकर्णस्यानृण्यमाप्नुयां ॥ तच्छ्रुत्वाकुरुराजस्यशूरार्यसदृशंवचः ॥ १९ ॥ सूतोहेमप
रिच्छन्नानशनैरश्वानचोदयत् ॥ गजाश्वरथहीनास्तुपादाताश्चैवमारिष ॥ २० ॥ पंचविंशतिसाहस्राःप्राद्रवन्शनकैरिव ॥ तान्भीमसेनःसंक्रुद्धोधृष्टद्युम्नश्च
पार्षतः ॥ २१ ॥ बलेनचतुरंगेणपरिक्षिप्याहनच्छरैः ॥ प्रत्ययुध्यंस्तुतेसर्वेभीमसेनंसपार्षतं ॥ २२ ॥ पार्थपार्षतयोश्चान्येजगृहुस्तत्रनामनी ॥ अक्रुद्ध्यतरणे
भीमस्तैर्मृधेप्रत्यवस्थितैः ॥ २३ ॥ सोवतीर्यरथात्तूर्णंगदापाणिरयुध्यत ॥ नतान्रथस्थोभूमिष्ठान्धर्मापेक्षीवृकोदरः ॥ २४ ॥ योधयामासकौंतेयोभुजवीर्यमु
पाश्रितः ॥ जातरूपपरिच्छन्नांप्रगृह्यमहतींगदां ॥ २५ ॥ न्यवधीत्तावकान्सर्वान्दंडपाणिरिवांतकः ॥ पदातयोहिसंरब्धास्त्यक्तजीवितबांधवाः ॥ २६ ॥ भीम
मभ्यद्रवन्संख्येपतंगाइवपावकं ॥ आसाद्यभीमसेनंतेसंरब्धायुद्धदुर्मदाः ॥ २७ ॥ विनेदुःसहसादृष्ट्वाभूतग्रामाइवांतकं ॥ श्येनवद्व्यचरद्भीमःखड्गेनगदयातथा
॥ २८ ॥ पंचविंशतिसाहस्रांस्तावकानांव्यपोथयत् ॥ हत्वातत्पुरुषानीकंभीमःसत्यपराक्रमः ॥ २९ ॥ धृष्टद्युम्नंपुरस्कृत्यपुनस्तस्थौमहाबलः ॥ धनंजयोरथानी
कमन्वपद्यतवीर्यवान् ॥ ३० ॥ माद्रीपुत्रौचशकुनिंसात्यकिश्चमहाबलः ॥ जवेनाभ्यपतन्हृष्टाघ्नंतोदौर्योधनंबलं ॥ ३१ ॥ तस्याश्ववाहान्सुबहून्तेनिहत्यशि
तैःशरैः ॥ तमन्वधावंस्त्वरितास्तत्रयुद्धमवर्त्तत ॥ ३२ ॥ ततोधनंजयोराजन्रथानीकमगाहत ॥ विश्रुतंत्रिषुलोकेषुगांडीवंव्याक्षिपन्धनुः ॥ ३३ ॥ कृष्णसार
थिमायांतंदृष्ट्वाश्वेतहयंरथं ॥ अर्जुनंचापियोद्धारंत्वदीयाःप्राद्रवन्भयात् ॥ ३४ ॥ विप्रहीनरथाश्चाश्वशरैश्चपरिवारिताः ॥ पंचविंशतिसाहस्राःपार्थमार्छन्पदा
तयः ॥ ३५ ॥ हत्वातत्पुरुषानीकंपंचालानांमहारथः ॥ भीमसेनंपुरस्कृत्यनचिरात्प्रत्यदृश्यत ॥ ३६ ॥ महाधनुर्धरःश्रीमानमित्रगणमर्दनः ॥ पुत्रःपंचालराजस्य
धृष्टद्युम्नोमहायशाः ॥ ३७ ॥ पारावतसवर्णाश्वंकोविदारवरध्वजं ॥ धृष्टद्युम्नंरणेदृष्ट्वात्वदीयाःप्राद्रवन्भयात् ॥ ३८ ॥ गांधारराजंशीघ्रास्त्रमनुसृत्ययशस्विनौ ॥
अचिरात्प्रत्यदृश्येतांमाद्रीपुत्रौससात्यकी ॥ ३९ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

चेकितानःशिखंडीचद्रौपदेयाश्चमारिष ॥ हत्वात्वदीयंसुमहत्सैन्यंशंखानथाधमन् ॥ ४० ॥ तेसर्वेतावकान्प्रेक्ष्यद्रवतोवैपराङ्मुखान् ॥ अभ्यधावंतनिघ्नंतोवृ
पान्जित्वावृषाइव ॥ ४१ ॥ सेनावशेषंतंदृष्ट्वातवपुत्रस्यपांडवः ॥ अवस्थितंसव्यसाचीचुक्रोधबलवन्नृप ॥ ४२ ॥ ततएनंशरैराजन्सहसासमवाकिरत् ॥ रज
साचोद्धतेनाथनस्मकिंचनदृश्यते ॥ ४३ ॥ अंधकारीकृतेलोकेशरीभूतेमहीतले ॥ दिशःसर्वामहाराजतावकाःप्राद्रवन्भयात् ॥ ४४ ॥ भज्यमानेषुसर्वेषुकुरुरा
जोविशांपते ॥ परेषामात्मनश्चैवसैन्येतेसमुपाद्रवन् ॥ ४५ ॥ ततोदुर्योधनःसर्वानाजुहावाथपांडवान् ॥ युद्धायभरतश्रेष्ठदेवानिवपुराबलिः ॥ ४६ ॥ तएनम
भिगर्जंतंसहिताःसमुपाद्रवन् ॥ नानाशस्त्रसृजःक्रुद्धाभर्त्सयंतोमुहुर्मुहुः ॥ ४७ ॥ दुर्योधनोप्यसंभ्रांतस्तानरीन्व्यधमच्छरैः ॥ तत्राद्भुतमपश्यामतवपुत्रस्यपौ
रुषं ॥ ४८ ॥ यदेनंपांडवाःसर्वेनशेकुरतिवर्त्तितुं ॥ नातिदूरापयातंचकृतबुद्धिपलायने ॥ ४९ ॥ दुर्योधनःस्वकंसैन्यमपश्यद्भृशविक्षतं ॥ ततोवस्थाप्यराजेंद्रकृ
तबुद्धिस्तवात्मजः ॥ ५० ॥ हर्षयन्निवतान्योधांस्ततोवचनमब्रवीत् ॥ नतंदेशंप्रपश्यामिपृथिव्यांपर्वतेषुच ॥ ५१ ॥ यत्रयातान्नवोहन्युःपांडवाःकिंसृतेनवः ॥
स्वल्पंचैवबलंतेषांकृष्णौचभृशविक्षतौ ॥ ५२ ॥ यदिसर्वेत्रतिष्ठामोध्रुवंनोविजयोभवेत् ॥ विप्रयातांस्तुवोभिन्नान्पांडवाःकृतकिल्बिषान् ॥ ५३ ॥ अनुसृत्य
हनिष्यंतिश्रेयोनःसमरेवधः ॥ सुखःसांग्रामिकोमृत्युःक्षत्रधर्मेणयुध्यतां ॥ ५४ ॥ मृतोदुःखंनजानीतेप्रेत्यचानंत्यमश्नुते ॥ शृण्वंतुक्षत्रियाःसर्वेयावंतोत्रस
मागताः ॥ ५५ ॥ द्विषतोभीमसेनस्यवशमेष्यथविद्रुताः ॥ पितामहैराचरितंनधर्मंहातुमर्हथ ॥ ५६ ॥ नान्यत्कर्मास्तिपापीयःक्षत्रियस्यपलायनात् ॥ नयु
द्धधर्माच्छ्रेयान्हिपंथाःस्वर्गस्यकौरवाः ॥ ५७ ॥ सुचिरेणार्जिताँल्लोकान्सद्योयुद्धात्समश्नुते ॥ तस्यतद्वचनंराज्ञःपूजयित्वामहारथाः ॥ ५८ ॥ पुनरेवाभ्यवर्त्तंत
क्षत्रियाःपांडवान्प्रति ॥ पराजयममृष्यंतःकृतचित्ताश्चविक्रमे ॥ ५९ ॥ ततःप्रववृतेयुद्धंपुनरेवसुदारुणं ॥ तावकानांपरेषांचदेवासुररणोपमं ॥ ६० ॥ युधि
ष्ठिरपुरोगांश्चसर्वसैन्येनपांडवान् ॥ अन्वधावन्महाराजपुत्रोदुर्योधनस्तव ॥ ६१ ॥ इतिश्रीमहाभारतेशल्यपर्वणिकौरवसैन्यापयानेतृतीयोऽध्यायः ॥ ३ ॥
॥ ७ ॥ ॥ ७ ॥ संजयउवाच पतितान्रथनीडांश्चरथांश्चापिमहात्मनां ॥ रणेचनिहतान्नागान्दृष्ट्वापत्तींश्चमारिष ॥ १ ॥

इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ पतितानिति ॥ १ ॥

अप्रख्यातिमित्यत्रप्रत्याख्यातिमितिपाठेपितुल्योर्थः ॥ २ ॥ भृशेत्यत्रदृशेतिपाठेदृशादृष्टमात्रेण ॥ ३ ॥ ४ ॥ ५ ॥ मन्युवशाद्दुर्योधनस्यदैन्यवशात् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४

आयोधनंचातिघोरंरुद्रस्याक्रीडसन्निभं ॥ अप्रख्यातिंगतानांतुराज्ञांशतसहस्रशः ॥ २ ॥ विमुखेतवपुत्रेतुशोकोपहतचेतसि ॥ भृशोद्विग्नेषुसैन्येषुदृष्ट्वापार्थस्यविक्रमं ॥ ३ ॥ ध्यायमानेषुसैन्येषुदुःखंप्राप्तेषुभारत ॥ बलानांमथ्यमानानांश्रुत्वानिनदमुत्तमं ॥ ४ ॥ अभिज्ञानंनरेंद्राणांविक्षतंप्रेक्ष्यसंयुगे ॥ कृपाविष्टःकृपोराजन्वयःशीलसमन्वितः ॥ ५ ॥ अब्रवीत्तत्रतेजस्वीसोभिसृत्यजनाधिपं ॥ दुर्योधनंमन्युवशाद्वाक्यंवाक्यविशारदः ॥ ६ ॥ दुर्योधननिबोधेदंयत्त्वांवक्ष्यामिकौरव ॥ श्रुत्वाकुरुमहाराजयदितेरोचतेनघ ॥ ७ ॥ नयुद्धधर्माच्छ्रेयान्वैपंथाराजेंद्रविद्यते ॥ यंसमाश्रित्ययुध्यंतेक्षत्रियाःक्षत्रियर्षभ ॥ ८ ॥ पुत्रोभ्रातापिताचैवस्वस्रीयोमातुलस्तथा ॥ संबंधिबांधवाश्चैवयोध्यावैक्षत्रजीविना ॥ ९ ॥ वधेचैवपरोधर्मस्तथाऽधर्मःपलायने ॥ तेस्मघोरांसमापन्नाजीविकांजीवितार्थिनः ॥ १० ॥ तदत्रप्रतिवक्ष्यामिकिंचिदेवहितंवचः ॥ हतेभीष्मेचद्रोणेचकर्णेचैवंमहारथे ॥ ११ ॥ जयद्रथेचनिहतेतवभ्रातृषुचानघ ॥ लक्ष्मणेतवपुत्रेचकिंशेषंपर्युपास्महे ॥ १२ ॥ येषुभारंसमासाद्यराज्येमतिमकुर्महि ॥ तेसंत्यज्यतनूर्याताःशूराब्रह्मविदांगतिं ॥ १३ ॥ वयंत्विहविनाभूतागुणवद्भिर्महारथैः ॥ कृपणंवर्तयिष्यामपातयित्वानृपान्बहून् ॥ १४ ॥ सर्वैरपिचजीवद्भिर्बीभत्सुरपराजितः ॥ कृष्णनेत्रोमहाबाहुर्देवैरपिदुरासदः ॥ १५ ॥ इंद्रकार्मुकतुल्याभमिंद्रकेतुमिवोच्छ्रितं ॥ वानरंकेतुमासाद्यसंचचालमहाचमूः ॥ १६ ॥ सिंहनादाच्चभीमस्यपांचजन्यस्वनेनच ॥ गांडीवस्यचनिर्घोषात्संदृष्यंतिमनांसिनः ॥ १७ ॥ चरंतीवमहाविद्युन्मुष्णंतीनयनप्रभां ॥ अलातमिवचाविद्धंगांडीवंसमदृश्यत ॥ १८ ॥ जांबूनदविचित्रंचधूयमानंमहद्धनुः ॥ दृश्यतेदिक्षुसर्वासुविद्युदभ्रघनेष्विव ॥ १९ ॥ श्वेताश्ववेगसंपन्नाःशशिकाशसमप्रभाः ॥ पिबंतइवचाकाशंरथेयुक्तास्तुवाजिनः ॥ २० ॥ उह्यमानांश्चकृष्णेनवायुनेवबलाहकाः ॥ जांबूनदविचित्रांगावहंतेचार्जुनंरणे ॥ २१ ॥ तावकंतद्बलंराजन्नर्जुनोस्त्रविशारदः ॥ गहनंशिशिरेकक्षंददाहाग्निरिवोल्बणः ॥ २२ ॥ गाहमानमनीकानिमहेंद्रसदृशप्रभं ॥ धनंजयमपश्यामचतुर्दंष्ट्रमिवद्विपं ॥ २३ ॥ विक्षोभयंतंसेनांतेत्रासयंतंचपार्थिवान् ॥ धनंजयमपश्यामनलिनीमिवकुंजरं ॥ २४ ॥ त्रासयंतंतथायोधान्धनुर्घोषेणपांडवं ॥ भूयएनमपश्यामसिंहंमृगगणानिव ॥ २५ ॥

कृष्णनेत्रंनेतायस्यसतथा ॥ १५ ॥ १६ ॥ संदृष्यंतिसंहरिष्यंति इडभावआर्षः मनांसिआत्मनेसंहरिष्यंति मुद्रानिभविष्यंतीत्यर्थः समुह्यंतीतिपाठांतरं ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५

॥ २६ ॥ वर्तमानस्यसंग्रामस्यअभितोवध्यतांवध्यमानानांचअद्यसप्तदशाहानिजातानीत्यन्वयः जातानीतिशेषः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

सर्वलोकमहेष्वासौवृषभौसर्वधन्विनां ॥ आमुक्तकवचौकृष्णौलोकमध्येविचेरतुः ॥ २६ ॥ अद्यसप्तदशाहानिवर्त्तमानस्यभारत ॥ संग्रामस्यातिघोरस्यव ध्यतांचाभितोयुधि ॥ २७॥ वायुनेवविधूतानितवसैन्यानिसर्वतः ॥ शरदंभोदजालानिव्यशीर्यंतसमंततः ॥ २८ ॥ तांनावमिवपर्यस्तांवातधूतांमहार्णवे ॥ तवसेनांमहाराजसव्यसाचीव्यकंपयत् ॥ २९ ॥ क्वनुतेसूतपुत्रोभूत्क्वनुद्रोणःसहानुगः ॥ अहंक्वचक्वचात्मातेहार्दिक्यश्चतथाक्वनु ॥ ३० ॥ दुःशासनश्चतेभ्राता भ्रातृभिःसहितःक्वनु ॥ बाणगोचरसंप्राप्तंप्रेक्ष्यचैवजयद्रथं ॥ ३१ ॥ संबंधिनस्तेभ्रातृंश्चसहायान्मातुलांस्तथा ॥ सर्वान्विक्रम्यमिषतोलोकमाक्रम्यमूर्धनि ॥ ॥ ३२ ॥ जयद्रथोहतोराजन्किंनुशेषमुपास्महे ॥ कोहीहसपुमानस्तियोविजेष्यतिपांडवं ॥ ३३ ॥ तस्यचास्त्राणिदिव्यानिविविधानिमहात्मनः ॥ गांडीवस्य चनिर्घोषोधैर्याणिहरतेहिनः ॥ ३४ ॥ नष्टचंद्रायथारात्रिःसेनेयंहतनायका ॥ नागभग्नद्रुमाशुष्कानदीवाकुलतांगता ॥ ३५॥ ध्वजिन्यांहतनेत्रायांयथेष्टंश्वेत वाहनः ॥ चरिष्यतिमहाबाहुःकक्षेष्वग्निरिवज्वलन् ॥ ३६ ॥ सात्यकेश्चैवयोवेगोभीमसेनस्यचोभयोः ॥ दारयेच्चगिरीन्सर्वान्शोषयेच्चैवसागरान् ॥ ३७॥ उ वाचवाक्यंयद्भीमःसभामध्येविशांपते ॥ कृतंतत्सफलंतेनभूयश्चैवकरिष्यति ॥ ३८ ॥ प्रमुखस्थेतदाकर्णेबलंपांडवरक्षितं ॥ दुरासदंतदागुप्तंव्यूढंगांडीवधन्व ना ॥ ३९ ॥ युष्माभिस्तानिचीर्णानियान्यसाधूनिसाधुषु ॥ अकारणकृतान्येवतेषांवःफलमागतं ॥ ४० ॥ आत्मनोर्थेत्वयालोकोयत्नतःसर्वआहृतः ॥ सतेसं शयितस्तातआत्मावैभरतर्षभ ॥ ४१ ॥ रक्षदुर्योधनात्मानमात्मासर्वस्यभाजनं ॥ भिन्नेहिभाजनेतातदिशोगच्छतितद्गतं ॥ ४२ ॥ हीयमानेनवैसंधिःपर्येष्टव्यः समेनवा ॥ विग्रहोवर्धमानेनमतिरेषाबृहस्पतेः ॥ ४३ ॥ तेवयंपांडुपुत्रेभ्योहीनाःस्मबलशक्तितः ॥ तदत्रपांडवैःसार्धंसंधिमन्येक्षमंप्रभो ॥ ४४ ॥ नजानीते हियःश्रेयःश्रेयसश्चावमन्यते ॥ सक्षिप्रंभ्रश्यतेराज्यान्नचश्रेयोनुविंदति ॥ ४५॥ प्रणिपत्यहिराजानंराज्यंयदिलभेमहि ॥ श्रेयःस्यान्नतुमौढ्येनराजन्गंतुःप राभवं ॥ ४६ ॥ वैचित्रवीर्यवचनात्कृपाशीलोयुधिष्ठिरः ॥ विनियुंजीतराज्येत्वांगोविंदवचनेनच ॥ ४७॥ यद्ब्रूयाद्धिहृषीकेशोराजानमपराजितं ॥ अर्जुनंभी मसेनंचसर्वेकुर्युरसंशयं ॥ ४८ ॥ नातिक्रमिष्यतेकृष्णोवचनंकौरवस्यतु ॥ धृतराष्ट्रस्यमन्येहंनापिकृष्णस्यपांडवः ॥ ४९ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ असंशयंमत्तौरमित्यर्थः ॥ ४८ ॥ ४९ ॥

एतत्क्षेममहंमन्येनचपार्थैश्चविग्रहं ॥ नत्वांब्रवीमिकार्पण्यान्नप्राणपरिरक्षणात् ॥ ५० ॥ पथ्यंराजन्ब्रवीमित्वांतत्परासुःस्मरिष्यसि ॥ इतिवृद्धोविलप्यैतत्कृपःशारद्वतोवचः ॥ दीर्घमुष्णंचनिःश्वस्यशुशोचचमुमोहच ॥ ५१ ॥ इतिश्रीमहाभारतेशल्यपर्वणिकृपवाक्येचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ५ ॥ ॥ ५ ॥

संजयउवाच एवमुक्तस्ततोराजागौतमेनतपस्विना ॥ निःश्वस्यदीर्घमुष्णंचतूष्णीमासीद्विशांपते ॥ १ ॥ ततोमुहूर्त्तंसध्यात्वाधार्त्तराष्ट्रोमहामनाः ॥ कृपंशारद्वतंवाक्यमित्युवाचपरंतपः ॥ २ ॥ यत्किंचित्सुहृदावाच्यंतत्सर्वंश्रावितोस्म्यहं ॥ कृतंचभवतासर्वंप्राणान्संत्यज्ययुध्यता ॥ ३ ॥ गाहमानमनीकानियुध्यमानंमहारथैः ॥ पांडवैरतितेजोभिर्लोकस्त्वामनुदृष्टवान् ॥ ४ ॥ सुहृदायदिदंवाक्यंभवताश्रावितोस्म्यहं ॥ नमांप्रीणातितत्सर्वंमुमूर्षोरिवभेषजं ॥ ५ ॥ हेतुकारणसंयुक्तंहितंवचनमुत्तमं ॥ उच्यमानंमहाबाहोनमेविप्राग्र्यरोचते ॥ ६ ॥ राज्याद्विनिकृतोस्माभिःकथंसोस्मासुविश्वसेत् ॥ अक्षद्यूतेचनृपतिर्जितोस्माभिर्महाधनः ॥ ७ ॥ सकथंममवाक्यानिश्रद्दध्याद्भूयएवतु ॥ तथादौत्येनसंप्राप्तःकृष्णःपार्थहितेरतः ॥ ८ ॥ प्रलब्धश्चहृषीकेशस्तच्चकर्माविचारितं ॥ सचमेवचनंब्रह्मन्कथमेवाभिमन्यते ॥ ९ ॥ विललापचयत्कृष्णासभामध्येसमेयुषी ॥ नतन्मर्षयतेकृष्णोनराज्यहरणंतथा ॥ १० ॥ एकप्राणावुभौकृष्णावन्योन्यमभिसंश्रितौ ॥ पुरायच्छ्रुतमेवासीद्द्यपश्यामितत्प्रभो ॥ ११ ॥ स्वस्रीयंनिहतंश्रुत्वादुःखंस्वपितिकेशवः ॥ कृतागसोवयंतस्यसमदर्थंकथंक्षमेत् ॥ १२ ॥ अभिमन्योर्विनाशेननशर्मलभतेर्जुनः ॥ सकथंमद्धितेयत्नंप्रकरिष्यतियाचितः ॥ १३ ॥ मध्यमःपांडवस्तीक्ष्णोभीमसेनोमहाबलः ॥ प्रतिज्ञातंचतेनोग्रंभज्येतापिननमेत् ॥ १४ ॥ उभौतौबद्धनिस्त्रिंशावुभौचाबद्धकंकटौ ॥ कृतवैरावुभौवीरौयमावपियमोपमौ ॥ १५ ॥ धृष्टद्युम्नःशिखंडीचकृतवैरौमयासह ॥ तौकथंमद्धितेयत्नंकुर्यातांद्विजसत्तम ॥ १६ ॥ दुःशासनेनयत्कृष्णाएकवस्त्रारजस्वला ॥ परिक्लिष्टासभामध्येसर्वलोकस्यपश्यतः ॥ १७ ॥ तथाविवसनांदीनांस्मरंत्यद्यापिपांडवाः ॥ ननिवारयितुंशक्याःसंग्रामात्तेपरंतपाः ॥ १८ ॥ यदाचद्रौपदीक्लिष्टामद्विनाशायदुःखिता ॥ स्थंडिलेनित्यदाशेतेयावद्वैरस्ययातनं ॥ १९ ॥ उग्रंतेपेतपःकृष्णाभर्तॄणामर्थसिद्धये ॥ निक्षिप्यमानंदर्पंचवासुदेवसहोदरा ॥ २० ॥ कृष्णायाःप्रेष्यवद्भूत्वाशुश्रूषांकुरुतेसदा ॥ इतिसर्वंसमुन्नद्धंननिर्वातिकथंचन ॥ २१ ॥

अभिमन्योर्विनाशेनसंयेयः कथंमया ॥ कथंचराजाभुंक्तेमांपृथिवींसागरांबरां ॥ २२ ॥ पांडवानांप्रसादेनभोक्ष्येराज्यमहंकथं ॥ उपर्युपरिराज्ञांवैज्वलि
त्वाभास्करोयथा ॥ २३ ॥ युधिष्ठिरंकथंपश्चादनुयास्यामिदासवत् ॥ कथंभुक्त्वास्वयंभोगान्दत्वादायांश्चपुष्कलान् ॥ २४ ॥ कृपणंवर्तयिष्यामिकृपणैःसह
जीविकां ॥ नाभ्यसूयामितेवाक्यमुक्तंस्निग्धंहितंत्वया ॥ २५ ॥ नतुसंधिमहंमन्येप्राप्तकालंकथंचन ॥ सुनीतमनुपश्यामिसुयुद्धेनपरंतप ॥ २६ ॥ नायंक्लीबयितुं
कालःसंयोद्धुंकालएवनः ॥ इष्टंमेबहुभिर्यज्ञैर्दत्ताविप्रेषुदक्षिणाः ॥ २७ ॥ प्राप्ताःकामाःश्रुतावेदाःशत्रूणांमूर्ध्निचस्थितं ॥ भृत्यामेसुभृतास्तातदीनश्चाभ्युद्धृतोज
नः ॥ २८ ॥ नोत्सहेऽद्यद्विजश्रेष्ठपांडवान्वक्तुमीदृशं ॥ जितानिपरराष्ट्राणिस्वराष्ट्रमनुपालितं ॥ २९ ॥ भुक्ताश्चविविधाभोगास्त्रिवर्गःसेवितोमया ॥ पितॄणांगत
मानृण्यंक्षत्रधर्मस्यचोभयोः ॥ ३० ॥ नध्रुवंसुखमस्तीतिकुतोराष्ट्रंकुतोयशः ॥ इहकीर्तिर्विधातव्यासाचयुद्धेननान्यथा ॥ ३१ ॥ गृहेयत्क्षत्रियस्यापिनिधनं
तद्विगर्हितं ॥ अधर्मःसुमहानेषयच्छय्यामरणंगृहे ॥ ३२ ॥ अरण्येयोविमुच्येतसंग्रामेवातनुंनरः ॥ क्रतूनाहृत्यमहतोमहिमानंसगच्छति ॥ ३३ ॥ कृपणंवि
लपन्नार्तोजरयाभिपरिप्लुतः ॥ म्रियतेरुदतांमध्येज्ञातीनांनसपूरुषः ॥ ३४ ॥ त्यक्त्वातुविविधान्भोगान्प्राप्तानांपरमांगतिं ॥ अपीदानींसुयुद्धेनगच्छेयंसत्सलो
क्यतां ॥ ३५ ॥ शूराणामार्यवृत्तानांसंग्रामेष्वनिवर्तिनां ॥ धीमतांसत्यसंधानांसर्वेषांक्रतुयाजिनां ॥ ३६ ॥ शस्त्रावभृथपूतानांध्रुवंवासस्त्रिविष्टपे ॥ मुदानूनं
प्रपश्यंतियुद्धेह्यप्सरसांगणाः ॥ ३७ ॥ पश्यंतिनूनंपितरःपूजितान्सुरसंसदि ॥ अप्सरोभिःपरिवृतान्मोदमानांस्त्रिविष्टपे ॥ ३८ ॥ पंथानममरैर्यातंशूरैश्चैवानि
वर्तिभिः ॥ अपितत्संगतंमार्गंवयमध्यारुहेमहि ॥ ३९ ॥ पितामहेनवृद्धेनतथाचार्येणधीमता ॥ जयद्रथेनकर्णेनतथादुःशासनेनच ॥ ४० ॥ घटमानामदर्थे
स्मिन्हताःशूराजनाधिपाः ॥ शेरतेलोहिताक्तांगाःसंग्रामेशरविक्षताः ॥ ४१ ॥ उत्तमास्त्रविदःशूरायथोक्तक्रतुयाजिनः ॥ त्यक्त्वाप्राणान्यथान्यायमिंद्रसद्मसु
प्रतिष्ठिताः ॥ ४२ ॥ तैःस्वयंरचितोमार्गोदुर्गमोहिपुनर्भवेत् ॥ संपतद्भिर्महावेगैर्यास्यद्भिरिहसद्गतिं ॥ ४३ ॥ येमदर्थेहताःशूरास्तेषांकृतमनुस्मरन् ॥ ऋणंतत्प्रतिमु
ञ्चानोनराज्येमनआदधे ॥ ४४ ॥ घातयित्वावयस्यांश्चभ्रातॄनथपितामहान् ॥ जीवितंयदिरक्षेयंलोकोमांगर्हयेद्ध्रुवं ॥ ४५ ॥ कीदृशंचभवेद्राज्यंममहीनस्यबंधु
भिः ॥ सखिभिश्चविशेषेणप्रणिपत्यचपांडवं ॥ ४६ ॥ सोहमेतादृशंकृत्वाजगतोस्यपराभवं ॥ सुयुद्धेनततःस्वर्गंप्राप्स्यामिनतदन्यथा ॥ ४७ ॥

॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेपंचमोध्यायः ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ अथेति प्रस्थेशिखरे ॥ १ ॥ २ ॥ ततःतत्र ॥ ३ ॥ ४ ॥ ५ ॥६॥

एवंदुर्योधनेनोक्तेसर्वेसंपूज्यतद्वचः ॥ साधुसाध्वितिराजानंक्षत्रियाःसंबभाषिरे ॥ ४८ ॥ पराजयमशोचंतःकृतचित्ताश्चविक्रमे ॥ सर्वेसुनिश्चितायोद्धुमुद ग्रमनसोभवन् ॥ ४९ ॥ ततोवाहान्समाश्वास्यसर्वेयुद्धाभिनंदिनः ॥ ऊनेद्वियोजनेगत्वाप्रत्यतिष्ठंतकौरवाः ॥ ५० ॥ आकाशेविद्रुमेपुण्येप्रस्थेहिमवतःशुभे ॥ अरुणांसरस्वतींप्राप्यपपुःसस्नुश्चतेजलं ॥ ५१ ॥ तवपुत्रकृतोत्साहाःपर्यवर्त्तंततेततः ॥ पर्यवस्थाप्यचात्मानमन्योन्येनपुनस्तदा ॥ सर्वेराजन्न्यवर्त्तंतक्षत्रियाः कालचोदिताः ॥ ५२ ॥ इतिश्रीमहाभारतेशल्यपर्वणिदुर्योधनवाक्येपंचमोऽध्यायः ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ संजयउवाच अथहैमवतेप्रस्थे स्थित्वायुद्धाभिनंदिनः ॥ सर्वएवमहायोधास्तत्रतत्रसमागताः ॥ १ ॥ शल्यश्चचित्रसेनश्चशकुनिश्चमहारथः ॥ अश्वत्थामाकृपश्चैवकृतवर्माचसात्वतः ॥ २ ॥ सुषेणोरिष्टसेनश्चधृतसेनश्चवीर्यवान् ॥ जयत्सेनश्चराजानस्तेरात्रिमुषितास्ततः ॥ ३ ॥ रणेकर्णेहतेवीरैस्त्रासिताजितकाशिभिः ॥ नालभन्शर्मतेपुत्राहिमवं तमृतेगिरिं ॥ ४ ॥ तेब्रुवन्सहितास्तत्रराजानंशल्यसन्निधौ ॥ कृतयत्नारणेराजन्संपूज्यविधिवत्तदा ॥ ५ ॥ कृत्वासेनाप्रणेतारंपरांस्त्वंयोद्धुमर्हसि ॥ येनाभिगु माःसंग्रामेजयेमासुहृदोवयं ॥ ६ ॥ ततोदुर्योधनःस्थित्वारथेरथवरोत्तमं ॥ सर्वयुद्धविभावज्ञमंतकप्रतिमंयुधि ॥ ७ ॥ स्वंगंप्रच्छन्नशिरसंकंबुग्रीवंप्रियंवदं ॥ व्याकोशपद्मपत्राक्षंव्याघ्रास्यंमेरुगौरवं ॥ ८ ॥ स्थाणोर्वृषस्यसदृशंस्कंधनेत्रगतिस्वरैः ॥ पुष्टश्लिष्टायतभुजंसुविस्तीर्णवरोरसं ॥ ९ ॥ बलेजवेचसदृशमरुणा नुजवातयोः ॥ आदित्यस्यार्चिषातुल्यंबुद्ध्याचोशनसासमं ॥ १० ॥ कांतिरूपमुखैश्वर्यैस्त्रिभिश्चंद्रमसासमं ॥ कांचनोपलसंघातैःसदृशंश्लिष्टसंधिकं ॥ ११ ॥ सुवृत्तोरुकटीजंघंसुपादंस्वंगुलीनखं ॥ स्मृत्वास्मृत्वैवतुगुणान्धात्रायत्नाद्विनिर्मितं ॥ १२ ॥ सर्वलक्षणसंपन्नंनिपुणंश्रुतिसागरं ॥ जेतारंतरसारीणामजेय मरिभिर्बलात् ॥ १३ ॥ दशांगंयश्चतुष्पादमिष्वस्त्रंवेदतत्त्वतः ॥ सांगांस्तुचतुरोवेदान्सम्यगाख्यानपंचमान् ॥ १४ ॥ आराध्यत्र्यंबकंयत्नाद्व्रतैरुग्रैर्महातपाः ॥ अयोनिजायामुत्पन्नोद्रोणेनायोनिजेनयः ॥ १५ ॥ तमप्रतिमकर्माणंरूपेणाप्रतिमंभुवि ॥ पारगंसर्वविद्यानांगुणार्णवमनिंदितं ॥ १६ ॥

सर्वेषांयुद्धगतानांविविधानांभावानामभिप्रायाणांज्ञंसर्वयुद्धविभावज्ञं ॥ ७ ॥ स्वंगंशोभनांगं ॥ ८ ॥ स्थाणोःसंबंधिनोवृषस्य ॥ ९ ॥ अर्चिषाज्योतिषातुल्यंतुल्यतेजसं अर्चिषाआदित्यस्यतुल्यमितिवा ॥ १० ॥ ॥ ११ ॥ १२ ॥ १३ ॥ दशांगं ज्ञानंप्राप्तिर्धृतिःपुष्टिःस्मृतिःक्षेपोरिभेदनं चिकित्सोद्दीपनंकृष्टिरिष्वस्त्रंस्याद्दशांगकं दीक्षाशिक्षात्मरक्षाचएतत्साधनमेवच धनुर्वेदस्यचत्वारएतेपादाःप्रकीर्तिताः ॥ १४ ॥ १५ ॥ १६ ॥

तुभ्यंतव ॥१७॥१८॥१९॥ महासेनइवकार्तिकेयइव महतीसेनायस्यसमहासेनः ॥२०॥२१॥२२॥२३॥२४॥२५॥२६॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेषष्ठो

तमभ्येत्यात्मजस्तुभ्यमश्वत्थामानमब्रवीत् ॥ यंपुरस्कृत्यसहितायुधिजेष्यामपांडवान् ॥ १७॥ गुरुपुत्रोद्यसर्वेषामस्माकंपरमागतिः ॥ भवांस्तस्मान्नियोगात्तेकोस्तुसेनापतिर्मम ॥ १८॥ द्रौणिरुवाच अयंकुलेनरूपेणतेजसायशसाश्रिया ॥ सर्वैर्गुणैःसमुदितःशल्योनोस्तुचमूपतिः ॥ १९ ॥ भागिनेयान्निजांस्त्यक्त्वाकृतज्ञोस्मानुपागतः ॥ महासेनोमहाबाहुर्महासेनइवापरः ॥ २० ॥ एनंसेनापतिंकृत्वानृपतिंनृपसत्तम ॥ शक्यःप्राप्तुंजयोस्माभिर्देवैःस्कंदमिवाजितं ॥ २१ ॥ तथोक्तेद्रोणपुत्रेणसर्वएवनराधिपाः ॥ परिवार्यस्थिताःशल्यंजयशब्दांश्चचक्रिरे ॥ २२ ॥ युद्धायचमतिंचक्रुरावेशंचपरंययुः ॥ ततोदुर्योधनोभूमौस्थित्वारथवरेस्थितं ॥ २३ ॥ उवाचप्रांजलिर्भूत्वाद्रोणभीष्मसमंरणे ॥ अयंसकालःसंप्राप्तोमित्राणांमित्रवत्सल ॥ २४ ॥ यत्रमित्रममित्रंवापरीक्षंतेवुधाजनाः ॥ सभवानस्तुनःशूरःप्रणेतावाहिनीमुखे ॥ २५ ॥ रणंयातेचभवतिपांडवामंदचेतसः ॥ भविष्यंतिसहामात्याःपंचालाश्चनिरुद्यमाः ॥ २६ ॥ दुर्योधनवचःश्रुत्वाशल्योमद्राधिपस्तदा ॥ उवाचवाक्यंवाक्यज्ञोराजानंराजसन्निधौ ॥ २७॥ शल्यउवाच यत्तुमांमन्यसेराजन्कुरुराजकरोमितत् ॥ त्वत्प्रियार्थंहिमेसर्वंप्राणाराज्यंधनानिच ॥ २८ ॥ दुर्योधनउवाच सैनापत्येनवरयेत्वामहंमातुलातुलं ॥ सोस्मान्पाहियुधांश्रेष्ठस्कंदोदेवानिवाहवे ॥ २९ ॥ अभिषिच्यस्वराजेंद्रदेवानामिवपावकिः ॥ जहिशत्रून्रणेवीरमहेंद्रोदानवानिव ॥ ३० ॥ इतिश्रीमहाभारतेशल्यपर्वणिशल्यदुर्योधनसंवादेषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥ संजयउवाच एतच्छ्रुत्वावचोराज्ञोमद्रराज्ञःप्रतापवान् ॥ दुर्योधनंतदाराजन्वाक्यमेतदुवाचह ॥ १ ॥ दुर्योधनमहाबाहोशृणुवाक्यविदांवर ॥ यावेतौमन्यसेकृष्णौरथस्थौरथिनांवरौ ॥ २ ॥ नमेतुल्यावुभावेतौबाहुवीर्येकथंचन ॥ उद्यतांपृथिवींसर्वांससुरासुरमानवां ॥ ३ ॥ योधयेयंरणमुखेसंक्रुद्धःकिमुपांडवान् ॥ विजेष्यामिरणेपार्थान्सोमकांश्चसमागतान् ॥ ४ ॥ अहंसेनाप्रणेतातेभविष्यामिनसंशयः ॥ तंचव्यूहंविधास्यामिनतरिष्यंतियंपरे ॥ ५ ॥ इतिसत्यंब्रवीम्येषदुर्योधननसंशयः ॥ एवमुक्तस्ततोराजामद्राधिपतिमंजसा ॥ ६ ॥ अभ्यषिंचतसेनायामध्येभरतसत्तम ॥ विधिनाशास्त्रदृष्टेनक्लिष्टरूपोविशांपते ॥ ७ ॥ अभिषिक्तेततस्तस्मिन्सिंहनादोमहानभूत् ॥ तवसैन्येष्वभ्यवाद्यंतवादित्राणिचभारत ॥ ८ ॥

ऽध्यायः ॥ ६ ॥ ॥ ७ ॥ एतच्छ्रुत्वेति ॥१॥२॥३॥४॥ नतरिष्यंतीत्यत्रनभविष्यंतीतिपाठंप्राप्यनभविष्यंतिमरिष्यंतीत्यध्याहृत्ययोज्यं ॥ ५ ॥ ६ ॥ क्लिष्टरूपःपराजयनिश्चयात् ॥ ७ ॥ ८ ॥

कुष्टाआहूताः ॥ ९ ॥ १० ॥ ११ ॥ मर्त्यधर्माणःमर्त्यधर्मणः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

कुष्टाश्चासंस्तथायोधामद्रकाश्चमहारथाः ॥ तुष्टुवुश्चैवराजानंशल्यमाहवशोभिनं ॥ ९ ॥ जयराजंश्चिरंजीवजहिशत्रून्समागतान् ॥ तवबाहुबलंप्राप्यधार्त्त
राष्ट्रामहाबलाः ॥ १० ॥ निखिलाःपृथिवींसर्वांप्रशासंतुहतद्विषः ॥ त्वंहिशक्तोरणेजेतुंससुरासुरमानवान् ॥ ११ ॥ मर्त्यधर्माणइहतुकिमुसृंजयसोमकान् ॥
एवंसंपूज्यमानस्तुमद्राणामधिपोबली ॥ १२ ॥ हर्षंप्रापतदावीरोदुरापमकृतात्मभिः ॥ शल्यउवाच अद्यचाहंरणेसर्वान्पंचालान्सहपांडवैः ॥ १३ ॥
निहनिष्यामिवाराजन्स्वर्गयास्यामिवाहतः ॥ अद्यपश्यंतुमांलोकाविचरंतमभीतवत् ॥ १४ ॥ अद्यपांडुसुताःसर्वेवासुदेवःससात्यकिः ॥ पंचालाश्चेदयश्चैव
द्रौपदेयाश्चसर्वशः ॥ १५ ॥ धृष्टद्युम्नःशिखंडीचसर्वेचापिप्रभद्रकाः ॥ विक्रमंममपश्यंतुधनुपश्चमहद्बलं ॥ १६ ॥ लाघवंचास्त्रवीर्यंचभुजयोश्चबलंयुधि ॥ अ
द्यपश्यंतुमेपार्थाःसिद्धाश्चसहचारणैः ॥ १७ ॥ यादृशंमेबलंबाह्वोःसंपदस्त्रेषुयाचमे ॥ अद्यमेविक्रमंदृष्ट्वापांडवानांमहारथाः ॥ १८ ॥ प्रतीकारपराभूत्वाचेष्टं
तांविविधाःक्रियाः ॥ अद्यसैन्यानिपांडूनांद्रावयिष्येसमंततः ॥ १९ ॥ द्रोणभीष्मावतिविभोसूतपुत्रंचसंयुगे ॥ विचरिष्येरणेयुध्यन्प्रियार्थंतवकौरव ॥ २० ॥
संजयउवाच अभिपिक्तेतथाशल्येतवसैन्येपुमानद ॥ नकर्णव्यसनंकिंचिन्मेनिरेतत्रभारत ॥ २१ ॥ हृष्टाःसुमनसश्चैवबभूवुस्तत्रसैनिकाः ॥ मेनिरेनिहता
न्पार्थान्मद्रराजवशंगतान् ॥ २२ ॥ प्रहर्षंप्राप्यसेनातुतावकीभरतर्षभ ॥ तांरात्रिमुषितासुखाहर्षचित्ताचसाभवत् ॥ २३ ॥ सैन्यस्यतवतंशब्दंश्रुत्वाराजायुधि
ष्ठिरः ॥ वार्ष्णेयमब्रवीद्वाक्यंसर्वक्षत्रस्यपश्यतः ॥ २४ ॥ मद्रराजःकृतःशल्योधार्त्तराष्ट्रेणमाधव ॥ सेनापतिर्महेष्वासःसर्वसैन्येषुपूजितः ॥ २५ ॥ एतज्ज्ञात्वाय
थाभूतंकुरुमाधवयत्क्षमं ॥ भवान्नेताचगोप्ताचविधत्स्वयदनंतरं ॥ २६ ॥ तमब्रवीन्महाराजवासुदेवोजनाधिपं ॥ आर्त्तायनिमहंजानेयथातत्त्वेनभारत ॥
॥ २७ ॥ वीर्यवांश्चमहातेजामहात्माचविशेषतः ॥ कृतीचचित्रयोधीचसंयुक्तोलाघवेनच ॥ २८ ॥ यादृग्भीष्मस्तथाद्रोणोयादृक्कर्णश्चसंयुगे ॥ तादृशस्तद्विशि
ष्टोवामद्रराजोमतोमम ॥ २९ ॥ युद्ध्यमानस्यतस्याहंचिंतयानश्चभारत ॥ योद्धारंनाधिगच्छामितुल्यरूपंजनाधिप ॥ ३० ॥ शिखंड्यर्जुनभीमानांसात्वतस्य
चभारत ॥ धृष्टद्युम्नस्यचतथाबलेनाभ्यधिकोरणे ॥ ३१ ॥ मद्रराजोमहाराजःसिंहद्विरदविक्रमः ॥ विचरिष्यत्यभीःकालेकालःक्रुद्धःप्रजास्विव ॥ ३२ ॥ तस्या
द्यनप्रपश्यामिप्रतियोद्धारमाहवे ॥ त्वामृतेपुरुषव्याघ्रशार्दूलसमविक्रमं ॥ ३३ ॥

सदेवलोकेकृत्स्नेस्मिन्नान्यस्त्वत्तःपुमान्भवेत् ॥ मद्रराजंरणेक्रुद्धंयोहन्यात्कुरुनंदन ॥ ३४ ॥ अहन्यहनियुध्यंतंक्षोभयंतंबलंतव ॥ तस्माज्जहिरणेशल्यंमघवा निवशंबरं ॥ ३५ ॥ अजेयश्चाप्यसौवीरोधार्त्तराष्ट्रेणसत्कृतः ॥ तवैवहिजयोनूनंहतेमद्रेश्वरेयुधि ॥ ३६ ॥ तस्मिन्हतेहतंसर्वंधार्त्तराष्ट्रबलंमहत् ॥ एतच्छ्रुत्वाम हाराजवचनंममसांप्रतं ॥ ३७ ॥ प्रत्युद्याहिरणेपार्थमद्रराजंमहारथं ॥ जहिचैनंमहाबाहोवासवोनमुचिंयथा ॥ ३८ ॥ नचैवात्रदयाकार्यामातुलोयंममेति वै ॥ क्षत्रधर्मंपुरस्कृत्यजहिमद्रजनेश्वरं ॥ ३९ ॥ द्रोणभीष्मार्णवंतीर्त्वाकर्णपातालसंभवं ॥ मानिमज्जस्वसगणःशल्यमासाद्यगोष्पदं ॥ ४० ॥ यच्चतेतपसोवी र्यंयच्चक्षात्रंबलंतव ॥ तद्दर्शयरणेसर्वंजहिचैनंमहारथं ॥ ४१ ॥ एतावदुक्त्वावचनंकेशवःपरवीरहा ॥ जगामशिबिरंसायंपूज्यमानोथपांडवैः ॥ ४२ ॥ केशवे तुतदायातेधर्मपुत्रोयुधिष्ठिरः ॥ विसृज्यसर्वान्भ्रातॄंश्चपंचालानथसोमकान् ॥ ४३ ॥ सुष्वापरजनींतांतुविशल्यइवकुंजरः ॥ तेचसर्वेमहेष्वासाःपंचालाः पांडवास्तथा ॥ ४४ ॥ कर्णस्यनिधनेहृष्टाःसुषुपुस्तांनिशांतदा ॥ गतज्वरंमहेष्वासंतीर्णपारंमहारथं ॥ ४५ ॥ बभूवपांडवेयानांसैन्यंचमुदितंनृप ॥ सूतपुत्र स्यनिधनेजयंलब्ध्वाचमारिष ॥ ४६ ॥ इतिश्रीमहाभारतेशल्यपर्वणिशल्यसैनापत्याभिषेकेसप्तमोऽध्यायः ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

संजयउवाच व्यतीतायांरजन्यांतुराजादुर्योधनस्तदा ॥ अब्रवीत्तावकान्सर्वान्सन्नह्यंतांमहारथाः ॥ १ ॥ राज्ञश्चमतमाज्ञायसमनह्यतसाचमूः ॥ अयो जयन्रथांस्तूर्णंपर्यधावंस्तथापरे ॥ २ ॥ अकल्प्यंतचमातंगाःसमनह्यंतपत्तयः ॥ रथानास्तरणोपेतांश्चक्रुरन्येसहस्रशः ॥ ३ ॥ वादित्राणांचनिनदःप्रादुरासीद्वि शांपते ॥ आयोधनार्थंयोधानांबलानांचाप्युदीर्यतां ॥ ४ ॥ ततोबलानिसर्वाणिसेनाशिष्टानिभारत ॥ प्रस्थितानिव्यदृश्यंतमृत्युंकृत्वानिवर्त्तनं ॥ ५ ॥ शल्यं सेनापतिंकृत्वामद्रराजंमहारथाः ॥ प्रविभज्यबलंसर्वमनीकेषुव्यवस्थिताः ॥ ६ ॥ ततःसर्वेसमागम्यपुत्रेणतवसैनिकाः ॥ कृपश्चकृतवर्माचद्रौणिःशल्योथ सौबलः ॥ ७ ॥ अन्येचपार्थिवाःशेषाःसमयंचक्रुराहृताः ॥ ननएकेनयोद्धव्यंकथंचिदपिपांडवैः ॥ ८ ॥ योत्येकःपांडवैर्युध्येद्योवायुध्यंतमुत्सृजेत् ॥ सपंचभिर्भ वेद्युक्तःपातकैश्चोपपातकैः ॥ ९ ॥ अन्योन्यंपरिरक्षद्भिर्योद्धव्यंसहितैश्चह ॥ एवंतेसमयंकृत्वासर्वेतत्रमहारथाः ॥ १० ॥ मद्रराजंपुरस्कृत्यतूर्णमभ्यद्रवन्परान् ॥ तथैवपांडवाराजन्व्यूह्यसैन्यंमहारणे ॥ ११ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

अभ्ययुःकौरवान्राजन्योत्स्यमानाःसमंततः ॥ तद्बलंभरतश्रेष्ठक्षुब्धार्णवसमस्वनं ॥ १२ ॥ समुद्भूतार्णवाकारमुद्भूतरथकुंजरं ॥ धृतराष्ट्रउवाच द्रो
णस्यचैवभीष्मस्यराधेयस्यचमेश्रुतं ॥ १३ ॥ पातनंशंसमेभूयःशल्यस्याथसुतस्यमे ॥ कथंरणेहतःशल्योधर्मराजेनसंजय ॥ १४ ॥ भीमेनचमहाबाहुः
पुत्रोदुर्योधनोमम ॥ संजयउवाच क्षयंमनुष्यदेहानांतथानागाश्वसंक्षयं ॥ १५ ॥ शृणुराजन्स्थिरोभूत्वासंग्रामंशंसतोमम ॥ आशाबलवतीराजन्पु
त्राणांतेभवत्तदा ॥ १६ ॥ हतेद्रोणेचभीष्मेचसूतपुत्रेचपातिते ॥ शल्यःपार्थान्रणेसर्वान्निहनिष्यतिमारिष ॥ १७ ॥ तामाशांहृदयेकृत्वासमाश्वस्यचभार
त ॥ मद्रराजंचसमरेसमाश्रित्यमहारथं ॥ १८ ॥ नाथवंतंतदात्मानममन्यंतसुतास्तव ॥ यदाकर्णेहतेपार्थाःसिंहनादंप्रचक्रिरे ॥ १९ ॥ तदातुतावकान्राज
न्नाविवेशमहद्भयं ॥ तान्समाश्वास्ययोधांस्तुमद्रराजःप्रतापवान् ॥ २० ॥ व्यूह्यव्यूहंमहाराजसर्वतोभद्रमृद्धिमत् ॥ प्रत्युद्ययौरणेपार्थान्मद्रराजःप्रतापवान्
॥ २१ ॥ विधुन्वन्कार्मुकंचित्रंभारघ्नंवेगवत्तरं ॥ रथप्रवरमास्थायसैंधवाश्वंमहारथः ॥ २२ ॥ तस्यसूतोमहाराजरथस्थोऽशोभयद्रथं ॥ सतेनसंवृतोवीरोरथे
नामित्रकर्षणः ॥ २३ ॥ तस्थौशूरोमहाराजपुत्राणांतेभयप्रणुत् ॥ प्रयाणेमद्रराजोभून्मुखंव्यूहस्यदंशितः ॥ २४ ॥ मद्रकैःसहितोवीरैःकर्णपुत्रैश्चदुर्जयैः ॥
सव्येभूत्कृतवर्माचत्रिगर्तैःपरिवारितः ॥ २५ ॥ गौतमोदक्षिणेपार्श्वेशकैश्चयवनैःसह ॥ अश्वत्थामापृष्ठतोभूत्कांबोजैःपरिवारितः ॥ २६ ॥ दुर्योधनोभवन्म
ध्येरक्षितःकुरुपुंगवैः ॥ हयानीकेनमहतासौबलश्चापिसंवृतः ॥ २७ ॥ प्रययौसर्वसैन्येनकैतव्यश्चमहारथः ॥ पांडवाश्चमहेष्वासाव्यूह्यसैन्यमरिंदमाः ॥ २८ ॥
त्रिधाभूतामहाराजतवसैन्यमुपाद्रवन् ॥ धृष्टद्युम्नःशिखंडीचसात्यकिश्चमहारथः ॥ २९ ॥ शल्यस्यवाहिनींहंतुमभिदुद्रुवुराहवे ॥ ततोयुधिष्ठिरोराजास्वेनानी
केनसंवृतः ॥ ३० ॥ शल्यमेवाभिदुद्रावजिघांसुर्भरतर्षभः ॥ हार्दिक्यंचमहेष्वासमर्जुनःशत्रुसैन्यहा ॥ ३१ ॥ संशप्तकगणांश्चैववेगितोभिविदुद्रुवे ॥ गौत
मंभीमसेनोवैसोमकाश्चमहारथाः ॥ ३२ ॥ अभ्यद्रवंतराजेंद्रजिघांसंतःपरान्युधि ॥ माद्रीपुत्रौतुशकुनिमुलूकंचमहारथं ॥ ३३ ॥ ससैन्यौसहसैन्यौताकुपतस्थतु
राहवे ॥ तथैवायुतशोयोधास्तावकाःपांडवान्रणे ॥ ३४ ॥ अभ्यवर्तंतसंक्रुद्धाविविधायुधपाणयः ॥ धृतराष्ट्रउवाच हतेभीष्मेमहेष्वासेद्रोणेकर्णेमहारथे
॥ ३५ ॥ कुरुष्वल्पावशिष्टेषुपांडवेषुचसंयुगे ॥ सुसंरब्धेषुपार्थेषुपराक्रांतेषुसंजय ॥ ३६ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ पत्तिकोटीइतिद्विवचनं ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेअष्टमोऽध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥ ७ ॥ ततइति

मामकानांपरेषांचकिंशिष्टमभवद्बलं॥ संजयउवाच यथावयंपरेराजन्युद्धायसमुपस्थिताः ॥ ३७ ॥ यावच्चासीद्बलंशिष्टंसंग्रामेतन्निबोधमे ॥ एका दशसहस्राणिरथानांभरतर्षभ ॥ ३८ ॥ दशदंतिसहस्राणिसप्तचैवशतानिच ॥ पूर्णंशतसहस्रेद्वेहयानांतत्रभारत ॥ ३९ ॥ पत्तिकोट्यस्तथातिस्रोबलमेतत्तवा भवत् ॥ रथानांषट्सहस्राणिषट्सहस्राश्चकुंजराः ॥ ४० ॥ दशचाश्वसहस्राणिपत्तिकोटीचभारत ॥ एतद्बलंपांडवानामभवच्छेषमाहवे ॥ ४१ ॥ एतएवसमा जग्मुर्युद्धायभरतर्षभ ॥ एवंविभज्यराजेंद्रमद्रराजवशेस्थिताः ॥ ४२ ॥ पांडवान्प्रत्युदीयुस्तेजयगृद्धाःप्रमन्यवः ॥ तथैवपांडवाःशूराःसमरेजितकाशिनः ॥ ॥ ४३ ॥ उपयातानरव्याघ्राःपंचालाश्चयशस्विनः ॥ इमेतेचबलौघेनपरस्परवधैषिणः ॥ ४४ ॥ उपयातानरव्याघ्राःपूर्वांसंध्यांप्रतिप्रभो ॥ ततःप्रववृतेयुद्धंघो रंरूपंभयानकं ॥ तावकानांपरेषांचनिघ्नतामितरेतरं ॥ ४५ ॥ इतिश्रीमहाभारतेशल्यपर्वणिव्यूहनिर्माणेअष्टमोऽध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥ ७ ॥

संजयउवाच ततःप्रववृतेयुद्धंकुरूणांभयवर्धनं ॥ सृंजयैःसहराजेंद्रघोरंदेवासुरोपमं ॥ १ ॥ नरारथागजौघाश्चसादिनश्चसहस्रशः ॥ वाजिनश्चपराक्रां ताःसमाजग्मुःपरस्परं ॥ २ ॥ गजानांभीमरूपाणांद्रवतांनिःस्वनोमहान् ॥ अश्रूयतयथाकालेजलदानांनभस्तले ॥ ३ ॥ नागैरभ्याहताःकेचित्सरथारथिनो पतन् ॥ व्यद्रवंतरणेवीराद्राव्यमाणामदोत्कटैः ॥ ४ ॥ हयौघान्पादरक्षांश्चरथिनस्तत्रशिक्षिताः ॥ शरैःसंप्रेषयामासुःपरलोकायभारत ॥ ५ ॥ सादिनःशिक्षि ताराजन्परिवार्यमहारथान् ॥ विचरंतोरणेभ्यघ्नन्प्रासशक्त्यृष्टिभिस्तथा ॥ ६ ॥ धन्विनःपुरुषाःकेचित्परिवार्यमहारथान् ॥ एकंबहवआसाद्यप्रययुर्यमसादनं ॥ ७ ॥ नागान्रथवरांश्चान्येपरिवार्यमहारथाः ॥ सांतरायोधिनंजघ्नुर्द्रवमाणंमहारथं ॥ ८ ॥ तथाचरथिनंक्रुद्धंविकिरंतंशरान्बहून् ॥ नागाजघ्नुर्महाराजपरिवा र्यसमंततः ॥ ९ ॥ नागोनागमभिद्रुत्यरथीचरथिनंरणे ॥ शक्तितोमरनाराचैर्निजघ्नेतत्रभारत ॥ १० ॥ पादातानवमृद्नंतोरथवारणवाजिनः ॥ रणमध्येव्यदृश्यंतकु र्वंतोमहदाकुलं ॥ ११ ॥ हयाश्चपर्यधावंतचामरैरुपशोभिताः ॥ हंसाहिमवतःप्रस्थेपिबंतइवमेदिनीं ॥ १२ ॥ तेषांतुवाजिनांभूमिःखुरैश्चित्राविशांपते ॥ अ शोभतयथानारीकरजैःक्षतविक्षता ॥ १३ ॥ वाजिनांखुरशब्देनरथनेमिस्वनेनच ॥ पत्तीनांचापिशब्देननागानांबृंहितेनच ॥ १४ ॥ वादित्राणांचघोषेणशं खानांनिनदेनच ॥ अभवन्नादिताभूमिर्निर्घातैरिवभारत ॥ १५ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ तालानांतालफलानां ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ननिवर्त्तिरेननिवर्तिताः

धनुषांकूजमानानांशस्त्रौघानांचदीप्यतां ॥ कवचानांप्रभाभिश्चनप्राज्ञायतकिंचन ॥ १६ ॥ बहवोबाहवश्छिन्नानागराजकरोपमाः ॥ उद्वेष्टंतेविचेष्टंतेवेगं
कुर्वंतिदारुणं ॥ १७॥ शिरसांचमहाराजपततांधरणीतले॥ च्युतानामिवतालेभ्यस्तालानांश्रूयतेस्वनः ॥१८॥ शिरोभिःपतितैर्भातिरुधिरार्द्रैर्वसुंधरा ॥ तपनी
यनिभैःकालेनलिनैरिवभारत ॥ १९ ॥ उद्वृत्तनयनैस्तैस्तुगतसत्वैःसुविक्षतैः ॥ व्यभ्राजतमहीराजन्पुंडरीकैरिवावृता ॥ २० ॥ बाहुभिश्चंदनादिग्धैःसकेयूरैर्म
हाधनैः ॥ पतितैर्भातिराजेंद्रमहाशक्रध्वजैरिव ॥ २१ ऊरुभिश्चनरेंद्राणांविनिकृत्तैर्महाहवे ॥ हस्तिहस्तोपमैरन्यैःसंवृतंतद्रणांगनं ॥ २२ ॥ कबंधशतसंकीर्णंछ
त्रचामरसंकुलं ॥ सेनावनंतच्छुशुभेवनंपुष्पाचितंयथा ॥ २३ ॥ तत्रयोधामहाराजविचरंतोह्यभीतवत् ॥ दृश्यंतेरुधिराक्तांगाःपुष्पिताइवकिंशुकाः ॥ २४ ॥
मातंगाश्चाप्यदृश्यंतशरतोमरपीडिताः ॥ पतंतस्तत्रतत्रैवछिन्नाभ्रसदृशारणे ॥ २५ ॥ गजानीकंमहाराजवध्यमानंमहात्मभिः ॥ व्यदीर्यतदिशःसर्वावातनु
न्नाघनाइव ॥ २६ ॥ तेगजाघनसंकाशाःपेतुरुर्व्यांसमंततः ॥ वज्रनुन्नाइववभुःपर्वतायुगसंक्षये ॥ २७ ॥ हयानांसादिभिःसार्धंपतितानांमहीतले ॥ राशयः
स्मप्रदृश्यंतेगिरिमात्रास्ततस्ततः ॥ २८ ॥ संजज्ञेरणभूमौतुपरलोकवहानदी ॥ शोणितोदारथावर्ताध्वजवृक्षास्थिशर्करा ॥ २९ ॥ भुजनक्राधनुःस्रोताहस्ति
शैलाहयोपला ॥ मेदोमज्जाकर्दमिनीछत्रहंसागदोडुपा ॥ ३० ॥ कवचोष्णीषसंछन्नापताकारुचिरद्रुमा ॥ चक्रचक्रावलीजुष्टात्रिवेणुदंडकावृता ॥ ३१ ॥ शू
राणांहर्षजननीभीरूणांभयवर्धनी ॥ प्रावर्त्ततनदीरौद्राकुरुसृंजयसंकुला ॥ ३२ ॥ तांनदींपरलोकायवहंतीमतिभैरवां ॥ तेरुर्वाहननौभिस्तेशूराःपरिघबाहवः
॥ ३३ ॥ वर्त्तमानेतदायुद्धेनिर्मर्यादेविशांपते ॥ चतुरंगक्षयेघोरेपूर्वंदेवासुरोपमे ॥ ३४ ॥ व्याक्रोशन्बांधवानन्येतत्रतत्रपरंतप ॥ क्रोशद्भिर्दयितैरन्येभयार्त्ता
ननिवर्त्तिरे ॥ ३५ ॥ निर्मर्यादेतथायुद्धेवर्त्तमानेभयानके ॥ अर्जुनोभीमसेनश्चमोहयांचक्रतुःपरान् ॥ ३६ ॥ सावध्यमानामहतीसेनातवनराधिप ॥ अमुह्य
त्तत्रतत्रैवयोषिन्मदवशादिव ॥ ३७ ॥ मोहयित्वाचतांसेनांभीमसेनधनंजयौ ॥ दध्मतुर्वारिजौतत्रसिंहनादांश्चचक्रतुः ॥ ३८ ॥ श्रुत्वैवतुमहाशब्दंधृष्टद्युम्नशि
खंडिनौ ॥ धर्मराजंपुरस्कृत्यमद्रराजमभिद्रुतौ ॥ ३९ ॥ तत्राश्चर्यमपश्यामघोररूपंविशांपते ॥ शल्येनसंगताःशूरायदयुध्यंतभागशः ॥ ४० ॥ माद्रीपुत्रौतुरभ
सौकृतास्त्रौयुद्धदुर्मदौ ॥ अभ्ययातांत्वरायुक्तौजिगीषंतौपरंतप ॥ ४१ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेनवमोऽध्यायः ॥ ९ ॥ ॥ ५ ॥ ॥ ५ ॥ तत्रभग्नमिति अध्यायःस्पष्टार्थः ॥ १ ॥ २ ॥

ततोन्यवर्त्ततबलंतावकंभरतर्षभ ॥ शरैःप्रणुन्नंबहुधापांडवैर्जितकाशिभिः ॥ ४२ ॥ वध्यमानाचमूःसातुपुत्राणांप्रेक्षतांतव ॥ भेजेदिशोमहाराजप्रणुन्नाशर
वृष्टिभिः ॥ ४३ ॥ हाहाकारोमहानजज्ञेयोधानांतत्रभारत ॥ तिष्ठतिष्ठेतिचाप्यासीद्द्रावितानांमहात्मनां ॥ ४४ ॥ क्षत्रियाणांसहान्योन्यंसंयुगेजयमिच्छतां ॥
प्राद्रवन्नेवसंभग्नाःपांडवैस्तवसैनिकाः ॥ ४५ ॥ त्यक्त्वायुद्धेप्रियान्पुत्रान्भ्रातॄनथपितामहान् ॥ मातुलान्भागिनेयांश्चवयस्यानपिभारत ॥ ४६ ॥ हयान्द्विपां
स्त्वरयंतोयोधाजग्मुःसमंततः ॥ आत्मत्राणकृतोत्साहास्तावकाभरतर्षभ ॥ ४७ ॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेनवमोऽध्यायः ॥ ९ ॥ ॥५॥
संजयउवाच तत्भग्नंबलंदृष्ट्वामद्रराजःप्रतापवान् ॥ उवाचसारथिंतूर्णंचोदयाश्वान्महाजवान् ॥ १ ॥ एषतिष्ठतिवैराजापांडुपुत्रोयुधिष्ठिरः ॥ छत्रेणध्रिय
माणेनपांडुरेणविराजता ॥ २ ॥ अत्रमांप्रापयक्षिप्रंपश्यमेसारथेबलं ॥ नसमर्थोहिमेपार्थःस्थातुमद्यपुरोयुधि ॥ ३ ॥ एवमुक्तस्ततःप्रायान्मद्रराजस्यसारथिः ॥
यत्रराजासत्यसंधोधर्मपुत्रोयुधिष्ठिरः ॥ ४ ॥ प्रापतत्तच्चसहसापांडवानांमहद्बलं ॥ दधारैकोरणेशल्योवेलोद्वृत्तमिवार्णवं ॥ ५ ॥ पांडवानांबलौघस्तुशल्यमा
साद्यमारिष ॥ व्यतिष्ठततदायुद्धेसिंधोर्वेगइवाचलं ॥ ६ ॥ मद्रराजंतुसमरेदृष्ट्वायुद्धायधिष्ठितं ॥ कुरवःसन्यवर्त्तंतमृत्युंकृत्वानिवर्त्तनं ॥ ७ ॥ तेषुराजन्निवृत्तेषु
व्यूढानीकेषुभागशः ॥ प्रावर्त्ततमहारौद्रःसंग्रामःशोणितोदकः ॥ ८ ॥ समार्छच्चित्रसेनंतुनकुलोयुद्धदुर्मदः ॥ तौपरस्परमासाद्यचित्रकार्मुकधारिणौ ॥ ९ ॥ मे
घाविवयथोद्वृत्तौदक्षिणोत्तरवर्षिणौ ॥ शरतोयैःसिषिचतुस्तौपरस्परमाहवे ॥ १० ॥ नांतरंतत्रपश्यामिपांडवस्येतरस्यच ॥ उभौकृतास्त्रौबलिनौरथचर्याविशा
रदौ ॥ ११ ॥ परस्परवधेयत्तौछिद्रान्वेषणतत्परौ ॥ चित्रसेनस्तुभल्लेनपीतेननिशितेनच ॥ १२ ॥ नकुलस्यमहाराजमुष्टिदेशेऽच्छिनद्धनुः ॥ अथैनंछिन्नधन्वानं
रुक्मपुंखैःशिलाशितैः ॥ १३ ॥ त्रिभिःशरैरसंभ्रांतोललाटेवैसमार्पयत् ॥ हयांश्चास्यशरैस्तीक्ष्णैःप्रेषयामासमृत्यवे ॥ १४ ॥ तथाध्वजंसारथिंचत्रिभिस्त्रि
भिरपातयत् ॥ सशत्रुभुजनिर्मुक्तैर्ललाटस्थैस्त्रिभिःशरैः ॥ १५ ॥ नकुलःशुशुभेराजंस्त्रिशृंगइवपर्वतः ॥ सच्छिन्नधन्वाविरथःखड्गमादायचर्मच ॥ १६ ॥ रथा
दवातरद्वीरःशैलाग्रादिवकेसरी ॥ पद्भ्यामापततस्तस्यशरवृष्टिंसमासृजत् ॥ १७ ॥ नकुलोप्यग्रसत्तांवैचर्मणालघुविक्रमः ॥ चित्रसेनरथंप्राप्यचित्रयोधीजि
तश्रमः ॥ १८ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ चित्रसेनःकर्णपुत्रः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

आरुरोहमहाबाहुःसर्वसैन्यस्यपश्यतः ॥ सकुंडलंसमुकुटंसुनसंस्वायतेक्षणं ॥ १९ ॥ चित्रसेनशिरःकायादपाहरतपांडवः ॥ सपपातरथोपस्थेदिवाकरसम
द्युतिः ॥ २० ॥ चित्रसेनंविशस्तंतुदृष्ट्वातत्रमहारथाः ॥ साधुवादस्वनांश्चक्रुःसिंहनादांश्चपुष्कलान् ॥ २१ ॥ विशस्तंभ्रातरंदृष्ट्वाकर्णपुत्रौमहारथौ ॥ सुषेणः
सत्यसेनश्चमुंचंतौविविधान्शरान् ॥ २२ ॥ ततोभ्यधावतांतूर्णंपांडवंरथिनांवरं ॥ जिघांसंतौयथानागंव्याघ्रौराजन्महावने ॥ २३ ॥ तावभ्यधावतांतीक्ष्णौ
द्वावप्येनंमहारथं ॥ शरौघान्सम्यगस्यंतौजीमूतौसलिलंयथा ॥ २४ ॥ सशरैःसर्वतोविद्धःप्रहृष्टइवपांडवः ॥ अन्यत्कार्मुकमादायरथमारुह्यवेगवान् ॥ २५ ॥
अतिष्ठतरणेवीरःक्रुद्धरूपइवांतकः ॥ तस्यतौभ्रातरौराजन्शरैःसन्नतपर्वभिः ॥ २६ ॥ रथंविशकलीकर्तुंसमारब्धौविशांपते ॥ ततःप्रहस्यनकुलश्चतुर्भिश्चतु
रोरणे ॥ २७ ॥ जघाननिशितैर्बाणैःसत्यसेनस्यवाजिनः ॥ ततःसंधायनाराचंरुक्मपुंखंशिलाशितं ॥ २८ ॥ धनुश्चिच्छेदराजेंद्रसत्यसेनस्यपांडवः ॥ अथा
न्यंरथमास्थायधनुरादायचापरं ॥ २९ ॥ सत्यसेनःसुषेणश्चपांडवंपर्यधावतां ॥ अविध्यत्तावसंभ्रांतौमाद्रीपुत्रःप्रतापवान् ॥ ३० ॥ द्वाभ्यांद्वाभ्यांमहाराजश
राभ्यांरणमूर्धनि ॥ सुषेणस्तुततःक्रुद्धःपांडवस्यमहद्धनुः ॥ ३१ ॥ चिच्छेदप्रहसन्युद्धेक्षुरप्रेणमहारथः ॥ अथान्यद्धनुरादायनकुलःक्रोधमूर्च्छितः ॥ ३२ ॥
सुषेणंपंचभिर्विध्वाध्वजमेकेनचिच्छिदे ॥ सत्यसेनस्यसधनुर्हस्तावापंचमारिष ॥ ३३ ॥ चिच्छेदतरसायुद्धेततउच्चुक्रुशुर्जनाः ॥ अथान्यद्धनुरादायवेगघ्नंभा
रसाधनं ॥ ३४ ॥ शरैःसंछादयामाससमंतात्पांडुनंदनं ॥ सन्निवार्यतुतान्बाणान्नकुलःपरवीरहा ॥ ३५ ॥ सत्यसेनंसुषेणंचद्वाभ्यांद्वाभ्यामविध्यत ॥ तावेनंप्र
त्यविध्येतांपृथक्पृथगजिह्मगैः ॥ ३६ ॥ सारथिंचास्यराजेंद्रशितैर्विव्यधतुःशरैः ॥ सत्यसेनोरथेषांतुनकुलस्यधनुस्तथा ॥ ३७ ॥ पृथक्शराभ्यांचिच्छेदकृ
तहस्तःप्रतापवान् ॥ सरथेतिरथस्तिष्ठन्रथशक्तिंपरामृशत् ॥ ३८ ॥ स्वर्णदंडामकुंठाग्रांतैलधौतांसुनिर्मलां ॥ लेलिहानामिवविभोनागकन्यांमहाविषां ॥
॥ ३९ ॥ समुद्यम्यचचिक्षेपसत्यसेनस्यसंयुगे ॥ सातस्यहृदयंसंख्येबिभेदशतधानृप ॥ ४० ॥ सपपातरथाद्भूमिंगतसत्वोल्पचेतनः ॥ भ्रातरंनिहतंदृष्ट्वासुषे
णःक्रोधमूर्छितः ॥ ४१ ॥ अभ्यवर्षच्छरैस्तूर्णंपादातंपांडुनंदनं ॥ चतुर्भिश्चतुरोवाहान्ध्वजंछित्वाचपंचभिः ॥ ४२ ॥ त्रिभिर्वैसारथिंहत्वाकर्णपुत्रोननादह ॥
नकुलंविरथंदृष्ट्वाद्रौपदेयोमहारथं ॥ ४३ ॥ सुतसोमोभिदुद्रावपरीप्सन्पितरंरणे ॥ ततोधिरुह्यनकुलःसुतसोमस्यतंरथं ॥ ४४ ॥

शुशुभेभरतश्रेष्ठोगिरिस्थइवकेसरी ॥ अन्यत्कार्मुकमादायसुषेणंसमयोधयत् ॥ ४५ ॥ तावुभौशरवर्षाभ्यांसमासाद्यपरस्परं ॥ परस्परवधेयत्नंचक्रतुःसुमहारथौ ॥ ४६ ॥ सुषेणस्तुततःक्रुद्धःपांडवंविशिखैस्त्रिभिः ॥ सुतसोमंतुविंशत्याबाह्वोरुरसिचार्पयत् ॥ ४७ ॥ ततःक्रुद्धोमहाराजनकुलःपरवीरहा ॥ शरैस्तस्यदिशःसर्वाश्छादयामासवीर्यवान् ॥ ४८ ॥ ततोगृहीत्वातीक्ष्णाग्रमर्धचंद्रंसुतेजनं ॥ सुवेगवंतंचिक्षेपकर्णपुत्रायसंयुगे ॥ ४९ ॥ तस्यतेनशिरःकायाज्जहारनृपसत्तम ॥ पश्यतांसर्वसैन्यानांतदद्भुतमिवाभवत् ॥ ५० ॥ सहतःप्रापतद्राजन्नकुलेनमहात्मना ॥ नदीवेगादिवारुग्णस्तीरजःपादपोमहान् ॥ ५१ ॥ कर्णपुत्रवधंदृष्ट्वानकुलस्यचविक्रमं ॥ प्रदुद्रावभयात्सेनातावकीभरतर्षभ ॥ ५२ ॥ तांतुसेनांमहाराजमद्रराजःप्रतापवान् ॥ अपालयद्रणेशूरःसेनापतिररिंदमः ॥ ५३ ॥ विभीस्तस्थौमहाराजव्यवस्थाप्यचवाहिनीं ॥ सिंहनादंभृशंकृत्वाधनुःशब्दंचदारुणं ॥ ५४ ॥ तावकाःसमरेराजन्रक्षितादृढधन्वना ॥ प्रत्युद्ययुश्चतांस्तेतुसमंताद्विगतव्यथाः ॥ ५५ ॥ मद्रराजंमहेष्वासंपरिवार्यसमंततः ॥ स्थिताराजन्महासेनायोद्धुकामासमंततः ॥ ५६ ॥ सात्यकिर्भीमसेनश्चमाद्रीपुत्रौचपांडवौ ॥ युधिष्ठिरंपुरस्कृत्यह्रीनिषेवमरिंदमं ॥ ५७ ॥ परिवार्यरणेवीराःसिंहनादंप्रचक्रिरे ॥ बाणशंखरवांस्तीव्रान्क्ष्वेडाश्चविविधादधुः ॥ ५८ ॥ तथैवतावकाःसर्वेमद्राधिपतिमंजसा ॥ परिवार्यसुसंरब्धाःपुनर्युद्धमरोचयन् ॥ ५९ ॥ ततःप्रववृतेयुद्धंभीरूणांभयवर्धनं ॥ तावकानांपरेषांचमृत्युंकृत्वानिवर्तनं ॥ ६० ॥ यथादेवासुरंयुद्धंपूर्वमासीद्विशांपते ॥ अभीतानांतथाराजन्यमराष्ट्रविवर्धनं ॥ ६१ ॥ ततःकपिध्वजोराजन्हत्वासंशप्तकान्रणे ॥ अभ्यद्रवततांसेनांकौरवींपांडुनंदनः ॥ ६२ ॥ तथैवपांडवाःसर्वेधृष्टद्युम्नपुरोगमाः ॥ अभ्यधावंततांसेनांविसृजंतःशितान्शरान् ॥ ६३ ॥ पांडवैरवकीर्णानांसंमोहःसमजायत ॥ नचजज्ञुस्त्वनीकानिदिशोवाविदिशस्तथा ॥ ६४ ॥ आपूर्यमाणानिशितैःशरैःपांडवचोदितैः ॥ हतप्रवीराविध्वस्तावार्यमाणासमंततः ॥ ६५ ॥ कौरव्यवध्यतचमूःपांडुपुत्रैर्महारथैः ॥ तथैवपांडवंसैन्यंशरैराजन्समंततः ॥ ६६ ॥ रणेहन्यतपुत्रैस्तेशतशोथसहस्रशः ॥ तेसेनेभृशसंतप्तेवध्यमानेपरस्परं ॥ ६७ ॥ व्याकुलेसमपद्येतांवर्षासुसरिताविव ॥ आविवेशततस्तीव्रंतावकानांमहद्भयं ॥ पांडवानांचराजेंद्रतथाभूतेमहाहवे ॥ ६८ ॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेदशमोऽध्यायः ॥ १० ॥ ॥ ७ ॥ ॥ ७ ॥

इतिशल्यप० नै० भारतभा० दशमोऽध्यायः ॥ १० ॥ ॥ ५ ॥

तस्मिन्निति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥ भृग्विति सर्वभूभुजांकृत्स्नपृथ्वीपतिनांपांडुपुत्राणांपांडवानांचरमंविलोमगणनयाप्रथमंयुधिष्ठिरमभिलक्ष्यशुक्रभौम

संजयउवाच तस्मिन्विलुलितेसैन्येवध्यमानेपरस्परं॥ द्रवमाणेषुयोधेषुविद्रवत्सुचदंतिषु ॥ १॥ कूजतांस्तनतांचैवपदातीनांमहाहवे॥ निहतेषुमहाराजहयेषुबहुधातदा॥ २ ॥ प्रक्षयेदारुणेघोरेसंहारेसर्वदेहिनां॥ नानाशस्त्रसमावायेव्यतिषक्तरथद्विपे ॥ ३ ॥ हर्षणेयुद्धशौंडानांभीरूणांभयवर्धने ॥ गाहमानेषुयोधेषुपरस्परवधैषिषु ॥ ४ ॥ प्राणादानेमहाघोरेवर्त्तमानेदुरोदरे॥ संग्रामेघोररूपेतुयमराष्ट्रविवर्द्धने॥ ५॥ पांडवास्तावकंसैन्यंव्यधमन्निशितैःशरैः ॥ तथैवतावकायोधाजघ्नुःपांडवसैनिकान्॥ ६॥ तस्मिंस्तथावर्त्तमानेयुद्धेभीरुभयावहे ॥ पूर्वाह्णेचापिसंप्राप्तेभास्करोदयनंप्रति ॥ ७ ॥ लब्धलक्षाःपरेराजन्रक्षितास्तुमहात्मना॥ अयोधयंस्तवबलंमृत्युंकृत्वानिवर्त्तनं॥ ८॥ बलिभिःपांडवैर्दृप्तैर्लब्धलक्षैःप्रहारिभिः॥ कौरव्यसीदत्पृतनामृगीवाग्निसमाकुला॥ ९॥ तांदृष्ट्वासीदतींसेनांपंकेगामिवदुर्बलां॥ उज्जिहीर्षुस्तदाशल्यःप्रायात्पांडुसुतान्प्रति॥ १० ॥ मद्रराजःसुसंक्रुद्धोगृहीत्वाधनुरुत्तमं॥ अभ्यद्रवतसंग्रामेपांडवानाततायिनः॥ ११ ॥पांडवाअपिभूपालसमरेजितकाशिनः॥ मद्रराजंसमासाद्यविभिदुर्निशितैःशरैः॥ १२॥ ततःशरशतैस्तीक्ष्णैर्मद्रराजोमहारथः॥ अर्दयामासतांसेनांधर्मराजस्यपश्यतः॥१३॥ प्रादुरासन्निमित्तानिनानारूपाण्यनेकशः॥ चचालशब्दंकुर्वाणामही चापिसपर्वता॥१४॥ सदंडशूलादीप्ताग्रादीर्यमाणाःसमंततः॥ उल्काभूमिंदिवःपेतुराहत्यरविमंडलं॥ १५॥ मृगाश्चमहिषाश्चापिपक्षिणश्चविशांपते॥ अपसव्यंतदाचक्रुःसेनांतेबहुशोनृप॥ १६॥ भृगुसूनुधरापुत्रौशशिजेनसमन्वितौ॥ चरमंपांडुपुत्राणांपुरस्तात्सर्वभूभुजां॥१७॥ शस्त्राग्रेष्वभवज्ज्वालानेत्राण्याहत्यवर्षती॥ शिरःस्वलीयंतभृशंकाकोलूकाश्चकेतुषु॥ ॥ १८॥ ततस्तद्युद्धमत्युग्रमभवत्सहचारिणां॥ तथासर्वाण्यनीकानिसन्निपत्यजनाधिप ॥ १९ ॥ अभ्ययुःकौरवाराजन्पांडवानामनीकिनीं ॥ शल्यस्तुशरवर्षेणवर्षन्निवसहस्रदृक्॥ २०॥ अभ्यवर्षतधर्मात्माकुंतीपुत्रंयुधिष्ठिरं॥ भीमसेनंशरैश्चापिरुक्मपुंखैःशिलाशितैः॥ २१ ॥ द्रौपदेयांस्तथासर्वान्माद्रीपुत्रौचपांडवौ॥ धृष्टद्युम्नंचशैनेयंशिखंडिनमथापिच॥ २२॥ एकैकंदशभिर्बाणैर्विव्याधसमहाबलः॥ ततोसृजद्बाणवर्षंघर्मांतेमघवानिव ॥ २३॥ ततःप्रभद्रकाराजन्सोमकाश्चसहस्रशः॥ पतिताःपात्यमानाश्चदृश्यंतेशल्यसायकैः॥ २४॥

बुधाःसप्तमस्थानेबलावद्धाःआसन् एतच्चसर्वभूभुजामितिफलस्यजनकमित्यर्थः ॥१७॥ आहत्यस्पृष्ट्वावर्षतीभुविपतंती कर्षतीतिपाठेआहत्यबलेनकर्षयती ॥ १८॥ १९ ॥२०॥२१॥२२॥२३॥२४॥

भ्रमराणामिवव्राताःशलभानामिवव्रजाः ॥ ह्रादिन्यइवमेघेभ्यःशल्यस्यन्यपतन्शराः ॥ २५ ॥ द्विरदास्तुरगाश्चार्त्ताःपत्तयोरथिनस्तथा ॥ शल्यस्यबाणैरपत
न्बभ्रमुर्व्यनदंस्तथा ॥ २६ ॥ आविष्टइवमद्रेशोमन्युनापौरुषेणच ॥ प्राच्छादयदरीन्संख्येकालसृष्टइवांतकः ॥ २७ ॥ विनर्दमानोमद्रेशोमेघह्रादोमहाबलः ॥
साबध्यमानाशल्येनपांडवानामनीकिनी ॥ २८ ॥ अजातशत्रुंकौंतेयमभ्यधावद्युधिष्ठिरं ॥ तांसमर्पयत्ततःसंख्येलघुहस्तःशितैःशरैः ॥ २९ ॥ बाणवर्षेणमहता
युधिष्ठिरमताडयत् ॥ तमापतंतंपत्त्यश्वैःक्रुद्धोराजायुधिष्ठिरः ॥ ३० ॥ अवारयच्छरैस्तीक्ष्णैर्महाद्विपमिवांकुशैः ॥ तस्यशल्यःशरंघोरंमुमोचाशीविषोपमं ॥
॥ ३१ ॥ सनिर्भिद्यमहात्मानंवेगेनाभ्यपतच्चगां ॥ ततोवृकोदरःक्रुद्धःशल्यंविव्याधसप्तभिः ॥ ३२ ॥ पंचभिःसहदेवस्तुनकुलोदशभिःशरैः ॥ द्रौपदेयाश्चशत्रु
घ्नंशूरमार्तायनिंशरैः ॥ ३३ ॥ अभ्यवर्षन्महाराजमेघाइवमहीधरं ॥ ततोदृष्ट्वावार्यमाणंशल्यंपार्थैःसमंततः ॥ ३४ ॥ कृतवर्माकृपश्चैवसंक्रुद्धावभ्यधावतां ॥
उलूकश्चमहावीर्यःशकुनिश्चापिसौबलः ॥ ३५ ॥ समागम्याथशनकैरश्वत्थामामहाबलः ॥ तवपुत्राश्चकार्त्स्न्येनजुगुपुःशल्यमाहवे ॥ ३६ ॥ भीमसेनंत्रिभि
र्विध्वाकृतवर्माशिलीमुखैः ॥ बाणवर्षेणमहताक्रुद्धरूपमवारयत् ॥ ३७ ॥ धृष्टद्युम्नंततःक्रुद्धोबाणवर्षैरपीडयत् ॥ द्रौपदेयांश्चशकुनिर्यमौचद्रौणिरभ्ययात्
॥ ३८ ॥ दुर्योधनोयुधांश्रेष्ठआहवेकेशवार्जुनौ ॥ समभ्ययादुग्रतेजाःशरैश्चाप्यहनद्बली ॥ ३९ ॥ एवंद्वंद्वशतान्यासंस्त्वदीयानांपरैःसह ॥ घोररूपाणिचित्रा
णितत्रतत्रविशांपते ॥ ४० ॥ ऋक्षवर्णान्जघानाश्वान्भोजोभीमस्यसंयुगे ॥ सोवतीर्यरथोपस्थाद्धताश्वात्पांडुनंदनः ॥ ४१ ॥ कालोदंडमिवोद्यम्यगदापा
णिरयुध्यत ॥ प्रमुखेसहदेवस्यजघानाश्वान्समद्रराट् ॥ ४२ ॥ ततःशल्यस्यतनयंसहदेवोसिनाऽवधीत् ॥ गौतमःपुनराचार्योधृष्टद्युम्नमयोधयत् ॥ ४३ ॥ अ
संभ्रांतमसंभ्रांतोयत्नवान्यत्नवत्तरं ॥ द्रौपदेयांस्तथावीरानेकैकंदशभिःशरैः ॥ ४४ ॥ अविद्ध्यदाचार्यसुतोनातिक्रुद्धोहसन्निव ॥ पुनश्चभीमसेनस्यजघाना
श्वांस्तथाहवे ॥ ४५ ॥ सोवतीर्यरथात्तूर्णंहताश्वःपांडुनंदनः ॥ कालोदंडमिवोद्यम्यगदांक्रुद्धोमहाबलः ॥ ४६ ॥ पोथयामासतुरगान्रथंचकृतवर्मणः ॥ कृतव
र्मात्ववप्लुत्यरथात्तस्मादपाक्रमत् ॥ ४७ ॥ शल्योपिराजन्संक्रुद्धोनिघ्नन्सोमकपांडवान् ॥ पुनरेवशितैर्बाणैर्युधिष्ठिरमपीडयत् ॥ ४८ ॥ तस्यभीमोरणेक्रुद्धःसंद
ष्टदशनच्छदं ॥ विनाशायाभिसंधायगदामादायवीर्यवान् ॥ ४९ ॥ यमदंडप्रतीकाशांकालरात्रिमिवोद्यतां ॥ गजवाजिमनुष्याणांदेहांतकरणीमति ॥ ५० ॥

परिक्षिप्तांपरिच्छन्नां ॥५१॥५२॥ वासवींऐंद्रीं रासनीमितिपाठेशब्दवतीं ॥ ५३ ॥ ५४ ॥ म्हेश्वरसखंकुबेरं ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९॥६० ॥ ६१॥६२॥ ६३ ॥ इतिशल्यपर्वणिनै

हेमपट्टपरिक्षिप्तामुल्कांप्रज्वलितामिव ॥ शैक्यांव्यालीमिवात्युग्रांवज्रकल्पामयोमयीं ॥ ५१ ॥ चंदनागुरुपंकाक्तांप्रमदामीप्सितामिव ॥ वसामेदोपदिग्धांगींजिह्वांवैवस्वतीमिव ॥ ५२ ॥ पटुघंटाशतरवांवासवीमशनीमिव ॥ निर्मुक्ताशीविषाकारांपृक्तांगजमदैरपि ॥५३॥ त्रासनींसर्वभूतानांस्वसैन्यपरिहर्षिणीं ॥ मनुष्यलोकेविख्यातांगिरिशृंगविदारणीं ॥५४॥ ययाकैलासभवनेमहेश्वरसखंबली ॥ आह्वयामासयुद्धायभीमसेनोमहाबलः ॥५५॥ ययामायामयान्दृप्तान्सुबहून्धनदालये ॥ जघानगुह्यकान्क्रुद्धोनदन्पार्थोमहाबलः ॥ ५६ ॥ निवार्यमाणोबहुभिर्द्रौपद्याःप्रियमास्थितः ॥ तांवज्रमणिरत्नौघकल्माषांवज्रगौरवां ॥ ५७ ॥ समुद्यम्यमहाबाहुःशल्यमभ्यपतद्रणे ॥ गदयायुद्धकुशलस्तयादारुणनादया ॥ ५८ ॥ पोथयामासशल्यस्यचतुरोश्वान्महाजवान् ॥ ततःशल्योरणेक्रुद्धःपीनेवक्षसितोमरं ॥५९॥ निचखाननदन्वीरोवर्मभित्वाचसोभ्ययात् ॥ वृकोदरस्त्वसंभ्रांतस्तमेवोद्धृत्यतोमरं ॥६०॥ यंतारंमद्रराजस्यनिर्बिभेदतवोरसि ॥ सभिन्नवर्मारुधिरंवमन्वित्रस्तमानसः ॥६१ ॥ पपाताभिमुखोदीनोमद्रराजस्त्वपाक्रमत् ॥ कृतप्रतिकृतंदृष्ट्वाशल्योविस्मितमानसः ॥ ६२ ॥ गदामाश्रित्यधर्मात्माप्रत्यमित्रमवैक्षत ॥ ततःसुमनसःपार्थाभीमसेनमपूजयन् ॥ तद्दृष्ट्वाकर्मसंग्रामेघोरमक्लिष्टकर्मणः ॥ ६३ ॥ इतिश्रीमहाभारतेशल्यपर्वणिभीमसेनशल्ययुद्धेएकादशोऽध्यायः ॥ ११ ॥ ॥ ६५ ॥ ॥ ६५ ॥ संजयउवाच पतितंप्रेक्ष्ययंतारंशल्यःसर्वायसींगदां ॥ आदायतरसाराजंस्तस्थौगिरिरिवाचलः ॥ १ ॥ तंदीप्तमिवकालाग्निंपाशहस्तमिवांतकं ॥ सशृंगमिवकैलासंसवज्रमिववासवं ॥ २ ॥ सशूलमिवहर्यक्षंवनेमत्तमिवद्विपं ॥ जवेनाभ्यपतद्भीमःप्रगृह्यमहतींगदां ॥ ३ ॥ ततःशंखप्रणादश्चतूर्याणांचसहस्रशः ॥ सिंहनादश्चसंजज्ञेशूराणांहर्षवर्धनः ॥ ४ ॥ प्रेक्षंतःसर्वतस्तौहियोधायोधमहाद्विपौ ॥ तावकाश्चापरेचैवसाधुसाध्वित्यपूजयन् ॥ ५ ॥ नहिमद्राधिपादन्योरामाद्वायदुनंदनात् ॥ सोढुमुत्सहतेवेगंभीमसेनस्यसंयुगे ॥ ६ ॥ तथामद्राधिपस्यापिगदावेगंमहात्मनः ॥ सोढुमुत्सहतेनान्योयोधोयुधिवृकोदरात् ॥ ७ ॥ तौवृषाविवनर्दंतौमंडलानिविचेरतुः ॥ आवर्त्तितौगदाहस्तौमद्रराजवृकोदरौ ॥ ॥ ८ ॥ मंडलावर्त्तमार्गेषुगदाविहरणेषुच ॥ निर्विशेषमभूद्युद्धंतयोःपुरुषसिंहयोः ॥ ९ ॥

लकंठीयेभारतभावदीपेएकादशोऽध्यायः ॥ ११ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ पतितमिति ॥ १ ॥ २ ॥ हर्यक्षंरुद्रं ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

शुभ्रैर्दीप्तिमद्भिः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

तमहेममयैःशुभ्रैर्बभूवभयवर्धिनी॥ अग्निज्वालैरिवाबद्धापट्टैःशल्यस्यसागदा ॥ १० ॥ तथैवचरतोमार्गान्मंडलेषुमहात्मनः ॥ विद्युदभ्रप्रतीकाशाभीमस्य शुशुभेगदा॥ ११ ॥ताडितामद्रराजेनभीमस्यगदयागदा॥ दह्यमानेवखेराजन्साऽसृजत्पावकार्चिषः ॥ १२ ॥ तथाभीमेनशल्यस्यताडितागदयागदा॥ अंगारवर्षमुमुचेतदद्भुतमिवाभवत्॥ १३॥ दंतैरिवमहानागौशृंगैरिवमहर्षभौ॥ तोत्रैरिवतदान्योन्यंगदाग्राभ्यांनिजघ्नतुः॥ १४॥ तौगदाभिहतैर्गात्रैःक्षणेन रुधिरोक्षितौ॥ प्रेक्षणीयतरावास्तांपुष्पिताविवकिंशुकौ॥ १५॥ गदयामद्रराजस्यसव्यदक्षिणमाहतः॥ भीमसेनोमहाबाहुर्नचचालाचलोयथा॥ १६॥ तथा भीमगदावेगैस्ताड्यमानोमुहुर्मुहुः॥ शल्योनविव्यथेराजन्दंतिनेवमहागिरिः॥ १७॥ शुश्रुवेदिक्षुसर्वासुतयोःपुरुषसिंहयोः॥ गदानिपातसंह्रादोवज्रयोरिव निःस्वनः॥ १८॥ निवृत्यतुमहावीर्यौसमुच्छ्रितमहागदौ॥पुनरंतरमार्गस्थौमंडलानिविचेरतुः॥ १९॥ अथाभ्येत्यपदान्यष्टौसन्निपातोभवत्तयोः॥ उद्यम्यलोहदंडाभ्यामतिमानुषकर्मणोः॥ २० ॥पोथयंतौतदान्योन्यंमंडलानिविचेरतुः॥ क्रियाविशेषंकृतिनौदर्शयामासतुस्तदा ॥ २१ ॥ अथोद्यम्यगदेघोरेसशृंगाविवपर्वतौ॥ तावाजघ्नतुरन्योन्यंमंडलानिविचेरतुः॥ २२॥क्रियाविशेषकृतिनौरणभूमितलेचलौ॥ तौपरस्परसंरंभाद्गदाभ्यांसुभृशाहतौ॥ २३॥ युगपत्पेततु वीरावुभाविंद्रध्वजाविव॥ उभयोःसेनयोर्वीरास्तदाहाहाकृतोभवन्॥ २४॥ भृशंमर्माण्यभिहतावुभावास्तांसुविह्वलौ॥ ततःस्वरथमारोप्यमद्राणामृषभंरणे ॥ २५॥ अपोवाहकृपःशल्यंतूर्णमायोधनादथ॥ क्षीबवद्विह्वलत्वात्तुनिमेषात्पुनरुत्थितः॥ २६॥भीमसेनोगदापाणिःसमाह्वयतमद्रपं॥ ततस्तुतावकाःशूराना नाशस्त्रसमायुताः॥ २७॥ नानावादित्रशब्देनपांडुसेनामयोधयन्॥ भुजावुच्छ्रित्यशस्त्रंचशब्देनमहताततः॥ २८॥ अभ्यद्रवन्महाराजदुर्योधनपुरोगमाः॥ तदनीकमभिप्रेक्ष्यततस्तेपांडुनंदनाः॥ २९॥ प्रययुःसिंहनादेनदुर्योधनपुरोगमान्॥ तेषामापततांतूर्णंपुत्रस्तेभरतर्षभ॥ ३०॥ प्रासेनचेकितानंवैविव्याधहृदये भृशं॥ सपपातरथोपस्थेतवपुत्रेणताडितः॥ ३१॥ रुधिरौघपरिक्लिन्नःप्रविश्यविपुलंतमः॥चेकितानंहतंदृष्ट्वापांडवेयामहारथाः॥ ३२॥असक्तमभ्यवर्षंतशरवर्षाणिभागशः॥तावकानामनीकेषुपांडवाजितकाशिनः॥ ३३॥व्यचरंतमहाराजप्रेक्षणीयाःसमंततः॥कृपश्चकृतवर्माचसौबलश्चमहारथः॥ ३४॥अयोधयन्धर्मराजंमद्रराजपुरस्कृताः॥भारद्वाजस्यहंतारंभूरिवीर्यपराक्रमं॥ ३५॥ दुर्योधनोमहाराजधृष्टद्युम्नमयोधयत्॥ त्रिसाहस्रास्तथाराजंस्तवपुत्रेणचोदिताः॥ ३६॥

अयोधयंतविजयंद्रोणपुत्रपुरस्कृता॥ विजयेधृतसंकल्पाःसमरेत्यक्तजीविता ॥३७॥ प्राविशंस्तावकाराजन्हंसाइवमहत्सरः॥ नतोयुद्धमभूद्घोरंपरस्परवधैषिणां॥३८॥ अन्योन्यवधसंयुक्तमन्योन्यप्रीतिवर्धनं॥ तस्मिन्प्रवृत्तेसंग्रामेराजन्वीरवरक्षये॥३९॥ अनिलेनेरितंघोरमुत्तस्थौपार्थिवंरजः॥ श्रवणान्नामधेयानांपांडवानांचकीर्त्तनात्॥ ४०॥ परस्परंविजानीमोयद्युध्यन्नभीतवत्॥ तद्रजःपुरुषव्याघ्रशोणितेनप्रशामितं॥४१॥ दिशश्चविमलाजातास्तस्मिंस्तमसिनाशिते॥ तथाप्रवृत्तेसंग्रामेघोररूपेभयानके॥४२॥ तावकानांपरेषांचनासीत्कश्चित्पराङ्मुखः॥ ब्रह्मलोकपराभूत्वाप्रार्थयंतोजयंयुधि॥४३॥ सुयुद्धेनपराक्रांतानराःस्वर्गमभीप्सवः॥ भर्तृपिंडविमोक्षार्थंभर्तृकार्यविनिश्चिताः॥ ४४॥ स्वर्गसंसक्तमनसोयोधायुयुधिरेतदा॥ नानारूपाणिशस्त्राणिविसृजंतोमहारथाः॥ ४५॥ अन्योन्यमभिगर्जंतःप्रहरंतःपरस्परं॥ हतविध्यतगृह्णीतप्रहरध्वंनिकृंतत॥ ४६॥ इतिस्मवाचःश्रूयंतेतवतेषांचवैबले॥ ततःशल्योमहाराजधर्मपुत्रंयुधिष्ठिरं॥ ४७॥ विव्याधनिशितैर्बाणैर्हंतुकामोमहारथं॥ तस्यपार्थोमहाराजनाराचान्वैचतुर्दश॥ ४८॥ मर्माण्युद्दिश्यमर्मज्ञोनिचखानहसन्निव॥ आवार्यपांडवंबाणैर्हंतुकामोमहाबलः॥ ४९॥ विव्याधसमरेक्रुद्धोबहुभिःकंकपत्रिभिः॥ अथभूयोमहाराजशरेणानतपर्वणा॥५०॥ युधिष्ठिरंसमाजघ्नेसर्वसैन्यस्यपश्यतः॥ धर्मराजोपिसंक्रुद्धोमद्रराजंमहायशाः॥५१॥ विव्याधनिशितैर्बाणैःकंकबर्हिणवाजितैः॥ चंद्रसेनंचसप्तत्यासूतंचनवभिःशरैः॥ ५२॥ द्रुमसेनंचतुःषष्ट्यानिजघानमहारथः॥ चक्ररक्षेहतेशल्यःपांडवेनमहात्मना॥५३॥ निजघानततोराजंश्चेदीन्वैपंचविंशतिं॥ सात्यकिंपंचविंशत्याभीमसेनंचपंचभिः॥५४॥ माद्रीपुत्रौशतेनाजौविव्याधनिशितैःशरैः॥ एवंविचरतस्तस्यसंग्रामेराजसत्तम॥५५॥ संप्रैषयच्छितान्पार्थःशरानाशीविषोपमान्॥ ध्वजाग्रंचास्यसमरेकुंतीपुत्रोयुधिष्ठिरः॥ ५६॥ प्रमुखेवर्त्तमानस्यभल्लेनापहरद्रथात्॥ पांडुपुत्रेणवैतस्यकेतुंछिन्नंमहात्मना॥५७॥ निपतंतमपश्यामगिरिशृंगमिवाहतं॥ ध्वजंनिपतितंदृष्ट्वापांडवंचव्यवस्थितं॥५८॥ संक्रुद्धोमद्रराजोभूच्छरवर्षंमुमोचह॥ शल्यःसायकवर्षेणपर्जन्यइववृष्टिमान्॥५९॥ अभ्यवर्षदमेयात्माक्षत्रियान्क्षत्रियर्षभः॥ सात्यकिंभीमसेनंचमाद्रीपुत्रौचपांडवौ॥ ६०॥ एकैकंपंचभिर्विद्ध्वायुधिष्ठिरमपीडयत्॥ ततोबाणमयंजालंविततंपांडवोरसि॥ ६१॥ अपश्याममहाराजमेघजालमिवोद्गतं॥ तस्यशल्योरणेक्रुद्धःशरैःसन्नतपर्वभिः॥६२॥

॥ ६३ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेद्वादशोऽध्यायः ॥ १२ ॥ ॥ ॥ ॥ ९ ॥ ॥ ९ ॥ पीडितेइति ॥ १ ॥ तंशल्यमेकंबहुभिःपीड्यमानंदृष्ट्वासिद्धाः

दिशःसंछादयामासप्रदिशश्चमहारथः ॥ ततोयुधिष्ठिरोराजावाणजालेनपीडितः ॥ बभूवाद्भुतविक्रांतोजंभोवृत्रहणायथा ॥ ६३ ॥ इतिश्रीमहाभारतेश ल्यपर्वणिसंकुलयुद्धेद्वादशोऽध्यायः ॥ १२ ॥ ॥ ९ ॥ ॥ ९ ॥ संजयउवाच पीडितेधर्मराजेतुमद्रराजेनमारिष ॥ सात्यकिर्भीमसेनश्चमाद्रीपुत्रौचपांडवौ ॥ १ ॥ परिवार्यरथैःशल्यंपीडयामासुराहवे ॥ तमेकंबहुभिर्दृष्ट्वापीड्यमानंमहारथैः ॥ २ ॥ साधुवादोमहान्जज्ञेसिद्धाश्चासन्प्रहर्षिताः ॥ आश्चर्यमित्यभाषंतमुनयश्चापिसंगताः ॥ ३ ॥ भीमसेनोरणेशल्यंशल्यभूतंपराक्रमे ॥ एकेनविद्ध्वावाणेनपुनर्विव्याधसप्तभिः ॥ ४ ॥ सात्यकिश्चशतेनैनंधर्मपुत्रपरीप्सया ॥ मद्रेश्वरमवाकीर्यसिंहनादमथानदत् ॥ ५ ॥ नकुलःपंचभिश्चैनंसहदेवश्चपंचभिः ॥ विद्ध्वातंतुपुनस्तूर्णंततोविव्याधसप्तभिः ॥ ६ ॥ सतुशूरोरणेयत्तः पीडितस्तैर्महारथैः ॥ विकृष्यकार्मुकंघोरंवेगघ्नंभारसाधनं ॥ ७ ॥ सात्यकिंपंचविंशत्याशल्योविव्याधमारिष ॥ भीमसेनंतुसप्तत्यानकुलंसप्तभिस्तथा ॥ ॥ ८ ॥ ततःसविशिखंचापंसहदेवस्यधन्विनः ॥ छित्वाभल्लेनसमरेविव्याधैनंत्रिसप्तभिः ॥ ९ ॥ सहदेवस्तुसमरेमातुलंभूरिवर्चसं ॥ सज्यमन्यद्धनुःकृत्वापंचभिःसमताडयत् ॥ १० ॥ शरैराशीविषाकारैर्ज्वलज्ज्वलनसन्निभैः ॥ सारथिंचास्यसमरेशरेणानतपर्वणा ॥ ११ ॥ विव्याधभृशसंक्रुद्धस्तंवैभूयस्त्रिभिःशरैः ॥ भीमसेनस्तुसप्तत्यासात्यकिर्नवभिःशरैः ॥ १२ ॥ धर्मराजस्तथाषष्ट्यागात्रेशल्यंसमार्पयन् ॥ ततःशल्योमहाराजनिर्विद्धस्तैर्महारथैः ॥ १३ ॥ सुस्रावरुधिरंगात्रैर्गैरिकंपर्वतोयथा ॥ तांश्चसर्वान्महेष्वासान्पंचभिःपंचभिःशरैः ॥ १४ ॥ विव्याधतरसाराजंस्तदद्भुतमिवाभवत् ॥ ततोऽपरेणभल्लेनधर्मपुत्रस्यमारिष ॥ ॥ १५ ॥ धनुश्चिच्छेदसमरेसज्यंससुमहारथः ॥ अथान्यद्धनुरादायधर्मपुत्रोयुधिष्ठिरः ॥ १६ ॥ साश्वसूतध्वजरथंशल्यंप्राच्छादयच्छरैः ॥ सच्छाद्यमानःसमरेधर्मपुत्रस्यसायकैः ॥ १७ ॥ युधिष्ठिरमथाविध्यद्दशभिर्निशितैःशरैः ॥ सात्यकिस्तुततःक्रुद्धोधर्मपुत्रेशरार्दिते ॥ १८ ॥ मद्राणामधिपंशूरंशरैर्विव्याधपंचभिः ॥ ससात्यकेःप्रचिच्छेदक्षुरप्रेणमहद्धनुः ॥ १९ ॥ भीमसेनमुखांस्तांश्चत्रिभिस्त्रिभिरताडयत् ॥ तस्यक्रुद्धोमहाराजसात्यकिःसत्यविक्रमः ॥ २० ॥ तोमरंप्रेषयामासस्वर्णदंडंमहाधनं ॥ भीमसेनोथनाराचंज्वलंतमिवपन्नगं ॥ २१ ॥

प्रहर्षिताआसन्इतिसंबंधः ॥ २ ॥ साधुवादोजज्ञेअर्थात्सिद्धानां ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ सहदेवेनप्रेषितामितिपूर्वस्मात्संवध्यते ॥ २६ ॥ २७ ॥ सारथिंचविव्याधेत्युत्तरस्मादपकृष्यते ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

नकुलःसमरेशक्तिंसहदेवोगदांशुभां ॥ धर्मराजःशतघ्नींचजिघांसुःशल्यमाहवे ॥ २२ ॥ तानापततएवाशुपंचानांवैभुजच्युतान् ॥ वारयामाससमरेशस्त्रसंघैःसमद्रराट् ॥ २३ ॥ सात्यकिप्रहितंशल्योभल्लैश्चिच्छेदतोमरं ॥ प्रहितंभीमसेनेनशरंकनकभूषणं ॥ २४ ॥ द्विधाचिच्छेदसमरेकृतहस्तःप्रतापवान् ॥ नकुलप्रेषितांशक्तिंहेमदंडांभयावहां ॥ २५ ॥ गदांचसहदेवेनशरौघैःसमवारयत् ॥ शराभ्यांचशतघ्नींतांराज्ञश्चिच्छेदभारत ॥ २६ ॥ पश्यतांपांडुपुत्राणांसिंहनादंननादच ॥ नामृष्यत्तत्रशैनेयःशत्रोर्विजयमाहवे ॥ २७ ॥ अथान्यद्धनुरादायसात्यकिःक्रोधमूर्छितः ॥ द्वाभ्यांमद्रेश्वरंविद्ध्वासारथिंचत्रिभिःशरैः ॥ २८ ॥ ततःशल्योरणेराजन्सर्वांस्तान्दशभिःशरैः ॥ विव्याधभृशसंक्रुद्धस्तोत्रैरिवमहाद्विपान् ॥ २९ ॥ तेवार्यमाणाःसमरेमद्रराज्ञामहारथाः ॥ नशेकुःसंमुखेस्थातुंतस्यशत्रुनिषूदनाः ॥ ३० ॥ ततोदुर्योधनोराजादृष्ट्वाशल्यस्यविक्रमं ॥ निहतान्पांडवान्मेनेपंचालानथसृंजयान् ॥ ३१ ॥ ततोराजन्महाबाहुर्भीमसेनःप्रतापवान् ॥ संत्यज्यमनसाप्राणान्मद्राधिपमयोधयत् ॥ ३२ ॥ नकुलःसहदेवश्चसात्यकिश्चमहारथः ॥ परिवार्यतदाशल्यंसमंताद्व्यकिरन्शरैः ॥ ३३ ॥ सचतुर्भिर्महेष्वासैःपांडवानांमहारथैः ॥ वृतस्तान्योधयामासमद्रराजःप्रतापवान् ॥ ३४ ॥ तस्यधर्मसुतोराजन्क्षुरप्रेणमहाहवे ॥ चक्ररक्षंजघानाशुमद्रराजस्यपार्थिवः ॥ ३५ ॥ तस्मिंस्तुनिहतेशूरेचक्ररक्षेमहारथे ॥ मद्रराजोपिवलवान्सैनिकानावृणोच्छरैः ॥ ३६ ॥ समावृतांस्ततस्तांस्तुराजन्वीक्ष्यस्वसैनिकान् ॥ चिंतयामाससमरेधर्मपुत्रोयुधिष्ठिरः ॥ ३७ ॥ कथंनुसमरेशक्यंतन्माधववचोमहत् ॥ नहिक्रुद्धोरणेराजन्क्षपयेतवलंमम ॥ ३८ ॥ ततःसरथनागाश्वाःपांडवाःपांडुपूर्वज ॥ मद्रराजंसमासेदुःपीडयंतःसमंततः ॥ ३९ ॥ नानाशस्त्रौघवहुलांशस्त्रवृष्टिंसमुद्यतां ॥ व्यधमत्समरेराजामहाभ्राणीवमारुतः ॥ ४० ॥ ततःकनकपुंखांतांशल्यक्षिप्तांवियद्गतां ॥ शरवृष्टिमपश्यामशलभानामिवायतिं ॥ ४१ ॥ तेशरामद्रराजेनप्रेषितारणमूर्धनि ॥ संपतंतःस्मदृश्यंतेशलभानांव्रजाइव ॥ ४२ ॥ मद्रराजधनुर्मुक्तैःशरैःकनकभूषणैः ॥ निरंतरमिवाकाशंसंवभूवजनाधिप ॥ ४३ ॥ नपांडवानांनास्माकंतत्रकिंचिद्व्यदृश्यत ॥ वाणांधकारेमहतिकृतेतत्रमहाहवे ॥ ४४ ॥ मद्रराजनवलिनालाघवाच्छरवृष्टिभिः ॥ चाल्यमानंतुतंदृष्ट्वापांडवानांवलार्णवं ॥ ४५ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

विस्मयंपरमंजग्मुर्देवगंधर्वदानवाः॥ सतुतान्सर्वतोयत्तान्शरैःसंछाद्यमारिष ॥ ४६ ॥ धर्मराजमवच्छाद्यसिंहवद्व्यनदन्मुहुः ॥ तेच्छन्नाःसमरेतेनपांडवा
नांमहारथाः॥ ४७॥ नाशकुवंस्तदायुद्धेप्रत्युद्यातुंमहारथं ॥ धर्मराजपुरोगास्तुभीमसेनमुखारथाः ॥ नजह्नुःसमरेशूरंशल्यमाहवशोभिनं ॥ ४८ ॥ इति
श्रीमहाभारतेशल्यपर्वणिशल्ययुद्धेत्रयोदशोऽध्यायः॥ १३॥ ॥ ७॥ ॥ ७॥ संजयउवाच अर्जुनोद्रौणिनाविद्धोयुद्धेबहुभिरायसैः॥ तस्यचा
नुचरैःशूरैस्त्रिगर्तानांमहारथैः॥ १॥ द्रौणिंविव्याधसमरेत्रिभिरेवशिलीमुखैः॥ तथेतरान्महेष्वासान्द्वाभ्यांद्वाभ्यांधनंजयः॥२॥ भूयश्चैवमहाराजशरवर्षैरवा
किरन्॥ शरकंटकितास्तेतुतावकाभरतर्षभ॥ ३॥ नजह्नुःपार्थमासाद्यताड्यमानाःशितैःशरैः॥ अर्जुनंरथवंशेनद्रोणपुत्रपुरोगमाः॥४॥ अयोधयंतसमरेपरि
वार्यमहारथाः ॥ तैस्तुक्षिप्ताःशराराजन्कार्त्तस्वरविभूषिताः ॥ ५ ॥ अर्जुनस्यरथोपस्थंपूरयामासुरंजसा ॥ तथाकृष्णौमहेष्वासौवृषभौसर्वधन्विनां ॥६॥
शरैर्वीक्ष्यवितुन्नांगौप्रहृष्टायुद्धदुर्मदाः॥ कूबरंरथचक्राणिईषायोक्त्राणिवाविभो ॥ ७॥ युगंचैवानुकर्षंचशरभूतमभूत्तदा॥ नैतादृशंदृष्टपूर्वंराजन्नैवचनः
श्रुतं ॥ ८ ॥ यादृशंतत्रपार्थस्यतावकाःसंप्रचक्रिरे॥ सरथःसर्वतोभातिचित्रपुंखैःशितैःशरैः॥ ९॥ उल्काशतैःसंप्रदीप्तंविमानमिवभूतले॥ ततोर्जुनोमहारा
जशरैःसन्नतपर्वभिः॥ १०॥ अवाकिरत्तांपृतनांमेघोवृष्ट्येवपर्वतं ॥ तेवध्यमानाःसमरेपार्थनामांकितैःशरैः ॥ ११ ॥ पार्थभूतममन्यंतप्रेक्षमाणास्तथावि
धं॥ कोपोद्धूतशरज्वालोधनुःशब्दानिलोमहान्॥ १२॥ सैन्येंधनंददाहाशुतावकंपार्थपावकः॥ चक्राणांपततांचापियुगानांचधरातले ॥ १३॥ तूणीराणां
पताकानांध्वजानांचरथैःसह॥ ईषाणामनुकर्षाणांत्रिवेणूनांचभारत ॥ १४ ॥ अक्षाणामथयोक्त्राणांप्रतोदानांचसर्वशः ॥ शिरसांपततांचापिकुंडलोष्णी
षधारिणां॥ १५॥ भुजानांचमहाभागस्कंधानांचसमंततः ॥ छत्राणांव्यजनैःसार्धंमुकुटानांचराशयः ॥ १६॥ समदृश्यंतपार्थस्यरथमार्गेषुभारत॥ ततःक्रु
द्धस्यपार्थस्यरथमार्गेविशांपते ॥ १७॥ अगम्यरूपापृथिवीमांसशोणितकर्दमा ॥ भीरूणांत्रासजननीशूराणांहर्षवर्धिनी ॥ १८॥ बभूवभरतश्रेष्ठरुद्रस्या
क्रीडनंयथा॥ हत्वातुसमरेपार्थःसहस्रेद्वेपरंतपः॥ १९॥ रथानांसवरूथानांविधूमोग्निरिवज्वलन्॥ यथाहिभगवानग्निर्जगद्दग्ध्वाचराचरं॥ २०॥

॥ २१ ॥ २२ ॥ २३॥ २४॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३०॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४॥ ३५ ॥ ३६ ॥ ३७॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२॥ ४३॥ ४४ ॥ ४५ ॥ ४६ ॥

विधूमोदृश्यतेराजंस्तथापार्थोधनंजयः॥ द्रौणिस्तुसमरेदृष्ट्वापांडवस्यपराक्रमं॥ २१ ॥ रथेनातिपताकेनपांडवंप्रत्यवारयत् ॥ तावुभौपुरुषव्याघ्रौतावुभौध
न्विनांवरौ॥ २२॥ समीयतुस्तदान्योन्यंपरस्परवधैपिणौ॥ तयोरासीन्महाराजबाणवर्षसुदारुणं॥ २३ ॥ जीमूतयोर्यथावृष्टिस्तपांतेभरतर्षभ॥ अन्योन्यस्प
र्धिनौतौतुशरैःसन्नतपर्वभिः॥ २४॥ ततक्षतुस्तदान्योन्यंशृंगाभ्यांवृषभाविव ॥ तयोर्युद्धंमहाराजचिरंसममिवाभवत्॥ २५॥ शस्त्राणांसंगमश्चैवघोरस्तत्रा
भवत्पुनः॥ ततोर्जुनंद्वादशभीरुक्मपुंखैःसुतेजनैः॥ २६॥ वासुदेवंचदशभिर्द्रौणिर्विव्याधभारत॥ ततःप्रहर्षाद्बीभत्सुर्व्याक्षिपद्गांडिवंधनुः ॥ २७॥ मानयि
त्वामुहूर्तंतुगुरुपुत्रंमहाहवे॥ व्यश्वसूतरथंचक्रेसव्यसाचीपरंतपः॥ २८॥ मृदुपूर्वंततश्चैनंपुनःपुनरताडयत् ॥ हताश्वेतुरथेतिष्ठन्द्रोणपुत्रस्त्वयस्मयं ॥ २९ ॥
मुसलंपांडुपुत्रायचिक्षेपपरिघोपमं॥ तमापतंतंसहसाहेमपट्टविभूषितं॥ ३०॥ चिच्छेदसप्तधावीरःपार्थःशत्रुनिवर्हणः॥ सच्छिन्नंमुसलंदृष्ट्वाद्रौणिःपरमको
पनः॥ ३१॥ आददेपरिघंघोरंनगेंद्रशिखरोपमं॥ चिक्षेपचैवपार्थायद्रौणिर्युद्धविशारदः॥ ३२ ॥ तमंतकमिवक्रुद्धंपरिघंप्रेक्ष्यपांडवः ॥ अर्जुनस्त्वरितोजघ्ने
पंचभिःसायकोत्तमैः॥ ३३॥ सच्छिन्नःपतितोभूमौपार्थबाणैर्महाहवे॥ दारयन्पृथिवींद्राणांमनांसीवचभारत॥ ३४ ॥ ततोपरैस्त्रिभिर्भल्लैर्द्रौणिंविव्याधपां
डवः॥ सोतिविद्धोबलवतापार्थेनसुमहात्मना॥ ३५॥ नाकंपततदाद्रौणिःपौरुषेपुव्यवस्थितः॥ सुरथंचततोराजन्भारद्वाजोमहारथं॥ ३६ ॥ अवांकिरच्छ
रव्रातैःसर्वक्षत्रस्यपश्यतः ॥ ततस्तुसुरथोप्याजौपंचालानांमहारथः॥ ३७॥ रथेनमेघघोषेणद्रौणिमेवाभ्यधावत ॥ विकर्षन्वैधनुःश्रेष्ठंसर्वभारसहंदृढं ॥
॥ ३८॥ ज्वलनाशीविषनिभैःशरैश्चैनमवाकिरत्॥ सुरथंतंततःक्रुद्धमापतंतंमहारथं॥ ३९॥ चुकोपसमरेद्रौणिर्दंडाहतइवोरगः ॥ त्रिशिखांभ्रुकुटींकृत्वास्र
क्किणीपरिसंलिहन्॥ ४०॥ उद्वीक्ष्यसुरथंरोषाद्धनुर्ज्यामवमृज्यच॥ मुमोचतीक्ष्णंनाराचंयमदंडोपमद्युतिं॥ ४१ ॥ सतस्यहृदयंभित्वाप्रविवेशातिवेगितः॥
शक्राशनिरिवोत्सृष्टोविदार्यधरणीतलं॥ ४२॥ ततःसपतितोभूमौनाराचेनसमाहतः॥ वज्रेणचयथाशृंगंपर्वतस्येवदीर्यतः ॥ ४३ ॥ तस्मिन्विनिहतेवीरेद्रो
णपुत्रःप्रतापवान्॥ आरुरोहरथंतूर्णंतमेवरथिनांवरः॥ ४४॥ ततःसज्जोमहाराजद्रौणिराहवदुर्मदः॥ अर्जुनंयोधयामाससंशप्तकवृतोरणे॥ ४५ ॥ तत्रयुद्धं
महच्चासीदर्जुनस्यपरैःसह॥ मध्यंदिनगतेसूर्येयमराष्ट्रविवर्धनं॥ ४६॥

॥ ४७ ॥ ४८ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेचतुर्दशोऽध्यायः॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ दुर्योधनइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

तत्राश्चर्यमपश्यामदृष्ट्वातेषांपराक्रमं ॥ यदेकोयुगपद्वीरान्समयोधयदर्जुनः ॥ ४७ ॥ विमर्दःसुमहानासीदेकस्यबहुभिःसह ॥ शतक्रतोर्यथापूर्वमहत्या दैत्यसेनया ॥ ४८ ॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ संजयउवाच दुर्योधनोमहाराजधृष्टद्युम्नश्चपार्षतः ॥ चक्रतुःसुमहद्युद्धंशरशक्तिसमाकुलं ॥ १ ॥ तयोरासन्महाराजशरधाराःसहस्रशः ॥ अंबुदानांयथाकालेजलधाराःसमंततः ॥ २ ॥ राजाचपार्षतंविध्वाशरैःपंचभिराशुगैः॥द्रोणहंतारमुग्रेषुंपुनर्विव्याधसप्तभिः ॥३॥ धृष्टद्युम्नस्तुसमरेबलवान्दृढविक्रमः ॥ सप्तत्याविशिखानांवैदुर्योधनमपीडयत् ॥ ४ ॥ पीडितंवीक्ष्यराजानंसोदर्याभरतर्षभ ॥ महत्यासेनयासार्धंपरिवव्रुःस्मपार्षतं ॥ ५ ॥ सतैःपरिवृतःशूरःसर्वतोतिरथैर्भृशं ॥ व्यचरत्समरेराजन्दर्शयन्नस्त्रलाघवं ॥ ६ ॥ शिखंडीकृतवर्माणंगौतमंचमहारथं ॥ प्रभद्रकैःसमायुक्तोयोधयामासधन्विनौ ॥ ७ ॥ तत्रापिसुमहद्युद्धंघोररूपंविशांपते ॥ प्राणान्संत्यजतांयुद्धेप्राणद्यूताभिदेवने ॥ ८ ॥ शल्यःसायकवर्षाणिविमुंचन्सर्वतोदिशं ॥ पांडवान्पीडयामाससससात्यकिवृकोदरान् ॥ ९ ॥ तथातौतुयमौयुद्धेयमतुल्यपराक्रमौ ॥ योधयामासराजेंद्रवीर्येणास्त्रबलेनच ॥ १० ॥ शल्यसायकनुन्नानांपांडवानांमहामृधे ॥ त्रातारंनाध्यगच्छंतकेचित्तत्रमहारथाः ॥ ११ ॥ ततस्तुनकुलःशूरोधर्मराजेप्रपीडिते ॥ अभिदुद्राववेगेनमातुलंमात्रनंदनः ॥ १२ ॥ संछाद्यसमरेवीरंनकुलःपरवीरहा ॥ विव्याधचैनंदशभिःस्मयमानःस्तनांतरे ॥ १३ ॥ सर्वपारसवैर्बाणैःकर्मारपरिमार्जितैः ॥ स्वर्णपुंखैःशिलाधौतैर्धनुर्यंत्रप्रचोदितैः ॥ १४ ॥ शल्यस्तुपीडितस्तेनस्वस्रीयेणमहात्मना ॥ नकुलंपीडयामासपत्रिभिर्नतपर्वभिः ॥ १५ ॥ ततोयुधिष्ठिरोराजाभीमसेनोथसात्यकिः ॥ सहदेवश्चमाद्रेयोमद्रराजमुपाद्रवन् ॥ १६ ॥ तानापततएवाशुपूरयाणान्रथस्वनैः ॥ दिशश्चविदिशश्चैवकंपयानांश्चमेदिनीं ॥ १७ ॥ प्रतिजग्राहसमरेसेनापतिरमित्रजित् ॥ युधिष्ठिरंत्रिभिर्विध्वाभीमसेनंचपंचभिः ॥ १८ ॥ सात्यकिंचशतेनाजौसहदेवंत्रिभिःशरैः ॥ ततस्तुसशरंचापंनकुलस्यमहात्मनः ॥ १९ ॥ मद्रेश्वरःक्षुरप्रेणतदामारिषचिच्छिदे ॥ तदशीर्यतविच्छिन्नंधनुःशल्यस्यसायकैः ॥ २० ॥ अथान्यद्धनुरादायमाद्रीपुत्रोमहारथः ॥ मद्रराजरथंतूर्णंपूरयामासपत्रिभिः ॥ २१ ॥ युधिष्ठिरस्तुमद्रेशंसहदेवश्चमारिष ॥ दशभिर्दशभिर्बाणैरुरस्येनमविध्यतां ॥ २२ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ इतिशल्यपर्वणिनैलकंठीये

भीमसेनस्तुतंपश्चात्सात्यकिर्दशभिःशरैः ॥ मद्रराजमभिद्रुत्यजघ्नतुःकंकपत्रिभिः ॥ २३ ॥ मद्रराजस्ततःक्रुद्धःसात्यकिंनवभिःशरैः ॥ विव्याधभूयःसमत्याश राणांनतपर्वणां ॥ २४ ॥ अथास्यसशरंचापंमुष्टौचिच्छेदमारिष ॥ हयांश्चचतुरःसंख्येप्रेषयामासमृत्यवे ॥ २५ ॥ विरथंसात्यकिंकृत्वामद्रराजोमहारथः ॥ विशिखानांशतेनैनमाजघानसमंततः ॥ २६ ॥ माद्रीपुत्रौचसंरब्धौभीमसेनंचपांडवं ॥ युधिष्ठिरंचकौरव्यविव्याधदशभिःशरैः ॥ २७ ॥ तत्राद्भुतमपश्याममद्रराजस्यपौरुषं ॥ यदेनंसहिताःपार्थानाभ्यवर्त्तंतसंयुगे ॥ २८ ॥ अथान्यंरथमास्थायसात्यकिःसत्यविक्रमः ॥ पीडितान्पांडवान्दृष्ट्वामद्रराजवशंगतान् ॥ २९ ॥ अभिदुद्राववेगेनमद्राणामधिपंबलात् ॥ आपतंतंरथंतस्यशल्यःसमितिशोभनः ॥ ३० ॥ प्रत्युद्ययौरथेनैवमत्तोमत्तमिवद्विपं ॥ ससन्निपातस्तुमुलोबभूवाद्भुतदर्शनः ॥ ३१ ॥ सात्यकेश्चैवशूरस्यमद्राणामधिपस्यच ॥ यादृशोवैपुरावृत्तःशंबरामरराजयोः ॥ ३२ ॥ सात्यकिःप्रेक्ष्यसमरेमद्रराजमवस्थितं ॥ विव्याधदशभिर्बाणैस्तिष्ठतिष्ठेतिचाब्रवीत् ॥ ३३ ॥ मद्रराजस्तुसुभृशंविद्धस्तेनमहात्मना ॥ सात्यकिंप्रतिविव्याधचित्रपुंखैःशितैःशरैः ॥ ३४ ॥ ततःपार्थामहेष्वासाःसात्वताभिसृतंनृपं ॥ अभ्यवर्त्तन्रथैस्तूर्णंमातुलवधकांक्षया ॥ ३५ ॥ ततआसीत्परामर्दस्तुमुलःशोणितोदकः ॥ शूराणांयुध्यमानानांसिंहानामिवनर्दतां ॥ ३६ ॥ तेषामासीन्महाराजव्यतिक्षेपःपरस्परं ॥ सिंहानामामिषेप्सूनांकूजतामिवसंयुगे ॥ ३७ ॥ तेषांबाणसहस्रौघैराकीर्णावसुधाभवत् ॥ अंतरिक्षंचसहसाबाणभूतमभूत्तदा ॥ ३८ ॥ शरांधकारंसहसाकृतंतैनसमंततः ॥ अभ्रच्छायेवसंजज्ञेशरैर्मुक्तैर्महात्मभिः ॥ ३९ ॥ तत्रराजञ्शरैर्मुक्तैर्निर्मुक्तैरिवपन्नगैः ॥ स्वर्णपुंखैःप्रकाशद्भिर्व्यरोचंतदिशस्तदा ॥ ४० ॥ तत्राद्भुतंपरंचक्रेशल्यःशत्रुनिबर्हणः ॥ यदेकःसमरेशूरोयोधयामासवैबहून् ॥ ४१ ॥ मद्रराजभुजोत्सृष्टैःकंकबर्हिणवाजितैः ॥ संपतद्भिःशरैर्घोरैरवाकीर्यतमेदिनी ॥ ४२ ॥ तत्रशल्यरथंराजन्विचरंतंमहाहवे ॥ अपश्यामयथापूर्वंशक्रस्यासुरसंक्षये ॥ ४३ ॥ इति श्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ ॥ ७ ॥ संजयउवाच ततःसैन्यास्तवविभोमद्रराजपुरस्कृताः ॥ पुनरभ्यद्रवन्पार्थान्वेगेनमहतारणे ॥ १ ॥ पीडितास्तावकाःसर्वेप्रधावंतोरणोत्कटाः ॥ क्षणेनचैवपार्थांस्तेबहुत्वात्समलोडयन् ॥ २ ॥ तेवध्यमानाःसमरेपांडवानावतस्थिरे ॥ निवार्यमाणाभीमेनपश्यतोःकृष्णयोस्तदा ॥ ३ ॥

भारतभावदीपेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ ॥ ७ ॥ ततइति ॥ १ ॥ २ ॥ ३ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

ततोधनंजयःक्रुद्धःकृपंसहपदानुगैः ॥ अवाकिरच्छरौघेणकृतवर्माणमेवच ॥ ४ ॥ शकुनिंसहदेवस्तुसहसैन्यमवाकिरत् ॥ नकुलःपार्श्वतःस्थित्वामद्रराजमवैक्षत॥ ५ ॥ द्रौपदेयानरेंद्रांश्चभूयिष्ठान्समवारयन्॥ द्रोणपुत्रंचपांचाल्यःशिखंडीसमवारयत् ॥ ६ ॥ भीमसेनस्तुराजानंगदापाणिरवारयत् ॥ शल्यंतुसहसैन्येनकुंतीपुत्रोयुधिष्ठिरः॥ ७॥ ततःसमभवत्सैन्यंसंसक्तंतत्रतत्रह ॥ तावकानांपरेषांचसंग्रामेष्वनिवर्त्तिनां ॥ ८ ॥ तत्रपश्याम्यहंकर्मशल्यस्यातिमहद्रणे ॥ यदेकःसर्वसैन्यानिपांडवानामयोधयत्॥ ९ ॥ व्यदृश्यततदाशल्योयुधिष्ठिरसमीपतः॥ रणेचंद्रमसोभ्याशेशनैश्चरइवग्रहः॥ १० ॥ पीडयित्वातुराजानंशरैराशीविषोपमैः॥ अभ्यधावत्पुनर्भीमंशरवर्षैरवाकिरत्॥ ११ ॥ तस्यतल्लाघवंदृष्ट्वातथैवचकृतास्त्रतां ॥ अपूजयन्ननीकानिपरेषांतावकानिच॥ १२॥ पीड्यमानास्तुशल्येनपांडवाभृशविक्षताः॥ प्राद्रवंतरणंहित्वाक्रोशमानेयुधिष्ठिरे॥ १३॥ वध्यमानेष्वनीकेषुमद्रराजेनपांडवः॥ अमर्षवशमापन्नोधर्मराजोयुधिष्ठिरः ॥ १४ ॥ ततःपौरुषमास्थायमद्रराजमताडयत् ॥ जयोवास्तुवधोवास्तुकृतबुद्धिर्महारथः ॥ १५ ॥ समाहूयाब्रवीत्सर्वान्भ्रातॄन्कृष्णंचमाधवं ॥ भीष्मोद्रोणश्चकर्णश्चयेचान्येपृथिवीक्षितः॥ १६॥ कौरवार्थेपराक्रांताःसंग्रामेनिधनंगताः ॥ यथाभागंयथोत्साहंभवंतःकृतपौरुषाः ॥ १७॥ भागोवशिष्टएकोयंममशल्योमहारथः ॥ सोहमद्ययुधाजेतुमाशंसेमद्रकाधिपं॥ १८॥ तत्रयन्मानसंमह्यंतत्सर्वंनिगदामिवः ॥ चक्ररक्षाविमौवीरौममंमाद्रवतीसुतौ॥ ॥ १९ ॥ अजेयौवासवेनापिसमरेशूरसंमतौ॥ साध्विमौमातुलंयुद्धेक्षत्रधर्मपुरस्कृतौ ॥ २० ॥ मदर्थंप्रतियुध्येतांमानार्हौसत्यसंगरौ ॥ मांवाशल्योरणेहंतातंवाहंभद्रमस्तुवः॥ २१ ॥ इतिसत्यामिमांवाणींलोकवीरानिबोधत॥ योत्स्येहंमातुलेनाद्यक्षात्रधर्मेणपार्थिवाः॥ २२॥ स्वमंशमभिसंधायविजयायेतरायच॥ तस्यमेप्यधिकंशस्त्रंसर्वोपकरणानिच॥ २३॥ संसज्जंतुरथेक्षिप्रंशास्त्रवद्रथयाजकाः॥ शैनेयोदक्षिणंचक्रंधृष्टद्युम्नस्तथोत्तरं ॥ २४॥ पृष्ठगोपोभवत्वद्यममपार्थोधनंजयः॥ पुरःसरोममाद्यास्तुभीमःशस्त्रभृतांवरः॥ २५॥ एवमभ्यधिकःशल्याद्भविष्यामिमहामृधे॥ एवमुक्तास्तथाचक्रुस्तदाराज्ञःप्रियैषिणः ॥ ॥ २६॥ ततःप्रहर्षःसैन्यानांपुनरासीत्तदामृधे॥ पंचालानांसोमकानांमत्स्यानांचविशेषतः॥ २७॥ प्रतिज्ञांतांतदाराजाकृत्वामद्रेशमभ्ययात् ॥ ततःशंखांश्चभेरीश्चशतशश्चैवपुष्कलान्॥ २८॥

॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ रथशक्त्यारथस्थयाशक्त्या ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

अवादयंतपंचालाःसिंहनादांश्चनेदिरे ॥ तेभ्यधावंतसंरब्धामद्रराजंतरस्विनं ॥ २९ ॥ महताहर्षजेनाथनादेनकुरुपुंगवाः ॥ ह्रादेनगजघंटानांशंखानांनिनदे
नच ॥ ३० ॥ तूर्यशब्देनमहतानादयंतश्चमेदिनीं ॥ तान्प्रत्यगृह्णात्पुत्रस्तेमद्रराजश्चवीर्यवान् ॥ ३१ ॥ महामेघानिवबहूनशैलावस्तोदयावुभौ ॥ शल्यस्तुसमर
श्लाघीधर्मराजमरिंदमं ॥ ३२ ॥ ववर्षशरवर्षेणशंवरंमघवाइव ॥ तथैवकुरुराजोपिप्रगृह्यरुचिरंधनुः ॥ ३३ ॥ द्रोणोपदेशान्विविधान्दर्शयानोमहामनाः ॥
ववर्षशरवर्षाणिचित्रंलघुचसुष्ठुच ॥ ३४ ॥ नचास्यविवरंकश्चिद्ददर्शचरतोरणे ॥ तावुभौविविधैर्बाणैस्ततक्षातेपरस्परं ॥ ३५ ॥ शार्दूलावामिषप्रेप्सूपराक्रां
ताविवाहवे ॥ भीमस्तुतवपुत्रेणयुद्धशौंडेनसंगतः ॥ ३६ ॥ पांचाल्यःसात्यकिश्चैवमाद्रीपुत्रौचपांडवौ ॥ शकुनिप्रमुखान्वीरान्प्रत्यगृह्णन्समंततः ॥ ३७ ॥
तदासीत्तुमुलंयुद्धंपुनरेवजयैषिणां ॥ तावकानांपरेषांचराजन्दुर्मंत्रितेतव ॥ ३८ ॥ दुर्योधनस्तुभीमस्यशरेणानतपर्वणा ॥ चिच्छेदादिश्यसंग्रामेध्वजंहेमप
रिष्कृतं ॥ ३९ ॥ सकिंकिणीकजालेनमहताचारुदर्शनः ॥ पपातरुचिरःसंख्येभीमसेनस्यपश्यतः ॥ ४० ॥ पुनश्चास्यधनुश्चित्रंगजराजकरोपमं ॥ क्षुरेणशि
तधारेणप्रचकर्त्तनराधिपः ॥ ४१ ॥ सच्छिन्नधन्वातेजस्वीरथशक्त्यासुतंतव ॥ विभेदोरसिविक्रम्यसरथोपस्थआविशत् ॥ ४२ ॥ तस्मिन्मोहमनुप्राप्तेपुनरेव
वृकोदरः ॥ यंतुरेवशिरःकायात्क्षुरप्रेणाहरत्तदा ॥ ४३ ॥ हतसूताहयास्तस्यरथमादायभारत ॥ व्यद्रवंतदिशोराजन्हाहाकारस्तदाभवत् ॥ ४४ ॥ तमभ्यधाव
त्त्राणार्थंद्रोणपुत्रोमहारथः ॥ कृपश्चकृतवर्माचपुत्रंतेपिपरीप्सवः ॥ ४५ ॥ तस्मिन्विलुलितेसैन्येत्रस्तास्तस्यपदानुगाः ॥ गांडीवधन्वाविस्फार्यधनुस्तानहन
च्छरैः ॥ ४६ ॥ युधिष्ठिरस्तुमद्रेशमभ्यधावदमर्षितः ॥ स्वयंसन्नोदयन्नश्वान्दंतवर्णान्मनोजवान् ॥ ४७ ॥ तत्राश्चर्यमपश्यामकुंतीपुत्रेयुधिष्ठिरे ॥ पुराभूत्वा
मृदुर्दांतोयत्तदादारुणोभवत् ॥ ४८ ॥ विवृताक्षश्चकौंतेयोवेपमानश्चमन्युना ॥ चिच्छेदयोधान्निशितैःशरैःशतसहस्रशः ॥ ४९ ॥ यांयांप्रत्युद्ययौसेनांतांतां
ज्येष्ठःसपांडवः ॥ शरैरपातयद्राजन्गिरीन्वज्रैरिवोत्तमैः ॥ ५० ॥ साश्वसूतध्वजरथान्रथिनःपातयन्बहून् ॥ अक्रीडदेकोबलवान्पवनस्तोयदानिव ॥ ५१ ॥
साश्वारोहांश्चतुरगान्पत्तींश्चैवसहस्रधा ॥ व्यपोथयतसंग्रामेकुद्धोरुद्रःपशूनिव ॥ ५२ ॥ शून्यमायोधनंकृत्वाशरवर्षैःसमंततः ॥ अभ्यद्रवतमद्रेशंतिष्ठशल्ये
तिचाब्रवीत् ॥ ५३ ॥

॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥

॥५४॥ ५५॥ ५६॥५७॥ ५८॥ ५९॥६०॥ ६१॥ ६२॥ ६३॥ ६४॥ ६५॥ ६६॥ ६७॥ ६८॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेषोडशोऽध्यायः॥ १६॥ ॥७॥ ॥७॥

तस्यतच्चरितंदृष्ट्वासंग्रामेभीमकर्मणः॥ वित्रेसुस्तावकाःसर्वेशल्यस्त्वेनंसमभ्ययात्॥५४॥ ततस्तौभृशसंक्रुद्धौप्रध्मायसलिलोद्भवौ॥ समाहूयतदान्योन्यं भर्त्सयंतौसमीयतुः॥५५॥शल्यस्तुशरवर्षेणपीडयामासपांडवं॥ मद्रराजंतुकौंतेयःशरवर्षैरवाकिरत्॥५६॥ अदृश्येतांतदाराजन्कंकपत्रिभिराचितौ॥ उद्भिन्नरुधिरौशूरौमद्रराजयुधिष्ठिरौ॥५७॥पुष्पिताविवशुशुभातेवसंतेकिंशुकौयथा॥ दीप्यमानौमहात्मानौप्राणद्यूतेनदुर्मदौ॥५८॥ दृष्ट्वासर्वाणिसैन्यानि नाध्यवस्यंस्तयोर्जयं॥ हत्वामद्राधिपंपार्थोभोक्ष्यतेऽद्यवसुंधरां॥५९॥ शल्योवापांडवंहत्वादद्याद्दुर्योधनायगां॥ इतीवनिश्चयोनाभूद्योधानांतत्रभारत॥ ॥६०॥ प्रदक्षिणमभूत्सर्वंधर्मराजस्ययुध्यतः॥ ततःशरशतंशल्योमुमोचाथयुधिष्ठिरे॥६१॥ धनुश्चास्यशिताग्रेणबाणेननिरकृंतत॥ सोन्यत्कार्मुकमादायशल्यंशरशतैस्त्रिभिः॥६२॥ अविध्यत्कार्मुकंचास्यक्षुरेणनिरकृंतत॥ अथास्यनिजघानाश्वांश्चतुरोनतपर्वभिः॥६३॥ द्वाभ्यामतिशिताग्राभ्यामुभौतत्पार्ष्णिसारथी॥ ततोस्यदीप्यमानेनपीतेननिशितेनच॥६४॥ प्रमुखेवर्त्तमानस्यभल्लेनापाहरत्ध्वजं॥ ततःप्रभग्नंतत्सैन्यंदौर्योधनमरिंदम॥६५॥ ततोमद्राधिपंद्रौणिरभ्यधावत्तथाकृतं॥ आरोप्यचैनंस्वरथेत्वरमाणःप्रदुद्रुवे॥६६॥ मुहूर्त्तमिवतौगत्वानर्दमानेयुधिष्ठिरे॥ स्मित्वाततोमद्रपतिरन्यंस्यंदनमास्थितः॥६७॥ विधिवत्कल्पितंशुभ्रंमहांबुदनिनादिनं॥ सज्जयंत्रोपकरणंद्विषतांलोमहर्षण॥६८॥ इतिश्रीमहाभारतेशल्यपर्वणिशल्ययुधिष्ठिरयुद्धेषोडशोऽध्यायः॥१६॥ ॥७॥ ॥७॥ संजयउवाच अथान्यद्धनुरादायबलवान्वेगवत्तरं॥ युधिष्ठिरंमद्रपतिर्भित्वासिंहइवानदत्॥१॥ ततःसशरवर्षेणपर्जन्यइववृष्टिमान्॥ अभ्यवर्षदमेयात्माक्षत्रियंक्षत्रियर्षभः॥२॥ सात्यकिंदशभिर्विध्वाभीमसेनंत्रिभिःशरैः॥ सहदेवंत्रिभिर्विध्वायुधिष्ठिरमपीडयत्॥३॥ तांस्तानन्यान्महेष्वासान्साश्वान्सरथकूबरान्॥ अर्दयामासविशिखैरुल्काभिरिवकुंजरान्॥४॥ कुंजरान्कुंजरारोहानश्वानश्वप्रयायिनः॥ रथांश्चरथिनःसार्धंजघानरथिनांवरः॥५॥ बाहूंश्चिच्छेदतरसासायुधान्केतनानिच॥ चकारचमहींयोधैस्तीर्णांवेदींकुशैरिव॥६॥ तथातमरिसैन्यानिघ्नंतंमृत्युमिवांतकं॥ परिवव्रुर्भृशंक्रुद्धाःपांडुपांचालसोमकाः॥७॥ तंभीमसेनश्चशिनेश्चनप्तामाद्र्याश्चपुत्रौपुरुषप्रवीरौ॥ समागतंभीमबलेनराज्ञापर्याप्तमन्योन्यमथाह्वयंत॥८॥

अथेति॥ १॥ २॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ संहननीयोदृढसंधिकोमध्योयस्यतस्मात्कायात् ॥ २७ ॥

ततस्तुशूराःसमरेनरेंद्रनरेश्वरंप्राप्ययुधांवरिष्ठं॥ आवार्यचैनंसमरेनृवीराजघ्नुःशरैःपत्रिभिरुग्रवेगैः ॥ ९ ॥ संरक्षितोभीमसेनेनराजामाद्रीसुताभ्यामथमाधवेन॥ मद्राधिपंपत्रिभिरुग्रवेगैस्तनांतरेधर्मसुतोनिजघ्ने॥ १० ॥ ततोरणेतावकानांरथौघाःसमीक्ष्यमद्राधिपतिंशरार्त्तं ॥ पर्यावव्रुःप्रवरास्तेसुसज्जादुर्योधनस्यानुमतेपुरस्तात् ॥ ११ ॥ ततोद्रुतंमद्रजनाधिपोरणेयुधिष्ठिरंसप्तभिरभ्यविद्ध्यत् ॥ तंचापिपार्थोनवभिःपृषत्कैर्विव्याधराजंस्तुमुलेमहात्मा ॥ १२ ॥ आकर्णपूर्णायतसंप्रयुक्तैःशरैस्तदासंयतितैलधौतैः ॥ अन्योन्यमाच्छादयतांमहारथौमद्राधिपश्चापियुधिष्ठिरश्च ॥ १३ ॥ ततस्तुतूर्णंसमरेमहारथौपरस्परस्यांतरमीक्षमाणौ॥ शरैर्भृशंविव्यधतुर्नृपोत्तमौमहाबलौशत्रुभिरप्रधृष्यौ॥ १४ ॥ तयोर्धनुर्ज्यातलनिःस्वनोमहान्महेंद्रवज्राशनितुल्यनिःस्वनः ॥ परस्परंबाणगणैर्महात्मनोःप्रवर्षतोर्मद्रपपांडुवीरयोः॥ १५॥ तौचेरतुर्व्याघ्रशिशुप्रकाशौमहावनेष्वामिषगृद्धिनाविव॥ विषाणिनौनागवराविवोभौततक्षतुःसंयतिजातदर्पौ॥ १६॥ ततस्तुमद्राधिपतिर्महात्मायुधिष्ठिरंभीमबलंप्रसह्य॥ विव्याधवीरंहृदयेतिवेगंशरेणसूर्याग्निसमप्रभेण ॥ १७॥ ततोतिविद्धोथयुधिष्ठिरोपिसुसंप्रयुक्तेनशरेणराजन्॥ जघानमद्राधिपतिंमहात्मामुदंचलेभेऋषभःकुरूणां ॥ १८॥ ततोमुहूर्त्तादिवपार्थिवेंद्रोलब्ध्वासंज्ञांक्रोधसंरक्तनेत्रः॥शतेनपार्थंत्वरितोजघानसहस्रनेत्रप्रतिमप्रभावः ॥ १९॥ त्वरंस्ततोधर्मसुतोमहात्माशल्यस्यकोपान्नवभिःपृषत्कैः ॥ भित्वाह्युरस्तपनीयंचवर्मजघानपड्भिस्त्वपरैःपृषत्कैः॥ २० ॥ ततस्तुमद्राधिपतिःप्रकृष्टंधनुर्विकृष्यव्यसृजत्पृषत्कान्॥ द्वाभ्यांशराभ्यांचतथैवराज्ञश्चिच्छेदचापंकुरुपुंगवस्य ॥ २१ ॥ नवंततोन्यत्समरेप्रगृह्यराजाधनुर्घोरतरंमहात्मा ॥ शल्यंतुविव्याधशरैःसमंताद्यथामहेंद्रोनमुचिंशिताग्रैः॥ २२ ॥ ततस्तुशल्येनवभिःपृषत्कैर्भीमस्यराज्ञश्चयुधिष्ठिरस्य ॥ निकृत्यरौक्मेपटुवर्मणीतयोर्विदारयामासभुजौमहात्मा ॥ २३ ॥ ततोपरेणज्वलनार्कतेजसाक्षुरेणराज्ञोधनुरुन्ममाथ ॥ कृपश्चतस्यैवजघानसूतंपड्भिःशरैःसोभिमुखःपपात॥ २४ ॥ मद्राधिपश्चापियुधिष्ठिरस्यशरैश्चतुर्भिर्निजघानवाहान्॥ वाहांश्चहत्वाव्यकरोन्महात्मायोधक्षयंधर्मसुतस्यराज्ञः॥ २५ ॥ तथाकृतेराजनिभीमसेनोमद्राधिपस्यायततोमहात्मा॥ छित्वाधनुर्वेगवताशरेणद्वाभ्यामविध्यत्सुभृशंनरेंद्रं ॥ २६॥ तथापरेणास्यजहारयंतुःकायाच्छिरःसंहननीयमध्यात्॥ जघानचाश्वांश्चतुरःसुशीघ्रंतथाभृशंकुपितोभीमसेनः॥ २७॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ कर्मयुद्धरूपं अवशिष्टंस्वस्यभागंचनिशम्यालोच्यशल्यवधेमनःकृत्वाइंद्रावरजस्यकृष्णस्ययथोक्तंवचनंचक्रेइत्यन्वयः

तमग्रणीःसर्वधनुर्धराणामेकंचरंतंसमरेनिवेगं॥ भीमःशतेनव्यकिरच्छराणांमाद्रीपुत्रःसहदेवस्तथैव॥ २८ ॥ तैःसायकैर्मोहितंवीक्ष्यशल्यंभीमःशरैरस्यच कर्त्तवर्म॥ सभीमसेनेननिकृत्तवर्मामद्राधिपश्चर्मसहस्रतारं ॥ २९ ॥ प्रगृह्यखड्गंचरथान्महात्माप्रस्कंद्यकुंतीसुतमभ्यधावत् ॥ छित्वारथेषांनकुलस्यसोथ युधिष्ठिरंभीमबलोभ्यधावत्॥ ३० ॥ तंचापिराजानमथोत्पतंतंक्रुद्धंयथैवांतकमापतंतं ॥ धृष्टद्युम्नोद्रौपदेयाःशिखंडीशिनेश्चनप्तासहसापरीयुः ॥ ३१ ॥ अथास्यचर्माप्रतिमंन्यकृंतद्भीमोमहात्मानवभिःपृषत्कैः॥ खड्गंचभल्लैर्निचकर्त्तमुष्टौनदन्प्रहृष्टस्तवसैन्यमध्ये ॥३२॥ तत्कर्मभीमस्यसमीक्ष्यहृष्टास्तेपांडवानांप्रवरारथौघाः॥ नादंचचक्रुर्भृशमुत्स्मयंतःशंखांश्चदध्मुःशशिसन्निकाशान् ॥ ३३॥ तेनाथशब्देनविभीषणेनतथाभितप्तंबलमप्रधृष्यं॥ कांदिग्भूतंरुधिरेणोक्षितांगंविसंज्ञकल्पंचनदाविषण्णं ॥ ३४॥ समद्रराजःसहसाविकीर्णोभीमाग्रगैःपांडवयोधमुख्यैः॥ युधिष्ठिरस्याभिमुखंजवेनसिंहोयथामृगहेतोःप्रयातः॥ ३५॥ सधर्मराजोनिहताश्वसूतःक्रोधेनदीप्तोज्वलनप्रकाशः॥दृष्ट्वाचमद्राधिपतिंस्मतूर्णसमभ्यधावत्तमरिंबलेन ॥ ३६ ॥ गोविंदवाक्यंत्वरितंविचिंत्यदध्रेमतिंशल्यविनाशनाय॥ सधर्मराजोनिहताश्वसूतोरथेतिष्ठन्शक्तिमेवाभ्यकांक्षत् ॥ ३७॥ तच्चापिशल्यस्यनिशम्यकर्ममहात्मनोभागमथावशिष्टं॥ कृत्वामनःशल्यवधेमहात्मायथोक्तमिंद्रावरजस्यचक्रे॥ ३८॥ सधर्मराजोमणिहेमदंडांजग्राहशक्तिंकनकप्रकाशां ॥ नेत्रेचदीप्तेसहसाविवृत्यमद्राधिपंक्रुद्धमनानिरैक्षत् ॥ ३९॥ निरीक्षितोसौनरदेवराज्ञापूतात्मनानिर्हृतकल्मषेण॥ आसीन्नयद्भस्मसान्मद्रराजस्तदद्भुतंमेप्रतिभातिराजन्॥४०॥ ततस्तुशक्तिंरुचिरोग्रदंडांमणिप्रवेकोज्ज्वलितांप्रदीप्तां॥ चिक्षेपवेगात्सुभृशंमहात्मामद्राधिपायप्रवरःकुरूणां ॥ ४१ ॥ दीप्तामथैनांप्रहितांबलेनसविस्फुलिंगांसहसापतंतीं॥ प्रैक्षंतसर्वेकुरवःसमेतादिवोयुगांतेमहतीमिवोल्कां ॥ ४२ ॥ तांकालरात्रीमिवपाशहस्तांयमस्यधात्रीमिवचोग्ररूपां ॥ सब्रह्मदंडप्रतिमाममोघांससर्जयत्तोयुधिधर्मराजः ॥ ४३ ॥ गंधस्रगग्र्यासनपानभोजनैरभ्यर्चितांपांडुसुतैःप्रयत्नात् ॥ सांवर्त्तकाग्निप्रतिमांज्वलंतींकृत्यामथर्वांगिरसीमिवोग्रां ॥ ॥ ४४ ॥ ईशानहेतोःप्रतिनिर्मितांतांत्वष्ट्रारिपूणामसुदेहभक्ष्यां॥ भूम्यंतरिक्षादिजलाशयानिप्रसह्यभूतानिनिहंतुमीशां॥ ४५॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ अंतरिक्षादीत्यादिनाग्निवायू ॥ ४५ ॥

॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ तोयमिवमुप्रवेशांगां अप्रसक्ताअप्रतिहता नृपतेःशल्यस्य ॥ ५० ॥ ५१ ॥५२॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥

घंटापताकांमणिवज्रनालांवैडूर्यचित्रांतपनीयदंडां ॥ त्वष्ट्राप्रयत्नान्नियमेनकॢप्तांब्रह्मद्विषामंतकरीममोघां ॥४६॥ वलप्रयत्नादधिरूढवेगांमंत्रैश्चघोरैरभिमं
त्र्ययत्नात् ॥ ससर्जमार्गेणचतांपरेणवधायमद्राधिपतेस्तदानीं ॥ ४७ ॥ हतोसिपापेत्यभिगर्जमानोरुद्रोंधकायांतकरंयथेषुं ॥ प्रसार्यबाहुंसुदृढंसुपाणिंक्रो
धेननृत्यन्निवधर्मराजः ॥ ४८ ॥ तांसर्वशक्त्याप्रहितांसुशक्तिंयुधिष्ठिरेणाप्रतिवार्यवीर्यां ॥ प्रतिग्रहायाभिननर्दशल्यःसम्यग्घुतामग्निरिवाज्यधारां ॥ ४९ ॥
सातस्यमर्माणिविदार्यशुभ्रमुरोविशालंचतथैवभित्वा ॥ विवेशगांतोयमिवाप्रसक्तायशोविशालंनृपतेर्दहंती ॥ ५० ॥ नासाक्षिकर्णास्यविनिःसृतेनप्रस्यं
दताचव्रणसंभवेन ॥ संसिक्तगात्रोरुधिरेणसोभूत्क्रौंचोयथास्कंदहतोमहाद्रिः ॥ ५१ ॥ प्रसार्यबाहूचरथाद्गतोगांसंछिन्नवर्माकुरुनंदनेन ॥ महेंद्रवाहप्रतिमो
महात्मावज्राहतंशृंगमिवाचलस्य ॥ ५२ ॥ बाहूप्रसार्याभिमुखोधर्मराजस्यमद्रराट् ॥ ततोनिपतितोभूमाविंद्रध्वजइवोच्छ्रितः ॥ ५३ ॥ सतथाभिन्नसर्वां
गोरुधिरेणसमुक्षितः ॥ प्रत्युद्गतइवप्रेम्णाभूम्यासनरपुंगवः ॥ ५४ ॥ प्रिययाकांतयाकांतःपतमानइवोरसि ॥ चिरंभुक्त्वावसुमतींप्रियांकांतामिवप्रभुः ॥
॥ ५५ ॥ सर्वैरंगैःसमाश्लिष्यप्रसुप्तइवचाभवत् ॥ धर्म्येधर्मात्मनायुद्धेनिहतेधर्मसूनुना ॥ ५६ ॥ सम्यग्घुतइवस्विष्टःप्रशांतोग्निरिवाध्वरे ॥ शक्त्याबिभिन्नह
दयंविप्रविद्धायुधध्वजं ॥ ५७ ॥ संशांतमपिमद्रेशंलक्ष्मीर्नैवविमुंचति ॥ ततोयुधिष्ठिरश्चापमादायेंद्रधनुष्प्रभं ॥ ५८ ॥ व्यधमद्द्विषतःसंख्येखगराडिवपन्नगा
न् ॥ देहान्सुनिशितैर्भल्लैरिपूणांनाशयन्क्षणात् ॥ ५९ ॥ ततःपार्थस्यबाणौघैरावृताःसैनिकास्तव ॥ निर्मीलिताक्षाःक्षिण्वंतोभृशमन्योन्यमर्दिताः ॥ ६० ॥
क्षरंतोरुधिरंदेहैर्विपन्नायुधजीविताः ॥ ततःशल्येनिपतितेमद्रराजानुजोयुवा ॥ ६१ ॥ भ्रातुस्तुल्योगुणैःसर्वैरथीपांडवमभ्ययात् ॥ विव्याधचनरश्रेष्ठोनारा
चैर्बहुभिस्त्वरन् ॥ ६२ ॥ हतस्यापचितिंभ्रातुश्चिकीर्षुर्युद्धदुर्मदः ॥ तंविव्याधाशुगैःषड्भिर्धर्मराजस्त्वरन्निव ॥ ६३ ॥ कार्मुकंचास्यचिच्छेदक्षुराभ्यांध्वजमेव
च ॥ ततोस्यदीप्यमानेनसुदृढेनशितेनच ॥ ६४ ॥ प्रमुखेवर्त्तमानस्यभल्लेनापाहरच्छिरः ॥ सकुंडलंतद्ददृशेपतमानंशिरोरथात् ॥ ६५ ॥ पुण्यक्षयमनुप्राप्यपं
तन्स्वर्गादिवच्युतः ॥ तस्यापकृत्तशीर्षंतुशरीरंपतितंरथात् ॥ ६६ ॥

॥ ६४ ॥ ६५ ॥ स्वर्गात्स्वर्गसुखान्च्युतोभ्रष्टःअतएवपतन्नतस्मादेव ॥ ६६ ॥

रुधिरेणावसिक्तांगंदृष्ट्वासैन्यमभज्यत॥ विचित्रकवचेतस्मिन्हतेमद्रनृपानुजे ॥ ६७ ॥ हाहाकारंप्रकुर्वाणाःकुरवोभिप्रदुद्रुवुः ॥ शल्यानुजंहतंदृष्ट्वातावका
स्त्यक्तजीविताः ॥ ६८॥ वित्रेसुःपांडवभयाद्रजोध्वस्तास्तदाभृशं ॥ तांस्तथाभज्यमानांस्तुकौरवान्भरतर्षभ ॥ ६९ ॥ शिनेर्नप्ताकिरन्बाणैरभ्यवर्ततसात्य
किः॥ तमायांतंमहेष्वासंदुष्प्रसह्यंदुरासदं॥ ७० ॥हार्दिक्यस्त्वरितोराजन्प्रत्यगृह्णादभीतवत् ॥ तौसमेतौमहात्मानौवार्ष्णेयौवरवाजिनौ ॥ ७१ ॥ हार्दिक्यः
सात्यकिश्चैवसिंहाविवबलोत्कटौ॥ इषुभिर्विमलाभासैश्छादयंतौपरस्परं॥ ७२ ॥ अर्चिर्भिरिवसूर्यस्यदिवाकरसमप्रभौ॥ चापमार्गबलोद्धूतान्मार्गणान्वृ
ष्णिसिंहयोः॥ ७३ ॥ आकाशगानपश्यामपतंगानिवशीघ्रगान्॥ सात्यकिंदशभिर्विध्वाहयांश्चास्यत्रिभिःशरैः ॥ ७४ ॥ चापमेकेनचिच्छेदहार्दिक्योनतप
र्वणा॥ तन्निकृत्तंधनुःश्रेष्ठमपास्यशिनिपुंगवः॥ ७५॥ अन्यदादत्तवेगेनवेगवत्तरमायुधं॥ तदादायधनुःश्रेष्ठंवरिष्ठःसर्वधन्विनां ॥ ७६ ॥ हार्दिक्यंदशभि
र्बाणैःप्रत्यविध्यत्स्तनांतरे ॥ ततोरथंयुगेषांचच्छित्वाभल्लैःसुसंयतैः॥ ७७॥ अश्वांस्तस्यावधीत्तूर्णमुभौचपार्ष्णिसारथी ॥ ततस्तंविरथंदृष्ट्वाकृपःशारद्वतःप्र
भो॥ ७८ ॥अपोवाहततःक्षिप्रंरथमारोप्यवीर्यवान्॥ मद्रराजेहतेराजन्विरथेकृतवर्मणि॥ ७९ ॥ दुर्योधनबलंसर्वंपुनरासीत्पराङ्मुखं॥ तत्परेनान्वबुध्यंतसै
न्येनरजसावृते॥ ८० ॥ बलंतुहतभूयिष्ठंतत्तदासीत्पराङ्मुखं॥ ततोमुहूर्त्तात्तेपश्यन्रजोभौमंसमुत्थितं॥ ८१ ॥ विविधैःशोणितस्रावैःप्रशांतंपुरुषर्षभ ॥ ततो
दुर्योधनोदृष्ट्वाभग्नंस्वबलमंतिकात्॥ ८२ ॥ जवेनापततःपार्थानेकःसर्वानवारयत्॥ पांडवान्सरथान्दृष्ट्वाधृष्टद्युम्नंचपार्षतं ॥ ८३ ॥ आनर्त्तंचदुराधर्षंशितैर्बा
णैरवारयत्॥ तंपरेनाभ्यवर्त्तंतमर्त्यान्मृत्युमिवागतं॥ ८४॥ अथान्यंरथमास्थायहार्दिक्योपिन्यवर्तत ॥ ततोयुधिष्ठिरोराजात्वरमाणोमहारथः ॥ ८५ ॥ चतु
र्भिर्निजघानाश्वान्पत्रिभिःकृतवर्मणः॥ विव्याधगौतमंचापिषड्भिर्भल्लैःसुतेजनैः॥ ८६॥ अश्वत्थामाततोराज्ञाहताश्वंविरथीकृतं॥ तमपोवाहहार्दिक्यंस्वरथे
नयुधिष्ठिरात्॥ ८७॥ ततःशारद्वतःषड्भिःप्रत्यविध्यद्युधिष्ठिरं॥ विव्याधचाश्वान्निशितैस्तस्याष्टाभिःशिलीमुखैः॥८८॥ एवमेतन्महाराजयुद्धशेषमवर्त्तत॥
तवदुर्मंत्रितेराजन्सहपुत्रस्यभारत॥८९॥ तस्मिन्महेष्वासधरेविशस्तेसंग्राममध्येकुरुपुंगवेन॥पार्थाःसमेताःपरमप्रहृष्टाःशंखान्प्रदध्मुर्हतमीक्ष्यशल्यं॥९०॥

॥ ९१ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेसप्तदशोऽध्यायः ॥१७॥ ॥७॥ ॥७॥ शल्येइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३॥ १४ ॥

युधिष्ठिरंचप्रशशंसुराजौपुराकृतेवृत्रवधेयथेंद्रं ॥ चक्रुश्चनानाविधवाद्यशब्दान्निनादयंतोवसुधांसमेताः ॥ ९१ ॥ इतिश्रीमहाभारतेशल्यपर्वणिशल्यव
धेसप्तदशोऽध्यायः ॥ १७॥ ॥७ ॥ ॥७॥ संजयउवाच शल्येथनिहतेराजन्मद्रराजपदानुगाः ॥ रथाःसप्तशतावीरानिर्ययुर्महतोबलात् ॥ १॥
दुर्योधनस्तुद्विरदमारुह्याचलसन्निभं ॥ छत्रेणध्रियमाणेनवीज्यमानश्चचामरैः ॥ २ ॥ नगंतव्यंनगंतव्यमितिमाद्रानवारयत् ॥ दुर्योधनेनतेवीरावार्यमा
णाःपुनःपुनः ॥ ३ ॥ युधिष्ठिरंजिघांसंतःपांडूनांप्राविशन्बलं ॥ तेतुशूरामहाराजकृतचित्ताश्चयोधने ॥ ४ ॥ धनुःशब्दंमहत्कृत्वासहायुध्यंतपांडवैः ॥ श्रुत्वाच
निहतंशल्यंधर्मपुत्रंचपीडितं ॥ ५ ॥ मद्रराजप्रियेयुक्तैर्मद्रकाणांमहारथैः ॥ आजगामततःपार्थोगांडीवंविक्षिपन्धनुः ॥ ६ ॥ पूरयन्रथघोषेणदिशःसर्वाम
हारथः ॥ ततोर्जुनश्चभीमश्चमाद्रीपुत्रौचपांडवौ ॥ ७ ॥ सात्यकिश्चनरव्याघ्रोद्रौपदेयाश्चसर्वशः ॥ धृष्टद्युम्नःशिखंडीचपंचालाःसहसोमकैः ॥ ८ ॥ युधिष्ठिरंप
रीप्संतःसमंतात्पर्यवारयन् ॥ तेसमंतात्परिवृताःपांडवाःपुरुषर्षभाः ॥ ९ ॥ क्षोभयंतिस्मतांसेनांमकराःसागरंयथा ॥ वृक्षानिवमहावाताःकंपयंतिस्मतावका
न् ॥ १० ॥ पुरोवातेनगंगेवक्षोभ्यमाणामहानदी ॥ अक्षोभ्यततदाराजन्पांडूनांध्वजिनीततः ॥ ११ ॥ प्रस्कंद्यसेनांमहतींमहात्मानोमहारथाः ॥ वहवश्चुक्रुशु
स्तत्रक्वसराजायुधिष्ठिरः ॥ १२ ॥ भ्रातरोवास्यतेशूरादृश्यंतेनेहकेनच ॥ धृष्टद्युम्नोथशैनेयोद्रौपदेयाश्चसर्वशः ॥ १३ ॥ पंचालाश्चमहावीर्याःशिखंडीचमहार
थः ॥ एवंतान्वादिनःशूरान्द्रौपदेयामहारथाः ॥ १४ ॥ अभ्यघ्नन्युयुधानश्चमद्रराजपदानुगान् ॥ चक्रैर्विमथितैःकेचित्केचिच्छिन्नैर्महाध्वजैः ॥ १५ ॥ तेदृ
श्यंतेपिसमरेतावकानिहताःपरैः ॥ आलोक्यपांडवान्युद्धेयोधाराजन्समंततः ॥ १६ ॥ वार्यमाणाययुर्वेगात्पुत्रेणतवभारत ॥ दुर्योधनश्चतान्वीरान्वारयामा-
ससांत्वयन् ॥ १७ ॥ नचास्यशासनंकेचित्तत्रचक्रुर्महारथाः ॥ ततोगांधारराजस्यपुत्रःशकुनिरब्रवीत् ॥ १८ ॥ दुर्योधनंमहाराजवचनंवचनक्षमः ॥ किंनःसं
प्रेक्षमाणानांमद्राणांहन्यतेबलं ॥ १९ ॥ नयुक्तमेतत्समरेत्वयितिष्ठतिभारत ॥ सहितैश्चापियोद्धव्यमित्येपसमयःकृतः ॥ २० ॥ अथकस्मात्परानेवघ्नतोमर्ष
यसेनृप ॥ दुर्योधनउवाच वार्यमाणामयापूर्वंनैतेचक्रुर्वचोमम ॥ २१ ॥ एतेविनिहताःसर्वेप्रस्कन्नाःपांडुवाहिनीं ॥ शकुनिरुवाच नभर्तुःशासनं
वीरारणंकुर्वन्त्यमर्षिताः ॥ २२ ॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ प्रस्कन्नाःप्रपन्नाः ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेअष्टादशो

अलंक्रोद्धुमथैतेषांनायंकालउपेक्षितुं ॥ यामःसर्वेचसंभूयसवाजिरथकुंजराः ॥ २३॥ परित्रातुंमहेष्वासान्मद्रराजपदानुगान् ॥ अन्योन्यंपरिरक्षामोयत्नेनम हतान्नृप ॥ २४ ॥ एवंसर्वेनुसंचिंत्यप्रययुर्यत्रसैनिकाः ॥ संजयउवाच एवमुक्तस्तदाराजाबलेनमहतावृतः ॥ २५ ॥ प्रययौसिंहनादेनकंपयन्निवमेदि नीं ॥ हतविध्यतगृह्णीतप्रहरध्वंनिकृंतत ॥ २६॥ इत्यासीत्तुमुलःशब्दस्तवसैन्यस्यभारत ॥ पांडवास्तुरणेदृष्ट्वामद्रराजपदानुगान् ॥ २७॥ सहितानभ्यवर्त्तंतगु ल्ममास्थायमध्यमं ॥ तेमुहूर्त्ताद्रणेवीराहस्ताहस्तिविशांपते ॥ २८ ॥ निहताःप्रत्यदृश्यंतमद्रराजपदानुगाः ॥ ततोनःसंप्रयातानांहतामद्रास्तरस्विनः ॥ २९ ॥ हृष्टाःकिलकिलाशब्दमकुर्वन्सहिताःपरे ॥ उत्थितानिकबंधानिसमदृश्यंतसर्वशः ॥ ३० ॥ पपातमहतीचोल्कामध्येनादित्यमंडलं ॥ रथैर्भग्नैर्युगाक्षैश्वनिहतै श्वमहारथैः ॥ ३१ ॥ अश्वैर्निपतितैश्चैवसंछन्नाभूद्वसुंधरा ॥ वातायमानैस्तुरगैर्युगासक्तैस्ततस्ततः ॥ ३२ ॥ अदृश्यंतमहाराजयोधास्तत्ररणाजिरे ॥ भग्नच क्रान्रथान्केचिदहरंस्तुरगारणे ॥ ३३ ॥ रथार्धंकेचिदादायदिशोदशविबभ्रमुः ॥ तत्रतत्रव्यदृश्यंतयोक्त्रैःश्लिष्टाःस्मवाजिनः ॥ ३४ ॥ रथिनःपतमानाश्चदृश्यं तेस्मनरोत्तमाः ॥ गगनात्प्रच्युताःसिद्धाःपुण्यानामिवसंक्षये ॥ ३५॥ निहतेषुचशूरेषुमद्रराजानुगेषुवै ॥ अस्मानापततश्चापिदृष्ट्वापार्थामहारथाः ॥ ३६ ॥ अभ्यवर्त्तंतवेगेनजयगृद्धाःप्रहारिणः ॥ बाणशब्दरवान्कृत्वाविमिश्रान्शंखनिःस्वनैः ॥ ३७॥ अस्मांस्तुपुनरासाद्यलब्धलक्षाःप्रहारिणः ॥ शरासनानिधुन्वा नाःसिंहनादान्प्रचुक्रुशुः ॥ ३८ ॥ ततोहतमभिप्रेक्ष्यमद्रराजबलंमहत् ॥ मद्रराजंचसमरेदृष्ट्वाशूरंनिपातितं ॥ ३९ ॥ दुर्योधनबलंसर्वंपुनरासीत्पराङ्मुखं ॥ व ध्यमानंमहाराजपांडवैर्जितकाशिभिः ॥ दिशोभेजेथसंभ्रांतंभ्रामितंदृढधन्विभिः ॥ ४० ॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेअष्टादशोऽध्यायः ॥ १८॥ ॥ ९ ॥ संजयउवाच पातितेयुधिदुर्धर्षेमद्रराजेमहारथे ॥ तावकास्तवपुत्राश्चप्रायशोविमुखाभवन् ॥ १ ॥ वणिजोनाविभिन्नायां यथागाधेऽप्लवेर्णवे ॥ अपारेपारमिच्छंतोहतेशूरेमहात्मना ॥ मद्रराजेमहाराजवित्रस्ताःशरविक्षताः ॥ २ ॥ अनाथानाथमिच्छंतोमृगाःसिंहार्दिताइव ॥ वृषा यथाभग्नशृंगाःशीर्णदंतायथागजाः ॥ ३ ॥ मध्याह्नेप्रत्यपायामनिर्जिताजातशत्रुणा ॥ नसंधातुमनीकानिनचराजन्पराक्रमे ॥ ४ ॥ आसीद्बुद्धिर्हतेशल्ये भूयोयोधस्यकस्यचित् ॥ भीष्मेद्रोणेचनिहतेसूतपुत्रेचभारत ॥ ५॥

ध्यायः ॥ १८ ॥ ॥ ९ ॥ पातितेइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

यद्दुःखंनवयोधानांभयंचासीद्दिशांपते॥ तद्वयंसचनःशोकोभूयएवाभ्यवर्त्तत ॥ ६ ॥ निराशाश्चजयेतस्मिन्हतेशल्येमहारथे ॥ हतप्रवीराविध्वस्तानिकृत्ता
श्चशितैःशरैः ॥ ७॥ मद्रराजेहतेराजन्योधास्तेप्राद्रवन्भयात् ॥ अश्वानन्येगजानन्येरथानन्येमहारथाः ॥ ८ ॥ आरुह्यजवसंपन्नाःपादाताःप्राद्रवंस्तथा ॥ द्वि
साहस्राश्चमातंगागिरिरूपाःप्रहारिणः ॥ ९ ॥ संप्राद्रवन्हतेशल्येअंकुशांगुष्ठनोदिताः ॥ तेरणाद्भरतश्रेष्ठतावकाःप्राद्रवन्दिशः ॥ १० ॥ धावतश्चाप्यपश्यामश्व
समानान्शराहतान् ॥ तान्प्रभग्नान्द्रुतान्दृष्ट्वाहतोत्साहान्पराजितान् ॥ ११ ॥ अभ्यवर्त्ततपंचालाःपांडवाश्चजयैषिणः ॥ बाणशब्दरवाश्चापिसिंहनादाश्चपु
ष्कलाः ॥ १२ ॥ शंखशब्दश्चशूराणांदारुणःसमपद्यत ॥ दृष्ट्वातुकौरवंसैन्यंभयत्रस्तंप्रविद्रुतं ॥ १३ ॥ अन्योन्यंसमभाषंतपंचालाःपांडवैःसह ॥ अद्यराजास
त्यधृतिर्हतामित्रोयुधिष्ठिरः ॥ १४ ॥ अद्यदुर्योधनोहीनोदीप्तयानृपतिश्रियः ॥ अद्यश्रुत्वाहतंपुत्रंधृतराष्ट्रोजनेश्वरः ॥ १५ ॥ विह्वलःपतितोभूमौकिल्बिषंप्रति
पद्यतां ॥ अद्यजानातुकौंतेयंसमर्थंसर्वधन्विनां ॥ १६ ॥ अद्यात्मानंचदुर्मेधागर्हयिष्यतिपापकृत् ॥ अद्यक्षत्तुर्वचःसत्यंस्मरतांब्रुवतोहितं ॥ १७ ॥ अद्यप्रभृति
पार्थंचप्रेष्यंभूतइवाचरन् ॥ विजानातुनृपोदुःखंयत्प्राप्तंपांडुनंदनैः ॥ १८ ॥ अद्यकृष्णस्यमाहात्म्यंविजानातुमहीपतिः ॥ अद्यार्जुनधनुर्घोषंघोरंजानातुसंयुगे
॥ १९ ॥ अस्त्राणांचबलंसर्वंबाह्वोश्चबलमाहवे ॥ अद्यज्ञास्यतिभीमस्यबलंघोरंमहात्मनः ॥ २० ॥ हतेदुर्योधनेयुद्धेशक्रेणेवासुरेबले ॥ यत्कृतंभीमसेनेनदुः
शासनवधेतदा ॥ २१ ॥ नान्यःकर्त्तास्तिलोकेस्मिन्नृतेभीमान्महाबलात् ॥ अद्यज्येष्ठस्यजानीतांपांडवस्यपराक्रमं ॥ २२ ॥ मद्रराजंहतंश्रुत्वादेवैरपिसुदुःसहं ॥
अद्यज्ञास्यतिसंग्रामेमाद्रीपुत्रौसुदुःसहौ ॥ २३ ॥ निहतेसौबलेवीरेप्रवीरेषुचसर्वशः ॥ कथंजयोनतेषांस्याद्येषांयोद्धाधनंजयः ॥ २४ ॥ सात्यकिर्भीमसेन
श्चधृष्टद्युम्नश्चपार्षतः ॥ द्रौपद्यास्तनयाःपंचमाद्रीपुत्रौचपांडवौ ॥ २५ ॥ शिखंडीचमहेष्वासोराजाचैवयुधिष्ठिरः ॥ येषांचजगतोनाथोनाथःकृष्णोजनार्दनः
॥ २६ ॥ कथंतेषांजयोनस्याद्येषांधर्मोव्यपाश्रयः ॥ भीष्मंद्रोणंचकर्णंचमद्रराजानमेवच ॥ २७ ॥ तथान्यान्नृपतीन्वीरानशतशोथसहस्रशः ॥ कोन्यःशक्तो
रणेजेतुमृतेपार्थाद्युधिष्ठिरात् ॥ २८ ॥ यस्यनाथोहृषीकेशःसदासत्ययशोनिधिः ॥ इत्येवंवदमानास्तेहर्षेणमहतायुताः ॥ २९ ॥ प्रभग्नांस्तावकान्योधान्संहृष्टाः
पृष्ठतोन्वयुः ॥ धनंजयोरथानीकमभ्यवर्तनवीर्यवान् ॥ ३० ॥

॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥

माद्रीपुत्रौचशकुनिंसात्यकिश्चमहारथः ॥ तान्प्रेक्ष्यद्रवतःसर्वान्भीमसेनभयार्दितान् ॥ ३१ ॥ दुर्योधनस्तदासूतमब्रवीद्विजयायच ॥ मामतिक्रमतेपार्थोधनु
ष्पाणिमवस्थितं ॥ ३२ ॥ जघनेसर्वसैन्यानांममाश्वान्प्रतिपादय ॥ जघनेयुध्यमानंहिकौंतेयोमांसमंततः ॥ ३३ ॥ नोत्सहेदभ्यतिक्रांतुंवेलामिवमहोदधिः ॥
पश्यसैन्यंमहत्सूतपांडवैःसमभिद्रुतं ॥ ३४ ॥ सैन्यरेणुंसमुद्धूतंपश्यस्वैनंसमंततः ॥ सिंहनादांश्चबहुशःशृणुघोरान्भयावहान् ॥ ३५ ॥ तस्माद्याहिशनैःसूत
जघनंपरिपालय ॥ मयिस्थितेचसमरेनिरुद्धेपुचपांडुपु ॥ ३६ ॥ पुनरावर्त्ततेतूर्णमामकंबलमोजसा ॥ तच्छ्रुत्वातवपुत्रस्यशूरार्यसदृशंवचः ॥ ३७ ॥ सारथि
र्हेमसंछन्नान्शनैरश्वानचोदयत् ॥ गजाश्वरथिभिर्हीनास्त्यक्तात्मानःपदातयः ॥ ३८ ॥ एकविंशतिसाहस्राःसंयुगायावतस्थिरे ॥ नानादेशसमुद्भूतानानान
गरवासिनः ॥ ३९ ॥ अवस्थितास्तदायोधाःप्रार्थयंतोमहद्यशः ॥ तेषामापततांतत्रसंहृष्टानांपरस्परं ॥ ४० ॥ संमर्दःसुमहान्जज्ञेघोररूपोभयानकः ॥ भीम
सेनस्तदाराजन्धृष्टद्युम्नश्चपार्षतः ॥ ४१ ॥ बलेनचतुरंगेणनानादेश्यानवारयत् ॥ भीममेवाभ्यवर्त्तंतरणेन्येतुपदातयः ॥ ४२ ॥ प्रक्ष्वेड्यास्फोट्यसंहृष्टावीरलो
कंयियासवः ॥ आसाद्यभीमसेनंतुसंरब्धायुद्धदुर्मदाः ॥ ४३ ॥ धार्त्तराष्ट्राविनेदुर्हिनान्यामकथयन्कथां ॥ परिवार्यरणेभीमंनिजघ्नुस्तेसमंततः ॥ ४४ ॥ सव
ध्यमानःसमरेपदातिगणसंवृतः ॥ नचचालततःस्थानान्मैनाकइवपर्वतः ॥ ४५ ॥ तेतुक्रुद्धामहाराजपांडवस्यमहारथं ॥ निग्रहीतुंप्रवृत्ताहियोधांश्चान्यानवा
रयन् ॥ ४६ ॥ अक्रुध्यतरणेभीमस्तैस्तदापर्यवस्थितैः ॥ सोवतीर्यरथात्तूर्णंपदातिःसमवस्थितः ॥ ४७ ॥ जातरूपप्रतिच्छन्नांप्रगृह्यमहतींगदां ॥ अवधीत्तावका
न्योधान्दंडपाणिरिवांतकः ॥ ४८ ॥ विप्रहीणरथाश्वांस्तानवधीत्पुरुषर्षभः ॥ एकविंशतिसाहस्रान्पदातीन्समपोथयत् ॥ ४९ ॥ हत्वातत्पुरुषानीकंभीमःसत्य
पराक्रमः ॥ धृष्टद्युम्नंपुरस्कृत्यनचिरात्प्रत्यदृश्यत ॥ ५० ॥ पादातानिहताभूमौशिश्यिरेरुधिरोक्षिताः ॥ संभग्नाइववातेनकर्णिकाराःसुपुष्पिताः ॥ ५१ ॥ नाना
शस्त्रसमायुक्तानानाकुंडलधारिणः ॥ नानाजात्याहतास्तत्रनानादेशसमागताः ॥ ५२ ॥ पताकाध्वजसंछन्नंपदातीनांमहद्बलं ॥ निकृत्तंविबभौरौद्रंघोररूपं
भयावहं ॥ ५३ ॥ युधिष्ठिरपुरोगाश्चसहसैन्यामहारथाः ॥ अभ्यधावन्महात्मानंपुत्रंदुर्योधनंतव ॥ ५४ ॥ तेसर्वेतावकान्दृष्ट्वामहेष्वासान्पराङ्मुखान् ॥ नात्य
वर्त्तंततेपुत्रंवेलेवमकरालयं ॥ ५५ ॥ तदद्भुतमपश्यामतवपुत्रस्यपौरुषं ॥ यदेकंसहिताःपार्थानशेकुरतिवर्त्तितुं ॥ ५६ ॥

॥५७॥५८॥५९ ॥६०॥६१॥६२॥६३॥६४॥६५॥६६॥६७॥६८॥६९ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेऊनविंशोऽध्यायः ॥ १९ ॥ ॥ ७ ॥ सन्निवृत्तेइति ॥१॥२॥ ३ ॥ ४ ॥

नातिदूरापयातंतुकृतबुद्धिंपलायने॥ दुर्योधनःस्वकंसैन्यमब्रवीद्भृशविक्षतं ॥ ५७ ॥ नतंदेशंप्रपश्यामिपृथिव्यांपर्वतेषुच ॥ यत्रयातान्नवाहन्युःपांडवाःकिं
स्तेनवः॥ ५८ ॥ अल्पंचबलमेतेषांकृष्णौचभृशविक्षतौ ॥ यदिसर्वेत्रतिष्ठामोध्रुवंनोविजयोभवेत् ॥ ५९ ॥ विप्रयातांस्तुवोभिन्नान्पांडवाःकृतविप्रियाः ॥
अनुसृत्यहनिष्यंतिश्रेयान्नःसमरेवधः॥ ६० ॥शृण्वंतुक्षत्रियाःसर्वेयावंतोत्रसमागताः ॥ यदाशूरंचभीरुंचमारयत्यंतकःसदा ॥ ६१॥ कोनमूढोनयुध्येतपु
रुषःक्षत्रियोध्रुवं॥ श्रेयोनोभीमसेनस्यक्रुद्धस्याभिमुखेस्थितं ॥ ६२ ॥ सुखःसांग्रामिकोमृत्युःक्षत्रधर्मेणयुध्यतां ॥ मर्त्येनावश्यमर्तव्यंगृहेष्वपिकदाचन॥
॥ ६३ ॥ युध्यतःक्षत्रधर्मेणमृत्युरेपसनातनः ॥ हत्वेहसुखमाप्नोतिहतःप्रेत्यमहत्फलं ॥ ६४ ॥ नयुद्धधर्माच्छ्रेयान्वैपंथाःस्वर्गस्यकौरवाः ॥ अचिरेणैवतांल्लो
कान्हतोयुद्धेसमश्नुते॥ ६५ ॥श्रुत्वातद्वचनंतस्यपूजयित्वाचपार्थिवाः॥ पुनरेवाभ्यवर्त्तंतपांडवानाततायिनः ॥ ६६ ॥ तानापततएवाशुव्यूढानीकाःप्रहारि
णः॥ प्रत्युद्ययुस्तदापार्थाजयगृद्धाःप्रमन्यवः॥६७॥ धनंजयोरथेनाजावभ्यवर्त्ततवीर्यवान्॥ विश्रुतंत्रिषुलोकेषुव्याक्षिपन्गांडिवंधनुः॥६८॥ माद्रीपुत्रौच
शकुनिंसात्यकिश्चमहाबलः॥ जवेनाभ्यपतन्हृष्टायत्तावैतावकंबलं॥ ६९॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेएकोनविंशोऽध्यायः॥ १९॥ ॥७॥
संजयउवाच सन्निवृत्तेजनौघेतुशाल्वोम्लेच्छगणाधिपः॥ अभ्यवर्त्ततसंक्रुद्धःपांडवानांमहद्बलं॥ १ ॥ आस्थायसुमहानागंप्रभिन्नंपर्वतोपमं ॥दृप्तमैरा
वतप्रख्यममित्रगणमर्दनं॥ २ ॥ योसौमहान्भद्रकुलप्रसूतःसुपूजितोधार्त्तराष्ट्रेणनित्यं ॥ सुकल्पितःशास्त्रविनिश्चयज्ञैःसदोपवाह्यःसमरेपुराजन् ॥ ३ ॥ त
मास्थितोराजवरोबभूवयथोदयस्थःसविताक्षपांते॥ सतेननागप्रवरेणराजन्नभ्युद्ययौपांडुसुतान्समेतान् ॥ ४ ॥ सितैःपृषत्कैर्विददारवेगैर्महेंद्रवज्रप्रतिमैः
सुघोरैः॥ ततःशरान्वैसृजतोमहारणेयोधांश्चराजन्नयतोयमालयं ॥५॥ नास्यांतरंददृशुःस्वेपरेवायथापुरावज्रधरस्यदैत्याः॥ ऐरावणस्थस्यचमूविमर्दऽदै
त्याःपुरावासवस्येवराजन्॥६॥ तेपांडवाःसोमकाःसृंजयाश्चतमेकनागंददृशुःसमंतात् ॥ सहस्रशोवैविचरंतमेकंयथामहेंद्रस्यगजंसमीपे ॥ ७ ॥ संद्राव्य
माणंतुबलंपरेषांपरीतकल्पंविबभौसमंततः॥ नैवावतस्थेसमरेभृशंभयाद्विमृद्यमानंतुपरस्परंतदा॥८॥

पुरापूर्वंवज्रधरस्यऐरावणस्थस्यवासवस्यपुराप्रथमेचमूविमर्देदैत्याअदैत्यादेवाश्चयथाअंतरंनददृशुस्तथास्वेपरेचअस्यशाल्वस्यांतरंनददृशुरित्यन्वयः इवशब्दोवाक्यालंकारे ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

ततःप्रभग्नासहसामहाचमूःसापांडवीतेननराधिपेन ॥ दिशश्चतस्रःसहसाविधाविता गजेंद्रवेगंतमपारयंती ॥ ९ ॥ दृष्ट्वाचतांवेगवतींप्रभग्नांसर्वेत्वदीयायुधि
योधमुख्याः ॥ अपूजयंस्तेतुनराधिपंतंदध्मुश्चशंखान्शशिसन्निकाशान् ॥ १० ॥ श्रुत्वानिनादंत्वथकौरवाणांहर्षाद्विमुक्तंसहशंखशब्दैः ॥ सेनापतिःपांडव
सृंजयानांपांचालपुत्रोममृषेनकोपात् ॥ ११ ॥ ततस्तुतंवैद्विरदंमहात्माप्रत्युद्ययौत्वरमाणोजयाय ॥ जंभोयथाशक्रसमागमेवैनागेंद्रमैरावणमिंद्रवाह्यं ॥
॥ १२ ॥ तमापतंतंसहसानुदृष्ट्वापांचालपुत्रंयुधिराजसिंहः ॥ तंवैद्विपंप्रेषयामासतूर्णंवधायराजन्द्रुपदात्मजस्य ॥ १३ ॥ सतंद्विपेंद्रंसहसापतंतमविध्यदग्नि
प्रतिमैःपृषत्कैः ॥ कर्मारधौतैर्निशितैर्ज्वलद्भिर्नाराचमुख्यैस्त्रिभिरुग्रवेगैः ॥ १४ ॥ ततोपरान्पंचशतान्महात्मानाराचमुख्यान्विससर्जकुंभे ॥ सतैस्तुविद्धःपर
मद्विपोरणेतदापरावृत्यभृशंप्रदुद्रुवे ॥ १५ ॥ तंनागराजंसहसाप्रणुन्नंविद्राव्यमाणंविनिवर्त्यशाल्वः ॥ तोत्रांकुशैःप्रेषयामासतूर्णंपंचालराजस्यरथंप्रदिश्य
॥ १६ ॥ दृष्ट्वापतंतंसहसातुनागंधृष्टद्युम्नःस्वरथाच्छीघ्रमेव ॥ गदांप्रगृह्योग्रजवेनवीरोभूमिंप्रपन्नोभयविह्वलांगः ॥ १७ ॥ सतंरथंहेमविभूषितांगंसाश्वंससूतं
सहसाविमृद्य ॥ उत्क्षिप्यहस्तेननदन्महाद्विपोविपोथयामासवसुंधरातले ॥ १८ ॥ पांचालराजस्यसुतंचदृष्ट्वातदार्दितंनागवरेणतेन ॥ तमभ्यधावत्सहसाजवे
नभीमःशिखंडीचशिनेश्चनप्ता ॥ १९ ॥ शरैश्चवेगंसहसानिगृह्यतस्याभितोव्यापततोगजस्य ॥ ससंगृहीतोरथिभिर्गजोवैचचालतैर्वार्यमाणश्चसंख्ये ॥ २० ॥
ततःपृषत्कान्प्रववर्षराजासूर्योयथारश्मिजालंसमंतात् ॥ तेनाशुगैर्वध्यमानारथौघाःप्रदुद्रुवुःसहितास्तत्रतत्र ॥ २१ ॥ तत्कर्मशाल्वस्यसमीक्ष्यसर्वेपांचाल
पुत्रानृपसृंजयाश्च ॥ हाहाकारैर्नादयंतिस्मयुद्धेद्विपंसमंताद्रुरुधुर्नराग्र्याः ॥ २२ ॥ पांचालपुत्रस्त्वरितस्तुशूरोगदांप्रगृह्याचलशृंगकल्पां ॥ ससंभ्रमंभारतशत्रु
घातीजवेनवीरोनुससारनागं ॥ २३ ॥ ततस्तुनागंधरणीधराभंमदंस्रवंतंजलदप्रकाशं ॥ गदांसमाविध्यभृशंजघानपंचालराजस्यसुतस्तरस्वी ॥ २४ ॥ सभि
न्नकुंभःसहसाविनद्यमुखात्प्रसूतंक्षतजंविमुंचन् ॥ पपातनागोधरणीधराभःक्षितिप्रकंपाच्चलितोयथाद्रिः ॥ २५ ॥ निपात्यमानेतुतदागजेंद्रेहाहाकृतेतवपु
त्रस्यसैन्ये ॥ सशाल्वराजस्यशिनिप्रवीरोजहारभल्लेनशिरःशितेन ॥ २६ ॥

॥ २७ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेविंशतितमोऽध्यायः ॥ २० ॥ ॥ ९ ॥ ॥ ९ ॥ तस्मिन्निति ॥ १ ॥ २ ॥ सात्वतंकृतवर्माणं ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

स्हतोत्तमांगोयुधिसात्वतेनपपातभूमौसहनागराज्ञा ॥ यथाद्रिशृंगंसुमहत्प्रणुन्नंवज्रेणदेवाधिपचोदितेन ॥ २७॥ इतिश्रीमहाभारतेशल्यपर्वणिशाल्ववधेविंशतितमोऽध्यायः ॥ २० ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ संजयउवाच तस्मिंस्तुनिहतेशूरेशाल्वेसमितिशोभने ॥ तवाभज्यद्बलंवेगाद्वातेनेव महाद्रुमः ॥ १ ॥ तत्प्रभग्नंबलंदृष्ट्वाकृतवर्मामहारथः ॥ दधारसमरेशूरःशत्रुसैन्यंमहाबलः ॥ २ ॥ सन्निवृत्तास्तुतेशूरादृष्ट्वासात्वतमाहवे ॥ शैलोपमंस्थिरंराजन्कीर्यमाणंशरैर्युधि ॥ ३ ॥ ततःप्रववृतेयुद्धंकुरूणांपांडवैःसह ॥ निवृत्तानांमहाराजमृत्युंकृत्वानिवर्तनं ॥ ४ ॥ तत्राश्चर्यमभूद्युद्धंसात्वतस्यपरैःसह ॥ यदेकोवारयामासपांडुसेनांदुरासदां ॥ ५ ॥ तेषामन्योन्यसुहृदांकृतेकर्मणिदुष्करे ॥ सिंहनादःप्रहृष्टानांदिविस्पृक्सुमहानभूत् ॥ ६ ॥ तेनशब्देनवित्रस्तान्पंचालान्भरतर्षभ ॥ शिनेर्नप्तामहाबाहुरन्वपद्यतसात्यकिः ॥ ७ ॥ ससमासाद्यराजानंक्षेमधूर्तिंमहाबलं ॥ सप्तभिर्निशितैर्बाणैरनयद्यमसादनं ॥ ८ ॥ तमायांतंमहाबाहुंप्रवपंतंशितान्शरान् ॥ जवेनाभ्यपतद्धीमान्हार्दिक्यःशिनिपुंगवं ॥ ९ ॥ सात्वतौचमहावीर्यौधन्विनौरथिनांवरौ ॥ अन्योन्यमभिधावेतांशस्त्रप्रवरधारिणौ ॥ १० ॥ पांडवाःसहपंचालायोधाश्चान्येनृपोत्तमाः ॥ प्रेक्षकाःसमपद्यंततयोर्घोरेसमागमे ॥ ११ ॥ नाराचैर्वत्सदंतैश्चवृष्ण्यंधकमहारथौ ॥ अभिजघ्नतुरन्योन्यंप्रहृष्टाविवकुंजरौ ॥ १२ ॥ चरंतौविविधान्मार्गान्हार्दिक्यशिनिपुंगवौ ॥ मुहुरंतर्दधातेतौबाणवृष्ट्यापरस्परं ॥ १३ ॥ चापवेगबलोद्धूतान्मार्गणान्वृष्णिसिंहयोः ॥ आकाशेसमपश्यामपतंगानिवशीघ्रगान् ॥ १४ ॥ तमेकंसत्यकर्माणमासाद्यहृदिकात्मजः ॥ अविध्यन्निशितैर्बाणैश्चतुर्भिश्चतुरोहयान् ॥ १५ ॥ सदीर्घबाहुःसंक्रुद्धस्तोत्रार्दितइवद्विपः ॥ अष्टभिःकृतवर्माणमविध्यत्परमेषुभिः ॥ १६ ॥ ततःपूर्णायतोत्सृष्टैःकृतवर्माशिलाशितैः ॥ सात्यकिंत्रिभिराहत्यधनुरेकेनचिच्छिदे ॥ १७ ॥ निकृत्तंतद्धनुःश्रेष्ठमपास्यशिनिपुंगवः ॥ अन्यदादत्तवेगेनशैनेयःसशरंधनुः ॥ १८ ॥ तदादायधनुःश्रेष्ठंवरिष्ठःसर्वधन्विनां ॥ आरोप्यचधनुःशीघ्रंमहावीर्योमहाबलः ॥ १९ ॥ अमृष्यमाणोधनुषश्छेदनंकृतवर्मणा ॥ कुपितोतिरथःशीघ्रंकृतवर्माणमभ्ययात् ॥ २० ॥ ततःसुनिशितैर्बाणैर्दशभिःशिनिपुंगवः ॥ जघानसूतंचाश्वांश्चध्वजंचकृतवर्मणः ॥ २१ ॥ ततोराजन्महेष्वासःकृतवर्मामहारथः ॥ हताश्वसूतंसंप्रेक्ष्यरथंहेमपरिष्कृतं ॥ २२ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ इतिशल्यप० नै० भारतभा० एकविंशोऽध्यायः २१ ॥ ॥१॥ ॥१॥

रोषेणमहताविष्टःशूलमुद्यम्यमारिष ॥ चिक्षेपभुजवेगेनजिघांसुःशिनिपुंगवं ॥ २३ ॥ तच्छूलंसात्वतोऽत्याजौनिर्भिद्यनिशितैःशरैः ॥ चूर्णितंपातयामासमो हयन्निवमाधवं ॥ २४ ॥ ततोऽपरेणभल्लेनहृद्येनंसमताडयत् ॥ युयुधेयुयुधानेनहताश्वोहतसारथिः ॥ २५ ॥ कृतवर्माकृतस्त्रेनधरणीमन्वपद्यत ॥ तस्मिन्सा त्यकिनावीरेद्वैरथेविरथीकृते ॥ २६ ॥ समपद्यतसर्वेषांसैन्यानांसुमहद्भयं ॥ पुत्रस्यतवचात्यर्थंविषादःसमजायत ॥ २७ ॥ हतसूतेहताश्वेतुविरथेकृतवर्मणि ॥ हताश्वंचसमालक्ष्यहतसूतमरिंदम ॥ २८ ॥ अभ्यधावत्कृपोराजन्जिघांसुःशिनिपुंगवं ॥ तमारोप्यरथोपस्थेमिषतांसर्वधन्विनां ॥ २९ ॥ अपोवाहमहाबाहुं तूर्णमायोधनादपि ॥ शैनेयेधिष्ठितेराजन्विरथेकृतवर्मणि ॥ ३० ॥ दुर्योधनबलंसर्वंपुनरासीत्पराङ्मुखं ॥ तत्परेनान्वबुध्यंतसैन्येनरजसावृताः ॥ ३१ ॥ ताव काःप्रद्रुताराजन्दुर्योधनमृतेनृपं ॥ दुर्योधनस्तुसंप्रेक्ष्यभग्नंस्वबलमंतिकात् ॥ ३२ ॥ जवेनाभ्यपतत्तूर्णंसर्वांश्चैकोन्यवारयत् ॥ पांडूंश्चसर्वान्संक्रुद्धोधृष्टद्युम्नंच पार्षतं ॥ ३३ ॥ शिखंडिनंद्रौपदेयान्पंचालानांचयेगणाः ॥ केकयान्सोमकांश्चैवसृंजयांश्चैवमारिष ॥ ३४ ॥ असंभ्रमंदुराधर्षःशितैर्बाणैरवाकिरत् ॥ अति ष्ठदाहवेयत्तःपुत्रस्तवमहाबलः ॥ ३५ ॥ यथायज्ञेमहानग्निर्मंत्रपूतःप्रकाशवान् ॥ तथादुर्योधनोराजासंग्रामेसर्वतोभवत् ॥ ३६ ॥ तंपरेनाभ्यवर्तंतमर्त्यामृ त्युमिवाहवे ॥ अथान्यंरथमास्थायहार्दिक्यःसमपद्यत ॥ ३७ ॥ इतिश्रीमहाभारतेशल्यपर्वणिसात्यकिकृतवर्मयुद्धेएकविंशोऽध्यायः ॥ २१ ॥ ॥ ७ ॥

संजयउवाच पुत्रस्तुतेमहाराजरथस्थोरथिनांवरः ॥ दुरुत्सहोबभौयुद्धेयथारुद्रःप्रतापवान् ॥ १ ॥ तस्यबाणसहस्रैस्तुप्रच्छन्नात्यभवन्मही ॥ परांश्चसिषि चेबाणैर्धाराभिरिवपर्वतान् ॥ २ ॥ नचसोऽस्तिपुमान्कश्चित्पांडवानांबलार्णवे ॥ हयोगजोरथोवापियःस्याद्बाणैरविक्षतः ॥ ३ ॥ यंयंहिसमरेयोधंप्रपश्यामि विशांपते ॥ ससबाणैश्चितोभूद्दैपुत्रेणतवभारत ॥ ४ ॥ यथासैन्येनरजसासमुद्धूतेनवाहिनी ॥ प्रत्यदृश्यतसंछन्नातथाबाणैर्महात्मनः ॥ ५ ॥ बाणभूतामपश्या मपृथिवींपृथिवीपते ॥ दुर्योधनेनप्रकृतांक्षिप्रहस्तेनधन्विना ॥ ६ ॥ तेषुयोधसहस्रेषुतावकेषुपरेषुच ॥ एकोदुर्योधनोह्यासीत्पुमानितिमतिर्मम ॥ ७ ॥ तत्रा द्भुतमपश्यामतवपुत्रस्यविक्रमं ॥ यदेकंसहिताःपार्थानाभ्यवर्तंतभारत ॥ ८ ॥ युधिष्ठिरंशतेनाजौविव्याधभरतर्षभ ॥ भीमसेनंचसप्तत्यासहदेवंचपंचभिः ॥ ९ ॥ नकुलंचचतुःषष्ट्याधृष्टद्युम्नंचपंचभिः ॥ सप्तभिर्द्रौपदेयांश्चत्रिभिर्विव्याधसात्यकिं ॥ १० ॥

पुत्रइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

[illegible] ॥ १२ ॥ [illegible]

[illegible] ॥ १३ ॥ [illegible]

[illegible] ॥ १२ ॥ ततः कुद्धस्तु तां वीरो मातंगं नवभिः शरैः ॥ घोररूपैर्महाराज विव्याध यमलानुजः ॥ १३ ॥ [illegible]

[illegible] ॥ १४ ॥ अश्वीलाक्षीपसेनश्च शरैराजानमार्दयत् ॥ समंतात्कीर्यमाणस्तु बाणैरुपैर्महात्मभिः ॥ १५ ॥ [illegible]

[illegible] ॥ लाघवं सौष्ठवं चापि वीर्यं चापि महात्मनः ॥ १६ ॥ अतिसर्वाणि भूतानि ददृशुः सर्वमानवाः ॥ धार्तराष्ट्रा [illegible]

[illegible] ॥ १७ ॥ अपरस्मिन्महाराजा तं पर्यवर्तंत दंशिताः ॥ तेषामापततां घोरस्तुमुलः समपद्यत ॥ १८ ॥ क्षुब्धस्य हि समुद्रस्य प्रावृट्काले यथा स्वनः ॥ [illegible]

[illegible] तेषु राजानमपराजितं ॥ १९ ॥ प्रत्युद्ययुर्महेष्वासाः पांडवानाततायिनः ॥ भीमसेनं रणे क्रुद्धो द्रोणपुत्रो न्यवारयत् ॥ २० ॥ नानाबाणैर्महाराज प्रमुक्तैः [illegible]

[illegible] ॥ नाज्ञायंत रणे वीरा न दिशः प्रदिशः कुतः ॥ २१ ॥ तावुभौ क्रूरकर्माणावुभौ भारत दुःसहौ ॥ घोररूपमयुध्येतां कृतप्रतिकृतैषिणौ ॥ २२ ॥ त्रासयंतौ [illegible]

[illegible] सर्वा ज्याक्षेपकठिनत्वचौ ॥ शकुनिस्तु रणे वीरो युधिष्ठिरमपीडयत् ॥ २३ ॥ तस्याश्वांश्चतुरो हत्वा सुबलस्य सुतो विभो ॥ नादं चकार बलवान्सर्वसैन्यानि [illegible]

[illegible] ॥ २४ ॥ एतस्मिन्नंतरे वीरं राजानमपराजितं ॥ अपोवाह रथेनाजौ सहदेवः प्रतापवान् ॥ २५ ॥ अथान्यं रथमास्थाय धर्मपुत्रो युधिष्ठिरः ॥ शकुनिं नवभिः [illegible]

[illegible] पुनर्विव्याध पंचभिः ॥ २६ ॥ ननाद च महानादं प्रवरः सर्वधन्विनां ॥ तद्युद्धमभवच्चित्रं घोररूपं च मारिष ॥ २७ ॥ प्रेक्षतां प्रीतिजननं सिद्धचारणसेवितं ॥

[illegible] संकुलं युद्धं मदं ॥ २८ ॥ अभ्यद्रवदमेयात्मा शरवर्षैः समंततः ॥ तथैव नकुलः शूरः सौबलस्य सुतं रणे ॥ २९ ॥ शरवर्षेण महता समंतात्पर्य [illegible]

[illegible] ॥ तौ तत्र समरे वीरौ कुलपुत्रौ महारथौ ॥ ३० ॥ योधयंतावपश्येतां कृतप्रतिकृतैषिणौ ॥ तथैव कृतवर्माणं शैनेयः शत्रुतापनः ॥ ३१ ॥ योधयन्[illegible]

[illegible] ॥ दुर्योधनो धनुश्छित्वा धृष्टद्युम्नस्य संयुगे ॥ ३२ ॥ अथैनं छिन्नधन्वानं विव्याध निशितैः शरैः ॥ धृष्टद्युम्नोपि समरे [illegible]

[illegible] ॥ ३४ ॥ [illegible]

[illegible] ॥ ३५ ॥ [illegible]

घोररूपमसंवार्यंनिर्मर्यादमवर्त्तत ॥ तेचसंपीडयामासुरिंद्रियाणीववालिशं ॥ ३७॥ सचतान्प्रतिसंरब्धःप्रत्ययोधयदाहवे ॥ एवंचित्रमभूद्युद्धंतस्यतैःसहभा स्त ॥ ३८॥ उत्थायोत्थायहियथादेहिनामिंद्रियैर्विभो ॥ नराश्चैवनरैःसार्धंदंतिनोदंतिभिस्तथा ॥ ३९ ॥ हयाहयैःसमासक्तारथिनोरथिभिःसह ॥ संकुलंचा भवद्भूयोघोररूपंविशांपते ॥ ४० ॥ इदंचित्रमिदंघोरमिदंरौद्रमितिप्रभो ॥ युद्धान्यासन्महाराजघोराणिचबहूनिच ॥ ४१ ॥ तेसमासाद्यसमरेपरस्परमरिंद मा ॥ व्यनदंश्चैवजघ्नुश्चसमासाद्यमहाहवे ॥ ४२ ॥ तेषांपत्रसमुद्भूतंरजस्तीव्रमदृश्यत ॥ वातेनचोद्धतंराजन्धावद्भिश्चाश्वसादिभिः ॥ ४३॥ रथनेमिसमुद्भूतं निःश्वासैश्चापिदंतिनां ॥ रजःसंध्याभ्रकलिलंदिवाकरपथंययौ ॥ ४४ ॥ रजसातेनसंपृक्तोभास्करोनिष्प्रभःकृतः ॥ संछादिताभवद्भूमिस्तेचशूरामहारथाः ॥ ४५॥ मुहूर्त्तादिवसंवृत्तंनीरजस्कंसमंततः ॥ वीरशोणितसिक्तायांभूमौभरतसत्तम ॥ ४६ ॥ उपाशाम्यत्ततस्तीव्रंतद्रजोघोरदर्शनं ॥ ततोपश्यमहंभूयोद्वंद्व युद्धानिभारत ॥ ४७॥ यथाप्राणंयथाश्रेष्ठंमध्याह्नेवैसुदारुणं ॥ वर्मणांतत्रराजेंद्रव्यदृश्यंतोज्वलाःप्रभाः ॥ ४८ ॥ शब्दश्चतुमुलःसंख्येशराणांपततामभूत् ॥ महावेणुवनस्येवदह्यमानस्यपर्वते ॥ ४९ ॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेद्वाविंशोऽध्यायः ॥ २२॥ ॥७॥ ॥७॥ संजयउवाच वर्त्तमानेतदायुद्धेघोररूपेभयानके ॥ अभज्यतबलंतत्रतवपुत्रस्यपांडवैः ॥ १ ॥ तांस्तुयत्नेनमहतासन्निवार्यमहारथान् ॥ पुत्रस्तेयोधयामासपांडवानाम नीकिनीं ॥ २ ॥ निवृत्ताःसहसायोधास्तवपुत्रजयैषिणः ॥ सन्निवृत्तेषुतेष्वेवंयुद्धमासीत्सुदारुणं ॥ ३ ॥ तावकानांपरेषांचदेवासुररणोपमं ॥ परेषांतवसैन्ये वानासीत्कश्चित्पराङ्मुखः ॥ ४ ॥ अनुमानेनयुध्यंतेसंज्ञाभिश्चपरस्परं ॥ तेषांक्षयोमहानासीद्युध्यतामितरेतरं ॥ ५॥ ततोयुधिष्ठिरोराजाक्रोधेनमहतायुतः ॥ जिगीषमाणःसंग्रामेधार्त्तराष्ट्रान्सराजकान् ॥६॥ त्रिभिःशारद्वतंविध्वारुक्मपुंखैःशिलाशितैः ॥ चतुर्भिर्निजघानाश्वान्नाराचैःकृतवर्मणः ॥७॥ अश्वत्थामा तुहार्दिक्यमपोवाहयशस्विनं ॥ अथशारद्वतोष्टाभिःप्रत्यविध्यद्युधिष्ठिरं ॥ ८ ॥ ततोदुर्योधनोराजारथान्सप्तशतान्रणे ॥ प्रैषयद्यत्रराजासौधर्मपुत्रोयुधिष्ठि रः ॥ ९ ॥ तेरथारथिभिर्युक्तामनोमारुतरंहसः ॥ अभ्यद्रवंतसंग्रामेकौंतेयस्यरथंप्रति ॥ १० ॥ तेसमंतान्महाराजपरिवार्ययुधिष्ठिरं ॥ अदृश्यंसायकैश्चक्रुर्मे घाइवदिवाकरं ॥ ११ ॥

वर्त्तमानेइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

तेदृष्ट्वाधर्मराजानंकौरवेयैस्तथाकृतं॥ नाम्यंतसुसंरब्धाःशिखंडिप्रमुखारथाः ॥ १२ ॥ रथैरश्ववरैर्युक्तैःकिंकिणीजालसंवृतैः ॥ आजग्मुरथरक्षंतःकुंतीपुत्रंयुधिष्ठिरं॥ १३॥ ततःप्रववृतेरौद्रःसंग्रामःशोणितोदकः ॥ पांडवानांकुरूणांचयमराष्ट्रविवर्धनः॥ १४ ॥ रथान्सप्तशतान्हत्वाकुरूणामाततायिनां ॥ पांडवाःसहपंचालैःपुनरेवाभ्यवारयन् ॥ १५ ॥ तत्रयुद्धंमहच्चासीत्तवपुत्रस्यपांडवैः ॥ नचतत्तादृशंदृष्टंनैवचापिपरिश्रुतं ॥ १६ ॥ वर्त्तमानेतदायुद्धेनिर्मर्यादेसमंततः ॥ वध्यमानेषुयोधेषुतावकेष्वितरेषुच ॥ १७॥ विनदत्सुचयोधेषुशंखवर्यैश्चपूरितैः॥ उत्कुष्टैःसिंहनादैश्चगर्जितैश्चैवधन्विनां ॥ १८ ॥ अतिप्रवृत्तेयुद्धेचछिद्यमानेषुमर्मसु ॥ धावमानेषुयोधेषुजयगृद्धिषुमारिष ॥ १९ ॥ संहारेसर्वतोजातेपृथिव्यांशोकसंभवे ॥ बह्वीनामुत्तमस्त्रीणांसीमंतोद्धरणेतथा ॥ २० ॥ निर्मर्यादेमहायुद्धेवर्त्तमानेसुदारुणे॥ प्रादुरासन्विनाशायतदोत्पाताःसुदारुणाः ॥ २१ ॥ चचालशब्दंकुर्वाणासपर्वतवनामही ॥ सदंडाःसोल्मुकाराजन्कीर्यमाणाःसमंततः॥ २२॥ उल्काःपेतुर्दिवोभूमावाहत्यरविमंडलं॥ विष्वग्वाताःप्रादुरासन्नीचैःशर्करवर्षिणः ॥ २३॥ अश्रूणिमुमुचुर्नागावेपथुंचास्पृशन्भृशं॥ एतान्घोराननादृत्यसमुत्पातान्सुदारुणान्॥ २४॥ पुनर्युद्धायसंयत्ताःक्षत्रियास्तस्थुरव्यथाः ॥ रमणीयेकुरुक्षेत्रेपुण्येस्वर्गयियासवः॥ ॥ २५॥ ततोगांधारराजस्यपुत्रःशकुनिरब्रवीत्॥युध्यध्वमग्रतोयावत्पृष्ठतोहन्मिपांडवान्॥ २६॥ ततोनःसंप्रयातानांमद्रयोधास्तरस्विनः ॥ हृष्टाःकिलकिलाशब्दमकुर्वंतपरेतथा॥ २७॥ अस्मांस्तुपुनरासाद्यलब्धलक्षादुरासदाः॥ शरासनानिधुन्वंतःशरवर्षैरवाकिरन् ॥ २८ ॥ ततोहतंपरैस्तत्रमद्रराजबलंतदा॥ दुर्योधनबलंदृष्ट्वापुनरासीत्पराङ्मुखं॥ २९ ॥ गांधारराजस्तुपुनर्वाक्यमाहततोबली॥ निवर्त्तध्वमधर्मज्ञायुध्यध्वंकिंसृतेनवः॥ ३० ॥ अनीकंदशसाहस्रमश्वानांभरतर्षभ॥ आसीद्गांधारराजस्यविशालप्रासयोधिनां॥ ३१ ॥ बलेनतेनविक्रम्यवर्त्तमानेजनक्षये॥ पृष्ठतःपांडवानीकमभ्यघ्नन्निशितैःशरैः ॥ ३२॥ तदभ्रमिववातेनक्षिप्यमाणंसमंततः॥ अभज्यतमहाराजपांडूनांसुमहद्बलं॥ ३३॥ ततोयुधिष्ठिरःप्रेक्ष्यभग्नंस्वबलमंतिकात्॥ अभ्यनोदयदव्यग्रःसहदेवंमहाबलं॥ ३४॥ असौसुबलपुत्रोनोजघनंपीड्यदंशितः॥ सैन्यानिसूदयत्येषपश्यपांडवदुर्मतिं ॥ ३५ ॥ गच्छत्वंद्रौपदेयैश्चशकुनिंसौबलंजहि॥ रथानीकमहंधक्ष्येपंचालसहितोनघ॥ ३६॥ गच्छंतुकुंजराःसर्वेवाजिनश्चसहत्वया। पादाताश्चत्रिसाहस्राःशकुनिंतैर्वृतोजहि॥ ३७॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥

ततोगजाःसमशताश्चापपाणिभिरास्थिताः॥ पंचचाश्वसहस्राणिसहदेवश्चवीर्यवान्॥ ३८ ॥ पादाताश्चत्रिसाहस्राद्रौपदेयाश्चसर्वशः ॥ रणेत्यभ्यद्रवंस्तेतु
शकुनिंयुद्धदुर्मदं॥ ३९ ॥ ततस्तुसौबलोराजन्नभ्यतिक्रम्यपांडवान् ॥ जघानपृष्ठतःसेनांजयगृद्धःप्रतापवान्॥ ४० ॥ अश्वारोहास्तुसंरब्धाःपांडवानांतरस्वि
नां॥ प्राविशन्सौबलानीकमभ्यतिक्रम्यतान्रथान्॥ ४१ ॥ तेतत्रसादिनःशूराःसौबलस्यमहद्बलं॥ रणमध्येव्यतिष्ठंतशरवर्षैरवाकिरन्॥ ४२ ॥ तदुद्यतगदा
प्रासमकापुरुषसेवितं॥ प्रावर्त्ततमहद्युद्धंराजन्दुर्मंत्रितेतव॥ ४३ ॥ उपारमंतज्याशब्दाःप्रेक्षकारथिनोभवन्॥ नहिस्वेषांपरेषांवाविशेषःप्रत्यदृश्यत॥ ४४॥
शूरबाहुविसृष्टानांशक्तीनांभरतर्षभ ॥ ज्योतिषामिवसंपातमपश्यन्कुरुपांडवाः॥ ४५॥ ऋष्टिभिर्विमलाभिश्चतत्रतत्रविशांपते॥ संपतंतीभिराकाशमावृतं
बह्वशोभत॥ ४६॥ प्रासानांपततांराजन्रूपमासीत्समंततः॥ शलभानामिवाकाशेतदाभरतसत्तम॥ ४७॥ रुधिरोक्षितसर्वांगाविप्रविद्धैर्नियंतृभिः॥ हयाः
परिपतंतिस्मशतशोथसहस्रशः॥ ४८॥ अन्योन्यंपरिपिष्टाश्चसमासाद्यपरस्परं॥ आविक्षताःस्मदृश्यंतेवमंतोरुधिरंमुखैः ॥ ४९ ॥ ततोभवत्तमोघोरंसैन्येन
रजसावृते॥ तानपाक्रमतोद्राक्षंतस्माद्देशादरिंदम॥ ५० ॥ अश्वान्राजन्मनुष्यांश्चरजसासंवृतेसति॥ भूमौनिपतिताश्चान्येवमंतोरुधिरंबहु ॥ ५१ ॥ केशा
केशिसमालग्नानशेकुश्चेष्टितुंनराः॥ अन्योन्यमश्वपृष्ठेभ्योविकर्षंतोमहाबलाः॥ ५२॥ मल्लाइवसमासाद्यनिजघ्नुरितरेतरं॥ अश्वैश्चव्यपकृष्यंतबहवोत्रगता
सवः॥ ५३॥ भूमौनिपतिताश्चान्येबहवोविजयैषिणः॥ तत्रतत्रव्यदृश्यंतपुरुषाःशूरमानिनः ॥ ५४॥ रक्तोक्षितैश्छिन्नभुजैरवकृष्टशिरोरुहैः॥ व्यदृश्यतमही
कीर्णाशतशोथसहस्रशः॥ ५५॥ दूरंनशक्यंतत्रासीद्गंतुमश्वेनकेनचित्॥ साश्वारोहैर्हतैरश्वैरावृतेवसुधातले॥ ५६॥ रुधिरोक्षितसन्नाहैरात्तशस्त्रैरुदायुधैः॥
नानाप्रहरणैर्घोरैःपरस्परवधैषिभिः॥ ५७॥ सुसन्निकृष्टैःसंग्रामेहतभूयिष्ठसैनिकैः॥ समुहूर्त्तंततोयुध्वासौबलोथविशांपते ॥ ५८॥ षट्साहस्रैर्हयैःशिष्टैरपा
याच्छकुनिस्ततः॥ तथैवपांडवानीकंरुधिरेणसमुक्षितं॥ ५९॥ षट्साहस्रैर्हयैःशिष्टैरपायाच्छ्रांतवाहनं॥ अश्वारोहाश्चपांडूनामब्रुवन्रुधिरोक्षिताः ॥ ६० ॥
सुसन्निकृष्टेसंग्रामेभूयिष्ठेत्यक्तजीविताः॥ नहिशक्यंरथैर्योद्धुंकुतएवमहागजैः ॥ ६१ ॥ रथानेवरथायांतुकुंजराःकुंजरानपि॥ प्रतियातोहिशकुनिःस्वमनी
कमवस्थितः॥ ६२ ॥ नपुनःसौबलोराजायुद्धमभ्यागमिष्यति॥ ततस्तुद्रौपदेयाश्चतेचमत्तामहाद्विपाः॥ ६३॥

॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥

प्रययुर्यत्रपांचाल्योधृष्टद्युम्नोमहारथः ॥ सहदेवोपिकौरव्यरजोमेघेसमुत्थिते ॥ ६४ ॥ एकाकीप्रययौतत्रयत्रराजायुधिष्ठिरः ॥ ततस्तेषुप्रयातेषुशकुनिःसौबलःपुनः ॥ ६५ ॥ पार्श्वतोभ्यहनत्क्रुद्धोधृष्टद्युम्नस्यवाहिनीं ॥ तत्पुनस्तुमुलंयुद्धंप्राणांस्त्यक्त्वाऽभ्यवर्त्तत ॥ ६६ ॥ तावकानांपरेषांचपरस्परवधैषिणां ॥ तेन्योन्यमवैक्षंततस्मिन्वीरसमागमे ॥ ६७ ॥ योधाःपर्यपतन्राजन्शतशोथसहस्रशः ॥ असिभिश्छिद्यमानानांशिरसांलोकसंक्षये ॥ ६८ ॥ प्रादुरासीन्महान्शब्दस्तालानांपततामिव ॥ विमुक्तानांशरीराणांछिन्नानांपततांभुवि ॥ ६९ ॥ सायुधानांचबाहूनामूरूणांचविशांपते ॥ आसीत्कटकटाशब्दःसुमहाँल्लोमहर्षणः ॥ ७० ॥ निघ्नंतोनिशितैःशस्त्रैर्भ्रातॄन्पुत्रान्सखीनपि ॥ योधाःपरिपतंतिस्मयथामिषकृतेखगाः ॥ ७१ ॥ अन्योन्यंप्रतिसंरब्धाःसमासाद्यपरस्परं ॥ अहंपूर्वमहंपूर्वमितिनिघ्नन्सहस्रशः ॥ ७२ ॥ संघातेनासनभ्रष्टैरश्वारोहैर्गतासुभिः ॥ हयाःपरिपतंतिस्मशतशोथसहस्रशः ॥ ७३ ॥ स्फुरतांप्रतिपिष्टानामश्वानांशीघ्रगामिनां ॥ स्तनतांचमनुष्याणांसन्नद्धानांविशांपते ॥ ७४ ॥ शक्त्यृष्टिप्रासशब्दश्चतुमुलःसमपद्यत ॥ भिंदतांपरमर्माणिराजन्दुर्मंत्रितेतव ॥ ७५ ॥ श्रमाभिभूताःसंरब्धाःश्रांतवाहाःपिपासवः ॥ विक्षताश्चशितैःशस्त्रैरभ्यवर्त्तंततावकाः ॥ ७६ ॥ मत्तारुधिरगंधेनबहवोत्रविचेतसः ॥ जघ्नुःपरान्स्वकांश्चैवप्राप्तानन्नंतरान् ॥ ७७ ॥ बहवश्चगतप्राणाःक्षत्रियाजयगृद्धिनः ॥ भूमावभ्यपतन्राजन्शरवृष्टिभिरावृताः ॥ ७८ ॥ वृकगृध्रशृगालानांतुमुलेमोदनेहनि ॥ आसीद्बलक्षयोघोरस्तवपुत्रस्यपश्यतः ॥ ७९ ॥ नराश्वकायैःसंछन्नाभूमिरासीद्विशांपते ॥ रुधिरोदकचित्राचभीरूणांभयवर्धिनी ॥ ८० ॥ असिभिःपट्टिशैःशूलैस्तक्षमाणाःपुनःपुनः ॥ तावकाःपांडवेयाश्चनन्यवर्त्तंतभारत ॥ ८१ ॥ प्रहरंतोयथाशक्तियावत्प्राणस्यधारणं ॥ योधाःपरिपतंतिस्मवमंतोरुधिरंव्रणैः ॥ ८२ ॥ शिरोगृहीत्वाकेशेषुकबंधःस्मप्रदृश्यते ॥ उद्यम्यचशितंखड्गंरुधिरेणपरिप्लुतं ॥ ८३ ॥ तथोत्थितेषुबहुषुकबंधेषुनराधिप ॥ तथारुधिरगंधेनयोधाःकश्मलमाविशन् ॥ ८४ ॥ मंदीभूतेततःशब्देपांडवानांमहद्बलं ॥ अल्पावशिष्टैस्तुरगैरभ्यवर्त्ततसौबलः ॥ ८५ ॥ ततोभ्यधावंस्त्वरिताःपांडवाजयगृद्धिनः ॥ पदातयश्चनागाश्चसादिनश्चोद्यतायुधाः ॥ ८६ ॥ कोष्ठकीकृत्यचाप्येनंपरिक्षिप्यचसर्वशः ॥ शस्त्रैर्नानाविधैर्जघ्नुर्युद्धपारंतितीर्षवः ॥ ८७ ॥ त्वदीयास्तांस्तुसंप्रेक्ष्यसर्वतःसमभिद्रुतान् ॥ रथाश्वपत्तिद्विरदाःपांडवानभिदुद्रुवुः ॥ ८८ ॥

॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥ ७ ॥ तस्मिन्निति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥५॥ ६ ॥७॥ ८ ॥ ९ ॥

केचित्पदातयःपद्भिर्मुष्टिभिश्चपरस्परं ॥ निजघ्नुःसमरेशूराःक्षीणशस्त्रास्ततोपतन् ॥ ८९ ॥ रथेभ्योरथिनःपेतुर्द्विपेभ्योहस्तिसादिनः ॥ विमानेभ्योदिवोभ्रष्टाः
सिद्धाःपुण्यक्षयादिव ॥ ९० ॥ एवमन्योन्यमायत्तायोधाजग्मुर्महाहवे ॥ पितॄन्भ्रातॄन्वयस्यांश्चपुत्रानपितथापरे ॥ ९१ ॥ एवमासीदमर्यादंयुद्धंभरतसत्तम ॥
प्रासासिबाणकलिलंवर्त्तमानेसुदारुणे ॥ ९२ ॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥७॥ ॥ ७ ॥
संजयउवाच तस्मिन्शब्देमृदौजातेपांडवैर्निहतेबले ॥ अश्वैःसप्तशतैःशिष्टैरुपावर्त्ततसौबलः ॥ १ ॥ सयात्वावाहिनींतूर्णमब्रवीत्त्वरयन्युधि ॥ युध्यध्वमि
तिसंहृष्टाःपुनःपुनररिंदमाः ॥ २॥ अपृच्छत्क्षत्रियांस्तत्रक्वनुराजामहाबलः ॥ शकुनेस्तद्वचःश्रुत्वातमूचुर्भरतर्षभ॥३॥असौतिष्ठतिकौरव्योरणमध्येमहाबलः॥
यत्रैतत्सुमहच्छत्रंपूर्णचंद्रसमप्रभं ॥ ४ ॥ यत्रतेसतनुत्राणारथास्तिष्ठंतिदंशिताः ॥ यत्रैषतुमुलःशब्दःपर्जन्यनिनदोपमः ॥५॥ तत्रगच्छद्रुतंराजंस्ततोद्रक्ष्य
सिकौरवं ॥ एवमुक्तस्तुतैर्योधैःशकुनिःसौबलस्तदा ॥ ६ ॥ प्रययौतत्रयत्रासौपुत्रस्तवनराधिप ॥ सर्वतःसंवृतोवीरैःसमरेचित्रयोधिभिः ॥ ७॥ ततोदुर्योधनं
दृष्ट्वारथानीकेव्यवस्थितं ॥ सरथांस्तावकान्सर्वान्हर्षयन्शकुनिस्ततः ॥ ८ ॥ दुर्योधनमिदंवाक्यंहृष्टरूपोविशांपते ॥ कृतकार्यमिवात्मानंमन्यमानोब्रवीन्नृपं ॥
॥ ९ ॥ जहिराजन्रथानीकमश्वाःसर्वेजितामया ॥ नात्यक्त्वाजीवितंसंख्येशक्योजेतुंयुधिष्ठिरः ॥ १० ॥ हतेतस्मिन्रथानीकेपांडवेनाभिपालिते ॥ गजानेता
न्हनिष्यामःपदातींश्चेतरांस्तथा ॥ ११ ॥ श्रुत्वातुवचनंतस्यतावकाजयगृद्धिनः ॥ जवेनाभ्यपतन्हृष्टाःपांडवानामनीकिनीं ॥ १२ ॥ सर्वेविवृततूणीराःप्रगृही
तशरासनाः ॥ शरासनानिधुन्वानाःसिंहनादान्प्रणेदिरे ॥ १३ ॥ ततोज्यातलनिर्घोषःपुनरासीद्विशांपते ॥ प्रादुरासीच्छराणांचसुमुक्तानांसुदारुणः ॥ १४ ॥
तान्समीपगतान्दृष्ट्वाजवेनोद्यतकार्मुकान् ॥ उवाचदेवकीपुत्रंकुंतीपुत्रोधनंजयः ॥ १५॥ चोदयाश्वानसंभ्रांतःप्रविशैतद्बलार्णवं ॥ अंतमद्यगमिष्यामिशत्रू
णांनिशितैःशरैः ॥ १६ ॥ अष्टादशदिनान्यद्ययुद्धस्यास्यजनार्दन ॥ वर्त्तमानस्यमहतःसमासाद्यपरस्परं ॥ १७॥ अनंतकल्पाध्वजिनीभूत्वाह्येषांमहात्मनां॥
क्षयमद्यगतायुद्धेपश्यदैवंयथाविधं ॥ १८ ॥ समुद्रकल्पंचबलंधार्त्तराष्ट्रस्यमाधव ॥ अस्मानासाद्यसंजातंगोष्पदोपममच्युत ॥ १९ ॥ हतेभीष्मेतुसंदध्याच्छि
वंस्यादिहमाधव ॥ नचतत्कृतवान्मूढोधार्त्तराष्ट्रःसुबालिशः ॥ २० ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ पापकंप्रचरिष्यतिआचरिष्यतिधार्त्तराष्ट्रइतिशेषः

उक्तंभीष्मेणयद्वाक्यंहितंतथ्यंचमाधव ॥ तच्चापिनासौकृतवान्वीतबुद्धिःसुयोधनः ॥ २१ ॥ तस्मिंस्तुतुमुलेभीष्मेप्रच्युतेधरणीतले ॥ नजानेकारणंकिंतुयेनयु-
द्धमवर्त्तत ॥ २२ ॥ मूढांस्तुसर्वथामन्येधार्त्तराष्ट्रान्सुबालिशान् ॥ पतितेशांतनोःपुत्रेयेऽकार्षुःसंयुगंपुनः ॥ २३ ॥ अनंतरंचनिहतेद्रोणेब्रह्मविदांवरे ॥ राधेयेच
विकर्णेचनैवाशाम्यतवैशसं ॥ २४ ॥ अल्पावशिष्टेसैन्येस्मिन्सूतपुत्रेचपातिते ॥ सपुत्रेवैनरव्याघ्रेनैवाशाम्यतवैशसं ॥ २५ ॥ श्रुतायुषिहतेवीरेजलसंधेचपौ
रवे ॥ श्रुतायुधेचनृपतौनैवाशाम्यतवैशसं ॥ २६ ॥ भूरिश्रवसिशल्येचशाल्वेचैवजनार्दन ॥ आवंत्येषुचवीरेषुनैवाशाम्यतवैशसं ॥ २७ ॥ जयद्रथेचनिहते
राक्षसेचाप्यलायुधे ॥ बाह्लिकेसोमदत्तेचनैवाशाम्यतवैशसं ॥ २८ ॥ भगदत्तेहतेशूरेकांबोजेचसुदारुणे ॥ दुःशासनेचनिहतेनैवाशाम्यतवैशसं ॥ २९ ॥ दृष्ट्वावि
निहतान्शूरान्पृथङ्माडलिकान्नृपान् ॥ बलिनश्चरणेकृष्णनैवाशाम्यतवैशसं ॥ ३० ॥ अक्षौहिणीपतीन्दृष्ट्वाभीमसेननिपातितान् ॥ मोहाद्वायदिवालोभा
न्नैवाशाम्यतवैशसं ॥ ३१ ॥ कोनुराजकुलेजातःकौरवेयोविशेषतः ॥ निरर्थकंमहद्वैरंकुर्यादन्यःसुयोधनात् ॥ ३२ ॥ गुणतोभ्यधिकान्ज्ञात्वाबलतःशौर्यतो
पिवा ॥ अमूढःकोनुयुद्ध्येतजानन्प्राज्ञोहिताहितं ॥ ३३ ॥ यन्नतस्यमनोत्यासीत्त्वयोक्तस्यहितंवचः ॥ प्रशमेपांडवैःसार्धंसोन्यस्यश्रृणुयात्कथं ॥ ३४ ॥ येन
शांतनवोवीरोद्रोणोविदुरएवच ॥ प्रत्याख्याताःशमस्यार्थेकिंनुतस्याद्यभेषजं ॥ ३५ ॥ मौर्ख्याद्येनपितावृद्धःप्रत्याख्यातोजनार्दन ॥ तथामाताहितंवाक्यंभा
षमाणाहितैषिणी ॥ ३६ ॥ प्रत्याख्यातात्यसत्कृत्यसकस्मैरोचयेद्वचः ॥ कुलांतकरणोव्यक्तंजातएषजनार्दन ॥ ३७ ॥ तथास्यदृश्यतेचेष्टानीतिश्चैवविशांपते ॥
नैषदास्यतिनोराज्यमितिमेमतिरच्युत ॥ ३८ ॥ उक्तोहंबहुशस्तातविदुरेणमहात्मना ॥ नजीवन्दास्यतेभागंधार्त्तराष्ट्रस्तुमानद ॥ ३९ ॥ यावत्प्राणाधरिष्यंति
धार्त्तराष्ट्रस्यदुर्मतेः ॥ तावद्युष्मास्वपापेषुप्रचरिष्यतिपापकं ॥ ४० ॥ नचयुक्तोन्यथाजेतुमृतेयुद्धेनमाधव ॥ इत्यब्रवीत्सदामांहिविदुरःसत्यदर्शनः ॥ ४१ ॥ त
त्सर्वमद्यजानामिव्यवसायंदुरात्मनः ॥ यदुक्तंवचनंतेनविदुरेणमहात्मना ॥ ४२ ॥ याहिश्रुत्वावचःपथ्यंजामदग्न्याद्यथातथं ॥ अवामन्यतदुर्बुद्धिर्ध्रुवंनाश
मुखेस्थितः ॥ ४३ ॥ उक्तंहिबहुशःसिद्धैर्जातमात्रेसुयोधने ॥ एनंप्राप्यदुरात्मानंक्षयंक्षत्रंगमिष्यति ॥ ४४ ॥ तदिदंवचनंतेषांनिरुक्तंवैजनार्दन ॥ क्षयंयाता
हिराजानोदुर्योधनकृतेभृशं ॥ ४५ ॥

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ इतिशल्यप० नै० भारतभा०

सोयंसर्वान्रणेयोधान्निहनिष्यामिमाधव ॥ क्षत्रियेषुहतेष्वाशुशून्येचशिबिरेकृते ॥ ४६ ॥ वधायचात्मनोस्माभिःसंयुगंरोचयिष्यति ॥ तदंतंहिभवेद्वैरमनुमानेनमाधव ॥ ४७ ॥ एवंपश्यामिवार्ष्णेयचिंतयन्प्रज्ञयास्वया ॥ विदुरस्यचवाक्येनचेष्टयाचदुरात्मनः ॥ ४८ ॥ तस्माद्याहिचमूंवीरयावद्धन्मिशितैःशरैः ॥ दुर्योधनंमहाबाहोवाहिनींचास्यसंयुगे ॥ ४९ ॥ क्षेममद्यकरिष्यामिधर्मराजस्यमाधव ॥ हत्वैतद्दुर्बलंसैन्यंधार्त्तराष्ट्रस्यपश्यतः ॥ ५० ॥ संजयउवाच अभीषुहस्तोदाशार्हस्तथोक्तःसव्यसाचिना ॥ तद्बलौघममित्राणामभीतःप्राविशद्बलात् ॥ ५१ ॥ कुंतखड्गशरैर्घोरंशक्तिकंटकसंकुलं ॥ गदापरिघपंथानंरथनागमहाद्रुमं ॥ ५२ ॥ हयपत्तिलताकीर्णंगाहमानोमहायशाः ॥ व्यचरत्तत्रगोविंदोरथेनातिपताकिना ॥ ५३ ॥ तेहयाःपांडुराराजन्वहंतोर्जुनमाहवे ॥ दिक्षुसर्वास्वदृश्यंतदाशार्हेणप्रचोदिताः ॥ ५४ ॥ ततःप्रायाद्रथेनाजौसव्यसाचीपरंतपः ॥ किरन्शरशतांस्तीक्ष्णान्वारिधाराघनोयथा ॥ ५५ ॥ प्रादुरासीन्महान्शब्दःशराणांनतपर्वणां ॥ इषुभिश्छाद्यमानानांसमरेसव्यसाचिना ॥ ५६ ॥ असज्जंतस्तनुत्रेषुशरौघाःप्रापतन्भुवि ॥ इंद्राशनिसमस्पर्शागांडीवप्रेषिताःशराः ॥ ५७ ॥ नरान्नागान्समाहत्यहयांश्चापिविशांपते ॥ अपतंतरणेबाणाःपतंगाइवघोषिणः ॥ ५८ ॥ आसीत्सर्वमवच्छन्नंगांडीवप्रेषितैःशरैः ॥ नप्राज्ञायंतसमरेदिशोवाप्रदिशोपिवा ॥ ५९ ॥ सर्वमासीज्जगत्पूर्णंपार्थनामांकितैःशरैः ॥ रुक्मपुंखैस्तैलधौतैःकर्मारपरिमार्जितैः ॥ ६० ॥ तेदह्यमानाःपार्थेनपावकेनेवकुंजराः ॥ पार्थंनप्राजहुर्घोराबध्यमानाःशितैःशरैः ॥ ६१ ॥ शरचापधरःपार्थःप्रज्वलन्निवभास्करः ॥ ददाहसमरेयोधान्कक्षमग्निरिवज्वलन् ॥ ६२ ॥ यथावनांतेवनपैर्विसृष्टःकक्षंदहेत्कृष्णगतिःसुघोषः ॥ भूरिद्रुमंशुष्कलतावितानंभृशंसमृद्धोज्वलनःप्रतापी ॥ ६३ ॥ एवंसनाराचगणप्रतापीशरार्चिरुच्चावचतिग्मतेजाः ॥ ददाहसर्वांतवपुत्रसेनाममृष्यमाणस्तरसातरस्वी ॥ ६४ ॥ तस्येषवःप्राणहराःसुमुक्तानासज्जन्वैवर्मसुरुक्मपुंखाः ॥ नचद्वितीयंप्रमुमोचबाणंनरेहयेवापरमद्विपेवा ॥ ६५ ॥ अनेकरूपाकृतिभिर्हिबाणैर्महारथानीकमनुप्रविश्य ॥ सएवएकस्तवपुत्रस्यसेनांजघानदैत्यानिववज्रपाणिः ॥ ६६ ॥ इतिश्रीमहाभारतेशल्यपर्वणिसंकुलयुद्धेचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ संजयउवाच पश्यतांयतमानानांशूराणामनिवर्त्तिनां ॥ संकल्पमकरोन्मोघंगांडीवेनधनंजयः ॥ १ ॥

चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ९ ॥ पश्यतामिति ॥ १ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

इंद्राशनिसमस्पर्शानविषह्यान्महौजसः ॥ विसृजन्दृश्यतेबाणान्धारामुंचन्निवांबुदः ॥ २ ॥ तत्सैन्यंभरतश्रेष्ठवध्यमानंकिरीटिना ॥ संप्रदुद्रावसंग्रामात्तवपु
त्रस्यपश्यतः ॥ ३ ॥ पितॄन्भ्रातॄन्परित्यज्यवयस्यानपिचापरे ॥ हतधुर्यारथाःकेचिद्धतसूतास्तथापरे ॥ ४ ॥ भग्नाक्षयुगचक्रेषाःकेचिदासन्विशांपते ॥ अन्ये
षांसायकाःक्षीणास्तथान्येबाणपीडिताः ॥ ५ ॥ अक्षतायुगपत्केचित्प्राद्रवन्भयपीडिताः ॥ केचित्पुत्रानुपादाय्यहतभूयिष्ठबांधवाः ॥ ६ ॥ विचुक्रुशुःपितॄंस्त्व
न्येसहायानपरेपुनः ॥ बांधवांश्चनरव्याघ्रभ्रातॄन्संबंधिनस्तथा ॥ ७ ॥ दुद्रुवुःकेचिदुत्सृज्यतत्रतत्रविशांपते ॥ बहवोत्रभृशंविद्धामुह्यमानामहारथाः ॥ ८ ॥
निःश्वसंतिस्मदृश्यंतेपार्थबाणहतानराः ॥ तानन्येरथमारोप्यत्वाश्वास्यचमुहूर्त्तकं ॥ ९ ॥ विश्रांताश्चवितृष्णाश्चपुनर्युद्धायजग्मिरे ॥ तानपास्यगताःकेचित्पुन
रेवयुयुत्सवः ॥ १० ॥ कुर्वंतस्तवपुत्रस्यशासनंयुद्धदुर्मदाः ॥ पानीयमपरेपीत्वापर्याश्वास्यचवाहनं ॥ ११ ॥ वर्माणिचसमारोप्यकेचिद्भरतसत्तम ॥ समा
श्वास्यापरेभ्रातॄन्निक्षिप्यशिबिरेपिच ॥ १२ ॥ पुत्रानन्येपितॄनन्येपुनर्युद्धमरोचयन् ॥ सज्जयित्वारथान्केचिद्यथामुख्यंविशांपते ॥ १३ ॥ आप्लुत्यपांडवा
नीकंपुनर्युद्धमरोचयन् ॥ तेशूराःकिंकिणीजालैःसमाच्छन्नाबभासिरे ॥ १४ ॥ त्रैलोक्यविजयेयुक्तायथादैतेयदानवाः ॥ आगम्यसहसाकेचिद्रथैःस्वर्णविभू
षितैः ॥ १५ ॥ पांडवानामनीकेषुधृष्टद्युम्नमयोधयन् ॥ धृष्टद्युम्नोपिपांचाल्यःशिखंडीचमहारथः ॥ १६ ॥ नाकुलिस्तुशतानीकोरथानीकमयोधयन् ॥ पांचा
ल्यस्तुततःक्रुद्धःसैन्येनमहतावृतः ॥ १७ ॥ अभ्यद्रवत्सुसंक्रुद्धस्तावकान्हंतुमुद्यतः ॥ ततस्त्वापततस्तस्यतवपुत्रोजनाधिप ॥ १८ ॥ बाणसंघाननेकान्वैप्रेषया
मासभारत ॥ धृष्टद्युम्नस्ततोराजंस्तवपुत्रेणधन्विना ॥ १९ ॥ नाराचैरर्धनाराचैर्बहुभिःक्षिप्रकारिभिः ॥ वत्सदंतैश्चबाणैश्चकर्मारपरिमार्जितैः ॥ २० ॥ अश्वां
श्चचतुरोहत्वाबाह्वोरुरसिचार्पयत् ॥ सोतिविद्धोमहेष्वासस्तोत्रार्दितइवद्विपः ॥ २१ ॥ तस्याश्वांश्चतुरोबाणैःप्रेषयामासमृत्यवे ॥ सारथेश्चास्यभल्लेनशिरःका
यादपाहरत् ॥ २२ ॥ ततोदुर्योधनोराजापृष्ठमारुह्यवाजिनः ॥ अपाक्रामद्धतरथोनातिदूरमरिंदमः ॥ २३ ॥ दृष्ट्वातुहतविक्रांतंस्वमनीकंमहाबलः ॥ तवपुत्रो
महाराजप्रययौयत्रसौबलः ॥ २४ ॥ ततोरथेषुभग्नेषुत्रिसाहस्रामहाद्विपाः ॥ पांडवान्रथिनःसर्वान्समंतात्पर्यवारयन् ॥ २५ ॥ तेवृताःसमरेपंचगजानीकेन
भारत ॥ अशोभंतमहाराजग्रहाव्याप्ताघनैरिव ॥ २६ ॥

॥२७॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२॥

ततोर्जुनोमहाराजलब्धलक्षोमहाभुजः ॥ विनिर्ययौरथेनैवश्वेताश्वःकृष्णसारथिः ॥ २७ ॥ तैःसमंतात्परिवृतःकुंजरैःपर्वतोपमैः ॥ नाराचैर्विमलैस्तीक्ष्णैर्गजानीकमयोधयत् ॥ २८ ॥ तत्रैकबाणनिहतानपश्याममहागजान् ॥ पतितान्पात्यमानांश्चनिर्भिन्नान्सव्यसाचिना ॥ २९ ॥ भीमसेनस्तुतान्दृष्ट्वानागान्मत्तगजोपमः ॥ करेणादायमहतींगदामभ्यपतद्बली ॥ ३० ॥ अथाप्लुत्यरथात्तूर्णंदंडपाणिरिवांतकः ॥ तमुद्यतगदंदृष्ट्वापांडवानांमहारथं ॥ ३१ ॥ वित्रेसुस्तावकाःसैन्याःशकृन्मूत्रेचसुस्रुवुः ॥ आविग्नंचबलंसर्वंगदाहस्तेवृकोदरे ॥ ३२ ॥ गदयाभीमसेनेनभिन्नकुंभान्रजस्वलान् ॥ धावमानानपश्यामकुंजरान्पर्वतोपमान् ॥ ३३ ॥ प्राद्रवन्कुंजरास्तेतुभीमसेनगदाहताः ॥ पेतुरार्त्तस्वरंकृत्वाछिन्नपक्षाइवाद्रयः ॥ ३४ ॥ प्रभिन्नकुंभांस्तुबहून्द्रवमाणानितस्ततः ॥ पतमानांश्चसंप्रेक्ष्यवित्रेसुस्तवसैनिकाः ॥ ३५ ॥ युधिष्ठिरोपिसंक्रुद्धोमाद्रीपुत्रौचपांडवौ ॥ गार्ध्रपत्रैःशितैर्बाणैर्निन्युर्वैयमसादनं ॥ ३६ ॥ धृष्टद्युम्नस्तुसमरेपराजित्यनराधिपं ॥ अपक्रांतेतवसुतेहयपृष्ठंसमाश्रिते ॥ ३७ ॥ दृष्ट्वाचपांडवान्सर्वान्कुंजरैःपरिवारितान् ॥ धृष्टद्युम्नोमहाराजंसहसासमुपाद्रवत् ॥ ३८ ॥ पुत्रःपांचालराजस्यजिघांसुःकुंजरान्ययौ ॥ अदृष्ट्वातुरथानीकेदुर्योधनमरिंदमं ॥ ३९ ॥ अश्वत्थामाकृपश्चैवकृतवर्माचसात्वतः ॥ अपृच्छन्क्षत्रियांस्तत्रक्वनुदुर्योधनोगतः ॥ ४० ॥ तेपश्यमानाराजानंवर्त्तमानेजनक्षये ॥ मन्वानानिहतंतत्रतवपुत्रंमहारथाः ॥ ४१ ॥ विवर्णवदनाभूत्वापर्यपृच्छंततेसुतं ॥ आहुःकेचिद्धतेसूतेप्रयातोयत्रसौबलः ॥ ४२ ॥ हित्वापांचालराजस्यतदनीकंदुरुत्सहं ॥ अपरेत्वब्रुवंस्तत्रक्षत्रियाभृशविक्षताः ॥ ४३ ॥ दुर्योधनेनकिंकार्यंद्रक्ष्यध्वंयदिजीवति ॥ युद्ध्यध्वंसहिताःसर्वेकिंवोराजाकरिष्यति ॥ ४४ ॥ तेक्षत्रियाःक्षतैर्गात्रैर्हतभूयिष्ठवाहनाः ॥ शरैःसंपीड्यमानास्तुनातिव्यक्तमथाब्रुवन् ॥ ४५ ॥ इदंसर्वबलंहन्मोयेनस्मपरिवारिताः ॥ एतेसर्वेगजान्हत्वाउपयांतिस्मपांडवाः ॥ ४६ ॥ श्रुत्वातुवचनंतेषामश्वत्थामामहाबलः ॥ भित्वापांचालराजस्यतदनीकंदुरुत्सहं ॥ ४७ ॥ कृपश्चकृतवर्माचप्रययौयत्रसौबलः ॥ रथानीकंपरित्यज्यशूराःसुदृढधन्विनः ॥ ४८ ॥ ततस्तेषुप्रयातेषुधृष्टद्युम्नपुरस्कृताः ॥ आययुःपांडवाराजन्विनिघ्नंतःस्मतावकान् ॥ ४९ ॥ दृष्ट्वातुतानापततःसंप्रहृष्टान्महारथान् ॥ पराक्रांतास्ततोवीरानिराशाजीविततदा ॥ ५० ॥ विवर्णमुखभूयिष्ठमभवत्तावकंबलं ॥ परिक्षीणायुधान्दृष्ट्वातानहंपरिवारितान् ॥ ५१ ॥ राजन्बलेनव्यंगेनत्यक्त्वाजीवितमात्मनः ॥ आत्मनापंचमोयुद्ध्यंपांचालस्यबलेनह ॥ ५२ ॥

॥ ५३॥ ५४॥ ५५॥ ५६ ॥ ५७॥ ५८ ॥ ५९॥ ६०॥ ६१॥ ६२॥ ६३॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेपंचविंशोऽध्यायः ॥२५॥ ॥५॥ ॥५॥ गजानीकेइति ॥१॥

तस्मिन्देशेव्यवस्थाययत्रशारद्वतःस्थितः॥ संप्रद्रुतावयंपंचकिरीटिशरपीडिताः ॥ ५३ ॥ धृष्टद्युम्नंमहारौद्रंतत्रनाभूद्रणोमहान् ॥ जितास्तेनवयंसर्वेव्यपया
मरणात्ततः ॥ ५४ ॥ अथापश्यंसात्यकिंतमुपायातंमहारथं ॥ रथैश्चतुःशतैर्वीरोमामभ्यद्रवदाहवे ॥ ५५ ॥ धृष्टद्युम्नादहंमुक्तःकथंचिच्छ्रांतवाहनात् ॥ पतितो
माधवानीकंदुष्कृतीनरकंयथा ॥ ५६ ॥ तत्रयुद्धमभूद्घोरंमुहूर्त्तमतिदारुणं ॥ सात्यकिस्तुमहाबाहुर्ममहत्वापरिच्छदं ॥ ५७ ॥ जीवग्राहमगृह्णान्मांमूर्छितंपति
तंभुवि ॥ ततोमुहूर्त्तादिवतद्गजानीकमविध्यत ॥ ५८ ॥ गदयाभीमसेनेननाराचैरर्जुनेनच ॥ अभिपिष्टैर्महानागैःसमंतात्पर्वतोपमैः ॥ ५९ ॥ नातिप्रसिद्धै
वगतिःपांडवानामजायत ॥ रथमार्गंततश्चक्रेभीमसेनोमहाबलः ॥ ६० ॥ पांडवानांमहाराजव्यपाकर्षन्महागजान् ॥ अश्वत्थामाकृपश्चैवकृतवर्माचसात्व
तः ॥ ६१ ॥ अपश्यंतोरथानीकेदुर्योधनमरिंदमं ॥ राजानंमृगयामासुस्तवपुत्रंमहारथं ॥ ६२ ॥ परित्यज्यचपांचाल्यंप्रयातायत्रसौबलः ॥ राज्ञोदर्शनसंविग्ना
वर्त्तमानेजनक्षये ॥ ६३ ॥ इतिश्रीमहाभारतेशल्यपर्वणिदुर्योधनापयानेपंचविंशोऽध्यायः ॥ २५ ॥ ॥५॥ ॥५॥ संजयउवाच गजानी
केहतेतस्मिन्पांडुपुत्रेणभारत ॥ वध्यमानेबलेचैवभीमसेनेनसंयुगे ॥ १ ॥ चरंतंचतथादृष्ट्वाभीमसेनमरिंदमं ॥ दंडहस्तंयथाक्रुद्धमंतकंप्राणहारिणं ॥ २ ॥ स
मेत्यसमरेराजन्हतशेषाःसुतास्तव ॥ अदृश्यमानेकौरव्येपुत्रेदुर्योधनेतव ॥ ३ ॥ सोदर्याःसहिताभूत्वाभीमसेनमुपाद्रवन् ॥ दुर्मर्षणःश्रुतांतश्चजैत्रोभूरिब
लोरविः ॥ ४ ॥ जयत्सेनःसुजातश्चतथादुर्विषहोरिहा ॥ दुर्विमोचननामाचदुष्प्रधर्षस्तथैवच ॥ ५ ॥ श्रुतर्वाचमहाबाहुःसर्वेयुद्धविशारदाः ॥ इत्येतेसहिताभू
त्वातवपुत्राःसमंततः ॥ ६ ॥ भीमसेनमभिद्रुत्यरुरुधुःसर्वतोदिशं ॥ ततोभीमोमहाराजस्वरथंपुनरास्थितः ॥ ७ ॥ मुमोचनिशितान्बाणान्पुत्राणांतवमर्मसु ॥
तेकीर्यमाणाभीमेनपुत्रास्तवमहारणे ॥ ८ ॥ भीमसेनमुपासेदुःप्रवणादिवकुंजरं ॥ ततःक्रुद्धोरणेभीमःशिरोदुर्मर्षणस्यह ॥ ९ ॥ क्षुरप्रेणप्रमथ्याशुपातया
मासभूतले ॥ ततोपरेणभल्लेनसर्वावरणभेदिना ॥ १० ॥ श्रुतांतमवधीद्भीमस्तवपुत्रंमहारथः ॥ जयत्सेनंततोविध्वानाराचेनहसन्निव ॥ ११ ॥ पातयामास
कौरव्यंरथोपस्थादरिंदमः ॥ सपपातरथाद्राजन्भूमौतूर्णंममारच ॥ १२ ॥ श्रुतर्वातुततोभीमंक्रुद्धोविव्याधमारिष ॥ शतेनगृध्रवाजानांशराणांनतपर्वणां ॥
॥ १३ ॥ ततःक्रुद्धोरणेभीमोजैत्रंभूरिबलंरविं ॥ त्रीनेतांस्त्रिभिरानर्छद्विषाग्निप्रतिमैःशरैः ॥ १४ ॥ ॥२॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ १३॥ १४॥

॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

तेहतान्यपतन्भूमौस्यंदनेभ्योमहारथाः ॥ वसंतेपुष्पशबलानिकृत्ताइवाकिंशुकाः ॥ १५ ॥ ततोपरेणभल्लेनतीक्ष्णेनचपरंतपः ॥ दुर्विमोचनमाहत्यप्रेषयामास मृत्यवे ॥ १६ ॥ सहतःप्रापतद्भूमौस्वरथाद्रथिनांवरः ॥ गिरेस्तुकूटजोभग्नोमारुतेनेवपादपः ॥ १७ ॥ दुष्प्रधर्षंततश्चैवसुजातंचसुतंतव ॥ एकैकंन्यहनत्संख्येद्वाभ्यांद्वाभ्यांचमूमुखे॥१८॥तौशिलीमुखविद्धांगौपेततूरथसत्तमौ ॥ ततःपतंतंसमरेअभिवीक्ष्यसुतंतव ॥ १९ ॥ भल्लेनपातयामासभीमोदुर्विषहंरणे ॥ सपपातहतोवाहात्पश्यतांसर्वधन्विनां ॥ २० ॥ दृष्ट्वातुनिहतान्भ्रातॄन्बहूनेकेनसंयुगे ॥ अमर्षवशमापन्नःश्रुतर्वाभीममभ्ययात् ॥ २१ ॥ विक्षिपन्सुमहच्चापंकार्तस्वरविभूषितं ॥ विसृजन्सायकांश्चैवविषाग्निप्रतिमान्बहून् ॥ २२ ॥ सतुराजन्धनुश्छित्वापांडवस्यमहामृधे ॥ अथैनंछिन्नधन्वानंविंशत्यासमवाकिरत् ॥ २३ ॥ ततोन्यद्धनुरादायभीमसेनोमहाबलः ॥ अवाकिरत्तवसुतंतिष्ठतिष्ठेतिचाब्रवीत् ॥ २४ ॥ महदासीत्तयोर्युद्धंचित्ररूपंभयानकं ॥ यादृशंसमरेपूर्वंजंभवासवयोर्युधि ॥ २५ ॥ तयोस्तत्रशितैर्मुक्तैर्यमदंडनिभैःशरैः ॥ समाच्छन्नाधरासर्वाखंदिशोविदिशस्तथा ॥ २६ ॥ ततःश्रुतर्वासंक्रुद्धोधनुरादायसायकैः ॥ भीमसेनंरणेराजन्बाह्वोरुरसिचार्पयत् ॥ २७ ॥ सोतिविद्धोमहाराजतवपुत्रेणधन्विना ॥ भीमःसंचुक्षुभेक्रुद्धःपर्वणीवमहोदधिः ॥ २८ ॥ ततोभीमोरुषाविष्टःपुत्रस्यतवमारिष ॥ सारथिंचतुरश्चाश्वान्शरैर्निन्येयमक्षयं ॥ २९ ॥ विरथंतंसमालक्ष्यविशिखैर्लोमवाहिभिः ॥ अवाकिरदमेयात्मादर्शयन्पाणिलाघवं ॥ ३० ॥ श्रुतर्वाविरथोराजन्नाददेखड्गचर्मणी ॥ अथास्याददतःखड्गंशतचंद्रंचभानुमत् ॥ ३१ ॥ क्षुरप्रेणशिरःकायात्पातयामासपांडवः ॥ छिन्नोत्तमांगस्यततःक्षुरप्रेणमहात्मना ॥ ३२ ॥ पपातकायःसरथाद्वसुधामनुनादयन् ॥ तस्मिन्निपतितेवीरेतावकाभयमोहिताः ॥ ३३ ॥ अभ्यद्रवंतसंग्रामेभीमसेनंयुयुत्सवः ॥ तानापततएवाशुहतशेषाद्बलार्णवात् ॥ ३४ ॥ दंशितान्प्रतिजग्राहभीमसेनःप्रतापवान् ॥ तेतुतंवैसमासाद्यपरिवव्रुःसमंततः ॥ ३५ ॥ ततस्तुसंवृतोभीमस्तावकान्निशितैःशरैः ॥ पीडयामासतान्सर्वान्सहस्राक्षइवासुरान् ॥ ३६ ॥ ततःपंचशतान्हत्वासवरूथान्महारथान् ॥ जघानकुंजरानीकंपुनःसप्तशतंयुधि ॥ ३७ ॥ हत्वाशतसहस्राणिपत्तीनांपरमेषुभिः ॥ वाजिनांचशतान्यष्टौपांडवःस्मविराजते ॥ ३८ ॥ भीमसेनस्तुकौंतेयोहत्वायुद्धेसुतांस्तव ॥ मेनेकृतार्थमात्मानंसफलंजन्मचप्रभो ॥ ३९ ॥ तंतथायुध्यमानंचविनिघ्नंतंचतावकान् ॥ ईक्षितुंनोत्सहंतेस्मतवसैन्यानराधिप ॥ ४० ॥

॥ ४१ ॥ ४२ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेषड्विंशोऽध्यायः ॥ २६ ॥ ॥ ७ ॥ दुर्योधनइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

विद्राव्यचकुरून्सर्वांस्तांश्चहत्वापदानुगान् ॥ दोर्भ्यांशब्दंततश्चक्रेत्रासयानोमहाद्विपान् ॥ ४१ ॥ हतभूयिष्ठयोधातुतवसेनाविशांपते ॥ किंचिच्छेषामहाराज कृपणंसमपद्यत ॥ ४२ ॥ इतिश्रीमहाभारतेशल्यपर्वणिएकादशधार्तराष्ट्रवधेषड्विंशोऽध्यायः ॥ २६ ॥ ॥ ७ ॥ ॥ ७ ॥ संजयउवाच दुर्योधनो महाराजसुदर्शश्चापितेसुतः ॥ हतशेषौतदासंख्येवाजिमध्येव्यवस्थितौ ॥ १ ॥ ततोदुर्योधनंदृष्ट्वावाजिमध्येव्यवस्थितं ॥ उवाचदेवकीपुत्रःकुंतीपुत्रंधनंज यं ॥ २ ॥ शत्रवोहतभूयिष्ठाज्ञातयःपरिपालिताः ॥ गृहीत्वासंजयंचासौनिवृत्तःशिनिपुंगवः ॥ ३ ॥ परिश्रांतश्चनकुलःसहदेवश्चभारत ॥ योधयित्वारणेपा पान्धार्तराष्ट्रान्सहानुगान ॥ ४ ॥ दुर्योधनमभित्यज्यत्रयएतेव्यवस्थिताः ॥ कृपश्चकृतवर्माचद्रौणिश्चैवमहारथः ॥ ५ ॥ असौतिष्ठतिपांचाल्यःश्रियापरमयायु तः ॥ दुर्योधनबलंहत्वासहसर्वैःप्रभद्रकैः ॥ ६ ॥ असौदुर्योधनःपार्थवाजिमध्येव्यवस्थितः ॥ छत्रेणध्रियमाणेनप्रेक्षमाणोमुहुर्मुहुः ॥ ७ ॥ प्रतिव्यूह्यबलंसर्वं रणमध्येव्यवस्थितः ॥ एनंहत्वाशितैर्बाणैःकृतकृत्योभविष्यसि ॥ ८ ॥ गजानीकंहतंदृष्ट्वात्वांचप्राप्तमरिंदम ॥ यावन्नविद्रवंत्येतेतावज्जहिसुयोधनं ॥ ९ ॥ यातुकश्चित्तुपांचाल्यंक्षिप्रमागम्यतामिति ॥ परिश्रांतबलस्तातनैषमुच्येतकिल्बिषी ॥ १० ॥ हत्वातवबलंसर्वंसंग्रामेधृतराष्ट्रजः ॥ जितान्पांडुसुतान्मत्वारूपं धारयतेमहत् ॥ ११ ॥ निहतंस्वबलंदृष्ट्वापीडितंचापिपांडवैः ॥ ध्रुवमेष्यतिसंग्रामेवधायैवात्मनोनृपः ॥ १२ ॥ एवमुक्तःफाल्गुनस्तुकृष्णंवचनमब्रवीत् ॥ धृतरा ष्ट्रसुताःसर्वेहताभीमेनमाधव ॥ १३ ॥ यावेतावास्थितौकृष्णतावद्यनभविष्यतः ॥ हतोभीष्मोहतोद्रोणःकर्णोवैकर्त्तनोहतः ॥ १४ ॥ मद्रराजोहतःशल्योहतः कृष्णजयद्रथः ॥ हयाःपंचशताःशिष्टाःशकुनेःसौबलस्यच ॥ १५ ॥ रथानांतुशतेशिष्टेद्वेएवतुजनार्दन ॥ दंतिनांचशतंसाग्रंत्रिसाहस्राःपदातयः ॥ १६ ॥ अश्व त्थामाकृपश्चैवत्रिगर्ताधिपतिस्तथा ॥ उलूकःशकुनिश्चैवकृतवर्माचसात्वतः ॥ १७ ॥ एतद्बलमभूच्छेषंधार्त्तराष्ट्रस्यमाधव ॥ मोक्षोननूनंकालात्तुविद्यतेभुवि कस्यचित ॥ १८ ॥ तथाविनिहतेसैन्येपश्यदुर्योधनंस्थितं ॥ अद्याह्नाहिमहाराजोहतामित्रोभविष्यति ॥ १९ ॥ नहिमेमोक्ष्यतेकश्चित्परेषामिहचिंतये ॥ येत्व द्यसमरंकृष्णनहास्यंतिमदोत्कटाः ॥ २० ॥ तान्वैसर्वान्हनिष्यामियद्यपिस्युर्नमानुषाः ॥ अद्ययुद्धेसुसंक्रुद्धोदीर्घराज्ञःप्रजागरं ॥ २१ ॥ अपनेष्यामिगांधारं घातयित्वाशितैःशरैः ॥ निकृत्यावैदुराचारोयानिरत्नानिसौबलः ॥ २२ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

सभायामहरद्द्यूतेपुनस्तान्याहराम्यहं ॥ अद्यताअपिरोत्स्यंतिसर्वानागपुरस्त्रियः ॥ २३ ॥ श्रुत्वापतींश्चपुत्रांश्चपांडवैर्निहतान्युधि ॥ समाप्तमद्यवैकर्मसर्वंकृष्ण
भविष्यति ॥ २४ ॥ अद्यदुर्योधनोदीप्तांश्रियंप्राणांश्चमोक्ष्यति ॥ नापयातिभयात्कृष्णसंग्रामाद्यदिचेन्मम ॥ २५ ॥ निहतंविद्धिवार्ष्णेयधार्त्तराष्ट्रंसुबालिशं ॥
ममत्वेतद्दशक्यंवैवाजिवृंदमरिंदम ॥ २६ ॥ सोढुंज्यातलनिर्घोषंयाहियावन्निहन्म्यहं ॥ एवमुक्तस्तुदाशार्हःपांडवेनयशस्विना ॥ २७ ॥ अचोदयद्धयान्राजन्
दुर्योधनबलंप्रति ॥ तदनीकमभिप्रेक्ष्यत्रयःसज्जामहारथाः ॥ २८ ॥ भीमसेनोर्जुनश्चैवसहदेवश्चमारिष ॥ प्रययुःसिंहनादेनदुर्योधनजिघांसया ॥ २९ ॥ ता
न्प्रेक्ष्यसहितान्सर्वानजवेनोद्यतकार्मुकान् ॥ सौबलोभ्यद्रवद्युद्धेपांडवानाततायिनः ॥ ३० ॥ सुदर्शनस्तवसुतोभीमसेनंसमभ्ययात् ॥ सुशर्माशकुनिश्चैवयु
युधातेकिरीटिना ॥ ३१ ॥ सहदेवंतवसुतोहयपृष्ठगतोभ्ययात् ॥ ततोह्ययत्नतःक्षिप्रंतवपुत्रोजनाधिप ॥ ३२ ॥ प्रासेनसहदेवस्यशिरसिप्राहरद्भृशं ॥ सोपा
विशद्रथोपस्थेतवपुत्रेणताडितः ॥ ३३ ॥ रुधिराप्लुतसर्वांगआशीविषइवश्वसन् ॥ प्रतिलभ्यततःसंज्ञांसहदेवोविशांपते ॥ ३४ ॥ दुर्योधनंशरैस्तीक्ष्णैःसंक्रुद्धः
समवाकिरत् ॥ पार्थोपियुधिविक्रम्यकुंतीपुत्रोधनंजयः ॥ ३५ ॥ शूराणामश्वपृष्ठेभ्यःशिरांसिनिचकर्तह ॥ तदनीकंतदापार्थोव्यधमद्बहुभिःशरैः ॥ ३६ ॥ पा
तयित्वाहयान्सर्वांस्त्रिगर्त्तानांरथान्ययौ ॥ ततस्तेसहिताभूत्वात्रिगर्त्तानांमहारथाः ॥ ३७ ॥ अर्जुनंवासुदेवंचशरवर्षैरवाकिरन् ॥ सत्यकर्माणमाक्षिप्यक्षुरप्रेण
महायशाः ॥ ३८ ॥ ततोस्यस्यंदनस्येषांचिच्छिदेपांडुनंदनः ॥ शिलाशितेनचविभोक्षुरप्रेणमहायशाः ॥ ३९ ॥ शिरश्चिच्छेदसहसानसत्कुंडलभूषणं ॥ सत्येषु
मथचादत्तयोधानांमिषतांततः ॥ ४० ॥ यथासिंहोवनेराजन्मृगंपरिबुभुक्षितः ॥ तंनिहत्यततःपार्थःसुशर्माणंत्रिभिःशरैः ॥ ४१ ॥ विध्वातानहनत्सर्वानरथा
न्रुक्मविभूषितान् ॥ ततःप्रायात्त्वरन्पार्थोदीर्घकालंसुसंवृतं ॥ ४२ ॥ मुंचन्क्रोधविषंतीक्ष्णंप्रस्थलाधिपतिंप्रति ॥ तमर्जुनःपृषत्कानांशतेनभरतर्षभ ॥ ४३ ॥
पूरयित्वाततोवाहान्प्राहरत्तस्यधन्विनः ॥ ततःशरंसमादाययमदंडोपमंतदा ॥ ४४ ॥ सुशर्माणंसमुद्दिश्यचिक्षेपाशुहसन्निव ॥ सशरःप्रेषितस्तेनक्रोधदीप्तेन
धन्विना ॥ ४५ ॥ सुशर्माणंसमासाद्यबिभेदहृदयंरणे ॥ सगतासुर्महाराजपपातधरणीतले ॥ ४६ ॥ नंदयन्पांडवान्सर्वान्व्यथयंश्चापितावकान् ॥ सुशर्माणं
रणेहत्वापुत्रानस्यमहारथान् ॥ ४७ ॥ सप्तचाष्टौचत्रिंशच्चसायकैरनयत्क्षयं ॥ ततोस्यनिशितैर्बाणैःसर्वान्हत्वापदानुगान् ॥ ४८ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६॥५७॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ७ ॥ ॥ ७ ॥ तस्मिन्निति ॥ १ ॥ २ ॥३॥४॥

अभ्यगाद्वारतींसेनांहतशेषांमहारथः ॥ भीमस्तुसमरेक्रुद्धःपुत्रंतवजनाधिप ॥४९॥ सुदर्शनमदृश्यंतंशरैश्चक्रेहसन्निव ॥ ततोस्यप्रहसन्क्रुद्धःशिरःकायादपा
हरत् ॥५०॥ क्षुरप्रेणसुतीक्ष्णेनसहतःप्रापतद्भुवि ॥ तस्मिंस्तुनिहतेवीरेततस्तस्यपदानुगाः ॥५१॥ परिवव्रूरणेभीमंकिरंतोविविधान्शरान् ॥ ततस्तुनिशितै
र्बाणैस्तवानीकंवृकोदरः ॥५२॥ इंद्राशनिसमस्पर्शैःसमंतात्पर्यवाकिरत् ॥ ततःक्षणेनतद्भीमोन्यहनद्भरतर्षभ ॥ ५३ ॥ तेषुतून्माथ्यमानेषुसेनाध्यक्षामहार
थाः ॥ भीमसेनंसमासाद्यततोयुध्यंतभारत ॥५४॥ सतान्सर्वान्शरैर्घोरैरवाकिरतपांडवः ॥ तथैवतावकाराजन्पांडवेयान्महारथान ॥ ५५ ॥ शरवर्षेणमह
तासमंतात्पर्यवारयन् ॥ व्याकुलंतदभूत्सर्वंपांडवानांपरैःसह ॥ ५६ ॥ तावकानांचसमरेपांडवेयैर्युयुत्सतां ॥ तत्रयोधास्तदापेतुःपरस्परसमाहताः ॥ उभयोःसे
नयोराजन्संशोचंतःस्मबांधवान् ॥५७॥ इतिश्रीमहाभारतेशल्यपर्वणिसुशर्मवधेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ७ ॥ ॥ ७ ॥ संजयउवाच
तस्मिन्प्रवृत्तेसंग्रामेगजवाजिनरक्षये ॥ शकुनिःसौबलोराजन्सहदेवंसमभ्ययात् ॥ १ ॥ ततोस्यापततस्तूर्णंसहदेवःप्रतापवान् ॥ शरौघान्प्रेषयामासपतंगा
निवशीघ्रगान् ॥ २ ॥ उलूकश्चरणेभीमंविव्याधदशभिःशरैः ॥ शकुनिश्चमहाराजभीमंविद्ध्वात्रिभिःशरैः ॥ ३ ॥ सायकानांनवत्यावैसहदेवमवाकिरत् ॥ ते
शूराःसमरेराजन्समासाद्यपरस्परं ॥ ४ ॥ विव्यधुर्निशितैर्बाणैःकंकबर्हिणवाजितैः ॥ स्वर्णपुंखैःशिलाधौतैराकर्णप्रहितैःशरैः ॥ ५ ॥ तेषांचापभुजोत्सृष्टाशरवृ
ष्टिर्विशांपते ॥ आच्छादयद्दिशःसर्वाधाराइवपयोमुचः ॥ ६ ॥ ततःक्रुद्धोरणेभीमःसहदेवश्चभारत ॥ चेरतुःकदनंसंख्येकुर्वंतौसुमहाबलौ ॥ ७॥ ताभ्यांशरश
तैश्छन्नंतद्बलंतवभारत ॥ सांधकारमिवाकाशमभवत्तत्रतत्रह ॥ ८ ॥ अश्वैर्विपरिधावद्भिःशरच्छन्नैर्विशांपते ॥ तत्रतत्रकृतामार्गाविकर्षद्भिर्हतान्बहून् ॥ ९ ॥
निहतानांहयानांचसहैवहयसादिभिः ॥ वर्मभिर्विनिकृत्तैश्चप्रासैश्छिन्नैश्चमारिष ॥ १० ॥ ऋष्टिभिःशक्तिभिश्चैवसासिप्रासपरश्वधैः ॥ संछन्नापृथिवीजज्ञे
कुसुमैःशबलाइव ॥ ११ ॥ योधास्तत्रमहाराजसमासाद्यपरस्परं ॥ व्यचरंतरणेक्रुद्धाविनिघ्नंतःपरस्परं ॥ १२ ॥ उद्वृत्तनयनैरोषात्संदष्टौष्ठपुटैर्मुखैः ॥ सकुंडलै
र्मही्छन्नापद्मकिंजल्कसन्निभैः ॥ १३ ॥ भुजैश्छिन्नैर्महाराजनागराजकरोपमैः ॥ सांगदैःसतनुत्रैश्चसासिप्रासपरश्वधैः ॥ १४ ॥ कबंधैरुत्थितैश्छिन्नैर्नृत्य
द्भिश्चापरैर्युधि ॥ क्रव्यादगणसंछन्नाघोराभूत्पृथिवीविभो ॥ १५ ॥ ॥ ५ ॥ ६ ॥ रणेवीरशब्दविशिष्टे ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

अल्पावशिष्टसैन्यंतुकौरवेयान्महाहवे ॥ प्रहृष्टाःपांडवाभूत्वानिन्यिरेयमसादनं ॥ १६ ॥ एतस्मिन्नंतरेशूरःसौबलेयःप्रतापवान् ॥ प्रासेनसहदेवस्यशिरसि प्राहरदृशं ॥ १७ ॥ सविह्वलोमहाराजरथोपस्थउपाविशत् ॥ सहदेवंतथादृष्ट्वाभीमसेनःप्रतापवान् ॥ १८ ॥ सर्वसैन्यानिसंक्रुद्धोवारयामासभारत ॥ निर्बिभेदचनाराचैःशतशोथसहस्रशः ॥ १९ ॥ विनिर्भिद्याकरोच्चैवसिंहनादमरिंदमः ॥ तेनशब्देनवित्रस्ताःसर्वेसहयवारणाः ॥ २० ॥ प्राद्रवन्सहसाभीताःशकुनेश्चपदानुगाः ॥ प्रभग्नानथतान्दृष्ट्वाराजादुर्योधनोब्रवीत् ॥ २१ ॥ निवर्तध्वमधर्मज्ञायुध्यध्वंकिंसृतेनवः ॥ इहकीर्तिंसमाधायप्रेत्यलोकान्समश्नुते ॥ २२ ॥ प्राणानजहातियोधीरोयुद्धेपृष्ठमदर्शयन् ॥ एवमुक्तास्तुतेराज्ञासौबलस्यपदानुगाः ॥ २३ ॥ पांडवानभ्यवर्तंतमृत्युंकृत्वानिवर्तनं ॥ द्रवद्भिस्तत्रराजेंद्रकृतःशब्दोतिदारुणः ॥ २४ ॥ क्षुब्धसागरसंकाशाःक्षुभिताःसर्वतोभवन् ॥ तांस्ततःपुरतोदृष्ट्वासौबलस्यपदानुगान् ॥ २५ ॥ प्रत्युद्ययुर्महाराजपांडवाविजयोद्यताः ॥ प्रत्याश्वस्यचदुर्धर्षःसहदेवोविशांपते ॥ २६ ॥ शकुनिंदशभिर्विद्ध्वाहयांश्चास्यत्रिभिःशरैः ॥ धनुश्चिच्छेदचशरैःसौबलस्यहसन्निव ॥ २७ ॥ अथान्यद्धनुरादायशकुनिर्युद्धदुर्मदः ॥ विव्याधनकुलंषष्ट्याभीमसेनंचसप्तभिः ॥ २८ ॥ उलूकोपिमहाराजभीमंविव्याधसप्तभिः ॥ सहदेवंचसप्तत्यापरीप्सन्पितरंरणे ॥ २९ ॥ तंभीमसेनःसमरेविव्याधनवभिःशरैः ॥ शकुनिंचचतुःषष्ट्यापार्श्वस्थांश्चत्रिभिस्त्रिभिः ॥ ३० ॥ तेहन्यमानाभीमेननाराचैस्तैलपायितैः ॥ सहदेवंरणेक्रुद्धाश्छादयन्शरवृष्टिभिः ॥ ३१ ॥ पर्वतंवारिधाराभिःसविद्युतइवांबुदाः ॥ ततोस्यापततःशूरःसहदेवःप्रतापवान् ॥ ३२ ॥ उलूकस्यमहाराजभल्लेनापाहरच्छिरः ॥ सजगामरथाद्भूमिंसहदेवेनपातितः ॥ ३३ ॥ रुधिराप्लुतसर्वांगोनंदयन्पांडवान्युधि ॥ पुत्रंतुनिहतंदृष्ट्वाशकुनिस्तत्रभारत ॥ ३४ ॥ साश्रुकंठोविनिःश्वस्यक्षत्तुर्वाक्यमनुस्मरन् ॥ चिंतयित्वामुहूर्तंसबाष्पपूर्णेक्षणःश्वसन् ॥ ३५ ॥ सहदेवंसमासाद्यत्रिभिर्विव्याधसायकैः ॥ तानपास्यशरान्मुक्तान्शरसंघैःप्रतापवान् ॥ ३६ ॥ सहदेवोमहाराजधनुश्चिच्छेदसंयुगे ॥ छिन्नेधनुषिराजेंद्रशकुनिःसौबलस्तदा ॥ ३७ ॥ प्रगृह्यविपुलंखड्गंसहदेवायप्राहिणोत् ॥ तमापतंतंसहसाघोररूपंविशांपते ॥ ३८ ॥ द्विधाचिच्छेदसमरेसौबलस्यहसन्निव ॥ असिंदृष्ट्वातथाच्छिन्नंप्रगृह्यमहतींगदां ॥ ३९ ॥ प्राहिणोत्सहदेवायसामोघान्यपतद्भुवि ॥ ततःशक्तिंमहाघोरांकालरात्रीमिवोद्यतां ॥ ४० ॥ प्रेषयामाससंक्रुद्धःपांडवंप्रतिसौबलः ॥ तामापतंतींसहसाशरैःकनकभूषणैः ॥ ४१ ॥

॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥

त्रिधाचिच्छेदसमरेसहदेवोहसन्निव ॥ सापपातत्रिधाच्छिन्नाभूमौकनकभूषणा ॥ ४२ ॥ शीर्यमाणायथादीप्तागगनाद्वैशतह्रदा ॥ शक्तिंविनिहतांदृष्ट्वा
सौबलंचभयार्दितं ॥ ४३ ॥ दुद्रुवुस्तावकाःसर्वेभयेजातेससौबलाः ॥ अथोत्क्रुष्टंमहच्चासीत्पांडवैर्जितकाशिभिः ॥ ४४ ॥ धार्त्तराष्ट्रास्ततःसर्वेप्रायशोविमुखाभव
न् ॥ तान्वैविमनसोदृष्ट्वामाद्रीपुत्रःप्रतापवान् ॥ ४५ ॥ शरैरनेकसाहस्रैर्वारयामाससंयुगे ॥ ततोगांधारकैर्गुप्तंपुष्टैरश्वैर्जयेधृतं ॥ ४६ ॥ आससादरणेयांतंस
हदेवोथसौबलं ॥ स्वमंशमवशिष्टंतंसंस्मृत्यशकुनिंनृप ॥ ४७ ॥ रथेनकांचनांगेनसहदेवःसमभ्ययात् ॥ अधिज्यंबलवत्कृत्वाव्याक्षिपन्सुमहद्धनुः ॥ ४८ ॥ स
सौबलमभिद्रुत्यगार्ध्रपत्रैःशिलाशितैः ॥ भृशमभ्यहनत्क्रुद्धस्तोत्त्रैरिवमहाद्विपं ॥ ४९ ॥ उवाचचैनंमेधावीविगृह्यस्मारयन्निव ॥ क्षत्रधर्मेस्थिरोभूत्वायुध्य
स्वपुरुषोभव ॥ ५० ॥ यत्तदाहृष्यसेमूढग्लहन्नक्षैःसभातले ॥ फलमद्यप्रपश्यस्वकर्मणस्तस्यदुर्मते ॥ ५१ ॥ निहतास्तेदुरात्मानोयेस्मानवहसन्पुरा ॥ दुर्योध
नःकुलांगारःशिष्टस्त्वंचास्यमातुलः ॥ ५२ ॥ अद्यतेनिहनिष्यामिक्षुरेणोन्मथितंशिरः ॥ वृक्षात्फलमिवाविद्धंलगुडेनप्रमाथिना ॥ ५३ ॥ एवमुक्त्वामहाराजस
हदेवोमहाबलः ॥ संक्रुद्धोरणशार्दूलोवेगेनाभिजगामतं ॥ ५४ ॥ अभिगम्यसुदुर्धर्षःसहदेवोयुधांपतिः ॥ विकृष्यबलवच्चापंक्रोधेनप्रज्वलन्निव ॥ ५५ ॥ श
कुनिंदशभिर्विद्ध्वाचतुर्भिश्चास्यवाजिनः ॥ छत्रंध्वजंधनुश्चास्यछित्त्वासिंहइवानदत् ॥ ५६ ॥ छिन्नध्वजधनुश्छत्रःसहदेवेनसौबलः ॥ कृतोविद्धश्चबहुभिः
सर्वमर्मसुमार्गणैः ॥ ५७ ॥ ततोभूयोमहाराजसहदेवःप्रतापवान् ॥ शकुनेःप्रेषयामासशरवृष्टिंदुरासदां ॥ ५८ ॥ ततस्तुक्रुद्धःसुबलस्यपुत्रोमाद्रीसुतंसहदेवं
विमर्दे ॥ प्रासेनजांबूनदभूषणेनजिघांसुरेकोभिपपातशीघ्रं ॥ ५९ ॥ माद्रीसुतस्तस्यसमुद्यतंतंप्रासंसुवृत्तौचभुजौरणाग्रे ॥ भल्लैस्त्रिभिर्युगपत्संचकर्त्तनना
दचोच्चैस्तरसाजिमध्ये ॥ ६० ॥ तस्याशुकारीसुसमाहितेनसुवर्णपुंखेनदृढायसेन ॥ भल्लेनसर्वावरणातिगेनशिरःशरीरात्प्रममाथभूयः ॥ ६१ ॥ शरेणकार्त्त
स्वरभूषितेनदिवाकराभेणसुसंहितेन ॥ ह्रतोत्तमांगोयुधिपांडवेनपपातभूमौसुबलस्यपुत्रः ॥ ६२ ॥ सतच्छिरोवेगवताशरेणसुवर्णपुंखेनशिलाशितेन ॥ प्रावे
रयत्कुपितःपांडुपुत्रोयत्तत्कुरूणामनयस्यमूलं ॥ ६३ ॥ भुजौसुवृत्तौप्रचकर्त्तवीरःपश्चात्कबंधंरुधिरावसिक्तं ॥ विस्पंदमानंनिपपातघोरंरथोत्तमात्पार्थि
वपार्थिवस्य ॥ ६४ ॥ ह्रतोत्तमांगंशकुनिंसमीक्ष्यभूमौशयानंरुधिरार्द्रगात्रं ॥ योधास्त्वदीयाभयनष्टसत्त्वादिशःप्रजग्मुःप्रगृहीतशस्त्राः ॥ ६५ ॥

॥ ६६ ॥ ६७ ॥ ६८ ॥ इतिशल्यपर्वणिनैलकंठीयेभारतभावदीपेअष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ ७ ॥ ॥ ७ ॥ ततःक्रुद्धइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

प्रविद्रुताःशुष्कमुखाविसंज्ञागांडीवघोषेणसमाहताश्च ॥ भयार्दितामग्नरथाश्वनागाःपदातयश्चैवसधार्त्तराष्ट्राः ॥ ६६ ॥ ततोरथाच्छकुनिंपातयित्वामुदान्विताभारतपांडवेयाः ॥ शंखान्प्रदध्मुःसमरेनिहृष्टाःसकेशवाःसैनिकान्हर्षयंतः ॥ ६७ ॥ तंचापिसर्वेप्रतिपूजयंतोहृष्टाब्रुवाणाःसहदेवमाजौ ॥ दिष्ट्याहतोनैकृतिकोमहात्मासहात्मजोवीररणेत्वयेति ॥ ६८ ॥ इतिश्रीमहाभारतेशल्यपर्वणिशकुन्युलूकवधेअष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ अथह्रदप्रवेशपर्व ॥ संजयउवाच ततःक्रुद्धामहाराजसौबलस्यपदानुगाः ॥ त्यक्त्वाजीवितमाक्रंदेपांडवान्पर्यवारयन् ॥ १ ॥ तानर्जुनःप्रत्यगृह्णात्सहदेवजयेधृतः ॥ भीमसेनश्चतेजस्वीक्रुद्धाशीविषदर्शनः ॥ २ ॥ शक्त्यृष्टिप्रासहस्तानांसहदेवंजिघांसतां ॥ संकल्पमकरोन्मोघंगांडीवेनधनंजयः ॥ ३ ॥ संगृहीतायुधान्बाहून्योधानामभिधावतां ॥ भल्लैश्चिच्छेदबीभत्सुःशिरांस्यपिहयानपि ॥ ४ ॥ तेहयाःप्रत्यपद्यंतवसुधांविगतासवः ॥ चरतालोकवीरेणप्रहताःसव्यसाचिना ॥ ५ ॥ ततोदुर्योधनोराजादृष्ट्वास्वबलसंक्षयं ॥ हतशेषान्समानीयक्रुद्धोरथगणान्बहून् ॥ ६ ॥ कुंजरांश्चहयांश्चैवपादातांश्चसमंततः ॥ उवाचसहितान्सर्वान्धार्त्तराष्ट्रइदंवचः ॥ ७ ॥ समासाद्यरणेसर्वान्पांडवान्ससुहृद्गणान् ॥ पांचाल्यंचापिसबलंहत्वाशीघ्रंन्यवर्त्तत ॥ ८ ॥ तस्यतेशिरसागृह्यवचनंयुद्धदुर्मदाः ॥ अभ्युद्ययूरणेपार्थांस्तवपुत्रस्यशासनात् ॥ ९ ॥ तानभ्यापततःशीघ्रंहतशेषान्महारणे ॥ शरैराशीविषाकारैःपांडवाःसमवाकिरन् ॥ १० ॥ तत्सैन्यंभरतश्रेष्ठमुहूर्त्तेनमहात्मभिः ॥ अवध्यतरणंप्राप्यत्रातारंनाभ्यविंदत ॥ ११ ॥ प्रतिष्ठमानंतुभयान्नावतिष्ठतदंशितं ॥ अश्वैर्विपरिधावद्भिःसैन्येनरजसावृते ॥ १२ ॥ नप्राज्ञायंतसमरेदिशःसप्रदिशस्तथा ॥ ततस्तुपांडवानीकान्निःसृत्यबहवोजनाः ॥ १३ ॥ अभ्यघ्नंस्तावकान्युद्धेमुहूर्त्तादिवभारत ॥ ततोनिःशेषमभवत्तत्सैन्यंतवभारत ॥ १४ ॥ अक्षौहिण्यःसमेतास्तुतवपुत्रस्यभारत ॥ एकादशहतायुद्धेताःप्रभोपांडुसृंजयैः ॥ १५ ॥ तेषुराजसहस्रेषुतावकेषुमहात्मसु ॥ एकोदुर्योधनोराजन्नदृश्यतभृशंक्षतः ॥ १६ ॥ ततोवीक्ष्यदिशःसर्वादृष्ट्वाशून्यांचमेदिनीं ॥ विहीनःसर्वयोधैश्चपांडवान्वीक्ष्यसंयुगे ॥ १७ ॥ मुदितान्सर्वतःसिद्धान्नर्दमानान्समंततः ॥ बाणशब्दरवांश्चैवश्रुत्वातेषांमहात्मनां ॥ १८ ॥ दुर्योधनोमहाराजकश्मलेनाभिसंवृतः ॥ अपयानेमनश्चक्रेविहीनबलवाहनः ॥ १९ ॥ धृतराष्ट्रउवाच निहतेमामकेसैन्येनिःशेषेशिबिरेकृते ॥ पांडवानांबलेसूतकिंनुशेषमभूत्तदा ॥ २० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५॥४६॥

एतन्मेपृच्छतोब्रूहिकुशलोह्यसिसंजय ॥ यच्चदुर्योधनोमंदःकृतवांस्तनयोमम ॥ २१ ॥ बलक्षयंतथादृष्ट्वासएकःपृथिवीपतिः ॥ संजयउवाच रथानां द्विसहस्रेतुसप्तनागशतानिच ॥ २२ ॥ पंचचाश्वसहस्राणिपत्तीनांचशतंशताः ॥ एतच्छेषमभूद्राजन्पांडवानांमहद्बलं ॥ २३ ॥ परिगृह्यहियद्युद्धेधृष्टद्युम्नोव्यवस्थितः ॥ एकाकीभरतश्रेष्ठततोदुर्योधनोनृपः ॥ २४ ॥ नापश्यत्समरेकंचित्सहायंरथिनांवरः ॥ नर्दमानान्परान्दृष्ट्वास्वबलस्यचसंक्षयं ॥ २५ ॥ तथादृष्ट्वामहाराजएकःसपृथिवीपतिः ॥ हतंस्वहयमुत्सृज्यप्राङ्मुखःप्राद्रवद्भयात् ॥ २६ ॥ एकादशचमूभर्तापुत्रोदुर्योधनस्तव ॥ गदामादायतेजस्वीपदातिःप्रस्थितोह्रदं ॥ २७ ॥ नातिदूरंततोगत्वापद्भ्यामेवनराधिपः ॥ सस्मारवचनंक्षत्तुर्धर्मशीलस्यधीमतः ॥ २८ ॥ इदंनूनंमहाप्राज्ञोविदुरोदृष्टवान्पुरा ॥ महद्वैशसमस्माकंक्षत्रियाणांचसंयुगे ॥ २९ ॥ एवंविचिंतयानस्तुप्रविविक्षुर्ह्रदंनृपः ॥ दुःखसंतप्तहृदयोदृष्ट्वाराजन्बलक्षयं ॥ ३० ॥ पांडवास्तुमहाराजधृष्टद्युम्नपुरोगमाः ॥ अभ्यद्रवंतसंक्रुद्धास्तवराजन्बलंप्रति ॥ ३१ ॥ शक्त्यृष्टिप्रासहस्तानांबलानामभिगर्जतां ॥ संकल्पमकरोन्मोघंगांडीवेनधनंजयः ॥ ३२ ॥ तान्हत्वानिशितैर्बाणैःसामात्यान्सहबंधुभिः ॥ रथेश्वेतहयेतिष्ठन्नर्जुनोबहुशोभत ॥ ३३ ॥ सुबलस्यहतेपुत्रेसवाजिरथकुंजरे ॥ महावनमिवच्छिन्नमभवत्तावकंबलं ॥ ३४ ॥ अनेकशतसाहस्रेबलेदुर्योधनस्यह ॥ नान्योमहारथोराजन्जीवमानोव्यदृश्यत ॥ ३५ ॥ द्रोणपुत्रादृतेवीरात्तथैवकृतवर्मणः ॥ कृपाच्चगौतमाद्राजन्पार्थिवाच्चतवात्मजात् ॥ ३६ ॥ धृष्टद्युम्नस्तुमांदृष्ट्वाहसन्सात्यकिमब्रवीत् ॥ किमनेनगृहीतेननानेनार्थोस्तिजीवता ॥ ३७ ॥ धृष्टद्युम्नवचःश्रुत्वाशिनेर्नप्तामहारथः ॥ उद्यम्यनिशितंखड्गंहंतुंमामुद्यतस्तदा ॥ ३८ ॥ तमागम्यमहाप्राज्ञःकृष्णद्वैपायनोब्रवीत् ॥ मुच्यतांसंजयोजीवन्नहंतव्यःकथंचन ॥ ३९ ॥ द्वैपायनवचःश्रुत्वाशिनेर्नप्ताकृतांजलिः ॥ ततोमामब्रवीन्मुक्त्वास्वस्तिसंजयसाधय ॥ ४० ॥ अनुज्ञातस्त्वहंतेनन्यस्तवर्मानिरायुधः ॥ प्रातिष्ठंयेननगरंसायाह्नेरुधिरोक्षितः ॥ ४१ ॥ क्रोशमात्रमपक्रांतंगदापाणिमवस्थितं ॥ एकंदुर्योधनंराजन्नपश्यंभृशविक्षतं ॥ ४२ ॥ सतुमामश्रुपूर्णाक्षोनाशक्नोदभिवीक्षितुं ॥ उपप्रैक्षतमांदृष्ट्वातथादीनमवस्थितं ॥ ४३ ॥ तंचाहमपिशोचंतंदृष्ट्वैकाकिनमाहवे ॥ मुहूर्त्तनाशकंवक्तुमतिदुःखपरिप्लुतः ॥ ४४ ॥ ततोस्मैतदहंसर्वमुक्तवान्ग्रहणंतदा ॥ द्वैपायनप्रसादाच्चजीवतोमोक्षमाहवे ॥ ४५ ॥ समुहूर्त्तमिवध्यात्वाप्रतिलभ्यचचेतनां ॥ भ्रातॄंश्चसर्वसैन्यानिपर्यपृच्छतमांततः ॥ ४६ ॥

॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

इतिप्रस्थानकालेमां
तस्मिनद्दहमाचक्षेमर्वंप्रत्यक्षदर्शिवान् ॥ भ्रातृंश्चनिहतान्सर्वान्सैन्यंचविनिपातितं ॥ ४७॥ त्रयःकिलरथाःशिष्टास्तावकानांनराधिप ॥
कृष्णद्वैपायनोब्रवीत ॥ ४८॥ सदीर्घमिवनिःश्वस्यप्रत्यवेक्ष्यपुनःपुनः ॥ असौमांपाणिनास्पृष्ट्वापुत्रस्तेपर्यभाषत ॥ ४९ ॥ त्वदन्योनेहसंग्रामेकश्चिज्जीवति
संजय॥ द्वितीयंनेहपश्यामिससहायाश्चपांडवाः॥ ५०॥ ब्रूयाःसंजयराजानंप्रज्ञाचक्षुषमीश्वरं॥ दुर्योधनस्तवसुतःप्रविष्टोह्रदमित्युत॥ ५१ ॥ सुहृद्भिस्तादृ
शैर्हीनःपुत्रैर्भ्रातृभिरेवच॥पांडवैश्चहृतेराज्येकोनुजीवेतमादृशः॥ ५२॥ आचक्षीथाःसर्वमिदंमांचमुक्तंमहाहवात् ॥ अस्मिंस्तोयह्रदेगुप्तंजीवंतंभृशविक्ष
तं॥ ५३॥ एवमुक्त्वामहाराजप्राविशत्तंमहाह्रदं ॥ अस्तंभयततोयंचमाययामनुजाधिपः॥ ५४॥ तस्मिन्ह्रदंप्रविष्टेतुत्रीन्रथान्श्रांतवाहनान् ॥ अपश्यंस
हितानेकस्तंदेशंसमुपेयुषः॥ ५५॥ कृपंशारद्वतंवीरंद्रौणिंचरथिनांवरं ॥भोजंचकृतवर्माणंसहितान्शरविक्षतान् ॥ ५६॥ तेमर्वेमामभिप्रेक्ष्यतूर्णमश्वाननो
दयन्॥ उपयायतुमामूचुर्दिष्ट्याजीवसिसंजय॥ ५७॥ अपृच्छंश्चैवमांसर्वेपुत्रंतवजनाधिपं॥ कच्चिद्दुर्योधनोराजासनोजीवतिसंजय॥ ५८॥ आख्यातवा
नहंतेभ्यस्तदाकुशलिनंनृपं॥ तच्चैवसर्वमाचक्षंयन्मांदुर्योधनोब्रवीत् ॥ ५९ ॥ ह्रदंचैवाहमाचक्षंयंप्रविष्टोनराधिपः ॥ अश्वत्थामातुतद्राजन्निशम्यवचनंम
म ॥ ६० ॥ तंह्रदंविपुलंप्रेक्ष्यकरुणंपर्यदेवयत् ॥ अहोधिक्सनजानातिजीवतोस्मान्नराधिपः ॥ ६१ ॥ पर्याप्ताहिवयंतेनसहयोधयितुंपरान्॥ तेतुतत्रचिरंका
लंविलप्यचमहारथाः॥ ६२॥ प्राद्रवन्रथिनांश्रेष्ठादृष्ट्वापांडुसुतान्रणे ॥ तेतुमांरथमारोप्यकृपस्यसुपरिष्कृतं ॥ ६३ ॥ सेनानिवेशमाजग्मुर्हतशेषास्त्रयोर
थाः॥ तत्रगुल्माःपरित्रस्ताःसूर्येचास्तमितेसति॥ ६४॥ सर्वेविचुक्रुशुःश्रुत्वापुत्राणांतवसंक्षयं ॥ ततोवृद्धामहाराजयोषितांरक्षिणोनराः॥ ६५॥ राजदारा
नुपादायप्रययुर्नगरंप्रति॥ तत्रविक्रोशमानानांरुदतीनांचसर्वशः ॥ ६६॥ प्रादुरासीन्महान्शब्दःश्रुत्वातद्बलसंक्षयं ॥ ततस्तायोषितोराजन्रुदत्योवैमुहुर्मु
हुः॥ ६७॥ कुरर्यइवशब्देननादयंत्योमहीतलं॥ आजघ्नुःकरजैश्चापिपाणिभिश्चशिरांस्युत॥ ६८॥ लुलुचुश्चतदाकेशान्क्रोशंत्यस्तत्रतत्रह॥ हाहाकारविना
दिन्योविनिघ्नंत्यउरांसिच॥ ६९॥ शोचंत्यस्तत्ररुरुदुःक्रंदमानाविशांपते॥ ततोदुर्योधनामात्याःसाश्रुकंठाभृशातुराः॥ ७०॥राजदारानुपादायप्रययुर्नगरंप्र
ति॥ वेत्रव्यासक्तहस्ताश्चद्वाराध्यक्षाविशांपते॥ ७१ ॥

॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥

शयनीयानिशुभ्राणिस्पर्ध्यस्तरणवंतिच ॥ समादायययुस्तूर्णंनगरंदाररक्षिणः ॥ ७२ ॥ आस्थायाश्वतरीयुक्तान्स्यंदनानपरेपुनः ॥ स्वान्स्वान्दारानुपादाय
प्रययुर्नगरंप्रति ॥ ७३ ॥ अदृष्टपूर्वायानार्योभास्करेणापिवेश्मसु ॥ ददृशुस्तामहाराजजनायाताःपुरंप्रति ॥ ७४ ॥ ताःस्त्रियोभरतश्रेष्ठसौकुमार्यसमन्विताः॥
प्रययुर्नगरंतूर्णंहतस्वजनबांधवाः ॥ ७५ ॥ आगोपालाविपालेभ्योद्रवंतोनगरंप्रति ॥ ययुर्मनुष्याःसंभ्रांताभीमसेनभयार्दिताः ॥ ७६ ॥ अपिचैषांभयंतीव्रंपा
र्थेभ्योभूत्सुदारुणं ॥ प्रेक्षमाणास्तदान्योन्यमाधावन्नगरंप्रति ॥ ७७ ॥ तस्मिंस्तथावर्त्तमानेविद्रवेभृशदारुणे ॥ युयुत्सुःशोकसंमूढःप्राप्तकालमचिंतय
त् ॥ ७८ ॥ जितोदुर्योधनःसंख्येपांडवैर्भीमविक्रमैः ॥ एकादशचमूभर्त्ताभ्रातरश्चास्यसूदिताः ॥ ७९ ॥ हताश्चकुरवःसर्वेभीष्मद्रोणपुरःसराः ॥ अहमेकोविमु
क्तस्तुभाग्ययोगाद्यदृच्छया ॥ ८० ॥ विद्रुतानिचसर्वाणिशिबिराणिसमंततः ॥ इतस्ततःपलायंतेहतनाथाहतौजसः ॥ ८१ ॥ अदृष्टपूर्वादुःखार्त्ताभयव्याकुल
लोचनाः ॥ हरिणाइवचित्रस्तावीक्षमाणादिशोदश ॥ ८२ ॥ दुर्योधनस्यसचिवायेकेचिदवशेषिताः ॥ राजदारानुपादायप्रययुर्नगरंप्रति ॥ ८३ ॥ प्राप्तकाल
महंमन्येप्रवेशंतैःसहप्रभो ॥ युधिष्ठिरमनुज्ञायभीमसेनंतथैवच ॥ ८४ ॥ एतमर्थंमहाबाहुरुभयोःसन्यवेदयत् ॥ तस्यप्रीतोभवद्राजानित्यंकरुणवेदिता ॥
॥ ८५ ॥ परिष्वज्यमहाबाहुर्वैश्यापुत्रंव्यसर्जयत् ॥ ततःसरथमास्थायद्रुतमश्वानचोदयत् ॥ ८६ ॥ संवाहयितवांश्चापिराजदारान्पुरंप्रति ॥ तैश्चैवसहितःक्षिप्र
मस्तंगच्छतिभास्करे ॥ ८७ ॥ प्रविष्टोहास्तिनपुरंबाष्पकंठोश्रुलोचनः ॥ अपश्यतमहाप्राज्ञंविदुरंसाश्रुलोचनं ॥ ८८ ॥ राज्ञःसमीपान्निष्क्रांतंशोकोपहतचेत
सं ॥ तमब्रवीत्सत्यधृतिःप्रणतंत्वग्रतःस्थितं ॥ ८९ ॥ दिष्ट्याकुरुक्षयेवृत्ते अस्मिंस्त्वंपुत्रजीवसि ॥ विनाराज्ञःप्रवेशाद्वैकिमसित्वमिहागतः ॥ ९० ॥ एतद्वैकार
णंसर्वंविस्तरेणनिवेदय ॥ युयुत्सुरुवाच निहतेशकुनौतत्रसज्ञातिसुतबांधवे ॥ ९१ ॥ हतशेषपरीवारोराजादुर्योधनस्ततः ॥ स्वकंसहयमुत्सृज्यप्राङ्मु
खःप्राद्रवद्भयात् ॥ ९२ ॥ अपक्रांतेतुनृपतौस्कंधावारनिवेशनात् ॥ भयव्याकुलितंसर्वंप्राद्रवन्नगरंप्रति ॥ ९३ ॥ ततोराज्ञःकलत्राणिभ्रातॄणांचास्यसर्वतः ॥
वाहनेषुसमारोप्यअध्यक्षाःप्राद्रवन्भयात् ॥ ९४ ॥ ततोहंसमनुज्ञाप्यराजानंसहकेशवं ॥ प्रविष्टोहास्तिनपुरंरक्षंल्लोकान्प्रधाविनान् ॥ ९५ ॥ एतच्छ्रुत्वातुवच
नंवैश्यापुत्रेणभाषितं ॥ प्राप्तकालमितिज्ञात्वाविदुरःसर्वधर्मवित् ॥ ९६ ॥

अपूजयदमेयात्मायुयुत्सुंवाक्यमब्रवीत् ॥ प्राप्तकालमिदंसर्वंब्रुवताभरतक्षये ॥ ९७ ॥ रक्षितःकुलधर्मश्चसानुक्रोशतयात्वया ॥ दिष्ट्यात्वामिहसंग्रामाद
स्माद्वीरक्षयात्पुरं ॥ ९८ ॥ समागतमपश्यामत्यंशुमंतमिवप्रजाः ॥ अंधस्यनृपतेर्यष्टिर्लुब्धस्यादीर्घदर्शिनः ॥ ९९ ॥ बहुशोयाच्यमानस्यदैवोपहतचेतसः ॥
त्वमेकोव्यसनार्त्तस्यध्रियसेपुत्रसर्वथा ॥ १०० ॥ अद्यत्वमिहविश्रांतःश्वोभिगंतायुधिष्ठिरं ॥ एतावदुक्त्वावचनंविदुरःसाश्रुलोचनः ॥ १ ॥ युयुत्सुंसमनुप्रा
प्यप्रविवेशनृपक्षयं ॥ पौरजानपदैर्दुःखाद्धाहेतिभृशनादितं ॥ २ ॥ निरानंदंगतश्रीकंहतारामभिवाशयं ॥ शून्यरूपमपध्वस्तंदुःखाद्दुःखतरोभवत् ॥ ३ ॥ वि
दुरःसर्वधर्मज्ञोविक्लवेनांतरात्मना ॥ विवेशनगरेराजन्निशश्वासशनैःशनैः ॥ ४ ॥ युयुत्सुरपितांरात्रिंस्वगृहेन्यवसत्तदा ॥ वंद्यमानःस्वकैश्चापिनाभ्यनंदत्सुदुः
खितः ॥ चिंतयानःक्षयंतीव्रंभरतानांपरस्परं ॥ १०५ ॥ इतिश्रीमहाभारतेशल्यपर्वणिह्रदप्रवेशपर्वणिएकोनत्रिंशोऽध्यायः ॥ २९ ॥ समाप्तं
चह्रदप्रवेशपर्व ॥ अतःपरंगदायुद्धपर्व ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

हतेषुसर्वसैन्येषुपांडुपुत्रैरणाजिरेइत्यारभ्यशोकसंविग्नमनसश्चिंताध्यानपराभवन्नित्यंतःशल्यपर्वशेषोगदापर्वाख्यस्तस्यतात्पर्यंसर्वनाशेपिजीवितंदुस्त्यजंपराभूतमपिशत्रुंशूरानत्यजंतीतिच ॥ १ ॥ २ ॥ ३ ॥

धृतराष्ट्रउवाच हतेषुसर्वसैन्येषुपांडुपुत्रैरणाजिरे ॥ ममसैन्यावशिष्टास्तेकिमकुर्वतसंजय ॥ १ ॥ कृतवर्माकृपश्चैवद्रोणपुत्रश्चवीर्यवान् ॥ दुर्योधनश्चमंदात्मा राजाकिमकरोत्तदा ॥ २ ॥ संजयउवाच संप्राद्रवत्सुदारेषुक्षत्रियाणांमहात्मनां ॥ विद्रुतेशिविरेशून्येभृशोद्विग्नास्त्रयोरथाः ॥ ३ ॥ निशम्यपांडुपुत्राणांतदाविजयिनांस्वनं ॥ विद्रुतंशिविरंदृष्ट्वासायाह्नेराजगृद्धिनः ॥ ४ ॥ स्थानंनारोचयंस्तत्रततस्तेह्रदमभ्ययुः ॥ युधिष्ठिरोपिधर्मात्माभ्रातृभिःसहितोरणे ॥ ५ ॥ हृष्टःपर्यचरद्राजनदुर्योधनवधेप्सया ॥ मार्गमाणास्तुसंक्रुद्धास्तवपुत्रंजयैषिणः ॥ ६ ॥ यत्नतोन्वेषमाणास्तेनैवापश्यन्जनाधिपं ॥ सहितीव्रणवेगेनगदापाणिरपाक्रमत् ॥ ७ ॥ तंह्रदंप्राविशच्चापिविष्टभ्यापःस्वमायया ॥ यदातुपांडवाःसर्वेसुपरिश्रांतवाहनाः ॥ ८ ॥ ततःस्वशिविरंप्राप्यव्यतिष्ठंतस्वसैनिकाः ॥ ततःकृपश्चद्रौणिश्चकृतवर्माचसात्वतः ॥ ९ ॥ सन्निविष्टेषुपार्थेषुप्रयातास्तंह्रदंशनैः ॥ तेतंह्रदंसमासाद्ययत्रशेतेजनाधिपः ॥ १० ॥ अभ्यभाषंतदुर्धर्षराजानंसुप्तमंभसि ॥ राजन्नुत्तिष्ठयुध्यस्वसहास्माभिर्युधिष्ठिरं ॥ ११ ॥ जित्वावापृथिवींभुंक्ष्वहतोवास्वर्गमाप्नुहि ॥ तेषामपिबलंसर्वंहतंदुर्योधनत्वया ॥ १२ ॥ प्रतिविद्धाश्चभूयिष्ठंयेशिष्टास्तत्रसैनिकाः ॥ नतेवेगंविषहितुंशक्तास्तवविशांपते ॥ १३ ॥ अस्माभिरपिगुप्तस्यतस्मादुत्तिष्ठभारत ॥ दुर्योधनउवाच दिष्ट्यापश्यामिवोमुक्तानीदृशात्पुरुषक्षयात् ॥ १४ ॥ पांडुकौरवसंमर्दाज्जीवमानान्नरर्षभान् ॥ विजेष्यामोवयंसर्वेविश्रांताविगतक्लमाः ॥ १५ ॥ भवंतश्चपरिश्रांतावयंचभृशविक्षताः ॥ उदीर्णंचबलंतेषांतेनयुद्धंनरोचये ॥ १६ ॥ नत्वेतदद्भुतंवीरायद्वोमहदिदंमनः ॥ अस्मासुचपराशक्तिर्नतुकालःपराक्रमे ॥ १७ ॥ विश्रम्यैकांनिशामद्यभवद्भिःसहितोरणे ॥ प्रतियोत्स्याम्यहंशत्रूनश्वोनमेस्त्यत्रसंशयः ॥ १८ ॥ संजयउवाच. एवमुक्तोब्रवीद्द्रौणीराजानंयुद्धदुर्मदं ॥ उत्तिष्ठराजन्भद्रंतेविजेष्यामोवयंपरान् ॥ १९ ॥ इष्टापूर्तेनदानेनसत्येनचजयेनच ॥ शपेराजन्यथाह्यद्यनिहनिष्यामिसोमकान् ॥ २० ॥ मास्मयज्ञकृतांप्रीतिमाप्नुयांसज्जनोचितां ॥ यदीमांरजनींव्युष्टांनहिहन्मिपरान्रणे ॥ २१ ॥ नाहत्वासर्वपांचालान्विमोक्ष्येकवचंविभो ॥ इतिसत्यंब्रवीम्येतत्तन्मेशृणुजनाधिप ॥ २२ ॥ तेषुसंभाषमाणेषुव्याधास्तंदेशमाययुः ॥ मांसभारपरिश्रांताःपानीयार्थंयदृच्छया ॥ २३ ॥ तेहिनित्यंमहाराजभीमसेनस्यलुब्धकाः ॥ मांसभारानुपाजह्रुर्भक्त्यापरमयाविभो ॥ २४ ॥

॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ यज्ञकृतांप्रीतियज्ञादिजस्यपुण्यस्यफलं ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१॥३२॥३३॥३४॥३५॥३६॥३७॥ नष्टंअदृश्यत्वंगतंलीनमित्यर्थः ॥३८॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥४८ ॥ ४९ ॥ ५० ॥

तेनत्रधिष्ठितास्तेषांसर्वंतद्वचनंरहः ॥ दुर्योधनवचश्चैवशुश्रुवुःसंगतामिथः ॥ २५ ॥ तेपिसर्वेमहेष्वासाअयुद्धार्थिनिकौरवे ॥ निर्बंधंपरमंचक्रुस्तदावैयुद्ध
कांक्षिणः ॥ २६ ॥ तांस्तथासमुदीक्ष्याथकौरवाणांमहारथान् ॥ अयुद्धमनसंचैवराजानंस्थितमंभसि ॥ २७ ॥ तेषांश्रुत्वाचसंवादंराज्ञश्चसलिलेसतः ॥ व्याधा
भ्यजानन्राजेंद्रसलिलस्थंसुयोधनं ॥ २८ ॥ तेपूर्वंपांडुपुत्रेणपृष्टाह्यासन्सुतंतव ॥ यदृच्छोपगतास्तत्रराजानंपरिमार्गता ॥ २९ ॥ ततस्तेपांडुपुत्रस्यस्मृत्वात
द्भाषितंतदा ॥ अन्योन्यमब्रुवन्राजन्मृगव्याधाःशनैरिव ॥ ३० ॥ दुर्योधनंख्यापयामोधनंदास्यतिपांडवः ॥ अव्यक्तमिहनःख्यातोह्रदेदुर्योधनोनृपः ॥ ३१ ॥
तस्माद्गच्छामहेसर्वेयत्रराजायुधिष्ठिरः ॥ आख्यातुंसलिलेसुप्तंदुर्योधनममर्षणं ॥ ३२ ॥ धृतराष्ट्रात्मजंतस्मैभीमसेनायधीमते ॥ शयानंसलिलेसर्वेकथयामो
धनुर्भृते ॥ ३३ ॥ सनोदास्यतिसुप्रीतोधनानिबहुलान्युत ॥ किंनोमांसेनशुष्केणपरिक्लिष्टेनशोषिणा ॥ ३४ ॥ एवमुक्त्वातुतेव्याधाःसंप्रहृष्टाधनार्थिनः ॥ मांस
भारानुपादायप्रययुःशिबिरंप्रति ॥ ३५ ॥ पांडवापिमहाराजलब्धलक्षाःप्रहारिणः ॥ अपश्यमानाःसमरेदुर्योधनमवस्थितं ॥ ३६ ॥ निकृतेस्तस्यपापस्यतेपारं
गमनेप्सवः ॥ चारान्संप्रेषयामासुःसमंतात्तद्रणाजिरे ॥ ३७ ॥ आगम्यतुततःसर्वेनष्टंदुर्योधनंनृपं ॥ न्यवेदयंतसहिताधर्मराजस्यसैनिकाः ॥ ३८ ॥ तेषांतद्वच
नंश्रुत्वाचाराणांभरतर्षभ ॥ चिंतामभ्यगमत्तीव्रांनिशश्वासचपार्थिवः ॥ ३९ ॥ अथस्थितानांपांडूनांदीनानांभरतर्षभ ॥ तस्माद्देशादपक्रम्यत्वरितालुब्धका
विभो ॥ ४० ॥ आजग्मुःशिबिरंहृष्टादृष्ट्वादुर्योधनंनृपं ॥ वार्यमाणाःप्रविष्टाश्चभीमसेनस्यपश्यतः ॥ ४१ ॥ तेतुपांडवमासाद्यभीमसेनंमहाबलं ॥ तस्मैतत्सर्व
माचख्युर्यद्वृत्तंयच्चवैश्रुतं ॥ ४२ ॥ ततोवृकोदरोराजन्दत्वातेषांधनंबहु ॥ धर्मराजायतत्सर्वमाचचक्षेपरंतपः ॥ ४३ ॥ असौदुर्योधनोराजन्विज्ञातोममलु
ब्धकैः ॥ संस्तभ्यसलिलंशेतेयस्यार्थेपरितप्यसे ॥ ४४ ॥ तद्वचोभीमसेनस्यप्रियंश्रुत्वाविशांपते ॥ अजातशत्रुःकौंतेयोहृष्टोभूत्सहसोदरैः ॥ ४५ ॥ तंचश्रुत्वाम
हेष्वासंप्रविष्टंसलिलह्रदे ॥ क्षिप्रमेवततोऽगच्छत्पुरस्कृत्यजनार्दनं ॥ ४६ ॥ ततःकिलकिलाशब्दःप्रादुरासीद्विशांपते ॥ पांडवानांप्रहृष्टानांपंचालानांचसर्व
शः ॥ ४७ ॥ सिंहनादांस्ततश्चक्रुःक्ष्वेडाश्चभरतर्षभ ॥ त्वरिताःक्षत्रियाराजन्जग्मुर्द्वैपायनंह्रदं ॥ ४८ ॥ ज्ञातःपापोधार्तराष्ट्रोदृष्टश्चेत्यसकृद्रणे ॥ प्राक्रोशन्सो
मकास्तत्रहृष्टरूपाःसमंततः ॥ ४९ ॥ तेषामाशुप्रयातानांरथानांतत्रवेगिनां ॥ बभूवतुमुलःशब्दोदिवस्पृक्पृथिवीपते ॥ ५० ॥

॥५१॥५२॥५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥५९॥ ६० ॥ ६१ ॥ अपयास्यामहेत्वदन्वेषणभिया ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ इतिश्रीशल्यपर्वांतर्गतगदापर्वणि

दुर्योधनंपरीप्संतस्तत्रतत्रयुधिष्ठिरं ॥ अन्वयुस्त्वरितास्तेवैराजानंश्रांतवाहनाः ॥ ५१ ॥ अर्जुनोभीमसेनश्चमाद्रीपुत्रौचपांडवौ ॥ धृष्टद्युम्नश्चपांचाल्यःशिखंडी चापराजितः ॥ ५२ ॥ उत्तमौजायुधामन्युःसात्यकिश्चमहारथः ॥ पंचालानांचयेशिष्टाद्रौपदेयाश्चभारत ॥ ५३ ॥ हयाश्चसर्वेनागाश्चशतशश्चपदातयः ॥ ततः प्राप्तोमहाराजधर्मराजःप्रतापवान् ॥ ५४ ॥ द्वैपायनह्रदंघोरंयत्रदुर्योधनोभवत् ॥ शीतामलजलंहृद्यंद्वितीयमिवसागरं ॥ ५५ ॥ माययासलिलंस्तभ्ययत्रा भूत्तेस्थितःसुतः ॥ अत्यद्भुतेनविधिनादैवयोगेनभारत ॥ ५६ ॥ सलिलांतर्गतःशेतेदुर्दर्शःकस्यचित्प्रभो ॥ मानुषस्यमनुष्येंद्रगदाहस्तोजनाधिपः ॥ ५७ ॥ त तोदुर्योधनोराजासलिलांतर्गतोवसन् ॥ शुश्रुवेतुमुलंशब्दंजलदोपमनिःस्वनं ॥ ५८ ॥ युधिष्ठिरश्चराजेंद्रतंह्रदंसहसोदरैः ॥ आजगाममहाराजतवपुत्रवधाय वै ॥ ५९ ॥ महताशंखनादेनरथनेमिस्वनेनच ॥ ऊर्ध्वंधुन्वन्महारेणुंकंपयंश्चापिमेदिनीं ॥ ६० ॥ यौधिष्ठिरस्यसैन्यस्यश्रुत्वाशब्दंमहारथाः ॥ कृतवर्माकृपोद्रौणी राजानमिदमब्रुवन् ॥ ६१ ॥ इमेह्यायांतिसंहृष्टाःपांडवाजितकाशिनः ॥ अपयास्यामहेतावदनुजानातुनोभवान् ॥ ६२ ॥ दुर्योधनस्तुतच्छ्रुत्वातेषांतत्रतर स्विनां ॥ तथेत्युक्त्वाह्रदंतंवैमाययाऽस्तंभयत्प्रभो ॥ ६३ ॥ तेत्वनुज्ञाप्यराजानंभृशंशोकपरायणाः ॥ जग्मुर्दूरंमहाराजकृपप्रभृतयोरथाः ॥ ६४ ॥ तेगत्वादूरम ध्वानंन्यग्रोधंप्रेक्ष्यमारिष ॥ न्यविशंतभृशंश्रांताश्चिंतयंतोनृपंप्रति ॥ ६५ ॥ विष्टभ्यसलिलंसुप्तोधार्तराष्ट्रोमहाबलः ॥ पांडवाश्चापिसंप्राप्तास्तंदेशंयुद्धमीप्स वः ॥ ६६ ॥ कथंनुयुद्धंभविताकथंराजाभविष्यति ॥ कथंनुपांडवाराजन्प्रतिपत्स्यंतिकौरवं ॥ ६७ ॥ इत्येवंचिंतयानास्तुरथेभ्योश्वान्विमुच्यते ॥ तत्रासांचक्रि रेराजन्कृपप्रभृतयोरथाः ॥ ६८ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणित्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ छ ॥ संजयउवाच ततस्तेष्वप यातेषुरथेषुत्रिषुपांडवाः ॥ तंह्रदंप्रत्यपद्यंतयत्रदुर्योधनोभवत् ॥ १ ॥ आसाद्यचकुरुश्रेष्ठतदाद्वैपायनंह्रदं ॥ स्तंभितंधार्तराष्ट्रेणदृष्ट्वातंसलिलाशयं ॥ २ ॥ वासु देवमिदंवाक्यमब्रवीत्कुरुनंदनः ॥ पश्येमांधार्तराष्ट्रेणमायामप्सुप्रयोजितां ॥ ३ ॥ विष्टभ्यसलिलंशेतेनास्यमानुषतोभयं ॥ दैवींमायामिमांकृत्वासलिलांत र्गतोह्ययं ॥ ४ ॥ निकृत्यानिकृतिप्रज्ञोनमेजीवन्विमोक्ष्यते ॥ यद्यस्यसमरेसाह्यंकुरुतेवज्रभृत्स्वयं ॥ ५ ॥

ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

नैलकंठीयेभारतभावदीपेत्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

जीवितेप्सुंदुर्योधनंविज्ञायकदाचिद्राज्यार्थंयुधिष्ठिरस्तस्मैदास्यतीत्याशंक्यभगवांस्तंबोधयतिदुर्योधनवधार्थी मायाविनइत्यादिना ॥ ६ ॥ क्रियाभ्युपायैःशत्रुक्रियानुरूपैःप्रतीकारैर्धर्म्यैरधर्म्यैर्वेत्यर्थःएते

तथाप्येनंहतंयुद्धेलोकाद्रक्ष्यंतिमाधव ॥ वासुदेवउवाच मायाविनइमांमायांमाययाजहिभारत ॥ ६ ॥ मायावीमाययावध्यःसत्यमेतद्युधिष्ठिर ॥ क्रियाभ्युपायैर्बहुभिर्मायामप्सुप्रयोज्यच ॥ ७ ॥ जहित्वंभरतश्रेष्ठमायात्मानंसुयोधनं ॥ क्रियाभ्युपायैरिंद्रेणनिहतादैत्यदानवाः ॥ ८ ॥ क्रियाभ्युपायैर्बहुभिर्बलिर्बद्धोमहात्मना ॥ क्रियाभ्युपायैर्बहुभिर्हिरण्याक्षोमहासुरः ॥ ९ ॥ हिरण्यकशिपुश्चैवक्रिययैवनिषूदितौ ॥ वृत्रश्चनिहतोराजन्क्रिययैवनसंशयः ॥ १० ॥ तथापौलस्त्यतनयोरावणोनामराक्षसः ॥ रामेणनिहतोराजन्सानुबंधःसहानुगः ॥ ११ ॥ क्रिययायोगमास्थायतथात्वमपिविक्रम ॥ क्रियाभ्युपायैर्निहतौमयाराजन्पुरातनौ ॥ १२ ॥ तारकश्चमहादैत्योविप्रचित्तिश्चवीर्यवान् ॥ वातापिरिल्वलश्चैवत्रिशिराश्चतथाविभो ॥ १३ ॥ सुंदोपसुंदावसुरौक्रिययैवनिषूदितौ ॥ क्रियाभ्युपायैरिंद्रेणत्रिदिवंभुज्यतेविभो ॥ १४ ॥ क्रियाबलवतीराजन्नान्यत्किंचिद्युधिष्ठिर ॥ दैत्याश्चदानवाश्चैवराक्षसाःपार्थिवास्तथा ॥ १५ ॥ क्रियाभ्युपायैर्निहताःक्रियांतस्मात्समाचर ॥ संजयउवाच इत्युक्तोवासुदेवेनपांडवःसंशितव्रतः ॥ १६ ॥ जलस्थंतंमहाराजतवपुत्रंमहाबलं ॥ अभ्यभाषतकौंतेयःप्रहसन्निवभारत ॥ १७ ॥ सुयोधनकिमर्थोयमारंभोप्सुकृतस्त्वया ॥ सर्वंक्षत्रंघातयित्वास्वकुलंचविशांपते ॥ १८ ॥ जलाशयंप्रविष्टोद्यवांछन्जीवितमात्मनः ॥ उत्तिष्ठराजन्युध्यस्वसहास्माभिःसुयोधन ॥ १९ ॥ सतेदर्पोनरश्रेष्ठसचमानःक्वतेगतः ॥ यस्त्वंसंस्तभ्यसलिलंभीतोराजन्व्यवस्थितः ॥ २० ॥ सर्वेत्वांशूरइत्येवंजनाजल्पंतिसंसदि ॥ व्यर्थंतद्भवतोमन्येशौर्यंसलिलशायिनः ॥ २१ ॥ उत्तिष्ठराजन्युध्यस्वक्षत्रियोसिकुलोद्भवः ॥ कौरवेयोविशेषेणकुलंजन्मचसंस्मर ॥ २२ ॥ सकथंकौरवेवंशेप्रशंसन्जन्मचात्मनः ॥ युद्धाद्भीतस्ततस्तोयंप्रविश्यप्रतितिष्ठसि ॥ २३ ॥ अयुद्धमव्यवस्थानंनैषधर्मःसनातनः ॥ अनार्यजुष्टमस्वर्ग्यंरणेराजन्पलायनं ॥ २४ ॥ कथंपारमगत्वाहियुद्धेत्वंवैजिजीविषुः ॥ इमान्निपतितान्दृष्ट्वापुत्रान्भ्रातॄन्पितॄंस्तथा ॥ २५ ॥ संबंधिनोवयस्यांश्चमातुलान्बांधवांस्तथा ॥ घातयित्वाकथंतातह्रदेतिष्ठसिसांप्रतं ॥ २६ ॥ शूरमानीनशूरस्त्वंमृषावदसिभारत ॥ शूरोहमितिदुर्बुद्धेसर्वलोकस्यशृण्वतः ॥ २७ ॥

तुच्छलकारिणश्छलैरेवहंतव्याइतिभावः ॥ ७ ८ ॥ ९ ॥ १० ॥ ११ ॥ विक्रमविक्रमंकुरुष्व ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अयुद्धंयुद्धवर्जनं अव्यवस्थानंविशेषेणअवस्थानंराज्येवास्वर्गेवास्थितिर्व्यवस्थानंतदभावश्चैतद्द्वयंक्षत्रियस्यनधर्मइत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

ब्रूहीति हेशूरेतिसाधिक्षेपसंबोधनं ययावृत्त्यानिमित्तभूतया वानप्रस्थत्वेनवान्यस्तशस्त्रत्वेनवाक्लीबत्वेनवात्वंसंगरंत्यजसितांवृत्तिंब्रूहि नत्वंवानप्रस्थोसिराज्यार्थित्वात् नापिन्यस्तशस्त्रोगदाधारित्वात् परिशे
षात्क्लीबोस्मीतिमाभाषस्व युद्धंकुर्वितिभावः ॥ २८ ॥ विनीयत्यक्त्वा ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ पौरुषंयत्नः विक्रांतताशौर्यं विस्फूर्जितंगर्जनं ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ नैतदिति

नहिशूराःपलायंतेशत्रून्दृष्ट्वाकथंचन ॥ ब्रूहिवात्वंययावृत्त्याशूरत्यजसिसंगरं ॥ २८ ॥ सत्वमुत्तिष्ठयुध्यस्वविनीयभयमात्मनः ॥ घातयित्वासर्वसैन्यंभ्रातॄं
श्चैवसुयोधन ॥ २९ ॥ नेदानींजीवितेबुद्धिःकार्याधर्मचिकीर्षया ॥ क्षत्रधर्ममुपाश्रित्यत्वद्विधेनसुयोधन ॥ ३० ॥ यत्तुकर्णमुपाश्रित्यशकुनिंचापिसौबलं ॥ अ
मर्त्यइवसंमोहात्त्वमात्मानंनबुद्धवान् ॥ ३१ ॥ तत्पापंसुमहत्कृत्वाप्रतियुध्यस्वभारत ॥ कथंहित्वद्विधोमोहाद्रोचयेतपलायनं ॥ ३२ ॥ क्वतेतत्पौरुषंयातंक्वच
मानःसुयोधन ॥ क्वचविक्रांततायाताक्वचविस्फूर्जितंमहत् ॥ ३३ ॥ क्वतेकृतास्त्रतायाताकिंचशेषेजलाशये ॥ सत्वमुत्तिष्ठयुध्यस्वक्षत्रधर्मेणभारत ॥ ३४ ॥ अ
स्मांस्तुवापराजित्यप्रशाधिपृथिवीमिमां ॥ अथवानिहतोस्माभिर्भूमौस्वप्स्यसिभारत ॥ ३५ ॥ एषतेपरमोधर्मःसृष्टोधात्रामहात्मना ॥ तंकुरुष्वयथातथ्यंराजा
भवमहारथ ॥ ३६ ॥ संजयउवाच एवमुक्तोमहाराजधर्मपुत्रेणधीमता ॥ सलिलस्थस्तवसुतइदंवचनमब्रवीत् ॥ ३७ ॥ दुर्योधनउवाच नैतच्चित्रं
महाराजयद्भीःप्राणिनमाविशेत् ॥ नचप्राणभयाद्भीतोव्यपयातोस्मिभारत ॥ ३८ ॥ अरथश्चानिषंगीचनिहतःपार्ष्णिसारथिः ॥ एकश्चाप्यगणःसंख्येप्रत्या
श्वासमरोचयं ॥ ३९ ॥ नप्राणहेतोर्नभयान्नविषादाद्विशांपते ॥ इदमंभःप्रविष्टोस्मिश्रमात्त्विदमनुष्ठितं ॥ ४० ॥ त्वंचाश्वसिहिकौंतेययेचाप्यनुगतास्तव ॥
अहमुत्थायवःसर्वान्प्रतियोत्स्यामिसंयुगे ॥ ४१ ॥ युधिष्ठिरउवाच आश्वस्ताएवसर्वेस्मचिरंत्वांमृगयामहे ॥ तदिदानींसमुत्तिष्ठयुध्यस्वेहसुयोधन ॥ ४२ ॥
हत्वावासमरेपार्थान्स्फीतंराज्यमवाप्नुहि ॥ निहतोवारणेस्माभिर्वीरलोकमवाप्स्यसि ॥ ४३ ॥ दुर्योधनउवाच यदर्थंराज्यमिच्छामिकुरूणांकुरुनंदन ॥
तइमेनिहताःसर्वेभ्रातरोमेजनेश्वर ॥ ४४ ॥ क्षीणरत्नांचपृथिवींहतक्षत्रियपुंगवां ॥ नह्युत्सहाम्यहंभोक्तुंविधवामिवयोषितं ॥ ४५ ॥ अद्यापित्वहमाशंसेत्वां
विजेतुंयुधिष्ठिर ॥ भंक्त्वापांचालपांडूनामुत्साहंभरतर्षभ ॥ ४६ ॥ नत्विदानीमहंमन्येकार्यंयुद्धेनकर्हिचित् ॥ द्रोणेकर्णेचसंशांतेनिहतेचपितामहे ॥ ४७ ॥ अ
स्त्विदानीमियंराजन्केवलापृथिवीतव ॥ असहायोहिकोराजाराज्यमिच्छेत्प्रशासितुं ॥ ४८ ॥

प्राणेनरक्षितव्येनहेतुनाभीर्भयंमामांमनुष्यंआविशेदितिब्रुवन्नेतच्चित्रमपि
तुप्राणिनांस्वाभाविकोयंधर्मःपरंतुमय्येतन्नास्तीत्याह नचेति ॥ ३८ ॥ ३९ ॥ प्राणहेतोर्जीवितार्थित्वात् भयात्बंधनादित्रासात् विषादात्शोकाभिभूतत्वात् ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥

सुहृदस्तादृशान्हित्वापुत्रान्भ्रातॄनपितॄनपि॥ भवद्भिश्चहृतेराज्येकोनुजीवेतमादृशः॥ ४९ ॥ अहंवनंगमिष्यामित्यजिनैःप्रतिवासितः॥ रतिर्हिनास्तिमेरा
ज्येहतपक्षस्यभारत॥ ५० ॥ हतबांधवभूयिष्ठाहताश्वाहतकुंजरा॥ एषातेपृथिवीराजन्भुंक्ष्वैनांविगतज्वरः॥ ५१ ॥ वनमेवगमिष्यामिवसानोमृगचर्मणी॥
नहिमेनिर्जनस्यास्तिजीवितेद्यस्पृहाविभो॥५२॥ गच्छत्वंभुंक्ष्वराजेंद्रपृथिवींनिहतेश्वरां॥ हतयोधांनष्टरत्नांक्षीणवृत्तिर्यथासुखं॥५३॥ संजयउवाच दुर्यो
धनंतवसुतंसलिलस्थंमहायशाः॥ श्रुत्वातुकरुणंवाक्यमभाषतयुधिष्ठिरः॥५४॥ युधिष्ठिरउवाच आर्तप्रलापान्मातातसलिलंस्थःप्रभाषिथाः॥ नैतन्म
नसिमेराजन्वाशितंशकुनेरिव॥ ५५॥ यदिचापिसमर्थःस्यास्त्वंदानायसुयोधन॥ नाहमिच्छेयमवनिंत्वयादत्तांप्रशासितुं॥ ५६॥ अधर्मेणनगृह्णीयांत्व
यादत्तांमहीमिमां॥ नहिधर्मःस्मृतोराजन्क्षत्रियस्यप्रतिग्रहः॥ ५७॥ त्वयादत्तांनचेच्छेयंपृथिवीमखिलामहं॥ त्वांतुयुद्धेविनिर्जित्यभोक्तास्मिवसुधामि
मां॥ ५८॥ अनीश्वरश्चपृथिवींकथंत्वंदातुमिच्छसि॥ त्वयेयंपृथिवीराजन्किन्नदत्तातदैवहि॥५९॥ धर्मतोयाचमानानांप्रशमार्थंकुलस्यनः॥ वार्ष्णेयंप्रथ
मंराजन्प्रत्याख्यायमहाबलं॥ ६०॥ किमिदानींददासित्वंकोहितेचित्तविभ्रमः॥ अभियुक्तस्तुकोराजादातुमिच्छेद्धिमेदिनीं॥ ६१॥ नत्वमद्यमहींदातुमी
शःकौरवनंदन॥ आच्छेत्तुंवाबलाद्राजन्सकथंदातुमिच्छसि॥ ६२॥ मांतुनिर्जित्यसंग्रामेपालयेमांवसुंधरां॥ सूच्यग्रेणापियद्भूमेरपिभिद्येतभारत॥६३॥
तन्मात्रमपिनन्मह्यंनददातिपुराभवान्॥ सकथंपृथिवीमेतांप्रददासिविशांपते॥६४॥ सूच्यग्रंनात्यजःपूर्वंसकथंत्यजसिक्षितिं॥ एवमैश्वर्यमासाद्यप्रशास्य
पृथिवीमिमां॥६५॥ कोहिमूढोव्यवस्येतशत्रोर्दातुंवसुंधरां॥ त्वंतुकेवलमौर्ख्येणविमूढोनावबुध्यसे॥६६॥ पृथिवींदातुकामोपिजीवितेनविमोक्ष्यसे॥ अ
स्मान्वात्वंपराजित्यप्रशाधिपृथिवीमिमां॥ ६७॥ अथवानिहतोस्माभिर्व्रजलोकाननुत्तमान्॥ आवयोर्जीवतोराजन्मयिचत्वयिचध्रुवं॥ ६८॥ संशयःस
र्वभूतानांविजयेनौभविष्यति॥ जीवितंतवदुष्प्रज्ञमयिसंप्रतिवर्तते॥६९॥ जीवयेयमहंकामंनतुत्वंजीवितुंक्षमः॥ दहनेहिकृतोयत्नस्त्वयास्मासुविशेषतः॥
॥ ७० ॥ आशीविषैर्विषैश्चापिजलेचापिप्रवेशनैः॥ त्वयाविनिकृताराजन्राज्यस्यहरणेनच॥ ७१ ॥ अप्रियाणांचवचनैर्द्रौपद्याःकर्षणेनच॥ एतस्मात्कार
णात्पापजीवितंतेनविद्यते॥ ७२॥

॥ ७३ ॥ इतिशल्यांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपे एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ ५ ॥ एवमिति ॥ १ ॥ २ ॥ यस्येति आतपत्रेणदुर्योधनःसूर्याद्रक्षितइत्येषप्रवादोपियस्यनसहतेइ

उत्तिष्ठोत्तिष्ठयुध्यस्वयुद्धेश्रेयोभविष्यति ॥ एवंतुविविधावाचोजययुक्ताःपुनःपुनः ॥ कीर्तयंतिस्मतेवीरास्तत्रतत्रजनाधिप ॥ ७३ ॥ इतिश्रीम०शल्यांतर्गतग
दापर्वणिसुयोधनयुधिष्ठिरसंवादेएकत्रिंशोऽध्यायः ॥ ३१ ॥ धृतराष्ट्रउवाच एवंसंतर्ज्यमानस्तुममपुत्रोमहीपतिः ॥ प्रकृत्यामन्युमान्वीरःकथमासीत्प
रंतपः ॥ १ ॥ नहिसंतर्जनातेनश्रुतपूर्वाकथंचन ॥ राजभावेनमान्यश्चसर्वलोकस्यसोभवत् ॥ २ ॥ यस्यातपत्रच्छायापिस्वकाभानोस्तथाप्रभा ॥ खेदायैवाभि
मानित्वात्सहेत्सैवंकथंगिरः ॥ ३ ॥ इयंचपृथिवीसर्वासम्लेच्छाटविकाभृशं ॥ प्रसादाद्ध्रियतेयस्यप्रत्यक्षंतवसंजय ॥ ४ ॥ सतथातर्ज्यमानस्तुपांडुपुत्रैर्विशेष
तः ॥ विहीनश्चस्वकैर्भृत्यैर्निर्जनेचावृतोभृशं ॥ ५ ॥ सश्रुत्वाकटुकावाचोजययुक्ताःपुनःपुनः ॥ किमब्रवीत्पांडवेयांस्तन्ममाचक्ष्वसंजय ॥ ६ ॥ संजयउवाच
तर्ज्यमानस्तदाराजन्नुदकस्थस्तवात्मजः ॥ युधिष्ठिरेणराजेंद्रभ्रातृभिःसहितेनह ॥ ७ ॥ श्रुत्वासकटुकावाचोविषमस्थोनराधिपः ॥ दीर्घमुष्णंचनिःश्वस्यसलिल
स्थःपुनःपुनः ॥ ८ ॥ सलिलांतर्गतोराजाधुन्वन्हस्तौपुनःपुनः ॥ मनश्चकारयुद्धायराजानंचाभ्यभाषत ॥ ९ ॥ यूयंससुहृदःपार्थाःसर्वेसरथवाहनाः ॥ अहमेकःप
रिद्यूनोविरथोहतवाहनः ॥ १० ॥ आत्तशस्त्रैरथोपेतैर्बहुभिःपरिवारितः ॥ कथमेकःपदातिःसन्नशस्त्रोयोद्धुमुत्सहे ॥ ११ ॥ एकैकेनतुमांयूयंयोधयध्वंयुधिष्ठिर ॥
नत्वेकोबहुभिर्वीरैर्न्याय्योयोधयितुंयुधि ॥ १२ ॥ विशेषतोविकवचःश्रांतश्चापस्समाश्रितः ॥ भृशंविक्षतगात्रश्चश्रांतवाहनसैनिकः ॥ १३ ॥ नमेत्वत्तोभयंराज
न्नचपार्थाद्वृकोदरात् ॥ फाल्गुनाद्वासुदेवाद्वापंचालेभ्योथवापुनः ॥ १४ ॥ यमाभ्यांयुयुधानाद्वायेचान्येतवसैनिकाः ॥ एकःसर्वानहंक्रुद्धोवारयिष्येयुधिस्थि
तः ॥ १५ ॥ धर्ममूलासतांकीर्तिर्मनुष्याणांजनाधिप ॥ धर्मंचैवेहकीर्तिंचपालयन्प्रब्रवीम्यहं ॥ १६ ॥ अहमुत्थायसर्वान्वैप्रतियोत्स्यामिसंयुगे ॥ अनुगम्याग
तान्सर्वानृतून्संवत्सरोयथा ॥ १७ ॥ अद्यवःसरथान्साश्वानशस्त्रोविरथोपिसन् ॥ नक्षत्राणीवसर्वाणिसविनारात्रिसंक्षये ॥ १८ ॥ तेजसानाशयिष्यामिस्थि
रीभवतपांडवाः ॥ अद्यानृण्यंगमिष्यामिक्षत्रियाणांयशस्विनां ॥ १९ ॥ बाह्लीकद्रोणभीष्माणांकर्णस्यचमहात्मनः ॥ जयद्रथस्यशूरस्यभगदत्तस्यचोभयोः ॥
॥ २० ॥ मद्रराजस्यशल्यस्यभूरिश्रवसएवच ॥ पुत्राणांभरतश्रेष्ठशकुनेःसौबलस्यच ॥ २१ ॥

तिभावः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ परिद्यूनःपरिश्रांतः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

॥ २२ ॥ २३ ॥ २४॥ २५ ॥ २६ ॥ हत्वैकं अस्माकंपंचानांमध्येएकमपिहत्वात्वंराज्यंप्राप्स्यसीत्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

मित्राणांसुहृदांचैवबांधवानांतथैवच ॥ आनृण्यमद्यगच्छामिहत्वात्वांभ्रातृभिःसह ॥ २२ ॥ एतावदुक्त्वावचनंविररामजनाधिपः ॥ युधिष्ठिरउवाच . दि
ष्ट्यात्वमपिजानीषेक्षत्रधर्मंसुयोधन ॥ २३॥ दिष्ट्यातेवर्ततेबुद्धिर्युद्धायैवमहाभुज ॥ दिष्ट्याशूरोसिकौरव्यदिष्ट्याजानासिसंगरं ॥ २४॥ यस्त्वमेकोहिनःसर्वा
न्संगरेयोद्धुमिच्छसि ॥ एकएकेनसंगम्ययत्तेसंमतमायुधं ॥ २५॥ तत्त्वमादाययुध्यस्वप्रेक्षकास्तेवयंस्थिताः ॥ स्वयमिष्टंचतेकामंवीरभूयोददाम्यहं ॥ २६ ॥
हत्वैकंभवताराज्यंहतोवास्वर्गमाप्नुहि ॥ दुर्योधनउवाच एकश्चेद्योद्धुमाक्रंदेशूरोद्यममदीयतां ॥ २७॥ आयुधानामियंचापिवृतात्वत्संमतेगदा ॥ हंतैकंभवं
तामेकःशक्यंमांयोभिमन्यते ॥ २८ ॥ पदातिर्गदयासंख्येसयुध्यतुमयासह ॥ वृत्तानिरथयुद्धानिविचित्राणिपदेपदे ॥ २९ ॥ इदमेकंगदायुद्धंभवत्वद्याद्भुतंम
हत् ॥ अस्त्राणामपिपर्यायंकर्तुमिच्छंतिमानवाः ॥ ३० ॥ युद्धानामपिपर्यायोभवत्वनुमतेनव ॥ गदयात्वांमहाबाहोविजेष्यामिसहानुजं ॥ ३१ ॥ पंचालान्
सृंजयांश्चैवयेचान्येतवसैनिकाः ॥ नहिमेसंभ्रमोजातुशक्रादपियुधिष्ठिर ॥ ३२॥ युधिष्ठिरउवाच उत्तिष्ठोत्तिष्ठगांधारेमांयोधयसुयोधन ॥ एकएकेन
संगम्यसंयुगेगदयाबली ॥ ३३॥ पुरुषोभवगांधारेयुध्यस्वसुसमाहितः ॥ अद्यतेजीवितंनास्तियद्यींद्रोपितवाश्रयः ॥ ३४॥ संजयउवाच एतत्सनरशार्दूलो
नामृष्यततवात्मजः ॥ सलिलांतर्गतःश्वभ्रेमहानागइवश्वसन् ॥ ३५॥ तथासौवाक्प्रतोदेनतुद्यमानःपुनःपुनः ॥ वचोनममृषेराजन्नुत्तमाश्वःकशामिव ॥ ३६॥
संक्षोभ्यसलिलंवेगाद्गदामादायवीर्यवान ॥ अद्रिसारमयींगुर्वींकांचनांगदभूषणां ॥ ३७॥ अंतर्जलात्समुत्तस्थौनागेंद्रइवनिःश्वसन् ॥ सभित्वास्तंभितंतोयं
स्कंधेकृत्वायसींगदां ॥ ३८॥ उदतिष्ठतपुत्रस्तेप्रतपन्रश्मिवानिव ॥ ततःशैक्यायसींगुर्वींजातरूपपरिष्कृतां ॥ ३९ ॥ गदांपरामृशद्धीमान्धार्तराष्ट्रोमहाबलः ॥
गदाहस्तंतुतंदृष्ट्वासशृंगमिवपर्वतं ॥ ४० ॥ प्रजानामिवसंक्रुद्धंशूलपाणिमिवस्थितं ॥ सगदोभारतोभातिप्रतपन्भास्करोयथा ॥ ४१ ॥ तमुत्तीर्णमहाबाहुंग
दाहस्तमरिंदमं ॥ मेनिरेसर्वभूतानिदंडपाणिमिवांतकं ॥ ४२ ॥ वज्रहस्तंयथाशक्रंशूलहस्तंयथाहरं ॥ ददृशुःसर्वपंचालाःपुत्रंतवजनाधिप ॥ ४३ ॥ तमुत्तीर्णं
तुसंप्रेक्ष्यसमहृष्यंतसर्वशः ॥ पंचालाःपांडवेयाश्चतेन्योन्यस्यतलान्ददुः ॥ ४४ ॥ अवहासंतुतंमत्वापुत्रोदुर्योधनस्तव ॥ उद्वृत्यनयनेक्रुद्धोदिधक्षुरिवपांडवा
न ॥ ४५ ॥ त्रिशिखांभ्रुकुटींकृत्वासंदष्टदशनच्छदः ॥ प्रत्युवाचततस्तान्वैपांडवान्सहकेशवान् ॥ ४६ ॥ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥

॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ क्षत्रधर्मअलीतिशेषः धर्मोऽसौपुण्यआचारइतिमेदिनी ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥

अस्यावहासस्यफलंप्रतिभोक्ष्यथपांडवाः ॥ गमिष्यथहताःसद्यःसपंचालायमक्षयं ॥ ४७ ॥ संजयउवाच उत्थितस्तुजलात्तस्मात्पुत्रो दुर्योधनउवाच
दुर्योधनस्तव ॥ अतिष्ठतगदापाणीरुधिरेणसमुक्षितः ॥ ४८ ॥ तस्यशोणितदिग्धस्यसलिलेनसमुक्षितं ॥ शरीरंस्मतदाभातिस्रवन्निवमहीधरः ॥ ४९ ॥ तमु
घतगदंवीरंमेनिरेतत्रपांडवाः ॥ वैवस्वतमिवक्रुद्धंकिंकरोद्यतपाणिनं ॥ ५० ॥ समेघनिनदोहर्षान्नर्दन्निवचगोवृषः ॥ आजुहावततःपार्थान्गदयायुधिवीर्य
वान् ॥ ५१ ॥ दुर्योधनउवाच एकैकेनचमांयूयमासीदतयुधिष्ठिर ॥ नह्येकोबहुभिर्न्याय्योवीरोयोधयितुंयुधि ॥ ५२ ॥ न्यस्तवर्माविशेषेणश्रांतश्चाप्सु
परिप्लुतः ॥ भृशंविक्षतगात्रश्चहतवाहनसैनिकः ॥ ५३ ॥ अवश्यमेवयोद्धव्यंसर्वैरेवमयासह ॥ युक्तंत्वयुक्तमित्येतद्वेत्सित्वंचैवसर्वदा ॥ ५४ ॥ युधिष्ठिरउवा
च माभूदियंतवप्रज्ञाकथमेवंसुयोधन ॥ यदाभिमन्युंबहवोजघ्नुर्युधिमहारथाः ॥ ५५ ॥ क्षत्रधर्मंभृशंक्रूरंनिरपेक्षंसुनिर्घृणं ॥ अन्यथातुकथंहन्युरभिमन्युंत
थागतं ॥ ५६ ॥ सर्वैर्भवंतोधर्मज्ञाःसर्वेशूरास्तनुत्यजः ॥ न्यायेनयुध्यतांप्रोक्ताशक्रलोकगतिःपरा ॥ ५७ ॥ यद्येकस्तुनहंतव्योबहुभिर्धर्मएवतु ॥ तदाभिमन्युं
बहवोनिजघ्नुस्त्वन्मतेकथं ॥ ५८ ॥ सर्वोविमृशतेजंतुःकृच्छ्रस्थोधर्मदर्शनं ॥ पदस्थःपिहितंद्वारंपरलोकस्यपश्यति ॥ ५९ ॥ आमुंचकवचंवीरमूर्धजान्यमयस्व
च ॥ यच्चान्यदपितेनास्तितदप्यादत्स्वभारत ॥ ६० ॥ इममेकंचतेकामंवीरभूयोददाम्यहं ॥ पंचानांपांडवेयानांयेनत्वंयोद्धुमिच्छसि ॥ ६१ ॥ तंहत्वावैभवान्
राजाहतोवास्वर्गमाप्नुहि ॥ ऋतेचजीविताद्वीरयुद्धेकिंकुर्मतेप्रियं ॥ ६२ ॥ संजयउवाच ततस्तवसुतोराजन्वर्मजग्राहकांचनं ॥ विचित्रंचशिरस्त्राणंजां
बूनदपरिष्कृतं ॥ ६३ ॥ सोवबद्धशिरस्त्राणःशुभकांचनवर्मभृत् ॥ रराजराजन्पुत्रस्तेकांचनःशैलराडिव ॥ ६४ ॥ सन्नद्धःसगदोराजन्सज्जःसंग्राममूर्धनि ॥ अ
ब्रवीत्पांडवान्सर्वान्पुत्रोदुर्योधनस्तव ॥ ६५ ॥ भ्रातॄणांभवतामेकोयुध्यतांगदयामया ॥ सहदेवेनवायोत्स्येभीमेननकुलेनवा ॥ ६६ ॥ अथवाफाल्गुनेनाद्यत्व
यावाभरतर्षभ ॥ योत्स्येहंसंगरंप्राप्यविजेष्येचरणाजिरे ॥ ६७ ॥ अहमद्यगमिष्यामिवैरस्यांतंसुदुर्गमं ॥ गदयापुरुषव्याघ्रहेमपट्टनिबद्धया ॥ ६८ ॥ गदायुद्धेनमे
कश्चित्सदृशोस्तीतिचिंतये ॥ गदयावोहनिष्यामिसर्वानेवसमागतान् ॥ ६९ ॥ नमेसमर्थाःसर्वेवैयोद्धुंन्यायेनकेचन ॥ नयुक्तमात्मनावक्तुमेवंगर्वोद्धतंवचः ॥
अथवासफलंह्येतत्करिष्येभवतांपुरः ॥ ७० ॥

॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

॥५॥ ९

अस्मिन्मुहूर्तेसत्यंवामिथ्यावैतद्भविष्यति ॥ गृहातुचगदांयोवैयोत्स्यतेद्यमयासह ॥ ७१ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणियुधिष्ठिरदुर्योधनसंवादेद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥७॥ संजयउवाच एवंदुर्योधनेराजन्गर्जमानेमुहुर्मुहुः ॥ युधिष्ठिरस्यसंक्रुद्धोवासुदेवोऽब्रवीदिदं ॥ १ ॥ यदिनामह्ययंयुद्धेवरयेत्त्वांयुधिष्ठिर ॥ अर्जुनंनकुलंचैवसहदेवमथापिवा ॥ २ ॥ किमिदंसाहसंराजंस्त्वयाव्याहृतमीदृशं ॥ एकमेवनिहत्याजौभवराजाकुरुष्विति ॥ ३ ॥ नसमर्थानहंमन्येगदाहस्तस्यसंयुगे ॥ एतेनहिकृतायोग्यावर्षाणीहत्रयोदश ॥ ४ ॥ आयसेपुरुषेराजन्भीमसेनजिघांसया ॥ कथंनामभवेत्कार्यमस्माभिर्भरतर्षभ ॥ ५ ॥ साहसंकृतवांस्त्वंतुह्यनुक्रोशान्नृपोत्तम ॥ नान्यमस्यानुपश्यामिप्रतियोद्धारमाहवे ॥ ६ ॥ ऋतेवृकोदरात्पार्थात्सचनातिकृतश्रमः ॥ तदिदंद्यूतमारब्धंपुनरेवयथापुरा ॥ ७ ॥ विषमंशकुनेश्चैवतवचैवविशांपते ॥ बलीभीमःसमर्थश्चकृतीराजासुयोधनः ॥ ८ ॥ बलवान्वाकृतीवेतिकृतीराजन्विशिष्यते ॥ सोयंराजंस्त्वयाशत्रुःसमेपथिनिवेशितः ॥ ९ ॥ न्यस्तश्चात्मासुविषमेकृच्छ्रमापादितावयं ॥ कोनुसर्वान्विनिर्जित्यशत्रूनेकेनवैरिणा ॥ १० ॥ कृच्छ्रप्राप्तेनचतथाहारयेद्राज्यमागतं ॥ पणित्वाचैकपाणेनरोचयेदेवमाहवं ॥ ११ ॥ नहिपश्यामितंलोकेयोद्यदुर्योधनंरणे ॥ गदाहस्तंविजेतुंवैशक्तःस्यादमरोपिहि ॥ १२ ॥ नत्वंभीमोननकुलःसहदेवोथफाल्गुनः ॥ जेतुंन्यायेनशक्तोवैकृतीराजासुयोधनः ॥ १३ ॥ सकथंवदसेशत्रुंयुध्यस्वगदयेतिहि ॥ एकंचनोनिहत्याजौभवराजेतिभारत ॥ १४ ॥ वृकोदरंसमासाद्यसंशयोविजयेहिनः ॥ न्यायतोयुध्यमानानांकृतीह्येषमहाबलः ॥ १५ ॥ एकंवास्मान्निहत्यत्वंभवराजेविवैपुनः ॥ नूनंनराज्यभागेषापांडोःकुंत्याश्चसंततिः ॥ १६ ॥ अत्यंतवनवासायसृष्टाभैक्ष्यायवापुनः ॥ भीमसेनउवाच मधुसूदनमाकार्षीर्विषादंयदुनंदन ॥ १७ ॥ अद्यपारंगमिष्यामिवैरस्यभृशदुर्गमं ॥ अहंसुयोधनंसंख्येहनिष्यामिनसंशयः ॥ १८ ॥ विजयोवैध्रुवःकृष्णधर्मराजस्यदृश्यते ॥ अध्यर्धेनगुणेनेयंगदागुरुतरीमम ॥ १९ ॥ नतथाधार्तराष्ट्रस्यमाकार्षीर्माधवव्यथां ॥ अहमेनंहिगदयासंयुगेयोद्धुमुत्सहे ॥ २० ॥ भवंतःप्रेक्षकाःसर्वेममसंतुजनार्दन ॥ सामरानपिलोकांस्त्रीन्नानाशस्त्रधरान्युधि ॥ २१ ॥ योधयेयंरणेकृष्णकिमुताद्यसुयोधनं ॥ संजयउवाच तथासंभाषमाणंतुवासुदेवोवृकोदरं ॥ २२ ॥

मेदिनी ॥ ४ ॥ ५ ॥ ६ ॥ शकुनेश्चतवचयथापुरातथैवेदमितिद्वयोःसंबंधः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ इतिकथंवदसेइत्यनुकर्षणीयं ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

त्हष्टःसंपूजयामासवचनंचेदमब्रवीत् ॥ त्वामाश्रित्यमहाबाहोधर्मराजोयुधिष्ठिरः॥ २३॥ निहतारिःस्वकांदीमांश्रियंप्राप्तोनसंशयः॥त्वयाविनिहताःसर्वेधृतरा
ष्ट्रसुतारणे ॥ २४ ॥ राजानोराजपुत्राश्चनागाश्चविनिपातिताः ॥ कलिंगामागधाःप्राच्यागांधाराःकुरवस्तथा ॥ २५॥ त्वामासाद्यमहायुद्धेनिहताःपांडुनंदन॥
हत्वादुर्योधनंचापिप्रयच्छोर्वीससागरां ॥ २६॥ धर्मराजायकौंतेययथाविष्णुःशचीपतेः ॥ त्वांचप्राप्यरणेपापोधार्तराष्ट्रोविनंक्ष्यंति ॥ २७॥ त्वमस्यसक्थिनी
भंक्काप्रतिज्ञांपालयिष्यसि ॥ यत्नेनतुसदापार्थयोद्धव्योधृतराष्ट्रजः ॥ २८ ॥ कृतीचबलवांश्चैवयुद्धशौंडश्चनित्यदा ॥ ततस्तुसात्यकीराजन्पूजयामासपांडवं ॥
॥ २९ ॥ पंचालाःपांडवेयाश्चधर्मराजपुरोगमाः ॥ तद्वचोभीमसेनस्यसर्वएवाभ्यपूजयन् ॥ ३० ॥ ततोभीमबलोभीमोयुधिष्ठिरमथाब्रवीत् ॥ सृंजयैःसहतिष्ठं
तंतपंतमिवभास्करं ॥ ३१ ॥ अहमेतेनसंगम्यसंयुगेयोद्धुमुत्सहे ॥ नहिशक्तोरणेजेतुंमामेषपुरुषाधमः ॥ ३२ ॥ अद्यक्रोधंविमोक्ष्यामिनिहितंहृदयेभृशं ॥ सु
योधनेधार्तराष्ट्रेखांडवेग्निमिवार्जुनः ॥ ३३ ॥ शल्यमद्योद्धरिष्यामितवपांडवत्हच्छयं ॥ निहत्यगदयापापमद्यराजन्सुखीभव ॥ ३४ ॥ अद्यकीर्तिमयींमालां
प्रतिमोक्ष्येतवानघ ॥ प्राणान्श्रियंचराज्यंचमोक्ष्यतेद्यसुयोधनः ॥ ३५ ॥ राजाचधृतराष्ट्रोद्यश्रुत्वापुत्रंमयाहतं ॥ स्मरिष्यत्यशुभंकर्मयत्तच्छकुनिबुद्धिजं ॥
॥ ३६ ॥ इत्युक्काभरतश्रेष्ठोगदामुद्यम्यवीर्यवान् ॥ उदतिष्ठतयुद्धायशक्रोवृत्रमिवाह्वयन् ॥ ३७॥ तदाह्वानममृष्यन्वैतवपुत्रोतिवीर्यवान् ॥ प्रत्युपस्थितएवा
शुमत्तोमत्तमिवद्विपं ॥ ३८ ॥ गदाहस्तंतवसुतंयुद्धायसमुपस्थितं ॥ ददृशुःपांडवाःसर्वेकैलासमिवशृंगिणं ॥ ३९ ॥ तमेकाकिनमासाद्यधार्तराष्ट्रंमहाबलं ॥ वि
यूथमिवमातंगंसमहृष्यंतपांडवाः ॥ ४० ॥ नसंभ्रमोनचभयंनचग्लानिर्नचव्यथा ॥ आसीद्दुर्योधनस्यापिस्थितःसिंहइवाहवे ॥ ४१ ॥ समुद्यतगदंदृष्ट्वाकैला
समिवशृंगिणं ॥ भीमसेनस्तदाराजन्दुर्योधनमथाब्रवीत् ॥ ४२ ॥ राज्ञापिधृतराष्ट्रेणत्वयाचास्मासुयत्कृतं ॥ स्मरतद्दुष्कृतंकर्मयद्वृत्तंवारणावते ॥ ४३ ॥ द्रौपदी
चपरिक्लिष्टासभामध्येरजस्वला ॥ द्यूतेयद्विजितोराजाशकुनेर्बुद्धिनिश्चयात् ॥ ४४ ॥ यानिचान्यानिदुष्टात्मन्पापानिकृतवानसि ॥ अनागःसुचपार्थेषुतस्य
पश्यमहत्फलं ॥ ४५ ॥ त्वत्कृतेनिहतःशेतेशरतल्पेमहायशाः ॥ गांगेयोभरतश्रेष्ठःसर्वेषांनःपितामहः ॥ ४६ ॥ हतोद्रोणश्चकर्णश्चहतःशल्यःप्रतापवान् ॥ वैर
स्यचादिकर्तासौशकुनिर्निहतोरणे ॥ ४७ ॥ भ्रातरस्तेहताःशूराःपुत्राश्चसहसैनिकाः ॥ राजानश्चहताःशूराःसमरेष्वनिवर्तिनः ॥ ४८ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ इतिशल्यांतर्गतगदाप० नैलकंठीये भारतभा० त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ७ ॥ तस्मिन्युद्धइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ चत्वारिंशदहान्यद्यद्वेचमेनिःसृतस्यवै पुष्येणसंप्रयातोस्मिश्रवणेपुनरागतइति ननुश्रवणेऽत्रयुद्धसमाप्तिर्दृश्यते तदनुपातेनयुद्धारंभोमृगशीर्षेभवितुंयुज्यते अष्टादशाहानियुद्धमभूदितिवचनात् एवंचयुद्धारंभंप्रकृत्यभीष्मपर्वणिसंजयवाक्यंमघाविषयगःसोमस्तद्दिनंसंप्रपद्यतेइतिमघायांयुद्धारंभप्रदर्शकंविरुध्यते तथात्वेरेवत्यांयुद्धसमाप्त्यापत्तेरित्युपक्रमोपसंहारयोर्विरोधोदुःसमाधेयइतिचेत् सत्यं उपसंहारस्यनिर्णीतार्थकत्वात्तदनुरोधेनोपक्रमस्यनेयत्वान्मघाविषयगइत्यस्यायमर्थः अत्रमघाशब्देनतत्सहचराःपितरोलक्ष्यंते मघानक्षत्रंपितरोदेवतेतिश्रुतेरितिमघायांपितृसंबंधित्वावधारणात् तेनयुद्धेमृतानांउत्तमदेहप्रदानार्थंचंद्रस्तदापितृलोकेसन्निहितोभूदिति स्वर्गिणांदिव्यदेहलाभश्चंद्राधीनइतिशास्त्रप्रसिद्धं युद्धारंभस्तुमृगशीर्षेइतिभीष्मपर्वणिनिपुणतरमुपपादिततन्नविस्मर्तव्यं ॥ ६ ॥ ७ ॥

एतेचान्येचनिहताबहवःक्षत्रियर्षभाः ॥ प्रातिकामीतथापापोद्रौपद्याःक्लेशकृद्धतः ॥ ४९ ॥ अवशिष्टस्त्वमेवैकःकुलघ्नोधमपूरुषः ॥ त्वामप्यद्यहनिष्यामिगदयानात्रसंशयः ॥ ५० ॥ अद्यतेहंरणेदर्पंसर्वंनाशयितानृप ॥ राज्याशांविपुलांराजन्पांडवेषुचदुष्कृतं ॥ ५१ ॥ दुर्योधनउवाच किंकत्थितेनबहुनायुद्ध्यस्वाद्यमयासह ॥ अद्यतेहंविनेष्यामियुद्धश्रद्धांवृकोदर ॥ ५२ ॥ किंनपश्यसिमांपापगदायुद्धेव्यवस्थितं ॥ हिमवच्छिखराकारांप्रगृह्यमहतींगदां ॥ ५३ ॥ गदिनंकोद्यमांपापहंतुमुत्सहतेरिपुः ॥ न्यायतोयुद्ध्यमानस्यदेवेष्वपिपुरंदरः ॥ ५४ ॥ मात्वथागर्जकौंतेयशारदाभ्रमिवाजलं ॥ दर्शयस्वबलंयुद्धेयावत्तत्तेद्यविद्यते ॥ ५५ ॥ तस्यतद्वचनंश्रुत्वापांडवाःसहसृंजयाः ॥ सर्वेसंपूजयामासुस्तद्वचोविजिगीषवः ॥ ५६ ॥ उन्मत्तमिवमातंगंतलशब्देनमानवाः ॥ भूयःसंहर्षयामासूराजन्दुर्योधनंनृपं ॥ ५७ ॥ बृंहंतिकुंजरास्तत्रहयाहेषंतिचासकृत् ॥ शस्त्राणिसंप्रदीप्यंतेपांडवानांजयैषिणां ॥ ५८ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिभीमसेनदुर्योधनसंवादेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ७ ॥ संजयउवाच तस्मिन्युद्धेमहाराजसुसंवृत्तेसुदारुणे ॥ उपविष्टेषुसर्वेषुपांडवेषुमहात्मसु ॥ १ ॥ ततस्तालध्वजोरामस्तयोर्युद्धउपस्थिते ॥ श्रुत्वातच्छिष्ययोराजन्नाजगामहलायुधः ॥ २ ॥ तंदृष्ट्वापरमप्रीताःपांडवाःसहकेशवाः ॥ उपगम्योपसंगृह्यविधिवत्प्रत्यपूजयन् ॥ ३ ॥ पूजयित्वाततःपश्चादिदंवचनमब्रुवन् ॥ शिष्ययोःकौशलंयुद्धेपश्यरामेतिपार्थिव ॥ ४ ॥ अब्रवीच्चतदारामोदृष्ट्वाकृष्णंसपांडवं ॥ दुर्योधनंचकौरव्यंगदापाणिमवस्थितं ॥ ५ ॥ चत्वारिंशदहान्यद्यद्वेचमेनिःसृतस्यवै ॥ पुष्येणसंप्रयातोस्मिश्रवणेपुनरागतः ॥ ६ ॥ शिष्ययोर्वैगदायुद्धंद्रष्टुकामोस्मिमाधव ॥ ततस्तदागदाहस्तौदुर्योधनवृकोदरौ ॥ ७ ॥

रराजतुःरेजतुः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ इतिशल्यांतर्गतगदापर्वणिनै० भारतभा० चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

युद्धभूमिंगतौवीरावुभावेवरराजतुः ॥ ततोयुधिष्ठिरोराजापरिष्वज्यहलायुधं ॥ ८ ॥ स्वागतंकुशलंचास्मैपर्यपृच्छद्यथातथं ॥ कृष्णौचापिमहेष्वासावभिवाद्य
हलायुधं ॥ ९ ॥ सस्वजातेपरिप्रीतौप्रियमाणौयशस्विनौ ॥ माद्रीपुत्रौतथाशूरौद्रौपद्याःपंचचात्मजाः ॥ १० ॥ अभिवाद्यस्थिताराजन्रौहिणेयंमहाबलं ॥ भी
मसेनोथबलवान्पुत्रस्तवजनाधिप ॥ ११ ॥ तथैवचोद्यतगदौपूजयामासतुर्बलं ॥ स्वागतेनचतेतत्रप्रतिपूज्यसमंततः ॥ १२ ॥ पश्ययुद्धंमहाबाहोइतितेराममम
ब्रुवन् ॥ एवमूचुर्महात्मानंरौहिणेयंनराधिपाः ॥ १३ ॥ परिष्वज्यतदारामःपांडवान्सहसृंजयान् ॥ अपृच्छत्कुशलंसर्वान्पार्थिवांश्चामितौजसः ॥ १४ ॥ तथै
वतेसमासाद्यपप्रच्छुस्तमनामयं ॥ प्रत्यभ्यर्च्यहलीसर्वान्क्षत्रियांश्चमहात्मनः ॥ १५ ॥ कृत्वाकुशलसंयुक्तांसंविदंचयथावयः ॥ जनार्दनंसात्यकिंचप्रेम्णास
परिपस्वजे ॥ १६ ॥ मूर्ध्निचैतावुपाघ्रायकुशलंपर्यपृच्छत ॥ तौचतंविधिवद्राजन्पूजयामासतुर्गुरुं ॥ १७ ॥ ब्रह्माणमिवदेवेशमिंद्रोपेंद्रौमुदान्वितौ ॥ ततोब्रवी
द्धर्मसुतोरौहिणेयमरिंदमं ॥ १८ ॥ इदंभ्रात्रोर्महायुद्धंपश्यरामेतिभारत ॥ तेषांमध्येमहाबाहुःश्रीमान्केशवपूर्वजः ॥ १९ ॥ न्यविशत्परमप्रीतःपूज्यमानोमहा
रथैः ॥ सबभौराजमध्यस्थोनीलवासाःसितप्रभः ॥ २० ॥ दिवीवनक्षत्रगणैःपरिकीर्णोनिशाकरः ॥ ततस्तयोःसंनिपातस्तुमुलोलोमहर्षणः ॥ २१ ॥ आसीदंत
करोराजन्वैरस्यतवपुत्रयोः ॥ २२ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवागमनेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ ७ ॥ जनमेजयउवाच
पूर्वमेवयदारामस्तस्मिन्युद्धउपस्थिते ॥ आमंत्र्यकेशवंयातोवृष्णिभिःसहितःप्रभुः ॥ १ ॥ साहाय्यंधार्तराष्ट्रस्यनचकर्तास्मिकेशव ॥ नचैवपांडुपुत्राणांगमि
ष्यामियथागतं ॥ २ ॥ एवमुक्त्वातदारामोयातःक्षत्रनिबर्हणः ॥ तस्यचागमनंभूयोब्रह्मन्शंसितुमर्हसि ॥ ३ ॥ आख्याहिमेविस्तरशःकथंरामउपस्थितः ॥ कथं
चदृष्टवान्युद्धंकुशलोह्यसिसत्तम ॥ ४ ॥ वैशंपायनउवाच उपप्लव्येनिविष्टेषुपांडवेषुमहात्मसु ॥ प्रेषितोधृतराष्ट्रस्यसमीपंमधुसूदनः ॥ ५ ॥ शमंप्रतिम
हाबाहोहितार्थंसर्वदेहिनां ॥ सगत्वाहास्तिनपुरंधृतराष्ट्रंसमेत्यच ॥ ६ ॥ उक्तवान्वचनंतथ्यंहितंचैवविशेषतः ॥ नचतत्कृतवान्राजायथाख्यातंहितत्पुरा ॥ ७ ॥ अन
वाप्यशमंतत्रकृष्णःपुरुषसत्तमः ॥ आगच्छतमहाबाहुरुपप्लव्यंजनाधिप ॥ ८ ॥ ततःप्रत्यागतःकृष्णोधार्तराष्ट्रविसर्जितः ॥ अक्रियायांनरव्याघ्रपांडवानिदम
ब्रवीत् ॥ ९ ॥

पूर्वमेवेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ अक्रियायांसंधिकार्यानिष्पत्तौ ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ मैत्रनक्षत्रयोगेअनुराधायां भोजःकृतवर्मा ॥ १४ ॥ पुष्येगहिपांडवेभ्यःप्रयाणंअनुराधानस्तीर्थयात्रार्थमितिविवेकः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

नकुर्वंतिवचोमत्यंकुरवःकालनोदिताः ॥ निर्गच्छध्वंपांडवेयाःपुष्येणसहितामया ॥ १० ॥ ततोविभज्यमानेषुबलेषुबलिनांवरः ॥ प्रोवाचभ्रातरंकृष्णंरौहिणे
योमहामनाः ॥ ११ ॥ नपामपिमहाबाहोसाहाय्यंमधुसूदन ॥ क्रियतामितितत्कृष्णोनास्यचक्रेवचस्तदा ॥ १२ ॥ ततोमन्युपरीतात्माजगामयदुनंदनः ॥ ती
र्थयात्रांहलधरःसरस्वत्यांमहायशाः ॥ १३ ॥ मैत्रनक्षत्रयोगेस्मसहितःसर्वयादवैः ॥ आश्रयामासभोजस्तुदुर्योधनमरिंदमः ॥ १४ ॥ युयुधानेनसहितोवासु
देवस्तुपांडवान् ॥ रौहिणेयगतेशूरेपुष्येणमधुसूदनः ॥ १५ ॥ पांडवेयान्पुरस्कृत्ययथावभिमुखःकुरून् ॥ गच्छन्नेवपथिस्थस्तुरामःप्रेष्यानुवाचह ॥ १६ ॥ संभारां
स्तीर्थयात्रायांसर्वोपकरणानिच ॥ आनयध्वंद्वारकायामग्नीन्वैयाजकांस्तथा ॥ १७ ॥ सुवर्णरजतंचैवधेनूर्वासांसिवाजिनः ॥ कुंजरांश्चरथांश्चैवखरोष्ट्रंवाहनानि
च ॥ १८ ॥ क्षिप्रमानीयतांसर्वंतीर्थहेतोःपरिच्छदं ॥ प्रतिस्रोतःसरस्वत्यागच्छध्वंशीघ्रगामिनः ॥ १९ ॥ ऋत्विजश्चानयध्वंवैशतशश्चद्विजर्षभान् ॥ एवंसंदिश्यतु
प्रेष्यान्बलदेवोमहाबलः ॥ २० ॥ तीर्थयात्रांययौराजन्कुरूणांवैशसेतदा ॥ सरस्वतींप्रतिस्रोतःसमंतादभिजग्मिवान् ॥ २१ ॥ ऋत्विग्भिश्चसुहृद्भिश्चतथान्यै
र्द्विजसत्तमैः ॥ रथैर्गजैस्तथाश्वैश्चप्रेष्यैश्चभरतर्षभ ॥ २२ ॥ गोखरोष्ट्रप्रयुक्तैश्चयानैश्चबहुभिर्वृतः ॥ श्रांतानांक्लांतवपुषांशिशूनांविपुलायुषां ॥ २३ ॥ देशेदेशे
तुदेयानिदानानिविविधानिच ॥ अर्चायैचार्थिनांराजन्क्लृप्तानिबहुशस्तथा ॥ २४ ॥ तानियानीहदेशेषुप्रतीक्षंतिस्मभारत ॥ बुभुक्षितानामर्थायक्लृप्तमन्नंस
मंततः ॥ २५ ॥ योयोयत्रद्विजोभोज्यंभोक्तुंकामयतेतदा ॥ तस्यतस्यतुतत्रैवंमुपजह्रुस्तदानृप ॥ २६ ॥ तत्रतत्रस्थिताराजन्रौहिणेयस्यशासनात् ॥ भक्ष्यपेय
स्यकुर्वंतिराशींस्तत्रसमंततः ॥ २७ ॥ वासांसिचमहार्हाणिपर्यंकास्तरणानिच ॥ पूजार्थंतत्रक्लृप्तानिविप्राणांसुखमिच्छतां ॥ २८ ॥ यत्रयःस्वदतेविप्रःक्षत्रि
योवापिभारत ॥ तत्रतत्रतुतस्यैवसर्वंक्लृप्तमदृश्यत ॥ २९ ॥ यथासुखंजनःसर्वोयातितिष्ठतिवैतदा ॥ यातुकामस्ययानानिपानानितृषितस्यच ॥ ३० ॥ बुभुक्षि
तस्यचान्नानिस्वादूनिभरतर्षभ ॥ उपजह्रुर्नरास्तत्रवस्त्राण्याभरणानिच ॥ ३१ ॥ सपंथाःप्रबभौराजन्सर्वस्यैवसुखावहः ॥ स्वर्गोपमस्तदावीरनराणांतत्रग
च्छतां ॥ ३२ ॥ नित्यप्रमुदितोपेतःस्वादुभक्ष्यःशुभान्वितः ॥ विपण्यापणपण्यानांनानाजनशतैर्वृतः ॥ नानाद्रुमलतोपेतोनानारत्नविभूषितः ॥ ३३ ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ विपणिःपण्यवीथिका आपणाःहट्टाः पण्यानिविक्रेयद्रव्याणि ॥ ३३ ॥

॥३४॥३५॥३६॥३७॥ गुणानूरमणीयत्वादीन् उत्पत्तिसंभवं कर्मनिर्वृत्तितीर्थयात्राविधिसिद्धि॥३८॥यथाक्रमेणतीर्थक्रमापेक्षया अनुपूर्वशः गुणोत्पत्त्यादिक्रमापेक्षया॥३९॥४०॥४१॥प्रभासःप्रभासत्वं

ततोमहात्मानियमेस्थितात्मापुण्येषुतीर्थेषुवसूनिराजन्॥ ददौद्विजेभ्यःक्रतुदक्षिणाश्चयदुप्रवीरोहलभृत्प्रतीतः॥ ३४ ॥ दोग्ध्रीश्चधेनूश्चसहस्रशोवैसुवाससः
कांचनबद्धशृंगीः॥ हयांश्चनानाविधदेशजातान्यानानिदासांश्चशुभान्द्विजेभ्यः॥ ३५॥ रत्नानिमुक्तामणिविद्रुमंचाप्यग्र्यंसुवर्णरजतंसुशुद्धं॥ अयस्मयं
ताम्रमयंचभांडंददौद्विजातिप्रवरेषुरामः॥ ३६ ॥ एवंसवित्तंप्रददौमहात्मासरस्वतीतीर्थवरेषुभूरि॥ ययौक्रमेणाप्रतिमप्रभावस्ततःकुरुक्षेत्रमुदारवृत्तिः॥
॥३७॥ जनमेजयउवाच सारस्वतानांतीर्थानांगुणोत्पत्तिंवदस्वमे॥ फलंचद्विपदांश्रेष्ठकर्मनिर्वृत्तिमेवच ॥३८॥ यथाक्रमेणभगवंस्तीर्थानामनुपूर्व
शः॥ ब्रह्मन्ब्रह्मविदांश्रेष्ठपरंकौतूहलंहिमे॥३९॥ वैशंपायनउवाच तीर्थानांचफलंराजन्गुणोत्पत्तिंचसर्वशः॥ मयोच्यमानंवैपुण्यंशृणुराजेंद्रकृत्स्न
शः॥४०॥ पूर्वंमहाराजयदुप्रवीरऋत्विक्सुहृद्विप्रगणैश्चसार्धं॥ पुण्यंप्रभासंसमुपाजगामयत्रोडुराड्यक्ष्मणाक्लिश्यमानः॥४१॥ विमुक्तशापःपुनराप्यतेजः
सर्वंजगद्भासयतेनरेंद्र॥ एवंतुतीर्थप्रवरंपृथिव्यांप्रभासनात्तस्यततःप्रभासः॥४२॥ जनमेजयउवाच कथंतुभगवान्सोमोयक्ष्मणासमगृह्यत॥ कथं
चतीर्थप्रवरेतस्मिंश्चंद्रोन्यमज्जत॥४३॥ कथमाप्लुत्यतस्मिंस्तुपुनराप्यायितःशशी॥ एतन्मेसर्वमाचक्ष्वविस्तरेणमहामुने॥४४॥ वैशंपायनउवाच दक्ष
स्यतनयास्तातप्रादुरासन्विशांपते॥ सप्तविंशतिकन्यादक्षःसोमायवैददौ॥ ४५॥ नक्षत्रयोगनिरताःसंख्यानार्थंचताभवन्॥ पत्न्योवैतस्यराजेंद्रसोमस्य
शुभकर्मणः॥४६॥ तास्तुसर्वाविशालाक्ष्योरूपेणाप्रतिमाभुवि॥ अत्यरिच्यततासांतुरोहिणीरूपसंपदा॥४७॥ ततस्तस्यांसभगवान्प्रीतिंचक्रेनिशाकरः॥ सा
स्यहृद्याबभूवाथतस्मात्तांबुभुजेसदा॥४८॥ पुराहिसोमोराजेंद्ररोहिण्यामवसत्परं॥ ततस्ताःकुपिताःसर्वानक्षत्राख्यामहात्मनः॥४९॥ तागत्वापितरंप्राहुः
प्रजापतिमतंद्रिताः॥ सोमोवसतिनास्मासुरोहिणींभजतेसदा॥५०॥ तावयंसहिताःसर्वास्त्वत्सकाशेप्रजेश्वर॥ वत्स्यामोनियताहारास्तपश्चरणतत्पराः॥
॥५१॥ श्रुत्वातासांतुवचनंदक्षःसोममथाब्रवीत्॥ समंवर्तस्वभार्यासुमात्वाऽधर्मोमहान्स्पृशेत्॥५२॥ तास्तुसर्वाब्रवीद्दक्षोगच्छध्वंशशिनोंतिकं॥ समंव
त्स्यतिसर्वासुचंद्रमाममशासनात्॥५३॥विसृष्टास्तास्तथाजग्मुःशीतांशुभवनंतदा॥ तथापिसोमोभगवान्पुनरेवमहीपते॥५४॥ रोहिणींनिवसत्येवप्रीयमा
णोमुहुर्मुहुः॥ ततस्ताःसहिताःसर्वाभूयःपितरमब्रुवन्॥५५॥

॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥ त्वात्वांअधर्मःमास्पृशेत् ॥५२॥५३॥५४॥५५॥

॥ ५६ ॥ विरोचनहे विशेषेणरोचमान त्वांमाशप्स्ये नवरोचनांयथाहंशापेननहरामितथायतस्वेत्यर्थः ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥६४॥ ६५॥ ६६ ॥६७॥ ६८ ॥ शापस्य

तवशुश्रूषणेयुक्तावत्स्यामोहिनवांतिके॥ सोमोवसतिनास्मासुनाकरोद्वचनंतव॥ ५६॥ तासांतद्वचनंश्रुत्वादक्षःसोममथाब्रवीत्॥ समंवर्तस्वभार्यासुमात्वां शप्स्येविरोचन॥ ५७॥ अनादृत्यतुतद्वाक्यंदक्षस्यभगवान्शशी॥ रोहिण्यासार्धमवसत्ततस्ताःकुपिताःपुनः॥५८॥ गत्वाचपितरंप्राहुःप्रणम्यशिरसातदा॥ सोमोवसतिनास्मासुतस्मान्नःशरणंभव॥ ५९॥ रोहिण्यामेवभगवान्सदावसतिचंद्रमाः ॥ नत्वद्वचोगणयतिनास्मासुस्नेहमिच्छति॥६०॥ तस्मान्नस्त्राहि सर्वावैयथानःसोमआविशेत्॥ तच्छ्रुत्वाभगवान्क्रुद्धोयक्ष्माणंपृथिवीपते॥ ६१ ॥ससर्जरोषात्सोमायसचोडुपतिमाविशत्॥ सयक्ष्मणाभिभूतात्माक्षीयता हरहःशशी॥ ६२ ॥ यत्नंचाप्यकरोद्राजन्मोक्षार्थंतस्ययक्ष्मणः॥ इष्टिभिर्महाराजविविधाभिर्निशाकरः ॥ ६३ ॥ नचामुच्यतशापाद्वैक्षयंचैवाभ्यगच्छत॥ क्षीयमाणेततःसोमेओषध्योनप्रजज्ञिरे॥६४॥ निरास्वादरसाःसर्वाहतवीर्याश्चसर्वशः॥ ओषधीनांक्षयेजातेप्राणिनामपिसंक्षयः॥ ६५॥ कृशाश्चासन्प्रजाः सर्वाःक्षीयमाणेनिशाकरे॥ ततोदेवाःसमागम्यसोममूचुर्महीपते॥६६॥ किमिदंभवतोरूपमीदृशंनप्रकाशते ॥ कारणंब्रूहिनःसर्वयेनेदंतेमहद्भयं॥६७॥ श्रुत्वातुवचनंत्वत्तोविधास्यामस्ततोवयं॥ एवमुक्तःप्रत्युवाचसर्वांस्तान्शशलक्षणः॥६८॥ शापस्यलक्षणंचैवयक्ष्माणंचतथात्मनः ॥ देवास्तथावचःश्रुत्वागत्वादक्षमथाब्रुवन्॥६९॥ प्रसीदभगवन्सोमेशापोयंविनिवर्त्यतां॥ असौहिचंद्रमाःक्षीणः किंचिच्छेषोहिलक्ष्यते॥ ७०॥ क्षयाच्चैवास्यदेवेशप्रजाश्चैवगताःक्षयं॥ वीरुदोषधयश्चैवबीजानिविविधानिच॥ ७१ ॥ तेषांक्षयेक्षयोस्माकंविनास्माभिर्जगच्चकिं॥ इतिज्ञात्वालोकगुरोप्रसादंकर्तुमर्हसि॥ ७२ ॥ एवमुक्तस्ततोदेवान्प्राहवाक्यंप्रजापतिः ॥ नैतच्छक्यंममवचोव्यावर्तयितुमन्यथा ॥ ७३॥ हेतुनातुमहाभागानिवर्तिष्यतिकेनचित्॥ समंवर्ततुसर्वासुशशीभार्यासुनित्यशः॥ ७४ ॥ सरस्वत्यावरेतीर्थेउन्मज्जन्शशलक्षणः॥ पुनर्वर्धिष्यतेदेवास्तद्वैसत्यंवचोमम॥ ७५॥ मासार्धंचक्षयंसोमोनित्यमेवगमिष्यति॥ मासार्धंतु सदावृद्धिंसत्यमेतद्वचोमम॥ ७६॥ समुद्रंपश्चिमंगत्वासरस्वत्यब्धिसंगमं ॥ आराधयतुदेवेशंततःकांतिमवाप्स्यति॥ ७७॥ सरस्वतींततःसोमःसजगामर्षिशासनात्॥ प्रभासंप्रथमंतीर्थंसरस्वत्याजगामह ॥ ७८॥ अमावास्यांमहातेजास्तत्रोन्मज्जन्महाद्युतिः ॥ लोकान्प्रभासयामासशीतांशुत्वमवापच॥ ७९॥ देवास्तुसर्वेराजेंद्रप्रभासंप्राप्यपुष्कलं॥ सोमेनसहिताभूत्वादक्षस्यप्रमुखेभवन्॥ ८० ॥

लक्षणंकारणं ॥६९॥७०॥७१॥७२॥७३॥७४॥७५॥७६॥७७॥७८॥७९॥८०॥

॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ इतिशल्यांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ १ ॥ तस्मादिति ॥ १ ॥ २ ॥

तथायुक्तःसद्यःभूत्वाकु ततःप्रजापतिःसर्वाविससर्जाथदेवताः॥ सोमंचभगवान्प्रीतोभूयोवचनमब्रवीत् ॥८१॥ मावमंस्थाःस्त्रियःपुत्रमाचविप्रान्कदाचन॥ गच्छयुक्तःसदाभूत्वाकु

रुवैशासनंमम ॥ ८२॥ सविसृष्टोमहाराजजगामाथस्वमालयं ॥ प्रजाश्चमुदिताभूत्वापुनस्तस्थुर्यथापुरा ॥८३॥ एवंतेसर्वमाख्यातंयथाशप्तोनिशाकरः॥ प्र

भासंचयथातीर्थंतीर्थानांप्रवरंमहत् ॥ ८४ ॥ अमावास्यांमहाराजनित्यशःशशलक्षणः॥ स्नात्वात्याप्यायतेश्रीमान्प्रभासेतीर्थउत्तमे ॥८५॥ अतश्चैनत्प्रजा

नंतिप्रभासमितिभूमिप ॥ प्रभांहिपरमांलेभेतस्मिन्नुन्मज्यचंद्रमाः ॥८६॥ ततस्तुचमसोद्भेदमच्युतस्त्वगमद्बली॥ चमसोद्भेदइत्येवंयंजनाःकथयंत्युत ॥८७॥

तत्रदत्वाचदानानिविशिष्टानिहलायुधः॥ उपित्वारजनीमेकांस्नात्वाचविधिवत्तदा ॥ ८८ ॥ उदपानमथागच्छत्त्वरावान्केशवाग्रजः ॥ आद्यंस्वस्त्ययनंचैव

यत्रावाप्यमहत्फलं ॥ ८९ ॥ स्निग्धत्वादोषधीनांचभूमेश्चजनमेजय॥ जानंतिसिद्धाराजेंद्रनष्टामपिसरस्वतीं ॥ ९० ॥ इतिश्रीमहाभारतेशल्यांतर्गतगदाप

र्वणिबलदेवतीर्थयात्रायांप्रभासोत्पत्तिकथनेपंचत्रिंशोऽध्यायः॥ ३५॥ ॥ ७॥ वैशंपायनउवाच तस्मान्नदीगतंचापित्युदपानंयशस्विनः॥ त्रित

स्यचमहाराजजगामाथहलायुधः॥ १ ॥ तत्रदत्वाबहुद्रव्यंपूजयित्वातथाद्विजान्॥ उपस्पृश्यचतत्रैवप्रहृष्टोमुसलायुधः॥ २॥ तत्रधर्मपरोभूत्वात्रितःससुम

हातपाः॥ कूपेचवसताऽतेनसोमःपीतोमहात्मना ॥३॥ तत्रचैनंसमुत्सृज्यभ्रातरौजग्मतुर्गृहान्॥ ततस्तौवैशशापायत्रितोब्राह्मणसत्तमः ॥ ४॥ जनमेजय

उवाच उदपानंकथंब्रह्मन्कथंचसुमहातपाः॥ पतितःकिंचसंत्यक्तोभ्रातृभ्यांद्विजसत्तम ॥ ५॥ कूपेकथंचहित्वैनंभ्रातरौजग्मतुर्गृहान्॥ कथंचयाजयामा

सपपौसोमंचवैकथं॥ ६॥ एतदाचक्ष्वमेब्रह्मन्श्रोतव्यंयदिमन्यसे॥ वैशंपायनउवाच आसन्पूर्वयुगेराजन्मुनयोभ्रातरस्त्रयः॥ ७॥ एकतश्चद्वितश्चैव

त्रितश्चादित्यसन्निभाः॥ सर्वेप्रजापतिसमाःप्रजावंतस्तथैवच ॥ ८॥ ब्रह्मलोकजिताःसर्वेतपसाब्रह्मवादिनः॥ तेषांतुतपसाप्रीतोनियमेनदमेनच ॥ ९ ॥ अ

भवद्गौतमोनित्यंपिताधर्मरतःसदा॥ सतुदीर्घेणकालेनतेषांप्रीतिमवाप्यच॥ १०॥ जगामभगवान्स्थानमनुरूपमिवात्मनः॥ राजानस्तस्ययेत्वासन्याज्या

राजन्महात्मनः॥ ११ ॥ तेसर्वेस्वर्गतेतस्मिंस्तस्यपुत्रानपूजयन् ॥ तेषांतुकर्मणाराजंस्तथाचाध्ययनेनच ॥ १२ ॥ त्रितःसश्रेष्ठतांप्रापयथैवास्यपितातथा ॥

तथासर्वेमहाभागामुनयःपुण्यलक्षणाः॥ १३ ॥ ॥ ३ ॥ ४ ॥ ५ ॥ याजयामास स्वार्थेणिच् याजंकृतवान् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

॥ १४ ॥ १५ ॥ १६ ॥ पशून्प्रतिपश्वर्यं दक्षिणार्थागाः प्राप्तुमित्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

अपूजयन्महाभागंयथास्यपितरंतथा ॥ कदाचिद्धितनोराजन्भ्रातरावेकतद्वितौ ॥ १४ ॥ यज्ञार्थंचक्रतुश्चिंतांतथावित्तार्थमेवच ॥ तयोर्बुद्धिःसमभवत्त्रितंगृह्यपरंतप ॥ १५ ॥ याज्यान्सर्वानुपादायप्रतिगृह्यपशूंस्ततः ॥ सोमंपास्यामहेहृष्टाःप्राप्ययज्ञंमहाफलं ॥ १६ ॥ चक्रुश्चैवंतथाराजन्भ्रातरस्त्रयएवंचं ॥ तथातेतुपरिक्रम्ययाज्यान्सर्वान्पशून्प्रति ॥ १७ ॥ याजयित्वाततोयाज्यान्लब्ध्वातुसुबहून्पशून् ॥ याज्येनकर्मणातेनप्रतिगृह्यविधानतः ॥ १८ ॥ प्राचींदिशंमहात्मानआजग्मुस्तेमहर्षयः ॥ त्रितस्तेषांमहाराजपुरस्ताद्यातिहृष्टवत् ॥ १९ ॥ एकतश्चद्वितश्चैवपृष्ठतःकालयन्पशून् ॥ तयोश्चितासमभवद्दृष्ट्वापशुगणंमहत् ॥ २० ॥ कथंचस्युरिमागावआवाभ्यांहिविनात्रितं ॥ तावन्योन्यंसमाभाष्यएकतश्चद्वितश्चह ॥ २१ ॥ यदूचतुर्मिथःपापौतन्निबोधजनेश्वर ॥ त्रितोयज्ञेषुकुशलस्त्रितोवेदेषुनिष्ठितः ॥ २२ ॥ अन्यास्तुबहुलागावस्त्रितःसमुपलप्स्यते ॥ तदावांसहितौभूत्वागाःप्रकाल्यव्रजावहे ॥ २३ ॥ त्रितोपिगच्छतांकाममावाभ्यांवैविनाकृतः ॥ तेषामागच्छतांरात्रौपथिस्थानांवृकोभवत् ॥ २४ ॥ तत्रकूपोविदूरेभूत्सरस्वत्यास्तटेमहान् ॥ अथत्रितोवृकंदृष्ट्वापथितिष्ठंतमग्रतः ॥ २५ ॥ तद्भयादपसर्पन्वैतस्मिन्कूपेपपातह ॥ अगाधेसुमहाघोरेसर्वभूतभयंकरे ॥ २६ ॥ त्रितस्ततोमहाराजकूपस्थोमुनिसत्तमः ॥ आर्तनादंततश्चक्रेतौतुशुश्रुवतुर्मुनी ॥ २७ ॥ तंज्ञात्वापतितंकूपेभ्रातरावेकतद्वितौ ॥ वृकत्रासाच्चलोभाच्चसमुत्सृज्यप्रजग्मतुः ॥ २८ ॥ भ्रातृभ्यांपशुलुब्धाभ्यामुत्सृष्टःसमहातपाः ॥ उदपानेतदाराजन्निर्जलेपांसुसंवृते ॥ २९ ॥ त्रितआत्मानमालक्ष्यकूपेवीरुत्तृणावृते ॥ निमग्नंभरतश्रेष्ठनरकेदुष्कृतीयथा ॥ ३० ॥ सबुद्ध्यागणयत्प्राज्ञोमृत्योर्भीतोह्यसोमपः ॥ सोमःकथंतुपातव्यइहस्थेनमयाभवेत् ॥ ३१ ॥ सएवमभिनिश्चित्यतस्मिन्कूपेमहातपाः ॥ ददर्शवीरुधंतत्रलंबमानांयदृच्छया ॥ ३२ ॥ पांसुग्रस्तेततःकूपेविचिंत्यसलिलंमुनिः ॥ अग्नीन्संकल्पयामासहोत्रेचात्मानमेवच ॥ ३३ ॥ ततस्तांवीरुधंसोमंसंकल्प्यसुमहातपाः ॥ ऋचोयजूंषिसामानिमनसाचिंतयन्मुनिः ॥ ३४ ॥ ग्रावाणःशर्कराःकृत्वाप्रचक्रेभिषवंनृप ॥ आज्यंचसलिलंचक्रेभागांश्चत्रिदिवौकसां ॥ ३५ ॥ सोमस्याभिषवंकृत्वाचकारविपुलंध्वनिं ॥ सचाविशद्दिवंराजन्पुनःशब्दस्त्रितस्यवै ॥ ३६ ॥ समवाप्यचतंयज्ञंयथोक्तंब्रह्मवादिभिः ॥ वर्तमानेमहायज्ञेत्रितस्यसुमहात्मनः ॥ ३७ ॥ आविग्नंत्रिदिवंसर्वंकारणंचनबुध्यते ॥ ततःसुतुमुलंशब्दंशुश्रावाथबृहस्पतिः ॥ ३८ ॥ श्रुत्वाचैवाब्रवीत्सर्वान्देवान्देवपुरोहितः ॥ त्रितस्यवर्ततेयज्ञस्तत्रगच्छामहेसुराः ॥ ३९ ॥

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥५३॥५४॥ - इतिशल्यांतर्गतगदाप० नैलकंठीयेभारतभा० षट्त्रिंशोऽध्यायः ॥३६॥ ॥७॥

सहिक्रुद्धःसृजेदन्यान्देवानपिमहातपाः ॥ तच्छ्रुत्वावचनंतस्यसहिताःसर्वदेवताः ॥ ४० ॥ प्रययुस्तत्रयत्रासौत्रितयज्ञःप्रवर्तते ॥ तेतत्रगत्वाविबुधास्तंकूपंयत्रसत्रितः ॥ ४१ ॥ ददृशुस्तंमहात्मानंदीक्षितंयज्ञकर्मसु ॥ दृष्ट्वाचैनंमहात्मानंश्रियापरमयायुतं ॥४२॥ ऊचुश्चैनंमहाभागंप्राप्ताभागार्थिनोवयं ॥ अथाब्रवीदृषिर्देवान्पश्यध्वंमांदिवौकसः ॥४३॥ अस्मिन्प्रतिभयेकूपेनिमग्नंनष्टचेतसं ॥ ततस्त्रितोमहाराजभागांस्तेषांयथाविधि ॥४४॥ मंत्रयुक्तान्समददत्तेचप्रीतास्तदाभवन् ॥ ततोयथाविधिप्राप्तान्भागान्प्राप्यदिवौकसः ॥४५॥ प्रीतात्मानोददुस्तस्मैवरान्यान्मनसेच्छति ॥ सतुवव्रेवरंदेवांस्त्रातुमर्हथमामितः ॥४६॥ यश्चेहोपस्पृशेत्कूपेससोमपगतिंलभेत् ॥ तत्रचोर्मिमतीराजन्नुत्पपातसरस्वती ॥४७॥ तयोत्क्षिप्तःसमुत्तस्थौपूजयंस्त्रिदिवौकसः ॥ तथेतिचोक्त्वाविबुधाजग्मूराजन्यथागताः ॥४८॥ त्रितश्चाभ्यागमत्प्रीतःस्वमेवनिलयंतदा ॥ क्रुद्धस्तुससमासाद्यतावृषीभ्रातरौतदा ॥ ४९ ॥ उवाचपरुषंवाक्यंशशापचमहातपाः ॥ पशुलुब्धौयुवांयस्मान्मामुत्सृज्यप्रधावितौ ॥ ५० ॥ तस्माद्वृकाकृतीरौद्रौदंष्ट्रिणावभितश्चरौ ॥ भवितारौमयाशप्तौपापेनानेनकर्मणा ॥ ५१ ॥ प्रसवश्चैवयुवयोर्गोलांगूलर्क्षवानराः ॥ इत्युक्तेनतदातेनक्षणादेवविशांपते ॥ ५२ ॥ तथाभूतावदृश्येतांवचनात्सत्यवादिनः ॥ तत्राप्यमितविक्रांतःस्पृष्ट्वातोयंहलायुधः ॥ ५३ ॥ दत्त्वाचविविधान्दायान्पूजयित्वाचवैद्विजान् ॥ उदपानंचतंवीक्ष्यप्रशस्यचपुनःपुनः ॥ नदीगतमदीनात्माप्राप्तोविनशनंतदा ॥ ५४॥ इतिश्रीमहाभारते शल्यपर्वांतर्गतगदापर्वणिबलदेवती० त्रिताख्यानेषट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ ७ ॥

वैशंपायनउवाच ततोविनशनंराजन्जगामाथहलायुधः ॥ शूद्राभीरान्प्रतिद्वेषाद्यत्रनष्टासरस्वती ॥ १ ॥ तस्मात्तुऋषयोनित्यंप्राहुर्विनशनेतिच ॥ यत्राप्युपस्पृश्यबलःसरस्वत्यांमहाबलः ॥ २ ॥ सुभूमिकंततोगच्छत्सरस्वत्यास्तटेवरे ॥ तत्रचाप्सरसःशुभ्रानित्यकालमतंद्रिताः ॥ ३ ॥ क्रीडाभिर्विमलाभिश्चक्रीडंतिविमलाननाः ॥ तत्रदेवाःसगंधर्वामासिमासिजनेश्वर ॥ ४ ॥ अभिगच्छंतितत्तीर्थंपुण्यंब्राह्मणसेवितं ॥ तत्रादृश्यंतगंधर्वास्तथैवाप्सरसांगणाः ॥ ५ ॥ समेत्यसहिताराजन्यथाप्राप्तंयथासुखं ॥ तत्रमोदंतिदेवाश्चपितरश्चसवीरुधः ॥ ६ ॥ पुण्यैःपुष्पैःसदादिव्यैःकीर्यमाणाःपुनःपुनः ॥ आक्रीडभूमिःसाराजंस्तासामप्सरसांशुभा ॥ ७॥ सुभूमिकेतिविख्यातासरस्वत्यास्तटेवरे ॥ तत्रस्नात्वाचदत्त्वाचवसुविप्रायमाधवः ॥ ८ ॥

तनइति ॥ १ ॥ २ ॥ शुभ्राःशुचयः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ कालज्ञानंप्रतिकालज्ञानार्थं ॥ १७ ॥ १८ ॥ १९ ॥ शंखंशंखनामानं ॥ २० ॥ नगंदक्षं ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

गंधर्वाणांततस्तीर्थमागच्छद्रोहिणीसुतः ॥ विश्वावसुमुखास्तत्रगं
धर्वास्तपसान्विताः ॥ १० ॥ नृत्यवादित्रगीतंचकुर्वंतिसुमनोरमं ॥ तत्रदत्वाहलधरोविप्रेभ्योविविधंवसु ॥ ११ ॥ अजाविकंगोखरोष्ट्रंसुवर्णंरजतंतथा ॥ भो
जयित्वाद्विजान्कामैःसंतर्प्यचमहाधनैः ॥ १२ ॥ प्रययौसहितोविप्रैस्तूयमानश्चमाधवः ॥ तस्माद्गंधर्वतीर्थाच्चमहाबाहुररिंदमः ॥ १३ ॥ गर्गस्रोतोमहातीर्थमा
जगामैककुंडली ॥ तत्रगर्गेणवृद्धेनतपसाभावितात्मना ॥ १४ ॥ कालज्ञानगतिश्चैवज्योतिषांचव्यतिक्रमः ॥ उत्पातादारुणाश्चैवशुभाश्चजनमेजय ॥ १५ ॥
सरस्वत्याःशुभेतीर्थेविदितावैमहात्मना ॥ तस्यनाम्नाचतत्तीर्थंगर्गस्रोतइतिस्मृतं ॥ १६ ॥ तत्रगर्गंमहाभागंऋषयःसुव्रतानृप ॥ उपासांचक्रिरेनित्यंकालज्ञानं
प्रतिप्रभो ॥ १७ ॥ तत्रगत्वामहाराजबलःश्वेतानुलेपनः ॥ विधिवद्धिधनंदत्वामुनीनांभावितात्मनां ॥ १८ ॥ उच्चावचांस्तथाभक्ष्यान्विप्रेभ्योविप्रदायसः ॥ नी
लवासास्तदाऽगच्छच्छंखतीर्थंमहायशाः ॥ १९ ॥ तत्रापश्यन्महाशंखंमहामेरुमिवोच्छ्रितं ॥ श्वेतपर्वतसंकाशंऋषिसंघैर्निषेवितं ॥ २० ॥ सरस्वत्यास्तटेजा
तंनगंतालध्वजोबली ॥ यक्षाविद्याधराश्चैवराक्षसाश्चामितौजसः ॥ २१ ॥ पिशाचाश्चामितबलायत्रसिद्धाःसहस्रशः ॥ तेसर्वेह्यशनंत्यक्त्वाफलंतस्यवनस्पतेः
॥ २२ ॥ व्रतैश्चनियमैश्चैवकालेकालेस्मभुंजते ॥ प्राप्तैश्चनियमैस्तैस्तैर्विचरंतःपृथक्पृथक् ॥ २३ ॥ अदृश्यमानामनुजैर्व्यचरन्पुरुषर्षभ ॥ एवंख्यातोनरव्याघ्रलोके
स्मिन्सवनस्पतिः ॥ २४ ॥ ततस्तीर्थंसरस्वत्याःपावनंलोकविश्रुतं ॥ तस्मिंश्चयदुशार्दूलोदत्वातीर्थेपयस्विनीः ॥ २५ ॥ ताम्रायसानिभांडानिवस्त्राणिविविधा
निच ॥ पूजयित्वाद्विजांश्चैवपूजितश्चतपोधनैः ॥ २६ ॥ पुण्यंद्वैतवनंराजन्नाजगामहलायुधः ॥ तत्रगत्वामुनीन्दृष्ट्वानानावेषधरान्बलः ॥ २७ ॥ आप्लुत्यसलि
लेचापिपूजयामासवैद्विजान् ॥ तथैवदत्वाविप्रेभ्यःपरिभोगान्सुपुष्कलान् ॥ २८ ॥ ततःप्रायाद्बलोराजन्दक्षिणेनसरस्वतीं ॥ गत्वाचैवंमहाबाहुर्नातिदूरेमहाय
शाः ॥ २९ ॥ धर्मात्मानागधन्वानंतीर्थमागमदच्युतः ॥ यत्रपन्नगराजस्यवासुकेःसन्निवेशनं ॥ ३० ॥ महाद्युतेर्महाराजबहुभिःपन्नगैर्वृतं ॥ ऋषीणांहिसहस्रा
णितत्रनित्यंचतुर्दश ॥ ३१ ॥ यत्रदेवाःसमागम्यवासुकिंपन्नगोत्तमं ॥ सर्वपन्नगराजानमभ्यषिंचन्यथाविधि ॥ ३२ ॥ पन्नगेभ्योभयंतत्रविद्यतेनस्मपौरव ॥
तत्रापिविधिवद्दत्वाविप्रेभ्योरत्नसंचयान् ॥ ३३ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

॥३४॥३५॥३६॥ अवेक्षार्थंद्रष्टुमित्यर्थः ॥३७॥३८॥इच्छामिश्रोतुमितिशेषः॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥ यज्ञोपवीतैःयज्ञसूत्रैःतीर्थंत्रेताग्नीनामुत्तरभागंतो

प्रायात्प्राचींदिशंतत्रतत्रतीर्थान्यनेकशः॥ सहस्रशतसंख्यानिप्रथितानिपदेपदे॥३४॥ आप्लुत्यतत्रतीर्थेषुयथोक्तंतत्रचर्षिभिः॥ कृत्वोपवासनियमंदत्वादा
नानिसर्वशः॥३५॥ अभिवाद्यमुनींस्तान्वैतत्रतीर्थनिवासिनः॥ उद्दिष्टमार्गःप्रययौयत्रभूयःसरस्वती॥३६॥ प्राङ्मुखंवैनिवृत्तेनवृष्टिर्वातहतायथा॥ ऋषी
णांनैमिषेयाणामवेक्षार्थंमहात्मनां॥३७॥ निवृत्तांतांसरिच्छ्रेष्ठांतत्रदृष्ट्वातुलांगली॥ बभूवविस्मितोराजन्बलःश्वेतानुलेपनः॥३८॥ जनमेजयउवाच
कस्मात्सरस्वतीब्रह्मन्निवृत्ताप्राङ्मुखीभवत्॥ व्याख्यातमेतदिच्छामिसर्वमध्वर्युसत्तम॥३९॥ कस्मिंश्चित्कारणेतत्रविस्मितोयदुनंदनः॥ निवृत्ताहेतुनाके
नकथमेवंसरिद्वरा॥४०॥ वैशंपायनउवाच पूर्वंकृतयुगेराजन्नैमिषेयास्तपस्विनः॥ वर्तमानेसुविपुलेसत्रेद्वादशवार्षिके॥४१॥ ऋषयोबहवोराजंस्त
त्सत्रमभिपेदिरे॥ उषित्वाचमहाभागास्तस्मिन्सत्रेयथाविधि॥४२॥ निवृत्तेनैमिषेयेवैसत्रेद्वादशवार्षिके॥ आजग्मुर्ऋषयस्तत्रबहवस्तीर्थकारणात्॥४३॥
ऋषीणांबहुलत्वात्तुसरस्वत्याविशांपते॥ तीर्थानिनगरायंतेकूलेवैदक्षिणेतदा॥४४॥ समंतपंचकंयावत्तावत्तेद्विजसत्तमाः॥ तीर्थलोभान्नरव्याघ्रनद्यास्तीरं
समाश्रिताः॥४५॥ जुह्वतांतत्रतेषांतुमुनीनांभावितात्मनां॥ स्वाध्यायेनातिमहताबभूवुःपूरितादिशः॥४६॥ अग्निहोत्रैस्ततस्तेषांक्रियमाणैर्महात्मनां॥ अ
शोभतसरिच्छ्रेष्ठादीप्यमानैःसमंततः॥४७॥ वालखिल्यामहाराजअश्मकुट्टाश्चतापसाः॥ दंतोलूखलिनश्चान्येप्रसंख्यानास्तथापरे॥४८॥ वायुभक्षाजला
हाराःपर्णभक्षाश्चतापसाः॥ नानानियमयुक्ताश्चतथास्थंडिलशायिनः॥४९॥ आसन्वैमुनयस्तत्रसरस्वत्याःसमीपतः॥ शोभयंतःसरिच्छ्रेष्ठांगंगामिव
दिवौकसः॥५०॥ शतशश्चसमापेतुर्ऋषयःसत्रयाजिनः॥ तेवकाशंनददृशुःसरस्वत्यामहाव्रताः॥५१॥ ततोयज्ञोपवीतैस्तेतत्तीर्थंनिर्मिमायवै॥ जुहुवुश्चा
ग्निहोत्रांश्चचक्रुश्चविविधाःक्रियाः॥५२॥ ततस्तमृषिसंघातंनिराशंचिंतयान्वितं॥ दर्शयामासराजेंद्रतेषामर्थेसरस्वती॥५३॥ ततःकुंजान्बहून्कृत्वासन्नि
वृत्तासरस्वती॥ ऋषीणांपुण्यतपसांकारुण्याज्जनमेजय॥५४॥ ततोनिवृत्त्यराजेंद्रतेषामर्थेसरस्वती॥ भूयःप्रतीच्यभिमुखीप्रसुस्रावसरिद्वरा॥५५॥ अमो
घागमनंकृत्वातेषांभूयोव्रजाम्यहं॥ इत्यद्भुतंमहच्चक्रेतदाराजन्महानदी॥५६॥ एवंसकुंजोराजन्वैनैमिषीयइतिस्मृतः॥ कुरुश्रेष्ठकुरुक्षेत्रेकुरुष्वमहतींक्रि
यां॥५७॥

र्थत्वेनश्रौतेषुप्रसिद्धं निर्मिमायनिर्मायेत्यर्थः॥५२॥ निराशंसरस्वतीजललाभेइत्यर्थः॥५३॥ कुंजान्आत्मनोवासस्थानानितीर्थविशेषानित्यर्थः॥५४॥५५॥५६॥५७॥

॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥छ॥ सप्तेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

तत्रकुंजान्बहून्दृष्ट्वानिवृत्तांचसरस्वतीं ॥ बभूवविस्मयस्तत्ररामस्याथमहात्मनः ॥ ५८ ॥ उपस्पृश्यतुतत्रापिविधिवद्यदुनंदनः ॥ दत्वादायान्द्विजातिभ्योभांडानिविविधानिच ॥ ५९ ॥ भक्ष्यंभोज्यंचविविधंब्राह्मणेभ्यःप्रदायच ॥ ततःप्रायाद्बलोराजन्पूज्यमानोद्विजातिभिः ॥ ६० ॥ सरस्वतीतीर्थवरंनानाद्विजगणायुतं ॥ बदरेंगुदकाश्मर्यप्लक्षाश्वत्थविभीतकैः ॥ ६१ ॥ कंकोलैश्चपलाशैश्चकरीरैःपीलुभिस्तथा ॥ सरस्वतीतीरुहैस्तरुभिर्विविधैस्तथा ॥ ६२ ॥ करूपकवरैश्चैवबिल्वैराम्रातकैस्तथा ॥ अतिमुक्तकपंडैश्चपारिजातैश्चशोभितं ॥ ६३ ॥ कदलीवनभूयिष्ठंदृष्टिकांतंमनोहरं ॥ वाय्वंबुफलपर्णादैर्दंतोलूखलिकैरपि ॥ ॥ ६४ ॥ तथाश्मकुट्टैर्वानेयैर्मुनिभिर्बहुभिर्वृतं ॥ स्वाध्यायघोषसंघुष्टंमृगयूथशताकुलं ॥ ६५ ॥ अहिंस्रैर्धर्मपरमैर्नृभिरत्यर्थसेवितं ॥ सप्तसारस्वतंतीर्थमाजगाम हलायुधः ॥ यत्रमंकणकःसिद्धस्तपस्तेपेमहामुनिः ॥ ६६ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवतीर्थयात्रायांसारस्वतोपाख्यानेसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥छ॥ जनमेजयउवाच सप्तसारस्वतंकस्मात्कश्चमंकणकोमुनिः ॥ कथंसिद्धःसभगवान्कश्चास्यनियमोऽभवत् ॥ १ ॥ कस्यवंशेसमुत्पन्नःकिंचाधीतंद्विजोत्तम ॥ एतदिच्छाम्यहंश्रोतुंविधिवद्द्विजसत्तम ॥ २ ॥ वैशंपायनउवाच राजन्सप्तसरस्वत्योयाभिर्व्याप्तमिदंजगत् ॥ आहूताबलवद्भिर्हितत्रतत्रसरस्वती ॥ ३ ॥ सुप्रभाकांचनाक्षीचविशालाचमनोरमा ॥ सरस्वतीचौघवतीसुरेणुर्विमलोदका ॥ ४ ॥ पितामहस्यमहतोवर्तमानेमहामखे ॥ वितते यज्ञवाटेचसंसिद्धेषुद्विजातिषु ॥ ५ ॥ पुण्याहघोषैर्विमलैर्वेदानांनिनदैस्तथा ॥ देवेषुचैवव्यग्रेषुतस्मिन्यज्ञविधौतदा ॥ ६ ॥ तत्रचैवमहाराजदीक्षितेप्रपितामहे ॥ यजतस्तस्यसत्रेणसर्वकामसमृद्धिना ॥ ७ ॥ मनसाचिंतिताह्यर्थाधर्मार्थकुशलैस्तदा ॥ उपतिष्ठंतिराजेंद्रद्विजातींस्तत्रतत्रह ॥ ८ ॥ जगुश्चतत्रगंधर्वाननृतुश्चाप्सरोगणाः ॥ वादित्राणिचदिव्यानिवादयामासुरंजसा ॥ ९ ॥ तस्ययज्ञस्यसंपत्त्यातुतुषुर्देवताअपि ॥ विस्मयंपरमंजग्मुःकिमुमानुषयोनयः ॥ १० ॥ वर्तमानेतथायज्ञेपुष्करस्थेपितामहे ॥ अब्रुवन्नृषयोराजन्नायंयज्ञोमहागुणः ॥ ११ ॥ नदृश्यतेसरिच्छ्रेष्ठायस्मादिहसरस्वती ॥ तच्छ्रुत्वाभगवान्प्रीतःसस्माराथसरस्वतीं ॥ १२ ॥ पितामहेनयजताआहूतापुष्करेषुवै ॥ सुप्रभानामराजेंद्रनाम्नातत्रसरस्वती ॥ १३ ॥ तांदृष्ट्वामुनयस्तुष्टास्त्वरायुक्तांसरस्वतीं ॥ पितामहंमानयंतींक्रतुंतेबहुमेनिरे ॥ १४ ॥ एवमेषासरिच्छ्रेष्ठापुष्करेषुसरस्वती ॥ पितामहार्थसंभूतातुष्ट्यर्थंचमनीषिणां ॥ १५ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ सस्मरुःस्मृतवंतः ॥ १७ ॥ १८ ॥ १९ ॥ गयेषुगयदेशेषु ॥ २० ॥ २१ ॥२२॥२३॥२४॥ २५ ॥ सुरेणुरुद्देशेपठीयद्यपितथापिपंचमेस्थानेकीर्त्यतेश्लोकानांपौर्वापर्यंवाविज्ञेयं ॥२६॥२७॥

नैमिषेमुनयोराजन्समागम्यसमासते ॥ तत्रचित्राःकथाह्यासन्वेदंप्रतिजनेश्वर ॥ १६ ॥ यत्रतेमुनयोह्यासन्नानास्वाध्यायवेदिनः ॥ तेसमागम्यमुनयःसस्मरुर्वैसरस्वतीं ॥ १७ ॥ सातुध्यातामहाराजऋषिभिःसत्रयाजिभिः ॥ समागतानांराजेंद्रसहायार्थंमहात्मनां ॥ १८ ॥ आजगाममहाभागातत्रपुण्यासरस्वती ॥ नैमिषेकांचनाक्षीतुमुनीनांसत्रयाजिनां ॥ १९ ॥ आगतासरितांश्रेष्ठातत्रभारतपूजिता ॥ गयस्ययजमानस्यगयेष्वेवमहाक्रतुं ॥ २० ॥ आहूतासरितांश्रेष्ठागययज्ञेसरस्वती ॥ विशालांतुगयस्याहुर्ऋषयःसंशितव्रताः ॥ २१ ॥ सरित्साहिमवत्पार्श्वात्प्रसुताशीघ्रगामिनी ॥ औद्दालकेस्तथायज्ञेयजतस्तस्यभारत ॥ २२ ॥ समेतेसर्वतःस्फीतेमुनीनांमंडलेतदा ॥ उत्तरेकोसलाभागेपुण्येराजन्महात्मनः ॥ २३ ॥ उद्दालकेनयजतापूर्वंध्यातासरस्वती ॥ आजगामसरिच्छ्रेष्ठातंदेशंमुनिकारणात् ॥ २४ ॥ पूज्यमानामुनिगणैर्वल्कलाजिनसंवृतैः ॥ मनोरमेतिविख्यातासाहितैर्मनसाकृता ॥ २५ ॥ सुरेणुर्ऋषभेद्वीपेपुण्येराजर्षिसेविते ॥ कुरोश्चयजमानस्यकुरुक्षेत्रेमहात्मनः ॥ २६ ॥ आजगाममहाभागासरिच्छ्रेष्ठासरस्वती ॥ ओघवत्यपिराजेंद्रवसिष्ठेनमहात्मना ॥ २७ ॥ समाहूताकुरुक्षेत्रेदिव्यतोयासरस्वती ॥ दक्षेणयजताचापिगंगाद्वारेसरस्वती ॥ २८ ॥ सुरेणुरितिविख्याताप्रसुताशीघ्रगामिनी ॥ विमलोदाभगवतीब्रह्मणायजतापुनः ॥ २९ ॥ समाहूताययौतत्रपुण्येहैमवतेगिरौ ॥ एकीभूतास्ततस्तास्तुतस्मिंस्तीर्थेसमागताः ॥ ३० ॥ सप्तसारस्वतंतीर्थंततस्तुप्रथितंभुवि ॥ इतिसप्तसरस्वत्योनामतःपरिकीर्तिताः ॥ ३१ ॥ सप्तसारस्वतंचैवतीर्थंपुण्यंतथास्मृतं ॥ शृणुमंकणकस्यापिकौमारब्रह्मचारिणः ॥ ३२ ॥ आपगामवगाढस्यराजन्प्रक्रीडितंमहत् ॥ दृष्ट्वायदृच्छयातत्रस्त्रियमंभसिभारत ॥ ३३ ॥ स्नायंतींरुचिरापांगींदिग्वाससमनिंदितां ॥ सरस्वत्यांमहाराजचस्कंदेवीर्यमंभसि ॥ ३४ ॥ तद्रेतःसतुजग्राहकलशेवैमहातपाः ॥ सप्तधाप्रविभागंतुकलशस्थंजगामह ॥ ३५ ॥ तत्रर्षयःसप्तजाताजज्ञिरेमरुतांगणाः ॥ वायुवेगोवायुबलोवायुहावायुमंडलः ॥ ३६ ॥ वायुज्वालोवायुरेतावायुचक्रश्चवीर्यवान् ॥ एवमेतेसमुत्पन्नामरुतांजनयिष्णवः ॥ ३७ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥स्नायंतींस्नांतीं ॥ ३४ ॥ ३५ ॥ ३६ ॥ मरुतांप्राणवायूनांएकोनपंचाशतां एतेषांतपसामरुतोदित्यामुत्पन्नाइतिकल्पांतरविषयोयमर्थः ॥ ३७ ॥

इदमत्यद्भुतंगजन्नित्यस्यनात्यर्थयोगनसिद्धस्यकायस्यपरिणामांनरंन्हासवृध्यादिकंनजायतेतस्तत्रप्रविष्टोन्नरसोऽपरिणममाणएवदेहान्निःसरति तंदृष्ट्वाआत्मनःसिद्धकायत्वंमत्वामंकणकोगर्वेणनृत्यति तदे

इदमत्यद्भुतंराजनशृणुवाश्चर्यंनरंभुवि॥ महर्षेश्चरितंयादृक्त्रिपुलोकेपुविश्रुतं॥ ३८॥ पुरामंकणकःसिद्धःकुशाग्रेणेतिनःश्रुतं॥ क्षतःकिलकरेराजंस्तस्यशाकरसोऽस्रवत्॥ ३९॥ सवैशाकरसंदृष्ट्वाहर्षाविष्टःप्रनृत्तवान्॥ ततस्तस्मिन्प्रनृत्तेवैस्थावरंजंगमंचयत्॥ ४०॥ प्रनृत्तमुभयंवीरतेजसातस्यमोहितं॥ ब्रह्मादिभिःसुरैराजनऋषिभिश्चतपोधनैः॥ ४१॥ विज्ञप्तोवैमहादेवऋषेरर्थेनराधिप॥ नायंनृत्येद्यथादेवतथात्वंकर्तुमर्हसि॥ ४२॥ ततोदेवोमुनिंदृष्ट्वाहर्षाविष्टमतीवह॥ सुराणांहितकामार्थमहादेवोऽभ्यभाषत॥ ४३॥ भोभोब्राह्मणधर्मज्ञकिमर्थंनृत्यतेभवान्॥ हर्षस्थानंकिमर्थंचतवेदमधिकंमुने॥ ४४॥ तपस्विनोधर्मपथेस्थितस्यद्विजसत्तम॥ ऋषिरुवाच किंनपश्यसिमेब्रह्मन्कराच्छाकरसंस्रुतं॥ ४५॥ यंदृष्ट्वासंप्रनृत्तोवैहर्षेणमहताविभो॥ तंप्रहस्याब्रवीद्देवोमुनिंरागेणमोहितं॥ ४६॥ अहंनविस्मयंविप्रगच्छामीतिप्रपश्यमां॥ एवमुक्त्वामुनिश्रेष्ठंमहादेवेनधीमता॥ ४७॥ अंगुल्यग्रेणराजेंद्रस्वांगुष्ठस्ताडितोभवत्॥ ततोभस्मक्षताद्राजन्निर्गतंहिमसन्निभं॥ ४८॥ तद्दृष्ट्वाव्रीडितोराजनसमुनिःपादयोर्गतः॥ मेनेदेवंमहादेवमिदंचोवाचविस्मितः॥ ४९॥ नान्यंदेवादहंमन्येरुद्रात्परतरंमहत्॥ सुरासुरस्यजगतोगतिस्त्वमसिशूलधृत्॥ ५०॥ त्वयासृष्टमिदंविश्वंवदंतीहमनीषिणः॥ त्वामेवसर्वंविशतिपुनरेवयुगक्षये॥ ५१॥ देवैरपिनशक्यस्त्वंपरिज्ञातुंकुतोमया॥ त्वयिसर्वेस्मदृश्यंतेभावायेजगतिस्थिताः॥ ५२॥ त्वामुपासंतवरदंदेवाब्रह्मादयोनघ॥ सर्वस्त्वमसिदेवानांकर्ताकारयिताचह॥ ५३॥ त्वत्प्रसादात्सुराःसर्वेमोदंतीहाकुतोभयाः॥ एवंस्तुत्वामहादेवंसऋषिःप्रणतोभवत्॥ ५४॥ यदिदंचापलंदेवकृतमेतत्स्मयादिकं॥ ततःप्रसादयामित्वांतपोमेनक्षरेदिति॥ ५५॥ ततोदेवःप्रीतमनास्तमृषिंपुनरब्रवीत्॥ तपस्तेवर्धतांविप्रमत्प्रसादात्सहस्रधा॥ ५६॥ आश्रमेचेहवत्स्यामित्वयासार्धमहंसदा॥ सप्तसारस्वतेचास्मिन्योमामर्चिष्यतेनरः॥ ५७॥ नतस्यदुर्लभंकिंचिद्भवितेहपरत्रवा॥ सारस्वतंचतेलोकंगमिष्यंतिनसंशयः॥ ५८॥ एतन्मंकणकस्यापिचरितंभूरितेजसः॥ सहिपुत्रःसुकन्यायामुत्पन्नोमातरिश्वना॥ ५९॥ इतिश्रीमहाभारतेश०गदा०बलदेवती०सारस्वतोपाख्यानेअष्टत्रिंशोऽध्यायः॥ ३८॥

वक्षयशून्यत्वंदेहस्यमहतीयोगसिद्धिःदेहस्यभस्मभूतत्वंतुमहीयसीसिद्धिरित्येतद्रुद्रोदर्शयंस्तस्यगर्वंपरिहरतीति॥ ३८॥ ३९॥ ४०॥ ४१॥ ४२॥ ४३॥ ४४॥ ४५॥ ४६॥ ४७॥ ४८॥ ४९॥ ५०॥ ५१॥ ५२॥ ५३॥ ५४॥ स्मयादिकंगर्वादिकं॥ ५५॥ ५६॥ ५७॥ ५८॥ ५९॥ इतिशल्यांतर्गतगदाप०नैलकंठीयेभारतभा०अष्टत्रिंशोऽध्यायः॥ ३८॥ ॥९॥

उषित्वेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

वैशंपायनउवाच उषित्वातत्ररामस्तुसंपूज्याश्रमवासिनः ॥ तथामंकणकेप्रीतिंशुभांचक्रेहलायुधः ॥ १ ॥ दत्वादानंद्विजातिभ्योरजनींतामुपोष्यच ॥ पूजि
तोमुनिसंघैश्चप्रातरुत्थायलांगली ॥ २ ॥ अनुज्ञाप्यमुनीन्सर्वान्स्पृष्ट्वातोयंचभारत ॥ प्रययौत्वरितोरामस्तीर्थहेतोर्महाबलः ॥ ३ ॥ ततस्त्वौशनसंतीर्थमाज
गामहलायुधः ॥ कपालमोचनंनामयत्रमुक्तोमहामुनिः ॥ ४ ॥ महताशिरसाराजन्ग्रस्तजंघोमहोदरः ॥ राक्षसस्यमहाराजरामक्षिप्तस्यवैपुरा ॥ ५ ॥ तत्रपूर्वं
तपस्तप्तंकाव्येनसुमहात्मना ॥ यत्रास्यनीतिरखिलाप्रादुर्भूतामहात्मनः ॥ ६ ॥ यत्रस्थश्चिंतयामासदैत्यदानवविग्रहं ॥ तत्प्राप्यचबलोराजंस्तीर्थप्रवरमुत्तमं ॥
॥ ७ ॥ विधिवद्वैददौवित्तंब्राह्मणानांमहात्मनां ॥ जनमेजयउवाच कपालमोचनंब्रह्मन्कथंयत्रमहामुनिः ॥ ८ ॥ मुक्तःकथंचास्यशिरोलग्नंकेनचहेतुना ॥
॥ ९ ॥ वैशंपायनउवाच पुरावैदंडकारण्येराघवेणमहात्मना ॥ वसताराजशार्दूलराक्षसान्शमयिष्यता ॥ जनस्थानेशिरश्छिन्नंराक्षसस्यदुरात्मनः ॥ १० ॥
क्षुरेणशितधारेणउत्पपातमहावने ॥ महोदरस्यतल्लग्नंजंघायांवैयदृच्छया ॥ ११ ॥ वनेविचरतोराजन्नस्थिभित्वास्फुरत्तदा ॥ सतेनलग्नेनतदाद्विजातिर्नशशा
क ह ॥ १२ ॥ अभिगंतुंमहाप्राज्ञस्तीर्थान्यायतनानिच ॥ सपूतिनाविस्रवतावेदनार्तोमहामुनिः ॥ १३ ॥ जगामसर्वतीर्थानिपृथिव्यांचेतिनःश्रुतं ॥ सगत्वास
रितःसर्वाःसमुद्रांश्चमहातपाः ॥ १४ ॥ कथयामासतत्सर्वमृषीणांभावितात्मनां ॥ आप्लुत्यसर्वतीर्थेषुनचमोक्षमवाप्तवान् ॥ १५ ॥ सतुशुश्रावविप्रेंद्रमुनीनां
वचनंमहत् ॥ सरस्वत्यास्तीर्थवरंख्यातमौशनसंतदा ॥ १६ ॥ सर्वपापप्रशमनंसिद्धिक्षेत्रमनुत्तमं ॥ सतुगत्वाततस्तत्रतीर्थमौशनसंद्विजः ॥ १७ ॥ ततऔशन
सेतीर्थेतस्योपस्पृशतस्तदा ॥ तच्छिरश्चरणंमुक्त्वापपातांतर्जलेतदा ॥ १८ ॥ विमुक्तस्तेनशिरसापरंसुखमवापह ॥ सचाप्यंतर्जलेमूर्धाजगामादर्शनंविभो ॥ १९ ॥
ततःसविशिराराजन्पूतात्मावीतकल्मषः ॥ आजगामाश्रमंप्रीतःकृतकृत्योमहोदरः ॥ २० ॥ सोथगत्वाश्रमंपुण्यंविप्रमुक्तोमहातपाः ॥ कथयामासतत्सर्वमृषी
णांभावितात्मनां ॥ २१ ॥ तेश्रुत्वावचनंतस्यततस्तीर्थस्यमानद ॥ कपालमोचनमितिनामचक्रुःसमागताः ॥ २२ ॥ सचापितीर्थप्रवरंपुनर्गत्वामहानृषिः ॥ पी
त्वापयःसुविपुलंसिद्धिमायात्तदामुनिः ॥ २३ ॥ तत्रदत्वाबहून्दायान्विप्रान्संपूज्यमाधवः ॥ जगामवृष्णिप्रवरोरुषङ्गोराश्रमंतदा ॥ २४ ॥ यत्रतप्तंतपोघोरं
मार्ष्टिषेणेनभारत ॥ ब्राह्मण्यंलब्धवांस्तत्रविश्वामित्रोमहामुनिः ॥ २५ ॥ सर्वकामसमृद्धंचतदाश्रमपदंमहत् ॥ मुनिभिर्ब्राह्मणैश्चैवसेवितंसर्वदाविभो ॥ २६ ॥

॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥ श्वोमरणंतपेत् अक्षयंस्वर्गमाप्नोतीत्यर्थः ॥३४॥३५॥ ब्राह्मणंब्रह्मसंघातोवेदसमूहइतियावत् ततःस्वार्थेष्यत्र ब्राह्मणंब्रह्मसंघातेइतिमेदिनी ॥ ३६ ॥ ३७ ॥ ३८ ॥

ततोहलधरःश्रीमान्ब्राह्मणैःपरिवारितः॥ जगामतत्रराजेंद्ररुषङ्गुस्तनुमत्यजत्॥ २७॥ रुषङ्गुर्ब्राह्मणोवृद्धस्तपोनित्यश्चभारत ॥ देहन्यासेकृतमनाविचिंत्यब्र
हुधातदा॥ २८॥ ततःसर्वानुपादायतनयान्वैमहातपाः॥ रुषंगुरब्रवीत्तत्रनयध्वंमांपृथूदकं ॥ २९॥ विज्ञायातीतवयसंरुषङ्गुंतेतपोधनाः ॥ तंचतीर्थमुपानि
न्युःसरस्वत्यास्तपोधनं॥ ३० ॥ सतैःपुत्रैस्तदाधीमानानीतोवैसरस्वतीं ॥ पुण्यांतीर्थशतोपेतांविप्रसंघैर्निषेवितां॥ ३१ ॥ सतत्रविधिनाराजन्नाप्लुत्यसुमहात
पाः॥ ज्ञात्वातीर्थगुणांश्चैवप्राहेदमृषिसत्तमः॥ ३२ ॥ सुप्रीतःपुरुषव्याघ्रसर्वान्पुत्रानुपासतः॥ सरस्वत्युत्तरेतीरेयस्त्यजेदात्मनस्तनुं॥ ३३॥ पृथूदकेजप्यपरो
नैनंश्वोमरणंतपेत्॥ तत्राप्लुत्यसधर्मात्माउपस्पृश्यहलायुधः॥ ३४॥ दत्वाचैवबहून्दायान्विप्राणांविप्रवत्सलः॥ ससर्जयत्रभगवाँल्लोकाँल्लोकपितामहः॥३५
यत्रार्ष्टिषेणःकौरव्यब्राह्मण्यंसंशितव्रतः॥ तपसामहताराजन्प्राप्तवानृषिसत्तमः॥ ३६॥ सिंधुद्वीपश्चराजर्षिर्देवापिश्चमहातपाः॥ ब्राह्मण्यंलब्धवान्यत्रविश्वा
मित्रस्तथामुनिः॥ ३७॥ महातपस्वीभगवानुग्रतेजामहातपाः॥ तत्राजगामबलवान्बलभद्रःप्रतापवान्॥ ३८॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणि
बलदेवतीर्थयात्रायांसारस्वतोपाख्यानेऊनचत्वारिंशोऽध्यायः॥ ३९॥ ॥७॥ जनमेजयउवाच कथमार्ष्टिषेणोभगवान्विपुलंतप्तवांस्तपः॥ सिं
धुद्वीपःकथंचापिब्राह्मण्यंलब्धवांस्तदा॥ १ ॥ देवापिश्चकथंब्रह्मन्विश्वामित्रश्चसत्तम॥ तन्ममाचक्ष्वभगवन्परंकौतूहलंहिमे॥ २॥ वैशंपायनउवाच पुरा
कृतयुगेराजन्नार्ष्टिषेणोद्विजोत्तमः॥ वसन्गुरुकुलेनित्यंनित्यमध्ययनेरतः॥ ३॥ तस्यराजन्गुरुकुलेवसतोनित्यमेवच॥ समाप्तिंनागमद्विद्यानापिवेदाविशां
पते॥ ४॥ सनिर्विण्णस्ततोराजंस्तपस्तेपेमहातपाः ॥ ततोवैतपसातेनप्राप्यवेदाननुत्तमान् ॥ ५॥ सविद्वान्वेदयुक्तश्चसिद्धश्चाप्यृषिसत्तमः॥ तत्रतीर्थेवरा
न्प्रादात्त्रीनेवसुमहातपाः॥ ६॥ अस्मिंस्तीर्थेमहानद्याअद्यप्रभृतिमानवः॥ आप्लुतोवाजिमेधस्यफलंप्राप्स्यतिपुष्कलं॥ ७॥ अद्यप्रभृतिनैवात्रभयंव्यालाद्भ
विष्यति॥ अपिचाल्पेनकालेनफलंप्राप्स्यतिपुष्कलं॥ ८॥ एवमुक्त्वामहातेजाजगामत्रिदिवंमुनिः॥ एवंसिद्धःसभगवानार्ष्टिषेणःप्रतापवान्॥ ९॥ तस्मिन्ने
वतदातीर्थेसिंधुद्वीपःप्रतापवान्॥ देवापिश्चमहाराजब्राह्मण्यंप्रापतुर्महत्॥ १० ॥ तथाचकौशिकस्तातनपोनित्योजितेंद्रियः॥ तपसावैसुतप्तेनब्राह्मणत्वमवा
प्तवान्॥ ११॥

इतिशल्यांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥७॥ कथमिति ॥ १ ॥ २॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९॥१०॥ ११॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ इतिशल्यांतर्गतगदाप०

गाधिर्नाममहानासीत्क्षत्रियःप्रथितोभुवि ॥ तस्यपुत्रोभवद्राजन्विश्वामित्रःप्रतापवान् ॥ १२ ॥ सराजाकौशिकस्तातमहायोग्यभवत्किल ॥ सपुत्रमभिषि
च्याथविश्वामित्रंमहातपाः ॥ १३ ॥ देहन्यासेमनश्चक्रेतमूचुःप्रणताःप्रजाः ॥ नगंतव्यंमहाप्राज्ञत्राहिचास्मान्महाभयात् ॥ १४ ॥ एवमुक्तःप्रत्युवाचततोगा
धिःप्रजास्ततः ॥ विश्वस्वजगतोगोप्ताभविष्यतिसुतोमम ॥ १५ ॥ इत्युक्त्वातुततोगाधिर्विश्वामित्रंनिवेश्यच ॥ जगामत्रिदिवंराजन्विश्वामित्रोभवन्नृपः ॥
॥ १६ ॥ नसशक्नोतिपृथिवींयत्नवानपिरक्षितुं ॥ ततःशुश्रावराजासराक्षसेभ्योमहाभयं ॥ १७ ॥ निर्ययौनगराच्चापिचतुरंगबलान्वितः ॥ सगत्वादूरमध्वानंव
सिष्ठाश्रममभ्ययात् ॥ १८ ॥ तस्यतेसैनिकाराजंश्चक्रुस्तत्रानयान्बहून् ॥ ततस्तुभगवान्विप्रोवसिष्ठोश्रममभ्ययात् ॥ १९ ॥ ददृशेथततःसर्वंभज्यमानंमहाव
नं ॥ तस्यक्रुद्धोमहाराजवसिष्ठोमुनिसत्तमः ॥ २० ॥ सृजस्वशबरान्घोरानितिस्वांगामुवाचह ॥ तथोक्तासाऽसृजद्धेनुःपुरुषान्घोरदर्शनान् ॥ २१ ॥ तेतुतद्बल
मासाद्यबभंजुःसर्वतोदिशं ॥ तच्छ्रुत्वाविद्रुतंसैन्यंविश्वामित्रस्तुगाधिजः ॥ २२ ॥ तपःपरंमन्यमानस्तपस्येवमनोदधे ॥ सोस्मिंस्तीर्थवरेराजन्सरस्वत्याःस
माहितः ॥ २३ ॥ नियमैश्चोपवासैश्चकर्षयन्देहमात्मनः ॥ जलाहारोवायुभक्षःपर्णाहारश्चसोभवत् ॥ २४ ॥ तथास्थंडिलशायीचयेचान्येनियमाःपृथक् ॥ अ
सकृत्तस्यदेवास्तुव्रतविघ्नंप्रचक्रिरे ॥ २५ ॥ नचास्यनियमाद्बुद्धिरपयातिमहात्मनः ॥ ततःपरेणयत्नेनतप्त्वाबहुविधंतपः ॥ २६ ॥ तेजसाभास्कराकारोगाधि
जःसमपद्यत ॥ तपसातुतथायुक्तंविश्वामित्रंपितामहः ॥ २७ ॥ अमन्यतमहातेजावरदोवरमस्यतत् ॥ सतुवव्रेवरंराजनस्यामहंब्राह्मणस्त्विति ॥ २८ ॥ तथेति
चाब्रवीद्ब्रह्मासर्वलोकपितामहः ॥ सलब्ध्वातपसोग्रेणब्राह्मणत्वंमहायशाः ॥ २९ ॥ विचचारमहींकृत्स्नांकृतकामःसुरोपमः ॥ तस्मिंस्तीर्थवरेरामःप्रदायवि
विधंवसु ॥ ३० ॥ पयस्विनीस्तथाधेनूर्यानानिशयनानिच ॥ अथवस्त्राण्यलंकारंभक्ष्यंपेयंचशोभनं ॥ ३१ ॥ अददन्मुदितोराजन्पूजयित्वाद्विजोत्तमान् ॥ ययौ
राजंस्ततोरामोबकस्याश्रममंतिकात् ॥ ३२ ॥ यत्रतेपेतपस्तीव्रंदाल्भ्योबकइतिश्रुतिः ॥ ३३ ॥ इतिश्रीमहाभारतेश०गदाप०बलदेवतीर्थयात्रायांसारस्वतो
पाख्यानेचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ॥ वैशंपायनउवाच ब्रह्मयोनेरवाकीर्णंजगामयदुनंदनः ॥ यत्रदाल्भ्योबकोराजन्नाश्रमस्थोमहातपाः ॥ १ ॥

नैलकंठीयेभारतभावदीपेचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ब्रह्मयोनेःब्राह्मण्योत्पादकात्तीर्थादवाकीर्णंनामदाल्भ्यसेवितंतीर्थंजगाम ॥ १ ॥

तस्यावाकीर्णत्वमाह जुहावेत्यादिना अवकीर्यंतेनीचैरवपात्यंतेशत्रवोस्मिन्नित्यवाकीर्णमित्यर्थः वैचित्रवीर्यिणःविचित्रवीर्यएववैचित्रवीर्यःसपितृत्वेनास्यस्यतस्यैवेत्यर्थः ॥२॥ प्रतापवान्राष्ट्रंजुहावेति

जुहावधृतराष्ट्रस्यराष्ट्रंवैचित्रवीर्यिणः॥ तपसाघोररूपेणकर्षयन्देहमात्मनः ॥ २ ॥ क्रोधेनमहताविष्टोधर्मात्मावैप्रतापवान्॥ पुराहिनैमिषीयाणांसत्रेद्वाद शवार्षिके॥ ३ ॥ वृत्तेविश्वजितोंतेवैपंचालानृषयोगमन्॥ तत्रेश्वरमयाचंतदक्षिणार्थंमनस्विनः ॥ ४॥ बलान्वितान्वत्सतरान्निर्व्याधीनेकविंशतिं॥ तानब्र वीद्बकोदाल्भ्योविभजध्वंपशूनिति॥ ५॥ पशूनेतानहंत्यक्त्वाभिक्षिष्येराजसत्तमं ॥ एवमुक्त्वाततोराजन्नृषीन्सर्वान्प्रतापवान्॥ ६॥ जगामधृतराष्ट्रस्यभ वनंब्राह्मणोत्तमः ॥ ससमीपगतोभूत्वाधृतराष्ट्रंजनेश्वरं॥ ७॥ अयाचतपशून्दाल्भ्यःसचैनंरुषितोब्रवीत्॥ यदृच्छयामृतादृष्ट्वागास्तदानृपसत्तमः॥ ८॥ ए तान्पशून्नयक्षिप्रंब्रह्मबंधोयदीच्छसि॥ ऋषिस्तथावचःश्रुत्वाचिंतयामासधर्मवित् ॥ ९॥ अहोबतनृशंसंवैवाक्यमुक्तोस्मिसंसदि॥ चिंतयित्वामुहूर्तेनरोषा विष्टोद्विजोत्तमः॥ १०॥ मतिंचक्रेविनाशायधृतराष्ट्रस्यभूपतेः॥ सतूत्कृत्यमृतानांवैमांसानिमुनिसत्तमः॥ ११ ॥ जुहावधृतराष्ट्रस्यराष्ट्रंनरपतेःपुरा॥ अवा कीर्णेसरस्वत्यास्तीर्थेप्रज्वाल्यपावकं॥ १२॥ बकोदाल्भ्योमहाराजनियमंपरमंस्थितः ॥ सतैरेवजुहावास्यराष्ट्रंमांसैर्महातपाः॥ १३॥ तस्मिंस्तुविधिवत्सत्रे संप्रवृत्तेसुदारुणे॥ अक्षीयततंतोराष्ट्रंधृतराष्ट्रस्यपार्थिव॥ १४॥ ततःप्रक्षीयमाणंतद्राज्यंतस्यमहीपतेः॥ छिद्यमानंयथानंतंवनंपरशुनाविभो॥ १५॥ बभू वापद्गतंतच्चव्यवकीर्णमचेतनं॥ दृष्ट्वातथावकीर्णंतुराष्ट्रंसमनुजाधिपः॥ १६॥ बभूवदुर्मनाराजंश्चिंतयामासचप्रभुः॥ मोक्षार्थमकरोद्यत्नंब्राह्मणैःसहितःपु रा॥ १७॥ नचश्रेयोध्यगच्छत्तुक्षीयतेराष्ट्रमेवच॥ यदासपार्थिवःखिन्नस्तेचविप्रास्तदानघ॥ १८॥ यदाचापिनशक्नोतिराष्ट्रंमोक्षयितुंनृप॥ अथवैप्राश्निकां स्तत्रपप्रच्छजनमेजय॥ १९॥ ततोवैप्राश्निकाःप्राहुःपशुंविप्रकृतस्त्वया॥ मांसैरभिजुहोतीतितवराष्ट्रंमुनिर्बकः ॥ २० ॥ तेननेहूयमानस्यराष्ट्रस्यास्यक्षयो महान् ॥ तस्यैतत्तपसःकर्मयेनतेह्यलयोमहान्॥ २१॥ अपांकुंजेसरस्वत्यास्तंप्रसादयपार्थिव॥ सरस्वतींततोगत्वासराजाबकमब्रवीत्॥ २२॥ निपत्यशिरसा भूमौप्रांजलिर्भरतर्षभ॥ प्रसादयेत्वांभगवन्नपराधंक्षमस्वमे॥ २३॥ ममदीनस्यलुब्धस्यमौर्ख्येणहतचेतसः॥ त्वंगतिस्त्वंचमेनाथप्रसादंकर्तुमर्हसि॥ २४॥

संबंधःसत्रेवृत्तेनिवृत्तेसतीत्युत्तरेणसंबंधः ॥ ३॥ पंचालान्विश्वजितोयज्ञस्यांतेअगमन् पंचालंराजानंययुरित्यर्थः ईश्वरंपंचालराजं ॥ ४ ॥ ५ ॥ एतान्पंचालराजदत्तान् स्वयंतत्रभागंनगृहीतवान्इत्यर्थः ॥ ६ ॥ ७ ॥ यदृच्छयेति गाःबलीबर्दान्धेनूश्च ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

॥२५॥२६॥२७॥२८॥ तत्रतीर्थेइतिशत्रुनाशकामैस्तत्रहोमजपादिकंकर्तव्यमित्याख्यानतात्पर्यं ॥२९॥३०॥३१॥३२॥३३॥३४॥३५॥३६॥३७॥३८॥३९॥४०॥ इ० श० ग० नै० भा० एकचत्वारिंशो

तंतथाविलपंतंतुशोकोपहतचेतसं ॥ दृष्ट्वातस्यकृपाजज्ञेराष्ट्रंतस्यव्यमोचयत् ॥ २५॥ ऋषिःप्रसन्नस्तस्याभूत्संरंभंचविहायसः ॥ मोक्षार्थंतस्यराज्यस्यजुहाव पुनराहुतिं ॥ २६॥मोक्षयित्वाततोराष्ट्रंप्रतिगृह्यपशून्बहून्॥ हृष्टात्मानैमिषारण्यंजगामपुनरेवसः॥ २७॥ धृतराष्ट्रोपिधर्मात्मास्वस्थचेतामहामनाः॥ स्वमेवन गरंराजन्प्रतिपेदेमहर्द्धिमत् ॥ २८॥ तत्रतीर्थेमहाराजबृहस्पतिरुदारधीः॥ असुराणामभावायभवायचदिवौकसां॥ २९॥ मांसैरभिजुहावेष्टिमक्षीयंततततोसु राः॥दैवतैरपिसंभग्नाजितकाशिभिराहवे ॥ ३०॥ तत्रापिविधिवद्दत्वाब्राह्मणेभ्योमहायशाः॥ वाजिनःकुंजरांश्चैवरथांश्चाश्वतरीयुतान्॥ ३१ ॥ रत्नानिचम हार्हाणिधनंधान्यंचपुष्कलं॥ ययौतीर्थंमहाबाहुर्यायातंपृथिवीपते॥३२॥ तत्रयज्ञेययातेश्चमहाराजसरस्वती॥सर्पिःपयश्चसुस्रावनाहुषस्यमहात्मनः॥३३॥ तत्रेष्ट्वापुरुषव्याघ्रोययातिःपृथिवीपतिः॥ अक्रामदूर्ध्वंमुदितोलेभेलोकांश्चपुष्कलान्॥३४॥ पुनस्तत्रचराज्ञस्तुययातेर्यजतःप्रभोः॥ औदार्यंपरमंकृत्वाभक्तिं चात्मनिशाश्वतीं॥ ३५॥ ददौकामान्ब्राह्मणेभ्योयान्यान्योमनसेच्छति॥ योयत्रस्थितएवेहआहूतोयज्ञसंस्तरे॥ ३६॥ तस्यतस्यसरिच्छ्रेष्ठागृहादिशयना दिकं ॥ षड्रसंभोजनंचैवदानंनानाविधंतथा ॥ ३७॥ तेमन्यमानाराज्ञस्तुसंप्रदानमनुत्तमं॥ राजानंतुष्टुवुःप्रीतादत्वाचैवाशिषःशुभाः॥ ३८ ॥ तत्रदेवाःस गंधर्वाःप्रीतायज्ञस्यसंपदा॥ विस्मितामानुषाश्चासन्दृष्ट्वातांयज्ञसंपदं॥ ३९ ॥ ततस्तालकेतुर्महाधर्मकेतुर्महात्माकृतात्मामहादाननित्यः॥ वसिष्ठापवाहंम हाभीमवेगंधृतात्माजितात्मासमभ्याजगाम॥ ४०॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवतीर्थयात्रायांसारस्वतोपाख्यानेएकचत्वारिंशो ऽध्यायः॥४१॥ ॥७॥ जनमेजयउवाच वसिष्ठस्यापवाहोसौभीमवेगःकथंनुसः॥किमर्थंचसरिच्छ्रेष्ठातमृषिंप्रत्यवाहयत्॥१॥ कथमस्याभवद्वैरंकारणंकिं चतत्प्रभो॥शंसपृष्टोमहाप्राज्ञनहितृप्यामिकथ्यति॥२॥ वैशंपायनउवाच विश्वामित्रस्यविप्रर्षेर्वसिष्ठस्यचभारत॥ भृशंवैरमभूद्राजंस्तपःस्पर्धाकृतंमहत् ॥३॥ आश्रमोवैवसिष्ठस्यस्थाणुतीर्थेभवन्महान्॥ पूर्वतःपार्श्वतश्चासीद्विश्वामित्रस्यधीमतः॥४॥ यत्रस्थाणुर्महाराजतप्तवान्परमंतपः॥ तत्रास्यकर्मतद्घोरंप्र वदंतिमनीषिणः॥५॥ यत्रेष्ट्वाभगवान्स्थाणुःपूजयित्वासरस्वतीं॥ स्थापयामासतत्तीर्थंस्थाणुतीर्थमितिप्रभो॥६॥ तत्रतीर्थेसुराःस्कंदमभ्यषिंचन्नराधिप॥ सैनापत्येनमहतासुरारिविनिबर्हणं॥ ७॥

ऽध्यायः॥४१॥ ॥७॥ वसिष्ठस्येति अपोह्यतेतीरेप्रास्यतेनेनेत्यपवाहस्तीर्थविशेषः॥१॥ कथ्यतित्वयिकथयतिसति॥२॥३॥४॥५॥६॥७॥

॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥२५॥२६॥२७॥२८॥२९॥३०॥ वयंऋषयःत्वत्तोधीमहिवेदान् कदाचिदनाद्रत्यामृतेषुऋषिषुसंप्रदायोच्छेदे

तस्मिन्सारस्वतेतीर्थेविश्वामित्रोमहामुनिः॥ वसिष्ठंचालयामासतपसोग्रेणतच्छृणु॥८॥ विश्वामित्रवसिष्ठौतावहन्यहनिभारत॥ स्पर्धातपःकृतांतीव्रांचक्र
तुस्तौतपोधनौ॥९॥ तत्राप्यधिकसंतापोविश्वामित्रोमहामुनिः॥ दृष्ट्वातेजोवसिष्ठस्यचिंतामभिजगामह॥१०॥ तस्यबुद्धिरियंह्यासीद्धर्मनित्यस्यभारत॥
इयंसरस्वतीतूर्णंमत्समीपंतपोधनं॥११ आनयिष्यतिवेगेनवसिष्ठंतपतांवरं॥ इहागतंद्विजश्रेष्ठंहनिष्यामिनसंशयः॥१२॥ एवंनिश्चित्यभगवान्विश्वामि
त्रोमहामुनिः॥ सस्मारसरितांश्रेष्ठांक्रोधसंरक्तलोचनः॥१३॥ साध्यातामुनिनातेनव्याकुलत्वंजगामह॥ जज्ञेचैनंमहावीर्यंमहाकोपंचभाविनी॥१४॥ त
तएनंवेपमानाविवर्णाप्रांजलिस्तदा॥ उपतस्थेमुनिवरंविश्वामित्रंसरस्वती॥१५॥ हतवीरायथानारीसाभवद्दुःखिताभृशं॥ ब्रूहिकिंकरवाणीतिप्रोवाचमुनि
सत्तमं॥१६॥ तामुवाचमुनिःक्रुद्धोवसिष्ठंशीघ्रमानय॥ यावदेनंनिहन्म्यद्यतच्छ्रुत्वाव्यथितानदी॥१७॥ प्रांजलिंतुततःकृत्वापुंडरीकनिभेक्षणा॥ प्राकंपतभृशं
भीतावायुनेवाहतालता॥१८॥ तथारूपांतुतांदृष्ट्वामुनिराहमहानदीं॥ अविचारंवसिष्ठंत्वमानयस्वांतिकंमम॥१९॥ सातस्यवचनंश्रुत्वाज्ञात्वापापंचिकीर्षितं॥
वसिष्ठस्यप्रभावंचजानंत्यप्रतिमंभुवि॥२०॥ साभिगम्यवसिष्ठंचइदमर्थमचोदयत्॥ यदुक्तासरितांश्रेष्ठाविश्वामित्रेणधीमता॥२१॥ उभयोःशापयोर्भीतावे
पमानापुनःपुनः॥ चिंतयित्वामहाशापंऋषिवित्रासिताभृशं॥२२॥ तांकृशांचविवर्णांचदृष्ट्वाचिंतासमन्वितां॥ उवाचराजन्धर्मात्मावसिष्ठोद्विपदांवरः॥२३॥
वसिष्ठउवाच॥ पाह्यात्मानंसरिच्छ्रेष्ठेवहमांशीघ्रगामिनी॥ विश्वामित्रःशपेद्धित्वांमाकृथास्त्वंविचारणां॥२४॥ तस्यतद्वचनंश्रुत्वाकृपाशीलस्यसासरित्॥ चिं
तयामासकौरव्यकिंकृत्वासुकृतंभवेत्॥२५॥ तस्याश्चिंतासमुत्पन्नावसिष्ठोमय्यतीवहि॥ कृतवान्हिदयांनित्यंतस्यकार्यंहितंमया॥२६॥ अथकूलेस्वकेराज
न्जपंतमृषिसत्तमं॥ जुह्वानंकौशिकंप्रेक्ष्यसरस्वत्यभ्यचिंतयत्॥२७॥ इदमंतरमित्येवंततःसासरितांवरा॥ कूलापहारमकरोत्स्वेनवेगेनसासरित्॥२८॥ तेन
कूलापहारेणमैत्रावरुणिरौह्यत॥ उह्यमानःसतुष्टावतदाराजन्सरस्वतीं॥२९॥ पितामहस्यसरसःप्रवृत्तासिसरस्वति॥ व्याप्तंचेदंजगत्सर्वंतवैवांभोभिरुत्त
मैः॥३०॥ त्वमेवाकाशगादेविमेघेषुसृजसेपयः॥ सर्वाश्चापस्त्वमेवेतित्वत्तोवयमधीमहि॥३१॥ पुष्टिर्द्युतिस्तथाकीर्तिःसिद्धिर्बुद्धिरुमातथा॥ त्वमेववाणी
स्वाहात्वंतवायत्तमिदंजगत्॥३२॥ त्वमेवसर्वभूतेषुवससीहचतुर्विधा॥ एवंसरस्वतीराजंस्तूयमानामहर्षिणा॥३३॥

सतीतिभावः॥ ३१॥३२॥३३॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ रक्षोग्रामणिसंमतमित्यत्रह्रस्वत्वमार्षं ॥ ३९ ॥ ४० ॥ ४१ ॥ इतिशल्यांतर्गतगदाप० नैलकंठीये भारतभावदीपे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ ५ ॥

वेगेनोवाहतंविप्रंविश्वामित्राश्रमंप्रति॥न्यवेदयतचाभीक्ष्णंविश्वामित्रायतंमुनिं॥३४॥तमानीतंसरस्वत्याद्दृष्ट्वाकोपसमन्वितः॥ अथान्वेषत्प्रहरणंवसिष्ठांत
करंतदा॥ ३५॥ तंतुक्रुद्धमभिप्रेक्ष्यब्रह्मवध्याभयान्नदी॥ अपोवाहवसिष्ठंतुप्राचींदिशमतंद्रिता॥३६॥ उभयोःकुर्वतीवाक्यंवंचयित्वाचगाधिजं॥ ततोपवा
हितंदृष्ट्वावसिष्ठमृषिसत्तमं॥ ३७॥ अब्रवीद्दुःखसंक्रुद्धोविश्वामित्रोह्यमर्षणः॥ यस्मान्मांत्वंसरिच्छ्रेष्ठेवंचयित्वापुनर्गता॥ ३८॥ शोणितंवहकल्याणिरक्षो
ग्रामणिसंमतं॥ततःसरस्वतीशप्ताविश्वामित्रेणधीमता॥३९॥अवहच्छोणितोन्मिश्रंतोयंसंवत्सरंतदा॥अथर्षयश्चदेवाश्चगंधर्वाप्सरसस्तदा॥४०॥ सरस्वतीं
तथादृष्ट्वाबभूवुर्भृशदुःखिताः॥ एवंवसिष्ठापवाहोलोकेख्यातोजनाधिप॥ आगच्छच्चपुनर्मार्गंस्वमेवसरितांवरा॥४१॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतग
दापर्वणिबलदेवती० सारस्व० द्विचत्वारिंशोऽध्यायः॥ ४२॥ ॥ ५॥ वैशंपायनउवाच साशप्तातेनक्रुद्धेनविश्वामित्रेणधीमता॥ तस्मिंस्तीर्थवरेशु
भ्रेशोणितंसमुपावहत्॥ १॥ अथाजग्मुस्ततोराजन्राक्षसास्तत्रभारत॥ तत्रतेशोणितंसर्वेपिबंतःसुखमासते॥ २॥ तृप्ताश्चसुभृशंतेनसुखिताविगतज्वराः॥
नृत्यंतश्चहसंतश्चयथास्वर्गजितस्तथा॥ ३॥ कस्यचित्त्वथकालस्यऋषयःसुतपोधनाः॥तीर्थयात्रांसमाजग्मुःसरस्वत्यांमहीपते॥४॥ तेषुसर्वेषुतीर्थेष्वाप्लुत्यमु
निपुंगवाः॥ प्राप्यप्रीतिंपरांचापितपोलुब्धाविशारदाः॥ ५॥ प्रययुर्हिततोराजन्येनतीर्थमसृग्वहं॥ अथागम्यमहाभागास्तत्तीर्थंदारुणंतदा॥६॥ दृष्ट्वातोयं
सरस्वत्याःशोणितेनपरिप्लुतं॥ पीयमानंचरक्षोभिर्बहुभिर्नृपसत्तम॥ ७॥ तान्दृष्ट्वाराक्षसान्राजन्मुनयःसंशितव्रताः॥ परित्राणेसरस्वत्याःपरंयत्नंप्रचक्रिरे॥
॥ ८॥ तेतुसर्वेमहाभागाःसमागम्यमहाव्रताः॥ आहूयसरितांश्रेष्ठामिदंवचनमब्रुवन्॥ ९॥ कारणंब्रूहिकल्याणिकिमर्थंतेह्रदोह्ययं॥ एवमाकुलतांयातःश्रु
त्वाऽध्यास्यामहेवयं॥१०॥ ततःसासर्वमाचष्टयथावृत्तंप्रवेपती॥दुःखितामथतांदृष्ट्वाऊचुस्तेवैतपोधनाः॥११॥कारणंश्रुतमस्माभिःशापश्चैवश्रुतोनघे॥ करि
ष्यंतितुयत्प्राप्तंसर्वएवतपोधनाः॥ १२॥ एवमुक्तासरिच्छ्रेष्ठामूचुस्तेथपरस्परं॥ विमोचयामहेसर्वेशापादेतांसरस्वतीं॥ १३॥ तेसर्वेब्राह्मणाराजंस्तपोभिर्नि
यमैस्तथा॥ उपवासैश्चविविधैर्यमैःकष्टव्रतैस्तथा॥ १४॥ आराध्यपशुभर्तारंमहादेवंजगत्पतिं॥ मोक्षयामासुस्तांदेवींसरिच्छ्रेष्ठांसरस्वतीं॥ १५॥

साशप्तेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ अध्यास्यामहे अध्यवसायंकरिष्यामहे ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

तेषांतुसाप्रभावेणप्रकृतिस्थासरस्वती ॥ प्रसन्नसलिलाजज्ञेयथापूर्वंतथैवहि ॥ १६ ॥ निर्मुक्ताचसरिच्छ्रेष्ठाविबभौसायथापुरा ॥ दृष्ट्वातोयंसरस्वत्यामुनिभिस्तैस्तथाकृतं ॥ १७ ॥ तानेवशरणंजग्मूराक्षसाःक्षुधितास्तथा ॥ कृत्वांजलिंततोराजन्राक्षसाःक्षुधयार्दिताः ॥ १८ ॥ ऊचुस्तान्वैमुनीन्सर्वान्कृपायुक्तान्पुनःपुनः ॥ वयंचक्षुधिताश्चैवधर्माद्धीनाश्चशाश्वतात् ॥ १९ ॥ नचनःकामकारोयंयद्वयंपापकारिणः ॥ युष्माकंचाप्रसादेनदुष्कृतेनचकर्मणा ॥ २० ॥ यत्पापंवर्धतेस्माकंयतःस्मोब्रह्मराक्षसाः ॥ योषितांचैवपापेनयोनिदोषकृतेनच ॥ २१ ॥ एवंहिवैश्यशूद्राणांक्षत्रियाणांतथैवच ॥ येब्राह्मणान्प्रद्विषंतितेभवंतीहराक्षसाः ॥ २२ ॥ आचार्यमृत्विजंचैवगुरुंवृद्धजनंतथा ॥ प्राणिनोयेऽवमन्यंतेतेभवंतीहराक्षसाः ॥ २३ ॥ तत्कुरुध्वमिहास्माकंतारणंद्विजसत्तमाः ॥ शक्ताभवंतःसर्वेषांलोकानामपितारणे ॥ २४ ॥ तेषांतुवचनंश्रुत्वातुष्टुवुस्तांमहानदीं ॥ मोक्षार्थंरक्षसांतेषामूचुःप्रयतमानसाः ॥ २५ ॥ क्षुतंकीटावपन्नंचयच्चोच्छिष्टाशितंभवेत् ॥ सकेशमवधूतंचरुदितोपहतंचयत् ॥ २६ ॥ एभिःसंसृष्टमन्नंचभागोसौरक्षसामिह ॥ तस्माज्ज्ञात्वासदाविद्वानेतान्यन्नानिविवर्जयेत् ॥ २७ ॥ राक्षसान्नमसौभुंक्तेयोभुंक्त्यन्नमीदृशं ॥ शोधयित्वाततस्तीर्थमृषयस्तेतपोधनाः ॥ २८ ॥ मोक्षार्थंराक्षसानांचनदींतांप्रत्यचोदयन् ॥ महर्षीणांमतंज्ञात्वाततःसासरितांवरा ॥ २९ ॥ अरुणामानयामासस्वांतनुंपुरुषर्षभ ॥ तस्यांतेराक्षसाःस्नात्वातनूस्त्यक्त्वादिवंगताः ॥ ३० ॥ अरुणायांमहाराजब्रह्मवध्यापहाहिसा ॥ एतमर्थमभिज्ञायदेवराजःशतक्रतुः ॥ ३१ ॥ तस्मिंस्तीर्थवरेस्नात्वाविमुक्तःपाप्मनाकिल ॥ जनमेजयउवाच किमर्थंभगवान्शक्रोब्रह्मवध्यामवाप्तवान् ॥ ३२ ॥ कथमस्मिंश्चतीर्थेवैआप्लुत्याकल्मषोभवत् ॥ वैशंपायनउवाच शृणुष्वैतदुपाख्यानंयथावृत्तंजनेश्वर ॥ ३३ ॥ यथाबिभेदसमयंनमुचेर्वासवःपुरा ॥ नमुचिर्वासवाद्भीतःसूर्यरश्मिंसमाविशत् ॥ ३४ ॥ तेनेंद्रःसख्यमकरोत्समयंचेदमब्रवीत् ॥ नचार्द्रेणनशुष्केणनरात्रौनापिचाहनि ॥ ३५ ॥ वधिष्याम्यसुरश्रेष्ठसखेसत्येनतेशपे ॥ एवंसकृत्वासमयंदृष्ट्वानीहारमीश्वरः ॥ ३६ ॥ चिच्छेदास्यशिरोराजन्नपांफेनेनवासवः ॥ तच्छिरोनमुचेश्छिन्नंपृष्ठतःशक्रमन्वियात् ॥ ३७ ॥ भोभोमित्रहन्पापेतिब्रुवाणंशक्रमंतिकात् ॥ एवंसशिरसातेनचोद्यमानःपुनःपुनः ॥ ३८ ॥ पितामहायसंतप्तएतमर्थंन्यवेदयत् ॥ तमब्रवील्लोकगुरुररुणायांयथाविधि ॥ ३९ ॥ इष्ट्वोपस्पृशदेवेंद्रतीर्थेपापभयापहे ॥ एषापुण्यजलाशक्रकृतामुनिभिरेवतु ॥ ४० ॥

॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥ इतिशल्यांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥७॥ सरस्वत्याइति ॥१॥२॥३॥४॥५॥६॥७॥ ८ ॥ ९॥

निगूढमस्यागमनमिहासीत्पूर्वमेवतु ॥ ततोभ्येत्यारुणांदेवींप्लावयामासवारिणा ॥ ४१ ॥सरस्वत्यारुणायाश्चपुण्योयंसंगमोमहान्॥इहत्वंयजदेवेंद्रदददाना
न्यनेकशः ॥ ४२ ॥ अत्राप्लुत्यसुघोरात्त्वंपातकाद्विप्रमोक्ष्यसे ॥ इत्युक्तःससरस्वत्याःकुंजेवैजनमेजय ॥ ४३ ॥ इष्ट्वायथावद्बलभिदरुणायामुपास्पृशत् ॥ समु
क्तःपाप्मनातेनब्रह्मवध्याकृतेनच ॥ ४४ ॥ जगामसंहृष्टमनास्त्रिदिवंत्रिदशेश्वरः ॥ शिरस्तच्चापिनमुचेस्तत्रैवाप्लुत्यभारत॥ लोकान्कामदुघान्प्राप्तमक्षयान्
राजसत्तम ॥ ४५॥ वैशंपायनउवाच तत्राप्युपस्पृश्यबलोमहात्मादत्वाचदानानिपृथग्विधानि॥ अवाप्यधर्मंपरमार्यकर्माजगामसोमस्यमहत्सुतीर्थं
॥ ४६ ॥ यत्रायजद्राजसूयेनसोमःसाक्षात्पुराविधिवत्पार्थिवेंद्र ॥ अत्रिर्धीमान्विप्रमुख्योबभूवहोतायस्मिन्क्रतुमुख्येमहात्मा ॥ ४७ ॥ यस्यांतेभूत्सुमहद्दान
वानांदैतेयानांराक्षसानांचदेवैः ॥ यस्मिन्युद्धंतारकाख्यंसुतीव्रंयत्रस्कंदस्तारकाख्यंजघान॥ ४८ ॥ सैनापत्यंलब्धवान्देवतानांमहासेनोयत्रदैत्यांतकर्ता॥
साक्षाच्चैवंन्यवसत्कार्तिकेयःसदाकुमारोयत्रसप्लक्षराजः॥४९॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवतीर्थयात्रायांसारस्व० त्रिचत्वारिंशोऽ
ध्यायः॥ ४३॥ ॥७॥ ॥७॥ जनमेजयउवाच सरस्वत्याःप्रभावोयमुक्तस्तेद्विजसत्तम ॥ कुमारस्याभिषेकंतुब्रह्मन्व्याख्यातुमर्हसि॥ १॥ य
स्मिन्देशेचकालेचयथाचवदतांवर॥ यैश्चाभिषिक्तोभगवान्विधिनायेनचप्रभुः॥ २ ॥ स्कंदोयथाचदैत्यानामकरोत्कदनंमहत् ॥ तथामेसर्वमाचक्ष्वपरंकौ
तूहलंहिमे॥ ३ ॥ वैशंपायनउवाच कुरुवंशस्यसदृशंकौतूहलमिदंतव ॥ हर्षमुत्पादयत्येववचोमेजनमेजय ॥ ४ ॥ हंततेकथयिष्यामिशृण्वानस्यनरा
धिप॥ अभिषेकंकुमारस्यप्रभावंचमहात्मनः॥ ५॥ तेजोमाहेश्वरंस्कन्नमग्नौप्रपतितंपुरा ॥ तत्सर्वंभक्षोभगवान्नाशकद्दग्धुमक्षयं ॥ ६ ॥ तेनासीदतितेजस्वी
दीप्तिमान्हव्यवाहनः॥ नचैवधारयामासगर्भंतेजोमयंतदा॥ ७॥ सगंगामभिसंगम्यनियोगाद्ब्रह्मणःप्रभुः॥ गर्भमाहितवान्दिव्यंभास्करोपमतेजसं॥ ८॥
अथगंगापितंगर्भमसहंतीविधारणे॥ उत्ससर्जगिरौरम्येहिमवत्यमरार्चिते॥ ९॥ सतत्रववृधेलोकानावृत्यज्वलनात्मजः॥ ददृशुर्ज्वलनाकारंतंगर्भमथकृत्ति
काः॥ १०॥ शरस्तंबेमहात्मानमनलात्मजमीश्वरं॥ ममायमितिताःसर्वाःपुत्रार्थिन्योभिचुक्रुशुः॥ ११ ॥ तासांविदित्वाभावंतंमातॄणांभगवान्प्रभुः॥ प्रस्नु
तानांपयःषड्भिर्वदनैरपिबत्तदा॥ १२॥ तंप्रभावंसमालक्ष्यतस्यबालस्यकृत्तिकाः॥ परंविस्मयमापन्नादेव्योदिव्यवपुर्धराः॥ १३॥ ॥१०॥११॥१२॥१३॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ बिडालवृषदंशौमार्जारजातिभेदौतत्सदृशाननौ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

यत्रोत्सृष्टःसभगवान्गंगयागिरिमूर्द्धनि ॥ सशैलकांचनःसर्वःसंबभौकुरुसत्तम ॥ १४ ॥ वर्धताचैवगर्भेणपृथिवीतेनरंजिता ॥ अतश्चसर्वेसंवृत्तागिरयःकांचनाकराः ॥ १५ ॥ कुमारःसुमहावीर्यःकार्त्तिकेयइतिस्मृतः ॥ गांगेयःपूर्वमभवन्महायोगबलान्वितः ॥ १६ ॥ शमेनतपसाचैववीर्येणचसमन्वितः ॥ ववृधेतीवराजेंद्रचंद्रवत्प्रियदर्शनः ॥ १७ ॥ सतस्मिन्कांचनेदिव्येशरस्तंबेश्रियावृतः ॥ स्तूयमानःसदाशेतेगंधर्वैर्मुनिभिस्तथा ॥ १८ ॥ तथैनमन्वनृत्यंतदेवकन्याःसहस्रशः ॥ दिव्यवादित्रनृत्यज्ञाःस्तुवंत्यश्चारुदर्शनाः ॥ १९ ॥ अन्वास्तेचनदीदेवंगंगावैसरितांवरा ॥ दधारपृथिवीचैनंबिभ्रतीरूपमुत्तमं ॥ २० ॥ जातकर्मादिकास्तत्रक्रियाश्चक्रेबृहस्पतिः ॥ वेदश्चैनंचतुर्मूर्तिरुपतस्थेकृतांजलिः ॥ २१ ॥ धनुर्वेदश्चतुष्पादःशस्त्रग्रामःससंग्रहः ॥ तत्रैनंसमुपातिष्ठत्साक्षाद्वाणीचकेवला ॥ २२ ॥ सददर्शमहावीर्यंदेवदेवमुमापतिं ॥ शैलपुत्र्यासमासीनंभूतसंघशतैर्वृतं ॥ २३ ॥ निकायाभूतसंघानांपरमाद्भुतदर्शनाः ॥ विकृताविकृताकाराविकृताभरणध्वजाः ॥ २४ ॥ व्याघ्रसिंहर्क्षवदनाबिडालमकराननाः ॥ वृषदंशमुखाश्चान्येगजोष्ट्रवदनास्तथा ॥ २५ ॥ उलूकवदनाःकेचिद्गृध्रगोमायुदर्शनाः ॥ क्रौंचपारावतनिभैर्वदनैरांकवैरपि ॥ २६ ॥ श्वाविच्छल्यकगोधानामजैडकगवांतथा ॥ सदृशानिवपूंष्यन्येतत्रतत्रव्यधारयन् ॥ २७ ॥ केचिच्छैलांबुदप्रख्याश्चक्रोद्यतगदायुधाः ॥ केचिदंजनपुंजाभाःकेचिच्छ्वेताचलप्रभाः ॥ २८ ॥ सप्तमातृगणाश्चैवसमाजग्मुर्विशांपते ॥ साध्याविश्वेथमरुतोवसवःपितरस्तथा ॥ २९ ॥ रुद्रादित्यास्तथासिद्धाभुजगादानवाःखगाः ॥ ब्रह्मास्वयंभूर्भगवान्सपुत्रःसहविष्णुना ॥ ३० ॥ शक्रस्तथाभ्ययाद्द्रष्टुंकुमारवरमच्युतं ॥ नारदप्रमुखाश्चापिदेवगंधर्वसत्तमाः ॥ ३१ ॥ देवर्षयश्चसिद्धाश्चबृहस्पतिपुरोगमाः ॥ पितरोजगतःश्रेष्ठादेवानामपिदेवताः ॥ ३२ ॥ तेपितत्रसमाजग्मुर्यामाधामाश्चसर्वशः ॥ सतुबालोपिबलवान्महायोगबलान्वितः ॥ ३३ ॥ अभ्याजगामदेवेशंशूलहस्तंपिनाकिनं ॥ तमाव्रजंतमालक्ष्यशिवस्यासीन्मनोगतं ॥ ३४ ॥ युगपच्छैलपुत्र्याश्चगंगायाःपावकस्यच ॥ कंनुपूर्वमयंबालोगौरवादभ्युपैष्यति ॥ ३५ ॥ अपिमामितिसर्वेषांतेषामासीन्मनोगतं ॥ तेषामेतमभिप्रायंचतुर्णामुपलक्ष्यसः ॥ ३६ ॥ युगपद्योगमास्थायससर्जविविधास्तनूः ॥ ततोभवच्चतुर्मूर्तिःक्षणेनभगवान्प्रभुः ॥ ३७ ॥ तस्यशाखोविशाखश्चनैगमेयश्चपृष्ठतः ॥ एवंसकृत्वाह्यात्मानंचतुर्धाभगवान्प्रभुः ॥ ३८ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ तस्यस्कंदस्यपृष्ठतःपश्चात्शाखविशाखनैगमेयाःआसन्तेस्कंदेनसहचत्वारः ॥ ३८ ॥

यतोरुद्रस्ततःस्कंदोजगामाद्भुतदर्शनः॥ विशाखस्तुययौयेनदेवीगिरिवरात्मजा॥ ३९ ॥ शाखोययौसभगवान्वायुमूर्तिर्विभावसुः ॥ नैगमेयोगमद्गंगांकु
मारःपावकप्रभः॥ ४० ॥ सर्वेभासुरदेहास्तेचत्वारःसमरूपिणः॥ तान्समभ्ययुरव्यग्रास्तदद्भुतमिवाभवत्॥ ४१ ॥ हाहाकारोमहानासीद्देवदानवरक्षसां॥तद्दृ
ष्ट्वामहदाश्चर्यमद्भुतंलोमहर्षणं॥ ४२ ॥ ततोरुद्रश्चदेवीचपावकश्चपितामहं ॥ गंगयासहिताःसर्वेप्रणिपेतुर्जगत्पतिं॥ ४३ ॥ प्रणिपत्यततस्तेतुविधिवद्राजपुं
गव॥ इदमूचुर्वचोराजन्कार्तिकेयप्रियेप्सया॥ ४४ ॥ अस्यबालस्यभगवन्नाधिपत्यंयथेप्सितं॥ अस्मत्प्रियार्थंदेवेशसदृशंदातुमर्हसि ॥ ४५ ॥ ततःसभग
वान्धीमान्सर्वलोकपितामहः॥ मनसाचिंतयामासकिमयंलभतामिति॥ ४६ ॥ ऐश्वर्याणिचसर्वाणिदेवगंधर्वरक्षसां ॥ भूतयक्षविहंगानांपन्नगानांचस
र्वशः॥ ४७॥ पूर्वमेवादिदेशासौनिकायेषुमहात्मनां॥ समर्थंचतमैश्वर्येमहामतिरमन्यत ॥ ४८ ॥ ततोमुहूर्तंसध्यात्वादेवानांश्रेयसिस्थितः ॥सैनापत्यंददौ
तस्मैसर्वभूतेषुभारत॥ ४९ ॥ सर्वदेवनिकायानांयेराजानःपरिश्रुताः॥ तान्सर्वान्व्यादिदेशास्मैसर्वभूतपितामहः॥ ५० ॥ततःकुमारमादायदेवाब्रह्मपुरोग
माः॥ अभिषेकार्थमाजग्मुःशैलेंद्रंसहितास्ततः॥ ५१ ॥ पुण्यांहैमवतींदेवींसरिच्छ्रेष्ठांसरस्वतीं॥ समंतपंचकेयावैत्रिपुलोकेषुविश्रुता॥ ५२ ॥ तत्रतीरेसरस्व
त्याःपुण्येसर्वगुणान्विते॥ निषेदुर्देवगंधर्वाःसर्वेसंपूर्णमानसाः॥५३॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवतीर्थयात्रायांसारस्व० कुमाराभि
षेकोपक्रमेचतुश्चत्वारिंशोऽध्यायः॥४४॥ ॥छ॥ ॥छ॥ वैशंपायनउवाच ततोभिषेकसंभारान्सर्वान्संभृत्यशास्त्रतः॥ बृहस्पतिःसमिद्धेग्नौजुहा
वाग्निंयथाविधि॥१॥ ततोहिमवतादत्तेमणिप्रवरशोभिते॥ दिव्यरत्नाचितेपुण्येनिषण्णंपरमासने॥२॥ सर्वमंगलसंभारैर्विधिमंत्रपुरस्कृतं॥आभिषेचनिकं
द्रव्यंगृहीत्वादेवतागणाः॥ ३ ॥ इंद्राविष्णूमहावीर्यौसूर्याचंद्रमसौतथा॥ धाताचैवविधाताचतथाचैवानिलानलौ॥४॥ पूष्णाभगेनार्यम्णाचअंशेनचविवस्व
ता॥ रुद्रश्चसहितोधीमान्मित्रेणवरुणेनच॥ ५॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यांचवृतःप्रभुः॥ विश्वेदेवैर्मरुद्भिश्चसाध्यैश्चपितृभिःसह ॥ ६ ॥ गंधर्वैरप्सरोभि
श्चयक्षराक्षसपन्नगैः ॥ देवर्षिभिरसंख्यातैस्तथाब्रह्मर्षिभिस्तथा ॥ ७॥ वैखानसैर्वालखिल्यैर्वाय्वाहारैर्मरीचिपैः ॥ भृगुभिश्चांगिरोभिश्चयतिभिश्चमहात्म
भिः॥ ८॥ सर्पैर्विद्याधरैःपुण्यैर्योगसिद्धैस्तथावृतः॥ पितामहःपुलस्त्यश्चपुलहश्चमहातपाः॥ ९॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ आभिषेचनिकंभांडंअभिषेकोपकरणं ॥ १९ ॥ सरस्वतीभिरुदकवतीभिर्नदीभिः ताभिरेववासमभिः ॥ २० ॥ २१ ॥ २२॥

अंगिराःकश्यपोत्रिश्चमरीचिर्भृगुरेवच ॥ क्रतुर्हरःप्रचेताश्चमनुर्दक्षस्तथैवच ॥१०॥ ऋतवश्चग्रहाश्चैवज्योतींषिचविशांपते ॥ मूर्तिमत्यश्चसरितोवेदाश्चैवसनातनाः ॥ ११ ॥ समुद्राश्चह्रदाश्चैवतीर्थानिविविधानिच ॥ पृथिवीद्यौर्दिशश्चैवपादपाश्चजनाधिप ॥१२॥ अदितिर्देवमाताचह्रीःश्रीःस्वाहासरस्वती ॥ उमाशचीसिनीवालीतथाचानुमतिःकुहूः ॥ १३ ॥ राकाचधिषणाचैवपत्न्यश्चान्यादिवौकसां ॥ हिमवांश्चैवविंध्यश्चमेरुश्चानेकशृंगवान् ॥ १४ ॥ ऐरावतःसानुचरःकलाःकाष्ठास्तथैवच ॥ मासार्धमासाऋतवस्तथाराञ्यहनीनृप ॥१५॥ उच्चैःश्रवाहयश्रेष्ठोनागराजश्चवासुकिः ॥ अरुणोगरुडश्चैववृक्षाश्चौषधिभिःसह ॥ ॥ १६ ॥ धर्मश्चभगवान्देवःसमाजग्मुर्हिसंगताः ॥ कालोयमश्चमृत्युश्चयमस्यानुचराश्चये ॥ १७॥ बहुलत्वाच्चनोक्तायेविविधादेवतागणाः ॥ तेकुमाराभिषेकार्थंसमाजग्मुस्ततस्ततः ॥ १८ ॥ जगृहुस्तेतदाराजन्सर्वएवदिवौकसः ॥ आभिषेचनिकंभांडंमंगलानिचसर्वशः ॥ १९ ॥ दिव्यसंभारसंयुक्तैःकलशैःकांचनैर्नृप ॥ सरस्वतीभिःपुण्याभिर्दिव्यतोयाभिरेवतु ॥ २० ॥ अभ्यषिंचन्कुमारंवैसंप्रहृष्टादिवौकसः ॥ सेनापतिंमहात्मानमसुराणांभयंकरं ॥ २१ ॥ पुरायथामहाराजवरुणंवैजलेश्वरं ॥ तथाभ्यषिंचद्भगवान्सर्वलोकपितामहः ॥ २२॥ कश्यपश्चमहातेजायेचान्येलोकविश्रुताः ॥ तस्मैब्रह्मादद्दौप्रीतोबलिनोवातरंहसः ॥ ॥ २३ ॥ कामवीर्यधरान्सिद्धान्महापारिषदान्प्रभुः ॥ नंदिसेनंलोहिताक्षंघंटाकर्णंचसंमतं ॥ २४ ॥ चतुर्थमस्यानुचरंख्यातंकुमुदमालिनं ॥ ततःस्थाणुर्महातेजामहापारिषदंप्रभुः ॥ २५॥ मायाशतधरंकामंकामवीर्यबलान्वितं ॥ ददौस्कंदायराजेंद्रसुरारिविनिबर्हणं ॥ २६॥ सहिदेवासुरयुद्धेदैत्यानांभीमकर्मणां ॥ जघानदोर्भ्यांसंक्रुद्धःप्रयुतानिचतुर्दश ॥ २७॥ तथादेवाददुस्तस्मैसेनांनैर्ऋतसंकुलां ॥ देवशत्रुक्षयकरीमजय्यांविष्णुरूपिणीं ॥ २८ ॥ जयशब्दंतथाचक्रुर्देवाःसर्वेसवासवाः ॥ गंधर्वायक्षरक्षांसिमुनयःपितरस्तथा २९ ॥ ततःप्रादादनुचरौयमःकालोपमावुभौ ॥ उन्माथश्चप्रमाथश्चमहावीर्यौमहाद्युती ॥ ३० ॥ सुभ्राजोभास्वरश्चैवयौतौसूर्यानुयायिनौ ॥ तौसूर्यःकार्तिकेयायददौप्रीतःप्रतापवान् ॥ ३१ ॥ कैलासशृंगसंकाशौश्वेतमाल्यानुलेपनौ ॥ सोमोप्यनुचरौप्रादान्मणिंसुमणिमेवच ॥ ३२ ॥ ज्वालाजिह्वंतथाज्योतिरात्मजायहुताशनः ॥ ददावनुचरौशूरौपरसैन्यप्रमाथिनौ ॥ ३३ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

परिघंवटंचैवभीमंचसुमहाबलं ॥ दहतिंदहनंचैवप्रचंडौवीर्यसंमतौ ॥ ३४ ॥ अंशोप्यनुचरान्पंचददौस्कंदायधीमते ॥ उत्क्रोशंपंचकंचैववज्रदंडधरावुभौ ॥
॥ ३५ ॥ ददावनलपुत्रायवासवःपरवीरहा ॥ तौहिशत्रून्महेंद्रस्यजघ्नतुःसमरेबहून् ॥ ३६ ॥ चक्रंविक्रमकंचैवसंक्रमंचमहाबलं ॥ स्कंदायत्रीननुचरान्ददौवि
ष्णुर्महायशाः ॥ ३७ ॥ वर्धनंनंदनंचैवसर्वविद्याविशारदौ ॥ स्कंदायददतुःप्रीतावश्विनौभिषजांवरौ ॥ ३८ ॥ कुंदंचकुसुमंचैवकुमुदंचमहायशाः ॥ डंबराडं
बरौचैवददौधातामहात्मने ॥ ३९ ॥ चक्रानुचक्रौबलिनौमेघचक्रौबलोत्कटौ ॥ ददौत्वष्टामहामायौस्कंदायानुचरावुभौ ॥ ४० ॥ सुव्रतंसत्यसंधंचददौमित्रोम
हात्मने ॥ कुमारायमहात्मानौतपोविद्याधरौप्रभुः ॥ ४१ ॥ सुदर्शनीयौवरदौत्रिषुलोकेषुविश्रुतौ ॥ सुव्रतंचमहात्मानंशुभकर्माणमेवच ॥ ४२ ॥ कार्तिकेयायसं
प्रादाद्विधातालोकविश्रुतौ ॥ पाणीतकंकालिकंचमहामायाविनावुभौ ॥ ४३ ॥ पूषाचपार्षदौप्रादात्कार्त्तिकेयायभारत ॥ बलंचातिबलंचैवमहावक्रौमहाब
लौ ॥ ४४ ॥ प्रददौकार्तिकेयायवायुर्भरतसत्तम ॥ यमंचातियमंचैवतिमिवक्रौमहाबलौ ॥ ४५ ॥ प्रददौकार्तिकेयायवरुणःसत्यसंगरः ॥ सुवर्चसंमहात्मानं
तथैवाप्यतिवर्चसं ॥ ४६ ॥ हिमवान्प्रददौराजन्हुताशनसुतायवै ॥ कांचनंचमहात्मानंमेघमालिनमेवच ॥ ४७ ॥ ददावनुचरौमेरुरग्निपुत्रायभारत ॥
स्थिरंचातिस्थिरंचैवमेरुरेवापरौददौ ॥ ४८ ॥ महात्मात्वग्निपुत्रायमहाबलपराक्रमौ ॥ उच्छृंगंचातिशृंगंचमहापाषाणयोधिनौ ॥ ४९ ॥ प्रददावग्निपुत्रायविंध्यः
पारिषदावुभौ ॥ संग्रहंविग्रहंचैवसमुद्रोपिगदाधरौ ॥ ५० ॥ प्रददावग्निपुत्रायमहापारिषदावुभौ ॥ उन्मादंशंकुकर्णंचपुष्पदंतंतथैवच ॥ ५१ ॥ प्रददावग्नि
पुत्रायपार्वतीशुभदर्शना ॥ जयंमहाजयंचैवनागौज्वलनसूनवे ॥ ५२ ॥ प्रददौपुरुषव्याघ्रवासुकिःपन्नगेश्वरः ॥ एवंसाध्याश्चरुद्राश्चवसवःपितरस्तथा ॥ ५३ ॥
सागसःसरितश्चैवगिरयश्चमहाबलाः ॥ ददुःसेनागणाध्यक्षान्शूलपट्टिशधारिणः ॥ ५४ ॥ दिव्यप्रहरणोपेतान्नानावेषविभूषितान् ॥ शृणुनामानिचाप्येषां
येन्येस्कंदस्यसैनिकाः ॥ ५५ ॥ विविधायुधसंपन्नाश्चित्राभरणभूषिताः ॥ शंकुकर्णोनिकुंभश्चपद्मःकुमुदएवच ॥ ५६ ॥ अनंतोद्वादशभुजस्तथाकृष्णोपकृष्ण
कौ ॥ घ्राणश्रवाःकपिस्कंधःकांचनाक्षोजलंधमः ॥ ५७ ॥ अक्षःसंतर्जनोराजन्कुनदीकस्तमोंतकृत् ॥ एकाक्षोद्वादशाक्षश्चतथैवैकजटःप्रभुः ॥ ५८ ॥ सहस्र
बाहुर्विकटोव्याघ्राक्षःक्षितिकंपनः ॥ पुण्यनामासुनामाचसुवक्त्रःप्रियदर्शनः ॥ ५९ ॥

॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५॥

परिश्रुतःकोकनदःप्रियमाल्यानुलेपनः॥अजोदरोगजशिराःस्कंधाक्षःशतलोचनः॥६०॥ज्वालाजिह्वःकरालाक्षःशितिकेशोजटीहरिः॥परिश्रुतःकोकनदः
कृष्णकेशोजटाधरः॥६१॥ चतुर्दंष्ट्रोष्टजिह्वश्चमेघनादःपृथुश्रवाः॥ विद्युताक्षोधनुर्वक्त्रोजाठरोमारुताशनः॥६२॥ उदाराक्षोरथाक्षश्चवज्रनाभोवसुप्रभः॥
समुद्रवेगोराजेंद्रशैलकंपीतथैवच॥६३॥ वृषोमेषःप्रवाहश्चतथानंदोपनंदकौ॥ धूम्रःश्वेतःकलिंगश्चसिद्धार्थोवरदस्तथा॥६४॥ प्रियकश्चैवनंदश्चगोनंदश्च
प्रतापवान्॥ आनंदश्चप्रमोदश्चस्वस्तिकोध्रुवकस्तथा॥६५॥ क्षेमवाहःसुवाहश्चसिद्धपात्रश्चभारत॥ गोव्रजःकनकापीडोमहापारिषदेश्वरः॥ ६६ ॥ गाय
नोहसनश्चैवबाणःखड्गश्चवीर्यवान्॥ वैतालीगतितालीचतथाकथकवातिकौ॥६७॥ हंसजः पंकदिग्धांगःसमुद्रोन्मादनश्चह॥ रणोत्कटःप्रहासश्चश्वेतसिद्ध
श्चनंदनः॥६८॥ कालकंठःप्रभासश्चतथाकुंभांडकोदरः॥ कालकक्षःसितश्चैवभूतानांमथनस्तथा॥६९॥ यज्ञवाहःसुवाहश्चदेवयाजीचसोमपः॥ मज्जान
श्चमहातेजाःक्रथक्राथौचभारत॥७०॥ तुहरश्चतुहारश्चचित्रदेवश्चवीर्यवान्॥ मधुरःसुप्रसादश्चकिरीटीचमहाबलः॥७१॥ वत्सलोमधुवर्णश्चकलशोदरएव
च॥ धर्मदोमन्मथकरःसूचीवक्त्रश्चवीर्यवान्॥ ७२ ॥ श्वेतवक्त्रःसुवक्त्रश्चचारुवक्त्रश्चपांडुरः॥ दंडबाहुःसुबाहुश्चरजःकोकिलकस्तथा॥ ७३ ॥ अचलःकनका
क्षश्चबालानामपियःप्रभुः॥ संचारकःकोकनदोगृध्रपत्रश्चजंबुकः॥ ७४ ॥ लोहाजवक्त्रोजवनःकुंभवक्त्रश्चकुंभकः॥ स्वर्णग्रीवश्चकृष्णौजाहंसवक्त्रश्चचंद्र
भः॥ ७५ ॥ पाणिकूर्चाश्चशंबूकःपंचवक्त्रश्चशिक्षकः॥ चाषवक्त्रश्चजंबूकःशाकवक्त्रश्चकुंजलः॥ ७६ ॥ योगयुक्तामहात्मानःसततंब्राह्मणप्रियाः॥ पैतामहा
महात्मानोमहापारिषदाश्चये॥७७॥ यौवनस्थाश्चबालाश्चवृद्धाश्चजनमेजय॥ सहस्रशःपारिषदाःकुमारमवतस्थिरे॥७८॥ वक्त्रैर्नानाविधैर्येतुशृणुतान्जन
मेजय॥ कूर्मकुक्कुटवक्त्राश्चशशोलूकमुखास्तथा॥ ७९ ॥ खरोष्ट्रवदनाश्चान्येवराहवदनास्तथा॥ मार्जारशशवक्त्राश्चदीर्घवक्त्राश्चभारत॥ ८० ॥ नकुलोलू
कवक्त्राश्चकाकवक्त्रास्तथापरे॥ आखुबभ्रुकवक्त्राश्चमयूरवदनास्तथा॥ ८१ ॥ मत्स्यमेषाननाश्चान्येअजाविमहिषाननाः॥ ऋक्षशार्दूलवक्त्राश्चद्वीपिसिंहा
ननास्तथा॥ ८२ ॥ भीमागजाननाश्चैवतथानक्रमुखाश्चये॥ गरुडाननाःकंकमुखावृककाकमुखास्तथा॥ ८३ ॥ गोखरोष्ट्रमुखाश्चान्येवृषदंशमुखास्तथा॥
महाजठरपादांगास्तारकाक्षाश्चभारत॥ ८४॥ पारावतमुखाश्चान्येतथावृषमुखाःपरे॥ कोकिलाभाननाश्चान्येश्येनतित्तिरिकाननाः॥ ८५॥

कृकलासमुखाश्चैव विरजोंबरधारिणः ॥ व्यालवक्त्राः शूलमुखाश्चंडवक्त्राः शुभाननाः ॥८६॥ आशीविषाश्चीरधरा गोनासावदनास्तथा ॥ स्थूलोदराः कृशांगा

श्च स्थूलांगाश्च कृशोदराः ॥८७॥ ह्रस्वग्रीवा महाकर्णा नानाव्यालविभूषणाः ॥ गजेंद्रचर्मवसनास्तथा कृष्णाजिनांबराः ॥८८॥ स्कंधेमुखा महाराज तथा ह्युदर

तोमुखाः ॥ पृष्ठेमुखा हनुमुखास्तथा जंघामुखा अपि ॥ ८९ ॥ पार्श्वाननाश्च बहवो नानादेशमुखास्तथा ॥ तथा कीटपतंगानां सदृशास्या गणेश्वराः ॥ ९० ॥ नाना

व्यालमुखाश्चान्ये बहुबाहुशिरोधराः ॥ नानावृक्षभुजाः केचित्कटिशीर्षास्तथापरे ॥ ९१ ॥ भुजंगभोगवदना नानागुल्मनिवासिनः ॥ चीरसंवृतगात्राश्च नाना

कनकवाससः ॥ ९२ ॥ नानावेषधराश्चैव नानामाल्यानुलेपनाः ॥ नानावस्त्रधराश्चैव चर्मवासस एव च ॥ ९३ ॥ उष्णीषिणो मुकुटिनः सुग्रीवाश्च सुवर्चसः ॥ कि

रीटिनः पंचशिखास्तथा कांचनमूर्धजाः ॥ ९४ ॥ त्रिशिखा द्विशिखाश्चैव तथा सप्तशिखाः परे ॥ शिखंडिनो मुकुटिनो मुंडाश्च जटिलास्तथा ॥ ९५ ॥ चित्रमाला

धराः केचित्केचिद्रोमाननास्तथा ॥ विग्रहैकरसा नित्यमजेयाः सुरसत्तमैः ॥ ९६ ॥ कृष्णा निर्मांसवक्त्राश्च दीर्घपृष्ठास्तनूदराः ॥ स्थूलपृष्ठा ह्रस्वपृष्ठाः प्रलंबोदरमे

हनाः ॥ ९७ ॥ महाभुजा ह्रस्वभुजा ह्रस्वगात्राश्च वामनाः ॥ कुब्जाश्च ह्रस्वजंघाश्च हस्तिकर्णशिरोधराः ॥ ९८ ॥ हस्तिनासाः कूर्मनासा वृकनासास्तथापरे ॥ दीर्घो

च्छ्वासा दीर्घजंघा विकराला ह्यधोमुखाः ॥ ९९ ॥ महादंष्ट्रा ह्रस्वदंष्ट्राश्चतुर्दंष्ट्रास्तथापरे ॥ वारणेंद्रनिभाश्चान्ये भीमा राजन्सहस्रशः ॥ १०० ॥ सुविभक्तशरीरा

श्च दीप्तिमंतः स्वलंकृताः ॥ पिंगाक्षाः शंकुकर्णाश्च रक्तनासाश्च भारत ॥ १०१ ॥ पृथुदंष्ट्रा महादंष्ट्राः स्थूलौष्ठा हरिमूर्धजाः ॥ नानापादौष्ठदंष्ट्राश्च नानाहस्तशिरो

धराः ॥ १०२ ॥ नानाचर्मभिराच्छन्ना नानाभाषाश्च भारत ॥ कुशला देशभाषासु जल्पंतोन्योन्यमीश्वराः ॥ १०३ ॥ हृष्टाः परिपतंति स्म महापारिषदास्तथा ॥

दीर्घग्रीवा दीर्घनखा दीर्घपादशिरोभुजाः ॥ १०४ ॥ पिंगाक्षा नीलकंठाश्च लंबकर्णाश्च भारत ॥ वृकोदरनिभाश्चैव केचिदंजनसन्निभाः ॥ १०५ ॥ श्वेताक्षा लो

हितग्रीवाः पिंगाक्षाश्च तथापरे ॥ कल्माषा बहवो राजंश्चित्रवर्णाश्च भारत ॥ १०६ ॥ चामरापीडकनिभाः श्वेतलोहितराजयः ॥ नानावर्णाः सवर्णाश्च मयूरसदृशा

प्रभाः ॥ १०७ ॥ पुनः प्रहरणान्येषां कीर्त्यमानानि मे शृणु ॥ शेषैः कृतः पारिषदैरायुधानां परिग्रहः ॥ १०८ ॥ पाशोद्यतकराः केचिद्व्यादितास्याः खराननाः ॥ पृथ्वा

क्षा नीलकंठाश्च तथा परिघबाहवः ॥ १०९ ॥ शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ॥ असिमुद्गरहस्ताश्च दंडहस्ताश्च भारत ॥ ११० ॥

॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ५ ॥ ॥ ५ ॥ शृणिवति ॥ १ ॥

गदाभुशुंडिहस्ताश्चतथातोमरपाणयः ॥ आयुधैर्विविधैर्घोरैर्महात्मानोमहाजवाः ॥ १११ ॥ महाबलामहावेगामहापारिषदास्तथा ॥ अभिषेकंकुमारस्यदृष्ट्वाहृष्टारणप्रियाः ॥ ११२ ॥ घंटाजालपिनद्धांगाननृतुस्तेमहौजसः ॥ एतेचान्येचबहवोमहापारिषदान्नृप ॥ ११३ ॥ उपतस्थुर्महात्मानंकार्तिकेयंयशस्विनं ॥ दिव्याश्चाप्यांतरिक्षाश्चपार्थिवाश्चानिलोपमाः ॥ ११४ ॥ व्यादिष्टादैवतैःशूराःस्कंदस्यानुचराभवन् ॥ तादृशानांसहस्राणिप्रयुतान्यर्बुदानिच ॥ अभिषिक्तंमहात्मानंपरिवार्योपतस्थिरे ॥ ११५ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलराम०सारस्व०स्कंदाभिषेकेपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ५ ॥

वैशंपायनउवाच शृणुमातृगणान्राजन्कुमारानुचरानिमान् ॥ कीर्त्यमानान्मयावीरसपत्नगणसूदनान् ॥ १ ॥ यशस्विनीनांमातॄणांशृणुनामानिभारत ॥ याभिर्व्याप्तास्त्रयोलोकाःकल्याणीभिश्चभागशः ॥ २ ॥ प्रभावतीविशालाक्षीपालितागोस्तनीतथा ॥ श्रीमतीबहुलाचैवतथैवबहुपुत्रिका ॥ ३ ॥ अप्सुजाताचगोपालीबृहदंबालिकातथा ॥ जयावतीमालतिकाध्रुवरत्नाभयंकरी ॥ ४ ॥ वसुदामाचदामाचविशोकानंदिनीतथा ॥ एकचूडामहाचूडाचक्रनेमिश्चभारत ॥ ५ ॥ उत्तेजनीजयत्सेनाकमलाक्ष्यथशोभना ॥ शत्रुंजयातथाचैवक्रोधनाशलभीखरी ॥ ६ ॥ माधवीशुभवक्त्राचतीर्थसेनिश्चभारत ॥ गीतप्रियाचकल्याणीरुद्ररोमामिताशना ॥ ७ ॥ मेघस्वनाभोगवतीसुभ्रूश्चकनकावती ॥ अलाताक्षीवीर्यवतीविद्युज्जिह्वाचभारत ॥ ८ ॥ पद्मावतीसुनक्षत्राकंदराबहुयोजना ॥ संतानिकाचकौरव्यकमलाचमहाबला ॥ ९ ॥ सुदामाबहुदामाचसुप्रभाचयशस्विनी ॥ नृत्यप्रियाचराजेंद्रशतोलूखलमेखला ॥ १० ॥ शतघंटाशतानंदाभगनंदाचभाविनी ॥ वपुष्मतीचंद्रशीताभद्रकालीचभारत ॥ ११ ॥ ऋक्षांबिकानिष्कुटिकावामाचत्वरवासिनी ॥ सुमंगलास्वस्तिमतीवृद्धिकामाजयप्रिया ॥ १२ ॥ धनदासुप्रसादाचभवदाचजलेश्वरी ॥ एडीभेडीसमेडीचवेतालजननीतथा ॥ १३ ॥ कंडूतिःकालिकाचैवदेवमित्राचभारत ॥ वसुश्रीःकोटराचैवचित्रसेनातथाचला ॥ १४ ॥ कुक्कुटिकाशंखलिकातथाशकुनिकानृप ॥ कुंडारिकाकौकुलिकाकुंभिकाथशतोदरी ॥ १५ ॥ उत्क्राथिनीजलेलाचमहावेगाचकंकणा ॥ मनोजवाकंटकिनीप्रघसापूतनातथा ॥ १६ ॥ केशयंत्रीत्रुटिर्वामाक्रोशनाथतडित्प्रभा ॥ मंदोदरीचमुंडीचकोटरामेघवाहिनी ॥ १७ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

पक्षालिकामकुलिकाज सुभगालंबिनीलंबातामचूडाविकाशिनी ॥ उर्ध्ववेणीधराचैवपिंगाक्षीलोहमेखला ॥ १८ ॥ पृथुवस्त्रामधुलिकामधुकुंभातथैवच ॥ वेणुवी राप्युर्जर्जरानना ॥ १९ ॥ ख्यातादहदहाचैवतथाधमधमानृप ॥ खंडखंडाचराजेंद्रपूषणामणिकुट्टिका ॥ २० ॥ अमोघाचैवकौरव्यतथालंबपयोधरा ॥ वेणुवी... जटालिकाकामचरी णाधराचैवपिंगाक्षीलोहमेखला ॥ २१ ॥ शशोलूकमुखीकृष्णाखरजंघामहाजवा ॥ शिशुमारमुखीश्वेतालोहिताक्षीविभीषणा ॥ २२ ॥ जटालिकाकामचरी दीर्घजिह्वाबलोत्कटा ॥ कालेहिकावामनिकामुकुटाचैवभारत ॥ २३ ॥ लोहिताक्षीमहाकायाहरिपिंडाचभूमिप ॥ एकत्वचासुकुसुमाकृष्णकर्णीचभारत ॥ २४ ॥ शंखकुंभश्रवाश्चैवभगदा क्षुरकर्णीचतुष्कर्णीकर्णप्रावरणास्तथा ॥ चतुष्पथनिकेताचगोकर्णीमहिषानना ॥ २५ ॥ खरकर्णीमहाकर्णीभेरीस्वनमहास्वना ॥ शंखकुंभश्रवाश्चैवभगदा चमहाबला ॥ २६ ॥ गणाचसुगणाचैवतथाभीत्यथकामदा ॥ चतुष्पथरताचैवभूतितीर्थान्यगोचरी ॥ २७ ॥ पशुदावित्तदाचैवसुखदाचमहायशाः ॥ पयो दागोमहिषदासुविशालाचभारत ॥ २८ ॥ प्रतिष्ठासुप्रतिष्ठाचरोचमानासुरोचना ॥ नौकर्णीमुखकर्णीचविशिरामंथिनीतथा ॥ २९ ॥ एकचंद्रामेघकर्णामेघ मालाविरोचना ॥ एताश्चान्याश्चबहवोमातरोभरतर्षभ ॥ ३० ॥ कार्तिकेयानुयायिन्योनानारूपाःसहस्रशः ॥ दीर्घनख्योदीर्घदंत्योदीर्घतुंड्यश्चभारत ॥ ३१ ॥ सबलामधुराश्चैवयौवनस्थाःस्वलंकृताः ॥ माहात्म्येनचसंयुक्ताःकामरूपधरास्तथा ॥ ३२ ॥ निर्मांसगात्र्यःश्वेताश्चतथाकांचनसन्निभाः ॥ कृष्णमेघनिभाश्चा न्याधूम्राश्चभरतर्षभ ॥ ३३ ॥ अरुणाभामहाभोगादीर्घकेश्यःसितांबराः ॥ ऊर्ध्ववेणीधराश्चैवपिंगाक्ष्योलंबमेखलाः ॥ ३४ ॥ लंबोदर्योलंबकर्णास्तथालंबप योधराः ॥ ताम्राक्ष्यस्ताम्रवर्णाश्चहर्यक्ष्यश्चतथापराः ॥ ३५ ॥ वरदाःकामचारिण्योनित्यंप्रमुदितास्तथा ॥ याम्यारौद्रास्तथासौम्याःकौबेर्योथमहाबलाः ॥ ३६ ॥ वारुण्योथचमाहेंद्र्यस्तथाग्नेय्यःपरंतप ॥ वायव्यश्चाथकौमार्योब्राह्म्यश्चभरतर्षभ ॥ ३७ ॥ वैष्णव्यश्चतथासौर्योवाराह्यश्चमहाबलाः ॥ रूपेणाप्सरसांतुल्या मनोहार्योमनोरमाः ॥ ३८ ॥ परपुष्टोपमावाक्येतथर्द्ध्यांधनदोपमाः ॥ शक्रवीर्योपमायुद्धेदीप्त्यावन्हिसमास्तथा ॥ ३९ ॥ शत्रूणांविग्रहेनित्यंभयदास्ताभवंत्यु त ॥ कामरूपधराश्चैवजवेवायुसमास्तथा ॥ ४० ॥ अचिंत्यबलवीर्याश्चतथाऽचिंत्यपराक्रमाः ॥ वृक्षचत्वरवासिन्यश्चतुष्पथनिकेतनाः ॥ ४१ ॥ गुहाश्मशान वासिन्यःशैलप्रस्रवणालयाः ॥ नानाभरणधारिण्योनानामाल्यांबरास्तथा ॥ ४२ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥

नानाविचित्रवेषाश्चनानाभाषास्तथैवच ॥ एतेचान्येचबहवोगणाःशत्रुभयंकराः ॥ ४३ ॥ अनुजग्मुर्महात्मानंत्रिदशेंद्रस्यसंमते ॥ ततःशक्रस्यवमदद्भगवा
न्पाकशासनः ॥ ४४ ॥ गुहायराजशार्दूलविनाशायसुरद्विषां ॥ महास्वनांमहाघंटांद्योतमानांसितप्रभां ॥ ४५ ॥ अरुणादित्यवर्णांचपताकांभरतर्षभ ॥ ददौप
शुपतिस्तस्मैसर्वभूतमहाचमूं ॥ ४६ ॥ उग्रांनानाप्रहरणांतपोवीर्यबलान्वितां ॥ अजेयांस्वगणैर्युक्तांनाम्नासेनांधनंजयां ॥ ४७ ॥ रुद्रतुल्यबलैर्युक्तांयोधानामयुते
स्त्रिभिः ॥ नसाविजानातिरणात्कदाचिद्विनिवर्तितुं ॥ ४८ ॥ विष्णुर्ददौवैजयंतींमालांबलविवर्धिनीं ॥ उमाददौविरजसीवाससीरविसप्रभे ॥ ४९ ॥ गंगाक
मंडलुंदिव्यममृतोद्भवमुत्तमं ॥ ददौप्रीत्याकुमारायदंडंचैवबृहस्पतिः ॥ ५० ॥ गरुडोदयितंपुत्रंमयूरंचित्रबर्हिणं ॥ अरुणस्ताम्रचूडंचप्रददौचरणायुधं ॥ ५१ ॥
नागंतुवरुणोराजाबलवीर्यसमन्वितं ॥ कृष्णाजिनंततोब्रह्माब्रह्मण्यायददौप्रभुः ॥ ५२ ॥ समरेषुजयंचैवप्रददौलोकभावनः ॥ सैनापत्यमनुप्राप्यस्कंदोदेव
गणस्यह ॥ ५३ ॥ शुशुभेज्वलितोर्चिष्मान्द्वितीयइवपावकः ॥ ततःपारिषदैश्चैवमातृभिश्चसमन्वितः ॥ ५४ ॥ ययौदैत्यविनाशायह्लादयन्सुरपुंगवान् ॥ सा
सेनानैर्ऋतीभीमासघंटोच्छ्रितकेतना ॥ ५५ ॥ सभेरीशंखमुरजासायुधासपताकिनी ॥ शारदीद्यौरिवाभातिज्योतिर्भिरिवशोभिता ॥ ५६ ॥ ततोदेवनिका
यास्तेनानाभूतगणास्तथा ॥ वादयामासुरव्यग्राभेरीःशंखांश्चपुष्कलान् ॥ ५७ ॥ पटहान्झर्झरांश्चैवक्रकचान्गोविषाणिकान् ॥ आडंबरान्गोमुखांश्चडिंडि
मांश्चमहास्वनान् ॥ ५८ ॥ तुष्टुवुस्तेकुमारंतुसर्वेदेवाःसवासवाः ॥ जगुश्चदेवगंधर्वानन्तृतुश्चाप्सरोगणाः ॥ ५९ ॥ ततःप्रीतोमहासेनस्त्रिदशेभ्योवरंददौ ॥ रिपून्
हंतास्मिसमरेयेवोवधचिकीर्षवः ॥ ६० ॥ प्रतिगृह्यवरंदेवास्तस्माद्विबुधसत्तमात् ॥ प्रीतात्मानोमहात्मानोमेनिरेनिहतान्रिपून् ॥ ६१ ॥ सर्वेषांभूतसंघानांह
र्षान्नादःसमुत्थितः ॥ अपूरयतलोकांस्त्रीन्वरेदत्तेमहात्मना ॥ ६२ ॥ सनिर्ययौमहासेनोमहत्यासेनयावृतः ॥ वधाययुधिदैत्यानांरक्षार्थंचदिवौकसां ॥ ६३ ॥
व्यवसायोजयोधर्मःसिद्धिर्लक्ष्मीर्धृतिःस्मृतिः ॥ महासेनस्यसैन्यानामग्रेजग्मुर्नराधिप ॥ ६४ ॥ सतयाभीमयादेवःशूलमुद्गरहस्तया ॥ ज्वलितालातधारिण्या
चित्राभरणवर्मया ॥ ६५ ॥ गदामुसलनाराचशक्तितोमरहस्तया ॥ दृप्तसिंहनिनादिन्याविनद्यप्रययौगुहः ॥ ६६ ॥ तंदृष्ट्वासर्वदैतेयाराक्षसादानवास्तथा ॥ व्य
द्रवंतदिशःसर्वाभयोद्विग्नाःसमंततः ॥ ६७ ॥ अभ्यद्रवंतदेवास्तान्विविधायुधपाणयः ॥ दृष्ट्वाचसततःक्रुद्धःस्कंदस्तेजोबलान्वितः ॥ ६८ ॥

॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥

शक्त्यसंभगवान्भीमंपुनःपुनरवाकिरत् ॥ आदधदात्मनस्तेजोहविषेद्धइवानलः ॥६९॥ अभ्यस्यमानेशक्त्यस्त्रेस्कंदेनामिततेजसा ॥ उल्काज्वालामहारौद्र
पपातवसुधातले ॥ ७० ॥ संह्रादयंतश्चतथानिर्घाताश्चापतन्क्षितौ ॥ यथांतकालसमयेसुघोराःस्युस्तथानृप ॥७१॥ क्षिप्तात्वेकायदाशक्तिःसुघोराऽनलसूनु
ना ॥ ततःकोट्योविनिष्पेतुःशक्तीनांभरतर्षभ ॥ ७२ ॥ ततःप्रीतोमहासेनोजघानभगवान्प्रभुः ॥ दैत्येंद्रंतारकंनाममहाबलपराक्रमं ॥ ७३ ॥ वृतंदैत्यायुतैर्वीरै
र्बलिभिर्दशभिर्नृप ॥ महिषंचाष्टभिःपद्मैर्वृतंसंख्येनिजघ्निवान् ॥ ७४ ॥ त्रिपादंचायुतशतैर्जघानदशभिर्वृतं ॥ ह्रदोदरंनिखर्वैश्चवृतंदशभिरीश्वरः ॥ ७५ ॥ ज
घानानुचरैःसार्धंविविधायुधपाणिभिः ॥ तथाकुर्वंतविपुलंनादंवध्यत्सुशत्रुषु ॥ ७६ ॥ कुमारानुचराराजन्पूरयंतोदिशोदश ॥ ननृतुश्चववल्गुश्चजहसुश्चमुदा
न्विताः ॥ ७७॥ शक्त्यस्त्रस्यतुराजेंद्रततोर्चिर्भिःसमंततः ॥ त्रैलोक्यंत्रासितंसर्वंजृंभमाणाभिरेवच ॥ ७८ ॥ दग्धाःसहस्रशोदैत्यानादैःस्कंदस्यचापरे ॥ पताक
यावधूताश्चहताःकेचित्सुरद्विषः ॥ ७९ ॥ केचिद्घंटारवत्रस्तानिषेदुर्वसुधातले ॥ केचित्प्रहरणैश्छिन्नाविनिष्पेतुर्गतायुषः ॥ ८० ॥ एवंसुरद्विषोनेकान्बलवा
नाततायिनः ॥ जघानसमरेवीरःकार्तिकेयोमहाबलः ॥ ८१ ॥ बाणोनामाथदैतेयोबलेःपुत्रोमहाबलः ॥ क्रौंचंपर्वतमाश्रित्यदेवसंघानबाधत ॥ ८२ ॥ तमभ्य
यान्महासेनःसुरशत्रुमुदारधीः ॥ सकार्तिकेयस्यभयात्क्रौंचंशरणमीयिवान् ॥८३॥ ततःक्रौंचंमहामन्युःक्रौंचनादनिनादितं ॥ शक्त्याबिभेदभगवान्कार्ति
केयोग्निदत्तया ॥ ८४ ॥ सशालस्कंधशबलंत्रस्तवानरवारणं ॥ प्रोड्डीनोद्भ्रांतविहगंविनिष्पतितपन्नगं ॥ ८५ ॥ गोलांगूलर्क्षसंघैश्चद्रवद्भिरनुनादितं ॥ कुरंग
मविनिर्घोषनिनादितवनांतरं ॥ ८६ ॥ विनिष्पतद्भिःशरभैःसिंहैश्चसहसाद्रुतैः ॥ शोच्यामपिदशांप्राप्तोरराजेवसपर्वतः ॥ ८७॥ विद्याधराःसमुत्पेतुस्तस्यशृं
गनिवासिनः ॥ किन्नराश्चसमुद्विग्नाःशक्तिपातरवोद्धताः ॥ ८८ ॥ ततोदैत्याविनिष्पेतुःशतशोथसहस्रशः ॥ प्रदीप्तात्पर्वतश्रेष्ठाद्विचित्राभरणस्रजः ॥ ८९ ॥
तान्निजघ्नुरतिक्रम्यकुमारानुचरामृधे ॥ सचैवभगवान्क्रुद्धोदैत्येंद्रस्यसुतंतदा ॥ ९० ॥ सहानुजंजघानाशुवृत्रंदेवपतिर्यथा ॥ बिभेदक्रौंचंशक्त्याचपावकिः
परवीरहा ॥ ९१ ॥ बहुधाचैकधाचैवकृत्वात्मानंमहाबलः ॥ शक्तिःक्षिप्तारणेतस्यपाणिमेतिपुनःपुनः ॥ ९२ ॥ एवंप्रभावोभगवांस्ततोभूयश्चपावकिः ॥ शौर्या
द्विगुणयोगेनतेजसायशसाश्रिया ॥९३॥ क्रौंचस्तेनविनिर्भिन्नोदैत्याश्चशतशोहताः ॥ ततःसभगवान्देवोनिहत्यविबुधद्विषः ॥ ९४ ॥

॥ ९५ ॥ ९६ ॥ ९७ ॥ तस्मैददितिकषायायतमसस्पारंदर्शयतिभगवान्सनत्कुमारस्तं स्कंद इत्याचक्षतइतिच्छांदोग्ये युतस्कंदस्य पूर्वपरिग्रहमाह केचिदिति ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥

सभज्यमानोविबुधैःपरंहर्षमवापह ॥ ततोदुंदुभयोराजन्नेदुःशंखाश्चभारत ॥ ९५॥ मुमुचुर्देवयोषाश्चपुष्पवर्षमनुत्तमं ॥ योगिनामीश्वरंदेवंशतशोथसहस्र

शः ॥ ९६॥ दिव्यगंधमुपादायववौपुण्यश्चमारुतः ॥ गंधर्वास्तुष्टुवुश्चैनंयज्वानश्चमहर्षयः ॥ ९७॥ केचिदेनंव्यवस्यंतिपितामहसुतंप्रभुं ॥ सनत्कुमारंसर्वेषां

ब्रह्मयोनिंतमग्रजं ॥ ९८ ॥ केचिन्महेश्वरसुतंकेचित्पुत्रंविभावसोः ॥ उमायाःकृत्तिकानांचगंगायाश्चवदंत्युत ॥ ९९ ॥ एकधात्रद्विधाचैवचतुर्धाचमहाबलं ॥

योगिनामीश्वरंदेवंशतशोथसहस्रशः ॥ १०० ॥ एतत्तेकथितंराजन्कार्तिकेयाभिषेचनं ॥ शृणुचैव सरस्वत्यास्तीर्थवरस्यपुण्यतां ॥ १०१ ॥ बभूवतीर्थप्रवरंहते

पुसुरशत्रुषु ॥ कुमारेणमहाराजत्रिविष्टपमिवापरं ॥ १०२॥ ऐश्वर्याणिचतत्रस्थोददावीशःपृथक्पृथक् ॥ ददौनैर्ऋतमुख्येभ्यस्त्रैलोक्यंपावकात्मजः ॥ १०३॥

एवंसभगवांस्तस्मिंस्तीर्थेदैत्यकुलांतकः ॥ अभिषिक्तोमहाराजदेवसेनापतिःसुरैः ॥ १०४ ॥ तैजसंनामतत्तीर्थंयत्रपूर्वमपांपतिः ॥ अभिषिक्तःसुरगणैर्वरु

णोभरतर्षभ ॥ १०५ ॥ अस्मिंस्तीर्थवरेस्नात्वास्कंदंचाभ्यर्च्यलांगली ॥ ब्राह्मणेभ्योददौरुक्मंवासांस्याभरणानिच ॥ १०६॥ उषित्वारजनींतत्रमाधवःपरवी

रहा ॥ पूज्यतीर्थवरंतच्चस्पृष्ट्वातोयंचलांगली ॥ १०७॥ हृष्टःप्रीतमनाश्चैवह्यभवन्माधवोत्तमः ॥ एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि ॥ यथाभिषिक्तोभग

वान्स्कंदोदेवैःसमागतैः ॥ १०८॥ इतिश्रीमहाभारतेशल्यप० गदापर्वणि बल० सारस्वतो० तारकवधेषट्चत्वारिंशोऽध्यायः ॥ ४६॥ ॥ ७॥ ॥ ७॥

जनमेजयउवाच अत्यद्भुतमिदंब्रह्मन्श्रुतवानस्मितत्त्वतः ॥ अभिषेकंकुमारस्यविस्तरेणयथाविधि ॥ १ ॥ यच्छ्रुत्वापूतमात्मानंविजानामितपोधन ॥ प्र

हृष्टानिचरोमाणिप्रसन्नंचमनोमम ॥ २ ॥ अभिषेकंकुमारस्यदैत्यानांचवधंतथा ॥ श्रुत्वामेपरमाप्रीतिर्भूयःकौतूहलंहिमे ॥ ३ ॥ अपांपतिःकथंह्यस्मिन्नभि

षिक्तःपुरासुरैः ॥ तन्मेब्रूहिमहाप्राज्ञकुशलोह्यसिसत्तम ॥ ४॥ वैशंपायनउवाच शृणुराजन्निदंचित्रंपूर्वकल्पेयथातथं ॥ आदौकृतयुगेराजन्वर्तमानेय

थाविधि ॥ ५॥ वरुणंदेवताःसर्वाःसमेत्येदमथाब्रुवन् ॥ यथास्मान्सुरराट्शक्रोभयेभ्यःपातिसर्वदा ॥ ६॥ तथात्वमपिसर्वासांसरितांवैपतिर्भव ॥ वासश्चते

सदादेवसागरेमकरालये ॥ ७॥ समुद्रोयंतववशेभविष्यतिनदीपतिः ॥ सोमेनसार्धंचतवहानिवृद्धीभविष्यतः ॥ ८॥

अत्यद्भुतमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥ १०८ ॥ इतिशल्यप० गदाप० नै० भारतभा० षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ७ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ ऐलविलःकुबेरः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

एवमस्त्वितितान्देवान्वरुणोवाक्यमब्रवीत् ॥ समागम्यततःसर्वेवरुणंसागरालयं ॥ ९ ॥ अपांपतिंप्रचक्रुर्हिविधिदृष्टेनकर्मणा ॥ अभिषिच्यततोदेवावरुणं
यादसांपतिं ॥ १० ॥ जग्मुःस्वान्येवस्थानानिपूजयित्वाजलेश्वरं ॥ अभिषिक्तस्ततोदेवैर्वरुणोपिमहायशाः ॥ ११ ॥ सरितःसागरांश्चैवनदांश्चापिसरांसिच ॥
पालयामासविधिनायथादेवान्शतक्रतुः ॥ १२ ॥ ततस्तत्राप्युपस्पृश्यदत्वाचविविधंवसु ॥ अग्नितीर्थंमहाप्राज्ञोजगामाथप्रलंबहा ॥ १३ ॥ नष्टोनदृश्यतेय
त्रशमीगर्भेहुताशनः ॥ लोकालोकविनाशेचप्रादुर्भूतेतदानघ ॥ १४ ॥ उपतस्थुःसुरायत्रसर्वलोकपितामहं ॥ अग्निःप्रनष्टोभगवान्कारणंचनविद्महे ॥ १५ ॥
सर्वभूतक्षयोराजन्संपादयविभोऽनलं ॥ जनमेजयउवाच किमर्थंभगवानग्निःप्रनष्टोलोकभावनः ॥ १६ ॥ विज्ञातश्चकथंदेवैस्तन्ममाचक्ष्वतत्त्वतः ॥
वैशंपायनउवाच भृगोःशापाद्भृशंभीतोजातवेदाःप्रतापवान् ॥ १७ ॥ शमीगर्भमथासाद्यननाशभगवांस्ततः ॥ प्रनष्टेतुतदावन्हौदेवाःसर्वेसवासवाः ॥
॥ १८ ॥ अन्वैषंततदानष्टंज्वलनंभृशदुःखिताः ॥ ततोऽग्नितीर्थमासाद्यशमीगर्भस्थमेवहि ॥ १९ ॥ ददृशुर्ज्वलनंतत्रवसमानंयथाविधि ॥ देवाःसर्वेनरव्याघ्रबृ
हस्पतिपुरोगमाः ॥ २० ॥ ज्वलनंतंसमासाद्यप्रीताऽभूवन्सवासवाः ॥ पुनर्यथागतंजग्मुःसर्वभक्षश्चसोऽभवत् ॥ २१ ॥ भृगोःशापान्महाभागयदुक्तंब्रह्मवादि
ना ॥ तत्राप्याप्लुत्यमतिमान्ब्रह्मयोनिंजगामह ॥ २२ ॥ ससर्जभगवान्यत्रसर्वलोकपितामहः ॥ तत्राप्लुत्यततोब्रह्मासहदेवैःप्रभुःपुरा ॥ २३ ॥ ससर्जतीर्थानि
तथादेवतानांयथाविधि ॥ तत्रस्नात्वाचदत्वाचवसूनिविविधानिच ॥ २४ ॥ कौबेरंप्रययौतीर्थंतत्रतप्त्वामहत्तपः ॥ धनाधिपत्यंसंप्राप्तोराजन्नैलविलःप्रभुः ॥
॥ २५ ॥ तत्रस्थमेवतंराजन्धनानिनिधयस्तथा ॥ उपतस्थुर्नरश्रेष्ठतत्तीर्थंलांगलीबलः ॥ २६ ॥ गत्वादत्वाचविधिवद्ब्राह्मणेभ्योधनंददौ ॥ ददृशेतत्रतत्स्थानंकौ
बेरकाननोत्तमे ॥ २७ ॥ पुरायत्रतपस्तप्तंविपुलंसमहात्मना ॥ यक्षराज्ञाकुबेरेणवरालब्धाश्चपुष्कलाः ॥ २८ ॥ धनाधिपत्यंसख्यंचरुद्रेणामिततेजसा ॥ सुर
त्वंलोकपालत्वंपुत्रंचनलकूबरं ॥ २९ ॥ यत्रलेभेमहाबाहोधनाधिपतिरंजसा ॥ अभिषिक्तश्चतत्रैवसमागम्यमरुद्गणैः ॥ ३० ॥ वाहनंचास्यतद्दत्तंहंसयुक्तंमनो
जवं ॥ विमानंपुष्पकंदिव्यंनैरृतैश्वर्यमेवच ॥ ३१ ॥ तत्राप्लुत्यबलोराजन्दत्वादायांश्चपुष्कलान् ॥ जगामत्वरितोरामस्तीर्थंश्वेतानुलेपनः ॥ ३२ ॥

॥२३॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ७ ॥ ततइति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥

निषेवितंसर्वसत्वैर्नाम्नाबदरपाचनं॥ नानर्तुकवनोपेतंसदापुष्पफलंशुभं॥ ३३ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवती० सारस्वतोपा०स
प्तचत्वारिंशोऽध्यायः॥ ४७॥ ॥७॥ वैशंपायनउवाच ततस्तीर्थवरंरामोययौबदरपाचनं॥ तपस्विसिद्धचरितंयत्रकन्याधृतव्रता॥ १ ॥ भरद्वाजस्य
दुहितारूपेणाप्रतिमाभुवि॥ श्रुतावतीनामविभोकुमारीब्रह्मचारिणी ॥ २ ॥ तपश्चचारसात्युग्रंनियमैर्बहुभिर्वृता॥ भर्तामेदेवराजःस्यादितिनिश्चित्यभामि
नी॥ ३ ॥ समास्तस्याव्यतिक्रांताबह्व्यःकुरुकुलोद्वह ॥ चरंत्यानियमांस्तांस्तांस्त्रीभिस्तीव्रान्सुदुश्चरान्॥ ४॥ तस्यास्तुतेनवृत्तेनतपसाचविशांपते॥ भक्त्या
चभगवान्प्रीतःपरयापाकशासनः॥ ५॥ आजगामाश्रमंतस्यास्त्रिदशाधिपतिःप्रभुः॥ आस्थायरूपंविप्रर्षेर्वसिष्ठस्यमहात्मनः॥ ६ ॥ सातंदृष्ट्वोग्रतपसंवसि
ष्ठंतपतांवरं॥ आचारैर्मुनिभिर्दृष्टैःपूजयामासभारत॥ ७॥ उवाचनियमज्ञाचकल्याणीसाप्रियंवदा॥ भगवन्मुनिशार्दूलकिमाज्ञापयसिप्रभो॥ ८॥ सर्वम
द्ययथाशक्तितवदास्यामिसुव्रत॥ शक्रभक्त्याचतेपाणिंनदास्यामिकथंचन॥९॥ व्रतैश्चनियमैश्चैवतपसाचतपोधन॥ शक्रस्तोषयितव्योवैमयात्रिभुवनेश्व
रः॥ १० ॥इत्युक्तोभगवान्देवःस्मयन्निवनिरीक्ष्यतां ॥ उवाचनियमज्ञात्वासांत्वयन्निवभारत ॥ ११ ॥ उग्रंतपश्चरसिवैविदितामेसिसुव्रते॥ यदर्थमयमारं
भस्तवकल्याणिहृद्गतः॥ १२ ॥ तच्चसर्वंयथाभूतंभविष्यतिवरानने ॥ तपसालभ्यतेसर्वंयथाभूतंभविष्यति॥ १३॥ यथास्थानानिदिव्यानिविबुधानांशुभा
नने॥ तपसातानिप्राप्याणितपोमूलंमहत्सुखं॥ १४॥ इतिकृत्वातपोघोरंदेहंसंन्यस्यमानवाः ॥ देवत्वंयांतिकल्याणिश्रृणुष्वैकंवचोमम॥ १५॥ पंचचैतानि
सुभगेबदराणिशुभव्रते॥ पचेत्युक्त्वातुभगवान्जगामबलसूदनः॥१६॥ आमंत्र्यतांतुकल्याणींततोजप्यंजजापसः॥ अविदूरेततस्तस्मादाश्रमात्तीर्थमुत्तमं
॥ १७॥ इंद्रतीर्थेतिविख्यातंत्रिषुलोकेषुमानद॥ तस्यजिज्ञासनार्थंसभगवान्पाकशासनः॥१८॥ बदराणामपचनंचकारविबुधाधिपः॥ ततःप्रतप्तासाराजन्
वाग्यताविगतक्लमा॥ १९॥ तत्पराशुचिसंवीतापावकेसमधिश्रयन्॥अपचद्राजशार्दूलबदराणिमहाव्रता॥२०॥तस्याःपचंत्याःसुमहान्कालोगात्पुरुषर्षभ॥
नचस्मतान्यपच्यंतदिनंचक्षयमभ्यगात्॥ २१ ॥ हुताशनेनदग्धश्चयस्तस्याःकाष्ठसंचयः॥ अकाष्ठमग्निंसादृष्ट्वास्वशरीरमथादहत्॥ २२॥ पादौप्रक्षिप्यसा
पूर्वंपावकेचारुदर्शना॥ दग्धौदग्धौपुनःपादावुपावर्तयतानघ॥२३॥

॥२०॥ २१ ॥ २२ ॥ दग्धाविति उपावर्तयतापेऽमेप्रसारितवती ॥ २३ ॥

यनोऽनिंदितायोगधर्मेणनिर्दोषाअतोनाचिंतयदिति स्वपादसंवर्धनक्षमापिदाहपीडांसेहेइतिधैर्योक्तिः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

चरणौदह्यमानौचनाचिंतयदनिंदिता ॥ कुर्वाणादुष्करंकर्ममहर्षिप्रियकाम्यया ॥ २४ ॥ नवैमनस्यंतस्यास्तुमुखभेदोथवाभवत् ॥ शरीरमग्निनादीप्यजलम
ध्येवहर्षिता ॥ २५ ॥ तच्चास्यावचनंनित्यमवर्तद्धृदिभारत ॥ सर्वथाबदराण्येवपक्तव्यानीतिकन्यका ॥ २६ ॥ सातन्मनसिकृत्वैवमहर्षेर्वचनंशुभा ॥ अपचद्ब
दराण्येवनचापच्यंतभारत ॥ २७ ॥ तस्यास्तुचरणौवह्निर्ददाहभगवान्स्वयं ॥ नचतस्यामनोदुःखंस्वल्पमप्यभवत्तदा ॥ २८ ॥ अथतत्कर्मदृष्ट्वास्याःप्रीतस्त्रिभु
वनेश्वरः ॥ ततःसंदर्शयामासकन्यायैरूपमात्मनः ॥ २९ ॥ उवाचचसुरश्रेष्ठस्तांकन्यांसुदृढव्रतां ॥ प्रीतोस्मितेशुभेभक्त्यातपसानियमेनच ॥ ३० ॥ तस्माद्यो
भिमतःकामःसतेसंपत्स्यतेशुभे ॥ देहंत्यक्त्वामहाभागेत्रिदिवेमयिवत्स्यसि ॥ ३१ ॥ इदंचतेतीर्थवरंस्थिरंलोकेभविष्यति ॥ सर्वपापापहंसुभ्रुनाम्नाबदरपाच
नं ॥ ३२ ॥ विख्यातंत्रिषुलोकेषुब्रह्मर्षिभिरभिप्लुतं ॥ अस्मिन्खलुमहाभागेशुभेतीर्थवरेनघे ॥ ३३ ॥ त्यक्त्वासप्तर्षयोजग्मुर्हिमवंतमरुंधतीं ॥ ततस्तेवैमहाभागा
गत्वातत्रसुसंशिताः ॥ ३४ ॥ वृत्त्यर्थंफलमूलानिसमाहर्तुंययुःकिल ॥ तेषांवृत्त्यर्थिनांतत्रवसतांहिमवद्वने ॥ ३५ ॥ अनावृष्टिरनुप्राप्तातदाद्वादशवार्षिकी ॥ ते
कृत्वाचाश्रमंतत्रन्यवसंततपस्विनः ॥ ३६ ॥ अरुंधत्यपिकल्याणीतपोनित्याभवत्तदा ॥ अरुंधतींततोदृष्ट्वातीव्रंनियममास्थितां ॥ ३७ ॥ अथागमत्त्रिनय
नःसुप्रीतोवरदस्तदा ॥ ब्राह्मंरूपंततःकृत्वामहादेवोमहायशाः ॥ ३८ ॥ तामभ्येत्याब्रवीद्देवोभिक्षामिच्छाम्यहंशुभे ॥ प्रत्युवाचततःसातंब्राह्मणंचारुदर्शनां ॥
॥ ३९ ॥ क्षीणान्नसंचयोविप्रबदराणीहभक्षय ॥ ततोब्रवीन्महादेवःपचस्वैतानिसुव्रते ॥ ४० ॥ इत्युक्तासाऽपचत्तानिब्राह्मणप्रियकाम्यया ॥ अधिश्रित्यसमिद्धे
ग्नौबदराणियशस्विनी ॥ ४१ ॥ दिव्यामनोरमाःपुण्याःकथाःशुश्रावसातदा ॥ अतीतासात्वनावृष्टिर्घोराद्वादशवार्षिकी ॥ ४२ ॥ अनश्नंत्याःपचंत्याश्चशृण्वं
त्याश्चकथाःशुभाः ॥ दिनोपमःसतस्याथकालोतीतःसुदारुणः ॥ ४२ ॥ ततस्तुमुनयःप्राप्ताःफलान्यादायपर्वतात् ॥ ततःसभगवान्प्रीतःप्रोवाचारुंधतींततः ॥
॥ ४४ ॥ उपसर्पस्वधर्मज्ञेयथापूर्वमिमानृषीन् ॥ प्रीतोस्मितवधर्मज्ञेतपसानियमेनच ॥ ४५ ॥ ततःसंदर्शयामासस्वरूपंभगवान्हरः ॥ ततोब्रवीत्तदातेभ्यस्त
स्याश्चचरितंमहत् ॥ ४६ ॥ भवद्भिर्हिमवत्पृष्ठेयत्तपःसमुपार्जितं ॥ अस्याश्चयत्तपोविप्रानसमंतन्मतंमम ॥ ४७ ॥ अनयाहितपस्विन्यातपस्तप्तंसुदुश्चरं ॥ अन
श्नंत्यापचंत्याचसमाद्वादशपारिताः ॥ ४८ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ विशेषःसमर्पितःवन्हौदेहोपिन्यस्तः पादयोःसमर्पणादितिभावः ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥

ततःप्रोवाचभगवांस्तामेवारुंधतींपुनः ॥ वरंवृणीष्वकल्याणियत्तेऽभिलषितंहृदि ॥ ४९ ॥ साब्रवीत्पृथुताम्राक्षीदेवंसप्तर्षिसंसदि ॥ भगवान्यदिमेप्रीतस्ती
र्थंस्यादिदमद्भुतं ॥ ५० ॥ सिद्धदेवर्षिदयितंनाम्नाबदरपाचनं ॥ तथास्मिन्देवदेवेशत्रिरात्रमुषितःशुचिः ॥ ५१ ॥ प्राप्नुयादुपवासेनफलंद्वादशवार्षिकं ॥ एवम
स्त्वितितांदेवःप्रत्युवाचतपस्विनीं ॥ ५२ ॥ सप्तर्षिभिस्तुतोदेवस्ततोलोकंययौतदा ॥ ऋषयोविस्मयंजग्मुस्तांदृष्ट्वाचाप्यरुंधतीं ॥ ५३ ॥ अश्रांतांचाविवर्णांच
क्षुत्पिपासाऽसमायुतां ॥ एवंसिद्धिःपराप्राप्ता अरुंधत्याविशुद्धया ॥ ५४ ॥ यथात्वयामहाभागेमदर्थंसंशितव्रते ॥ विशेषोहित्वयाभद्रेव्रतेह्यस्मिन्समर्पितः ॥
॥ ५५ ॥ तथाचेदंददाम्यद्यनियमेनसुतोषितः ॥ विशेषंतवकल्याणिप्रयच्छामिवरंवरे ॥ ५६ ॥ अरुंधत्यावरस्तस्यायोदत्तोवैमहात्मना ॥ तस्यचाहंप्रभावेनत
वकल्याणितेजसा ॥ ५७ ॥ प्रवक्ष्यामिपरंभूयोवरमत्रयथाविधि ॥ यस्त्वेकांरजनींतीर्थेवत्स्यतेसुसमाहितः ॥ ५८ ॥ सस्नात्वाप्राप्स्यतेलोकान्देहन्यासात्सुदु
र्लभान् ॥ इत्युक्त्वाभगवान्देवःसहस्राक्षःप्रतापवान् ॥ ५९ ॥ श्रुतावतींततःपुण्यांजगामत्रिदिवंपुनः ॥ गतेवज्रधरेराजंस्तत्रवर्षंपपातह ॥ ६० ॥ पुष्पाणांभर
तश्रेष्ठदिव्यानांपुण्यगंधिनां ॥ देवदुंदुभयश्चापिनेदुस्तत्रमहास्वनाः ॥ ६१ ॥ मारुतश्चववौपुण्यःपुण्यगंधोविशांपते ॥ उत्सृज्यतुशुभादेहंजगामास्यचभार्य
तां ॥ ६२ ॥ तपसोग्रेणतंलब्ध्वातेनरेमेसहाच्युत ॥ जनमेजयउवाच कातस्याभगवन्माताक्वसंवृद्धाचशोभना ॥ ६३ ॥ श्रोतुमिच्छाम्यहंविप्रपरंकौतूहलं
हिमे ॥ वैशंपायनउवाच भरद्वाजस्यविप्रर्षेःस्कन्नंरेतोमहात्मनः ॥ ६४ ॥ दृष्ट्वाप्सरसमायांतींघृताचींपृथुलोचनां ॥ सतुजग्राहतद्रेतःकरेणजपतांवरः ॥
॥ ६५ ॥ तदापतत्पर्णपुटेतत्रसासंभवत्सुता ॥ तस्यास्तुजातकर्मादिकृत्वासर्वंतपोधनः ॥ ६६ ॥ नामचास्याःसकृतवान्भरद्वाजोमहामुनिः ॥ श्रुतावतीतिधर्मा
त्मादेवर्षिगणसंसदि ॥ स्वेचतामाश्रमेन्यस्यजगामहिमवद्वनं ॥ ६७ ॥ तत्राप्युपस्पृश्यमहानुभावोवसूनिदत्त्वाचमहाद्विजेभ्यः ॥ जगामतीर्थंसुसमाहितात्माश
क्रस्यवृष्णिप्रवरस्तदानीं ॥ ६८ ॥ इतिश्रीमहाभारतेश० गदाप० बलदेवतीर्थ० सारस्वतो० बदरपाचनतीर्थकथनेअष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ४९ ॥
वैशंपायनउवाच इंद्रतीर्थंततोगत्वायदूनांप्रवरोबलः ॥ विप्रेभ्योधनरत्नानिददौस्नात्वायथाविधि ॥ १ ॥ तत्रत्यमरराजोसावीजेक्रतुशतेनच ॥ बृहस्पतेश्च
देवेशःप्रददौविपुलंधनं ॥ २ ॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥ इतिशल्यांतर्गतगदापर्वणि नैलकंठीये भारतभावदीपे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ४९ ॥ इंद्रतीर्थमिति ॥ १ ॥ २ ॥

जारूथ्यानुष्ठान् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ साजाविअजाभिरविभिश्चसहितंदानं ॥ १० ॥ ११ ॥ आनयामासमुनीनित्यनुषज्यते राजसूयंकर्तुमितिशेषः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

निरर्गलान्सजारूथ्यान्सर्वान्विविधदक्षिणान् ॥ आजहारक्रतूंस्तत्रयथोक्तान्वेदपारगैः ॥ ३ ॥ तान्क्रतून्भरतश्रेष्ठशतकृत्वोमहाद्युतिः ॥ पूरयामासविधिवत्त तःख्यातःशतक्रतुः ॥ ४ ॥ तस्यनाम्नाचतत्तीर्थंशिवंपुण्यंसनातनं ॥ इंद्रतीर्थमितिख्यातंसर्वपापप्रमोचनं ॥ ५ ॥ उपस्पृश्यचतत्रापिविधिवन्मुसलायुधः ॥ ब्रा ह्मणान्पूजयित्वाचसदाच्छादनभोजनैः ॥ ६ ॥ शुभंतीर्थवरंतस्माद्रामतीर्थंजगामह ॥ यत्ररामोमहाभागोभार्गवःसुमहातपाः ॥ ७ ॥ असकृत्पृथिवींजित्वा हतक्षत्रियपुंगवां ॥ उपाध्यायंपुरस्कृत्यकश्यपंमुनिसत्तमं ॥ ८ ॥ अयजद्वाजपेयेनसोऽश्वमेधशतेनच ॥ प्रददौदक्षिणांचैवपृथिवींवैससागरां ॥ ९ ॥ दत्वाचदा नंविविधंनानारत्नसमन्वितं ॥ सगोहस्तिकदासीकंसाजाविगतवान्वनं ॥ १० ॥ पुण्येतीर्थवरेतत्रदेवब्रह्मर्षिसेविते ॥ मुनींश्चैवाभिवाद्याथयमुनातीर्थमागमत् ॥ ११ ॥ यत्रानयामासतदाराजसूयंमहीपते ॥ पुत्रोदितेर्महाभागोवरुणोवैसितप्रभः ॥ १२ ॥ तत्रनिर्जित्यसंग्रामेमानुषान्दैवतांस्तथा ॥ वरंक्रतुंसमाजह्रेव रुणःपरवीरहा ॥ १३ ॥ तस्मिन्क्रतुवरेवृत्तेसंग्रामःसमजायत ॥ देवानांदानवानांचत्रैलोक्यस्यभयावहः ॥ १४ ॥ राजसूयेक्रतुश्रेष्ठेनिवृत्तेजनमेजय ॥ जाय तेसुमहाघोरःसंग्रामःक्षत्रियान्प्रति ॥ १५ ॥ तत्रापिलांगलीदेवऋषीनभ्यर्च्यपूजया ॥ इतरेभ्योप्यदाद्दानमर्थिभ्यःकामदोविभुः ॥ १६ ॥ वनमालीततोहृष्टः स्तूयमानोमहर्षिभिः ॥ तस्मादादित्यतीर्थंचजगामकमलेक्षणः ॥ १७ ॥ यत्रेष्ट्वाभगवान्ज्योतिर्भास्कररोराजसत्तम ॥ ज्योतिषामाधिपत्यंचप्रभावंचाभ्यपद्य त ॥ १८ ॥ तस्यानद्यास्तुतीरेवैसर्वेदेवाःसवासवाः ॥ विश्वेदेवाःसमरुतोगंधर्वाप्सरसश्चह ॥ १९ ॥ द्वैपायनःशुकश्चैवकृष्णश्चमधुसूदनः ॥ यक्षाश्चराक्षसा श्चैवपिशाचाश्चविशांपते ॥ २० ॥ एतेचान्येचबहवोयोगसिद्धाःसहस्रशः ॥ तस्मिंस्तीर्थेसरस्वत्याःशिवेपुण्येपरंतप ॥ २१ ॥ तत्रहत्वापुराविष्णुरसुरौमधुकैट भौ ॥ आप्लुत्यभरतश्रेष्ठतीर्थप्रवरउत्तमे ॥ २२ ॥ द्वैपायनश्चधर्मात्मातत्रैवाप्लुत्यभारत ॥ संप्राप्यपरमंयोगंसिद्धिंचपरमांगतः ॥ २३ ॥ असितोदेवलश्चैवत स्मिन्नेवमहातपाः ॥ परमंयोगमास्थायऋषिर्योगमवाप्तवान् ॥ २४ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवती०सारस्वतो०एकोनपंचाशत्त मोऽध्यायः ॥ ४९ ॥ ॥ ५० ॥ वैशंपायनउवाच तस्मिन्नेवतुधर्मात्मावसतिस्मतपोधनः ॥ गार्हस्थ्यंधर्ममास्थायत्यसितोदेवलःपुरा ॥ १ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ इतिशल्यांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ ५० ॥ तस्मिन्निति ॥ १ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ व्यतिक्रमत्व्यत्यकामत् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९॥२०॥२१ ॥ २२॥२३॥२४॥२५॥२६॥२७॥

धर्मनित्यःशुचिर्दांतोन्यस्तदंडोमहातपाः ॥ कर्मणामनसावाचासमःसर्वेषुजंतुषु ॥ २ ॥ अक्रोधनोमहाराजतुल्यनिंदात्मसंस्तुतिः ॥ प्रियाप्रियेतुल्यवृत्तिर्यमवत्समदर्शनः ॥ ३ ॥ कांचनेलोष्टभावेचसमदर्शीमहातपाः ॥ देवानपूजयन्नित्यमतिथींश्चद्विजैःसह ॥ ४ ॥ ब्रह्मचर्यरतोनित्यंसदाधर्मपरायणः ॥ ततोभ्येत्यमहाभागयोगमास्थायभिक्षुकः ॥ ५ ॥ जैगीषव्योमुनिर्धीमांस्तस्मिंस्तीर्थेसमाहितः ॥ देवलस्याश्रमेराजन्नयवसत्समहाद्युतिः ॥ ६ ॥ योगनित्योमहाराजसिद्धिंप्राप्तोमहातपाः ॥ तंतत्रवसमानंतुजैगीषव्यंमहामुनिं ॥ ७ ॥ देवलोदर्शयन्नेवनैवायुंजतधर्मतः ॥ एवंतयोर्महाराजदीर्घकालोव्यतिक्रमत् ॥ ८ ॥ जैगीषव्यंमुनिवरंनददर्शाथदेवलः ॥ आहारकालेमतिमान्परिव्राड्जनमेजय ॥ ९ ॥ उपातिष्ठतधर्मज्ञोभैक्षकालेसदेवलं ॥ सदृष्ट्वाभिक्षुरूपेणप्राप्तंतत्रमहामुनिं ॥ १० ॥ गौरवंपरमंचक्रेप्रीतिंचविपुलांतथा ॥ देवलस्तुयथाशक्तिपूजयामासभारत ॥ ११ ॥ ऋषिदृष्टेनविधिनासमाबह्वीःसमाहितः ॥ कदाचित्तस्यनृपतेदेवलस्यमहात्मनः ॥ १२ ॥ चितासुमहतीजातामुनिंदृष्ट्वामहाद्युतिं ॥ समास्तुसमतिक्रांताबह्व्यःपूजयतोमम ॥ १३ ॥ नचायमलसोभिक्षुरभ्यभाषतकिंचन ॥ एवंविगणयन्नेवसजगाममहोदधिं ॥ १४ ॥ अंतरिक्षचरःश्रीमान्कलशंगृह्यदेवलः ॥ गच्छन्नेवसधर्मात्मासमुद्रंसरितांपतिं ॥ १५ ॥ जैगीषव्यंततोपश्यद्गतंप्रागेवभारत ॥ ततःसविस्मयश्चिंतांजगामाथामितप्रभः ॥ १६ ॥ कथंभिक्षुरयंप्राप्तःसमुद्रेस्नातएवच ॥ इत्येवंचिंतयामासमहर्षिरसितस्तदा ॥ १७ ॥ स्नात्वासमुद्रेविधिवच्छुचिर्जप्यंजजापसः ॥ कृतजप्याह्निकःश्रीमानाश्रमंचजगामह ॥ १८ ॥ कलशंजलपूर्णंवैगृहीत्वाजनमेजय ॥ ततःसप्रविशन्नेवस्वमाश्रमपदंमुनिः ॥ १९ ॥ आसीनमाश्रमेतत्रजैगीषव्यमपश्यत ॥ नव्याहरतिचैवैनंजैगीषव्यःकथंचन ॥ २० ॥ काष्ठभूताश्रमपदेवसतिस्ममहातपाः ॥ तंदृष्ट्वाचाप्लुतंतोयेसागरेसागरोपमं ॥ २१ ॥ प्रविष्टमाश्रमंचापिपूर्वमेवददर्शसः ॥ असितोदेवलोराजंश्चिंतयामासबुद्धिमान् ॥ २२ ॥ दृष्ट्वाप्रभावंतपसोजैगीषव्यस्ययोगजं ॥ चिंतयामासराजेंद्रतदासमुनिसत्तमः ॥ २३ ॥ मयादृष्टःसमुद्रेचआश्रमेचकथंत्वयं ॥ एवंविगणयन्नेवसमुनिर्मंत्रपारगः ॥ २४ ॥ उत्पपाताश्रमात्तस्मादंतरिक्षंविशांपते ॥ जिज्ञासार्थंतदाभिक्षोर्जैगीषव्यस्यदेवलः ॥ २५ ॥ सोंतरिक्षचरान्सिद्धान्समपश्यत्समाहितान् ॥ जैगीषव्यंचतैःसिद्धैःपूज्यमानमपश्यत ॥ २६ ॥ ततोसितःसुसंरब्धोव्यवसायीदृढव्रतः ॥ अपश्यद्वैततोयातंजैगीषव्यंसदेवलः ॥ २७ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ भूतार्थंयथाभूतार्थं ॥ ४७ ॥ ४८ ॥ उत्पपातब्रह्म

तस्मात्तुपितृलोकंतंव्रजंतंसोन्वपश्यत ॥ पितृलोकाच्चतंयांतंयाम्यंलोकमपश्यत ॥ २८ ॥ तस्मादपिसमुत्पत्यसोमलोकमभिप्लुतं ॥ व्रजंतमन्वपश्यत्सजैगीषव्यं महामुनिं ॥ २९ ॥ लोकान्समुत्पतंतंतुशुभानेकांतयाजिनां ॥ ततोग्निहोत्रिणांलोकांस्ततश्चाप्युत्पपातह ॥ ३० ॥ दर्शंचपौर्णमासंचयेयजंतितपोधनाः ॥ तेभ्यःसदृदशेधीमांल्लोकेभ्यःपशुयाजिनां ॥ ३१ ॥ व्रजंतंलोकममलमपश्यद्देवपूजित ॥ चातुर्मास्यैर्बहुविधैर्यजंतेयेतपोधनाः ॥ ३२ ॥ तेषांस्थानंततोयातंतथाग्निष्टोमयाजिनां ॥ अग्निष्टुतेनचतथायेयजंतितपोधनाः ॥ ३३ ॥ तत्स्थानमनुसंप्राप्तमन्वपश्यतदेवलः ॥ वाजपेयंक्रतुवरंतथाबहुसुवर्णकं ॥ ३४ ॥ आहरंतिमहाप्राज्ञास्तेषांलोकेष्वपश्यत ॥ यजंतेराजसूयेनपुंडरीकेणचैवये ॥ ३५ ॥ तेषांलोकेष्वपश्यच्चजैगीषव्यंसदेवलः ॥ अश्वमेधंक्रतुवरंनरमेधंतथैवच ॥ ३६ ॥ आहरंतिनरश्रेष्ठास्तेषांलोकेष्वपश्यत ॥ सर्वमेधंचदुष्प्रापंतथासौत्रामणिंचये ॥ ३७ ॥ तेषांलोकेष्वपश्यच्चजैगीषव्यंसदेवलः ॥ द्वादशाहैश्चसत्रैश्चयजंतेविविधैर्नृप ॥ ३८ ॥ तेषांलोकेष्वपश्यच्चजैगीषव्यंसदेवलः ॥ मैत्रावरुणयोर्लोकानादित्यानांतथैवच ॥ ३९ ॥ सलोकतामनुप्राप्तमपश्यततत्तोसितः ॥ रुद्राणांचवसूनांचस्थानंयच्चबृहस्पतेः ॥ ४० ॥ तानिसर्वाण्यतीतानिसमपश्यत्ततोसितः ॥ आरुह्यचगवांलोकंप्रयातोब्रह्मसत्रिणां ॥ ४१ ॥ लोकानपश्यद्गच्छंतंजैगीषव्यंततोसितः ॥ त्रीँल्लोकानपरान्विप्रमुत्पतंतंस्वतेजसा ॥ ४२ ॥ पतिव्रतानांलोकांश्चव्रजंतंसोन्वपश्यत ॥ ततोमुनिवरंभूयोजैगीषव्यमथासितः ॥ ४३ ॥ नान्वपश्यतलोकस्थमंतर्हितमरिंदम ॥ सोचिंतयन्महाभागोजैगीषव्यस्यदेवलः ॥ ४४ ॥ प्रभावंसुव्रतत्वंचसिद्धिंयोगस्यचातुलां ॥ असितोपृच्छततदासिद्धाँल्लोकेषुसत्तमान् ॥ ४५ ॥ प्रयतःप्रांजलिर्भूत्वाधीरस्तान्ब्रह्मसत्रिणः ॥ जैगीषव्यंनपश्यामितंशंसध्वंमहौजसं ॥ ४६ ॥ एतदिच्छाम्यहंश्रोतुंपरंकौतूहलंहिमे ॥ सिद्धाऊचुः शृणुदेवलभूतार्थंशंसतांनोदृढव्रत ॥ ४७ ॥ जैगीषव्यःसवैलोकंशाश्वतंब्रह्मणोगतः ॥ वैशंपायनउवाच सश्रुत्वावचनंतेषांसिद्धानांब्रह्मसत्रिणां ॥ ४८ ॥ असितोदेवलस्तूर्णमुत्पपातपपातच ॥ ततःसिद्धास्तऊचुर्हिदेवलंपुनरेवह ॥ ४९ ॥ नदेवलगतिस्तत्रतवगंतुंतपोधन ॥ ब्रह्मणःसदनेविप्रजैगीषव्योयदाप्तवान् ॥ ५० ॥ वैशंपायनउवाच तेषांतद्वचनंश्रुत्वासिद्धानांदेवलःपुनः ॥ आनुपूर्व्येणलोकांस्तान्सर्वानवततारह ॥ ५१ ॥ स्वमाश्रमपदंपुण्यमाजगामपतत्रिवत् ॥ प्रविशन्नेवचापश्यज्जैगीषव्यंसदेवलः ॥ ५२ ॥

लोकंगंतुमितिशेषः पपातचगमनात् ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

॥ ५३ ॥ ५४ ॥ ५५ ॥ संन्यासेकृतावुद्धिर्येननं ॥ ५६ ॥ सर्वाःक्रियाःउत्सर्गेष्ट्यादयः ॥ ५७ ॥ ५८ ॥ मोक्षंसंन्यासंत्यक्तुंमनोदधे उत्सृष्टानामग्नीनांपुनराधानंकर्तुमैच्छत् ॥ ५९ ॥ ६०॥६१॥ ६२ ॥
॥ ६३ ॥ ६४ ॥ ६५॥ जैगीषव्येतत्त्वविदितपोनास्ति पूर्वस्यतपसोदग्धत्वान्क्रियमाणस्यचाश्लेषात् तथाचश्रुतीभवतः तद्यथेषीकतूलमग्नौप्रोतंप्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंते तद्यथापुष्करपलाशेआ

ततोबुद्ध्याव्यगणयद्देवलोधर्मयुक्तया॥ दृष्ट्वाप्रभावंतपसोजैगीषव्यस्ययोगजं॥ ५३॥ ततोब्रवीन्महात्मानंजैगीषव्यंसदेवलः॥ विनयावनतोराजन्नुपसर्प्य महामुनिं॥ ५४॥ मोक्षधर्मंसमास्थातुमिच्छेयंभगवन्नहं॥ तस्यतद्वचनंश्रुत्वाउपदेशंचकारसः॥ ५५॥ विधिंचयोगस्यपरंकार्याकार्यस्यशास्त्रतः॥ संन्यासकृतबुद्धिंतंततोदृष्ट्वामहातपाः॥ ५६॥ सर्वाश्चास्यक्रियाश्चक्रेविधिदृष्टेनकर्मणा॥ संन्यासकृतबुद्धिंतंभूतानिपितृभिःसह ॥ ५७॥ ततोदृष्ट्वाप्ररुरुदुःकोस्मान्संविभजिष्यति॥ देवलस्तुवचःश्रुत्वाभूतानांकरुणंतथा॥ ५८॥ दिशोदशव्याहरतांमोक्षंत्यक्तुंमनोदधे ॥ ततस्तुफलमूलानिपवित्राणिचभारत ॥ ५९॥ पुष्पाण्योषधयश्चैवरोरूयंतिसहस्रशः ॥ पुनर्नोदेवलःक्षुद्रोनूनंछेत्स्यतिदुर्मतिः ॥ ६० ॥ अभयंसर्वभूतेभ्योयोदत्वानावबुध्यते ॥ ततोभूयोव्यगणयत्स्वबुद्ध्या मुनिसत्तमः॥ ६१ ॥ मोक्षेगार्हस्थ्यधर्मेवाकिंनुश्रेयस्करंभवेत्॥ इतिनिश्चित्यमनसादेवलोराजसत्तम॥ ६२॥ त्यक्त्वागार्हस्थ्यधर्मंसमोक्षधर्ममरोचयत्॥ एवमादीनिसंचिंत्यदेवलोनिश्चयात्ततः॥ ६३॥ प्राप्तवान्परमांसिद्धिंपरंयोगंचभारत॥ ततोदेवाःसमागम्यबृहस्पतिपुरोगमाः॥ ६४॥ जैगीषव्यंतपश्चास्य प्रशंसंतितपस्विनः॥ अथाब्रवीदृषिवरोदेवान्वैनारदस्तथा॥ ६५॥ जैगीषव्येतपोनास्तिविस्मापयतियोसितं॥ तमेवंवादिनंधीरंप्रत्यूचुस्तेदिवौकसः॥ ६६॥ नैवमित्येवशंसंतोजैगीषव्यंमहामुनिं॥ नातःपरतरंकिंचित्तुल्यमस्तिप्रभावतः ॥ ६७॥ तेजसस्तपसश्चास्ययोगस्यचमहात्मनः॥ एवंप्रभावोधर्मात्माजैगीषव्यस्तथासितः॥ तयोरिदंस्थानवरंतीर्थंचैवमहात्मनोः॥ ६८॥ तत्राप्युपस्पृश्यततोमहात्मादत्वाचवित्तंहलभृद्द्विजेभ्यः॥ अवाप्यधर्मंपरमार्थकर्माजगामसोमस्यमहत्सुतीर्थं॥ ६९॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवती० सारस्व० पंचाशत्तमोऽध्यायः॥ ५०॥ ॥ ७॥ ॥ ७॥ वैशंपायन उवाच यत्रेजिवानुडुपतीराजसूयेनभारत॥ तस्मिंस्तीर्थेमहानासीत्संग्रामस्तारकामयः॥ १ ॥ तत्राप्युपस्पृश्यबलोदत्वादानानिचात्मवान्॥ सारस्वतस्य धर्मात्मामुनेस्तीर्थंजगामह॥ २॥ तत्रद्वादशवार्षिक्यामनावृष्ट्यांद्विजोत्तमान्॥ वेदानध्यापयामासपुरासारस्वतोमुनिः॥ ३॥

पोनश्लिष्यंतएवमेवामुष्मिन्पापंकर्मनाश्लिष्यतइति॥ ६६ ॥ ६७ ॥ असितःदेवलः ॥६८॥६९॥ इतिश० गदा० नै० भारतभा० पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥७॥ यत्रेति ॥ १ ॥ २ ॥ ३ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

जनमेजयउवाच कथंद्वादशवार्षिक्यामनावृष्ट्यांद्विजोत्तमान् ॥ ऋषीनध्यापयामासपुरासारस्वतोमुनिः ॥ ४ ॥ वैशंपायनउवाच आसीत्पूर्वंमहा
सत्तमुनिर्धीमान्महातपाः ॥ दधीचइतिविख्यातोब्रह्मचारीजितेंद्रियः ॥ ५ ॥ तस्यातितपसःशक्रोबिभेतिसततंविभो ॥ नसलोभयितुंशक्यःफलैर्बहुविधैरपि ॥
॥ ६ ॥ प्रलोभनार्थंतस्याथप्राहिणोत्पाकशासनः ॥ दिव्यामप्सरसंपुण्यांदर्शनीयामलंबुषां ॥ ७ ॥ तस्यतर्पयतोदेवान्सरस्वत्यांमहात्मनः ॥ समीपतोमहाराजसो
पातिष्ठतभाविनी ॥ ८ ॥ तांदिव्यवपुषंदृष्ट्वातस्यर्षेर्भावितात्मनः ॥ रेतःस्कन्नंसरस्वत्यांतत्साजग्राहनिम्नगा ॥ ९ ॥ कुक्षौचाप्यदधद्दृष्ट्वातद्रेतःपुरुषर्षभ ॥ सादधा
रचतंगर्भंपुत्रहेतोर्महानदी ॥ १० ॥ सुषुवेचापिसमयेपुत्रंसासरितांवरा ॥ जगामपुत्रमादायतमृषिंप्रतिचप्रभो ॥ ११ ॥ ऋषिसंसदितंदृष्ट्वासानदीमुनिसत्त
मं ॥ ततःप्रोवाचराजेंद्रददतीपुत्रमस्यतं ॥ १२ ॥ ब्रह्मर्षेतवपुत्रोयंत्वद्भक्त्याधारितोमया ॥ दृष्ट्वातेप्सरसंरेतोयत्स्कन्नंप्रागलंबुषां ॥ १३ ॥ तत्कुक्षिणावैब्रह्मर्षेत्व
द्भक्त्याधृतवत्यहं ॥ नविनाशमिदंगच्छेत्त्वत्तेजइतिनिश्चयात् ॥ १४ ॥ प्रतिगृह्णीष्वपुत्रंस्वंमयादत्तमनिंदितं ॥ इत्युक्तःप्रतिजग्राहप्रीतिंचावापपुष्कलां ॥ १५ ॥
स्वसुतंचाप्यजिघ्रत्तंमूर्ध्निप्रेम्णाद्विजोत्तमः ॥ परिष्वज्यचिरंकालंतदाभरतसत्तम ॥ १६ ॥ सरस्वत्यैवरंप्रादात्प्रीयमाणोमहामुनिः ॥ विश्वेदेवाःसपितरोगंध
र्वाप्सरसांगणाः ॥ १७ ॥ तृप्तिंयास्यंतिसुभगेतर्प्यमाणास्तवांभसा ॥ इत्युक्त्वासतुतुष्टाववचोभिर्वैमहानदीं ॥ १८ ॥ प्रीतःपरमहृष्टात्मायथावच्छृणुपार्थिव ॥
प्रसुतासिमहाभागेसरसोब्रह्मणःपुरा ॥ १९ ॥ जानंतित्वांसरिच्छ्रेष्ठेमुनयःसंशितव्रताः ॥ ममप्रियकरीचापिसततंप्रियदर्शने ॥ २० ॥ तस्मात्सारस्वतःपुत्रो
महांस्तेवरवर्णिनि ॥ तवैवनाम्नाप्रथितःपुत्रस्तेलोकभावनः ॥ २१ ॥ सारस्वतइतिख्यातोभविष्यतिमहातपाः ॥ एषद्वादशवार्षिक्यामनावृष्ट्यांद्विजर्षभान् ॥ २२ ॥
सारस्वतोमहाभागेवेदानध्यापयिष्यति ॥ पुण्याभ्यश्चसरिद्भ्यस्त्वंसदापुण्यतमाशुभे ॥ २३ ॥ भविष्यसिमहाभागेमत्प्रसादात्सरस्वति ॥ एवंसासंस्तुतातेनवरंल
ब्ध्वामहानदी ॥ २४ ॥ पुत्रमादायमुदिताजगामभरतर्षभ ॥ एतस्मिन्नेवकालेतुविरोधेदेवदानवैः ॥ २५ ॥ शक्रःप्रहरणान्वेषीलोकांस्त्रीन्विचचारह ॥ नचोप
लेभेभगवान्शक्रःप्रहरणंतदा ॥ २६ ॥ यद्वैतेषांभवेद्योग्यंवधायविबुधद्विषां ॥ ततोऽब्रवीत्सुरान्शक्रोनमेशक्यामहासुराः ॥ २७ ॥ ऋतेऽस्थिभिर्दधीचस्यनिहं
[illegible]वः ॥ तस्मा[illegible]ऋषिश्रेष्ठोयाच्यतांसुरसत्तमाः ॥ २८ ॥ दधीचास्थीनिदेहीतितैर्वधिष्यामहेरिपून् ॥ सदेवैर्याचितो[illegible] ॥ २९ ॥

॥३०॥३१॥ परमर्षिणादधीचिना सदेहस्तपसासंभृतः ॥३२॥३३॥ अस्यमुनेः ॥३४॥ तेनतदस्थिजेनवज्रेण ॥३५॥ नवतीर्नवदशाधिकाअष्टशती ॥३६॥३७॥३८॥३९॥४०॥४१॥४२॥४३॥४४॥

प्राणत्यागंकुरुश्रेष्ठत्वकारैवाविचारयन्॥ सलोकानक्षयान्प्राप्तोदेवप्रियकरस्तदा॥ ३० ॥ तस्यास्थिभिरथोशक्रः संप्रहृष्टमनास्तदा॥ कारयामासदिव्यानि नानाप्रहरणानिच ॥ ३१ ॥ गदावज्राणिचक्राणिगुरून्दंडांश्चपुष्कलान्॥ सहितीव्रेणतपसासंभृतःपरमर्षिणा ॥ ३२ ॥ प्रजापतिसुतेनाथभृगुणालोकभाव नः॥ अतिकायःसतेजस्वीलोकसारोविनिर्मितः॥ ३३ ॥ जज्ञेशैलगुरुःप्रांशुर्महिम्नाप्रथितःप्रभुः॥ नित्यमुद्विजतेचास्यतेजसःपाकशासनः॥ ३४ ॥ तेनवज्रे णभगवान्मंत्रयुक्तेनभारत॥ भृशंक्रोधविसृष्टेनब्रह्मतेजोद्भवेनच॥३५॥ दैत्यदानववीराणांजघाननवतीर्नव॥ अथकालेव्यतिक्रांतेमहत्यतिभयंकरे॥३६॥ अनावृष्टिरनुप्रामाराजन्द्वादशवार्षिकी॥ तस्यांद्वादशवार्षिक्यामनावृष्ट्यांमहर्षयः॥३७॥ वृत्त्यर्थंप्राद्रवन्राजन्क्षुधार्ताःसर्वतोदिशं॥ दिग्भ्यस्तान्प्रद्रुतान्दृ ष्ट्वामुनिःसारस्वतस्तदा॥३८॥ गमनायमतिंचक्रेतंप्रोवाचसरस्वती॥ नगंतव्यमितःपुत्रतवाहारमहंसदा॥३९॥ दास्यामिमत्स्यप्रवरानुष्यतामिहभारत॥ इ त्युक्तस्तर्पयामाससपितॄन्देवतास्तथा॥ ४० ॥ आहारमकरोन्नित्यंप्राणान्वेदांश्चधारयन्॥ अथतस्यामनावृष्ट्यामतीतायांमहर्षयः ॥ ४१ ॥ अन्योन्यंपरिपप्र च्छुःपुनःस्वाध्यायकारणात्॥ तेषांक्षुधापरीतानांनष्टावेदाभिधावतां॥ ४२॥ सर्वेषामेवराजेंद्रनकश्चित्प्रतिभानवान्॥ अथकश्चिदृषिस्तेषांसारस्वतमुपेयिवा न्॥ ४३ ॥ कुर्वाणंसंशितात्मानंस्वाध्यायमृषिसत्तमं ॥ सगत्वाचष्टतेभ्यश्चसारस्वतमतिप्रभं॥ ४४॥ स्वाध्यायममरप्रख्यंकुर्वाणंविजनेवने ॥ ततःसर्वेसमा जग्मुस्तत्रराजन्महर्षयः॥ ४५॥ सारस्वतंमुनिश्रेष्ठमिदमूचुःसमागताः॥ अस्मानध्यापयस्वेतितानुवाचततोमुनिः॥ ४६ ॥ शिष्यत्वमुपगच्छध्वंविधिवद्धिम मेत्युत॥ तत्राब्रुवन्मुनिगणाबालस्त्वमसिपुत्रक॥ ४७॥ सतानाहनमेधर्मोनश्येदितिपुनर्मुनीन्॥ योह्यधर्मेणविब्रूयाद्गृह्णीयाद्योप्यधर्मतः ॥ ४८ ॥ हीयेतांता वुभौक्षिप्रंस्यातांवावैरिणावुभौ॥ नहायनैर्नपलितैर्नवित्तेननबंधुभिः॥ ४९ ॥ ऋषयश्चक्रिरेधर्मंयोनूचानःसनोमहान्॥ एतच्छ्रुत्वावचस्तस्यमुनयस्तेविधा नतः॥ ५० ॥ तस्माद्वेदाननुप्राप्यपुनर्धर्मंप्रचक्रिरे॥ षष्टिर्मुनिसहस्राणिशिष्यत्वंप्रतिपेदिरे ॥५१॥ सारस्वतस्यविप्रर्षेर्वेदस्वाध्यायकारणात्॥ मुष्टिंमुष्टिंततः सर्वेदर्भाणांतेह्युपाहरन्॥ तस्यासनार्थंविप्रर्षेर्बालस्यापिवशेस्थिताः॥ ५२ ॥

॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥५२॥

॥ ५२ ॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेएकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥७॥ ॥८॥ कथमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

तत्रापिदत्वावसुरौहिणेयोमहाबलः केशवपूर्वजोथ ॥ जगामतीर्थमुदितः क्रमेणख्यातंमहद्वृद्धकन्यास्मयत्र ॥ ५२ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवती० सारस्व० एकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ जनमेजयउवाच कथंकुमारीभगवन्तपोयुक्ताह्यभूत्पुरा ॥ किमर्थंचतपस्तेपेकोवास्यानियमोभवत् ॥ १ ॥ सुदुष्करमिदंब्रह्मंस्त्वत्तः श्रुतमनुत्तमं ॥ आख्याहितत्त्वमखिलंयथातपसिसास्थिता ॥ २ ॥ वैशंपायनउवाच ऋषिरासीन्महावीर्यः कुणिर्गर्गोमहायशाः ॥ सतप्त्वाविपुलंराजंस्तपोवैतपतांवरः ॥ ३ ॥ मनसाथसुतांसुभ्रूंसमुत्पादितवान्विभुः ॥ तांचदृष्ट्वामुनिः प्रीतः कुणिर्गर्गोमहायशाः ॥ ४ ॥ जगामत्रिदिवंराजन्संत्यज्येहकलेवरं ॥ सुभ्रूः साप्यथकल्याणीपुंडरीकनिभेक्षणा ॥ ५ ॥ महतातपसोग्रेणकृत्वाश्रममनिंदिता ॥ उपवासैः पूजयंतीपितृन्देवांश्चसापुरा ॥ ६ ॥ तस्यास्तुतपसोग्रेणमहान्कालोऽत्यगान्नृप ॥ सापित्रादीयमानापितत्रनैच्छदनिंदिता ॥ ७ ॥ आत्मनः सदृशंसातुभर्तारंनान्वपश्यत ॥ ततः सातपसोग्रेणपीडयित्वात्मनस्तनुं ॥ ८ ॥ पितृदेवार्चनरताबभूवविजनेवने ॥ सात्मानंमन्यमानापिकृतकृत्यंश्रमान्विता ॥ ९ ॥ वार्धकेनचराजेंद्रतपसाचैवकर्शिता ॥ सानाशकद्यदागंतुंपदात्पदमपिस्वयं ॥ १० ॥ चकारगमनेबुद्धिंपरलोकायवैतदा ॥ मोक्तुकामांतुतांदृष्ट्वाशरीरंनारदोऽब्रवीत् ॥ ११ ॥ असंस्कृतायाः कन्यायाः कुतोलोकास्तवानघे ॥ एवंतुश्रुतमस्माभिर्देवलोकेमहाव्रते ॥ १२ ॥ तपः परमकंप्राप्तंनतुलोकास्त्वयाजिताः ॥ तन्नारदवचः श्रुत्वासाब्रवीदृषिसंसदि ॥ १३ ॥ तपसोर्धंप्रयच्छामिपाणिग्राहस्यसत्तम ॥ इत्युक्तेचास्याजग्राहपाणिंगालवसंभवः ॥ १४ ॥ ऋषिः प्राक्शृंगवान्नामसमयंचेममब्रवीत् ॥ समयेनतवाद्याहंपाणिंस्प्रक्ष्यामिशोभने ॥ १५ ॥ यद्येकरात्रंवस्तव्यंत्वयासहमयेतिह ॥ तथेतिसाप्रतिश्रुत्यतस्मैपाणिंददौतदा ॥ १६ ॥ यथादृष्टेनविधिनाहुत्वाचाग्निंविधानतः ॥ चक्रेचपाणिग्रहणंतस्योद्वाहंचगालविः ॥ १७ ॥ साराजावभवद्राजंस्तरुणीवरवर्णिनी ॥ दिव्याभरणवस्त्राचदिव्यगंधानुलेपना ॥ १८ ॥ तांदृष्ट्वागालविः प्रीतोदीपयंतीमिवश्रिया ॥ उवासचक्षपामेकांप्रभातेसाब्रवीच्चतं ॥ १९ ॥ यस्त्वयासमयोविप्रकृतोमेतपतांवर ॥ तेनोषितास्मिभद्रंतेस्वस्तितेस्तुव्रजाम्यहं ॥ २० ॥ सानिर्गताब्रवीद्भूयोयोस्मिंस्तीर्थेसमाहितः ॥ वसतेरजनीमेकांतर्पयित्वादिवौकसः ॥ २१ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

॥२०॥२१॥ परमर्षिणादधीचिना सदेहस्तपसासंभृतः ॥२२॥२३॥ अस्यमुनेः ॥२४॥ तेनतदस्थिजेनवज्रेण ॥२५॥ नवतीर्नवदशाधिकाअष्टशतीं ॥२६॥२७॥२८॥२९॥४०॥४१॥४२॥४३॥४४॥

प्राणत्यागंकुरुश्रेष्ठन्चकारैवाविचारयन्॥ सलोकानक्षयान्प्राप्तोदेवप्रियकरस्तदा॥ ३० ॥ तस्यास्थिभिरथोशक्रःसंप्रहृष्टमनास्तदा॥ कारयामासदिव्यानि
नानाप्रहरणानिच॥ ३१ ॥ गदावज्राणिचक्राणिगुरूद्दंडांश्चपुष्कलान्॥ सहितीव्रेणतपसासंभृतःपरमर्षिणा ॥ ३२ ॥ प्रजापतिसुतेनाथभृगुणालोकभाव
नः॥ अतिकायःसतेजस्वीलोकसारोविनिर्मितः॥ ३३ ॥ जज्ञेशैलगुरुःप्रांशुर्महिम्नाप्रथितःप्रभुः॥ नित्यमुद्विजतेचास्यतेजसःपाकशासनः॥ ३४ ॥ तेनवज्रे
णभगवान्मंत्रयुक्तेनभारत॥ भृशंक्रोधविसृष्टेनब्रह्मतेजोद्भवेनच॥३५॥ दैत्यदानववीराणांजघाननवतीर्नव॥अथकालेव्यतिक्रांतेमहत्यतिभयंकरे॥३६॥
अनावृष्टिरनुप्राप्ताराजन्द्वादशवार्षिकी॥ तस्यांद्वादशवार्षिक्यामनावृष्ट्यांमहर्षयः॥३७॥ वृत्त्यर्थंप्राद्रवन्राजन्क्षुधार्ताःसर्वतोदिशं॥ दिग्भ्यस्तान्प्रद्रुतान्दृ
ष्ट्वामुनिःसारस्वतस्तदा॥३८॥ गमनायमतिंचक्रेतंप्रोवाचसरस्वती॥ नगंतव्यमितःपुत्रतवाहारमहंसदा॥३९॥दास्यामिमत्स्यप्रवरानुष्यतामिहभारत॥इ
त्युक्तस्तर्पयामाससपितृन्देवतास्तथा॥ ४० ॥ आहारमकरोन्नित्यंप्राणान्वेदांश्चधारयन्॥ अथतस्यामनावृष्ट्यामतीतायांमहर्षयः ॥ ४१ ॥ अन्योन्यंपरिपप्र
च्छुःपुनःस्वाध्यायकारणात्॥ तेषांक्षुधापरीतानांनष्टावेदाभिधावतां॥ ४२॥ सर्वेषामेवराजेंद्रनकश्चित्प्रतिभानवान्॥ अथकश्चिदृषिस्तेषांसारस्वतमुपेयिवा
न्॥ ४३ ॥कुर्वाणंसंशितात्मानंस्वाध्यायमृषिसत्तमं ॥ सगत्वाचष्टतेभ्यश्चसारस्वतमतिप्रभं॥ ४४ ॥ स्वाध्यायममरप्रख्यंकुर्वाणंविजनेवने ॥ ततःसर्वेसमा
जग्मुस्तत्रराजन्महर्षयः॥ ४५॥ सारस्वतंमुनिश्रेष्ठमिदमूचुःसमागताः॥ अस्मानध्यापयस्वेतितानुवाचततोमुनिः॥ ४६ ॥ शिष्यत्वमुपगच्छध्वंविधिवद्धिम
मेत्युत॥ तत्राब्रुवन्मुनिगणाबालस्त्वमसिपुत्रक॥ ४७॥ सतानाहनमेधर्मोनश्येदितिपुनर्मुनीन्॥ योह्यधर्मेणवैब्रूयाद्गृह्णीयाद्योप्यधर्मतः ॥ ४८ ॥ हीयेतांता
वुभौक्षिप्रंस्यातांवावैरिणावुभौ॥ नहायनैर्नपलितैर्नवित्तेननबंधुभिः॥ ४९ ॥ ऋषयश्चक्रिरेधर्मंयोनूचानःसनोमहान्॥ एतच्छ्रुत्वावचस्तस्यमुनयस्तेविधा
नतः॥ ५० ॥ तस्माद्वेदाननुप्राप्यपुनर्धर्मंप्रचक्रिरे॥ षष्टिर्मुनिसहस्राणिशिष्यत्वंप्रतिपेदिरे ॥५१॥ सारस्वतस्यविप्रर्षेर्वेदस्वाध्यायकारणात्॥ मुष्टिंमुष्टिंततः
सर्वेदर्भाणांतेह्युपाहरन्॥ तस्यासनार्थंविप्रर्षेर्बालस्यापिवशेस्थिताः॥ ५२ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

॥ ५१ ॥ इतिश्रीशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेएकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥७॥ ॥७॥ कथमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

तत्रापिदत्वावसुरौहिणेयोमहाबलःकेशवपूर्वजोथ ॥ जगामतीर्थमुदितःक्रमेणख्यातंमहद्वृद्धकन्यास्मयत्र ॥ ५२ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदा
पर्वणिबलदेवती० सारस्व० एकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ जनमेजयउवाच कथंकुमारीभगवन्तपोयुक्ताह्यभूत्पुरा ॥ किमर्थंचतपस्तेपेकोवास्या
नियमोभवत् ॥ १ ॥ सुदुष्करमिदंब्रह्मंस्त्वत्तःश्रुतमनुत्तमं ॥ आख्याहितत्त्वमखिलंयथातपसिसास्थिता ॥ २ ॥ वैशंपायनउवाच ऋषिरासीन्महावीर्यः
कुणिर्गर्गोमहायशाः ॥ सतप्त्वाविपुलंराजंस्तपोवैतपतांवरः ॥ ३ ॥ मनसाथसुतांसुभ्रूंसमुत्पादितवान्विभुः ॥ तांचदृष्ट्वामुनिःप्रीतःकुणिर्गर्गोमहायशाः ॥
॥ ४ ॥ जगामत्रिदिवंराजन्संत्यज्येहकलेवरं ॥ सुभ्रूःसाह्यथकल्याणीपुंडरीकनिभेक्षणा ॥ ५ ॥ महतातपसोग्रेणकृत्वाश्रममनिंदिता ॥ उपवासैःपूजयंतीपि
तॄन्देवांश्चसापुरा ॥ ६ ॥ तस्यास्तुतपसोग्रेणमहान्कालोत्यगान्नृप ॥ सापित्रादीयमानापितत्रनैच्छदनिंदिता ॥ ७ ॥ आत्मनःसदृशंसातुभर्तारंनान्वपश्यत ॥ त
तःसातपसोग्रेणपीडयित्वात्मनस्तनुं ॥ ८ ॥ पितृदेवार्चनरताबभूवविजनेवने ॥ सात्मानंमन्यमानापिकृतकृत्यंश्रमान्विता ॥ ९ ॥ वार्धकेनचराजेंद्रतपसाचैव
कर्शिता ॥ सानाशकद्यदागंतुंपदात्पदमपिस्वयं ॥ १० ॥ चकारगमनेबुद्धिंपरलोकायवैतदा ॥ मोक्तुकामांतुतांदृष्ट्वाशरीरंनारदोब्रवीत् ॥ ११ ॥ असंस्कृतायाः
कन्यायाःकुतोलोकास्तवानघे ॥ एवंतुश्रुतमस्माभिर्देवलोकेमहाव्रते ॥ १२ ॥ तपःपरमकंप्राप्तंनतुलोकास्त्वयाजिताः ॥ तन्नारदवचःश्रुत्वासाब्रवीदृषिसंसदि
॥ १३ ॥ तपसोर्धंप्रयच्छामिपाणिग्राहस्यसत्तम ॥ इत्युक्तेचास्याजग्राहपाणिंगालवसंभवः ॥ १४ ॥ ऋषिःप्राक्शृंगवान्नामसमयंचेममब्रवीत् ॥ समयेनत
वाद्याहंपाणिंस्प्रक्ष्यामिशोभने ॥ १५ ॥ यद्येकरात्रंवस्तव्यंत्वयासहमयेतिह ॥ तथेतिसाप्रतिश्रुत्यतस्मैपाणिंददौतदा ॥ १६ ॥ यथादृष्टेनविधिनाहुत्वाचाग्निंवि
धानतः ॥ चक्रेचपाणिग्रहणंतस्योद्वाहंचगालविः ॥ १७ ॥ सारात्रावभवद्राजंस्तरुणीवरवर्णिनी ॥ दिव्याभरणवस्त्राचदिव्यगंधानुलेपना ॥ १८ ॥ तांदृष्ट्वा
गालविःप्रीतोदीपयंतीमिवश्रिया ॥ उवासचक्षपामेकांप्रभातेसाब्रवीच्चतं ॥ १९ ॥ यस्त्वयासमयोविप्रकृतोमेतपतांवर ॥ तेनोषितास्मिभद्रंतेस्वस्तितेस्तुव्रजा
म्यहं ॥ २० ॥ सानिर्गताब्रवीद्भूयोयोस्मिंस्तीर्थेसमाहितः ॥ वसतेरजनीमेकांतर्पयित्वादिवौकसः ॥ २१ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

चत्वारिंशतमष्टौचेति [illegible]

चत्वारिंशतमष्टौचद्वौचाष्टौसम्यगाचरेत् ॥ यत्नब्रह्मचर्यवर्षाणिफलंतस्यलभेतसः ॥ २२ ॥ एवमुक्त्वाततःसाध्वीदेहंत्यक्त्वादिवंगता ॥ ऋषिरप्यभवद्दीनस्तस्या रूपंविचिंतयन् ॥ २३ ॥ समयेनतपोर्धंचकृच्छ्रात्प्रतिगृहीतवान् ॥ साधयित्वातदात्मानंतस्याःसगतिमन्वियात् ॥ २४ ॥ दुःखितोभरतश्रेष्ठतस्यारूपबलात्कृ तः ॥ एतत्तेवृद्धकन्यायाव्याख्यातंचरितंमहत् ॥ २५ ॥ तथैवब्रह्मचर्यंचस्वर्गस्यचगतिःशुभा ॥ तत्रस्थश्चापिशुश्रावहतंशल्यंहलायुधः ॥ २६ ॥ तत्रापिदत्वादा नानिद्विजातिभ्यःपरंतपः ॥ शुश्रावशल्यंसंग्रामेनिहतंपांडवैस्तदा ॥ २७ ॥ समंतपंचकद्वारात्ततोनिष्क्रम्यमाधवः ॥ पप्रच्छर्षिगणान्रामःकुरुक्षेत्रस्ययत्फलं ॥ २८ ॥ तेपृष्टायदुसिंहेनकुरुक्षेत्रफलंविभो ॥ समाचख्युर्महात्मानस्तस्मैसर्वंयथातथं ॥ २९ ॥ इतिश्रीमहाभारतेशल्यप० गदाप० बलदेवतीर्थ० सारस्वतो० द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ७ ॥ ऋषयऊचुः प्रजापतेरुत्तरवेदिरुच्यतेसनातनंरामसमंतपंचकं ॥ समीजिरेयत्रपुरादिवौकसोवरेणसत्रेणम हावरप्रदाः ॥ १ ॥ पुराचराजर्षिवरेणधीमताबहूनिवर्षाण्यमितेनतेजसा ॥ प्रकृष्टमेतत्कुरुणामहात्मनाततःकुरुक्षेत्रमितीहपप्रथे ॥ २ ॥ रामउवाच किम र्थंकुरुणाकृष्टंक्षेत्रमेतन्महात्मना ॥ एतदिच्छाम्यहंश्रोतुंकथ्यमानंतपोधनाः ॥ ३ ॥ ऋषयऊचुः पुराकिलकुरुंरामकर्षंतंसततोत्थितं ॥ अभ्येत्यशक्रस्त्रि दिवात्पर्यपृच्छतकारणं ॥ ४ ॥ इंद्रउवाच किमिदंवर्ततेराजन्प्रयत्नेनपरेणच ॥ राजर्षेकिमभिप्रेत्ययेनेयंकृष्यतेक्षितिः ॥ ५ ॥ कुरुरुवाच इहयेपु रुषाःक्षेत्रेमरिष्यंतिशतक्रतो ॥ तेगमिष्यंतिसुकृतांल्लोकान्पापविवर्जितान् ॥ ६ ॥ अवहस्यततःशक्रोजगामत्रिदिवंपुनः ॥ राजर्षिरप्यनिर्विण्णःकर्षत्येववसुं धरां ॥ ७ ॥ आगम्यागम्यचैवैनंभूयोभूयोवहस्यच ॥ शतक्रतुरनिर्विण्णंपृष्ट्वापृष्ट्वाजगामह ॥ ८ ॥ यदातुतपसोग्रेणचकर्षवसुधांनृपः ॥ ततःशक्रोऽब्रवीद्देवा न्राजर्षेर्यच्चिकीर्षितं ॥ ९ ॥ एतच्छ्रुत्वाब्रुवन्देवाःसहस्राक्षमिदंवचः ॥ वरेणच्छंदयस्वैनंशक्रराजर्षिंयदिशक्यते ॥ १० ॥ यदिह्यत्रप्रमीतावैस्वर्गंगच्छंतिमानवाः ॥ अस्माननिष्ट्वाक्रतुभिर्भागोनोनभविष्यति ॥ ११ ॥ आगम्यचततःशक्रस्तदाराजर्षिमब्रवीत् ॥ अलंखेदेनभवतःक्रियतांवचनंमम ॥ १२ ॥ मानवायेनिराहारा देहंत्यक्ष्यंत्यतंद्रिताः ॥ युधिवानिहताःसम्यगपितिर्यग्गतानृप ॥ १३ ॥ तेस्वर्गभाजोराजेंद्रभविष्यंतिमहामते ॥ तथास्त्वितिततोराजाकुरुःशक्रमुवाचह ॥ १४ ॥

[illegible] ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ [illegible] ॥ १ ॥ २ ॥ [illegible] ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

॥ १५ ॥ १६ ॥ १७ ॥ ब्रह्मणः क्षयंनिवासं ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३॥२४॥ सारस्वतानांतीर्थानांवर्णनंकुरुक्षेत्रमहात्म्यज्ञापनार्थं तदपितत्रमृतानामन्येषामपिस्वर्गतिप्रदंकिमुतक्षत्रध

ततस्तमभ्यनुज्ञाप्यप्रहृष्टेनांतरात्मना॥ जगामत्रिदिवंभूयःक्षिप्रंबलनिषूदनः॥१५॥ एवमेतद्यदुश्रेष्ठकुरुक्षेत्रंराजर्षिणापुरा॥ शक्रेणचाभ्यनुज्ञातंब्रह्माद्यैश्चसुरै

स्तथा॥१६॥ नातःपरतरंपुण्यंभूमेःस्थानंभविष्यति॥ इहतप्स्यंतियेकेचित्तपःपरमकंनराः॥१७॥ देहत्यागेनतेसर्वेयास्यंतिब्रह्मणःक्षयं॥ येपुनःपुण्यभाजोवै

दानंदास्यंतिमानवाः॥ १८॥ तेषांसहस्रगुणितंभविष्यत्यचिरेणवै॥ येचेहनित्यंमनुजानिवत्स्यंतिशुभैषिणः॥ १९॥ यमस्यविषयंतेतुनद्रक्ष्यंतिकदाचन॥

यक्ष्यंतियेचक्रतुभिर्महद्भिर्मनुजेश्वराः॥ २०॥ तेषांत्रिविष्टपेवासोयावद्भूमिर्धरिष्यति॥ अपिचात्रस्वयंशक्रोजगौगाथांसुराधिपः॥२१॥ कुरुक्षेत्रनिबद्धांवै

तांशृणुष्वहलायुध॥ पांसवोपिकुरुक्षेत्राद्वायुनासमुदीरिताः॥ अपिदुष्कृतकर्माणंनयंतिपरमांगतिं॥ २२॥ सुरर्षभाब्राह्मणसत्तमाश्चतथानृगाद्यामरदेवमु

ख्याः॥ इष्ट्वामहार्हैःक्रतुभिर्नृसिंहसंत्यज्यदेहान्सुगतिंप्रपन्नाः॥ २३॥ तरंतुकारंतुकयोर्यदंतरंरामह्रदानांचमचक्रुकस्यच॥ एतत्कुरुक्षेत्रसमंतपंचकंप्रजाप

तेरुत्तरवेदिरुच्यते॥ २४॥ शिवंमहापुण्यमिदंदिवौकसांसुसंमतंसर्वगुणैःसमन्वितं॥ अतश्चसर्वेनिहतानृपारणेयास्यंतिपुण्यांगतिमक्षयांसदा॥ २५॥ इत्यु

वाचस्वयंशक्रःसहब्रह्मादिभिस्तदा॥ तच्चानुमोदितंसर्वंब्रह्मविष्णुमहेश्वरैः॥ २६॥ इतिश्रीम० शल्यपर्वांतर्गतग० बलदेवती० सारस्व० कुरुक्षेत्रकथनेत्रि

पंचाशत्तमोऽध्यायः॥५३॥ ॥७॥ वैशंपायनउवाच कुरुक्षेत्रंततोदृष्ट्वादत्वादायांश्चसात्वतः॥ आश्रमंसुमहद्दिव्यमगमज्जनमेजय॥ १॥

मधूकाम्रवणोपेतंप्लक्षन्यग्रोधसंकुलं॥ चिरबिल्वयुतंपुण्यंपनसार्जुनसंकुलं॥२॥ तंदृष्ट्वायादवश्रेष्ठःप्रवरंपुण्यलक्षणं॥ पप्रच्छतानृषीन्सर्वान्कस्याश्रमवरस्त्व

यं॥ ३॥ तेतुसर्वेमहात्मानमूचूराजन्हलायुधं॥ शृणुविस्तरशोरामयस्यायंपूर्वमाश्रमः॥ ४॥ अत्रविष्णुःपुरादेवस्तप्तवांस्तपउत्तमं॥ अत्रास्यविधिवद्यज्ञाः

सर्वेवृत्ताःसनातनाः॥५॥ अत्रैवब्राह्मणीसिद्धाकौमारब्रह्मचारिणी॥ योगयुक्तादिवंयातातपःसिद्धातपस्विनी॥ ६॥ बभूवश्रीमतीराजन्शांडिल्यस्यमहा

त्मनः॥ सुताधृतव्रतासाध्वीनियताब्रह्मचारिणी॥ ७॥ सातुतप्त्वातपोघोरंदुश्चरंस्त्रीजनेनह॥ गतास्वर्गंमहाभागादेवब्राह्मणपूजिता॥ ८॥ श्रुत्वाऋषीणांवचन

नमाश्रमंतंजगामह॥ ऋषींस्तानभिवाद्याथपार्श्वेहिमवतोच्युतः॥९॥संध्याकार्याणिसर्वाणिनिर्वर्त्यारुरुहेचलं॥नातिदूरंततोगत्वानगंतालध्वजोबली॥१०॥

...अतश्चेति ॥२५॥२६॥ इतिशल्यपर्वांतर्गतगदापर्वणि नै० भा० त्रिपंचाशत्तमोऽध्यायः ॥५३॥ ॥७॥ कुरुक्षेत्रमिति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५॥१६॥ १७॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

पुण्यंतीर्थवरंदृष्ट्वाविस्मयंपरमंगतः ॥ प्रभावंचसरस्वत्याःप्लक्षप्रस्रवणंबलः ॥ ११ ॥ संप्राप्तःकारपवनंप्रवरंतीर्थमुत्तमं ॥ हलायुधस्तत्रचापिदत्वादानंमहा
बलः ॥ १२ ॥ आप्लुतःसलिलेपुण्येसुशीतेविमलेशुचौ ॥ संतर्पयामासपितॄन्देवांश्चरणदुर्मदः ॥ १३ ॥ तत्रोष्यैकांतुरजनींयतिभिर्ब्राह्मणैःसह ॥ मित्रावरुण
योःपुण्यंजगामाश्रममच्युतः ॥ १४ ॥ इंद्रोग्निरर्यमाचैवयत्रप्राक्प्रीतिमाप्नुवन् ॥ तंदेशंकारपवनाद्यमुनायांजगामह ॥ १५ ॥ स्नात्वातत्रचधर्मात्मापरांप्रीति
मवाप्यच ॥ ऋषिभिश्चैवसिद्धैश्चसहितोवैमहाबलः ॥ १६ ॥ उपविष्टःकथाःशुभ्राःशुश्रावयदुपुंगवः ॥ तथानुतिष्ठतांतेषांनारदोभगवानृषिः ॥ १७ ॥ आजगा
माथतंदेशंयत्ररामोव्यवस्थितः ॥ जटामंडलसंवीतःस्वर्णचीरोमहातपाः ॥ १८ ॥ हेमदंडधरोराजन्कमंडलुधरस्तथा ॥ कच्छपींसुखशब्दांतांगृह्यवीणांमनोर
मां ॥ १९ ॥ नृत्येगीतेचकुशलोदेवब्राह्मणपूजितः ॥ प्रकर्ताकलहानांचनित्यंचकलहप्रियः ॥ २० ॥ तंदेशमगमद्यत्रश्रीमान्रामोव्यवस्थितः ॥ प्रत्युत्थायचतंसम्य
क्पूजयित्वायतव्रतं ॥ २१ ॥ देवर्षिंपर्यपृच्छत्सयथावृत्तंकुरून्प्रति ॥ ततोस्याकथयद्राजन्नारदःसर्वधर्मवित् ॥ २२ ॥ सर्वमेतद्यथावृत्तमतीवकुरुसंक्षयं ॥ त
तोब्रवीद्रौहिणेयोनारदंदीनयागिरा ॥ २३ ॥ किमवस्थंतुतत्क्षत्रंयेतुतत्राभवन्नृपाः ॥ श्रुतमेतन्मयापूर्वंसर्वमेवतपोधन ॥ २४ ॥ विस्तरश्रवणेजातंकौतूहल
मतीवमे ॥ नारदउवाच पूर्वमेवहतोभीष्मोद्रोणःसिंधुपतिस्तथा ॥ २५ ॥ हतोवैकर्तनःकर्णःपुत्राश्चास्यमहारथाः ॥ भूरिश्रवारौहिणेयमद्रराजश्चवीर्य
वान् ॥ २६ ॥ एतेचान्येचबहवस्तत्रतत्रमहाबलाः ॥ प्रियान्प्राणान्परित्यज्यजयार्थंकौरवस्यवै ॥ २७ ॥ राजानोराजपुत्राश्चसमरेष्वनिवर्तिनः ॥ अहतांस्तुमहा
बाहोशृणुमेतत्रमाधव ॥ २८ ॥ धार्तराष्ट्रबलेशेषास्त्रयःसमितिमर्दनाः ॥ कृपश्चकृतवर्माचद्रोणपुत्रश्चवीर्यवान् ॥ २९ ॥ तेपिवैविद्रुतारामदिशोदशभयात्त
दा ॥ दुर्योधनोहतेशल्येविद्रुतेषुकृपादिषु ॥ ३० ॥ ह्रदंद्वैपायनंनामविवेशभृशदुःखितः ॥ शयानंधार्तराष्ट्रंतुसलिलेस्तंभितेतदा ॥ ३१ ॥ पांडवाःसहकृष्णेनवा
ग्भिरुग्राभिरार्दयन् ॥ सतुद्यमानोबलवान्वाग्भीरामसमंततः ॥ ३२ ॥ उत्थितःसह्रदाद्वीरःप्रगृह्यमहतींगदां ॥ सचाप्युपगतोयोद्धुंभीमेनसहसांप्रतं ॥ ३३ ॥ भ
विष्यतितयोरद्ययुद्धंरामसुदारुणं ॥ यदिकौतूहलंतेस्तिव्रजमाधवमाचिरं ॥ ३४ ॥ पश्ययुद्धंमहाघोरंशिष्ययोर्यदिमन्यसे ॥ वैशंपायनउवाच नारदस्य
वचःश्रुत्वातानभ्यर्च्यद्विजर्षभान् ॥ ३५ ॥ सर्वान्विसर्जयामासयेतेनाभ्यागताःसह ॥ गम्यतांद्वारकांचेतिसोन्वशादनुयायिनः ॥ ३६ ॥

सोवतीर्याचलश्रेष्ठात्प्लक्षप्रस्रवणाच्छुभात् ॥ ततःप्रीतमनारामःश्रुत्वातीर्थफलंमहत् ॥ विप्राणांसन्निधौश्लोकमगायदिममच्युतः ॥ ३७ ॥ सरस्वतीवाससमा कुतोरतिःसरस्वतीवाससमाःकुतोगुणाः ॥ सरस्वतींप्राप्यदिवंगताजनाःसदास्मरिष्यंतिनदींसरस्वतीं ॥ ३८ ॥ सरस्वतीसर्वनदीषुपुण्यासरस्वतीलोकशुभावहासदा ॥ सरस्वतींप्राप्यजनाःसुदुष्कृतंसदानशोचंतिपरत्रचेहच ॥ ३९ ॥ ततोमुहुर्मुहुःप्रीत्याप्रेक्षमाणःसरस्वतीं ॥ हयैर्युक्तंरथंशुभ्रमातिष्ठतपरंतपः ॥ ४० ॥ सशीघ्रगामिनातेनरथेनयदुपुंगवः ॥ दिदृक्षुरभिसंप्राप्तःशिष्ययुद्धमुपस्थितं ॥ ४१ ॥ इतिश्रीमहाभारतेशल्यप० गदापर्वणिबलदेवतीर्थयात्रायांसारस्वतोपाख्यानेचतुष्पंचाशत्तमोऽध्यायः ५४ ॥ ॥७॥ ॥७॥ वैशंपायनउवाच एवंतदभवद्युद्धंतुमुलंजनमेजय ॥ यत्रदुःखान्वितोराजाधृतराष्ट्रोब्रवीदिदं ॥ १ ॥ धृतराष्ट्रउवाच रामंसन्निहितंदृष्ट्वागदायुद्धउपस्थिते ॥ ममपुत्रःकथंभीमंप्रत्ययुध्यतसंजय ॥ २ ॥ संजयउवाच. राममान्निध्यमासाद्यपुत्रोदुर्योधनस्तव ॥ युद्धकामोमहाबाहुःसमहृष्यतवीर्यवान् ॥ ३ ॥ दृष्ट्वालांगलिनंराजाप्रत्युत्थायचभारत ॥ प्रीत्यापरमयायुक्तःसमभ्यर्च्ययथाविधि ॥ ४ ॥ आसनंचददौतस्मैपर्यपृच्छदनामयं ॥ ततोयुधिष्ठिरंरामोवाक्यमेतदुवाचह ॥ ५ ॥ मधुरंधर्मसंयुक्तंशूराणांहितमेवच ॥ मयाश्रुतंकथयतामृषीणांराजसत्तम ॥ ६ ॥ कुरुक्षेत्रंपरंपुण्यंपावनंस्वर्ग्यमेवच ॥ दैवतैर्ऋषिभिर्जुष्टंब्राह्मणैश्चमहात्मभिः ॥ ७ ॥ तत्रवैयोत्स्यमानायेदेहंत्यक्ष्यंतिमानवाः ॥ तेषांस्वर्गेध्रुवोवासःशक्रेणसहमारिष ॥ ८ ॥ तस्मात्समंतपंचकमितोयामद्रुतंनृप ॥ प्रथितोत्तरवेदीसादेवलोकेप्रजापतेः ॥ ९ ॥ तस्मिन्महापुण्यतमेत्रैलोक्यस्यसनातने ॥ संग्रामेनिधनंप्राप्यध्रुवंस्वर्गेभविष्यति ॥ १० ॥ तथेत्युक्त्वामहाराजकुंतीपुत्रोयुधिष्ठिरः ॥ समंतपंचकंवीरःप्रायादभिमुखःप्रभुः ॥ ११ ॥ ततोदुर्योधनोराजाप्रगृह्यमहतींगदां ॥ पद्भ्याममर्षीद्युतिमानगच्छत्पांडवैःसह ॥ १२ ॥ तथायांतंगदाहस्तंवर्मणाचापिदंशितं ॥ अंतरिक्षचरादेवाःसाधुसाध्वित्यपूजयन् ॥ १३ ॥ वातिकाश्चारणायेतुदृष्ट्वातेहर्षमागताः ॥ सपांडवैःपरिवृतःकुरुराजस्तवात्मजः ॥ १४ ॥ मत्तस्येवगजेंद्रस्यगतिमास्थायसोव्रजत् ॥ ततःशंखनिनादेनभेरीणांचमहास्वनैः ॥ १५ ॥ सिंहनादैश्चशूराणांदिशःसर्वाःप्रपूरिताः ॥ ततस्तेतुकुरुक्षेत्रंप्राप्तानरवरोत्तमाः ॥ १६ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ वातिकाःवातेनसहगच्छंतितेआकाशचारिणः चारणाःसिद्धविशेषाः ॥ १४ ॥ १५ ॥ १६ ॥

प्रतीच्यभिमुखमित्यत्र प्रतीये इति पाठे प्रतिगत्य अन्योन्याभिमुखं प्राप्तेनाप्येत्यर्थः स्वयनं मुगनिदं ॥ १७ ॥ अनिरिणे अनूषरे अनिघृणे इति पाठे निहीनया घृण्याकथमहं भ्रातरं वधिष्यामीत्येवंरूपया करुण

प्रतीच्यभिमुखंदेशंयथोद्दिष्टंसुतेनते॥ दक्षिणेनसरस्वत्याःस्वयनंतीर्थमुत्तमं॥१७॥ तस्मिन्देशेत्वनिरिणेतेतुयुद्धमरोचयन्॥ ततोभीमोमहाकोटिंगदांगृह्या थवर्मभृत्॥ १८॥ बिभ्रद्रूपंमहाराजसदृशंहिगरुत्मतः॥ अवबद्धशिरस्त्राणःसंख्येकांचनवर्मभृत्॥ १९॥ रराजराजन्पुत्रस्तेकांचनःशैलराडिव॥ वर्मभ्यांसं यतौवीरौभीमदुर्योधनावुभौ॥ २०॥ संयुगेचप्रकाशेतेसंरब्धाविवकुंजरौ॥ रणमंडलमध्यस्थौभ्रातरौतौनरर्षभौ॥ २१॥ अशोभेतांमहाराजचंद्रसूर्यावि वोदितौ॥ तावन्योन्यंनिरीक्षेतांक्रुद्धाविवमहाद्विपौ॥ २२॥ दहंतौलोचनैराजन्परस्परवधैषिणौ॥ संप्रहृष्टमनाराजन्गदामादायकौरवः॥ २३॥ सृक्किणीसं लिहन्राजन्क्रोधरक्तेक्षणःश्वसन्॥ ततोदुर्योधनोराजन्गदामादायवीर्यवान्॥ २४॥ भीमसेनमभिप्रेक्ष्यगजोगजमिवाह्वयत्॥ अद्रिसारमयींभीमस्तथै वादायवीर्यवान्॥ २५॥ आह्वयामासनृपतिंसिंहःसिंहंयथावने॥ तावुद्यतगदापाणीदुर्योधनवृकोदरौ॥ २६॥ संयुगेचप्रकाशेतांगिरीसशिखराविव॥ ता वुभौसमतिक्रुद्धावुभौभीमपराक्रमौ॥ २७॥ उभौशिष्यौगदायुद्धेरौहिणेयस्यधीमतः॥ उभौसदृशकर्माणौमयवासवयोरिव॥ २८॥ तथासदृशकर्माणौवरु णस्यमहाबलौ॥ वासुदेवस्यरामस्यतथावैश्रवणस्यच॥ २९॥ सदृशौतौमहाराजमधुकैटभयोर्युधि॥ उभौसदृशकर्माणौतथासुंदोपसुंदयोः॥ ३०॥ रामरा वणयोश्चैववालिसुग्रीवयोस्तथा॥ तथैवकालस्यसमौमृत्योश्चैवपरंतपौ॥ ३१॥ अन्योन्यमभिधावंतौमत्ताविवमहाद्विपौ॥ वासितासंगमेदृप्तौशरदीवमदो त्कटौ॥ ३२॥ उभौक्रोधविषंदीप्तंवमंतावुरगाविव॥ अन्योन्यमभिसंरब्धौप्रेक्षमाणावरिंदमौ॥ ३३॥ उभौभरतशार्दूलौविक्रमेणसमन्वितौ॥ सिंहाविवदु राधर्षौगदायुद्धविशारदौ॥ ३४॥ नखदंष्ट्रायुधौवीरौव्याघ्राविवदुरुत्सहौ॥ प्रजासंहरणेक्षुब्धौसमुद्राविवदुस्तरौ॥ ३५॥ लोहितांगाविवक्रुद्धौप्रतपंतौमहा रथौ॥ पूर्वपश्चिमजौमेघौप्रेक्षमाणावरिंदमौ॥ ३६॥ गर्जमानौसुविषमंक्षरंतौप्रावृषीवहि॥ रश्मियुक्तौमहात्मानौदीप्तिमंतौमहाबलौ॥ ३७॥ ददृशातेकुरुश्रे ष्ठौकालसूर्याविवोदितौ॥ व्याघ्राविवसुसंरब्धौगर्जंताविवतोयदौ॥ ३८॥ जहृषातेमहाबाहूसिंहकेसरिणाविव॥ गजाविवसुसंरब्धौज्वलिताविवपावकौ॥ ३९॥

यारहिते अतएव समरे निष्ठुरत्वं प्रशस्यते स्वर्गहेतुत्वात् ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ वासितासंगमे एककरिणीसंगमार्थे दृप्तौ मोहितौ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ लोहितांगौ द्वौ कुजाविवेत्यभूतोपमा ॥ ३६ ॥ ३७ ॥ ३८ ॥ जहृषाते हर्षं प्रापतुः ॥ ३९ ॥

दद्दशातेमहात्मानौसशृंगाविवपर्वतौ ॥ रोषात्प्रस्फुरमाणोष्ठौनिरीक्षंतौपरस्परं ॥ ४० ॥ तौसमेतौमहात्मानौगदाहस्तौनरोत्तमौ ॥ उभौ[illegible]
[illegible]संमतौ ॥ ४१ ॥ सदश्वाविवहेषंतौबृंहंताविवकुंजरौ ॥ वृषभाविवगर्जंतौदुर्योधनवृकोदरौ ॥ ४२ ॥ दैत्याविवबलोन्मत्तौरेजतुस्तौनरोत्तमौ ॥ ततोदुर्योधनोराज
न्निदमाहयुधिष्ठिरं ॥ ४३ ॥ भ्रातृभिःसहितंचैवकृष्णेनचमहात्मना ॥ रामेणामितवीर्येणवाक्यंशौटीर्यसम्मतं ॥ ४४ ॥ केकयैःसृंजयैर्दृप्तैःपंचालैश्चमहा[illegible]
इदंव्यवसितंयुद्धंममभीमस्यचोभयोः ॥ ४५ ॥ उपोपविष्टाःपश्यध्वंसहितैर्नृपपुंगवैः ॥ श्रुत्वादुर्योधनवचःप्रत्यपद्यंततत्तथा ॥ ४६ ॥ ततःसमुपविष्टं[illegible]
जमंडलं ॥ विराजमानंददृशेदिवीवादित्यमंडलं ॥ ४७ ॥ तेषांमध्येमहाबाहुःश्रीमान्केशवपूर्वजः ॥ उपविष्टोमहाराजपूज्यमानःसमंततः ॥ ४८ ॥ शुशुभेराज
मध्यस्थोनीलवासाःसितप्रभः ॥ नक्षत्रैरिवसंपूर्णोवृतोनिशिनिशाकरः ॥ ४९ ॥ तौतथातुमहाराजगदाहस्तौसुदुःसहौ ॥ अन्योन्यंवाग्भिरुग्राभि[illegible]
व्यवस्थितौ ॥ ५० ॥ अप्रियाणिततोन्योन्यमुक्त्वातौकुरुसत्तमौ ॥ उदीक्षंतौस्थितौतत्रवृत्रशक्रौयथाहवे ॥ ५१ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदाप०
युद्धारंभेपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ७ ॥ वैशंपायनउवाच ततोवाग्युद्धमभवत्तुमुलंजनमेजय ॥ यत्रदुःखान्वितोराजाधृतराष्ट्रोऽब्रवीदिदं
॥ १ ॥ धिगस्तुखलुमानुष्यंयस्यनिष्ठेयमीदृशी ॥ एकादशचमूभर्तायत्रपुत्रोममानघ ॥ २ ॥ आज्ञाप्यसर्वान्नृपतीन्भुक्त्वाचेमांवसुंधरां ॥ गदामादायवेगेनप
दातिःप्रस्थितोरणे ॥ ३ ॥ भूत्वाहिजगतोनाथोह्यनाथइवमेसुतः ॥ गदामुद्यम्ययोयातिकिमन्यद्भागधेयतः ॥ ४ ॥ अहोदुःखंमहत्प्राप्तंपुत्रेणममसंजय ॥ एव
मुक्त्वासदुःखार्तोविरराममजनाधिपः ॥ ५ ॥ संजयउवाच समेघनिनदोहर्षान्निनदन्निवगोवृषः ॥ आजुहावतदापार्थंयुद्धाययुधिवीर्यवान् ॥ ६ ॥ भीम
माह्वयमानेतुकुरुराजेमहात्मनि ॥ प्रादुरासन्सुघोराणिरूपाणिविविधान्युत ॥ ७ ॥ ववुर्वाताःसनिर्घाताःपांशुवर्षंचपातच ॥ बभूवुश्चदिशःसर्वास्तिमिरेणस
मावृताः ॥ ८ ॥ महास्वनाःसुनिर्वातास्तुमुलालोमहर्षणाः ॥ पेतुस्तथोल्काःशतशःस्फोटयंत्योनभस्तलान् ॥ ९ ॥ राहुश्चाग्रसदादित्यमपर्वणिविशांपते ॥ चक
पेचमहाकंपंपृथिवीसवनद्रुमा ॥ १० ॥ दीप्ताश्चवाताःप्रववुर्नीचैःशर्करकर्षिणः ॥ गिरीणांशिखराण्येवन्यपतंतमहीतले ॥ ११ ॥

॥ १६ ॥ गतंशत्रोःसंमुखगमनं प्रत्यागतंआभिमुख्यमत्यजतएवापसरणं ॥ १७ ॥ अस्त्रयंत्राणि कंचिन्मर्मदेशमाक्षिप्ययेनशत्रोरुत्क्षेपणमपक्षेपणंचक्रियतेतदस्त्रयंत्रं अस्त्रनेक्षिप्यतेनेत्यस्त्रंतच्चतद्यंत्रंनिय हणंचास्त्रयंत्रमितिसमासः स्थानानितेषामेवोपयोगीनिमर्मदेशादीनि परिधावनंवेगेनसव्यापसव्यकरणं ॥१८॥ अभिद्रवणंवेगेनाभ्यागमनं आक्षेपंपरप्रयत्नस्यतत्पातनहेतुतासंपादनं अवस्थानमचांचल्यं स

तौपरस्परमासाद्ययत्तावन्योन्यरक्षणे ॥ मार्जाराविवभक्षार्थेततक्षातेमुहुर्मुहुः ॥ १६॥ अचरद्भीमसेनस्तुमार्गान्बहुविधांस्तथा ॥ मंडलानिविचित्राणिगतप्र त्यागतानिच ॥ १७॥ अस्त्रयंत्राणिचित्राणिस्थानानिविविधानिच ॥ परिमोक्षंप्रहाराणांवर्जनंपरिधावनं ॥ १८ ॥ अभिद्रवणमाक्षेपमवस्थानंसविग्रहं ॥ प रिवर्तनसंवर्तमवप्लुतमुपप्लुतं ॥ १९ ॥ उपन्यस्तमपन्यस्तंगदायुद्धविशारदौ ॥ एवंतौविचरंतौतुन्यघ्नतांवैपरस्परं ॥ २० ॥ वंचयानौपुनश्चैवचेरतुःकुरुसत्तमौ ॥ विक्रीडंतौसुबलिनौमंडलानिविचेरतुः ॥ २१ ॥ तौदर्शयंतौसमरेयुद्धक्रीडांसमंततः ॥ गदाभ्यांसहसान्योन्यमाजघ्नतुररिंदमौ ॥ २२ ॥ परस्परंसमासाद्यदंष्ट्राभ्यां द्विरदौयथा ॥ अशोभेतांमहाराजशोणितेनपरिप्लुतौ ॥ २३ ॥ एवंतदभवद्युद्धंघोररूपंपरंतप ॥ परिवृत्तेऽहनिक्रूरंवृत्रवासवयोरिव ॥ २४ ॥ गदाहस्तौवतस्तौतुमंड लावस्थितौबली ॥ दक्षिणंमंडलंराजन्धार्तराष्ट्रोभ्यवर्तत ॥ २५ ॥ सव्यंतुमंडलंतत्रभीमसेनोभ्यवर्तत ॥ तथातुचरतस्तस्यभीमस्यरणमूर्धनि ॥ २६ ॥ दुर्योध नोमहाराजपार्श्वदेशेभ्यताडयत् ॥ आहतस्तुततोभीमःपुत्रेणतवभारत ॥ २७ ॥ आविध्यतगदांगुर्वीप्रहारंतमचिंतयन् ॥ इंद्राशनिसमांघोरांयमदंडमिवोद्य तां ॥ २८ ॥ ददृशुस्तेमहाराजभीमसेनस्यतांगदां ॥ आविध्यंतंगदांदृष्ट्वाभीमसेनंतवात्मजः ॥ २९ ॥ समुद्यम्यगदांघोरांप्रत्यविध्यत्परंतपः ॥ गदामारुतवेगेन तवपुत्रस्यभारत ॥ ३० ॥ शब्दआसीत्सुतुमुलस्तेजश्चसमजायत ॥ सचरन्विविधान्मार्गान्मंडलानिचभागशः ॥ ३१ ॥ समशोभततेजस्वीभूयोभीमात्सुयो धनः ॥ आविद्धासर्ववेगेनभीमेनमहतीगदा ॥ ३२ ॥ सधूमंसार्चिषंचाग्निंमुमोचोग्रमहास्वना ॥ आधूतांभीमसेनेनगदांदृष्ट्वासुयोधनः ॥ ३३ ॥ अद्रिसारम यींगुर्वीमाविध्यन्बव्हशोभत ॥ गदामारुतवेगंहिदृष्ट्वातस्यमहात्मनः ॥ ३४ ॥ भयंविवेशपांडूंस्तुसर्वानेवससोमकान् ॥ तौदर्शयंतौसमरेयुद्धक्रीडांसमंततः ॥ ३५ ॥ गदाभ्यांसहसान्योन्यमाजघ्नतुररिंदमौ ॥ तौपरस्परमासाद्यदंष्ट्राभ्यांद्विरदौयथा ॥ ३६ ॥

उपप्लुतंतदेवार्वाग्गमनयुक्तं ॥ १९ ॥ उपन्यस्तंउपेत्यायुधप्र विप्रहंसम्मुखस्थितेपुनस्तेनसहयुद्धकरणं परिवर्तनंशत्रुंप्रहर्तुंपरितःप्रसरणं संवर्तंशत्रुप्रसरणस्यावरोधनं अवप्लुतंप्रहारवंचनार्थंनम्रीभूयनिःसरणं क्षेपः अपन्यस्तंपराङ्मुखस्यपृष्ठतःकृतेनहस्तेनशत्रोस्ताडनं ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

॥ ३७॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ आस्थायेति कौशिकान्कुशाउन्मत्तस्तदाचरितान्मार्गान्आस्थायपुनःपुनरुत्पतनेनवंचनेनचभीमंउन्मत्ती

अशोभेतांमहाराजशोणितेनपरिप्लुतौ ॥ एवंतदभवद्युद्धंघोररूपमसंवृतं ॥ ३७॥ परिवृत्तेहनिक्रूरंवृत्रवासवयोरिव ॥ दृष्ट्वाव्यवस्थितंभीमंतवपुत्रोमहाबलः ॥
॥ ३८॥ चरंश्चित्रतरान्मार्गान्कौंतेयमभिदुद्रुवे ॥ तस्यभीमोमहावेगांजांबूनदपरिष्कृतां ॥ ३९॥ अतिक्रुद्धस्यक्रुद्धस्तुताडयामासतांगदां ॥ सविस्फुलिंगोनि
र्ह्रादस्तयोस्तत्राभिघातजः ॥ ४० ॥ प्रादुरासीन्महाराजसृष्टयोर्वज्रयोरिव ॥ वेगवत्यातयातत्रभीमसेनप्रमुक्तया ॥ ४१ ॥ निपतंत्यामहाराजपृथिवीसमकं
पत ॥ तांनामृष्यतकौरव्योगदांप्रतिहतांरणे ॥ ४२ ॥ मत्तोद्विपइवक्रुद्धःप्रतिकुंजरदर्शनात् ॥ ससव्यंमंडलंराजाउद्भ्राम्यकृतनिश्चयः ॥ ४३ ॥ आजघ्नेमूर्ध्निकौं
तेयंगदयाभीमवेगया ॥ तयात्वभिहतोभीमःपुत्रेणतवपांडवः ॥ ४४॥ नाकंपतमहाराजतदद्भुतमिवाभवत् ॥ आश्चर्यंचापितंद्राजन्सर्वसैन्यान्यपूजयन ॥
॥ ४५॥ यद्गदाभिहतोभीमोनाकंपतपदात्पदं ॥ ततोगुरुतरांदीप्तांगदांहेमपरिष्कृतां ॥ ४६ ॥ दुर्योधनायव्यसृजद्भीमोभीमपराक्रमः ॥ तंप्रहारमसंभ्रांतोला
घवेनमहाबलः ॥ ४७॥ मोघंदुर्योधनश्चक्रेतत्राभूद्विस्मयोमहान् ॥ सातुमोघागदाराजन्पतंतीभीमचोदिता ॥ ४८॥ चालयामासपृथिवींमहानिर्घातनिस्व
ना ॥ आस्थायकौशिकान्मार्गानुत्पतन्सपुनःपुनः ॥ ४९ ॥ गदानिपातंप्रज्ञायभीमसेनंचवंचितं ॥ वंचयित्वातदाभीमंगदयाकुरुसत्तमः ॥ ५० ॥ ताडयामास
संक्रुद्धोवक्षोदेशेमहाबलः ॥ गदयानिहतोभीमोमुह्यमानोमहारणे ॥ ५१ ॥ नाभ्यमन्यतकर्तव्यंपुत्रेणाभ्याहतस्तव ॥ तस्मिंस्तथावर्तमानेराजन्सोमकपांड
वाः ॥ ५२ ॥ भृशोपहतसंकल्पानहृष्टमनसोभवन् ॥ सतुतेनप्रहारेणमातंगइवरोषितः ॥ ५३ ॥ हस्तिवद्धस्तिसंकाशमभिदुद्रावतंसुतं ॥ ततस्तुतरसाभीमोगद
यातनयंतव ॥ ५४ ॥ अभिदुद्राववेगेनसिंहोवनगजंयथा ॥ उपसृत्यतुराजानंगदामोक्षविशारदः ॥ ५५ ॥ आविध्यतगदांराजन्समुद्दिश्यसुतंतव ॥ अताडय
द्भीमसेनःपार्श्वेदुर्योधनंतदा ॥ ५६ ॥ सविह्वलःप्रहारेणजानुभ्यामगमन्महीं ॥ तस्मिन्कुरुकुलश्रेष्ठेजानुभ्यामवनींगते ॥ ५७॥ उदतिष्ठत्ततोनादःसृंजयानां
जगत्पते ॥ तेषांतुनिनदंश्रुत्वासृंजयानांनरर्षभः ॥ ५८॥ अमर्षाद्भरतश्रेष्ठपुत्रस्तेसमकुप्यत ॥ उत्थायतुमहाबाहुर्महानागइवश्वसन ॥ ५९ ॥ दिधक्षन्निवनेत्रा
भ्यांभीमसेनमवैक्षत ॥ ततःसभरतश्रेष्ठोगदापाणिरभिद्रवन् ॥ ६० ॥ प्रमथिष्यन्निवशिरोभीमसेनस्यसंयुगे ॥ समहात्मामहात्मानंभीमंभीमपराक्रमः ॥ ६१ ॥

कृत्यगदयाताडयामासेतिद्वयोःसंबंधः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ नत्दृष्टमनसःखिन्नचेतसः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

शंखदेशेललाटप्रांते ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ नेदुर्पांनादंकृतवतीनां ॥ ६८ ॥ ६९ ॥ ७० ॥ ॥ इतिशल्यपर्वांतर्गतगदापर्वणि नै० भा० सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ३ ॥

अताडयच्छंखदेशेनचचालाचलोपमः ॥ सभूयःशुशुभेपार्थस्ताडितोगदयारणे ॥ उद्भिन्नरुधिरोराजन्प्रभिन्नइवकुंजरः ॥ ६२ ॥ ततोगदांवीरहणीमयोम यींप्रगृह्यवज्राशनितुल्यनिःस्वनां ॥ अताडयच्छत्रुममित्रकर्षणोबलेनविक्रम्यधनंजयाग्रजः ॥ ६३ ॥ सभीमसेनाभिहतस्तवात्मजःपपातसंकंपितदेहबंध नः ॥ सुपुष्पितोमारुतवेगताडितोवनेयथाशालइवावघूर्णितः ॥ ६४ ॥ ततःप्रणेदुर्जहृषुश्चपांडवाःसमीक्ष्यपुत्रंपतितंक्षितौतव ॥ ततःसुतस्तेप्रतिलभ्यचेत नांसमुत्पपातद्विरदोयथाह्रदात् ॥ ६५ ॥ सपार्थिवोनित्यममर्षितस्तदामहारथःशिक्षितवत्परिभ्रमन् ॥ अताडयत्पांडवमग्रतःस्थितंसविह्वलांगोजगतीमुपा स्पृशत् ॥ ६६ ॥ ससिंहनादंविननादकौरवोनिपात्यभूमौयुधिभीममोजसा ॥ बिभेदचैवाशनितुल्यमोजसागदानिपातेनशरीररक्षणं ॥ ६७ ॥ ततोंतरिक्षेनि नदोमहानभूद्दिवौकसामप्सरसांचनेदुषां ॥ पपातचोच्चैरमरप्रवेरितंविचित्रपुष्पोत्करवर्षमुत्तमं ॥ ६८ ॥ ततःपरानाविशदुत्तमंभयंसमीक्ष्यभूमौपतितंनरोत्त मं ॥ अहीयमानंचबलेनकौरवंनिशाम्यभेदंसुदृढस्यवर्मणः ॥ ६९ ॥ ततोमुहूर्तादुपलभ्यचेतनांप्रमृज्यवक्त्रंरुधिराक्तमात्मनः ॥ धृतिंसमालंब्यविवृत्यलोचने बलेनसंस्तभ्यवृकोदरःस्थितः ॥ ७० ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिगदायुद्धेसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ संजयउवाच समुदीर्णं ततोदृष्ट्वासंग्रामंकुरुमुख्ययोः ॥ अथाब्रवीदर्जुनस्तुवासुदेवंयशस्विनं ॥ १ ॥ अनयोर्वीरयोर्युद्धेकोज्यायान्भवतोमतः ॥ कस्यवाकोगुणोभूयानेतद्वदजनार्द न ॥ २ ॥ वासुदेवउवाच उपदेशोनयोस्तुल्योभीमस्तुबलवत्तरः ॥ कृतीयत्नपरस्त्वेषधार्तराष्ट्रोवृकोदरात् ॥ ३ ॥ भीमसेनस्तुधर्मेणयुध्यमानोनजेष्यति ॥ अन्यायेनतुयुध्यन्वैहन्यादेवसुयोधनं ॥ ४ ॥ माययानिर्जितादेवैरसुराइतिनःश्रुतं ॥ विरोचनस्तुशक्रेणमाययानिर्जितःसवै ॥ ५ ॥ माययाचाक्षिपत्तेजोवृत्रस्य बलसूदनः ॥ तस्मान्मायामयंभीमआतिष्ठतुपराक्रमं ॥ ६ ॥ प्रतिज्ञातंचभीमेनद्यूतकालेधनंजय ॥ ऊरूभेत्स्यामितेसंख्येगदयेतिसुयोधनं ॥ ७ ॥ सोयंप्रति ज्ञांतांचापिपालयत्वरिकर्षणः ॥ मायाविनंतुराजानंमाययैवनिकृंततु ॥ ८ ॥ यद्येषबलमास्थायन्यायेनप्रहरिष्यति ॥ विषमस्थस्ततोराजाभविष्यतियुधिष्ठि रः ॥ ९ ॥ पुनरेवतुवक्ष्यामिपांडवेयनिबोधमे ॥ धर्मराजापराधेनभयंनःपुनरागतं ॥ १० ॥ कृत्वाहिसुमहत्कर्महत्वाभीष्ममुखान्कुरून् ॥ जयःप्राप्तोयशःप्राप्यं वैरंचप्रतियातितं ॥ ११ ॥

समुदीर्णमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥१२॥१३ ॥ १४ ॥ १५॥१६॥ १७ ॥ १८॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥३३॥ ३४ ॥ ३५ ॥ ३६॥ ३७ ॥ ३८ ॥

तदेवंविजयःप्राप्तःपुनःसंशयितःकृतः॥ अबुद्धिरेषामहतीधर्मराजस्यपांडव ॥१२॥ यदेकविजयेयुद्धंपाणितंघोरमीदृशं॥ सुयोधनःकृतीवीरएकायनगतस्त
था॥ १३॥ अपिचोशनसागीतःश्रूयतेऽयंपुरातनः॥ श्लोकस्तत्त्वार्थसहितस्तन्मेनिगदतःशृणु॥१४॥ पुनरावर्तमानानांभग्नानांजीवितैषिणां॥ भेतव्यमरिशे
षाणामेकायनगताहिते॥१५॥ साहसोत्पतितानांचनिराशानांचजीविते॥ नशक्यमग्रतःस्थातुंशक्रेणापिधनंजय ॥ १६॥ सुयोधनमिमंभग्नंहतसैन्यंह्रदंग
तं॥ पराजितंवनप्रेप्सुंनिराशंराज्यलंभने॥ १७॥ कोन्वेषसंयुगेप्राज्ञःपुनर्द्वंद्वेसमाह्वयेत्॥ अपिनोनिर्जितंराज्यंनहरेतसुयोधनः॥ १८ ॥ यस्त्रयोदशवर्षाणिग
दयाकृतनिश्रमः॥ चरत्यूर्ध्वंचतिर्यक्चभीमसेनजिघांसया॥१९॥ एनंचेन्नमहाबाहुरन्यायेनहनिष्यति॥ एषवःकौरवोराजाधार्तराष्ट्रोभविष्यति॥ २०॥ धनं
जयस्तुश्रुत्वैतत्केशवस्यमहात्मनः॥ प्रेक्षतोभीमसेनस्यसव्यमूरुमताडयत्॥ २१ ॥ गृह्यसंज्ञांततोभीमोगदयाव्यचरद्रणे ॥ मंडलानिविचित्राणियमका
नीतराणिच॥ २२ ॥दक्षिणंमंडलंसव्यंगोमूत्रकमथापिच॥ व्यचरत्पांडवोराजन्नरिंसंमोहयन्निव ॥ २३ ॥ तथैवतवपुत्रोपिगदामार्गविशारदः॥ व्यचरल्ल
घुचित्रंचभीमसेनजिघांसया॥ २४॥ आधुन्वंतौगदेघोरेचंदनागरुरूषिते ॥ वैरस्यांतंपरीप्संतौरणेक्रुद्धाविवांतकौ ॥ २५॥ अन्योन्यंतौजिघांसंतौप्रवीरौपु
रुषर्षभौ॥ युयुधातेगरुत्मंतौयथानागामिषैषिणौ ॥२६॥ मंडलानिविचित्राणिचरतोर्नृपभीमयोः॥ गदासंपातजास्तत्रप्रजज्ञुःपावकार्चिषः॥ २७॥ समंप्र
हरतोस्तत्रशूरयोर्बलिनोर्मृधे॥ क्षुब्धयोर्वायुनाराजन्द्वयोरिवसमुद्रयोः॥२८॥ तयोःप्रहरतोस्तुल्यंमत्तकुंजरयोरिव॥ गदानिर्घातसंह्रादःप्रहाराणामजायत
॥ २९॥ तस्मिंस्तदासंप्रहारेदारुणेसंकुलेभृशं॥ उभावपिपरिश्रांतौयुध्यमानावरिंदमौ ॥ ३०॥ तौमुहूर्तंसमाश्वस्यपुनरेवपरंतप॥ अभ्यहारयतांक्रुद्धौप्रगृह्य
महतीगदे॥ ३१ ॥ तयोःसमभवद्युद्धंघोररूपमसंवृतं॥ गदानिपातैराजेंद्रतक्षतोर्वैपरस्परं ॥३२॥ समरेप्रद्रुतौतौतुवृषभाक्षौतरस्विनौ ॥ अन्योन्यंजघ्नतुर्वीरौ
पंकस्थौमहिषाविव॥ ३३ ॥ जर्जरीकृतसर्वांगौरुधिरेणाभिसंप्लुतौ॥ ददृशातेहिमवतिपुष्पिताविवकिंशुकौ ॥ ३४ ॥ दुर्योधनस्तुपार्थेनविवरेसंप्रदर्शिते॥ई
षदुन्मिषमाणस्तुसहसाप्रससारह॥ ३५॥ तमभ्याशगतंप्राज्ञोरणेप्रेक्ष्यवृकोदरः॥ अवाक्षिपद्गदांतस्मिन्वेगेनमहताबली॥ ३६॥ आक्षिपंतंतुतंदृष्ट्वापुत्रस्तव
विशांपते॥ अवासर्पत्ततःस्थानात्सामोघान्यपतद्भुवि ॥ ३७॥ मोक्षयित्वाप्रहारंतंसुतस्तवससंभ्रमात्॥ भीमसेनंचगदयाप्राहरत्कुरुसत्तम॥ ३८॥

शंखदेशेललाटप्रांते ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ नेदुषांनादंकृतवतीनां ॥ ६८ ॥ ६९ ॥ ७० ॥ ॥ इतिशल्यपर्वांतर्गतगदापर्वणि नै० भा० सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ३ ॥

अताडयच्छंखदेशेनचचालाचलोपमः ॥ सभूयःशुशुभेपार्थस्ताडितोगदयारणे ॥ उद्भिन्नरुधिरोराजन्प्रभिन्नइवकुंजरः ॥ ६२ ॥ ततोगदांवीरहणीमयोमयींप्रगृह्यवज्राशनितुल्यनिःस्वनां ॥ अताडयच्छत्रुममित्रकर्षणोबलेनविक्रम्यधनंजयाग्रजः ॥ ६३ ॥ सभीमसेनाभिहतस्तवात्मजःपपातसंकंपितदेहबंधनः ॥ सुपुष्पितोमारुतवेगताडितोवनेयथाशालइवावघूर्णितः ॥ ६४ ॥ ततःप्रणेदुर्जहृषुश्चपांडवाःसमीक्ष्यपुत्रंपतितंक्षितौतव ॥ ततःसुतस्तेप्रतिलभ्यचेतनांसमुत्पपातद्विरदोयथाह्रदात् ॥ ६५ ॥ सपार्थिवोनित्यममर्षितस्तदामहारथःशिक्षितवत्परिभ्रमन् ॥ अताडयत्पांडवमग्रतःस्थितंसविह्वलांगोजगतीमुपास्पृशत् ॥ ६६ ॥ ससिंहनादंविननादकौरवोनिपात्यभूमौयुधिभीममोजसा ॥ बिभेदचैवाशनितुल्यमोजसागदानिपातेनशरीररक्षणं ॥ ६७ ॥ ततोंतरिक्षेनिनदोमहानभूद्दिवौकसामप्सरसांचनेदुषां ॥ पपातचोच्चैरमरप्रवेरितंविचित्रपुष्पोत्करवर्षमुत्तमं ॥ ६८ ॥ ततःपरानाविशदुत्तमंभयंसमीक्ष्यभूमौपतितंनरोत्तमं ॥ अहीयमानंचबलेनकौरवंनिशाम्यभेदंसुदृढस्यवर्मणः ॥ ६९ ॥ ततोमुहूर्तादुपलभ्यचेतनांप्रमृज्यवक्त्रंरुधिराक्तमात्मनः ॥ धृतिंसमालंब्यविवृत्यलोचनेबलेनसंस्तभ्यवृकोदरःस्थितः ॥ ७० ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिगदायुद्धेसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥

संजयउवाच समुदीर्णंततोदृष्ट्वासंग्रामंकुरुमुख्ययोः ॥ अथाब्रवीदर्जुनस्तुवासुदेवंयशस्विनं ॥ १ ॥ अनयोर्वीरयोर्युद्धेकोज्यायान्भवतोमतः ॥ कस्यवाकोगुणोभूयानेतद्वदजनार्दन ॥ २ ॥ वासुदेवउवाच उपदेशोनयोस्तुल्योभीमस्तुबलवत्तरः ॥ कृतीयत्नपरस्त्वेषधार्तराष्ट्रोवृकोदरात् ॥ ३ ॥ भीमसेनस्तुधर्मेणयुध्यमानोनजेष्यति ॥ अन्यायेनतुयुध्यन्वैहन्यादेवसुयोधनं ॥ ४ ॥ माययानिर्जितादेवैरसुराइतिनःश्रुतं ॥ विरोचनस्तुशक्रेणमाययानिर्जितःसखे ॥ ५ ॥ माययाचाक्षिपत्तेजोवृत्रस्यबलसूदनः ॥ तस्मान्मायामयंभीमआतिष्ठतुपराक्रमं ॥ ६ ॥ प्रतिज्ञातंचभीमेनद्यूतकालेधनंजय ॥ ऊरूभेत्स्यामितेसंख्येगदयेतिसुयोधनं ॥ ७ ॥ सोयंप्रतिज्ञातांचापिपालयत्वरिकर्षणः ॥ मायाविनंतुराजानंमाययैवनिकृंततु ॥ ८ ॥ यद्येषबलमास्थायन्यायेनप्रहरिष्यति ॥ विषमस्थस्ततोराजाभविष्यतियुधिष्ठिरः ॥ ९ ॥ पुनरेवतुवक्ष्यामिपांडवेयनिबोधमे ॥ धर्मराजापराधेनभयंनःपुनरागतं ॥ १० ॥ कृत्वाहिसुमहत्कर्महत्वाभीष्ममुखान्कुरून् ॥ जयःप्राप्तोयशःप्राप्यंवैरंचप्रतियातितं ॥ ११ ॥

समुदीर्णमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥१२॥१३ ॥ १४ ॥ १५॥१६॥ १७ ॥ १८॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥३३॥ ३४ ॥ ३५ ॥ ३६॥ ३७ ॥ ३८ ॥

तदेवंविजयःप्राप्तःपुनःसंशयितःकृतः ॥ अबुद्धिरेषामहतीधर्मराजस्यपांडव ॥१२॥ यदेकविजयेयुद्धंपणितंघोरमीदृशं ॥ सुयोधनःकृतीवीरएकायनगतस्त था॥ १३॥ अपिचोशनसागीतःश्रूयतेऽयंपुरातनः ॥ श्लोकस्तत्त्वार्थसहितस्तन्मेनिगदतःशृणु ॥१४॥ पुनरावर्तमानानांभग्नानांजीवितैषिणां ॥ भेतव्यमरिशे षाणामेकायनगताहिते ॥१५॥ साहसोत्पतितानांचनिराशानांचजीविते ॥ नशक्यमग्रतःस्थातुंशक्रेणापिधनंजय ॥ १६ ॥ सुयोधनमिमंभग्नंहतसैन्यंह्रदंग तं ॥ पराजितंवनप्रेप्सुंनिराशंराज्यलंभने ॥ १७॥ कोन्वेषसंयुगेप्राज्ञःपुनर्द्वंद्वेसमाह्वयेत् ॥ अपिनोनिर्जितंराज्यंनहरेतसुयोधनः॥ १८ ॥ यस्त्रयोदशवर्षाणिग दयाकृतनिश्रमः ॥ चरत्यूर्ध्वंचतिर्यक्चभीमसेनजिघांसया ॥१९॥ एनंचेन्नमहाबाहुरन्यायेनहनिष्यति ॥ एषवःकौरवोराजाधार्तराष्ट्रोभविष्यति ॥२०॥ धनं जयस्तुश्रुत्वैतत्केशवस्यमहात्मनः ॥ प्रेक्षतोभीमसेनस्यसव्यमूरुमताडयत् ॥ २१ ॥ गृह्यसंज्ञांततोभीमोगदयाव्यचरद्रणे ॥ मंडलानिविचित्राणियमका नीतराणिच ॥ २२ ॥ दक्षिणंमंडलंसव्यंगोमूत्रकमथापिच ॥ व्यचरत्पांडवोराजन्नरिंसंमोहयन्निव ॥ २३ ॥ तथैवतवपुत्रोपिगदामार्गविशारदः ॥ व्यचरल्ल घुचित्रंचभीमसेनजिघांसया॥ २४ ॥ आधुन्वंतौगदेघोरेचंदनागरुरूषिते ॥ वैरस्यांतंपरीप्संतौरणेक्रुद्धाविवांतकौ ॥ २५॥ अन्योन्यंतौजिघांसंतौप्रवीरौपु रुषर्षभौ ॥ युयुधातेगरुत्मंतौयथानागामिषैषिणौ ॥२६॥ मंडलानिविचित्राणिचरतोर्नृपभीमयोः ॥ गदासंपातजास्तत्रप्रजज्ञुःपावकार्चिषः॥ २७॥ समंप्र हरतोस्तत्रशूरयोर्बलिनोर्मृधे ॥ क्षुब्धयोर्वायुनाराजन्द्वयोरिवसमुद्रयोः ॥२८॥ तयोःप्रहरतोस्तुल्यंमत्तकुंजरयोरिव ॥ गदानिर्घातसंह्रादःप्रहाराणामजायत ॥ २९॥ तस्मिंस्तदासंप्रहारेदारुणेसंकुलेभृशं ॥ उभावपिपरिश्रांतौयुध्यमानावरिंदमौ ॥ ३०॥ तौमुहूर्तंसमाश्वस्यपुनरेवपरंतप ॥ अभ्यहारयतांक्रुद्धौप्रगृह्य महतीगदे ॥ ३१ ॥ तयोःसमभवद्युद्धंघोररूपमसंवृतं ॥ गदानिपातैराजेंद्रतक्षतोर्वैपरस्परं ॥ ३२ ॥ समरेप्रद्रुतौतौतुवृषभाक्षौतरस्विनौ ॥ अन्योन्यंजघ्नतुर्वीरौ पंकस्थौमहिषाविव ॥ ३३ ॥ जर्जरीकृतसर्वांगौरुधिरेणाभिसंप्लुतौ ॥ ददृशातेहिमवतिपुष्पिताविवकिंशुकौ ॥ ३४ ॥ दुर्योधनस्तुपार्थेनविवरेसंप्रदर्शिते ॥ई षदुन्मिषमाणस्तुसहसाप्रससारह ॥ ३५ ॥ तमभ्याशगतंप्राज्ञोरणेप्रेक्ष्यवृकोदरः ॥ अवाक्षिपद्गदांतस्मिन्वेगेनमहताबली ॥ ३६ ॥ आक्षिपंतंतुतंदृष्ट्वापुत्रस्तव विशांपते ॥ अवासर्पत्ततःस्थानात्सामोघान्यपतद्भुवि ॥ ३७॥ मोक्षयित्वाप्रहारंतंसुतस्तवससंभ्रमात् ॥ भीमसेनंचगदयाप्राहरत्कुरुसत्तम ॥ ३८ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ क्षुपःक्षुद्रवृक्षः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

तस्यविस्यंदमानेनरुधिरेणामितौजसः ॥ प्रहारगुरुपाताच्चमूर्छेवसमजायत ॥ ३९ ॥ दुर्योधनोनतंवेदपीडितंपांडवंरणे ॥ धारयामासभीमोपिशरीरमतिपीडितं ॥ ४० ॥ अमन्यतास्थितंयुद्धेनंप्रहरिष्यंतमाहवे ॥ अतोनप्राहरत्तस्मैपुनरेवतवात्मजः ॥ ४१ ॥ ततोमुहूर्तमाश्वस्यदुर्योधनमुपस्थितं ॥ वेगेनाभ्यपतद्राजन्भीमसेनःप्रतापवान् ॥ ४२ ॥ तमापतंतंसंप्रेक्ष्यसंरब्धममितौजसं ॥ मोघमस्यप्रहारंतंचिकीर्षुर्भरतर्षभ ॥ ४३॥ अवस्थानेमतिंकृत्वापुत्रस्तवमहामनाः ॥ इयेषोत्पतितुंराजञ्छलयिष्यन्वृकोदरं ॥ ४४॥ अबुध्यद्भीमसेनस्तुराज्ञस्तस्यचिकीर्षितं ॥ अथास्यसमभिद्रुत्यसमुत्क्रुश्यचसिंहवत् ॥ ४५॥ सृत्यावंचयतोराजन्पुनरेवोत्पतिष्यतः ॥ ऊरुभ्यांप्राहिणोद्राजन्गदांवेगेनपांडवः ॥ ४६॥ सावज्रनिष्पेषसमाप्रहिताभीमकर्मणा ॥ ऊरूदुर्योधनस्याथवभंजप्रियदर्शनौ ॥ ४७॥ सपपातनरव्याघ्रोवसुधामनुनादयन् ॥ भग्नोरुर्भीमसेनेनपुत्रस्तवमहीपते ॥ ४८ ॥ ववुर्वाताःसनिर्घाताःपांशुवर्षंपपातच ॥ चचालपृथिवीचापिसवृक्षक्षुपपर्वता ॥ ४९ ॥ तस्मिन्निपतितेवीरेपत्यौसर्वमहीक्षितां ॥ महास्वनापुनर्दीप्तासनिर्घाताभयंकरी ॥ ५० ॥ पपातचोल्कामहतीपतितेपृथिवीपतौ ॥ तथाशोणितवर्षंचपांशुवर्षंचभारत ॥ ५१ ॥ ववर्षमघवांस्तत्रतवपुत्रेनिपातिते ॥ यक्षाणांराक्षसानांचपिशाचानांतथैवच ॥ ५२ ॥ अंतरिक्षेमहानादःश्रूयतेभरतर्षभ ॥ तेनशब्देनघोरेणमृगाणामथपक्षिणां ॥ ५३ ॥ जज्ञेघोरतरःशब्दोबहूनांसर्वतोदिशं ॥ येतत्रवाजिनःशेषागजाश्चमनुजैःसह ॥ ५४॥ मुमुचुस्तेमहानादंतवपुत्रेनिपातिते ॥ भेरीशंखमृदंगानामभवच्चस्वनोमहान् ॥ ५५॥ अंतर्भूमिगतश्चैवतवपुत्रेनिपातिते ॥ बहुपादैर्बहुभुजैःकबंधैर्घोरदर्शनैः ॥ ५६ ॥ नृत्यद्भिर्भयदैर्व्याप्तादिशस्तत्राभवन्नृप ॥ ध्वजवंतोस्त्रवंतश्चशस्त्रवंतस्तथैवच ॥ ५७॥ प्राकंपंततत्तोराजंस्तवपुत्रेनिपातिते ॥ ह्रदाःकूपाश्चरुधिरमुद्वमुर्नृपसत्तम ॥ ५८ ॥ नद्यश्चसुमहावेगाःप्रतिस्रोतोवहाभवन् ॥ पुंल्लिंगाइवनार्यस्तुस्त्रीलिंगाःपुरुषाभवन् ॥ ५९ ॥ दुर्योधनेतदाराजन्पतितेतनयेतव ॥ दृष्ट्वातानद्भुतोत्पातान्पंचालाःपांडवैःसह ॥ ६० ॥ आविग्नमनसःसर्वेबभूवुर्भरतर्षभ ॥ ययुर्देवायथाकामंगंधर्वाप्सरसस्तथा ॥ ६१ ॥ कथयंतोद्भुतंयुद्धंसुतयोस्तवभारत ॥ तथैवसिद्धाराजेंद्रतथावातिकचारणाः ॥ ६२ ॥ नरसिंहौप्रशंसंतौविप्रजग्मुर्यथागतं ॥ ६३ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिदुर्योधनवधेअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥छ॥ ॥छ॥

॥ ६२ ॥ ६३ ॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥छ॥ ॥छ॥ ॥छ॥

तनइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

संजयउवाच तंपातितंततोदृष्ट्वामहाशालमिवोद्गतं ॥ प्रहृष्टमनसःसर्वेददृशुस्तत्रपांडवाः ॥ १ ॥ उन्मत्तमिवमातंगंसिंहेनविनिपातितं ॥ ददृशुर्हृष्टरोमाणः
सर्वेतचापिसोमकाः ॥ २ ॥ ततोदुर्योधनंहत्वाभीमसेनःप्रतापवान् ॥ पातितंकौरवेंद्रंतमुपगम्येदमब्रवीत् ॥ ३ ॥ गौर्गौरितिपुरामंदद्रौपदीमेकवाससं ॥ यत्स
भायांहसन्नस्मांस्तदावदसिदुर्मते ॥ ४ ॥ तस्यावहासस्यफलमद्यत्वंसमवाप्नुहि ॥ एवमुक्त्वासवामेनपदामौलिमुपास्पृशत् ॥ ५ ॥ शिरश्चराजसिंहस्यपादेनस
मलोडयत् ॥ तथैवक्रोधसंरक्तोभीमःपरबलार्दनः ॥ ६ ॥ पुनरेवाब्रवीद्वाक्यंयत्तच्छृणुनराधिप ॥ येस्मान्पुरोपनृत्यंतमूढागौरितिगौरिति ॥ ७ ॥ तान्वयंप्रतिनृ
त्यामःपुनर्गौरितिगौरिति ॥ नास्माकंनिकृतिर्वह्निर्नाक्षद्यूतंनवंचना ॥ स्वबाहुबलमाश्रित्यप्रबाधामोवयंरिपून् ॥ ८ ॥ सोवाप्यवैरस्यपरस्यपारंवृकोदरःप्राह
शनैःप्रहस्य ॥ युधिष्ठिरंकेशवसृंजयांश्चधनंजयंमाद्रवतीसुतौच ॥ ९ ॥ रजस्वलांद्रौपदीमानयन्येयेचाप्यकुर्वंतसदस्यवस्त्रां ॥ तान्पश्यध्वंपांडवैर्धार्तराष्ट्रान्र
णेहतांस्तपसायाज्ञसेन्याः ॥ १० ॥ येनःपुरापंढतिलानवोचन्क्रूराराज्ञोधृतराष्ट्रस्यपुत्राः ॥ तेनोहताःसगणाःसानुबंधाःकामंस्वर्गंनरकंवापतामः ॥ ११ ॥ पु
नश्चराज्ञःपतितस्यभूमौसतांगदांस्कंधगतांप्रगृह्य ॥ वामेनपादेनशिरःप्रमृद्यदुर्योधनंनैकृतिकंन्यवोचत् ॥ १२ ॥ हृष्टेनराजन्कुरुसत्तमस्यक्षुद्रात्मनाभीमसे
नेनपादं ॥ दृष्ट्वाकृतंमूर्धनिनाभ्यनंदन्धर्मात्मानःसोमकानांप्रबर्हाः ॥ १३ ॥ तवपुत्रंतथाहत्वाकत्थमानंवृकोदरं ॥ नृत्यमानंचबहुशोधर्मराजाब्रवीदिदं ॥ १४ ॥
गतोसिवैरस्यानृण्यंप्रतिज्ञापूरितात्वया ॥ शुभेनाथाशुभेनैवकर्मणाविरमाधुना ॥ १५ ॥ माशिरोस्यपदामर्दीमाधर्मस्तेतिगोभवेत् ॥ राजाज्ञातिर्हतश्चायंनै
तद्याय्यंतवानघ ॥ १६ ॥ एकादशचमूनाथंकुरूणामधिपंतथा ॥ मास्प्राक्षीर्भीमपादेनराजानंज्ञातिमेवच ॥ १७ ॥ हतबंधुर्हतामात्योभ्रष्टसैन्योहतोमृधे ॥
सर्वाकारेणशोच्योयंनावहास्योयमीश्वरः ॥ १८ ॥ विध्वस्तोयंहतामात्योहतभ्राताहतप्रजः ॥ उत्सन्नपिंडोभ्राताचनैतद्याय्यंकृतंत्वया ॥ १९ ॥ धार्मिकोभी
मसेनोसावित्याहुस्त्वांपुराजनाः ॥ सकस्माद्भीमसेनत्वंराजानमधितिष्ठसि ॥ २० ॥ इत्युक्त्वाभीमसेनंतुसाश्रुकंठोयुधिष्ठिरः ॥ उपसृत्याब्रवीद्दीनोदुर्योधन
मरिंदमं ॥ २१ ॥ तातमन्युर्नतेकार्योनात्माशोच्यस्त्वयातथा ॥ नूनंपूर्वकृतंकर्मसुघोरमनुभूयते ॥ २२ ॥ धात्रोपदिष्टंविषमंनूनंफलमसंस्कृतं ॥ यद्वयंत्वांजिघां
सामस्त्वंचास्मान्कुरुसत्तम ॥ २३ ॥ आत्मनोह्यपराधेनमहद्व्यसनमीदृशं ॥ प्राप्तवानसियल्लोभान्मदाद्बाल्याच्चभारत ॥ २४ ॥

॥२५॥२६॥२७॥२८॥२९॥३०॥३१॥इ०ग०नै०भा०एकोनषष्टितमोऽध्यायः॥५९॥७॥ अधर्मेणेति॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥आत्मेति आत्मवृद्धिः शत्रुक्षयः स्वमित्रस्यवृद्धिः

घातयित्वावयस्यांश्चभ्रातॄनथपितॄंस्तथा॥पुत्रान्पौत्रांस्तथाचान्यांस्ततोऽसिनिधनंगतः॥२५॥तवापराधादस्माभिर्भ्रातरस्तेनिपातिताः॥निहताज्ञातयश्चा
पिदिष्टंमन्येदुरत्ययं॥२६॥आत्मानंशोचनीयस्त्वंश्लाघ्योमृत्युस्तवानघ॥वयमेवाधुनाशोच्याःसर्वावस्थासुकौरव॥२७॥कृपणंवर्तयिष्यामस्तैर्हीनाबंधु
भिःप्रियैः॥भ्रातॄणांचैवपुत्राणांतथावैशोकविह्वलाः॥२८॥कथंद्रक्ष्यामिविधवावधूःशोकपरिप्लुताः॥त्वमेकःसुस्थितोराजन्स्वर्गेतेनिलयोध्रुवः॥२९॥
वयंनरकसंज्ञंवैदुःखंप्राप्स्यामदारुणं॥स्नुषाश्चप्रस्नुषाश्चैवधृतराष्ट्रस्यविह्वलाः॥गर्हयिष्यंतिनोनूनंविधवाःशोककर्शिताः॥३०॥ संजयउवाच एव
मुक्त्वासुदुःखार्तोनिशश्वाससपार्थिवः॥विललापचिरंचापिधर्मपुत्रोयुधिष्ठिरः॥३१॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणियुधिष्ठिरविलापेएको
नषष्टितमोऽध्यायः॥५९॥ ॥७॥ धृतराष्ट्रउवाच अधर्मेणहतंदृष्ट्वाराजानंमाधवोत्तमः॥किमब्रवीत्तदासूतबलदेवोमहाबलः॥१॥गदायुद्धविशे
षज्ञोगदायुद्धविशारदः॥कृतवान्रौहिणेयोयत्तन्ममाचक्ष्वसंजय॥२॥ संजयउवाच शिरस्यभिहतंदृष्ट्वाभीमसेनेनतेसुतं॥ रामःप्रहरतांश्रेष्ठश्चुक्रो
धबलवद्बली॥३॥ततोमध्येनरेंद्राणामूर्ध्वबाहुर्हलायुधः॥कुर्वन्नार्तस्वरंघोरंधिग्धिग्भीमेत्युवाचह॥४॥अहोधिग्यदधोनाभेःप्रहृतंधर्मविग्रहे॥नैतद्दृष्टंगदा
युद्धेकृतवान्यद्वृकोदरः॥५॥अधोनाभ्यानहंतव्यमितिशास्त्रस्यनिश्चयः॥अयंत्वशास्त्रविन्मूढःस्वच्छंदात्संप्रवर्तते॥६॥तस्यतत्तद्ब्रुवाणस्यरोषःसमभवन्महा
न्॥ ततोराजानमालोक्यरोषसंरक्तलोचनः॥७॥बलदेवोमहाराजततोवचनमब्रवीत्॥नचैषपतितःकृष्णकेवलंमत्समोऽसमः॥८॥आश्रितस्यतुदौर्बल्या
दाश्रयःपरिभर्त्स्यते॥ततोलांगलमुद्यम्यभीममभ्यद्रवद्बली॥९॥तस्योर्ध्वबाहोःसदृशंरूपमासीन्महात्मनः॥बहुधातुविचित्रस्यश्वेतस्येवमहागिरेः॥१०॥तमु
त्पतंतंजग्राहकेशवोविनयान्वितः॥बाहुभ्यांपीनवृत्ताभ्यांप्रयत्नाद्बलवद्बली॥११॥सितासितौयदुवरौशुशुभातेधिकंतदा॥नभोगतौयथाराजंश्चंद्रसूर्यौ
दिनक्षये॥१२॥उवाचचैनंसंरब्धंशमयन्निवकेशवः॥आत्मवृद्धिर्मित्रवृद्धिर्मित्रमित्रोदयस्तथा॥१३॥विपरीतंद्विषत्स्वेतत्षड्विधावृद्धिरात्मनः॥आत्मन्य
पिचमित्रेचविपरीतंयदाभवेत्॥१४॥ तदाविद्यान्मनोग्लानिमाशुशांतिकरोभवेत्॥अस्माकंसहजंमित्रंपांडवाःशुद्धपौरुषाः॥१५॥

शत्रुमित्रस्यक्षयः स्वमित्रमित्रस्यवृद्धिः शत्रुमित्रमित्रस्यक्षयः एवंषड्विधाआत्मनोवृद्धिः॥१३॥ विपरीतंआत्मक्षयशत्रुवृद्ध्यादिकंइदमेवषट्कं॥१४॥ प्रकृतेमित्रवृद्धिरेवात्मवृद्धिरित्याह अस्माकमिति १५

॥ १६ ॥ भंक्ताभंक्ष्येइतिप्रतिज्ञापालनरूपत्वादप्यधोनाभिप्रहारोनाधर्मइत्यर्थः ॥ १७ ॥ १८ ॥ यौनःयोनिनिमित्तःसंबंधः अस्माकंपितामहःपांडवानांमातामहश्चैकइतियौनसंबंधः एवमर्जुनेजामातृत्वा
दिरपि सुखहार्दैःअन्योन्यसुखप्रदैःसौहार्दैःस्नेहेनचेत्यर्थः ॥ १९ ॥ सीरभृत्रामः ॥ २० ॥ धर्मइति नियच्छतिनियममेतिअर्थकामाभ्यांधर्मःसंकोचमेतीत्यर्थः ॥ २१ ॥ धर्मार्थौकामेनापीडयन्धर्मकामा

स्वकाःपितृष्वसुःपुत्रास्तेपरैर्निकृताभृशं ॥ प्रतिज्ञापालनंधर्मःक्षत्रियस्येहवेद्म्यहं ॥ १६ ॥ सुयोधनस्यगदयाभंक्तास्म्यूरूमहाहवे ॥ इतिपूर्वंप्रतिज्ञातंभीमेनहि
सभातले ॥ १७ ॥ मैत्रेयेणाभिशप्तश्चपूर्वमेवमहर्षिणा ॥ ऊरूतेभेत्स्यतेभीमोगदयेतिपरंतप ॥ १८ ॥ अतोदोषंनपश्यामिमाक्रुध्यस्त्वप्रलंबहन् ॥ यौनःस्वैःसु
खहार्दैश्चसंबंधःसहपांडवैः ॥ १९ ॥ तेषांवृद्ध्याहिवृद्धिर्नोमाक्रुधःपुरुषर्षभ ॥ वासुदेववचःश्रुत्वासीरभृत्प्राहधर्मवित् ॥ २० ॥ धर्मःसुचरितःसद्भिःसचद्वाभ्यां
नियच्छति ॥ अर्थश्चात्यर्थलुब्धस्यकामश्चातिप्रसंगिणः ॥ २१ ॥ धर्मार्थौधर्मकामौचकामार्थौचाप्यपीडयन् ॥ धर्मार्थकामान्योभ्येतिसोत्यंतंसुखमश्नुते ॥
॥ २२ ॥ तदिदंव्याकुलंसर्वंकृतंधर्मस्यपीडनात् ॥ भीमसेनेनगोविंदकामंत्वंतुयथात्थमां ॥ २३ ॥ कृष्णउवाच अरोषणोहिधर्मात्मासततंधर्मवत्सलः ॥
भवान्प्रख्यायतेलोकेतस्मात्संशाम्यमाक्रुधः ॥ २४ ॥ प्राप्तंकलियुगंविद्धिप्रतिज्ञांपांडवस्यच ॥ आनृण्यंयातुवैरस्यप्रतिज्ञायाश्चपांडवः ॥ २५ ॥ संजयउवाच
धर्मच्छलमपिश्रुत्वाकेशवात्सविशांपते ॥ नैवप्रीतमनारामोवचनंप्राहसंसदि ॥ २६ ॥ हत्वाऽधर्मेणराजानंधर्मात्मानंसुयोधनं ॥ जिह्मयोधीतिलोकेस्मिन्
ख्यातिंयास्यतिपांडवः ॥ २७ ॥ दुर्योधनोपिधर्मात्मागतिंयास्यतिशाश्वतीं ॥ ऋजुयोधीहतोराजाधार्तराष्ट्रोनराधिपः ॥ २८ ॥ युद्धदीक्षांप्रविश्याजौरणयज्ञं
वितत्यच ॥ हुत्वात्मानममित्राग्नौप्रापचावभृथंयशः ॥ २९ ॥ इत्युक्त्वारथमास्थायरौहिणेयःप्रतापवान् ॥ श्वेताभ्रशिखराकारःप्रययौद्वारकांप्रति ॥ ३० ॥ पं
चालाश्चसवार्ष्णेयाःपांडवाश्चविशांपते ॥ रामेद्वारवतींयातेनातिप्रमनसोभवन् ॥ ३१ ॥ ततोयुधिष्ठिरंदीनंचिंतापरमधोमुखं ॥ शोकोपहतसंकल्पंवासुदेवो
ब्रवीदिदं ॥ ३२ ॥ वासुदेवउवाच धर्मराजकिमर्थंत्वमधर्ममनुमन्यसे ॥ हतबंधोर्यदेतस्यपतितस्यविचेतसः ॥ ३३ ॥ दुर्योधनस्यभीमेनमृद्यमानंशिरःपदा ॥
उपप्रेक्षसिकस्मात्त्वंधर्मज्ञःसन्नराधिप ॥ ३४ ॥ युधिष्ठिरउवाच नममैतत्प्रियंकृष्णयद्राजानंवृकोदरः ॥ पदामूर्ध्न्यस्पृशत्क्रोधान्नचहृष्येकुलक्षये ॥ ३५ ॥

वर्थैनापीडयनकामार्थौधर्मेणचापीडयन्नित्यर्थः ॥ २२ ॥ कामंयथेष्टंत्वंमांप्रतिउक्तवानसिनतुधर्म्यं यतोऽर्थलुब्धेनभीमेनधर्मस्यपीडनात्पूर्वोक्तोमार्गोव्याकुलीकृतइत्यर्थः ॥ २३ ॥ २४ ॥ प्राप्तमिति क
लियुगारंभेएतावत्पापंनातीवखेदावहमितिभावः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेषष्टितमोऽध्यायः ॥ ६० ॥ ॥ ७॥ ॥ ७॥

निकृत्यानिकृतानित्यंधृतराष्ट्रसुतैर्वयं ॥ बहूनिपरुषाण्युक्त्वावनंप्रस्थापिताःस्मह ॥ ३६॥ भीमसेनस्यतद्दुःखमतीवहृदिवर्तते ॥ इतिसंचिंत्यवार्ष्णेयमयैतत्समु पेक्षितं ॥ ३७॥ तस्माद्धत्वाऽकृतप्रज्ञंलुब्धंकामवशानुगं ॥ लभतांपांडवःकामंधर्मेऽधर्मेचवाकृते ॥ ३८॥ संजयउवाच इत्युक्तेधर्मराजेनवासुदेवोऽब्रवी दिदं ॥ काममस्त्वेनदितिवैकृच्छ्राद्यदुकुलोद्वहः ॥ ३९ ॥ इत्युक्तोवासुदेवेनभीमप्रियहितैषिणा ॥ अन्वमोदततत्सर्वंयद्भीमेनकृतंयुधि ॥ ४० ॥ भीमसेनोपिह त्वाजौतवपुत्रममर्पणः ॥ अभिवाद्याग्रतःस्थित्वासंप्रहृष्टःकृतांजलिः ॥ ४१ ॥ प्रोवाचसुमहातेजाधर्मराजंयुधिष्ठिरं ॥ हर्षादुत्फुल्लनयनोजितकाशीविशांपते ॥ ४२ ॥ तवाद्यपृथिवीसर्वाक्षेमानिहतकंटका ॥ तांप्रशाधिमहाराजस्वधर्ममनुपालय ॥ ४३ ॥ यस्तुकर्तास्यवैरस्यनिकृत्यानिकृतिप्रियः ॥ सोयंविनिहतःशेते पृथिव्यांपृथिवीपते ॥ ४४ ॥ दुःशासनप्रभृतयःसर्वेतेचोग्रवादिनः ॥ राधेयःशकुनिश्चैवहताश्चतवशत्रवः ॥ ४५ ॥ सेयंरत्नसमाकीर्णामहीसवनपर्वता ॥ उपा वृत्तामहाराजत्वामद्यनिहतद्विपं ॥ ४६ ॥ युधिष्ठिरउवाच गतोवैरस्यनिधनंहतोराजासुयोधनः ॥ कृष्णस्यमतमास्थायविजितेयंवसुंधरा ॥ ४७ ॥ दि ष्ट्यागतस्त्वमानृण्यंमातुःकोपस्यचोभयोः ॥ दिष्ट्याजयसिदुर्धर्षदिष्ट्याशत्रुर्निपातितः ॥ ४८ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिबलदेवसांत्वने षष्टितमोऽध्यायः ॥ ६० ॥ ॥ ७॥ ॥ ७॥ धृतराष्ट्रउवाच हतंदुर्योधनंदृष्ट्वाभीमसेनेनसंयुगे ॥ पांडवाःसृंजयाश्चैवकिमकुर्वतसंजय ॥ ॥ १ ॥ संजयउवाच हतंदुर्योधनंदृष्ट्वाभीमसेनेनसंयुगे ॥ सिंहेनेवमहाराजमत्तंवनगजंयथा ॥ २ ॥ प्रहृष्टमनसस्तत्रकृष्णेनसहपांडवाः ॥ पंचालाःसृंज याश्चैवनिहतेकुरुनंदने ॥ ३ ॥ आविध्यन्नुत्तरीयाणिसिंहनादांश्चनेदिरे ॥ नैतान्हर्षसमाविष्टानियंसेहेवसुंधरा ॥ ४ ॥ धनूंष्यन्येव्याक्षिपंतज्याश्चाप्यन्येतथाक्षि पन् ॥ दध्मुरन्येमहाशंखानन्येजघ्नुश्चदुंदुभीन् ॥ ५ ॥ चिक्रीडुश्चतथैवान्येजहसुश्चतवाहिताः ॥ अब्रुवंश्चासकृद्वीराभीमसेनमिदंवचः ॥ ६ ॥ दुष्करंभवताक र्मरणेद्यसुमहत्कृतं ॥ कौरवेंद्ररणेहत्वागदयातिकृतश्रमं ॥ ७ ॥ इंद्रेणेवहिवृत्रस्यवधंपरमसंयुगे ॥ त्वयाकृतममन्यंतशत्रोर्वधमिमंजनाः ॥ ८ ॥ चरंतंविविधा न्मार्गान्मंडलानिचसर्वशः ॥ दुर्योधनमिमंशूरंकोन्योहन्याद्वृकोदरात् ॥ ९ ॥ वैरस्यचगतःपारंत्वमिहान्यैःसुदुर्गमं ॥ अशक्यमेतदन्येनसंपादयितुमीदृशं ॥ ॥ १० ॥ कुंजरेणेवमत्तेनवीरसंग्राममूर्धनि ॥ दुर्योधनशिरोदिष्ट्यापादेनमृदितंत्वया ॥ ११ ॥ हतमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥२१॥ अतिभुग्नेनअत्यंतंनामितेन ॥ २२ ॥ २३ ॥ २४॥ २५ ॥ २६ ॥ २७॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२॥ ३३ ॥३४॥३५॥३६॥३७॥

ये विप्रकुर्वन्राजानं धर्मात्मानं युधिष्ठिरं ॥ मूर्ध्नि ते पांकृतः पादो दिष्ट्या ते स्त्र
सिंहेन महिपस्येव कृत्वा संगरमुत्तमं॥ दुःशासनस्य रुधिरं दिष्ट्या पीतं त्वया नघ ॥१२॥
नकर्मणा॥१३॥ अमित्राणामधिष्ठानाद्वधाद्दुर्योधनस्य च ॥ भीम दिष्ट्या पृथिव्यां ते प्रथितं सुमहद्यशः ॥ १४ ॥ एवं नूनं हते वृत्रे शक्रं नंदंति वंदिनः ॥ तथा त्वां नि
हतामित्रं वयं नंदाम भारत॥ १५॥ दुर्योधनवधे यानि रोमाणि हृपितानि नः ॥ अद्यापि न विकृष्यंते तानि तद्विद्धि भारत ॥ १६ ॥ इत्यब्रुवन्भीमसेनं वातिकास्त
त्र संगताः॥ तान्हृष्टान्पुरुषव्याघ्रान्पंचालान्पांडवैः सह॥ १७॥ ब्रुवतोऽसदृशं तत्र प्रोवाच मधुसूदनः ॥ नन्याय्यं निहतं शत्रुं भूयो हंतुं नराधिपाः ॥ १८ ॥ अस
कृद्वाग्भिरुग्राभिर्निहतो ह्येष मंदधीः ॥ नैदैव पहतः पापो यदैव निरपत्रपः ॥ १९ ॥ लुब्धः पापसहायश्च सुहृदां शासनातिगः ॥ बहुशो विदुरद्रोणकृपगांगेयसृंज
यैः ॥ २० ॥ पांडुभ्यः प्रार्थ्यमानोपि पित्र्यमंशं न दत्तवान्॥ नैष योग्योद्य मित्रं वा शत्रुर्वा पुरुषाधमः ॥ २१ ॥ किमनेनातिभुग्नेन वाग्भिः काष्ठमधर्मणा ॥ रथे
ष्वारोहत क्षिप्रं गच्छामो वसुधाधिपाः ॥ २२ ॥ दिष्ट्या हतोयं पापात्मा सामात्यज्ञातिबांधवः ॥ इति श्रुत्वा त्वधिक्षेपं कृष्णाद्दुर्योधनो नृपः ॥ २३ ॥ अमर्षवशमाप
न्न उदतिष्ठद्विशांपते ॥ स्फिग्देशेनोपविष्टः सदोर्भ्यां विष्टभ्य मेदिनीं ॥ २४॥ दृष्टिं भ्रूसंकटां कृत्वा वासुदेवे न्यपातयत् ॥ अर्धोन्नतशरीरस्य रूपमासीन्नृपस्य तु॥
॥ २५॥ क्रुद्धस्याशीविपस्येव च्छिन्नपुच्छस्य भारत ॥ प्राणांतकरिणीं घोरां वेदनामप्यचिंतयन्॥ २६॥ दुर्योधनो वासुदेवं वाग्भिरुग्राभिरार्दयन् ॥ कंसदास
स्य दायाद न ते लज्जास्त्यनेन वै॥ २७॥ अधर्मेण गदायुद्धे यदहं विनिपातितः॥ ऊरू भिंधीति भीमस्य स्मृतिं मिथ्या प्रयच्छता ॥ २८॥ किं न विज्ञातमेतन्मे यदर्जु
नमवोचथाः॥ घातयित्वा महीपालानृजुयुद्धान्सहस्रशः ॥ २९ ॥ जिह्मैरुपायैर्बहुभिर्न ते लज्जा न ते घृणा ॥ अहन्यहनि शूराणां कुर्वाणः कदनं महत् ॥ ३० ॥
शिखंडिनं पुरस्कृत्य घातितस्ते पितामहः ॥ अश्वत्थाम्नः सनामानं हत्वा नागं सुदुर्मते॥ ३१ ॥ आचार्यो न्यासितः शस्त्रं किं तन्न विदितं मया ॥ स चानेन नृशंसेन धृ
ष्टद्युम्नेन वीर्यवान॥३२॥ पात्यमानस्त्वया दृष्टो न चैनं त्वमवारयः॥ वधार्थं पांडुपुत्रस्य याचितां शक्तिमेव च॥३३॥घटोत्कचे व्यंसयतः कस्त्वत्तः पापकृत्तमः॥छि
न्नहस्तः प्रायगतस्तथा भूरिश्रवा बली॥ ३४॥ त्वयाभिसृष्टेन हतः शैनेयेन महात्मना॥ कुर्वाणश्चोत्तमं कर्म कर्णः पार्थजिगीषया ॥ ३५॥ व्यंसनेनाश्वसेनस्य प
न्नगेंद्रस्य वै पुनः॥ पुनश्च पतिते चक्रे व्यसनार्तः पराजितः॥ ३६॥ पातितः समरे कर्णश्चक्रव्यग्रोग्रणीर्नृणां॥ यदि मां चापि कर्णं च भीष्मद्रोणौ च संयुगे ॥ ३७॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

ऋजुनाप्रतियुध्येथानतेस्याद्विजयोध्रुवं ॥ त्वयापुनरनार्येणजिह्ममार्गेणपार्थिवाः ॥ ३८ ॥ स्वधर्ममनुतिष्ठंतोवयंचान्येचघातिताः ॥ वासुदेवउवाच हत
स्त्वमसिगांधारेसभ्रातृसुतबांधवः ॥ ३९ ॥ सगणःससुहृच्चैवपापंमार्गमनुष्ठितः ॥ तवैवदुष्कृतैर्वीरौभीष्मद्रोणौनिपातितौ ॥ ४० ॥ कर्णश्चनिहतःसंख्येतव
शीलानुवर्तकः ॥ याच्यमानंमयामूढपित्र्यमंशंनदित्ससि ॥ ४१ ॥ पांडवेभ्यःस्वराज्यंचलोभाच्छकुनिनिश्चयात् ॥ विषंतेभीमसेनायदत्तंसर्वेचपांडवाः ॥ ४२ ॥
प्रदीपिताजतुगृहेमात्रासहसुदुर्मते ॥ सभायांयाज्ञसेनीचकृष्टाद्यूतेरजस्वला ॥ ४३ ॥ तदैवतावद्दुष्टात्मन्वध्यस्त्वंनिरपत्रप ॥ अनक्षज्ञंचधर्मज्ञंसौबलेनाक्षवे
दिना ॥ ४४ ॥ निकृत्यायत्पराजैषीस्तस्मादसिहतोरणे ॥ जयद्रथेनपापेनयत्कृष्णाक्लेशितावने ॥ ४५ ॥ यातेषुमृगयांचैवतृणबिंदोरथाश्रमं ॥ अभिमन्युश्चयद्बा
लएकोबहुभिराहवे ॥ ४६ ॥ त्वद्दोषैर्निहतःपापतस्मादसिहतोरणे ॥ यान्यकार्याणिचास्माकंकृतानीतिप्रभाषसे ॥ ४७ ॥ वैगुण्येनतवात्यर्थंसर्वंहितदनुष्ठितं ॥
बृहस्पतेरुशनसोनोपदेशःश्रुतस्त्वया ॥ ४८ ॥ वृद्धानोपासिताश्चैवहितंवाक्यंनतेश्रुतं ॥ लोभेनातिबलेनत्वंतृष्णयाचवशीकृतः ॥ ४९ ॥ कृतवानस्यकार्याणि
विपाकस्तस्यभुज्यतां ॥ दुर्योधनउवाच अधीतंविधिवद्दत्तंभूःप्रशास्ताससागरा ॥ ५० ॥ मूर्ध्निस्थितममित्राणांकोनुस्वंततरोमया ॥ यदिष्टंक्षत्रबंधूनां
स्वधर्ममनुपश्यतां ॥ ५१ ॥ तदिदंनिधनंप्राप्तंकोनुस्वंततरोमया ॥ देवार्हामानुषाःभोगाःप्राप्ताअसुलभानृपैः ॥ ५२ ॥ ऐश्वर्यंचोत्तमंप्राप्तंकोनुस्वंततरोमया ॥
ससुहृत्सानुगश्चैवस्वर्गंगंताहमच्युत ॥ ५३ ॥ यूयंनिहतसंकल्पाःशोचंतोवर्तयिष्यथ ॥ संजयउवाच अस्यवाक्यस्यनिधनेकुरुराजस्यधीमतः ॥ ५४ ॥
अपतत्सुमहद्वर्षंपुष्पाणांपुण्यगंधिनां ॥ अवादयंतगंधर्वावादित्रंसुमनोहरं ॥ ५५ ॥ जगुश्चाप्सरसोराज्ञोयशःसंबद्धमेवच ॥ सिद्धाश्चमुमुचुर्वाचःसाधुसा
ध्वितिपार्थिव ॥ ५६ ॥ ववौचसुरभिर्वायुःपुण्यगंधोमृदुःसुखः ॥ व्यराजंश्चदिशःसर्वानभोवैदूर्यसन्निभं ॥ ५७ ॥ अत्यद्भुतानितेदृष्ट्वावासुदेवपुरोगमाः ॥ दुर्यो
धनस्यपूजांतुदृष्ट्वाव्रीडामुपागमन् ॥ ५८ ॥ हतांश्चाधर्मतःश्रुत्वाशोकार्ताःशुशुचुर्हिते ॥ भीष्मंद्रोणंतथाकर्णंभूरिश्रवसमेवच ॥ ५९ ॥ तांस्तुचिंतापरान्दृष्ट्वापांड
वान्दीनचेतसः ॥ प्रोवाचेदंवचःकृष्णोमेघदुंदुभिनिस्वनः ॥ ६० ॥ नैषशक्योतिशीघ्रास्त्रस्तेचसर्वेमहारथाः ॥ ऋजुयुद्धेनविक्रांताहंतुंयुष्माभिराहवे ॥ ६१ ॥
नैषशक्यःकदाचित्तुहंतुंधर्मेणपार्थिवः ॥ तेवाभीष्ममुखाःसर्वेमहेष्वासामहारथाः ॥ ६२ ॥

इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ६३ ॥ ६४ ॥ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

मयानेकैरुपायैस्तुमायायोगेनचासकृत् ॥ हतास्तेसर्वएवाजौभवतांहितमिच्छता ॥ ६३ ॥ यदिनैवंविधंजातुकुर्यांजिह्मम हंरणे ॥ कुतोवोविजयोभूयःकुतोरा
ज्यंकुतोधनं ॥ ६४ ॥ तेहिसर्वेमहात्मानश्चत्वारोतिरथाभुवि ॥ नशक्याधर्मतोहंतुंलोकपालैरपिस्वयं ॥ ६५ ॥ तथैवायंगदापाणिधार्तराष्ट्रोगतक्लमः ॥ नशक्यो
धर्मतोहंतुंकालेनापीहदंडिना ॥ ६६ ॥ नचवोहृदिकर्तव्यंयदयंघातितोरिपुः ॥ मिथ्यावध्यास्तथोपायैर्बहवःशत्रवोधिकाः ॥ ६७ ॥ पूर्वैरनुगतोमार्गोदेवैरसुर
घातिभिः ॥ सद्भिश्चानुगतःपंथाःस्मसर्वैरनुगम्यते ॥ ६८ ॥ कृतकृत्याश्चसायाह्नेनिवासंरोचयामहे ॥ साश्वनागरथाःसर्वेविश्रमामोनराधिपाः ॥ ६९ ॥ वासु
देववचःश्रुत्वातदानींपांडवैःसह ॥ पंचालाभृशसंहृष्टाविनेदुःसिंहसंघवत् ॥ ७० ॥ ततःप्राध्मापयन्शंखान्पांचजन्यंचमाधवः ॥ हृष्टादुर्योधनंदृष्ट्वानिहतंपु
रुषर्षभ ॥ ७१ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिकृष्णपांडवदुर्योधनसंवादेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ७ ॥ संजयउवाच ततस्तेप्र
यग्रुःसर्वेनिवासायमहीक्षितः ॥ शंखान्प्रध्मापयंतोवैहृष्टाःपरिघबाहवः ॥ १ ॥ पांडवान्गच्छतश्चापिशिबिरंनोविशांपते ॥ महेष्वासोन्वगात्पश्चाद्युयुत्सुःसा
त्यकिस्तथा ॥ २ ॥ धृष्टद्युम्नःशिखंडीचद्रौपदेयाश्चसर्वशः ॥ सर्वेचान्येमहेष्वासाययुःस्वशिबिराण्युत ॥ ३ ॥ ततस्तेप्राविशन्पार्थाहतत्विट्कंहतेश्वरं ॥ दुर्योधनं
स्यशिबिरंरंगवद्विसृतेजने ॥ ४ ॥ गतोत्सवंपुरमिवहृतनागमिवह्रदं ॥ स्त्रीवर्षवरभूयिष्ठंवृद्धामात्यैरधिष्ठितं ॥ ५ ॥ तत्रैतान्पर्युपातिष्ठन्दुर्योधनपुरःसराः ॥ कृ
तांजलिपुटाराजन्काषायमलिनांबराः ॥ ६ ॥ शिबिरंसमनुप्राप्यकुरुराजस्यपांडवाः ॥ अवतेरुर्महाराजरथेभ्योरथसत्तमाः ॥ ७ ॥ ततोगांडीवधन्वानमभ्यभाषत
केशवः ॥ स्थितःप्रियहितेनित्यमतीवभरतर्षभ ॥ ८ ॥ अवरोपयगांडीवमक्षय्यौचमहेषुधी ॥ अथाहमवरोक्ष्यामिपश्चाद्भरतसत्तम ॥ ९ ॥ स्वयंचैवावरोहत्वमेत
द्धि्यस्तवानघ ॥ तच्चाकरोत्तथावीरःपांडुपुत्रोधनंजयः ॥ १० ॥ अथपश्चात्ततःकृष्णोरश्मीनुत्सृज्यवाजिनां ॥ अवारोहतमेधावीरथाद्गांडीवधन्वनः ॥ ११ ॥
अथावतीर्णेभूतानामीश्वरेसुमहात्मनि ॥ कपिरंतर्दधेदिव्योध्वजोगांडीवधन्वनः ॥ १२ ॥ सदग्धोद्रोणकर्णाभ्यांदिव्यैरस्त्रैर्महारथः ॥ अनादीप्तोग्निनात्याशु
प्रजज्वालमहीपते ॥ १३ ॥ सोपासंगःसरश्मिश्चसाश्वःसयुगबंधुरः ॥ भस्मीभूतोपतद्भूमौरथोगांडीवधन्वनः ॥ १४ ॥ तंतथाभस्मभूतंतुदृष्ट्वापांडुसुताःप्रभो ॥
अभवन्विस्मिताराजन्नर्जुनश्चेदमब्रवीत् ॥ १५ ॥

ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ वर्षवरःषंढः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

ऋजुनाप्रतियुध्येथानतेस्याद्दिजयोध्रुवं ॥ त्वयापुनरनार्येणजिह्ममार्गेणपार्थिवाः ॥ ३८ ॥ स्वधर्ममनुतिष्ठंतोवयंचान्येचघातिताः ॥ वासुदेवउवाच हत
स्त्वमसिगांधारेसभ्रातृसुतबांधवः ॥ ३९ ॥ सगणःससुहृच्चैवपापंमार्गमनुष्ठितः ॥ तवैवदुष्कृतैर्वीरौभीष्मद्रोणौनिपातितौ ॥४०॥ कर्णश्चनिहतःसंख्येतव
शीलानुवर्तकः ॥ याच्यमानंमयामूढपित्र्यमंशंनदित्ससि ॥४१॥ पांडवेभ्यःस्वराज्यंचलोभाच्छकुनिनिश्चयात् ॥ विषंतेभीमसेनायदत्तंसर्वेचपांडवाः ॥४२॥
प्रदीपिताजतुगृहेमात्रासहसुदुर्मते ॥ सभायांयाज्ञसेनीचकृष्टाद्यूतेरजस्वला ॥ ४३ ॥ तदैवतावद्दुष्टात्मन्वध्यस्त्वंनिरपत्रप ॥ अनक्षज्ञंचधर्मज्ञंसौबलेनाक्षवे
दिना ॥४४॥ निकृत्यायत्पराजैषीस्तस्मादसिहतोरणे ॥ जयद्रथेनपापेनयत्कृष्णाक्लेशितावने ॥४५॥ यातेषुमृगयांचैवतृणबिंदोरथाश्रमं ॥ अभिमन्युश्चयद्बा
लएकोबहुभिराहवे ॥ ४६ ॥ त्वद्दोषैर्निहतःपापतस्मादसिहतोरणे ॥ यान्यकार्याणिचास्माकंकृतानीतिप्रभाषसे ॥ ४७ ॥ वैगुण्येनतवात्यर्थंसर्वंहितदनुष्ठितं ॥
बृहस्पतेरुशनसोनोपदेशःश्रुतस्त्वया ॥ ४८ ॥ वृद्धानोपासिताश्चैवहितंवाक्यंनतेश्रुतं ॥ लोभेनातिबलेनत्वंतृष्णयाचवशीकृतः ॥ ४९ ॥ कृतवानस्यकार्याणि
विपाकस्तस्यभुज्यतां ॥ दुर्योधनउवाच अधीतंविधिवद्दत्तंभूःप्रशास्ताससागरा ॥ ५० ॥ मूर्ध्निस्थितममित्राणांकोनुस्वंततरोमया ॥ यदिष्टंक्षत्रबंधूनां
स्वधर्ममनुपश्यतां ॥ ५१ ॥ तदिदंनिधनंप्राप्तंकोनुस्वंततरोमया ॥ देवार्हामानुषाःभोगाःप्राप्ताअसुलभान्नृपैः ॥ ५२ ॥ ऐश्वर्यंचोत्तमंप्राप्तंकोनुस्वंततरोमया ॥
ससुहृत्सानुगश्चैवस्वर्गंगंताहमच्युत ॥ ५३ ॥ यूयंनिहतसंकल्पाःशोचंतोवर्तयिष्यथ ॥ संजयउवाच अस्यवाक्यस्यनिधनेकुरुराजस्यधीमतः ॥ ५४ ॥
अपतत्सुमहद्वर्षंपुष्पाणांपुण्यगंधिनां ॥ अवादयंतगंधर्वावादित्रंसुमनोहरं ॥ ५५ ॥ जगुश्चाप्सरसोराज्ञोयशःसंबद्धमेवच ॥ सिद्धाश्चमुमुचुर्वाचःसाधुसा
ध्वितिपार्थिव ॥५६॥ ववौचसुरभिर्वायुःपुण्यगंधोमृदुःसुखः ॥ व्यराजंश्चदिशःसर्वानभोवैदूर्यसन्निभं ॥५७॥ अत्यद्भुतानितेदृष्ट्वावासुदेवपुरोगमाः ॥ दुर्यो
धनस्यपूजांतुदृष्ट्वाव्रीडामुपागमन् ॥५८॥ हतांश्चाधर्मतःश्रुत्वाशोकार्ताःशुशुचुर्हिते ॥ भीष्मंद्रोणंतथाकर्णंभूरिश्रवसमेवच ॥५९॥ तांस्तुचिंतापरान्दृष्ट्वापांड
वान्दीनचेतसः ॥ प्रोवाचेदंवचःकृष्णोमेघदुंदुभिनिस्वनः ॥ ६० ॥ नैषशक्योतिशीघ्रास्त्रस्तेचसर्वेमहारथाः ॥ ऋजुयुद्धेनविक्रांताहंतुंयुष्माभिराहवे ॥ ६१ ॥
नैषशक्यःकदाचित्तुहंतुंधर्मेणपार्थिवः ॥ तेवाभीष्ममुखाःसर्वेमहेष्वासामहारथाः ॥ ६२ ॥

इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ७ ॥ ॥७॥ ॥७॥

॥ ६३ ॥ ६४ ॥ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

मयानेकैरुपायैस्तुमायायोगेनचासकृत् ॥ हतास्तेसर्वएवाजौभवतांहितमिच्छता ॥ ६३ ॥ यदिनैवंविधंजातुकुर्यांजिह्ममहंरणे ॥ कुतोवोविजयोभूयःकुतोरा
ज्यंकुतोधनं ॥ ६४ ॥ तेहिसर्वेमहात्मानश्चत्वारोतिरथाभुवि ॥ नशक्याधर्मतोहंतुंलोकपालैरपिस्वयं ॥ ६५ ॥ तथैवायंगदापाणिधार्तराष्ट्रोगतक्लमः ॥ नशक्यो
धर्मतोहंतुंकालेनापीहदंडिना ॥ ६६ ॥ नचवोहृदिकर्तव्यंयदयंघातितोरिपुः ॥ मिथ्यावध्यास्तथोपायैर्बहवःशत्रवोधिकाः ॥ ६७ ॥ पूर्वैरनुगतोमार्गोदेवैरसुर
घातिभिः ॥ सद्भिश्चानुगतःपंथाःसर्वैरनुगम्यते ॥ ६८ ॥ कृतकृत्याश्चसायाह्नेनिवासंरोचयामहे ॥ साश्वनागरथाःसर्वेविश्रमामोनराधिपाः ॥ ६९ ॥ वासु
देववचःश्रुत्वातदानींपांडवैःसह ॥ पंचालाभृशसंहृष्टाविनेदुःसिंहसंघवत् ॥ ७० ॥ ततःप्राध्मापयनशंखान्पांचजन्यंचमाधवः ॥ हृष्टादुर्योधनंदृष्ट्वानिहतंपु
रुपर्षभ ॥ ७१ ॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिकृष्णपांडवदुर्योधनसंवादेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ७ ॥ संजयउवाच ततस्तेप्र
यग्रुःसर्वेनिवासायमहीक्षितः ॥ शंखान्प्रध्मापयंतोवैहृष्टाःपरिघबाहवः ॥ १ ॥ पांडवान्गच्छतश्चापिशिबिरंनोविशांपते ॥ महेष्वासोन्वगात्पश्चाद्युयुत्सुः सा
त्यकिस्तथा ॥ २ ॥ धृष्टद्युम्नःशिखंडीचद्रौपदेयाश्चसर्वशः ॥ सर्वेचान्येमहेष्वासाययुःस्वशिबिराण्युत ॥ ३ ॥ ततस्तेप्राविशन्पार्थाहतत्विट्कंहतेश्वरं ॥ दुर्योधन
स्यशिबिरंरंगवद्विसृतेजने ॥ ४ ॥ गतोत्सवंपुरमिवहृतनागमिवह्रदं ॥ स्त्रीवर्षवरभूयिष्ठंवृद्धामात्यैरधिष्ठितं ॥ ५ ॥ तत्रैतान्पर्युपातिष्ठन्दुर्योधनपुरःसराः ॥ कृ
तांजलिपुटाराजन्काषायमलिनांबराः ॥ ६ ॥ शिबिरंसमनुप्राप्यकुरुराजस्यपांडवाः ॥ अवतेरुर्महाराजरथेभ्योरथसत्तमाः ॥ ७ ॥ ततोगांडीवधन्वानमभ्यभाषत
केशवः ॥ स्थितःप्रियहितेनित्यमतीवभरतर्षभ ॥ ८ ॥ अवरोपयगांडीवमक्षयौचमहेषुधी ॥ अथाहमवरोक्ष्यामिपश्चाद्भरतसत्तम ॥ ९ ॥ स्वयंचैवावरोहत्वमेत
च्छ्रेयस्तवानघ ॥ तच्चाकरोत्तथावीरःपांडुपुत्रोधनंजयः ॥ १० ॥ अथपश्चात्ततःकृष्णोरश्मीनुत्सृज्यवाजिनां ॥ अवारोहतमेधावीरथाद्गांडीवधन्वनः ॥ ११ ॥
अथावतीर्णेभूतानामीश्वरेसुमहात्मनि ॥ कपिरंतर्दधेदिव्योध्वजोगांडीवधन्वनः ॥ १२ ॥ सदग्धोद्रोणकर्णाभ्यांदिव्यैरस्त्रैर्महारथः ॥ अनादीप्तोग्निनात्याशु
प्रजज्वालमहीपते ॥ १३ ॥ सोपासंगःसरश्मिश्चसाश्वःसयुगबंधुरः ॥ भस्मीभूतोपतद्भूमौरथोगांडीवधन्वनः ॥ १४ ॥ तंतथाभस्मभूतंतुदृष्ट्वापांडुसुताःप्रभो ॥
अभवन्विस्मिताराजन्नर्जुनश्चेदमब्रवीत् ॥ १५ ॥

ततइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ वर्षवरःषंढः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

कृतांजलिःसप्रणयंप्रणिपत्याभिवाद्यह ॥ गोविंदकस्माद्भगवन्रथोदग्धोयमग्निना ॥१६॥ किमेतन्महदाश्चर्यमभवद्यदुनंदन ॥ तन्मेब्रूहिमहाबाहोश्रोतव्यंयदिमन्यसे ॥१७॥ वासुदेवउवाच अस्त्रैर्बहुविधैर्दग्धःपूर्वमेवायमर्जुन ॥ मदधिष्ठितत्वात्समरेनविशीर्णःपरंतप ॥१८॥ इदानींतुविशीर्णोयंदग्धोब्रह्मास्त्रतेजसा ॥ मयाविमुक्तःकौंतेयत्वय्यद्यकृतकर्मणि ॥१९॥ ईषदुत्स्मयमानस्तुभगवान्केशवोरिहा ॥ परिष्वज्यचराजानंयुधिष्ठिरमभाषत ॥२०॥ दिष्ट्याजयसिकौंतेयदिष्ट्यातेशत्रवोजिताः ॥ दिष्ट्यागांडीवधन्वाचभीमसेनश्चपांडवः ॥२१॥ त्वंचापिकुशलीराजन्माद्रीपुत्रौचपांडवौ ॥ मुक्तावीरक्षयादस्मात्संग्रामान्निहतद्विषः ॥२२॥ क्षिप्रमुत्तरकालानिकुरुकार्याणिभारत ॥ उपयातमुपप्लव्यंसहगांडीवधन्वना ॥२३॥ आनीयमधुपर्कंमांयत्पुरात्वमवोचथाः ॥ एषभ्रातासखाचैवतवकृष्णधनंजयः ॥२४॥ रक्षितव्योमहाबाहोसर्वास्वापत्स्वितिप्रभो ॥ तवचैवंब्रुवाणस्यतथेत्येवाहमब्रुवं ॥२५॥ ससव्यसाचीगुप्तस्तेविजयीचजनेश्वर ॥ भ्रातृभिःसहराजेंद्रशूरःसत्यपराक्रमः ॥२६॥ मुक्तोवीरक्षयादस्मात्संग्रामाल्लोमहर्षणात् ॥ एवमुक्तस्तुकृष्णेनधर्मराजोयुधिष्ठिरः ॥२७॥ हृष्टरोमामहाराजप्रत्युवाचजनार्दनं ॥ युधिष्ठिरउवाच प्रमुक्तंद्रोणकर्णाभ्यांब्रह्मास्त्रमरिमर्दन ॥२८॥ कस्त्वदन्यःसहेत्साक्षादपिवज्रीपुरंदरः ॥ भवतस्तुप्रसादेनसंगनकगणाजिताः ॥२९॥ महारणगतःपार्थोयच्चनासीत्पराङ्मुखः ॥ तथैवचमहाबाहोपर्यायैर्बहुभिर्मया ॥३०॥ कर्मणामनुसंतानंतेजसश्चगतीःशुभाः ॥ उपप्लव्येमहर्षिर्मेकृष्णद्वैपायनोब्रवीत् ॥३१॥ यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः ॥ इत्येवमुक्तेतेवीराःशिबिरंतवभारत ॥३२॥ प्रविश्यप्रत्यपद्यंतकोशरत्नर्धिसंचयान् ॥ रजतंजातरूपंचमणीनथचमौक्तिकान् ॥३३॥ भूषणान्यथमुख्यानिकंबलान्यजिनानिच ॥ दासीदासमसंख्येयंराज्योपकरणानिच ॥३४॥ तेप्राप्यधनमक्षय्यंत्वदीयंभरतर्षभ ॥ उदक्रोशन्महाभागानरेंद्रविजितारयः ॥३५॥ तेतुवीराःसमाश्वस्यवाहनान्यवमुच्यच ॥ अतिष्ठंतमुहुःसर्वेपांडवाःसात्यकिस्तथा ॥३६॥ अथाब्रवीन्महाराजवासुदेवोमहायशाः ॥ अस्माभिर्मंगलार्थायवस्तव्यंशिबिराद्बहिः ॥३७॥ तथेत्युक्त्वाहितेसर्वेपांडवाःसात्यकिस्तथा ॥ वासुदेवेनसहितामंगलार्थंबहिर्ययुः ॥३८॥ तेसमासाद्यसरितंपुण्यामोघवतींनृप ॥ न्यवसन्नथतांरात्रिंपांडवाहतशत्रवः ॥३९॥ युधिष्ठिरस्ततोराजाप्राप्तकालमचिंतयत् ॥ तत्रतेगमनंप्राप्तंरोचतेतवमाधव ॥४०॥ गांधार्याःक्रोधदीप्तायाःप्रशमार्थमरिंदम ॥ हेतुकारणयुक्तैश्चवाक्यैःकालसमीरितैः ॥४१॥

॥४२॥४३॥४४॥४५॥४६॥ इ॰श॰ग॰नै॰भा॰ द्विषष्टितमोऽध्यायः ॥६२॥ ॥७॥ किमर्थमिति॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥

सचप्रायाज्जवेनाशुक्षसु क्षिप्रमेवमहाभागगांधारींप्रशमिष्यसि॥ पितामहश्चभगवान्व्यासस्तत्रभविष्यति॥४२॥ ततःसंप्रेषयामासुर्यादवंनागसाह्वयं॥ सदेवःप्रतापवान्॥४३॥ दारुकंरथमारोप्ययेनराजांबिकासुतः॥ तमूचुःसंप्रयास्यंतंशैब्यसुग्रीववाहनं॥४४॥ प्रत्याश्वासयगांधारींहतपुत्रांयशस्विनीं॥ सप्रायात्पांडवैरुक्तस्तत्पुरंसात्वतांवरः॥४५॥ आससादततःक्षिप्रंगांधारींनिहतात्मजां॥४६॥ इतिश्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिवासुदेववाक्ये द्विषष्टितमोऽध्यायः॥६२॥ ॥७॥ ॥७॥ जनमेजयउवाच किमर्थंद्विजशार्दूलधर्मराजोयुधिष्ठिरः॥ गांधार्याःप्रेषयामासवासुदेवंपरंतपं॥१॥ यदापूर्वंगतःकृष्णःशमार्थंकौरवान्प्रति॥ नचतंलब्धवान्कामंततोयुद्धमभूदिदं॥२॥ निहतपुत्रयोधेषुहतेदुर्योधनेतदा॥ पृथिव्यांपांडवेयस्यनिःसपत्नेकृतेयुधि॥३॥ विद्रुतेशिबिरेशून्येप्राप्तेयशसिचोत्तमे॥ किंनुतत्कारणंब्रह्मन्येनकृष्णोगतःपुनः॥४॥ नचैतत्कारणंब्रह्मन्नल्पंविप्रतिभातिमे॥ यत्रागमद्मेयात्मास्वयमेवजनार्दनः॥५॥ तत्त्वतोवैसमाचक्ष्वसर्वमध्वर्युसत्तम॥ यच्चात्रकारणंब्रह्मन्कार्यस्यास्यविनिश्चये॥६॥ वैशंपायनउवाच त्वद्युक्तोयमनुप्रश्नोयन्मांपृच्छसिपार्थिव॥ तत्तेहंसंप्रवक्ष्यामियथावद्भरतर्षभ॥७॥ हतंदुर्योधनंदृष्ट्वाभीमसेनेनसंयुगे॥ व्युत्क्रम्यसमयंराजन्धार्तराष्ट्रंमहाबलं॥८॥ अन्यायेनहतंदृष्ट्वागदायुद्धेनभारत॥ युधिष्ठिरंमहाराजमहद्भयमथाविशत्॥९॥ चिंतयानोमहाभागांगांधारींतपसान्वितां॥ घोरेणतपसायुक्तांत्रैलोक्यमपिसादहेत्॥१०॥ तस्यचिंतयमानस्यबुद्धिःसमभवत्तदा॥ गांधार्याःक्रोधदीप्तायाःपूर्वंप्रशमनंभवेत्॥११॥ साहिपुत्रवधंश्रुत्वाकृतमस्माभिरीदृशं॥ श्रुत्वाविनिहतंपुत्रंछलेनाजिह्मयोधिनं॥१३॥ एवंविचिंत्यबहुधाभयशोकसमन्वितः॥ वासुदेवमिदंवाक्यंधर्मराजोभ्यभाषत॥१४॥ तवप्रसादाद्गोविंदराज्यंनिहतकंटकं॥ अप्राप्यंमनसापीदंप्राप्तमस्माभिरच्युत॥१५॥ प्रत्यक्षंमेमहाबाहोसंग्रामेलोमहर्षणे॥ विमर्दःसुमहान्प्राप्तस्त्वयायादवनंदन॥१६॥ त्वयादेवासुरेयुद्धेवधार्थममरद्विषां॥ यथासाह्यंसुराद्त्तंहताश्चविबुधद्विषः॥१७॥ साह्यंतथामहाबाहोदत्तमस्माकमच्युत॥ सारथ्येनचवार्ष्णेयभवताहिधृतावयं॥१८॥ यदिनत्वंभवेन्नाथःफाल्गुनस्यमहारणे॥ कथंशक्योरणेजेतुंभवेदेषबलार्णवः॥१९॥ गदाप्रहाराविपुलाःपरिघैश्चापिताडनं॥ शक्तिभिर्भिंदिपालैश्चतोमरैःसपरश्वधैः॥२०॥

मानसेनाग्निनाक्रुद्धाभस्मसान्नःकरिष्यति॥१२॥ कथंदुःखमिदंतीव्रंगांधारीसंप्रशक्ष्यति॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ हेतुकारणसंयुक्तैः हेतवोदृष्टा अपराधाः कारणानि अदृष्टान्यत्रत्यं जावीनि तैर्युक्तानि तैः ॥ २८ ॥ २९ ॥ ३० ॥ ३१॥ ३२ ॥ प्रायात् अगच्छत् ॥ ३३॥

अस्मत्कृतेत्वयाकृष्णवाचःसुपरुषाःश्रुताः ॥ शस्त्राणांचनिपातावैवज्रस्पर्शोपमारणे ॥ २१ ॥ तच्चतेसफलाजाताहतेदुर्योधनेऽच्युत ॥ तत्सर्वंनयथानश्येत्पुनः कृष्णतथाकुरु ॥ २२ ॥ संदेहदोलांप्राप्तंनश्चेतःकृष्णजयेसति ॥ गांधार्याहिमहाबाहोक्रोधंबुद्ध्यस्वमाधव ॥ २३॥ साहिनित्यंमहाभागातपसोग्रेणकर्शिता ॥ पुत्रपौत्रवधंश्रुत्वाध्रुवंनःसंप्रधक्ष्यति ॥ २४॥ तस्याःप्रसादनंवीरप्राप्तकालंमतंमम ॥ कश्चतांक्रोधताम्राक्षींपुत्रव्यसनकर्शितां ॥ २५ ॥ वीक्षितुंपुरुषःशक्तस्त्वामृतेपुरुषोत्तम ॥ तत्रमेगमनंप्राप्तंरोचतेतवमाधव ॥ २६॥ गांधार्याःक्रोधदीप्तायाःप्रशमार्थमरिंदम ॥ त्वंहिकर्ताविकर्ताचलोकानांप्रभवाव्ययः ॥ २७॥ हेतुकारणसंयुक्तैर्वाक्यैःकालसमीरितैः ॥ क्षिप्रमेवमहाबाहोगांधारींशमयिष्यसि ॥ २८॥ पितामहश्चभगवान्कृष्णस्तत्रभविष्यति ॥ सर्वथातेमहाबाहोगांधार्याःक्रोधनाशनं ॥ २९ ॥ कर्तव्यंसात्वतांश्रेष्ठपांडवानांहितार्थिना ॥ धर्मराजस्यवचनंश्रुत्वायदुकुलोद्वहः ॥ ३० ॥ आमंत्र्यदारुकंप्राहरथःसज्जोविधीयतां ॥ केशवस्यवचःश्रुत्वात्वरमाणोथदारुकः ॥ ३१ ॥ न्यवेदयद्रथंसज्जंकेशवायमहात्मने ॥ तंरथंयादवश्रेष्ठःसमारुह्यपरंतपः ॥ ३२॥ जगामहास्तिनपुरंत्वरितःकेशवोविभुः ॥ ततःप्रायान्महाराजमाधवोभगवान्रथी ॥ ३३॥ नागसाह्वयमासाद्यप्रविवेशचवीर्यवान् ॥ प्रविश्यनगरंवीरोरथघोषेणनादयन् ॥ ३४ ॥ विदितंधृतराष्ट्रस्यसोवतीर्यरथोत्तमात् ॥ अभ्यगच्छददीनात्माधृतराष्ट्रनिवेशनं ॥ ३५॥ पूर्वंचाभिगतंतत्रसोपश्यदृषिसत्तमं ॥ पादौप्रपीड्यकृष्णस्यराज्ञश्चापिजनार्दनः ॥ ३६ ॥ अभ्यवादयदव्यग्रोगांधारींचापिकेशवः ॥ ततस्तुयादवश्रेष्ठोधृतराष्ट्रमधोक्षजः ॥ ३७॥ पाणिमालंब्यराजेंद्रसुस्वरंप्ररुरोदह ॥ समुहूर्तादिवोत्सृज्यबाष्पंशोकसमुद्भवं ॥ ३८ ॥ प्रक्षाल्यवारिणानेत्रेह्याचम्यचयथाविधि ॥ उवाचप्रस्तुतंवाक्यंधृतराष्ट्रमरिंदमः ॥ ३९ ॥ नतेस्त्यविदितंकिंचिद्वृद्धस्यतवभारत ॥ कालस्यचयथावृत्तंतत्तेसुविदितंप्रभो ॥४०॥ यदिदंपांडवैःसर्वैस्तवचित्तानुरोधिभिः ॥ कथंकुलक्षयोनस्यात्तथाक्षत्रस्यभारत ॥४१॥ भ्रातृभिःसमयंकृत्वाक्षांतवान्धर्मवत्सलः ॥ द्यूतच्छलजितैःशुद्धैर्वनवासोऽभ्युपागतः ॥ ४२ ॥ अज्ञातवासचर्याचनानावेषसमावृतैः ॥ अन्येचबहवःक्लेशास्त्वशक्तैरिवसर्वदा ॥ ४३ ॥ मयाचस्वयमागम्ययुद्धकालउपस्थिते ॥ सर्वलोकस्यसान्निध्येग्रामांस्त्वंपंचयाचितः ॥ ४४ ॥ त्वयाकालोपसृष्टेनलोभतोनापवर्जिताः ॥ तवापराधान्नृपतेसर्वंक्षत्रंक्षयंगतं ॥ ४५॥

॥ ३४ ॥ ३५ ॥ कृष्णस्यव्यासस्य ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

भीष्मेणसोमदत्तेनवाल्हीकेनकृपेणच ॥ द्रोणेनचसपुत्रेणविदुरेणचधीमता ॥ ४६ ॥ याचितस्त्वंशमंनित्यंनचतत्कृतवानसि ॥ कालोपहतचित्ताहिसर्वेमुह्यं
तिभारत ॥ ४७ ॥ यथामूढोभवान्पूर्वमस्मिन्नर्थेसमुद्यते ॥ किमन्यत्कालयोगाद्धिदिष्टमेवपरायणं ॥ ४८ ॥ माचदोषान्महाप्राज्ञपांडवेषुनिवेशय ॥ अल्पोप्य
तिक्रमोनास्तिपांडवानांमहात्मनां ॥ ४९ ॥ धर्मतोन्यायतश्चैवस्नेहतश्चपरंतप ॥ एतत्सर्वंतुविज्ञायत्वात्मदोषकृतंफलं ॥ ५० ॥ असूयांपांडुपुत्रेषुनभवान्कर्तुम
र्हति ॥ कुलंवंशश्चपिंडाश्चयच्चपुत्रकृतंफलं ॥ ५१ ॥ गांधार्यास्तववैनाथपांडवेषुप्रतिष्ठितं ॥ त्वंचैवकुरुशार्दूलगांधारीचयशस्विनी ॥ ५२ ॥ माशुचोनरशार्दू
लपांडवान्प्रतिकिल्बिषं ॥ एतत्सर्वमनुध्यायआत्मनश्चव्यतिक्रमं ॥ ५३ ॥ शिवेनपांडवान्पाहिनमस्तेभरतर्षभ ॥ जानासिचमहाबाहोधर्मराजस्ययात्वयि ॥
॥ ५४ ॥ भक्तिर्भरतशार्दूलस्नेहश्चापिस्वभावतः ॥ एतच्चकदनंकृत्वाशत्रूणामपकारिणां ॥ ५५ ॥ दह्यतेसदिवारात्रौनचशर्माधिगच्छति ॥ त्वांचैवनरशार्दूल
गांधारींचयशस्विनीं ॥ ५६ ॥ सशोचन्नरशार्दूलःशांतिंनैवाधिगच्छति ॥ ह्रियाचपरयाविष्टोभवंतंनाधिगच्छति ॥ ५७ ॥ पुत्रशोकाभिसंतप्तंबुद्धिव्याकुलि
तेंद्रियं ॥ एवमुक्त्वामहाराजधृतराष्ट्रंयदूत्तमः ॥ ५८ ॥ उवाचपरमंवाक्यंगांधारींशोककर्शितां ॥ सौबलेयिनिबोधत्वंयत्त्वांवक्ष्यामितच्छृणु ॥ ५९ ॥ त्वत्समाना
स्तिलोकेस्मिन्नद्यसीमंतिनीशुभे ॥ जानासिचयथाराज्ञिसभायांममसन्निधौ ॥ ६० ॥ धर्मार्थसहितंवाक्यमुभयोःपक्षयोर्हितं ॥ उक्तवत्यसिकल्याणिनचतेत
नयैःकृतं ॥ ६१ ॥ दुर्योधनस्त्वयाचोक्तोजयार्थीपरुषंवचः ॥ शृणुमूढवचोमत्यंयतोधर्मस्ततोजयः ॥ ६२ ॥ तदिदंसमनुप्राप्तंतववाक्यंनृपात्मजे ॥ एवंविदित्वा
कल्याणिमास्मशोकेमनःकृथाः ॥ ६३ ॥ पांडवानांविनाशायमातेबुद्धिःकदाचन ॥ शक्ताचासिमहाभागेपृथिवींमचराचरां ॥ ६४ ॥ चक्षुषाक्रोधदीप्तेननि
र्दग्धुंतपसोबलात् ॥ वासुदेववचःश्रुत्वागांधारीवाक्यमब्रवीत् ॥ ६५ ॥ एवमेतन्महाबाहोयथावदसिकेशव ॥ आधिभिर्दह्यमानायामतिःसंचलिताममं ॥
॥ ६६ ॥ सामेव्यवस्थिताश्रुत्वातववाक्यंजनार्दन ॥ राज्ञस्त्वंधस्यवृद्धस्यहतपुत्रस्यकेशव ॥ ६७ ॥ त्वंगतिःसहितैर्वीरैःपांडवैर्द्विपदांवर ॥ एतावदुक्त्वावचनंमुखं
प्रच्छाद्यवाससा ॥ ६८ ॥ पुत्रशोकाभिसंतप्तागांधारीप्ररुरोदह ॥ ततएनांमहाबाहुःकेशवःशोककर्शितां ॥ ६९ ॥ हेतुकारणसंयुक्तैर्वाक्यैराश्वासयत्प्रभुः ॥ स
माश्वास्यचगांधारींधृतराष्ट्रंचमाधवः ॥ ७० ॥ द्रौणिसंकल्पितंभावमवबुध्यतकेशवः ॥ ततस्त्वरितउत्थायपादौमूर्ध्नाप्रणम्यच ॥ ७१ ॥

॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेत्रिषष्टितमोऽध्यायः ॥६३॥ ॥१॥ ॥२॥ अधिष्ठितइति शौटीरःशूरः

द्वैपायनस्यराजेंद्रततःकौरवमब्रवीत्॥ आपृच्छेत्वांकुरुश्रेष्ठमाचशोकेमनःकृथाः ॥ ७२ ॥ द्रौणेःपापोस्त्यभिप्रायस्तेनास्मिसहसोत्थितः॥ पांडवानांवधेरा त्रौबुद्धिस्तेनप्रदर्शिता॥ ७३ ॥ एतच्छ्रुत्वातुवचनंगांधार्यासहितोब्रवीत्॥ धृतराष्ट्रोमहाबाहुःकेशवंकेशिसूदनं ॥ ७४॥ शीघ्रंगच्छमहाबाहोपांडवान्परिपाल य॥ भूयस्त्वयासमेष्यामिक्षिप्रमेवजनार्दन॥ ७५॥ प्रायात्ततस्तुत्वरितोदारुकेणसहाच्युतः ॥ वासुदेवेगतेराजन्धृतराष्ट्रंजनेश्वरं॥ ७६ ॥ आश्वासयदमेया त्माव्यासोलोकनमस्कृतः॥ वासुदेवोपिधर्मात्माकृतकृत्योजगामह ॥ ७७॥ शिविरंहास्तिनपुराद्दिदृक्षुःपांडवान्नृप ॥ आगम्यशिविरंरात्रौसोभ्यगच्छतपांड वान्॥ तच्चतेभ्यःसमाख्यायसहितस्तैःसमाहितः ॥७८॥ इतिश्रीम०शल्यपर्वांतर्गतगदापर्वणिधृतराष्ट्रगांधारीसमाश्वासनेत्रिषष्टितमोऽध्यायः॥६३॥ ॥

धृतराष्ट्रउवाच अधिष्ठितःपदामूर्ध्निभग्नसक्थोमहींगतः ॥ शौटीर्यमानीपुत्रोमेकिमभाषतसंजय ॥ १ ॥ अत्यर्थंकोपनोराजाजातवैरश्चपांडुषु॥ व्यसनंपर मंप्राप्तःकिमाहपरमाहवे॥ २॥ संजयउवाच श्रृणुराजन्प्रवक्ष्यामियथावृत्तंनराधिप॥ राज्ञायदुक्तंभग्नेनतस्मिन्व्यसनआगते॥३॥ भग्नसक्थोनृपोरा जन्पांसुनासोवगुंठितः॥ यमयन्मूर्धजांस्तत्रवीक्ष्यचैवदिशोदश॥ ४॥ केशान्नियम्ययत्नेननिःश्वसन्नुरगोयथा॥ संरंभाश्रुपरीताभ्यांनेत्राभ्यामभिवीक्ष्यमां ॥ ५॥ बाहूधरण्यांनिष्पिष्यमुहुर्मत्तइवद्विपः॥ प्रकीर्णान्मूर्धजान्धुन्वन्दंतैर्दंतानुपस्पृशन्॥६॥ गर्हयन्पांडवंज्येष्ठंनिःश्वस्येदमथाब्रवीत्॥ भीष्मेशांतनवेनाथे कर्णेशस्त्रभृतांवरे॥ ७॥ गौतमेशकुनौचापिद्रोणेचास्त्रभृतांवरे॥ अश्वत्थाम्नितथाशल्येशूरेचकृतवर्मणि॥ ८॥ इमामवस्थांप्राप्तोस्मिकालोहिदुरतिक्रमः॥ एकादशचमूभर्तासोहमेतांदशांगतः॥ ९॥ कालंप्राप्यमहाबाहोनकश्चिदतिवर्तते॥ आख्यातव्यंमदीयानांयेस्मिन्जीवंतिसंयुगे॥ १० ॥ यथाहंभीमसेनेन व्युत्क्रम्यसमयंहतः॥ बहूनिसुनृशंसानिकृतानिखलुपांडवैः॥ ११॥ भूरिश्रवसिकर्णेचभीष्मेद्रोणेचश्रीमति॥ इदंचाकीर्तिजंकर्मनृशंसैःपांडवैःकृतं॥१२॥ ये नतेसत्सुनिर्वेदंगमिष्यंतिहिमेमतिः॥ काप्रीतिःसत्वयुक्तस्यकृत्वोपाधिकृतंजयं॥ १३॥ कोवासमयभेत्तारंबुधःसंमंतुमर्हति ॥ अधर्मेणजयंलब्ध्वाकोनुहृष्ये तपंडितः॥ १४॥ यथासंहृष्यतेपापःपांडुपुत्रोवृकोदरः॥ किन्नुचित्रमितस्त्वद्यभग्नसक्थस्ययन्मम ॥ १५॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ मयामत्तः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ वार्त्तिकानूवार्त्ताहारिणः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ चार्वा

क्रुद्धेनभीमसेनेनपादेनमृदितंशिरः ॥ प्रतपंतंश्रियाजुष्टंवर्तमानंचबंधुषु ॥ १६ ॥ एवंकुर्यान्नरोयोहिसवैसंजयपूजितः ॥ अभिज्ञौयुद्धधर्मस्यममातापिताच
मे ॥ १७ ॥ तौहिसंजयदुःखार्तौविज्ञाप्यौवचनाद्दिमे ॥ इष्टंभृत्याभृताःसम्यक्भूःप्रशास्तासमसागरा ॥ १८ ॥ मूर्ध्निस्थितममित्राणांजीवतामेवसंजय ॥ दत्ता
दायायथाशक्तिमित्राणांचप्रियंकृतं ॥ १९ ॥ अमित्राबाधिताःसर्वेकोनुस्वंततरोमया ॥ मानिताबांधवाःसर्वेवश्यःसंपूजितोजनः ॥ २० ॥ त्रितयंसेवितंसर्वं
कोनुस्वंततरोमया ॥ आज्ञप्तंनृपमुख्येषुमानःप्राप्तःसुदुर्लभः ॥ २१ ॥ आजानेयैस्तथायातंकोनुस्वंततरोमया ॥ यातानिपरराष्ट्राणिनृपाभुक्ताश्चदासवत् ॥ २२ ॥
कोनुस्वंततरोमया ॥ आज्ञप्तंनृपमुख्येषुमानःप्राप्तःसुदुर्लभः ॥ २१ ॥ आजानेयैस्तथायातंकोनुस्वंततरोमया ॥ यातानिपरराष्ट्राणिनृपाभुक्ताश्चदासवत् ॥ २२ ॥
प्रियेभ्यःप्रकृतंसाधुकोनुस्वंततरोमया ॥ अधीतंविधिवद्दत्तंप्राप्तमायुर्निरामयं ॥ २३ ॥ स्वधर्मेणजितालोकाःकोनुस्वंततरोमया ॥ दिष्ट्यानाहंजितःसंख्येपरा
न्प्रेष्यवदाश्रितः ॥ २४ ॥ दिष्ट्यामेविपुलालक्ष्मीर्मृतेत्वन्यगताविभो ॥ यदिष्टंक्षत्रबंधूनांस्वधर्ममनुतिष्ठतां ॥ २५ ॥ निधनंतन्मयाप्राप्तंकोनुस्वंततरोमया ॥
दिष्ट्यानाहंपरावृत्तोवैरात्प्राकृतवज्जितः ॥ २६ ॥ दिष्ट्यानविमतिंकांचिद्भजित्वातुपराजितः ॥ सुप्तंवाथप्रमत्तंवायथाहन्याद्विषेणवा ॥ २७ ॥ एवंव्युत्क्रांतध
र्मेणव्युत्क्रम्यसमयंहतः ॥ अश्वत्थामामहाभागःकृतवर्माचसात्वतः ॥ २८ ॥ कृपःशारद्वतश्चैववक्तव्यावचनान्मम ॥ अधर्मेणप्रवृत्तानांपांडवानामनेकशः ॥
॥ २९ ॥ विश्वासंसमयघ्नानांनयूयंगंतुमर्हथ ॥ वार्त्तिकांश्चाब्रवीद्राजापुत्रस्तेसत्यविक्रमः ॥ ३० ॥ अधर्माद्भीमसेनेननिहतोहंयथारणे ॥ सोहंद्रोणंस्वर्गगतंक
र्णंशल्यावुभौतथा ॥ ३१ ॥ वृषसेनंमहावीर्यंशकुनिंचापिसौबलं ॥ जलसंधंमहावीर्यंभगदत्तंचपार्थिवं ॥ ३२ ॥ सोमदत्तंमहेष्वासंसैंधवंचजयद्रथं ॥ दुःशास
नपुरोगांश्चभ्रातॄनात्मसमांस्तथा ॥ ३३ ॥ दौःशासनिंचविक्रांतंलक्ष्मणंचात्मजावुभौ ॥ एतांश्चान्यांश्चसुबहून्मदीयांश्चसहस्रशः ॥ ३४ ॥ पृष्ठतोनुगमिष्या
मिसार्थहीनोयथाध्वगः ॥ कथंभ्रातॄन्हतान्श्रुत्वाभर्तारंचस्वसामम ॥ ३५ ॥ रोरूयमाणादुःखार्तादुःशलासाभविष्यति ॥ स्नुषाभिःप्रस्नुषाभिश्चवृद्धोराजा
पितामम ॥ ३६ ॥ गांधारीसहितश्चैवकांगतिंप्रतिपत्स्यति ॥ नूनंलक्ष्मणमाताऽपिहतपुत्राहतेश्वरा ॥ ३७ ॥ विनाशंयास्यतिक्षिप्रंकल्याणीपृथुलोचना ॥ यदि
जानातिचार्वाकःपरिव्राड्वाग्विशारदः ॥ ३८ ॥ करिष्यतिमहाभागोध्रुवंचापचितिंमम ॥ समंतपंचकेपुण्येत्रिषुलोकेषुविश्रुते ॥ ३९ ॥ अहंनिधनमासाद्यलो
कान्प्राप्स्यामिशाश्वतान् ॥ ततोजनसहस्राणिबाष्पपूर्णानिमारिष ॥ ४० ॥

कः ब्राह्मणवेषधारीराक्षसः ॥ ३८ अपचितिंप्रतीकारं ॥ ३९ ॥ ४० ॥

॥ ४१ ॥ ४२ ॥ ४३ ॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥१॥ ॥३॥ वार्तिकाणामिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ चक्र

प्रलापंनृपतेःश्रुत्वाव्यद्रवंतदिशोदश ॥ ससागरवनाघोरापृथिवीसचराचरा ॥ ४१ ॥ चचालाथसनिर्ह्रादादिशश्चैवाविलाभवन् ॥ तेद्रोणपुत्रमासाद्ययथा वृत्तंन्यवेदयन् ॥ ४२ ॥ व्यवहारंगदायुद्धेपार्थिवस्यचपातनं ॥ तदाख्यायततःसर्वेद्रोणपुत्रस्यभारत ॥ ध्यात्वाचसुचिरंकालंजग्मुरार्तायथागतं ॥ ४३ ॥ इति श्रीमहाभारतेशल्यपर्वांतर्गतगदापर्वणिदुर्योधनविलापेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥१॥ ॥१॥ संजयउवाच वार्तिकाणांसकाशात्तुश्रुत्वादु र्योधनंहतं ॥ हतशिष्टास्ततोराजन्कौरवाणांमहारथाः ॥ १ ॥ विनिर्भिन्नाःशितैर्बाणैर्गदातोमरशक्तिभिः ॥ अश्वत्थामाकृपश्चैवकृतवर्माचसात्वतः ॥ २ ॥ त्व रिताजवनैरश्वैरायोधनमुपागमन् ॥ तत्रापश्यन्महात्मानंधार्तराष्ट्रंनिपातितं ३॥ प्रभग्नंवायुवेगेनमहाशालंयथावने ॥ भूमौविचेष्टमानंतंरुधिरेणसमुक्षितं ॥ ४ ॥ महाजगमिवारण्येव्याधेनविनिपातितं ॥ विवर्तमानंबहुशोरुधिरौघपरिप्लुतं ॥ ५ ॥ यदृच्छयानिपतितंचक्रमादित्यगोचरं ॥ महावातसमुत्थेनसंशुष्क मिवसागरं ॥ ६ ॥ पूर्णचंद्रमिवव्योम्नितुषारावृतमंडलं ॥ रेणुध्वस्तंदीर्घभुजंमातंगमिवविक्रमे ॥ ७ ॥ वृतंभूतगणैर्घोरैःक्रव्यादैश्चसमंततः ॥ यथाधनंलिप्समा नैर्भृत्यैर्नृपतिसत्तमं ॥ ८ ॥ भ्रुकुटीकृतवक्त्रांतंक्रोधादुद्वृत्तचक्षुषं ॥ सामर्षंतंनरव्याघ्रंव्याघ्रंनिपतितंयथा ॥ ९ ॥ ततंदृष्ट्वामहेष्वासंभूतलेपतितंनृपं ॥ मोहमभ्या गमन्सर्वेकृपप्रभृतयोरथाः ॥ १० ॥ अवतीर्यरथेभ्यश्चप्राद्रवन्राजसन्निधौ ॥ दुर्योधनंचसंप्रेक्ष्यसर्वेभूमावुपाविशन् ॥ ११ ॥ ततोद्रौणिर्महाराजबाष्पपूर्णेक्ष णःश्वसन् ॥ उवाचभरतश्रेष्ठंसर्वलोकेश्वरेश्वरं ॥ १२ ॥ ननूनंविद्यतेसत्यंमानुषेकिंचिदेवहि ॥ यत्रत्वंपुरुषव्याघ्रशेषेपांसुषुरूषितः ॥ १३ ॥ भूत्वाहिनृपतिःपूर्वं समाज्ञाप्यचमेदिनीं ॥ कथमेकोद्यराजेंद्रतिष्ठसेनिर्जनेवने ॥ १४ ॥ दुःशासनंनपश्यामिनापिकर्णंमहारथं ॥ नापितान्सुहृदःसर्वान्किमिदंभरतर्षभ ॥ १५ ॥ दुःखंनूनंकृतांतस्यगतिंज्ञातुंकथंचन ॥ लोकानांचभवान्यत्रशेषेपांसुषुरूषितः ॥ १६ ॥ एषमूर्धाभिषिक्तानामग्रेगत्वापरंतपः ॥ सतृणंग्रसतेपांसुंपश्यकाल स्यपर्ययं ॥ १७ ॥ क्वतेतदमलंछत्रंव्यजनंक्वचपार्थिव ॥ साचतेमहतीसेनाक्वगतापार्थिवोत्तम ॥ १८ ॥ दुर्विज्ञेयागतिर्नूनंकार्याणांकारणांतरे ॥ यद्वैलोकगु रुर्भूत्वाभवानेतांदशांगतः ॥ १९ ॥ अध्रुवासर्वमर्त्येषुश्रीरुपालक्ष्यतेभृशं ॥ भवतोव्यसनंदृष्ट्वाशक्रविस्पर्धिनोभृशं ॥ २० ॥

मादित्यगोचरंसूर्यमंडलमिवेतिलुप्तोपमा ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ कारणांतरेअदृष्टरूपेसति तेनदृष्टसामर्थ्यवैयर्थ्यंजायतइतिभावः ॥ १९ ॥ २० ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

तस्यतद्वचनंश्रुत्वादुःखितस्यविशेषतः॥ उवाचराजन्पुत्रस्तेप्राप्तकालमिदंवचः ॥ २१ ॥ विमृज्यनेत्रेपाणिभ्यांशोकजंबाष्पमुत्सृजन् ॥ कृपादीन्सतदावीरा
न्सर्वानेवनराधिपः॥ २२॥ ईदृशोलोकधर्मोयंधात्रानिर्दिष्टउच्यते ॥ विनाशःसर्वभूतानांकालपर्यायमागतः॥ २३॥ सोयंमांसमनुप्राप्तःप्रत्यक्षंभवतांहि
यः॥ पृथिवींपालयित्वाहमेतांनिष्ठामुपागतः॥ २४॥ दिष्ट्यानाहंपरावृत्तोयुद्धेकस्यांचिदापदि॥ दिष्ट्याहंनिहतःपापैश्छलेनैवविशेषतः ॥ २५॥ उत्साहश्चकृ
तोनित्यंमयादिष्ट्यायुयुत्सता॥ दिष्ट्याचास्मिन्हतोयुद्धेनिहतज्ञातिबांधवः॥ २६॥ दिष्ट्याचवोहंपश्यामिमुक्तानस्माज्जनक्षयात्॥ स्वस्तियुक्तांश्चकल्यांश्चत
न्मेप्रियमनुत्तमं॥ २७॥ मांभवंतोत्रतप्यंतांसौहृदान्निधनेनमे॥ यदिवेदाःप्रमाणंवोजितालोकामयाऽक्षयाः॥२८॥ मन्यमानःप्रभावंचकृष्णस्यामिततेज
सः॥ तेननच्यावितश्चाहंक्षत्रधर्मात्स्वनुष्ठितात्॥ २९॥ समयासमनुप्राप्तोनास्मिशोच्यःकथंचन॥ कृतंभवद्भिःसदृशमनुरूपमिवात्मनः॥ ३०॥ यतितंविज
येनित्यंदैवंतुदुरतिक्रमं॥ एतावदुक्त्वावचनंबाष्पव्याकुललोचनः॥३१॥ तूष्णींबभूवराजेंद्ररुजाऽसौविक्लवोभृशं॥ तथातुदृष्ट्वाराजानंबाष्पशोकसमन्वितं॥
॥ ३२॥ द्रौणिःक्रोधेनजज्वालयथावह्निर्जगत्क्षये॥ सचक्रोधसमाविष्टःपाणौपाणिंनिपीड्यच॥३३॥ बाष्पविक्लवयावाचाराजानमिदमब्रवीत्॥ पितामेनि
हतःक्षुद्रैःसुनृशंसेनकर्मणा॥ ३४॥ नतथातेनतप्यामियथाराजंस्त्वयाद्यवै॥ शृणुचेदंवचोमह्यंसत्येनवदतःप्रभो॥३५॥ इष्टापूर्तेनदानेनधर्मेणसुकृतेनच॥
अद्याहंसर्वपंचालान्वासुदेवस्यपश्यतः ॥ ३६॥ सर्वोपायैर्हिनेष्यामिप्रेतराजनिवेशनं॥ अनुज्ञांतुमहाराजभवान्मेदातुमर्हति॥ ३७॥ इतिश्रुत्वातुवचनंद्रोण
पुत्रस्यकौरवः॥ मनसःप्रीतिजननंकृपंवचनमब्रवीत्॥ ३८॥ आचार्यशीघ्रंकलशंजलपूर्णंसमानय॥ सतद्वचनमाज्ञायराज्ञोब्राह्मणसत्तमः॥ ३९॥ कलशं
पूर्णमादायराज्ञोंतिकमुपागमत्॥ तमब्रवीन्महाराजपुत्रस्तवविशांपते॥४०॥ ममाज्ञयाद्विजश्रेष्ठद्रोणपुत्रोभिषिच्यतां॥ सैनापत्येनभद्रंतेममचेदिच्छसिप्रि
यं॥ ४१॥ राज्ञोनियोगाद्योद्धव्यंब्राह्मणेनविशेषतः॥ वर्ततात्क्षत्रधर्मेणत्येवंधर्मविदोविदुः॥ ४२॥ राज्ञस्तुवचनंश्रुत्वाकृपःशारद्वतस्तथा॥ द्रौणिंराज्ञोनियो
गेनसैनापत्येभ्यषेचयत्॥ ४३॥ सोभिषिक्तोमहाराजपरिष्वज्यनृपोत्तमं॥ प्रययौसिंहनादेनदिशःसर्वाविनादयन्॥ ४४॥ दुर्योधनोपिराजेंद्रशोणितेनपरि
प्लुतः॥ तांनिशांप्रतिपेदेथसर्वभूतभयावहां॥ ४५॥


॥ ४६ ॥ इतिशल्यपर्वांतर्गतगदापर्वणिनैलकंठीयेभारतभावदीपेपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥


अपक्रम्यतुतेतूर्णंतस्मादायोधनान्नृप॥शोकसंविग्नमनसश्चिंताध्यानपराभवन्॥४६॥ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासक्यांशल्यपर्वांतर्गतगदापर्वणिअश्वत्थामसैनापत्याभिषेकेपंचषष्टितमोऽध्यायः॥६५॥ ॥७॥ ॥७॥ ॥ समाप्तंगदापर्व शल्यपर्वच ॥ अतःपरंसौप्तिकंपर्वभविष्यति॥तस्यायमाद्यःश्लोकः॥ संजयउवाच ततस्तेसहितावीराःप्रयातादक्षिणामुखाः॥ उपास्तमनवेलायांशिबिराभ्याशमागताः॥ १ ॥

अत्रादिपर्वोक्ताध्यायसंख्यावैषम्यंश्लोकसंख्यावैषम्यंचलिपिकरप्रमादादिनाद्रष्टव्यं

इदं शल्यपर्व मुंबय्याख्यराजधान्यां गणपतकृष्णाजीत्यभिधानां मुद्रायंत्रालये मुद्रितं शकाब्दाः १७८५

 ॥ इति श्रीमहाभारते शल्यपर्व समाप्तम् ॥ 


॥ अथ श्रीमहाभारते सौप्तिकपर्व प्रारभ्यते ॥



पूर्वस्मिन्पर्वणिअर्थार्थीकुटुंबनाशमनुस्वयमपिनश्यतीत्युक्तं इदानींपरधर्मानुगोब्राह्मणःतद्धर्मेष्वपिनियनमंकर्मकरोतीत्युच्यनेततस्तेसहितावीराइत्यादिनासौप्तिकपर्वणि ततःदुर्योधने

श्रीगणेशायनमः पूर्वस्मिन्पर्वणिअर्थार्थीकुटुंबनाशमनुस्वयमपिनश्यतीत्युक्तं ... नियोजना ॥ १ ॥ २॥३॥ ४॥ अनुसारःपृष्ठगमनं प्राद्रवन्निितिपुनर्वा

नसेनापत्येऽश्वत्थाम्नोभिषेकानंतरंतेअश्वत्थामकृपाचार्यकृतवर्माणःशिविराभ्याशंशिविरनिकटस्थंदेशंआसाद्यवाहान्विमुच्यन्यविशंतेतियोजना

नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥देवींसरस्वतींचैवततोजयमुदीरयेत् ॥ १ ॥ संजयउवाच ततस्तेसहितावीराःप्रयाताद्क्षिणामुखाः ॥ उपास्तमन वेलायांशिविराभ्याशमागताः ॥ १ ॥ विमुच्यवाहांस्त्वरिताभीताःसमभवंस्तदा ॥ गहनंदेशमासाद्यप्रच्छन्नान्यविशंतने ॥ २ ॥ सेनानिवेशमभितोना तिदूरमवस्थिताः॥ निकृत्तानिशितैःशस्त्रैःसमंतात्क्षतविक्षताः॥३॥ दीर्घमुष्णंचनिःश्वस्यपांडवानेवचिंतयन् ॥ श्रुत्वाचनिनदंघोरंपांडवानांजयैषिणां॥४॥ अनुसारभयाद्भीताःप्राङ्मुखाःप्राद्रवन्पुनः॥ तेमुहूर्त्तात्ततोगत्वाश्रांतवाहाःपिपासिताः ॥ ५ ॥ नामृष्यंतमहेष्वासाःक्रोधामर्षवशंगताः ॥ राज्ञोवधेनसंतप्ता मुहूर्त्तसमवस्थिताः ॥ ६ ॥ धृतराष्ट्रउवाच अश्रद्धेयमिदंकर्मकृतंभीमेनसंजय ॥ यत्सनागायुतप्राणःपुत्रोममनिपातितः ॥७॥ अवध्यःसर्वभूतानांव ज्रसंहननोयुवा॥ पांडवैःसमरेपुत्रोनिहतोममसंजय॥८॥ नदिष्टमभ्यतिक्रांतुंशक्यंगावल्गणेनरैः ॥ यत्समेत्यरणेपार्थैःपुत्रोममनिपातितः॥ ९ ॥ अद्रिसा रमयंनूनंहृदयंममसंजय॥हतंपुत्रशतंश्रुत्वायन्नदीर्णंसहस्रधा॥ १० ॥ कथंहिवृद्धमिथुनंहतपुत्रंभविष्यति ॥ नत्यहंपांडवेयस्यविषयेवस्तुमुत्सहे॥ ११ ॥ कथं राज्ञःपिताभूत्वास्वयंराजाचसंजय॥ प्रेष्यभूतःप्रवर्त्तेयंपांडवेयस्यशासनात्॥१२॥ आज्ञाप्यपृथिवींसर्वांस्थित्वामूर्द्धनिसंजय॥ येनंपुत्रशतंपूर्णमेकेननिहतं मम॥ १३ ॥ कृतंसत्यंवचस्तस्यविदुरस्यमहात्मनः ॥ अकुर्वतावचस्तेनममपुत्रेणसंजय ॥ १४ ॥ कथमस्यभविष्यामिप्रेष्यभूतोदुरंतकृत् ॥ कथंभीमस्यवा क्यानिश्रोतुंशक्ष्यामिसंजय॥ १५॥ अधर्मेणहतेतातपुत्रेदुर्योधनेमम॥ कृतवर्माकृपोद्रौणिःकिमकुर्वतसंजय॥ १६ ॥ संजयउवाच गत्वातुतावकाराज न्नातिदूरमवस्थिताः ॥ अपश्यंतवनंघोरंनानाद्रुमलतावृतं ॥ १७ ॥ तेमुहूर्त्तंतुविश्रम्यलब्धतोयैर्हयोत्तमैः ॥ सूर्यास्तमनवेलायांसमासेदुर्महद्वनं ॥ १८ ॥ नानामृगगणैर्जुष्टंनानापक्षिगणावृतं॥ नानाद्रुमलताच्छन्नंनानाव्यालनिषेवितं ॥ १९ ॥ नानातोयैःसमाकीर्णंनानापुष्पोपशोभितं ॥ पद्मिनीशतसंछन्नं नीलोत्पलसमायुतं॥ २० ॥ प्रविश्यतद्वनंघोरंवीक्ष्यमाणाःसमंततः ॥शाखासहस्रसंछन्नंन्यग्रोधंददृशुस्ततः॥ २१ ॥

हान्योजयित्वेतिगम्यते ॥ ५ ॥ नामृष्यंतपिपासामपिनपरामृष्टवंतः राज्ञोदुर्योधनस्य ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

॥ २२ ॥ अन्वासतउपासितवंतः ॥ २३ ॥ २४ ॥ अलंकृतंरजतविंदुचित्रितं अंशुकं वस्त्रं ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ शयनोपेतौप्राग्गतिशेषः ॥ ३२ ॥ ३३ ॥ ३४ ॥

उपेत्यतुतदाराजन्न्यग्रोधंतेमहारथाः ॥ददृशुर्द्विपदांश्रेष्ठाःश्रेष्ठंतंवैवनस्पतिं ॥२२॥ तेऽवतीर्यरथेभ्यश्चविप्रमुच्यचवाजिनः ॥ उपस्पृश्ययथान्यायंसंध्यामन्वा
सतप्रभो ॥ २३ ॥ ततोस्तंपर्वतश्रेष्ठमनुप्राप्तेदिवाकरे ॥ सर्वस्यजगतोधात्रीशर्वरीसमपद्यत ॥ २४ ॥ ग्रहनक्षत्रताराभिःसंपूर्णाभिरलंकृतं ॥ नभोंशुकमिवा
भातिप्रेक्षणीयंसमंततः ॥ २५ ॥ इच्छयातेप्रवल्गंतियेसत्वारात्रिचारिणः ॥ दिवाचराश्चयेसत्वास्तेनिद्रावशमागताः ॥ २६ ॥ रात्रिंचराणांसत्वानांनिर्घोषो
भूत्सुदारुणः ॥ क्रव्यादाश्चप्रमुदिताघोराप्राप्ताचशर्वरी ॥ २७ ॥ तस्मिन्रात्रिमुखेघोरेदुःखशोकसमन्विताः ॥ कृतवर्माकृपोद्रौणिरुपोपविविशुःसमं ॥ २८ ॥
तत्रोपविष्टाःशोचंतोन्यग्रोधस्यसमीपतः ॥ तमेवार्थमतिक्रांतंकुरुपांडवयोःक्षयं ॥ २९ ॥ निद्रयाचपरीतांगानिषेदुर्धरणीतले ॥ श्रमेणसुदृढंयुक्ताविक्षताविवि
विधैःशरैः ॥ ३० ॥ ततोनिद्रावशंप्राप्तौकृपभोजौमहारथौ ॥ सुखोचितावदुःखार्हौनिषण्णौधरणीतले ॥ ३१ ॥ तौतुसुप्तौमहाराजश्रमशोकसमन्वितौ ॥ महार्ह
शयनोपेतौभूमावेवह्यनाथवत् ॥ ३२ ॥ क्रोधामर्षवशंप्राप्तोद्रोणपुत्रस्तुभारत ॥ नवैस्मसजगामाथनिद्रांसर्पइवश्वसन् ॥ ३३ ॥ नलेभेसतुनिद्रांवैदह्यमानोहिम-
न्युना ॥ वीक्षांचक्रेमहाबाहुस्तद्वनंघोरदर्शनं ॥ ३४ ॥ वीक्षमाणोवनोद्देशंनानासत्वैर्निषेवितं ॥ अपश्यतमहाबाहुर्न्यग्रोधंवायसैर्युतं ॥ ३५ ॥ तत्रकाकसहस्राणि
तांनिशांपर्यणामयन् ॥ सुखंस्वपंतिकौरव्यपृथक्पृथगुपाश्रयाः ॥ ३६ ॥ सुप्तेषुतेषुकाकेषुविश्रब्धेषुसमंततः ॥ सोपश्यत्सहसायांतमुलूकंघोरदर्शनं ॥ ३७ ॥ महा
स्वनंमहाकायंहर्यक्षंबभ्रुपिंगलं ॥ सुदीर्घघोणानखरंसुपर्णमिववेगितं ॥ ३८ ॥ सोथशब्दंमृदुंकृत्वालीयमानइवांडजः ॥ न्यग्रोधस्यततःशाखांप्रार्थयामास
भारत ॥ ३९ ॥ सन्निपत्यतुशाखायांन्यग्रोधस्यविहंगमः ॥ सुप्ताञ्जघानसुबहून्वायसान्वायसांतकः ॥ ४० ॥ केषांचिदच्छिनत्पक्षान्शिरांसिचचकर्त्तह ॥
चरणांश्चैवकेषांचिद्बभंजचरणायुधः ॥ ४१ ॥ क्षणेनाहनद्बलवान्येस्यदृष्टिपथेस्थिताः ॥ तेषांशरीरावयवैःशरीरैश्चविशांपते ॥ ४२ ॥ न्यग्रोधमंडलंसर्वंसंछन्नं
सर्वतोभवत् ॥ तांस्तुहत्वाततःकाकान्कौशिकोमुदितोभवत् ॥ ४३ ॥ प्रतिकृत्ययथाकामंशत्रूणांशत्रुसूदनः ॥ तद्दृष्ट्वासोपधंकर्मकौशिकेनकृतंनिशि ॥ ४४ ॥

॥ ३५ ॥ पर्यणामयन्परिणीतवंतआसन् ॥ ३६ ॥ ३७ ॥ हर्यक्षंहरिन्मणिनिभलोचनं घोणानासा नखरःतीक्ष्णनखः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ सोपधंसकपटं ॥ ४४ ॥

तद्भावेकपटमावे उपदेशइति दुर्जनाचरितंमार्गप्रमाणंकुर्वंतेखलाः विश्वस्तान्हिंसितुंद्रौणिरुलूकमकरोद्गुरुं ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

तद्भावेकृतसंकल्पोद्रौणिरेकोन्वचिंतयत् ॥ उपदेशःकृतोनेनपक्षिणाममसंयुगे ॥ ४५ ॥ शत्रूणांक्षपणेयुक्तःप्राप्तःकालश्चमेमतः ॥ नाद्यशक्यामयाहंतुंपांडवा
जितकाशिनः ॥ ४६ ॥ बलवंतःकृतोत्साहाःप्राप्तलक्षाःप्रहारिणः ॥ राज्ञःसकाशात्तेषांतुप्रतिज्ञातोवधोमया ॥ ४७ ॥ पतंगाग्निसमांवृत्तिमास्थायात्मविनाशि
नीं ॥ न्यायतोयुध्यमानस्यप्राणत्यागोनसंशयः ॥ ४८ ॥ छद्मनाचभवेत्सिद्धिःशत्रूणांचक्षयोमहान् ॥ ततःसंशयितादर्थाद्योर्थोनिःसंशयोभवेत् ॥ ४९ ॥
तंजनाबहुमन्यंतेयेचशास्त्रविशारदाः ॥ यच्चाप्यत्रभवेद्वाक्यंगर्हितंलोकनिंदितं ॥ ५० ॥ कर्त्तव्यंतन्मनुष्येणक्षत्रधर्मेणवर्त्तता ॥ निंदितानिचसर्वाणिकुत्सिता
निपदेपदे ॥ ५१ ॥ सोपधानिकृतान्येवपांडवैरकृतात्मभिः ॥ अस्मिन्नर्थेपुरागीताःश्रूयंतेधर्मचिंतकैः ॥ ५२ ॥ श्लोकान्यायमवेक्षद्भिस्तत्त्वार्थास्तत्त्वदर्शिभिः ॥
परिश्रांतेविदीर्णेवाभुंजानेवापिशत्रुभिः ॥ ५३ ॥ प्रस्थानेवाप्रवेशेवाप्रहर्त्तव्यंरिपोर्बलं ॥ निद्रार्त्तमर्धरात्रेचतथानष्टप्रणायकं ॥ ५४ ॥ भिन्नयोधंबलंयच्चद्वि
धायुक्तंचयद्भवेत् ॥ इत्येवंनिश्चयंचक्रेसुप्तानांनिशिमारणे ॥ ५५ ॥ पांडूनांसहपांचालैर्द्रोणपुत्रःप्रतापवान् ॥ सक्रूरांमतिमास्थायविनिश्चित्यमुहुर्मुहुः ॥ ५६ ॥
सुप्तौप्राबोधयत्तौतुमातुलंभोजमेवच ॥ तौप्रबुद्धौमहात्मानौकृपभोजौमहाबलौ ॥ ५७ ॥ नोत्तरंप्रतिपद्येतांतत्रयुक्तंह्रियावृतौ ॥ समुहूर्त्तमिवध्यात्वाबाष्पवि
ह्वलमब्रवीत् ॥ ५८ ॥ हतोदुर्योधनोराजाएकवीरोमहाबलः ॥ यस्यार्थेवैरमस्माभिरासक्तंपांडवैःसह ॥ ५९ ॥ एकाकीबहुभिःक्षुद्रैराहवेशुद्धविक्रमः ॥ पातितो
भीमसेनेनएकादशचमूपतिः ॥ ६० ॥ वृकोदरेणक्षुद्रेणसुनृशंसमिदंकृतं ॥ मूर्धाभिषिक्तस्यशिरःपादेनपरिमृद्नता ॥ ६१ ॥ विनर्दंतिचपांचालाःक्ष्वेलंतिचहसं
तिच ॥ धमंतिशंखान्शतशोहृष्टाघ्नंतिचदुंदुभीन् ॥ ६२ ॥ वादित्रघोषस्तुमुलोविमिश्रःशंखनिःस्वनैः ॥ अनिलेनेरितोघोरोदिशःपूरयतीवह ॥ ६३ ॥ अश्वा
नांहेषमाणानांगजानांचैवबृंहतां ॥ सिंहनादश्चशूराणांश्रूयतेसुमहानयं ॥ ६४ ॥ दिशंप्राचींसमाश्रित्यहृष्टानांगच्छतांभृशं ॥ रथनेमिस्वनाश्चैवश्रूयंतेलोमह
र्षणाः ॥ ६५ ॥ पांडवैर्धार्त्तराष्ट्राणांयदिदंकदनंकृतं ॥ वयमेवत्रयःशिष्टाअस्मिन्महतिवैशसे ॥ ६६ ॥ केचिन्नागशतप्राणाःकेचित्सर्वास्त्रकोविदाः ॥ निहताः
पांडवेयैस्तेमन्येकालस्यपर्ययं ॥ ६७ ॥ एवमेतेनभाव्यंहिनूनंकार्येणतत्त्वतः ॥ यथात्वस्येदृशीनिष्ठाकृतकार्येपिदुष्करे ॥ ६८ ॥

॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥

॥६९॥ इतिसौप्तिकपर्वणिनैलकंठीयेभारतभावदीपेप्रथमोऽध्यायः ॥ १ ॥ ॥१॥ ॥१॥ श्रुतंतइति ॥१॥ दैवेआसमंतात्बद्धाः पुरुषकारेनिहीनतयाबद्धाः तेनदैवंप्रधानंपुरुषकारउपसर्जनमित्यु
क्तंभवति ॥ २ ॥ ३ ॥ ४ ॥ वर्षन्नृकिंफलंनसाधयतेऽपितुसाधयत्येव कृषिविनापिवनेचराःकेवलंपर्जन्येनजीवंतिनतुकृषीवलाःकेवलयाकृष्याजीवंति एवंपुरुषकारोदैवमपेक्षते दैवंतुनातीवपुरुषकारा
पेक्षमितिभावः ॥ ५ ॥ एतदेवाह उत्थानमिति दैवस्यप्रधानस्यउत्थानंपुरुषकारोव्यर्थंभवतितथाऽनुत्थानंउत्थानहीनंदैवमपिव्यर्थमितिपक्षद्वयंसर्वत्रव्यवस्यतितत्रपूर्वएवपक्षःश्रेयानित्यर्थः ॥ ६ ॥ द्वयोरा

भवतोस्तुयदिप्रज्ञानमोहादपनीयते ॥ व्यापन्नेस्मिन्महत्यर्थेयन्नःश्रेयस्तदुच्यतां ॥ ६९ ॥ इतिश्रीमहाभारतेसौप्तिकपर्वणिद्रौणिमंत्रणायांप्रथमोऽध्या
यः ॥ १ ॥ ॥१॥ ॥१॥ कृपउवाच श्रुतंतेवचनंसर्वंयद्यदुक्तंत्वयाविभो ॥ ममापितुवचःकिंचिच्छृणुष्वाद्यमहाभुज ॥ १ ॥ आबद्धामानुषाःसर्वे
निबद्धाःकर्मणोर्द्वयोः ॥ दैवेपुरुषकारेचपरंताभ्यांनविद्यते ॥ २ ॥ नहिदैवेनसिध्यंतिकार्याण्येकेनसत्तम ॥ नचापिकर्मणैकेनद्वाभ्यांसिद्धिस्तुयोगतः ॥ ३ ॥ ता
भ्यामुभाभ्यांसर्वार्थानिबद्धाअधमोत्तमाः ॥ प्रवृत्ताश्चैवदृश्यंतेनिवृत्ताश्चैवसर्वशः ॥ ४ ॥ पर्जन्यःपर्वतेवर्षन्किन्नुसाधयतेफलं ॥ कृष्टेक्षेत्रेतथावर्षन्किन्नसाध
यतेफलं ॥ ५ ॥ उत्थानंचापिदैवस्यह्यनुत्थानंचदैवतं ॥ व्यर्थंभवतिसर्वत्रपूर्वस्तत्रविनिश्चयः ॥ ६ ॥ सुवृष्टेचयथादेवेसम्यक्क्षेत्रेचकर्षिते ॥ बीजंमहागुणंभूया
त्तथासिद्धिर्हिमानुषी ॥ ७ ॥ तयोर्दैवंविनिश्चित्यस्वयंचैवप्रवर्त्तते ॥ प्राज्ञाःपुरुषकारेतुवर्त्ततेदाक्ष्यमाश्रिताः ॥ ८ ॥ ताभ्यांसर्वेहिकार्यार्थामनुष्याणांनरर्षभ ॥
विचेष्टंतःस्मदृश्यंतेनिवृत्तास्तुतथैवच ॥ ९ ॥ कृतःपुरुषकारश्चसोपिदैवेनसिध्यति ॥ तथास्यकर्मणःकर्त्तुरभिनिर्वर्त्ततेफलं ॥ १० ॥ उत्थानंचमनुष्याणांदक्षा
णांदैववर्जितं ॥ अफलंदृश्यतेलोकेसम्यगप्युपपादितं ॥ ११ ॥ तत्रालसामनुष्याणांयेभवंत्यमनस्विनः ॥ उत्थानंतेविगर्हंतिप्राज्ञानांतन्नरोचते ॥ १२ ॥ प्राय
शोहिकृतंकर्मनाफलंदृश्यतेभुवि ॥ अकृत्वाचपुनर्दुःखंकर्मपश्येन्महाफलं ॥ १३ ॥ चेष्टामकुर्वन्लभतेयदिकिंचिद्यदृच्छया ॥ योवानलभतेकृत्वादुर्दर्शौतावु
भावपि ॥ १४ ॥ शक्नोतिजीवितंदक्षोनालसःसुखमेधते ॥ दृश्यंतेजीवलोकेस्मिन्दक्षाःप्रायोहितैषिणः ॥ १५ ॥ यदिदक्षःसमारंभात्कर्मणोनाश्नुतेफलं ॥ ना
स्यवाच्यंभवेत्किंचिल्लब्धव्यंवाधिगच्छति ॥ १६ ॥

नुकूल्यंश्रेष्ठतरमित्याह सुवृष्टइति ॥ ७ ॥ दैवंबलवदितिशेषः यतःस्वयमपिपुरुषकारंविनापिप्रवर्त्तते फलंदातुमितिशेषः तर्हिकिंपु
रुषकारेणेत्याशंक्याह प्राज्ञाइति पुरुषापराधनिवृत्तिमात्रंततफलमित्यर्थः ॥ ८ ॥ विचेष्टंतःप्रवृत्ताःदृश्यंतेलोकदृष्ट्येत्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ कर्मअकृत्वादुःखंपश्येदित्यपिप्रायशोस्ति ॥ १३ ॥
दुर्दर्शौदुर्लभौ चेष्टावान्नलभतेनिश्चेष्टोनलभतइत्युत्सर्गमात्रमित्यर्थः ॥ १४ ॥ १५ ॥ यदिति दक्षोनिंद्यतांनयातीतिभावः ॥ १६ ॥

अदक्षस्तुपरप्रयत्नार्जितेनजीवन्नपिभोक्तुमेवायंसमर्थोनार्जयितुमितिनिंद्यतइत्याहाकृत्वेति ॥ १७ ॥ एतत्दैवदाक्ष्ययोःसाहित्यं अन्यथातयोरन्यतरालंबनेन ॥ १८ ॥ एतदेवस्पष्टयति हीनमिति पुरुषकारेणहीनंदैवोत्थानमफलंएवंदैवहीनंपुरुषकारस्योत्थानमपितस्मात्द्वाभ्यामप्युत्थातव्यमित्यर्थः ॥ १९ ॥ कर्मदैवं फलितमाह दैवतेभ्यइति ॥ २० ॥ ईहांविवृणोति सम्यगिति ॥ २१ ॥ २२ ॥ योगेअल

अकृत्वाकर्मयोलोकेफलंविंदतिधिष्ठितः॥ सतुवक्तव्यतांयातिद्वेष्योभवतिभूयशः॥१७॥ एवमेतदनादृत्यवर्त्ततेयस्त्वतोन्यथा॥ सकरोत्यात्मनोनर्थानेषबुद्धिमतांनयः॥ १८॥ हीनंपुरुषकारेणयदिदैवनवापुनः॥ कारणाभ्यामथैताभ्यामुत्थानमफलंभवेत्॥१९॥ हीनंपुरुषकारेणकर्मत्विहनसिद्ध्यति॥ दैवतेभ्योनमस्कृत्ययस्त्वर्थान्सम्यगीहते॥ २०॥ दक्षोदाक्षिण्यसंपन्नोनसमोघैर्विहन्यते॥ सम्यगीहापुनरियंयोवृद्धानुपसेवते॥ २१॥ आपृच्छतिचयच्छ्रेयःकरोतिचहितंवचः॥ उत्थायोत्थायहिसदाप्रष्टव्यावृद्धसंमताः॥ २२॥ तेस्मयोगेपरंमूलंतन्मूलासिद्धिरुच्यते॥ वृद्धानांवचनंश्रुत्वायोभ्युत्थानंप्रयोजयेत्॥ २३॥ उत्थानस्यफलंसम्यकृतंदासलभतेऽचिरात्॥ रागात्क्रोधाद्भयाल्लोभाद्योर्थानीहतिमानवः॥ २४॥ अनीशश्चावमानीचसशीघ्रंभ्रश्यतेश्रियः॥ सोयंदुर्योधनेनार्थोलुब्धेनादीर्घदर्शिना॥ २५॥ असमर्थःसमारब्धोमूढत्वादविचिंतितः॥ हितबुद्धीननादृत्यसंमंत्र्यासाधुभिःसह॥ २६॥ वार्यमाणोऽकरोद्वैरंपांडवैर्गुणवत्तरैः॥ पूर्वमप्यतिदुःशीलोनधैर्यंकर्तुमर्हति॥ २७॥ तपत्यर्थेविपन्नेहिमित्राणांनकृतंवचः॥ अनुवर्त्तामहेयत्तुतंवयंपापपूरुषं॥ २८॥ अस्मानप्यनयस्तस्मात्प्राप्तोयंदारुणोमहान्॥ अनेनतुममाद्यापिव्यसनेनोपतापिता॥ २९॥ बुद्धिश्चिंतयतेकिंचित्स्वंश्रेयोनावबुध्यते॥ मुह्यतातुमनुष्येणप्रष्टव्याःसुहृदोजनाः॥ ३०॥ तत्रास्यबुद्धिर्विनयस्तत्रश्रेयश्चपश्यति॥ ततोऽस्यमूलंकार्याणांबुद्ध्यानिश्चित्यवैबुधाः॥ ३१॥ तेऽत्रपृष्टायथाब्रूयुस्तत्कर्त्तव्यंतथाभवेत्॥ तेवयंधृतराष्ट्रंचगांधारींचसमेत्यह॥ ३२॥ उपपृच्छामहेगत्वाविदुरंचमहामतिं॥ तेपृष्टास्तुवदेयुर्यच्छ्रेयोनःसमनंतरं॥ ३३॥ तदस्माभिःपुनःकार्यमितिमेनैष्ठिकीमतिः॥ अनारंभात्तुकार्याणांनार्थःसंपद्यतेक्वचित्॥ ३४॥ कृतेपुरुषकारेतुयेषांकार्यंनसिद्ध्यति॥ दैवेनोपहतास्तेतुनात्रकार्याविचारणा॥ ३५॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिद्रौणिकृपसंवादेद्वितीयोऽध्यायः॥२॥ ॥ ॥ संजयउवाच कृपस्यवचनंश्रुत्वाधर्मार्थसहितंशुभं॥ अश्वत्थामामहाराजदुःखशोकसमन्वितः॥१॥

ब्धलाभे ॥ २३ ॥ २४ ॥ अनीशःअजितचित्तः अवमानीपरमवजानन् ॥ २५ ॥ २६ ॥ २७ ॥ तेपतिसंतापंप्राप्नोतिभीमेनभग्नोरुःसन् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥ कृपस्येति ॥ १ ॥

॥ २ ॥ ३ ॥ सर्वात्मानमित्यत्र सर्वः आत्मानमितिच्छेदः संधिरार्षः ॥ ४ ॥ ५ ॥ योगेसमुदाये ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ हेभोजहेकृतवर्मन् एकमेवसंबोधयन्कृपस्यवचासिअनादरसूचय

दह्यमानस्तुशोकेनप्रदीप्तेनाग्निनायथा ॥ क्रूरंमनस्ततःकृत्वातावुभौप्रत्यभाषत ॥ २ ॥ पुरुषेपुरुषेबुद्धिर्यायाभवतिशोभना ॥ तुष्यंतिचपृथक्सर्वेप्रज्ञयातेस्वयास्वया ॥ ३ ॥ सर्वोहिमन्यतेलोकआत्मानंबुद्धिमत्तरं ॥ सर्वस्यात्मावहुमतःसर्वात्मानंप्रशंसति ॥ ४ ॥ सर्वस्यहिस्वकाप्रज्ञासाधुवादेप्रतिष्ठिता ॥ परबुद्धिंचनिंदंतिस्वांप्रशंसंतिचासकृत् ॥ ५ ॥ कारणांतरयोगेनयोगेयेषांसमागतिः ॥ अन्योन्येनचतुष्यंतिबहुमन्यंतिचासकृत् ॥ ६ ॥ तस्यैवतुमनुष्यस्यसासाबुद्धिस्तदातदा ॥ कालयोगेविपर्यासंप्राप्यान्योन्यंविपद्यते ॥ ७ ॥ विचित्रत्वात्तुचित्तानांमनुष्याणांविशेषतः ॥ चित्तवैक्लव्यमासाद्यसासाबुद्धिःप्रजायते ॥ ८ ॥ यथाहिवैद्यःकुशलोज्ञात्वाव्याधिंयथाविधि ॥ भैषज्यंकुरुतेयोगात्प्रशमार्थमितिप्रभो ॥ ९ ॥ एवंकार्यस्ययोगार्थंबुद्धिंकुर्वंतिमानवाः ॥ प्रज्ञयाहिस्वयायुक्तास्तांचनिंदंतिमानवाः ॥ १० ॥ अन्ययायौवनेमर्त्योबुद्ध्याभवतिमोहितः ॥ मध्येन्ययाजरायांतुसोन्यांरोचयतेमतिं ॥ ११ ॥ व्यसनंवामहाघोरंसमृद्धिंचापितादृशीं ॥ अवाप्यपुरुषोभोजकुरुतेबुद्धिवैकृतं ॥ १२ ॥ एकस्मिन्नेवपुरुषेसासाबुद्धिस्तदातदा ॥ भवत्यकृतधर्मत्वात्सातस्यैवनरोचते ॥ १३ ॥ निश्चित्यतुयथाप्रज्ञंयांमतिंसाधुपश्यति ॥ तयाप्रकुरुतेभावंसातस्योद्योगकारिका ॥ १४ ॥ सर्वोहिपुरुषोभोजसाध्वेतदितिनिश्चितः ॥ कर्तुमारभतेप्रीतोमरणादिषुकर्मसु ॥ १५ ॥ सर्वेहिबुद्धिमाज्ञायप्रज्ञांवापिस्वकांनराः ॥ चेष्टंतेविविधांचेष्टांहितमित्येवजानते ॥ १६ ॥ उपजाताव्यसनजायेयमद्यमतिर्मम ॥ युवयोस्तांप्रवक्ष्यामिममशोकविनाशिनीं ॥ १७ ॥ प्रजापतिःप्रजाःसृष्ट्वाकर्मतासुविधायच ॥ वर्णेवर्णेसमाधत्तेत्वेकैकंगुणभाग्गुणं ॥ १८ ॥ ब्राह्मणेवेदमग्र्यंतुक्षत्रियेतेजउत्तमं ॥ दाक्ष्यंवैश्येचशूद्रेचसर्ववर्णानुकूलतां ॥ १९ ॥ अदांतोब्राह्मणोऽसाधुर्निस्तेजाःक्षत्रियोऽधमः ॥ अदक्षोनिंद्यतेवैश्यःशूद्रश्चप्रतिकूलवान् ॥ २० ॥ सोऽस्मिजातःकुलेश्रेष्ठेब्राह्मणानांसुपूजिते ॥ मंदभाग्यतयास्म्येतंक्षत्रधर्ममनुष्ठितः ॥ २१ ॥ क्षत्रधर्मंविदित्वाहंयदिब्राह्मण्यमाश्रितः ॥ प्रकुर्यांसुमहत्कर्मनमेतत्साधुसंमतं ॥ २२ ॥ धारयंश्चधनुर्दिव्यंदिव्यान्यस्त्राणिचाहवे ॥ पितरंनिहतंदृष्ट्वाकिंनुवक्ष्यामिसंसदि ॥ २३ ॥

ति ॥ १२ ॥ अकृतधर्मत्वात्अवसरानुरोधात् इदानींममशांतिबुद्धिर्नरोचतेइत्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ विदित्वाआश्रित्य यदिब्राह्मण्यंसंश्रितःसन्शमादिरूपंसुमहत्कर्मप्रकुर्यांतत्मेसाधुसंमतंन अवलंबितस्यचक्षत्रधर्मस्य निर्वाहोवश्यंकर्त्तव्यइत्यर्थः ॥ २२ ॥ २३ ॥

सोहमद्ययथाकामंक्षत्रधर्ममुपास्यतं ॥ गंताऽस्मिपदवींराज्ञःपितुश्चापिमहात्मनः ॥ २४ ॥ अद्यस्वप्स्यंतिपांचालाविश्वस्ताजितकाशिनः ॥ विमुक्तयुग्यकव चाहर्षेणचसमन्विताः ॥ २५ ॥ जयंमत्वात्मनश्चैवश्रांताव्यायामकर्शिताः ॥ तेषांनिशिप्रसुप्तानांसुस्थानांशिबिरेस्वके ॥ २६ ॥ अवस्कंदंकरिष्यामिशिबिर स्याद्यदुष्करं ॥ तानवस्कंद्यशिबिरेप्रेतभूतविचेतसः ॥ २७ ॥ सूदयिष्यामिविक्रम्यमघवानिवदानवान् ॥ अद्यतान्सहितान्सर्वान्धृष्टद्युम्नपुरोगमान् ॥ २८ ॥ सूदयिष्यामिविक्रम्यकक्षंदीप्तइवानलः ॥ निहत्यचैवपांचालान्शांतिंलब्धाऽस्मिसत्तम ॥ २९ ॥ पांचालेषुभविष्यामिसूदयन्नद्यसंयुगे ॥ पिनाकपाणिःसंक्रुद्धः स्वयंरुद्रःपशुष्विव ॥ ३० ॥ अद्याहंसर्वपांचालान्निहत्यचनिकृष्यच ॥ अर्दयिष्यामिसंहृष्टोरणेपांडुसुतांस्तथा ॥ ३१ ॥ अद्याहंसर्वपांचालैःकृत्वाभूमिंशरीरि णीं ॥ प्रहृत्यैकैकशस्तेषुभविष्याम्यनृणःपितुः ॥ ३२ ॥ दुर्योधनस्यकर्णस्यभीष्मसैंधवयोरपि ॥ गमयिष्यामिपांचालान्पदवीमद्यदुर्गमां ॥ ३३ ॥ अद्यपांचा लराजस्यधृष्टद्युम्नस्यवैनिशि ॥ नचिरात्प्रमथिष्यामिपशोरिवशिरोबलात् ॥ ३४ ॥ अद्यपांचालपांडूनांशयितानात्मजान्निशि ॥ खड्गेननिशितेनाजौप्रमथि ष्यामिगौतम ॥ ३५ ॥ अद्यपांचालसेनांतांनिहत्यनिशिसौप्तिके ॥ कृतकृत्यःसुखीचैवभविष्यामिमहामते ॥ ३६ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिद्रौणि मंत्रणायांतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥ कृपउवाच दिष्ट्यातेप्रतिकर्त्तव्येमतिर्जातेयमच्युत ॥ नत्वांवारयितुंशक्तोवज्रपाणिरपिस्वयं ॥ १ ॥ अनुयास्यावहेत्वांतुप्रभातेसहितावुभौ ॥ अद्यरात्रौविश्रमस्वविमुक्तकवचध्वजः ॥ २ ॥ अहंत्वामनुयास्यामिकृतवर्माचसात्वतः ॥ परानभिमुखंयांतंर थावास्थायदंशितौ ॥ ३ ॥ आवाभ्यांसहितःशत्रून्श्वोनिहंतासमागमे ॥ विक्रम्यरथिनांश्रेष्ठपांचालान्सपदानुगान् ॥ ४ ॥ शक्तस्त्वमसिविक्रम्यविश्रमस्वनि शामिमां ॥ चिरंतेजाग्रतस्तातस्वपतावन्निशामिमां ॥ ५ ॥ विश्रांतश्चविनिद्रश्चस्वस्थचित्तश्चमानद ॥ समेत्यसमरेशत्रून्वधिष्यसिनसंशयः ॥ ६ ॥ नहित्वांरथि नांश्रेष्ठंप्रगृहीतवरायुधं ॥ जेतुमुत्सहतेशश्वदपिदेवेषुवासवः ॥ ७ ॥ कृपेणसहितंयांतंगुप्तंचकृतवर्मणा ॥ कोद्रौणिंयुधिसंरब्धंयोधयेदपिदेवराट् ॥ ८ ॥ तेवयं निशिविश्रांताविनिद्राविगतज्वराः ॥ प्रभातायांरजन्यांवैनिहनिष्यामशात्रवान् ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ चतुर्थंआतुरादीनांचतुर्णांमध्यएकोभागःअमर्षः ममस्वप्नमक्षयंनाशयेत् तस्मा

॥ सात्वतोपिमहेष्वासोनित्यंयुद्धेषुकोविदः ॥ १० ॥तेवयंसहितास्तातसर्वान्शत्रून्समागतान्॥ प्रसत्यसमरेहत्वाप्रीतिंप्राप्स्यामपुष्कलां॥ ११ ॥ विश्रमस्वत्वमव्यग्रःस्वपचेमांनिशांसुखं ॥ अहंचकृतवर्माचत्वांप्रयांतंनरोत्तमं ॥ १२॥ अनुयास्यावसहितौधन्विनौपरंतापनौ॥रथिनंत्वरयायांतंरथमास्थायदंशितौ॥ १३ ॥सगत्वाशिबिरंतेषांनामविश्राव्यचाहवे॥ ततःकर्त्तासिशत्रूणांयुध्यतांकदनंमहत् ॥ १४ ॥ कृत्वाचकदनंतेषांप्रभातेविमलेऽहनि॥ विहरस्वयथाशक्रःसूदयित्वामहासुरान्॥ १५ ॥ त्वंहिशक्तोरणेजेतुंपांचालानांवरूथिनीं ॥ दैत्यसेनामिवक्रुद्धःसर्वदानवसूदनः॥ १६॥ मयात्वांसहितंसंख्येगुप्तंचकृतवर्मणा॥ नसहेतविभुःसाक्षाद्वज्रपाणिरपिस्वयं॥ १७॥ नचाहंसमरेतातकृतवर्मानचैवहि ॥ अनिर्जित्यरणेपांडून्नचयास्यामिकर्हिचित् ॥१८॥ हत्वाचसमरेक्रुद्धान्पांचालान्पांडुभिःसह॥ निवर्त्तिष्यामहेसर्वेहतावास्वर्गगावयं॥१९॥सर्वोपायैःसहायास्तेप्रभातेवयमाहवे॥ सत्यमेतन्महाबाहोप्रब्रवीमितवानघ॥ २० ॥एवमुक्तस्ततोद्रौणिर्मातुलेनहितंवचः॥ अब्रवीन्मातुलंराजन्क्रोधसंरक्तलोचनः॥ २१ ॥ आतुरस्यकुतोनिद्रानरस्यामर्षितस्यच॥ अर्थांश्चिंतयतश्चापिकामयानस्यवापुनः॥ तदिदंसमनुप्राप्तंपश्यमेऽद्यचतुष्टयं ॥ २२॥ यस्यभागश्चतुर्थोमेस्वप्नमह्नायनाशयेत्॥ किंनामदुःखंलोकेस्मिन्पितुर्वधमनुस्मरन्॥ २३ ॥ हृदयंनिर्दहन्मेऽद्यरात्र्यहानिनशाम्यति॥ यथाचनिहतःपापैःपितामम विशेषतः॥ २४॥ प्रत्यक्षमपितेसर्वंतन्मेमर्माणिकृंतति॥ कथंहिमादृशोलोकेमुहूर्त्तमपिजीवति॥ २५॥द्रोणोहतेतियद्वाचःपांचालानांशृणोम्यहं॥ धृष्टद्युम्नमहत्वातुनाहंजीवितुमुत्सहे ॥ २६ ॥ समेपितुर्वधाद्वध्यःपांचालायेचसंगताः॥विलापोभग्नसक्थस्ययस्तुराज्ञोमयाश्रुतः॥ २७॥ सपुनर्हृदयंकस्यक्रूरस्यापिननिर्दहेत् ॥ कस्यत्यकरुणस्यापिनेत्राभ्यामश्रुनाव्रजेत् ॥ २८ ॥नृपतेर्भग्नसक्थस्यश्रुत्वातादृग्वचःपुनः॥ यश्चायंमित्रपक्षोमेमयिजीवतिनिर्जितः॥ २९ ॥ शोकंमेवर्धयत्येषवारिवेगइवार्णवं ॥ एकाग्रमनसोमेद्यकुतोनिद्राकुतःसुखं॥ ३० ॥वासुदेवार्जुनाभ्यांचतानहंपरिरक्षितान्॥ अविषह्यतमान्मन्येमहेंद्रेणापिसत्तम॥ ३१ ॥ नचापिसक्तःसंयंतुंकोपमेतंसमुत्थितं॥ तंनपश्यामिलोकेस्मिन्योमांकोपान्निवर्त्तयेत्॥ ३२ ॥

त्स्वपेत्युक्तंतन्नयुज्यते अनुस्मरन्अनुस्मरतः नशाम्यतिअमर्षइत्यर्थः सार्द्धश्लोकः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

॥ ३३ ॥ समासंप्रत्याधि ॥ ३४ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेचतुर्थोऽध्यायः ॥४॥ ॥४॥ ॥४॥ शुश्रूषुरिति दुर्मेधाःमूढः अनियतेतिच्छेदः ॥१॥२॥३॥४॥५॥ अनेयः

तथैवनिश्चिताबुद्धिरेषासाधुमताभम ॥ वार्त्तिकैःकथ्यमानस्तुमित्राणांमेपराभवः ॥ ३३ ॥ पांडवानांचविजयोहृदयंदहतीवमे ॥ अहंतुकदनंकृत्वाशत्रूणामद्यसौप्तिके ॥ ततोविश्रमिताचैवस्वप्ताचविगतज्वरः ॥ ३४ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिद्रौणिमंत्रणायांचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ४ ॥ ॥ ४ ॥

कृपउवाच शुश्रूषुरपिदुर्मेधाःपुरुषोऽनियतेंद्रियः ॥ नालंवेदयितुंकृत्स्नौधर्मार्थाविति मेमतिः ॥१॥ तथैवतावन्मेधावीविनयंयोनशिक्षते ॥ नचकिंचनजानातिसोपिधर्मार्थनिश्चयं ॥२॥ चिरंह्यपिजडःशूरःपंडितंपर्युपास्य ह ॥ नसधर्मान्विजानातिदर्वीसूपरसानिव ॥३॥ मुहूर्तमपितंप्राज्ञःपंडितंपर्युपास्यहि ॥ क्षिप्रंधर्मान्विजानातिजिह्वासूपरसानिव ॥४॥ शुश्रूषुस्त्वेवमेधावीपुरुषोनियतेंद्रियः ॥ जानीयादागमान्सर्वान्ग्राह्यंचनविरोधयेत् ॥ ५ ॥ अनेयस्त्ववमानीयोदुरात्मापापपूरुषः ॥ दिष्टमुत्सृज्यकल्याणंकरोतिबहुपापकं ॥ ६ ॥ नाथवंतंतुसुहृदःप्रतिषेधंतिपातकात् ॥ निवर्ततेतुलक्ष्मीवान्नालक्ष्मीवान्निवर्तते ॥ ७ ॥ यथाह्युच्चावचैर्वाक्यैःक्षिप्तचित्तोनियम्यते ॥ तथैवसुहृदाशक्योनशक्यस्त्ववसीदति ॥ ८ ॥ तथैवसुहृदंप्राज्ञंकुर्वाणंकर्मपापकं ॥ प्राज्ञाःसंप्रतिषेधंतियथाशक्तिपुनःपुनः ॥ ९ ॥ सकल्याणेमतिःकृत्वानियम्यात्मानमात्मना ॥ कुरुमेवचनंतातयेनपश्चान्नतप्यसे ॥ १० ॥ नवधःपूज्यतेलोकेसुप्तानामिहधर्मतः ॥ तथैवापास्तशस्त्राणांविमुक्तरथवाजिनां ॥ ११ ॥ येचब्रूयुस्तवास्मीतियेचस्युःशरणागताः ॥ विमुक्तमूर्धजायेचयेचापिहतवाहनाः ॥ १२ ॥ अद्यस्वप्स्यंतिपांचालाविमुक्तकवचाविभो ॥ विश्वस्तारजनींसर्वेप्रेताइवविचेतसः ॥ १३ ॥ यस्तेषांतदवस्थानांद्रुह्येतपुरुषोऽनृजुः ॥ व्यक्तंसनरकेमज्जेदगाधेविपुलेऽप्लवे ॥ १४ ॥ सर्वास्त्रविदुषांलोकेश्रेष्ठस्त्वमसिविश्रुतः ॥ नचतेजातुलोकेस्मिन्सुसूक्ष्ममपिकिल्बिषं ॥ १५ ॥ त्वंपुनःसूर्यसंकाशःश्वोभूतउदितेरवौ ॥ प्रकाशेसर्वभूतानांविजेतायुधिशात्रवान् ॥ १६ ॥ असंभावितरूपंहित्वयिकर्मविगर्हितं ॥ शुक्लेरक्तमिवन्यस्तंभवेदितिमतिर्मम ॥ १७ ॥ अश्वत्थामोवाच एवमेवयथात्थत्वंमातुलेहनसंशयः ॥ तैस्तुपूर्वमयंसेतुःशतधाविदलीकृतः ॥ १८ ॥ प्रत्यक्षंभूमिपालानांभवतांचापिसन्निधौ ॥ न्यस्तशस्त्रोममपिताधृष्टद्युम्नेनपातितः ॥ १९ ॥ कर्णश्चपतितेचक्रेरथस्यरथिनांवरः ॥ उत्तमेव्यसनेमग्नोहतोगांडीवधन्वना ॥ २० ॥

सन्मार्गंनेतुमशक्यः दिष्टंउपदिष्टं ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ अप्लवेइतिच्छेदः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ विदलीकृतःदलितः ॥ १८ ॥ प्रत्यक्षमिति दुष्टेदौष्ट्येनैवजेतव्यइत्यर्थः ॥ १९ ॥ २० ॥

॥२१॥२२॥ अधर्मेणनाभेरधस्तात्प्रहारेण ॥२३॥२४॥ वार्त्तिकाणांवार्त्ताहराणां ॥२५॥ २६॥२७॥२८॥२९॥३०॥३१॥ एकसार्थप्रयातौस्थः एकसाहित्येनप्रयत्नवंतौस्थः अस्तेर्लट्उत्तमस्यद्विवचनं

तथाशांतनवोभीष्मोन्यस्तशस्त्रोनिरायुधः ॥ शिखंडिनंपुरस्कृत्यहतोगांडीवधन्वना ॥ २१ ॥ भूरिश्रवामहेष्वासस्तथाप्रायगतोरणे ॥ क्रोशतांभूमिपालानांयु युधानेनपातितः ॥ २२ ॥ दुर्योधनश्चभीमेनसमेत्यगदयारणे ॥ पश्यतांभूमिपालानामधर्मेणनिपातितः ॥ २३ ॥ एकाकीबहुभिस्तत्रपरिवार्यमहारथैः ॥ अध र्मेणनरव्याघ्रोभीमसेनेनपातितः ॥ २४ ॥ विलापोभग्नसक्थस्ययोमेराज्ञःपरिश्रुतः ॥ वार्त्तिकाणांकथयतांसमेमर्माणिकृंतति ॥ २५॥ एवंचाधार्मिकाःपापाः पांचालाभिन्नसेतवः ॥ तानेवंभिन्नमर्यादान्किंभवान्नविगर्हति ॥ २६ ॥ पितृहंतॄनहंहत्वापांचालान्निशिसौप्तिके ॥ कामंकीटःपतंगोवाजन्मप्राप्यभवामिवै ॥ ॥ २७॥ त्वरेचाहमनेनाद्ययदिदंमेचिकीर्षितं ॥ तस्यमेत्वरमाणस्यकुतोनिद्राकुतःसुखं ॥ २८॥ नसजातःपुमाँल्लोकेकश्चिन्नसभविष्यति ॥ योमे[illegible] तांवधेतेषांकृतांमतिं ॥ २९॥ संजयउवाच एवमुक्त्वामहाराजद्रोणपुत्रःप्रतापवान् ॥ एकांतेयोजयित्वाश्वान्प्रायादभिमुखःपरान्॥ ३० ॥ तमब्रूतांम हात्मानौभोजशारद्वतावुभौ ॥ किमर्थंस्यंदनोयुक्तःकिंचकार्यंचिकीर्षितं ॥ ३१ ॥ एकसार्थप्रयातौस्वस्त्वयासहनरर्षभ ॥ समदुःखसुखौचापिनावांशंकितुम र्हसि ॥ ३२ ॥ अश्वत्थामातुसंक्रुद्धःपितुर्वधमनुस्मरन् ॥ ताभ्यांतथ्यंतथाचख्यौयदस्यात्मचिकीर्षितं ॥ ३३ ॥ हत्वाशतसहस्राणियोधानांनिशितैःशरैः ॥ न्य स्तशस्त्रोममपिताधृष्टद्युम्नेनपातितः ॥ ३४ ॥ तंतथैवहनिष्यामिन्यस्तधर्माणमद्यवै ॥ पुत्रंपांचालराजस्यपापंपापेनकर्मणा ॥ ३५ ॥ कथंचनिहतःपापःपांचा ल्यःपशुवन्मया ॥ शस्त्रेणविजितांल्लोकान्नाप्नुयादितिमेमतिः ॥ ३६ ॥ क्षिप्रंसन्नद्धकवचौसखड्गावात्तकार्मुकौ ॥ मामास्थायप्रतीक्षेतांरथवर्यौपरंतपौ ॥ ३७॥ इत्युक्त्वारथमास्थायप्रायादभिमुखःपरान् ॥ तमन्वगात्कृपोराजन्कृतवर्माचसात्वतः ॥ ३८ ॥ तेप्रयाताव्यरोचंतपरानभिमुखास्त्रयः ॥ हूयमानायथायज्ञेस मिद्धाहव्यवाहनाः ॥ ३९ ॥ ययुश्चशिबिरंतेषांसंप्रसुप्तजनंविभो ॥ द्वारदेशंतुसंप्राप्यद्रौणिस्तस्थौमहारथः ॥ ४० ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिद्रौणि गमनेपंचमोऽध्यायः ॥५॥ ॥५॥ ॥५॥ धृतराष्ट्रउवाच द्वारदेशेततोद्रौणिमवस्थितमवेक्ष्यतौ ॥ अकुर्वतांभोजकृपौकिंसंजयवदस्वमे ॥ १ ॥ संजयउवाच कृतवर्माणमामंत्र्यकृपंचसमहारथः ॥ द्रौणिर्मन्युपरीतात्माशिबिरद्वारमागमत् ॥ २ ॥

॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ इतिसौप्तिकपर्वणिनैलकंठीयेभारतभावदीपेपंचमोऽध्यायः ॥ ५ ॥ ॥५॥ ॥५॥ द्वारदेशेइति ॥ १ ॥ २ ॥

॥ ३ ॥ ४ ॥ बद्धाः महासर्पाः अंगदरूपायेनतं अग्निज्वालाभ्यामपुखंकुद्धमित्यर्थः ॥ ५ ॥ नयनानांसहस्रैरित्यनेनालौकिकत्वंदर्शितम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ रथशक्तिचक्रं ॥

तंचभूतंमहाकायंचंद्रार्कसदृशद्युतिं ॥ सोपश्यद्द्वारमाश्रित्यतिष्ठंतंलोमहर्षणं ॥ ३ ॥ वसानंचर्मवैयाघ्रंमहारुधिरविस्रवं ॥ कृष्णाजिनोत्तरासंगंनागयज्ञोपवीतिनं ॥ ४ ॥ बाहुभिःस्वायतैःपीनैर्नानाप्रहरणोद्यतैः ॥ बद्धांगदमहासर्पंज्वालामालाकुलाननं ॥ ५ ॥ दंष्ट्राकरालवदनंव्यादितास्यंभयानकं ॥ नयनानांसहस्रैश्चविचित्रैरभिभूषितं ॥ ६ ॥ नैवतस्यवपुःशक्यंप्रवक्तुंवेषएवच ॥ सर्वथातुतदालक्ष्यस्फुटेयुरपिपर्वताः ॥ ७ ॥ तस्यास्यनासिकाभ्यांचश्रवणाभ्यांचसर्वशः ॥ तेभ्यश्चाक्षिसहस्रेभ्यःप्रादुरासन्महार्चिषः ॥ ८ ॥ तथातेजोमरीचिभ्यःशंखचक्रगदाधराः ॥ प्रादुरासन्हृषीकेशाःशतशोथसहस्रशः ॥ ९ ॥ तदत्यद्भुतमालोक्यभूतंलोकभयंकरं ॥ द्रौणिरव्यथितोदिव्यैरस्त्रवर्षैरवाकिरत् ॥ १० ॥ द्रौणिमुक्तांश्छरांस्तांस्तुतद्भूतंमहदग्रसत् ॥ उदधेरिववार्योघान्पावकोवडवामुखः ॥ ११ ॥ अग्रसत्तांस्तथाभूतंद्रौणिनाप्रहितान्शरान् ॥ अश्वत्थामातुसंप्रेक्ष्यशरौघांस्तान्निरर्थकान् ॥ १२ ॥ रथशक्तिंमुमोचास्मैदीप्तामग्निशिखामिव ॥ सातमाहत्यदीप्ताग्रारथशक्तिरदीर्यत ॥ १३ ॥ युगांतेसूर्यमाहत्यमहोल्केवदिवश्च्युता ॥ अथहेमत्सरुंदिव्यंखड्गमाकाशवर्चसं ॥ १४ ॥ कोशात्समुद्बबर्हाशुबिलाद्दीप्तमिवोरगं ॥ ततःखड्गवरंधीमान्भूतायप्राहिणोत्तदा ॥ १५ ॥ सतदासाद्यभूतंवैविलिल्यनकुलवद्ययौ ॥ ततःसकुपितोद्रौणिरिंद्रकेतुनिभांगदां ॥ १६ ॥ ज्वलंतींप्राहिणोत्तस्मैभूतंतामपिचाग्रसत् ॥ ततःसर्वायुधाभावेवीक्षमाणस्ततस्ततः ॥ १७ ॥ अपश्यत्कृतमाकाशमनाकाशंजनार्दनैः ॥ तदद्भुततमंदृष्ट्वाद्रोणपुत्रोनिरायुधः ॥ १८ ॥ अब्रवीदतिसंतप्तःकृपवाक्यमनुस्मरन् ॥ ब्रुवतामप्रियंपथ्यंसुहृदांनशृणोतियः ॥ १९ ॥ सशोचत्यापदंप्राप्ययथाहमतिवर्त्यतौ ॥ शास्त्रदृष्टानविद्वान्यःसमतीत्यजिघांसति ॥ २० ॥ सपथःप्रच्युतोधर्मात्कुपथेप्रतिहन्यते ॥ गोब्राह्मणनृपस्त्रीषुसख्युर्मातुर्गुरोस्तथा ॥ २१ ॥ हीनप्राणजडांधेषुसुप्तभीतोत्थितेषुच ॥ मत्तोन्मत्तप्रमत्तेषुनशस्त्राणिचपातयेत् ॥ २२ ॥ इत्येवंगुरुभिःपूर्वमुपदिष्टंनृणांसदा ॥ सोहमुत्क्रम्यपंथानंशास्त्रदृष्टंसनातनं ॥ २३ ॥ अमार्गेणैवमारभ्यघोरामापदमागतः ॥ तांचापदंघोरतरांप्रवदंतिमनीषिणः ॥ २४ ॥ यदुद्यम्यमहत्कृत्यंभयादपिनिवर्त्तते ॥ अशक्तश्चैवतत्कर्तुंकर्मशक्तिबलादिह ॥ २५ ॥

॥ १२ ॥ युगांतेमिथुनराशेरंतेअतिदीप्तं ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ अनाकाशंनिरवकाशं ॥ १८ ॥ १९ ॥ अतिवर्त्यअतिक्रम्य तौतयोःकृपकृतवर्मणोर्वाक्यमितिशेषः शास्त्रदृष्टान्अवध्यत्वेनशास्त्रेज्ञातान् समतीत्यशास्त्रमुल्लंघ्य ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ देवान्अत्यगात्देवेभ्योधिकः ॥ ३३ ॥ ३४ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥

नहिदैवाद्गरीयोवैमानुषंकर्मकथ्यते ॥ मानुष्यंकुर्वतःकर्मयदिदैवान्नसिध्यति ॥ २६ ॥ सपथःप्रच्युतोधर्माद्विपदंप्रतिपद्यते ॥ प्रतिज्ञानंत्वभिज्ञानंप्रवदंतिम
नीषिणः ॥ २७ ॥ यदारभ्यक्रियांकांचिद्भयादिहनिवर्त्तते ॥ तदिदंदुष्प्रणीतेनभयंमांसमुपस्थितं ॥ २८ ॥ नहिद्रोणसुतःसंख्येनिवर्त्तेतकथंचन ॥ इदंचसुमह
द्भूतंदैवदंडमिवोद्यतं ॥ २९ ॥ नचैतदभिजानामिचिंतयन्नपिसर्वथा ॥ ध्रुवंयेयमधर्मेमेप्रवृत्ताकलुषामतिः ॥ ३० ॥ तस्याःफलमिदंघोरंप्रतिघातायकल्पते ॥
तदिदंदैवविहितंममसंख्येनिवर्त्तनं ॥ ३१ ॥ नान्यत्रदैवादुद्यंतमिहशक्यंकथंचन ॥ सोहमद्यमहादेवंप्रपद्येशरणंविभुं ॥ ३२ ॥ दैवदंडमिमंघोरंसहिमेनाशयि
ष्यति ॥ कपर्दिनंदेवदेवमुमापतिमनामयं ॥ ३३ ॥ कपालमालिनंरुद्रंभगनेत्रहरंहरं ॥ सहिदेवोत्यगाद्देवांस्तपसाविक्रमेणच ॥ तस्माच्छरणमभ्येमिगिरिशं
शूलपाणिनं ॥ ३४ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिद्रौणिचिंतायांषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥ संजयउवाच एवंसंचिंतयित्वातुद्रोण
पुत्रोविशांपते ॥ अवतीर्यरथोपस्थाद्देवेशंप्रणतःस्थितः ॥ १ ॥ द्रौणिरुवाच उग्रंस्थाणुंशिवंरुद्रंशर्वमीशानमीश्वरं ॥ गिरिशंवरदंदेवंभवंभावनमीश्व
रं ॥ २ ॥ शितिकंठमजंशुक्रंदक्षक्रतुहरंहरं ॥ विश्वरूपंविरूपाक्षंबहुरूपमुमापतिं ॥ ३ ॥ स्मशानवासिनंदृप्तंमहागणपतिंविभुं ॥ खट्वांगधारिणंरुद्रंजटिलंब्रह्मचा
रिणं ॥ ४ ॥ मनसासुविशुद्धेनदुष्करेणाल्पचेतसा ॥ सोहमात्मोपहारेणयक्ष्येत्रिपुरघातिनं ॥ ५ ॥ स्तुतंस्तुत्यंस्तूयमानममोघंकृत्तिवाससं ॥ विलोहितंनीलकं
ठमसह्यंदुर्निवारणं ॥ ६ ॥ शक्रंब्रह्मसृजंब्रह्मब्रह्मचारिणमेवच ॥ व्रतवंतंतपोनिष्ठमनंतंतपतांगतिं ॥ ७ ॥ बहुरूपंगणाध्यक्षंत्र्यक्षंपारिषदप्रियं ॥ धनाध्यक्षंक्षि
तिमुखंगौरीहृदयवल्लभं ॥ ८ ॥ कुमारपितरंपिंगंगोवृषोत्तमवाहनं ॥ तनुवाससमत्युग्रमुमाभूषणतत्परं ॥ ९ ॥ परंपरेभ्यःपरमंपरंयस्मान्नविद्यते ॥ इष्वस्त्रोत्तम
भर्त्तारंदिगंतंदेशरक्षिणं ॥ १० ॥ हिरण्यकवचंदेवंचंद्रमौलिविभूषणं ॥ प्रपद्येशरणंदेवंपरमेणसमाधिना ॥ ११ ॥ इमांचेदापदंघोरांतराम्यद्यसुदुष्करां ॥ सर्व
भूतोपहारेणयक्ष्येहंशुचिनाशुचिं ॥ १२ ॥ इतितस्यव्यवसितंज्ञात्वायोगात्सुकर्मणः ॥ पुरस्तात्कांचनीवेदीप्रादुरासीन्महात्मनः ॥ १३ ॥ तस्यांवेद्यांतदाराजंश्चि
त्रभानुरजायत ॥ सदिशोविदिशःखंचज्वालाभिरिवपूरयन् ॥ १४ ॥ दीप्तास्यनयनाश्चात्रनैकपादशिरोभुजाः ॥ रत्नचित्रांगदधराःसमुद्यतकरास्तथा ॥ १५ ॥

एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ प्लवमुखाः मंडूकवक्त्राः ॥ १७ ॥ दार्वाघाटः पक्षिविशेषः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

द्वीपशैलप्रतीकाशाः प्रादुरासन्महागणाः ॥ श्ववराहोष्ट्ररूपाश्च हयगोमायुगोमुखाः ॥ १६ ॥ ऋक्षमार्जारवदना व्याघ्रद्वीपिमुखास्तथा ॥ काकवक्त्राः प्लवमुखाः
शुकवक्त्रास्तथैव च ॥ १७ ॥ महाजगरवक्त्राश्च हंसवक्त्राः शितप्रभाः ॥ दार्वाघाटमुखाश्चापि चाषवक्त्राश्च भारत ॥ १८ ॥ कूर्मनक्रमुखाश्चैव शिशुमारमुखास्तथा ॥
महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च ॥ १९ ॥ हरिवक्त्राः क्रौंचमुखाः कपोतेभमुखास्तथा ॥ पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च ॥ २० ॥ पाणिकर्णाः सहस्रा
क्षास्तथैव च महोदराः ॥ निर्मांसाः काकवक्त्राश्च श्येनवक्त्राश्च भारत ॥ २१ ॥ तथैवाशिरसो राजन्नृक्षवक्त्राश्च भारत ॥ प्रदीप्तनेत्रजिह्वाश्च ज्वालावर्णास्तथैव च
॥ २२ ॥ ज्वालाकेशाश्च राजेंद्र ज्वलद्रोम चतुर्भुजाः ॥ मेषवक्त्रास्तथैवान्ये तथाच्छागमुखान्नृप ॥ २३ ॥ शंखाभाः शंखवक्त्राश्च शंखवर्णास्तथैव च ॥ शंखमाला
परिकराः शंखध्वनिसमस्वनाः ॥ २४ ॥ जटाधराः पंचशिखास्तथा मुंडाः कृशोदराः ॥ चतुर्दंष्ट्राश्चतुर्जिह्वाः शंकुकर्णाः किरीटिनः ॥ २५ ॥ मौंजीधराश्च राजेंद्र त
थाकुंचितमूर्धजाः ॥ उष्णीषिणो मुकुटिनश्चारुवक्त्राः स्वलंकृताः ॥ २६ ॥ पद्मोत्पलापीडधरास्तथा मुकुटधारिणः ॥ माहात्म्येन च संयुक्ताः शतशोथ सहस्रशः ॥ २७ ॥
शतघ्नीवज्रहस्ताश्च तथा मुसलपाणयः ॥ भुशुंडीपाशहस्ताश्च दंडहस्ताश्च भारत ॥ २८ ॥ पृष्ठेषु बद्धेषुधयश्चित्रबाणोत्कटास्तथा ॥ सध्वजाः सपताकाश्च सघंटाः
सपरश्वधाः ॥ २९ ॥ महापाशोद्यतकरास्तथा लगुडपाणयः ॥ स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः ॥ ३० ॥ महासर्पांगदधराश्चित्राभरणधारिणः ॥
रजोध्वजाः पंकदिग्धाः सर्वे शुक्लांबरस्रजः ॥ ३१ ॥ नीलांगाः पिंगलांगाश्च मुंडवक्त्रास्तथैव च ॥ भेरीशंखमृदंगांश्च झर्झरानकगोमुखान् ॥ ३२ ॥ अवादयन्पा
रिषदाः प्रहृष्टाः कनकप्रभाः ॥ गायमानास्तथैवान्ये नृत्यमानास्तथापरे ॥ ३३ ॥ लंघयंतः प्लवंतश्च वल्गंतश्च महारथाः ॥ धावंतो जवना मुंडाः पवनोद्धूतमूर्धजाः ॥
॥ ३४ ॥ मत्ता इव महानागा विनदंतो मुहुर्मुहुः ॥ सुभीमा घोररूपाश्च शूलपट्टिशपाणयः ॥ ३५ ॥ नानाविरागवसनाश्चित्रमाल्यानुलेपनाः ॥ रत्नचित्रांगदधराः
समुद्यतकरास्तथा ॥ ३६ ॥ हंतारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः ॥ पातारोऽसृग्वसौघानां मांसांत्रकृतभोजनाः ॥ ३७ ॥ चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठ
रोदराः ॥ अतिह्रस्वातिदीर्घाश्च प्रलंबाश्चातिभैरवाः ॥ ३८ ॥ विकटाः काललंबोष्ठा बृहच्छेफांडपिंडिकाः ॥ महार्हनानाविकटा मुंडाश्च जटिलाः परे ॥ ३९ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ बृहंतः शेफाः मेढ्राणि अंडाः वृषणाः पिंडिकाः जानुनोरधः पश्चाद्भागश्च येषां ते बृहच्छेफांडपिंडिकाः ॥ ३९ ॥

॥४०॥४१॥४२॥४३॥४४॥ चतुर्विधात्मकंसोमं अन्नरूपं लतारसरूपं अमृतरूपं चंद्रमंडलरूपंच कर्मादध्यात्माधियज्ञाधिदैवाधिलोकस्थदेवतारूपाइत्यर्थः ॥४५॥४६॥४७॥४८॥४९॥ ५०॥ ५१॥
॥५२॥५३॥ ततःसौम्येनसोमदैवत्येनमंत्रेण आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं भवावाजस्यसंगथइत्यनेनमंत्रेण आत्मानंशरीरंउपहारंहविष्यंउपाहरत्उपसादितवान् मंत्रार्थस्तु हेसोमत्वंआप्यायस्व

सार्कंदुग्रहनक्षत्रांयांकुर्युस्तेमहीतले ॥ उत्सहेरंश्चयेहंतुंभूतग्रामंचतुर्विधं ॥४०॥येचवीतभयानित्यंहरस्यभ्रुकुटीसहाः ॥ कामकारकरानित्यंत्रैलोक्यस्येश्वरेश्व
राः ॥४१॥ नित्यानंदप्रमुदितावागीशावीतमत्सराः ॥ प्राप्याष्टगुणमैश्वर्यंयेनयांस्यंतिविस्मयं ॥ ४२ ॥ येषांविस्मयतेनित्यंभगवान्कर्मभिर्हरः ॥ मनोवाक्कर्म
भिर्युक्तैर्नित्यमाराधितश्चयैः ॥ ४३ ॥ मनोवाक्कर्मभिर्भक्तान्पातिपुत्रानिवौरसान् ॥ पिबंतोसृग्वसाश्चान्येक्रुद्धाब्रह्मद्विषांसदा ॥ ४४ ॥ चतुर्विधात्मकंसोमंये
पिबंतिचसर्वदा ॥ श्रुतेनब्रह्मचर्येणतपसाचदमेनच ॥ ४५ ॥ येसमाराध्यशूलांकंभवसायुज्यमागताः ॥ यैरात्मभूतैर्भगवान्पार्वत्याचमहेश्वरः ॥ ४६ ॥ महाभू
तगणैर्भुंक्तेभूतभव्यभवत्प्रभुः ॥ नानावादित्रहसितक्ष्वेडितोत्कृष्टगर्जितैः ॥ ४७ ॥ संत्रासयंतस्तेविश्वमश्वत्थामानमभ्ययुः ॥ संस्तुवंतोमहादेवंभाःकुर्वाणाः
सुवर्चसः ॥ ४८ ॥ विवर्धयिषवोद्रौणेर्महिमानंमहात्मनः ॥ जिज्ञासमानास्तत्तेजःसौप्तिकंचदिदृक्षवः ॥ ४९ ॥ भीमोग्रपरिघालातशूलपट्टिशपाणयः ॥ घोररू
पाःसमाजग्मुर्भूतसंघाःसमंततः ॥ ५० ॥ जनयेयुर्भयंयेस्मत्रैलोक्यस्यापिदर्शनात् ॥ तान्प्रेक्ष्यमाणोपिव्यथांनचकारमहाबलः ॥ ५१ ॥ अथद्रौणिर्धनुष्पाणि
र्बद्धगोधांगुलित्रवान् ॥ स्वयमेवात्मनात्मानमुपहारमुपाहरत् ॥ ५२ ॥ धनूंषिसमिधस्तत्रपवित्राणिसिताःशराः ॥ हविरात्मवतश्चात्मातस्मिन्भारतकर्मणि
॥ ५३ ॥ ततःसौम्येनमंत्रेणद्रोणपुत्रःप्रतापवान् ॥ उपहारंमहामन्युरथात्मानमुपाहरत् ॥ ५४ ॥ तंरुद्रंरौद्रकर्माणंरौद्रैःकर्मभिरच्युतं ॥ अभिष्टुत्यमहात्मानमभि
ष्टुवाचकृतांजलिः ॥ ५५ ॥ द्रौणिरुवाच इममात्मानमद्याहंजातमांगिरसेकुले ॥ स्वग्नौजुहोमिभगवन्प्रतिगृह्णीष्वमांबलिं ॥ ५६ ॥ भवद्भक्त्यामहादे
वपरमेणसमाधिना ॥ अस्यामापदिविश्वात्मन्नुपाकुर्मितवाग्रतः ॥ ५७ ॥ त्वयिसर्वाणिभूतानिसर्वभूतेषुचासिवै ॥ गुणानांहिप्रधानानामेकत्वंत्वयितिष्ठति ॥
॥ ५८ ॥ सर्वभूताश्रयविभोहविर्भूतमवस्थितं ॥ प्रतिगृहाणमांदेवयद्यशक्याःपरेमया ॥ ५९ ॥ इत्युक्त्वाद्रौणिरास्थायतांवेदींदीप्तपावकां ॥ संत्यज्यात्मानमारु
ह्यकृष्णवर्त्मन्युपाविशत् ॥ ६० ॥ तमूर्ध्वबाहुंनिश्चेष्टंदृष्ट्वाहविरुपस्थितं ॥ अब्रवीद्भगवान्साक्षान्महादेवोहसन्निव ॥ ६१ ॥ कथंतेत्वांप्रतिविश्वतःसर्वात्मनाद्यर्थंद

[illegible]रीश्वरस्याविर्भावस्थानंशरीरंएतुप्रविशतु तत्पक्षेनशरीरेणाप्यायितस्त्वंसंगथेसंग्रामेवाजस्यवीर्यस्यदाताभव कर्मणिषष्ठी वाजंभवप्रापय अभाप्राविव्यस्यरूपं ॥५४॥५५॥५६॥५७॥५८॥५९॥६०॥६१॥

॥६१॥६२॥६४॥६५॥६६॥६७॥६८ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेसप्तमोऽध्यायः ॥७॥ ॥७॥ तथेति ॥ १ ॥ कच्चिन्नोपलक्षितावित्यत्रकच्चिदित्यावर्त्तते ॥२॥३॥पांचालैःपूर्वं

सत्यशौचार्जवत्यागैस्तपसानियमेनच॥ क्षांत्याभक्त्याचधृत्याचबुद्ध्याचवचसातथा॥६२॥ यथावदहमाराद्धःकृष्णेनाक्लिष्टकर्मणा ॥ तस्मादिष्टतमःकृष्णाद
न्योममनविद्यते॥६३॥कुर्वतातातसंमानंत्वांचजिज्ञासतामया॥पांचालाःसहसागुप्तामायाश्चबहुशःकृताः॥६४॥कृतस्तस्यैवसंमानःपांचालान्रक्षतामया॥
अभिभूतास्तुकालेननैषामद्यास्तिजीवितं॥ ६५॥ एवमुक्त्वामहात्मानंभगवानात्मनस्तनुं॥ आविवेशददौचास्मैविमलंखड्गमुत्तमं ॥ ६६॥ अथाविष्टोभगव
ताभूयोजज्वालतेजसा॥ वेगवांश्चाभवद्युद्धेदेवसृष्टेनतेजसा ॥ ६७॥ तमदृश्यानिभूतानिरक्षांसिचसमाद्रवन् ॥ अभितःशत्रुशिबिरंयांतंसाक्षादिवेश्वरं॥
॥६८॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिद्रौणिकृतशिवार्चनेसप्तमोऽध्यायः॥७॥ ॥७॥ ॥७॥ धृतराष्ट्रउवाच तथाप्रयातेशिबिरंद्रोणपुत्रे
महारथे॥ कच्चित्कृपश्चभोजश्चभयार्त्तौनव्यवर्त्तताम्॥ १ ॥ कच्चिन्नवारितौक्षुद्रैरक्षिभिर्नोपलक्षितौ॥ असह्यमितिमन्वानौननिवृत्तौमहारथौ ॥ २ ॥ कच्चिदु
न्मथ्यशिबिरंहत्वासोमकपांडवान् ॥ दुर्योधनस्यपदवींगतौपरमिकांरणे ॥ ३ ॥ पांचालैर्निहतौवीरौकच्चित्तुस्वपतांक्षितौ ॥ कच्चित्ताभ्यांकृतंकर्मतन्ममाच
क्ष्वसंजय॥४॥ संजयउवाच तस्मिन्प्रयातेशिबिरंद्रोणपुत्रेमहात्मनि॥ कृपश्चकृतवर्माचशिबिरद्वार्यतिष्ठतां॥५॥ अश्वत्थामातुतौदृष्ट्वायत्नवंतौमहार
थौ॥ प्रहृष्टःशनकैराजन्निदंवचनमब्रवीत्॥६॥ यत्तौभवंतौपर्याप्तौसर्वक्षत्रस्यनाशने॥ किंपुनर्योधशेषस्यप्रसुप्तस्यविशेषतः ॥ ७॥ अहंप्रवेक्ष्येशिबिरंच
रिष्यामिचकालवत्॥ यथानकश्चिदपिवांजीवन्मुच्येतमानवः ॥ ८॥ तथाभवद्भ्यांकार्यंस्यादितिमेनिश्चितामतिः ॥ इत्युक्त्वाप्राविशद्द्रौणिःपार्थानांशिबिरं
महत्॥ ९॥ अद्वारेणाभ्यवस्कंद्यविहायभयमात्मनः॥ सप्रविश्यमहाबाहुरुद्देशज्ञश्चतस्यह॥ १०॥ धृष्टद्युम्नस्यनिलयंशनकैरभ्युपागमत्॥ तेतुकृत्वामहत्कर्म
श्रांताश्चबलवद्रणे॥ ११ ॥ प्रसुप्ताश्चैवविध्वस्ताःसमेत्यपरिधाविताः॥ अथप्रविश्यतद्वेश्मधृष्टद्युम्नस्यभारत॥ १२॥ पांचाल्यंशयनेद्रौणिरपश्यत्सुप्तमंतिका
त्॥ क्षौमावदातेमहतिस्पर्ध्यास्तरणसंवृते॥ १३॥ माल्यप्रवरसंयुक्तेधूपैश्चूर्णैश्चवासिते॥ तंशयानंमहात्मानंविस्रब्धमकुतोभयं॥ १४॥ प्राबोधयतपादेनश
यनस्थंमहीपते॥ संबुध्यचरणस्पर्शादुत्थायरणदुर्मदः॥ १५॥ अभ्यजानदमेयात्माद्रोणपुत्रंमहारथं॥ तमुत्पतंतंशयनादश्वत्थामामहाबलः॥ १६॥

निहतौतंतौस्वपतांकच्चिन्कोपात्स्वपतांपांचालानांकर्मवधाख्यंताभ्यांकच्चित्कृतमितिसंबंधः॥४॥५॥६॥७॥वांयुवांप्राप्येतिशेषः॥८॥९॥ उद्देशज्ञःधृष्टद्युम्नस्थलज्ञः॥१०॥११॥१२॥१३॥१४॥१५॥१६॥

निद्रयाचैवपांचाल्योनाशकच्चेष्टितुंतदा ॥ तमाक्रम्यपदाराजन्कंठेचोरसिचोभयोः ॥ १७ ॥ नदंतंविस्फुरंतंचपशुमारममारयत् ॥ सबलंतेननिष्पिष्टःसाध्वसेनचभारत ॥ केशेष्वालभ्यपाणिभ्यांनिष्पिपेषमहीतले ॥ १८ ॥ तुदन्नखैस्तुसद्रौणिंनातिव्यक्तमुदाहरत् ॥ १९ ॥ आचार्यपुत्रशस्त्रेणजहिमांमाचिरंकृथाः ॥ त्वत्कृतेसुकृतान्लोकान्गच्छेयंद्विपदांवर ॥ २० ॥ एवमुक्त्वातुवचनंविरराममपरंतपः ॥ सुतःपांचालराजस्यआक्रांतोबलिनाभृशं ॥ २१ ॥ तस्याव्यक्तांतुतांवाचंसंश्रुत्यद्रौणिरब्रवीत् ॥ आचार्यघातिनांलोकानसंतिकुलपांसन ॥ २२ ॥ तस्माच्छस्त्रेणनिधनंनत्वमर्हसिदुर्मते ॥ एवंब्रुवाणस्तंवीरंसिंहोमत्तमिवद्विपं ॥ २३ ॥ मर्मस्वभ्यवधीत्क्रुद्धःपादाष्ठीलैःसुदारुणैः ॥ तस्यवीरस्यशब्देनमार्यमाणस्यवेश्मनि ॥ २४ ॥ अबुध्यंतमहाराजस्त्रियोयेचास्यरक्षिणः ॥ तेदृष्ट्वाधर्षयंतंतमतिमानुषविक्रमं ॥ २५ ॥ भूतमेवाध्यवस्यंतोनस्मप्रव्याहरन्भयात् ॥ तंतुतेनाभ्युपायेनगमयित्वायमक्षयं ॥ २६ ॥ अध्यतिष्ठत्ततेजस्वीरथंप्राप्यसुदर्शनं ॥ सतस्यभवनाद्राजन्निष्क्रम्यानादयन्दिशः ॥ २७ ॥ रथेनशिबिरंप्रायाज्जिघांसुर्द्विषतोबली ॥ अपक्रांतेततस्तस्मिन्द्रोणपुत्रेमहारथे ॥ २८ ॥ सहितैरक्षिभिःसर्वैःप्राणेदुर्योषितस्तदा ॥ राजानंनिहतंदृष्ट्वाभृशंशोकपरायणाः ॥ २९ ॥ व्याक्रोशन्क्षत्रियाःसर्वेधृष्टद्युम्नस्यभारत ॥ तासांतुतेनशब्देनसमीपेक्षत्रियर्षभाः ॥ ३० ॥ क्षिप्रंचसमनह्यंतकिमेतदितिचाब्रुवन् ॥ स्त्रियस्तुराजन्वित्रस्ताभारद्वाजंनिरीक्ष्यताः ॥ ३१ ॥ अब्रुवन्दीनकंठेनक्षिप्रमाद्रवतेतिवै ॥ राक्षसोवामनुष्योवानैनंजानीमहेवयं ॥ ३२ ॥ हत्वापांचालराजानंरथमारुह्यतिष्ठति ॥ ततस्तेयोधमुख्याश्चसहसापर्यवारयन् ॥ ३३ ॥ सतानापततःसर्वान्रुद्रास्त्रेणव्यपोथयत् ॥ धृष्टद्युम्नंचहत्वासतांश्चैवास्यपदानुगान् ॥ ३४ ॥ अपश्यच्छयनेसुप्तमुत्तमौजसमंतिके ॥ तमप्याक्रम्यपादेनकंठेचोरसितेजसा ॥ ३५ ॥ तथैवमारयामासविनर्दंतमरिंदमं ॥ युधामन्युश्चसंप्राप्तोमत्वातंरक्षसाहतं ॥ ३६ ॥ गदामुद्यम्यवेगेनहृदिद्रौणिमताडयत् ॥ तमभिद्रुत्यजग्राहक्षितौचैनमपातयत् ॥ ३७ ॥ विस्फुरंतंचपशुवत्तथैवैनममारयत् ॥ तथासवीरोहत्वातंततोन्यान्समुपाद्रवत् ॥ ३८ ॥ संसुप्तानेवराजेंद्रतत्रतत्रमहारथान् ॥ स्फुरतोवेपमानांश्चशमितेवपशून्मखे ॥ ३९ ॥ ततोनिस्त्रिंशमादायजघानान्यान्पृथक्पृथक् ॥ भागशोविचरन्मार्गानसियुद्धविशारदः ॥ ४० ॥

॥ ४१ ॥ ४२ ॥ तैश्छिन्नगात्रैः विस्फुरद्भिः तेषांशरीराद्रुच्छलद्भीरक्तबिंदुभिरित्यर्थः असेः शोणितार्द्रस्य उद्यमनात्मुष्टिद्वारालोहितधाराबाहुमूलमायातियत्रासिः क्षिप्यतेततोपिस्थानात्रक्तबिंदवउच्छलंतिते

तथैवगुल्मेसंत्रस्यशयानानमध्यमौल्मिकान् ॥ श्रांतान्व्यस्तायुधान्सर्वान्क्षणेनैवव्यपोथयत् ॥ ४१ ॥ योधानश्वान्द्विपांश्चैवप्राच्छिनत्सवरासिना ॥ रुधिरोक्षितसर्वांगः कालसृष्टइवांतकः ॥ ४२ ॥ विस्फुरद्भिश्चतैर्द्रौणिर्निस्त्रिंशस्योद्यमेनच ॥ आक्षेपणेनचैवासेस्त्रिधारक्तोक्षितोभवत् ॥ ४३ ॥ तस्यलोहितरक्तस्यदीप्तखड्गस्ययुध्यतः ॥ अमानुषइवाकारोबभौपरमभीषणः ॥ ४४ ॥ येत्वजाग्रंतकौरव्यतेपिशब्देनमोहिताः ॥ निरीक्ष्यमाणाअन्योन्यंदृष्ट्वादृष्ट्वाप्रविव्यथुः ॥ ४५ ॥ तद्रूपंतस्यतेदृष्ट्वाक्षत्रियाःशत्रुकर्षिणः ॥ राक्षसंमन्यमानास्तंनयनानिन्यमीलयन् ॥ ४६ ॥ सघोररूपोव्यचरत्कालवच्छिबिरेततः ॥ अपश्यद्द्रौपदीपुत्रानवशिष्टांश्चसोमकान् ॥ ४७ ॥ तेनशब्देनवित्रस्ताधनुर्हस्तामहारथाः ॥ धृष्टद्युम्नंहतंश्रुत्वाद्रौपदेयाविशांपते ॥ ४८ ॥ अवाकिरन्शरव्रातैर्भारद्वाजमभीतवत् ॥ ततस्तेननिनादेनसंप्रबुद्धाःप्रभद्रकाः ॥ ४९ ॥ शिलीमुखैःशिखंडीचद्रोणपुत्रंसमार्दयन् ॥ भारद्वाजःसतान्दृष्ट्वाशरवर्षाणिवर्षतः ॥ ५० ॥ ननादबलवन्नादंजिघांसुस्तान्महारथान् ॥ ततःपरमसंक्रुद्धःपितुर्वधमनुस्मरन् ॥ ५१ ॥ अवरुह्यरथोपस्थात्त्वरमाणोभिदुद्रुवे ॥ सहस्रचंद्रविमलंगृहीत्वाचर्मसंयुगे ॥ ५२ ॥ खड्गंचविमलंदिव्यंजातरूपपरिष्कृतं ॥ द्रौपदेयानभिद्रुत्यखड्गेनव्यधमद्बली ॥ ५३ ॥ ततःसनरशार्दूलःप्रतिविंध्यंमहाहवे ॥ कुक्षिदेशेवधीद्राजन्सहतोन्यपतद्भुवि ॥ ५४ ॥ प्रासेनविध्वाद्रौणिंतुसुतसोमःप्रतापवान् ॥ पुनश्चासिंसमुद्यम्यद्रोणपुत्रमुपाद्रवत् ॥ ५५ ॥ सुतसोमस्यसासिंतंबाहुंछित्वानरर्षभ ॥ पुनरप्याहनत्पार्श्वेसभिन्नहृदयोपतत् ॥ ५६ ॥ नाकुलिस्तुशतानीकोरथचक्रेणवीर्यवान् ॥ दोर्भ्यामुत्क्षिप्यवेगेनवक्षस्येनमताडयत् ॥ ५७ ॥ अताडयच्छतानीकंमुक्तचक्रंद्विजस्तुसः ॥ सविह्वलोययौभूमिंततोस्यापाहरच्छिरः ॥ ५८ ॥ श्रुतकर्मातुपरिघंगृहीत्वासमताडयत् ॥ अभिद्रुत्यययौद्रौणिंसव्येसफलकेभृशं ॥ ५९ ॥ सतुतंश्रुतकर्माणमास्येजघ्नेवरासिना ॥ सहतोन्यपतद्भूमौविमूढोविकृताननः ॥ ६० ॥ तेनशब्देनवीरस्तुश्रुतकीर्तिर्महारथः ॥ अश्वत्थामानमासाद्यशरवर्षैरवाकिरत् ॥ ६१ ॥ तस्यापिशरवर्षाणिचर्मणाप्रतिवार्यसः ॥ सकुंडलंशिरःकायात्भ्राजमानमुपाहरत् ॥ ६२ ॥

त्रिभिःप्रकारैरेवरक्तोक्षितोनतुस्वदेहस्यान्येनप्रहारादित्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ फलकेऽताडयदित्यन्वयः ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ पांडुसंजयान् पांडवसंबंधिनः संजयान् पांडोर्गोत्रापत्यानिस्तं

ततोभीष्मनिहंतारंसहसर्वैःप्रभद्रकैः ॥ आहनत्सर्वतोवीरंनानाप्रहरणैर्बली ॥ ६३ ॥ शिलीमुखेनचान्येनभ्रुवोर्मध्येसमार्पयत् ॥ सतुक्रोधसमाविष्टोद्रोणपुत्रो महाबलः ॥ ६४ ॥ शिखंडिनंसमासाद्यद्विधाचिच्छेदसोसिना ॥ शिखंडिनंततोहत्वाक्रोधाविष्टःपरंतपः ॥ ६५ ॥ प्रभद्रकगणान्सर्वानभिदुद्राववेगवान् ॥ यच्च शिष्टंविराटस्यबलंतुभृशमाद्रवत् ॥ ६६ ॥ द्रुपदस्यचपुत्राणांपौत्राणांसुहृदामपि ॥ चकारकदनंघोरंदृष्ट्वादृष्ट्वामहाबलः ॥ ६७ ॥ अन्यानन्यांश्चपुरुषानभिसृत्याभिसृत्यच ॥ न्यकृंतदसिनाद्रौणिरसिमार्गविशारदः ॥ ६८ ॥ कालींरक्तास्यनयनांरक्तमाल्यानुलेपनां ॥ रक्तांबरधरामेकांपाशहस्तांकुटुंबिनीं ॥ ६९ ॥ ददृशुःकालरात्रिंतेगायमानामवस्थितां ॥ नराश्वकुंजरान्पाशैर्बध्वाघोरैःप्रतस्थुषीं ॥ ७० ॥ वहंतींविविधान्प्रेतान्पाशबद्धान्विमूर्धजान् ॥ तथैवचसदाराजन्न्यस्तशस्त्रान्महारथान् ॥ ७१ ॥ स्वप्नेसुप्तान्नयंतींतांरात्रिष्वन्यासुमारिष ॥ ददृशुर्योधमुख्यास्तेघ्नंतंद्रौणिंचसर्वदा ॥ ७२ ॥ यतःप्रभृतिसंग्रामःकुरुपांडवसेनयोः ॥ ततःप्रभृतितांकन्यामपश्यन्द्रौणिमेवच ॥ ७३ ॥ तांस्तुदैवहतान्पूर्वंपश्चाद्द्रौणिर्व्यपातयत् ॥ त्रासयन्सर्वभूतानिविनदन्भैरवान्रवान् ॥ ७४ ॥ तदनुस्मृत्यतेवीरादर्शनंपूर्वकालिकं ॥ इदंतदित्यमन्यंतदैवेनोपनिपीडिताः ॥ ७५ ॥ ततस्तेननिनादेनप्रत्यबुध्यंतधन्विनः ॥ शिबिरेपांडवेयानांशतशोथसहस्रशः ॥ ७६ ॥ सोच्छिनत्कस्यचित्पादौजघनंचैवकस्यचित् ॥ कांश्चिद्बिभेदपार्श्वेषुकालसृष्टइवांतकः ॥ ७७ ॥ अत्युग्रप्रतिपिष्टैश्चनदद्भिश्चभृशोत्कटैः ॥ गजाश्वमथितैश्चान्यैर्मही कीर्णाभवत्प्रभो ॥ ७८ ॥ क्रोशतांकिमिदंकोयंकःशब्दःकिंनुकिंकृतं ॥ एवंतेषांतथाद्रौणिरंतकःसमपद्यत ॥ ७९ ॥ अपेतशस्त्रसन्नाहान्संनद्धान्पांडुसृंजयान् ॥ प्राहिणोन्मृत्युलोकायद्रौणिःप्रहरतांवरः ॥ ८० ॥ ततस्तच्छस्त्रवित्रस्ताउत्पतंतोभयातुराः ॥ निद्रांधानष्टसंज्ञाश्चतत्रतत्रनिलिल्यिरे ॥ ८१ ॥ ऊरुस्तंभगृहीताश्चकश्मलाभिहतौजसः ॥ विनदंतोभृशंत्रस्ताःसमासीदन्परस्परं ॥ ८२ ॥ ततोरथंपुनर्द्रौणिरास्थितोभीमनिःस्वनं ॥ धनुष्पाणिःशरैरन्यान्प्रेषयद्वैयमक्षयं ॥ ८३ ॥ पुनरुत्पततश्चापिदूरादपिनरोत्तमान् ॥ शूरान्संपततश्चान्यान्कालरात्र्यैन्यवेदयत् ॥ ८४ ॥ तथैवस्यंदनाग्रेणप्रमथन्सविधावति ॥ शरवर्षैश्चविविधैरवर्षच्छात्रवांस्ततः ॥ ८५ ॥ पुनश्चसुविचित्रेणशतचंद्रेणचर्मणा ॥ तेनचाकाशवर्णेनतथाचरत्सोसिना ॥ ८६

जयाश्चतान्वा ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥

॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ अभंजन्गात्राण्यनमयन् अमृद्नन्परस्परंमर्दितवंतः ॥ ९९ ॥ अपिषन्अपिंषन् ॥ १०० ॥ १ ॥ कांदिशी

तथासशिबिरंतेषांद्रौणिराहवदुर्मदः ॥ व्यक्षोभयतराजेंद्रमहाह्रदमिवद्विपः ॥ ८७ ॥ उत्पेतुस्तेनशब्देनयोधाराजन्विचेतसः ॥ निद्रार्त्ताश्चभयार्त्ताश्चव्यधावंत ततस्ततः ॥ ८८ ॥ विस्वरंचुक्रुशुश्चान्येबह्वबद्धंतथावदन् ॥ नचस्मप्रत्यपद्यंतशस्त्राणिवसनानिच ॥ ८९ ॥ विमुक्तकेशाश्चाप्यन्येनाभ्यजानन्परस्परं ॥ उत्पतंतोऽपतन्श्रांताःकेचित्तत्राभ्रमंस्तदा ॥ ९० ॥ पुरीषमसृजन्केचित्केचिन्मूत्रंप्रसुस्रुवुः ॥ बंधनानिचराजेंद्रसंछिद्यतुरगाद्विपाः ॥ ९१ ॥ समंपर्यपतंश्चान्येकुर्वंतोमहदाकुलं ॥ तत्रकेचिन्नराभीताव्यलीयंतमहीतले ॥ ९२ ॥ तथैवतान्निपतितानपिंषन्गजवाजिनः ॥ तस्मिंस्तथावर्त्तमानेरक्षांसिपुरुषर्षभ ॥ ९३ ॥ दृष्टानिव्यनदन्नुच्चैर्मुदाभरतसत्तम ॥ सशब्दःपूरितोराजन्भूतसंघैर्मुदायुतैः ॥ ९४ ॥ अपूरयद्दिशःसर्वादिवंचातिमहान्स्वनः ॥ तेषामार्त्तरवंश्रुत्वावित्रस्तागजवाजिनः ॥ ९५ ॥ मुक्ताःपर्यपतन्राजन्मृद्नंतःशिबिरेजनं ॥ तैस्तत्रपरिधावद्भिश्चरणोदीरितंरजः ॥ ९६ ॥ अकरोच्छिबिरेतेषांरजन्यांद्विगुणंतमः ॥ तस्मिंस्तमसिसंजाते प्रमूढाःसर्वतोजनाः ॥ ९७ ॥ नाजानन्पितरःपुत्रान्भ्रातॄन्भ्रातरएवच ॥ गजोगजानतिक्रम्यनिर्मनुष्याहयाहयान् ॥ ९८ अताडयंस्तथाऽभंजंस्तथाऽमृद्नंश्च भारत ॥ तेभग्नाःप्रपतंतिस्मनिघ्नंतश्चपरस्परं ॥ ९९ ॥ न्यपातयंस्तथाचान्यान्पातयित्वातदाऽपिषन् ॥ विचेतसःसनिद्राश्चतमसाचावृतानराः ॥ १०० ॥ जघ्नुः स्वानेवतत्राथकालेनैवप्रचोदिताः ॥ त्यक्त्वाद्वाराणिचद्वास्थास्तथागुल्मानिगौल्मिकाः ॥ १ ॥ प्राद्रवंतयथाशक्तिकांदिशीकाविचेतसः ॥ विप्रनष्टाश्चतेन्योन्यंनाजानंतस्तथाविभो ॥ २ ॥ क्रोशंतस्तातपुत्रेतिदैवोपहतचेतसः ॥ पलायतांदिशस्तेषांस्वानप्युत्सृज्यबांधवान् ॥ ३ ॥ गोत्रनामभिरन्योन्यमाक्रंदंततोजनाः ॥ हाहाकारंचकुर्वाणाःपृथिव्यांशेरतेपरे ॥ ४ ॥ तान्बुध्वारणमध्येसौद्रोणपुत्रोन्यवारयत् ॥ तत्रापरेवध्यमानामुहुर्मुहुरचेतसः ॥ ५ ॥ शिबिरंनिष्पतंतिस्मक्षत्रियाभयपीडिताः ॥ तांस्तुनिष्पतितांस्त्रस्तान्शिबिराज्जीवितैषिणः ॥ ६ ॥ कृतवर्माकृपश्चैवद्वारदेशेनिजघ्नतुः ॥ विस्रस्तयंत्रकवचान्मुक्तकेशान्कृतांजलीन् ॥ ७ ॥ वेपमानान्क्षितौभीतान्नैवकांश्चिदमुच्यतां ॥ नामुच्यततयोःकश्चिन्निष्क्रांतःशिबिराद्बहिः ॥ ८ ॥ कृपश्चैवमहाराजहार्दिक्यश्चैवदुर्मतिः ॥ भूयश्चैवचिकीर्षंतौद्रोणपुत्रस्यतौप्रियं ॥ ९ ॥ त्रिषुदेशेषुददतुःशिबिरस्यहुताशनं ॥ ततःप्रकाशेशिबिरेखड्गेनपितृनंदनः ॥ ११० ॥

काःभयद्रुताः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ १२० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ १३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ १३५ ॥

काश्चिद्योधान्सखड्गेनमध्येसं
अश्वत्थामामहाराजव्यचरल्लघुहस्तवत् ॥ काश्चिदाधावततोवीरानपरांश्चैवधावतः ॥ ११ ॥ व्ययोजयतखड्गेनप्राणैर्द्विजवरोत्तमः ॥
छिद्यवीर्यवान् ॥ १२ ॥ अपातयद्द्रोणपुत्रःसंरब्धस्तिलकांडवत् ॥ निनदद्भिर्भृशायस्तैर्नराश्वद्विरदोत्तमैः ॥ १३ ॥ पतितैरभवत्कीर्णामेदिनीभरतर्षभ ॥ मानुषा
णांसहस्रेषुहतेषुपतितेषुच ॥ १४ ॥ उदतिष्ठन्कबंधानिबहून्युत्थायचापतन् ॥ सायुधान्सांगदान्बाहून्विचकर्त्तशिरांसिच ॥ १५ ॥ हस्तिहस्तोपमानूरून्हस्तान्पा
दांश्चभारत ॥ पृष्ठछिन्नान्पार्श्वछिन्नान्शिरश्छिन्नांस्तथापरान् ॥ १६ ॥ समहात्माकरोद्द्रौणिःकांश्चिच्चापिपराङ्मुखान् ॥ मध्यदेशेनरानन्यान्चिच्छेदा
न्यांश्चकर्णतः ॥ १७ ॥ अंसदेशेनिहत्यान्यान्कायेप्रावेशयच्छिरः ॥ एवंविचरतस्तस्यनिघ्नतःसुबहून्नरान् ॥ १८ ॥ तमसारजनीघोराबभौदारुणदर्शना ॥ किं
चित्प्राणैश्चपुरुषैर्हतैश्चान्यैःसहस्रशः ॥ १९ ॥ बहुनाचगजाश्वेनभूरभूद्भीमदर्शना ॥ यक्षरक्षःसमाकीर्णेरथाश्वद्विपदारुणे ॥ १२० ॥ क्रुद्धेनद्रोणपुत्रेणसंछ
न्नाःप्रापतन्भुवि ॥ भ्रातॄनन्येपितॄनन्येपुत्रानन्येविचुक्रुशुः ॥ २१ ॥ केचिदूचुर्नतत्क्रुद्धैर्धार्त्तराष्ट्रैःकृतंरणे ॥ यत्कृतंनःप्रसुप्तानांरक्षोभिःक्रूरकर्मभिः ॥ २२ ॥ अ
सान्निध्याद्धिपार्थानामिदंवःकदनंकृतं ॥ नचासुरैर्नगंधर्वैर्नयक्षैर्नचराक्षसैः ॥ २३ ॥ शक्योविजेतुंकौंतेयोगोप्तायस्यजनार्दनः ॥ ब्रह्मण्यःसत्यवाग्दांतःसर्व
भूतानुकंपकः ॥ २४ ॥ नचसुप्तंप्रमत्तंवान्यस्तशस्त्रंकृतांजलिं ॥ धावंतंमुक्तकेशंवाहंतिपार्थोधनंजयः ॥ २५ ॥ तदिदंनःकृतंघोरंरक्षोभिःक्रूरकर्मभिः ॥ इतिला
लप्यमानाःस्मशेरतेबहवोजनाः ॥ २६ ॥ स्तनतांचमनुष्याणामपरेषांचकूजतां ॥ ततोमुहूर्त्तात्प्राशाम्यत्सशब्दस्तुमुलोमहान् ॥ २७ ॥ शोणितव्यतिषिक्तायां
वसुधायांचभूमिप ॥ तद्रजस्तुमुलंघोरंक्षणेनांतरधीयत ॥ २८ ॥ सचेष्टमानानुद्विग्नान्निरुत्साहान्सहस्रशः ॥ न्यपातयन्नरान्क्रुद्धःपशून्पशुपतिर्यथा ॥ २९ ॥
अन्योन्यंसंपरिष्वज्यशयानान्द्रवतोपरान् ॥ संलीनान्युध्यमानांश्चसर्वान्द्रौणिरपोथयत् ॥ १३० ॥ दह्यमानाहुताशेनवध्यमानाश्चतेनते ॥ परस्परंतदायोधान्
नयद्यमसादनं ॥ ३१ ॥ तस्यारजन्यास्त्वर्द्धेनपांडवानांमहद्बलं ॥ गमयामासराजेंद्रद्रौणिर्यमनिवेशनं ॥ ३२ ॥ निशाचराणांसत्त्वानांरात्रिःसाहर्षवर्द्धिनी ॥
आसीन्नरगजाश्वानांरौद्रीक्षयकरीभृशं ॥ ३३ ॥ तत्राहृश्यंतरक्षांसिपिशाचाश्चपृथग्विधाः ॥ खादंतोनरमांसानिपिबंतःशोणितानिच ॥ ३४ ॥ करालाःपिं
गलाश्चैवशैलदंतारजस्वलाः ॥ जटिलादीर्घशंखाश्चपंचपादामहोदराः ॥ १३५ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ गृध्राशिताः गृध्रसंतर्पिताः इत्यपाठेअसगतिदीप्यादानेष्वित्यस्यवारूपं भृशंउद्दीपिताइत्यर्थः ॥ ३९ ॥ विकुक्षिकाः विपुलकुक्षयः ॥ १४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

॥ ३६ ॥ सपुत्रदाराःसुक्रूराःसुदुर्दर्शाःसुनिर्घृणाः ॥ विविधानिचरूपाणित
[illegible]विरूपाभैरवस्वनाः ॥ घंटाजालावसक्ताश्चनीलकंठाविभीषणाः ॥
॥ ३८ ॥ मेदोमज्जास्थिरक्तानांवसानांचभृशाशि
इदंपरमिदंमेध्यमिदंस्वाद्वितिचाब्रुवन् ॥
त्रा[illegible]तरक्षसां ॥ ३७ ॥ पीत्वाचशोणितंहृष्टाप्रानृत्यन्गणशोपरे ॥
नानावक्त्रास्तथारौद्राःक्रव्यादाःपिशिताशनाः ॥ १४० ॥
ताः ॥ परमांसानिखादंतःक्रव्यादामांसजीविनः ॥ ३९ ॥ वसाश्चैवापरेपीत्वापर्यधावन्विकुक्षिकाः ॥
मुदितानांवितृप्तानांतस्मिन्महतिवैशसे ॥ समेतानिवहून्यासन्भूतानि
अयुतानिचतत्रासन्प्रयुतान्यर्बुदानिच ॥ रक्षसांघोररूपाणांमहतांक्रूरकर्मणां ॥ ४१ ॥
नृशोणितावसिक्तस्यद्रौणेरासीदसित्सरुः ॥ ४३ ॥ पाणिनासहसंश्लिष्टएकीभूतइवप्रभो ॥ दुर्ग
चजनाधिप ॥ ४२ ॥ प्रत्यूषकालेशिबिरात्प्रतिगंतुमियेषसः ॥
दुर्गमांपदवींगच्छन्पितु
मांपदवींगत्वाविरराजजनक्षये ॥ ४४ ॥ युगांतेसर्वभूतानिभस्मकृत्वेवपावकः ॥ [illegible]तत्कर्मकृत्वाद्रौणायनिःप्रभो ॥ ४५ ॥
तथैवहत्वानिःशब्देनिश्चक्राम[illegible] ॥ [illegible]शिबिरात्तस्मात्ताभ्यांसंगम्यवीर्यवान् ॥
रासीद्गतज्वरः ॥ यथैवसंसुप्तजनेशिबिरेप्राविशन्निशि ॥ ४६ ॥
पांचालान्सृंजयांश्चैवविनिकृत्तान्सहस्रशः ॥ प्रीत्याचोच्चैरु
॥ ४७ ॥ आचख्यौकर्मतत्सर्वंहृष्टःसंहर्षयन्विभो ॥ तावथाचख्यतुस्तस्मैप्रियं[illegible] ॥ ४८ ॥
असंशयंहिकालस्यप
दक्रोशंस्तथैवास्फोटयंस्तलान् ॥ ४९ ॥ एवंविधाहिसारात्रिःसोमकानांजनक्षये ॥ प्रसुप्तानांप्रम[illegible]सीत्सुभृशदारुणा ॥ १५० ॥
धृतराष्ट्रउवाच प्रागेवसुमहत्कर्मद्रौणिरेतन्महारथः ॥ नाकरोदीदृशंकस्मान्मत्पुत्र
र्यायोदुरतिक्रमः ॥ तादृशानिहतायत्रकृत्वास्माकंजनक्षयं ॥ ५१ ॥
संजयउवाच तेषांनूनंभयान्नासौकृतवान्कु
विजयेधृतः ॥ ५२ ॥ अथकस्माद्धतेक्षुद्रेकर्मेदंकृतवानसौ ॥ द्रोणपुत्रोमहात्मासतन्मेशंसितुमर्हसि ॥ ५३ ॥
कोहितेषांसमक्षंतान्हन्यादपिमरुत्पतिः ॥ ५५ ॥ एत
रुनंदन ॥ असान्निध्याद्धिपार्थानांकेशवस्यचधीमतः ॥ ५४ ॥ सात्यकेश्चापिकर्मेदंद्रोणपुत्रेणसाधितं ॥
दिष्ट्यादिष्ट्यैवचान्योन्यंसमेत्योचुर्महारथाः ॥ पर्यष्वजत्ततोद्रौणिस्ताभ्यांस
दीदृशंकृत्तंराजन्सुप्तजनेविभो ॥ ततोजनक्षयंकृत्वापांडवानांमहात्ययं ॥ ५६ ॥
प्रतिनंदितः ॥ ५७ ॥ इदंहर्षात्तुसुमहदाददेवाक्यमुत्तमं ॥ पांचालानिहताःसर्वेद्रौपदेयाश्चसर्वशः ॥ ५८ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ १५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

॥ ११ ॥

सोमकामत्स्यशेषाश्चसर्वैवविनिहतामया ॥ इदानींकृतकृत्याःस्मयामतत्रैवमाचिरं ॥ यदिजीवतिनोराजातस्मैशंसामहेवयं ॥ १५९ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिरात्रियुद्धेपांचालादिवधेऽष्टमोध्यायः ॥ ८ ॥ ॥ ९ ॥ ॥ ९ ॥ संजयउवाच तेहत्वासर्वपांचालान्द्रौपदेयांश्चसर्वशः ॥ आगच्छन्सहितास्तत्रयत्रदुर्योधनोहतः ॥ १ ॥ गत्वाचैनमपश्यंतकिंचित्प्राणंजनाधिपं ॥ ततोरथेभ्यःप्रस्कंद्यपरिवव्रुस्तवात्मजं ॥ २ ॥ तंभग्नसक्थंराजेंद्रकृच्छ्रप्राणमचेतसं ॥ वमंतंरुधिरंवक्त्रादपश्यन्वसुधातले ॥ ३ ॥ वृतंसमंताद्बहुभिःश्वापदैर्घोरदर्शनैः ॥ शालावृकगणैश्चैवभक्षयिष्यद्भिरंतिकात् ॥ ४ ॥ निवारयंतंकृच्छ्रात्तान्श्वापदांश्चचिरवादिषून् ॥ विचेष्टमानंमत्यांचसुभृशंगाढवेदनं ॥ ५ ॥ तंशयानंतथादृष्ट्वाभूमौसुरुधिरोक्षितं ॥ हतशिष्टास्त्रयोवीराःशोकार्त्ताःपर्यवारयन् ॥ ६ ॥ अश्वत्थामाकृपश्चैवकृतवर्माचसात्वतः ॥ तैस्त्रिभिःशोणितादिग्धैर्निःश्वसद्भिर्महारथैः ॥ ७ ॥ शुशुभेसवृतोराजावेदीत्रिभिरिवाग्निभिः ॥ तेतंशयानंसंप्रेक्ष्यराजानमतथोचितं ॥ ८ ॥ अविषह्येनदुःखेनततस्तेरुरुदुस्त्रयः ॥ ततस्तुरुधिरंहस्तैर्मुखान्निर्मृज्यतस्यहि ॥ रणेराज्ञःशयानस्यकृपणंपर्यदेवयन् ॥ ९ ॥ कृपउवाच नदैवस्यातिभारोस्तियदयंरुधिरोक्षितः ॥ एकादशचमूभर्त्ताशेतेदुर्योधनोहतः ॥ १० ॥ पश्यचामीकराभस्यचामीकरविभूषितां ॥ गदांगदाप्रियस्येमांसमीपेपतितांभुवि ॥ ११ ॥ इयमेनंगदाशूरंनजहातिरणेरणे ॥ स्वर्गायापिव्रजंतंहिनजहातियशस्विनं ॥ १२ ॥ पश्येमांसहवीरेणजांबूनदविभूषितां ॥ शयानांशयनेहर्म्येभार्यांप्रीतिमतीमिव ॥ १३ ॥ योयंमूर्धाभिषिक्तानामग्रेजातःपरंतपः ॥ सहतोग्रसतेपांसून्पश्यकालस्यपर्ययं ॥ १४ ॥ येनाजौनिहताभूमावशेरतहतद्विषः ॥ सभूमौनिहतःशेतेकुरुराजःपरैरयं ॥ १५ ॥ भयान्नमंतिराजानोयस्यस्मशतसंघशः ॥ सवीरशयनेशेतेक्रव्याद्भिःपरिवारितः ॥ १६ ॥ उपासतद्विजाःपूर्वमर्थहेतोर्यमीश्वरं ॥ उपासतेचतंत्वद्यक्रव्यादामांसहेतवः ॥ १७ ॥ संजयउवाच तंशयानंकुरुश्रेष्ठंततोभरतसत्तम ॥ अश्वत्थामासमालोक्यकरुणंपर्यदेवयत् ॥ १८ ॥ आहुस्त्वांराजशार्दूलमुख्यंसर्वधनुष्मतां ॥ धनाध्यक्षोपमंयुद्धेशिष्यंसंकर्षणस्यच ॥ १९ ॥ कथंविवरमद्राक्षीद्भीमसेनस्तवानघ ॥ बलिनःकृतिनःनित्यंसचपापात्मवान्नृप ॥ २० ॥ कालोनूनंमहाराजलोकेस्मिन्बलवत्तरः ॥ पश्यामोनिहतंत्वांचभीमसेनेनसंयुगे ॥ २१ ॥

॥ ११ ॥

गदयाभीमसेनेननिर्भयेस कथंवाकर्तर्वधर्मज्ञंसुदुःखापोदृकोदरः ॥ निकृत्याहतवान्मंदोनूनंकालोदुरत्ययः ॥ २२ ॥ धर्मयुद्धेह्यधर्मेणसमाहूयौजसामृधे ॥ यउपेक्षितवान्क्षुद्रंधिकृष्णंधिग्युधिष्ठिरं ॥ २४ ॥ युद्धेष्वपवदिष्यंतियोधानूनंवृकोदरं ॥ यत्किथ्यनीतव ॥ २३ ॥ अधर्मेणहतस्याजौमृध्यमानंपदाशिरः ॥ ननुरामोब्रवीद्राजंस्त्वांसदायदुनंदनः ॥ दुर्योधनसमोनास्तिगदयाइतिवीर्यवान् ॥ २६ ॥ श्लाघतेत्वांहि वत्स्यास्यंतिभूतानिनिकृत्यात्वसिपातितः ॥ २५ ॥ सशिष्योममकौरव्योगदायुद्धइतिप्रभो ॥ २७ ॥ यांगतिंक्षत्रियस्याहुःप्रशस्तांपरमर्षयः ॥ हतस्याभिमुखस्याजौप्राप्तस्त्वमसि वार्ष्णेयोराजन्संसत्सुभारत ॥ [illegible] विचरिष्येतेशोचंतौपृथिवीमिमां ॥ धिगस्तु तांगतिं ॥ २८ ॥ दुर्योधननशोचामित्वामहंपुरुषर्षभ ॥ हतपुत्रौतुशोचामिगांधारीं[illegible] ॥ ३१ ॥ कथंदुर्योधनोस्माभिर्हतश्च त्वांवार्ष्णेयमर्जुनंचापिदुर्मतिं ॥ ३० ॥ धर्मज्ञमानिनौयौत्वांवध्यमानमुपेक्षतां ॥ पांडवाश्चापितेसर्वेकिंवक्ष्यंतिनराधिप ॥ ३१ ॥ कथंदुर्योधनोस्माभिर्हतइत्य नपत्रपाः ॥ धन्यस्त्वमसिगांधारेयस्त्वमायोधनेहतः ॥ ३२ ॥ प्रायशो[illegible]तपुत्राहिगांधारीनिहतज्ञातिबांधवा ॥ ३३ ॥ प्रज्ञाच क्षुश्चदुर्धर्षःकांगतिंप्रतिपत्स्यते ॥ धिगस्तुकृतवर्माणंमांकृपंचमहारथं ॥ ३४ ॥ येवयंनगताःस्वर्गंत्वांपुरस्कृत्यपार्थिवं ॥ दातारंसर्वकामानांरक्षितारंप्रजाहितं ॥ ३५ ॥ यद्वयंनानुगच्छामत्वांधिगस्मान्नराधमान् ॥ कृपस्यतववीर्येणममचैवपितुश्चमे ॥ ३६ ॥ सभृत्यानांनरव्याघ्ररत्नवंतिगृहाणिच ॥ त्वत्प्रसादादस्मा भिःसमित्रैःसहबांधवैः ॥ ३७ ॥ अवाप्ताःक्रतवोमुख्यावहवोभूरिदक्षिणाः ॥ कुतश्चापीदृशंपापाःप्रवर्तिष्यामहेवयं ॥ ३८ ॥ यादृशेनपुरस्कृत्यत्वंगतःसर्वपा र्थिवान् ॥ वयमेवत्रयोराजन्गच्छंतंपरमांगतिं ॥ ३९ ॥ यद्वैत्वांनानुगच्छामस्तेनधक्ष्यामहेवयं ॥ तत्स्वर्गहीनाहीनार्थाःस्मरंतःसुकृतस्यते ॥ ४० ॥ किंनामतद्भवेत्कर्मयेनत्वांनव्रजामवै ॥ दुःखंनूनंकुरुश्रेष्ठचरिष्याममहीमिमां ॥ ४१ ॥ हीनानांनस्त्वयाराजन्कुतःशांतिःकुतःसुखं ॥ गत्वैवतुमहाराजसमेत्यचमहारथा न् ॥ ४२ ॥ यथाज्येष्ठंयथाश्रेष्ठंपूजयेर्वचनान्मम ॥ आचार्यंपूजयित्वाचकेतुंसर्वधनुष्मतां ॥ ४३ ॥ हतंमयाद्यशंसेथाधृष्टद्युम्नंनराधिप ॥ परिष्वजेथाराजानंबा ह्लिकंसुमहारथं ॥ ४४ ॥ सैंधवंसोमदत्तंचभूरिश्रवसमेवच ॥ तथापूर्वगतानन्यान्स्वर्गेपार्थिवसत्तमान् ॥ ४५ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥

॥ १२ ॥

अस्मद्वाक्यात्परिष्वज्यसंपृच्छेस्त्वमनामयं ॥ ४६ ॥ संजयउवाच इत्येवमुक्त्वाराजानंभग्नसक्थमचेतनं ॥ अश्वत्थामासमुद्वीक्ष्यपुनर्वचनमब्रवीत् ॥ ॥ ४७ ॥ दुर्योधनजीवसित्वंवाक्यंश्रोत्रसुखंश्रृणु ॥ सप्तपांडवतःशेषाधार्त्तराष्ट्रांस्त्रयोवयं ॥ ४८ ॥ तेचैवभ्रातरःपंचवासुदेवोथसात्यकिः ॥ अहंचकृतवर्माचकृपःशारद्वतस्तथा ॥ ४९ ॥ द्रौपदेयाहताःसर्वेधृष्टद्युम्नस्यचात्मजाः ॥ पांचालानिहताःसर्वेमत्स्यशेषंचभारत ॥ ५० ॥ कृतेप्रतिकृतंपश्यहतपुत्राहिपांडवाः ॥ सौप्तिकेशिबिरंतेषांहतंसनरवाहनं ॥ ५१ ॥ मयाचपापकर्मासौधृष्टद्युम्नोमहीपते ॥ प्रविश्यशिबिरंरात्रौपशुमारेणमारितः ॥ ५२ ॥ दुर्योधनस्तुतांवाचंनिशम्यमनसःप्रियां ॥ प्रतिलभ्यपुनश्चेतइदंवचनमब्रवीत् ॥ ५३ ॥ नमेकरोत्तद्गांगेयोनकर्णोनचतेपिता ॥ यत्त्वयाकृपभोजाभ्यांसहितेनाद्यमेकृतं ॥ ५४ ॥ सचसेनापतिःक्षुद्रोहतःसार्धंशिखंडिना ॥ तेनमन्येमघवतासममात्मानमद्यवै ॥ ५५ ॥ स्वस्तिप्राप्नुतभद्रंवःस्व[illegible]संगमःपुनः ॥ इत्येवमुक्त्वातूष्णींसकुरुराजोमहामनाः ॥ ५६ ॥ प्राणानुपास्त्रजद्वीरःसुहृदांदुःखमुत्सृजन् ॥ अपाक्रामद्दिवंपुण्यांशरीरंक्षितिमाविशत् ॥ ५७ ॥ एवंतेनिधनंयातःपुत्रोदुर्योधनोनृप ॥ अग्रेयात्वारणेशूरःपश्चाद्विनिहतःपरैः ॥ ५८ ॥ तथैवतेपरिष्वक्ताःपरिष्वज्यचतेनृपं ॥ पुनःपुनःप्रेक्षमाणाःस्वकानारुरुहूरथान् ॥ ५९ ॥ इत्येवंद्रोणपुत्रस्यनिशम्यकरुणांगिरं ॥ प्रत्यूषकालेशोकार्त्ताःप्राद्रवन्नगरंप्रति ॥ ६० ॥ एवमेषक्षयोवृत्तःकुरुपांडवसेनयोः ॥ घोरोविशसनोरौद्रोराजन्दुर्मंत्रितेतव ॥ ६१ ॥ तवपुत्रेगतेस्वर्गेशोकार्त्तस्यममानघ ॥ ऋषिदत्तंप्रनष्टंतद्दिव्यदर्शित्वमद्यवै ॥ ६२ ॥ वैशंपायनउवाच इतिश्रुत्वासनृपतिःपुत्रस्यनिधनंतदा ॥ निःश्वस्यदीर्घमुष्णंचततश्चिंतापरोभवत् ॥ ६३ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिदुर्योधनप्राणत्यागेनवमोऽध्यायः ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥

॥ १२ ॥

अथैषीकपर्व वैशंपायनउवाच तस्यांरात्र्यांव्यतीतायांधृष्टद्युम्नस्यसारथिः ॥ शशंसधर्मराजायसौप्तिकेकदनंकृतं ॥ १ ॥ सूतउवाच द्रौपदेया

तारा[illegible]पदस्यात्मजैःसह ॥ प्रमत्तानिशिविश्वस्ताःस्वपंतःशिबिरेस्वके ॥ २ ॥ कृतवर्मणानृशंसेनगौतमेनकृपेणच ॥ अश्वत्थाम्नाचपापेनहतंवःशिबिरंनि

शि ॥ ३ ॥ एतैर्नरगजाश्वानांप्रासशक्तिपरश्वधैः ॥ सहस्राणिनिकृंतद्भिर्निःशेषंतेबलंकृतं ॥ ४ ॥ छिद्यमानस्यमहतोवनस्येवपरश्वधैः ॥ शुश्रुवेसुमहाञ्शब्दो

बलस्यतवभारत ॥ ५ ॥ अहमेकोऽवशिष्टस्तुतस्मात्सैन्यान्महामते ॥ मुक्तःकथंचिद्धर्मात्मन्व्यग्राच्चकृतवर्मणः ॥ ६ ॥ तच्छ्रुत्वावाक्यमशिवंकुंतीपुत्रोयुधिष्ठिरः ॥

पपातमह्यांदुर्धर्षःपुत्रशोकसमन्वितः ॥ ७ ॥ पतंतंतमतिक्रम्यपरिजग्राहसात्यकिः ॥ भीमसेनोर्जुनश्चैवमाद्रीपुत्रौचपांडवौ ॥ ८ ॥ लब्धचेतास्तुकौंतेयःशो

कविक्लयागिरा ॥ जित्वाशत्रून्जितःपश्चात्पर्यदेवयदार्त्तवत् ॥ ९ ॥ दुर्विदागतिरर्थानामपियेदिव्यचक्षुषः ॥ जीयमानाजयंत्यन्येजयमानावयंजिताः ॥ १० ॥

हत्वाभ्रातॄन्वयस्यांश्चपितॄन्पुत्रान्सुहृद्गणान् ॥ बंधूनमात्यान्पौत्रांश्चजित्वासर्वान्जितावयं ॥ ११ ॥ अनर्थोह्यर्थसंकाशस्तथानर्थोर्थदर्शनः ॥ जयोयमजयाभा

कारोजयस्तस्मात्पराजयः ॥ १२ ॥ यज्जित्वातप्यतेपश्चादापन्नइवदुर्मतिः ॥ कथंमन्येतविजयंततोजिततरःपरैः ॥ १३ ॥ येषामर्थायपापंस्याद्विजयस्यसुहृद्व

धैः ॥ निर्जितैरप्रमत्तैर्हिविजिताजितकाशिनः ॥ १४ ॥ कर्णिनालीकदंष्ट्रस्यखड्गजिह्वस्यसंयुगे ॥ चापव्यात्तस्यरौद्रस्यज्यातलस्वननादिनः ॥ १५ ॥ क्रुद्धस्यन

रसिंहस्यसंग्रामेष्वपलायिनः ॥ येव्यमुंचंतकर्णस्यप्रमादात्तइमेहताः ॥ १६ ॥ रथह्रदंशरवर्षोर्मिमंतंरत्नाचितंवाहनवाजियुक्तं ॥ शक्त्यृष्टिमीनध्वजनागनक्रं

शरासनावर्त्तमहेषुफेनं ॥ १७ ॥ संग्रामचंद्रोदयवेगवेलंद्रोणार्णवंज्यातलनेमिघोषं ॥ येतेरुरुच्चावचशस्त्रनौभिस्तेराजपुत्रानिहताःप्रमादात् ॥ १८ ॥ नहिप्र

मादात्परमस्तिकश्चिद्वधोनराणामिहजीवलोके ॥ प्रमत्तमर्थाहिनरंसमंतात्त्यजंत्यनर्थाश्चसमाविशंति ॥ १९ ॥ ध्वजोत्तमाग्रोच्छ्रितधूमकेतुंशरार्चिषंकोपमहा

समीरं ॥ महाधनुर्ज्यातलनेमिघोषंतनुत्रनानाविधशस्त्रहोमं ॥ २० ॥

जितानांजयोअयत्नांपराजयःफलतोभूदितिमहदाश्चर्यमित्यर्थः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ व्यमुंचंतमुक्ताः कर्णस्यकर्णात् प्रमादात्अस्मत्कृतात् असान्निध्यात् ॥ १६ ॥ १७ ॥

॥ १८ ॥ १९ ॥ तनुत्राणिनानाविधशिरस्त्राणिचतैर्होमोहोमःप्रक्षेपोयत्रतंतनुत्रनानाविधशस्त्रहोमं ॥ २० ॥

पर्यन्तमर्थवित्रि[illegible] ॥ २१ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेएकादशोऽध्यायः ॥ ११ ॥ ॥ ७ ॥ ॥ ५ ॥ तस्मिन्निति ॥ १ ॥ आक्रंदेसंपाते ॥ २ ॥ ३ ॥ ४ ॥

[illegible]गोनत्वरिताजग्मुर्हरयःशीघ्रगामिनः ॥ शिबिरात्स्वाद्गृहीत्वासरथस्यपदमच्युतः ॥ २१ ॥ इतिश्रीम० सौप्तिकेपर्वणिऐषीकेपर्वणिद्रौणिवधार्थभीमसेनग
मनेएकादशोऽध्यायः ॥ ११ ॥ ॥ ७ ॥ ॥ ७ ॥ वैशंपायनउवाच तस्मिन्प्रयातेदुर्धर्षेयदूनामृषभस्ततः ॥ अब्रवीत्पुंडरीकाक्षःकुंतीपुत्रंयुधिष्ठिरं ॥ १ ॥
[illegible]डवतेभ्रातापुत्रशोकपरायणः ॥ जिघांसुर्द्रौणिमाक्रंदेएकएवाभिधावति ॥ २ ॥ भीमःप्रियस्तेसर्वेभ्योभ्रातृभ्योभरतर्षभ ॥ तंकृच्छ्रंगतमद्यत्वंकस्मान्ना
भ्युपपद्यसे ॥ ३ ॥ यत्तदाचष्टपुत्रायद्रोणःपरपुरंजयः ॥ अस्त्रंब्रह्मशिरोनामदहेतपृथिवीमपि ॥ ४ ॥ तन्महात्मामहाभागःकेतुःसर्वधनुष्मतां ॥ प्रत्यपादयदाचा
र्यःप्रीयमाणोधनंजयं ॥ ५ ॥ तंपुत्रोप्येकएवैनमन्वयाचदमर्षणः ॥ ततःप्रोवाचपुत्रायनातिहृष्टमनाइव ॥ ६ ॥ विदितंचापलंह्यासीदात्मजस्यदुरात्मनः ॥
सर्वधर्मविदाचार्यःसोन्वशात्स्वसुतंततः ॥ ७ ॥ परमापद्गतेनापिनस्मतातत्वयारणे ॥ इदमस्त्रंप्रयोक्तव्यंमानुषेषुविशेषतः ॥ ८ ॥ इत्युक्तवान्गुरुःपुत्रंद्रोणःपश्चा
दथोक्तवान् ॥ नत्वंजातुसतांमार्गेस्थातेतिपुरुषर्षभ ॥ ९ ॥ सतदाज्ञायदुष्टात्मापितुर्वचनमप्रियं ॥ निराशःसर्वकल्याणैःशोकात्पर्यचरन्महीं ॥ १० ॥ ततस्तदा
कुरुश्रेष्ठवनस्थेत्वयिभारत ॥ अवसद्द्वारकामेत्यवृष्णिभिःपरमार्चितः ॥ ११ ॥ सकदाचित्समुद्रांतेवसन्द्वारवतीमनु ॥ एकएकंसमागम्यमामुवाचहसन्निव
॥ १२ ॥ यत्तदुग्रंतपःकृष्णचरन्सत्यपराक्रमः ॥ अगस्त्याद्भारताचार्यःप्रत्यपद्यतमेपिता ॥ १३ ॥ अस्त्रंब्रह्मशिरोनामदेवगंधर्वपूजितं ॥ तदद्यमयिदाशार्ह
यथापितरितथा ॥ १४ ॥ अस्मत्तस्तदुपादायदिव्यमस्त्रंयदूत्तम ॥ ममाप्यस्त्रंप्रयच्छत्वंचक्रंरिपुहणंरणे ॥ १५ ॥ सराजन्प्रीयमाणेनमयाप्युक्तःकृतांजलिः ॥
याचमानःप्रयत्नेनमत्तोस्त्रंभरतर्षभ ॥ १६ ॥ देवदानवगंधर्वमनुष्यपतगोरगाः ॥ नसमाममवीर्यस्यशतांशेनापिपिंडिताः ॥ १७ ॥ इदंधनुरियंशक्तिरिदंचक्र
[illegible]गदा ॥ यद्यदिच्छसिचेदस्त्रंमत्तस्तत्तद्ददामिते ॥ १८ ॥ यच्छक्नोषिसमुद्यंतुंप्रयोक्तुमपिवारणे ॥ तद्गृहाणविनास्त्रेणयन्मेदातुमभीप्ससि ॥ १९ ॥ [illegible]
[illegible]नाभमप्यस्मयं ॥ वव्रेचक्रंमहाभागोमत्तःस्पर्धन्मयासह ॥ २० ॥ गृहाणचक्रमित्युक्तोमयातुतदनंतरं ॥ जग्राह[illegible]सहसाचक्रंसव्येनपाणिना ॥
॥ २१ ॥ नचैनमशकत्स्थानात्संचालयितुमच्युत ॥ अथैनंदक्षिणेनापिगृहीतुमुपचक्रमे ॥ २२ ॥

॥ ६ ॥ ९ ॥ ७ ॥ ८ ॥ स्थातास्थास्यसि ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ मेमसंदातुमिच्छसिनेनविनापिगृहाण त्वदीये[illegible] ॥ १९ ॥ [illegible]

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

सर्वयत्नबलेनापिगृह्णन्नेवमिदंततः ॥ ततःसर्वबलेनापियदैनंनशशाकह ॥ २३ ॥ उद्यंतुंवाचालयितुंद्रौणिःपरमदुर्मनाः ॥ कृत्वायत्नंपरिश्रांतःसन्यवर्ततभा
रत ॥ २४ ॥ निर्विण्णमनसंतस्मादभिप्रायाद्विचेतसं ॥ अहमामंत्र्यसर्वविग्रमश्वत्थामानमब्रुवं ॥ २५ ॥ यःसदेवमनुष्येषुप्रमाणंपरमंगतः ॥ गांडीवधन्वाश्वेता
श्वःकपिप्रवरकेतनः ॥ २६ ॥ यःसाक्षाद्देवदेवेशंशितिकंठमुमापतिं ॥ द्वंद्वयुद्धेपराजिष्णुस्तोषयामासशंकरं ॥ २७ ॥ यस्मात्प्रियतरोनास्तिममान्यःपुरुषोभुवि
नादेयंयस्यमेकिंचिदपिदाराःसुतास्तथा ॥ २८ ॥ तेनापिसुहृदाब्रह्मन्पार्थेनाक्लिष्टकर्मणा ॥ नोक्तपूर्वमिदंवाक्यंयत्त्वंमामभिभाषसे ॥ २९ ॥ ब्रह्मचर्यंमहद्घोरं
तीर्त्वाद्वादशवार्षिकं ॥ हिमवत्पार्श्वमास्थाययोमयातपसार्जितः ॥ ३० ॥ समानव्रतचारिण्यांरुक्मिण्यांयोन्वजायत ॥ सनत्कुमारस्तेजस्वीप्रद्युम्नोनाममेसुतः ॥
॥ ३१ ॥ तेनाप्येतन्महद्दिव्यंचक्रमप्रतिमंरणे ॥ नप्रार्थितमभून्मूढयदिदंप्रार्थितंत्वया ॥ ३२ ॥ रामेणातिबलेनैतन्नोक्तपूर्वंकदाचन ॥ नगदेनसांबेनयदिदं
प्रार्थितंत्वया ॥ ३३ ॥ द्वारकावासिभिश्चान्यैर्वृष्ण्यंधकमहारथैः ॥ नोक्तपूर्वमिदंजातुयदिदंप्रार्थितंत्वया ॥ ३४ ॥ भारताचार्यपुत्रस्त्वंमानितःसर्वयादवैः ॥ च
क्रेणरथिनांश्रेष्ठकंनुतातयुयुत्ससे ॥ ३५ ॥ एवमुक्तोमयाद्रौणिर्मामिदंप्रत्युवाचह ॥ प्रयुज्यभवतेपूजांयोत्स्येकृष्णत्वयासह ॥ ३६ ॥ प्रार्थितंतेमयाचक्रंदेव
दानवपूजितं ॥ अजेयःस्यामितिविभोसत्यमेतद्ब्रवीमिते ॥ ३७ ॥ त्वत्तोहंदुर्लभंकाममनवाप्यैवकेशव ॥ प्रतियास्यामिगोविंदशिवेनाभिवदस्वमां ॥ ३८ ॥ ए
तत्सुनाभंभीमानामृषभेणत्वयाधृतं ॥ चक्रमप्रतिचक्रेणभुविनान्योभिपद्यते ॥ ३९ ॥ एतावदुक्त्वाद्रौणिर्मांयुग्यानश्वान्धनानिच ॥ आदायोपययौकालेरत्ना
निविविधानिच ॥ ४० ॥ ससंरंभीदुरात्माचचपलःक्रूरएवच ॥ वेदचास्त्रंब्रह्मशिरस्तस्माद्रक्ष्योवृकोदरः ॥ ४१ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिऐषीके
पर्वणियुधिष्ठिरकृष्णसंवादेद्वादशोऽध्यायः ॥ १२ ॥ ॥ ६५ ॥ वैशंपायनउवाच एवमुक्त्वायुधांश्रेष्ठःसर्वयादवनंदनः ॥ सर्वायुधवरोपेतमारुरोहरथो
त्तमं ॥ १ ॥ युक्तंपरमकांबोजैस्तुरगैर्हेममालिभिः ॥ आदित्योदयवर्णस्यधुरंरथवरस्यतु ॥ २ ॥ दक्षिणामवहच्छैब्यःसुग्रीवःसव्यतोभवत् ॥ पार्ष्णिवाहौतुतस्या
स्तांमेघपुष्पबलाहकौ ॥ ३ ॥ विश्वकर्मकृतादिव्यारत्नधातुविभूषिता ॥ उच्छ्रितेवरथेमायाध्वजयष्टिरदृश्यत ॥ ४ ॥ वैनतेयःस्थितस्तस्यांप्रभामंडलरश्मिवान् ॥
तस्यसत्यवतःकेतुर्भुजगारिरदृश्यत ॥ ५ ॥

द्वादशोऽध्यायः ॥ १२ ॥ ॥ ६५ ॥ ॥ ७ ॥ एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ अपांडवायेत्यस्त्रमभिमंत्र्य ॥ २१ ॥ २२ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेत्रयोदशोऽध्यायः ॥ १३ ॥

अपरारोहद्यानंकेशध्वजः केतुः सर्वधनुष्मतां ॥ अर्जुनः सत्यकर्मा चकुरुराजोयुधिष्ठिरः ॥ ६ ॥ अशोभेतांमहात्मानौदाशार्हमभितःस्थितौ ॥ रथस्थंशार्ङ्गधन्वानमश्विनाविववासवं ॥ ७ ॥ तावुपारोप्यदाशार्हःस्यंदनंलोकपूजितं ॥ प्रतोदेनजवोपेतान्परमाश्वानचोदयत् ॥ ८ ॥ तेहयाःसहसोत्पेतुर्गृहीत्वास्यंदनोत्तमं ॥ आस्थितंपांडवेयाभ्यांयदूनामृषभेणच ॥ ९ ॥ वहतांशार्ङ्गधन्वानमश्वानांशीघ्रगामिनां ॥ प्रादुरासीन्महान्शब्दःपक्षिणांपततामिव ॥ १० ॥ तेसमार्च्छन्नरव्याघ्राःक्षणेनभरतर्षभ ॥ भीमसेनंमहेष्वासंसमनुद्रुत्यवेगिताः ॥ ११ ॥ क्रोधदीप्तंतुकौंतेयंद्विषदर्थेसमुद्यतं ॥ नाशक्नुवन्वारयितुंसमेत्यापिमहारथाः ॥ १२ ॥ सतेषांप्रेक्षतामेवश्रीमतांदृढधन्विनां ॥ ययौभागीरथीतीरंहरिभिर्भृशवेगितैः ॥ १३ ॥ यत्रस्मश्रूयतेद्रौणिःपुत्रहंतामहात्मनां ॥ सददर्शमहात्मानमुदकांतेयशस्विनं ॥ १४ ॥ कृष्णद्वैपायनंव्यासमासीनमृषिभिःसह ॥ तंचैवंक्रूरकर्माणंघृताक्तंकुशचीरिणं ॥ १५ ॥ रजसाध्वस्तमासीनंददर्शद्रौणिमंतिके ॥ तमभ्यधावत्कौंतेयःप्रगृह्यसशरंधनुः ॥ १६ ॥ भीमसेनोमहाबाहुस्तिष्ठतिष्ठेतिचाब्रवीत् ॥ सदृष्ट्वाभीमधन्वानंप्रगृहीतशरासनं ॥ १७ ॥ भ्रातरौपृष्ठतश्चास्यजनार्दनरथेस्थितौ ॥ व्यथितात्माभवद्द्रौणिःप्राप्तंचेदममन्यत ॥ १८ ॥ सतद्दिव्यमदीनात्मापरमास्त्रमचिंतयत् ॥ जग्राहचसचैषीकांद्रौणिःसव्येनपाणिना ॥ १९ ॥ सतामापदमासाद्यदिव्यमस्त्रमुदैरयत् ॥ अमृष्यमाणस्ताञ्छूरान्दिव्यायुधवरान्स्थितान् ॥ २० ॥ अपांडवायेतिरुषाव्यसृजद्दारुणंवचः ॥ इत्युक्त्वाराजशार्दूलद्रोणपुत्रःप्रतापवान् ॥ २१ ॥ सर्वलोकप्रमोहार्थंतदस्त्रंप्रमुमोचह ॥ ततस्तस्यामिषीकायांपावकःसमजायत ॥ प्रधक्ष्यन्निवलोकांस्त्रीन्कालांतकयमोपमः ॥ २२ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिऐषीकेपर्वणिब्रह्मशिरोस्त्रत्यागेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ५ ॥ ॥ ५ ॥ वैशंपायनउवाच इंगितेनैवदाशार्हस्तमभिप्रायमादितः ॥ द्रौणेर्बुद्ध्वामहाबाहुरर्जुनंप्रत्यभाषत ॥ १ ॥ अर्जुनार्जुनयद्दिव्यमस्त्रंतिष्ठतितेहृदि ॥ द्रोणोपदिष्टंतस्यायंकालःसंप्रतिपांडव ॥ २ ॥ भ्रातॄणामात्मनश्चैवपरित्राणायभारत ॥ विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणं ॥ ३ ॥ केशवेनैवमुक्तोथपांडवःपरवीरहा ॥ अवातरद्रथात्तूर्णंप्रगृह्यसशरंधनुः ॥ ४ ॥ पूर्वमाचार्यपुत्रायततोनंतरमात्मने ॥ भ्रातृभ्यश्चैवसर्वेभ्यःस्वस्तीत्युक्त्वापरंतपः ॥ ५ ॥

इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ५ ॥ ॥ ५ ॥ इंगितेनेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

देवताः॥ योसमरत्वयगुरुभ्यश्चैवसर्वशः ॥ उत्सस्रर्जशिवंध्यायन्नस्त्रमस्त्रेणशाम्यतां ॥ ६ ॥ ततस्तदस्त्रंसहसास्रष्टंगांडीवधन्वना ॥ प्रजज्वालमहार्चिष्मद्युगांता नलसन्निभं ॥ ७ ॥ तथैवद्रोणपुत्रस्यतदस्त्रंतिग्मतेजसः ॥ प्रजज्वालमहाज्वालंतेजोमंडलसंवृतं ॥ ८ ॥ निर्घाताबहवश्चासन्पेतुरुल्काःसहस्रशः ॥ महद्भयंच भू तानांसर्वेषांसमजायत ॥ ९ ॥ सशब्दमभवद्व्योमज्वालामालाकुलंभृशं ॥ चचालचमहीकृत्स्नासपर्वतवनद्रुमा ॥ १० ॥ तेत्वस्त्रतेजसीलोकांस्तापयंतीव्यवस्थि ते ॥ महर्षीसहितौतत्रदर्शयामासतुस्तदा ॥ ११ ॥ नारदःसर्वभूतात्माभरतानांपितामहः ॥ उभौशमयितुंवीरौभारद्वाजधनंजयौ ॥ १२ ॥ तौमुनीसर्वधर्मज्ञौस र्वभूतहितैषिणौ ॥ दीप्तयोरस्त्रयोर्मध्येस्थितौपरमतेजसौ ॥ १३ ॥ तदंतरमथाधृष्यावुपगम्ययशस्विनौ ॥ आस्तामृषिवरौतत्रज्वलिताविवपावकौ ॥ १४ ॥ प्रा णभृद्भिरनाधृष्यौदेवदानवसंमतौ ॥ अस्त्रतेजःशमयितुंलोकानांहितकाम्यया ॥ १५ ॥ ऋषीऊचतुः नानाशस्त्रविदःपूर्वेयेप्यतीतामहारथाः ॥ नैतदस्त्रं मनुष्येषुतैःप्रयुक्तंकथंचन ॥ किमिदंसाहसंवीरौकृतवंतौमहात्ययं ॥ १६ ॥ इतिश्रीमहाभारतेसौप्तिकेपर्वणिऐषीकेपर्वणिअर्जुनास्त्रत्यागेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ वैशंपायनउवाच दृष्ट्वैवनरशार्दूलतावग्निसमतेजसौ ॥ संजहारशरंदिव्यंत्वरमाणोधनंजयः ॥ १ ॥ उवाचभरतश्रेष्ठस्तावृ षीप्रांजलिस्तदा ॥ प्रमुक्तमस्त्रमस्त्रेणशाम्यतामितिवैमया ॥ २ ॥ संहृतेपरमास्त्रेस्मिन्सर्वानस्मानशेषतः ॥ पापकर्माध्रुवंद्रौणिःप्रधक्ष्यत्यस्त्रतेजसा ॥ ३ ॥ यद त्रहितमस्माकंलोकानांचैवसर्वथा ॥ भवंतौदेवसंकाशौतथासंमंतुमर्हतः ॥ ४ ॥ इत्युक्त्वासंजहारास्त्रंपुनरेवधनंजयः ॥ संहारोदुष्करस्तस्यदेवैरपिहिसंयुगे ॥ ५ ॥ विसृष्टस्यरणेतस्यपरमास्त्रस्यसंग्रहे ॥ अशक्तःपांडवादन्यःसाक्षादपिशतक्रतुः ॥ ६ ॥ ब्रह्मतेजोद्भवंतद्धिविसृष्टमकृतात्मना ॥ नशक्यमावर्त्तयितुंब्रह्मचारिव्र तादृते ॥ ७ ॥ अचीर्णब्रह्मचर्योयःसृष्ट्वावर्त्तयतेपुनः ॥ तदस्त्रंसानुबंधस्यमूर्धानंतस्यकृंतति ॥ ८ ॥ ब्रह्मचारीव्रतीचापिदुरवापमवाप्यतत् ॥ परमव्यसनार्त्तोपि नार्जुनोस्त्रंव्यमुंचत ॥ ९ ॥ सत्यव्रतधरःशूरोब्रह्मचारीचपांडवः ॥ गुरुवर्त्तीचतेनास्त्रंसंजहारार्जुनःपुनः ॥ १० ॥ द्रौणिरप्यथसंप्रेक्ष्यतावृषीपुरतःस्थितौ ॥ नश शाकपुनर्घोरमस्त्रंसंहर्तुमोजसा ॥ ११ ॥ अशक्तःप्रतिसंहारेपरमास्त्रस्यसंयुगे ॥ द्रौणिर्दीनमनाराजन्द्वैपायनमभाषत ॥ १२ ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ अंतकायांताय स्वार्थेकः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

मयैतदस्त्रमुत्सृष्टंभीमसेनभयान्मुने ॥ १३ ॥ अधर्मश्चकृतोनेनधार्त्तराष्ट्रंजिघांसता ॥ मिथ्याचारेणभगवन्भीमसेनेनसंयुगे ॥ १४ ॥ अतःसृष्टमिदंब्रह्मन्मयास्त्रमकृतात्मना ॥ तस्यभूयोद्यसंहारंकर्त्तुंनाहमिहोत्सहे ॥ १५ ॥ निसृष्टंहिमयादिव्यमेतदस्त्रंदुरासदं ॥ अपांडवायेतिमुनेवह्नितेजोनुमंत्र्यवै ॥ १६ ॥ तदिदंपांडवेयानामंतकायाभिसंहितं ॥ अद्यपांडुसुतान्सर्वान्जीविताद्भ्रंशयिष्यति ॥ १७ ॥ कृतंपापमिदंब्रह्मन्रोषाविष्टेनचेतसा ॥ वधमाशास्यपार्थानांमयास्त्रंसृजतारणे ॥ १८ ॥ व्यासउवाच अस्त्रंब्रह्मशिरस्तातविद्वान्पार्थोधनंजयः ॥ उत्सृष्टवान्नरोषेणननाशायतवाहवे ॥ १९ ॥ अस्त्रमस्त्रेणतुरणेतवसंशमयिष्यता ॥ विसृष्टमर्जुनेनेदंपुनश्चप्रतिसंहृतं ॥ २० ॥ ब्रह्मास्त्रमप्यवाप्यैतदुपदेशात्पितुस्तव ॥ क्षत्रधर्मान्महाबाहुर्नाकंपतधनंजयः ॥ २१ ॥ एवंधृतिमतःसाधोःसर्वास्त्रविदुषःसतः ॥ सभ्रातृबंधोःकस्मात्त्वंवधमस्यचिकीर्षसि ॥ २२ ॥ अस्त्रंब्रह्मशिरोयत्रपरमास्त्रेणवध्यते ॥ समाद्वादशपर्जन्यस्तद्राष्ट्रंनाभिवर्षति ॥ २३ ॥ एतदर्थंमहाबाहुःशक्तिमानपिपांडवः ॥ नविहन्यात्तदस्त्रंतुप्रजाहितचिकीर्षया ॥ २४ ॥ पांडवास्त्वंचराष्ट्रंचसदासंरक्ष्यमेवहि ॥ तस्मात्संहरदिव्यंत्वमस्त्रमेतन्महाभुज ॥ २५ ॥ अरोषस्तवचैवास्तुपार्थाःसंतुनिरामयाः ॥ नत्यधर्मेणराजर्षिःपांडवोजेतुमिच्छति ॥ २६ ॥ मणिंचैवप्रयच्छाद्ययस्तेशिरसितिष्ठति ॥ एतदादायतेप्राणान्प्रतिदास्यंतिपांडवाः ॥ २७ ॥ द्रौणिरुवाच पांडवैर्यानिरत्नानियच्चान्यत्कौरवैर्धनं ॥ अवाप्तमिहतेभ्योयंमणिर्ममविशिष्यते ॥ २८ ॥ यमाबध्यभयंनास्तिशस्त्रव्याधिक्षुधाश्रयं ॥ देवेभ्योदानवेभ्योवानागेभ्योवाकथंचन ॥ २९ ॥ नचरक्षोगणभयंनतस्करभयंतथा ॥ एवंवीर्योमणिरयंनमेत्याज्यःकथंचन ॥ ३० ॥ यत्तुमेभगवानाहतन्मेकार्यमनंतरं ॥ अयंमणिरयंचाहमीषिकातुपतिष्यति ॥ ३१ ॥ गर्भेषुपांडवेयानाममोघंचैतदुत्तमं ॥ नचशक्तोस्मिभगवन्संहर्तुंपुनरुद्यतं ॥ ३२ ॥ एतदस्त्रमतश्चैवगर्भेषुविसृजाम्यहं ॥ नचवाक्यंभगवतोनकरिष्येमहामुने ॥ ३३ ॥ व्यासउवाच एवंकुरुनचान्यातुबुद्धिःकार्यात्वयानघ ॥ गर्भेषुपांडवेयानांविसृज्यैतदुपारम ॥ ३४ ॥ वैशंपायनउवाच ततःपरममस्त्रंतुद्रौणिरुद्यतमाहवे ॥ द्वैपायनवचःश्रुत्वागर्भेषुप्रमुमोचह ॥ ३५ ॥ इतिश्रीमहाभारतेसौप्तिकेप०ऐषीकेपर्वणिब्रह्मशिरोस्त्रस्यपांडवेयगर्भप्रवेशनेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ३४ ॥ ३५ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेपंचदशोऽध्यायः ॥ १५ ॥

[illegible] ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ संधिसंख्या ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ [illegible]

वैशंपायनउवाच तदाज्ञायहृषीकेशोविसृष्टंपापकर्मणा ॥ हृष्यमाणइदंवाक्यंद्रौणिंप्रत्यब्रवीत्तदा ॥ १ ॥ विराटस्यसुतांपूर्वंस्नुषांगांडीवधन्वनः ॥ उपप्ल
व्यगतांदृष्ट्वाव्रतवान्ब्राह्मणोब्रवीत् ॥ २ ॥ परिक्षीणेषुकुरुषुपुत्रस्तवभविष्यति ॥ एतदस्यपरिक्षित्वंगर्भस्थस्यभविष्यति ॥ ३ ॥ तस्यतद्वचनंसाधोःसत्यमेवभवि
ष्यति ॥ परिक्षिद्भविताह्येषांपुनर्वंशकरःसुतः ॥ ४ ॥ एवंब्रुवाणंगोविंदंसात्वतांप्रवरंतदा ॥ द्रौणिःपरमसंरब्धःप्रत्युवाचेदमुत्तरं ॥ ५ ॥ नैतदेवंयथात्थत्वंपक्षपाते
नकेशव ॥ वचनंपुंडरीकाक्षनचमद्वाक्यमन्यथा ॥ ६ ॥ पतिष्यतितदस्त्रंहिगर्भेतस्याममयोद्यतं ॥ विराटदुहितुःकृष्णयंत्वंरक्षितुमिच्छसि ॥ ७ ॥ श्रीभगवानु
वाच अमोघःपरमास्त्रस्यपातस्तस्यभविष्यति ॥ सतुगर्भोमृतोजातोदीर्घमायुरवाप्स्यति ॥ ८ ॥ त्वांतुकापुरुषंपापंविदुःसर्वेमनीषिणः ॥ असकृत्पापकर्मा
णंबालजीवितघातकं ॥ ९ ॥ तस्मात्त्वमस्यपापस्यकर्मणःफलमाप्नुहि ॥ त्रीणिवर्षसहस्राणिचरिष्यसिमहीमिमां ॥ १० ॥ अप्राप्नुवन्क्वचित्कांचित्संविदंजातु
केनचित् ॥ निर्जनानसहायस्त्वंदेशान्प्रविचरिष्यसि ॥ ११ ॥ भवित्रीनहितेक्षुद्रजनमध्येषुसंस्थितिः ॥ पूयशोणितगंधीचदुर्गकांतारसंश्रयः ॥ १२ ॥ विचरि
ष्यसिपापात्मासर्वव्याधिसमन्वितः ॥ वयःप्राप्यपरिक्षित्तुवेदव्रतमवाप्यच ॥ १३ ॥ कृपाच्छारद्वताच्छूरःसर्वास्त्राण्युपपत्स्यते ॥ विदित्वापरमास्त्राणिक्षत्रधर्मव्र
तेस्थितः ॥ १४ ॥ षष्टिंवर्षाणिधर्मात्मावसुधांपालयिष्यति ॥ इतश्चोर्ध्वंमहाबाहुःकुरुराजोभविष्यति ॥ १५ ॥ परिक्षिन्नामनृपतिर्मिषतस्तेसुदुर्मते ॥ अहंतंजी
वयिष्यामिदग्धंशस्त्राग्नितेजसा ॥ पश्यमेतपसोवीर्यंसत्यस्यचनराधम ॥ १६ ॥ व्यासउवाच यस्मादनादृत्यकृतंत्वयास्मान्कर्मदारुणं ॥ ब्राह्मणस्यसत
श्चैवयस्मात्तेवृत्तमीदृशं ॥ १७ ॥ तस्माद्यद्देवकीपुत्रउक्तवानुत्तमंवचः ॥ असंशयंतेतद्भाविक्षत्रधर्मस्त्वयाश्रितः ॥ १८ ॥ अश्वत्थामोवाच सहैवभवता
ब्रह्मन्स्थास्यामिपुरुषेष्विह ॥ सत्यवागस्तुभगवानयंचपुरुषोत्तमः ॥ १९ ॥ वैशंपायनउवाच प्रदायाथमणिंद्रौणिःपांडवानांमहात्मनां ॥ जगामविम
नास्तेषांसर्वेषांपश्यतांवनं ॥ २० ॥ पांडवाश्चापिगोविंदंपुरस्कृत्यहतद्विषः ॥ कृष्णद्वैपायनंचैवनारदंचमहामुनिं ॥ २१ ॥ द्रोणपुत्रस्यसहजंमणिमादायसत्वराः ॥
द्रौपदीमभ्यधावंतप्रायोपेतांमनस्विनीं ॥ २२ ॥ वैशंपायनउवाच ततस्तेपुरुषव्याघ्राःसदश्वैरनिलोपमैः ॥ अभ्ययुःसहदाशार्हाःशिबिरंपुनरेवहि ॥ २३ ॥

[illegible] आर्तीपुवादेःशोकेन ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ मधुघातिनिमधुदैत्यहंतरि ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ विवक्षतांवक्तुमिच्छतांवाच्याःनिंद्याःनैवस्म ॥ ३२ ॥ ३३ ॥

अवतीर्यरथेभ्यस्तुत्वरमाणामहारथाः ॥ ददृशुर्द्रौपदींदृष्टामार्त्तामार्त्ततराःस्वयं ॥ २४ ॥ तामुपेत्यनिरानंदांदुःखशोकसमन्वितां ॥ परिवार्यव्यतिष्ठंतपांडवाः सहकेशवाः ॥ २५ ॥ ततोराज्ञाभ्यनुज्ञातोभीमसेनोमहाबलः ॥ प्रददौतंमणिंदिव्यंवचनंचेदमब्रवीत् ॥ २६ ॥ अयंभद्रेतवमणिःपुत्रहंतुर्जितःसतेः ॥ उत्तिष्ठ शोकमुत्सृज्यक्षात्रधर्ममनुस्मर ॥ २७ ॥ प्रयाणेवासुदेवस्यशमार्थमसितेक्षणे ॥ यान्युक्तानित्वयाभीरुवाक्यानिमधुघातिनि ॥ २८ ॥ नैवमेपतयःसंतिनपुत्रा भ्रातरोनच ॥ नवैत्वमितिगोविंदशममिच्छतिराजनि ॥ २९ ॥ उक्तवत्यसितीव्राणिवाक्यानिपुरुषोत्तमं ॥ क्षत्रधर्मानुरूपाणितानिसंस्मर्तुमर्हसि ॥ ३० ॥ हतोदुर्योधनःपापोराज्यस्यपरिपंथिकः ॥ दुःशासनस्यरुधिरंपीतंविस्फुरतोमया ॥ ३१ ॥ वैरस्यगतमानृण्यंनस्मवाच्याविवक्षतां ॥ जित्वामुक्तोद्रोणपुत्रोब्रा ह्मण्याद्गौरवेणच ॥ ३२ ॥ यशोस्यपतितंदेविशरीरंत्ववशेषितं ॥ वियोजितश्चमणिनाभ्रंशितश्चायुधंभुवि ॥ ३३ ॥ द्रौपद्युवाच केवलानृण्यमाप्तास्मि गुरुपुत्रोगुरुर्मम ॥ शिरस्येतंमणिंराजाप्रतिबध्नातुभारत ॥ ३४ ॥ तंगृहीत्वाततोराजाशिरस्येवाकरोत्तदा ॥ गुरोरुच्छिष्टमित्येवद्रौपद्यावचनादपि ॥ ३५ ॥ ततोदिव्यंमणिवरंशिरसाधारयन्प्रभुः ॥ शुशुभेसतदाराजासचंद्रइवपर्वतः ॥ ३६ ॥ उत्तस्थौपुत्रशोकार्त्ताततःकृष्णामनस्विनी ॥ कृष्णंचापिमहाबाहुःपरिपप्रच्छ धर्मराट् ॥ ३७ ॥ इतिश्रीमहाभारतेसौप्तिकेप० ऐषीकेपर्वणिद्रौपदीसांत्वनायांषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ वैशंपायनउवाच हतेषुसर्व सैन्येषुसौप्तिकेतैरथैस्त्रिभिः ॥ शोचन्युधिष्ठिरोराजादाशार्हमिदमब्रवीत् ॥ १ ॥ कथंनुकृष्णपापेनक्षुद्रेणाकृतकर्मणा ॥ द्रौणिनानिहताःसर्वेममपुत्रामहारथाः ॥ २ ॥ तथाकृतास्त्रविक्रांताःसहस्रशतयोधिनः ॥ द्रुपदस्यात्मजाश्चैवद्रोणपुत्रेणपातिताः ॥ ३ ॥ यस्यद्रोणोमहेष्वासोनप्रादादाहवेमुखं ॥ निजघ्नेरथिनांश्रेष्ठं धृष्टद्युम्नंकथंनुसः ॥ ४ ॥ किंनुतेनकृतंकर्मतथायुक्तंनरर्षभ ॥ यदेकःसमरेसर्वानवधीन्नोगुरोःसुतः ॥ ५ ॥ श्रीभगवानुवाच ॥ नूनंसदेवदेवानामीश्वरेश्वर मव्ययं ॥ अगमच्छरणंद्रौणिरेकस्तेनावधीद्बहून् ॥ ६ ॥ प्रसन्नोहिमहादेवोदद्यादमरतामपि ॥ वीर्यंचगिरिशोदद्याद्येनेंद्रमपिशातयेत् ॥ ७ ॥ वेदाहंहिमहादेवंत [illegible] ॥ यानिचास्यपुराणानिकर्माणिविविधानिच ॥ ८ ॥

[illegible] ॥ २८ ॥ २९ ॥ ३० ॥ इतिसौप्तिकपर्वणिनीलकंठीयेभारतभावदीपेषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ॥ इतेष्विति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

[illegible] आदिरिति यथाकनककुंडलादेरादिमध्यांतेश्वेवरुद्रोपिजगतइत्यर्थः तर्हि [illegible] ॥ [illegible]

[illegible] प्राणापानचेष्टापिईश्वराधीनाकिमुतमरणमारणादिरिति सर्वस्येश्वराधीनत्वात् [illegible] ॥ ९ ॥

[illegible] ॥ १० ॥ ११ ॥ अपरं [illegible] ॥ १२ ॥ १३ ॥ [illegible] ॥ १४ ॥

[illegible] पितुब्रह्मादयोपीत्याह एवमित्यादिना प्रथमंरुद्रंतमोमयं [illegible]

आदिरेषहिभूतानांमध्यमंतश्चभारत ॥ विचेष्टतेजगच्चेदंसर्वमस्यैवकर्मणा ॥ ९ ॥ एवंसिसृक्षुर्भूतानिददर्शप्रथमंविभुः ॥ पितामहोब्रवीच्चैनंभूतानिसृजमा विरं ॥ १० ॥ हरिकेशस्तथेत्युक्त्वाभूतानांदोषदर्शिवान् ॥ दीर्घकालंतपस्तेपेमग्नोंभसिमहातपाः ॥ ११ ॥ सुमहांतंततःकालंप्रतीक्ष्यैनंपितामहः ॥ स्रष्टारंसर्वभू तानांससर्जमनसापरं ॥ १२ ॥ सोब्रवीत्पितरंदृष्ट्वागिरिशंसुमग्नमंभसि ॥ यदिमेनाग्रजोस्त्यन्यस्ततःस्रक्ष्याम्यहंप्रजाः ॥ १३ ॥ तमब्रवीत्पितानास्तित्वदन्यःपुरु षोग्रजः ॥ स्थाणुरेषजलेमग्नोविस्रब्धःकुरुवैकृतं ॥ १४ ॥ भूतान्यन्वसृजत्सप्तदक्षादींस्तुप्रजापतीन् ॥ यैरिमंव्यकरोत्सर्वंभूतग्रामंचतुर्विधं ॥ १५ ॥ ताःसृष्टमा त्राःक्षुधिताःप्रजाःसर्वाःप्रजापतिं ॥ बिभक्षयिषवोराजन्सहसाप्राद्रवंस्तदा ॥ १६ ॥ सभक्ष्यमाणस्त्राणार्थीपितामहमुपाद्रवत् ॥ आभ्योमांभगवांस्त्रातुवृत्तिरा सांविधीयतां ॥ १७ ॥ ततस्ताभ्योददावन्नमोषधीःस्थावराणिच ॥ जंगमानिचभूतानिदुर्बलानिबलीयसां ॥ १८ ॥ विहितान्नाःप्रजास्तास्तुजग्मुःसृष्टयथागतं ततोववृधिरेराजन्प्रीतिमत्यःस्वयोनिषु ॥ १९ ॥ भूतग्रामेविवृद्धेतुतुष्टेलोकगुरावपि ॥ उदतिष्ठज्जलाज्ज्येष्ठःप्रजाश्चेमाददर्शसः ॥ २० ॥ बहुरूपाःप्रजाःसृष्टाविवृद्धा श्चस्वतेजसा ॥ चुक्रोधभगवान्रुद्रोलिंगंस्वंचाप्यविध्यत ॥ २१ ॥ तत्प्रविद्धंतथाभूमौतथैवप्रत्यतिष्ठत ॥ तमुवाचाव्ययोब्रह्मावचोभिःशमयन्निव ॥ २२ ॥ किंकृतंसलिलेशर्वचिरकालस्थितेनते ॥ किमर्थंचेदमुत्पाद्यलिंगंभूमौप्रवेशितं ॥ २३ ॥ सोब्रवीज्जातसंरंभस्तथालोकगुरुर्गुरुं ॥ प्रजाःसृष्टाःपरेणेमाःकिंक रिष्याम्यनेनवै ॥ २४ ॥ तपसाधिगतंचान्नंप्रजार्थंमेपितामह ॥ ओषध्यःपरिवर्त्तेरन्यथैवंसततंप्रजाः ॥ २५ ॥

॥ १५ ॥ १६ ॥ त्रातुरक्षतु ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ लिंगंप्रसवसामर्थ्यं मेढ्ररूपेणअविध्यतभूमौपातितवान् एतदेवपूजितंसत्सर्वसिद्धिप्रदंआस्तिकानांभविष्यतीत्यभिप्रायेण ॥ २१ ॥ २२ ॥ २३ ॥

॥ २४ ॥ तपसेति मेममतपसाजलवासरूपेणप्रजार्थंअन्नंजातं अन्नांदन्नमित्येवंरूपेणओषध्योबीजांकुरसंतानक्रमेणपरिवर्त्तेनि एवमेवान्नादेतोद्वाराप्रजातःप्रजाश्चपरिवर्त्ततेऽतःप्रवाहरूपेण [illegible] स्थितिनिकार्य [illegible] किमीश्वरेणेत्यभिप्रायेणलिंगेऽनादृतेसतिईश्वरस्तिरोधानंप्राप्तवानित्यर्थः ॥ २५ ॥

॥ २६ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेसप्तदशोऽध्यायः ॥ १७ ॥ ॥ ९ ॥ ॥७॥ ततइति ईश्वरतिरोधानानंतरंदेवयुगेकृतयुगेविनापीश्वराराधनंप्रजाःस्वाभाविकैरेवशमदमादिभिः कृतकृत्याअभूवन् अतीतेतुदेवयुगेनिरीश्वरास्ताःकेवलेनकर्मजफलसिद्धिंइच्छंत्योयज्ञमकल्पयन् ॥१॥२॥ रुद्रंईश्वरंयज्ञस्यफलदातारं ॥३॥ योवाएतदक्षरंगार्ग्यविदित्वास्मिँल्लोकेयजतिजुहोतितपस्तप्यतेऽतवदेवास्यतद्भवतीतिश्रुतेरीश्वराराधनहीनोयज्ञोऽतवानित्येतद्दर्शयति आख्यायिकामुखेनैवसोकल्प्यमानेइत्यादिना साधनंयज्ञनाशकं॥४॥ लोकयज्ञोलोकैषणासर्वोमांसाधुमेवजानात्वितिवासना रूपःक्रियायज्ञःगर्भाधानादिसंस्काररूपः गृहयज्ञःपत्निसाध्याग्निहोत्रादिः पंचभूतनृयज्ञःपंचभूतानांगुणैःशब्दादिभिर्यानृणांप्रीतिस्तद्रूपः विषयजंसुखमित्यर्थः एतैरेवचतुर्भिर्यज्ञैःसर्वंजगत्सृष्टं ॥ ५ ॥ तत्रम

[illegible]एवमुक्त्वाससक्रोधोजगामविमनाभवः ॥ गिरेर्मुंजवतःपादंतपस्तप्तुंमहातपाः ॥ २६ ॥ इतिश्रीमहाभारतेसौप्तिकेप॰ऐषीकेपर्वणियुधिष्ठिरकृष्णसंवादे सप्तदशोऽध्यायः ॥ १७ ॥ ॥ ९ ॥ श्रीभगवानुवाच ततोदेवयुगेतीतेदेवावैसमकल्पयन् ॥ यज्ञंवेदप्रमाणेनविधिवद्यष्टुमीप्सवः ॥ १ ॥ कल्पयामासु [illegible]साधनानिहवींषिच ॥ भागार्हादेवताश्चैवयंज्ञियंद्रव्यमेवच ॥ २ ॥ तावैरुद्रमजानंत्योयाथातंथ्येनदेवताः ॥ नाकल्पयंतदेवस्यस्थाणोर्भागंनराधिप ॥ ३ ॥ सोऽकल्प्यमानेभागेतुकृत्तिवासामखेमरैः ॥ ततःसाधनमन्विच्छन्धनुरादौससर्जह ॥ ४ ॥ लोकयज्ञःक्रियायज्ञोगृहयज्ञःसनातनः ॥ पंचभूतनृयज्ञश्चजज्ञेस र्वमिदंजगत् ॥ ५ ॥ लोकयज्ञैर्नृयज्ञैश्चकपर्दीविदधेधनुः ॥ धनुःसृष्टमभूत्तस्यपंचकिष्कुप्रमाणतः ॥ ६ ॥ वषट्कारोभवज्ज्यांतुधनुषस्तस्यभारत ॥ यज्ञांगानिच चत्वारितस्यसंनहनेऽभवन् ॥ ७ ॥ ततःक्रुद्धोमहादेवस्तदुपादायकार्मुकं ॥ आजगामाथतत्रैवयत्रदेवाःसमीजिरे ॥ ८ ॥ तमात्तकार्मुकंदृष्ट्वाब्रह्मचारिणमव्य यं ॥ विव्यथेपृथिवीदेवीपर्वताश्चचकंपिरे ॥ ९ ॥ नववौपवनश्चैवनाग्निर्जज्वालवैधितः ॥ व्यभ्रमच्चापिसंविग्नंदिविनक्षत्रमंडलं ॥ १० ॥ नबभौभास्करश्चा पिसोमःश्रीमुक्तमंडलः ॥ तिमिरेणाकुलंसर्वमाकाशंचाभवद्वृतं ॥ ११ ॥ अभिभूतास्ततोदेवाविषयान्नप्रजज्ञिरे ॥ नप्रत्यभाच्चयज्ञःसदेवतास्त्रेसिरेतथा ॥ १२ ॥ ततःसयज्ञंविव्याधरौद्रेणहृदिपत्रिणा ॥ अपक्रांतस्ततोयज्ञोमृगोभूत्वासपावकः ॥ १३ ॥


ध्यमयोःशालोकयोर्यज्ञयोर्नाशार्थंप्रथमचरमयज्ञाभ्यांईश्वरोधनुःकृतवान् किष्कुर्हस्तः पंचहस्तंपंचविषयप्रमाणं लोकवासनादेहवासनावशब्दादिविषयपंचकात्परतोनास्तीत्यर्थः ॥ ६ ॥ वषट्कारसंज्ञेन गृहयज्ञेनतेउभेवासनेकिंचित्संकोचंगच्छतइतिसतस्यवासनाद्वयरूपस्यधनुषोज्यास्थानीयः यानितुयज्ञांगानिचत्वारिअर्थित्वंसमर्थत्वंविद्वत्त्वंशास्त्रेणपर्युदस्तत्वंचतानितस्यधनुषःलोकदेहवासनारूपस्यसंन हनार्थानिअभवन् ॥ ७ ॥ यतःयज्ञांगानिलोकैषणादौविनियुक्तानिमूढैस्ततोहेतोःमहादेवःक्रुद्धोयज्ञंजघानेत्यादिस्पष्टार्थं ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ रौद्रेण[illegible] [illegible]यज्ञात्पूर्वंअपक्रांतमुख्यादिविविधंतियज्ञेनेत्यादिशास्त्रोक्तादालविविदिषाख्यात्फलात्भ्रष्टः ॥ १३ ॥

[illegible] गुणात्मानोविभिमजमानरूपेणाव्यराजत तथापितेनकालात्मनारुद्रेणअन्वीयमानःसन् ततापमपक्रातःस्वगात्च्युताभूदित्यर्थः ॥ १४ ॥ अपक्रांतेयज्ञेयज्ञफलेशुक्रेसतिवीसादोन [illegible]
[illegible] ॥ १५ ॥त्र्यंबकइतित्रोणिश्रवणमनननिदिध्यासनानिअंबा[illegible]निमप्रकातियस्य [illegible]
[illegible] सुरानइंद्रियाणि सज्ञानप्रत्यभात् मूढान्यभूवन् हेयोपादेयविवेकशून्यान्यभुवन्नित्यर्थः । पूष्णोदशनान्वागिंद्रियंस्थानानिमंत्राश्चेत्यर्थः एतानि सर्वाणि [illegible]
[illegible] बाहूकर्मेकरणहेतू तथाभगस्यनेत्रेमनसःसंकल्पौअहमिदंकरिष्येऽहमिदंनकरिष्येइत्येवंरूपौविहितप्रतिषिद्धरूपौ

सतुतेनैवरूपेणदिव्यंप्राप्यव्यराजत ॥ अन्वीयमानोरुद्रेणयुधिष्ठिरनभस्तले ॥ १४ ॥ अपक्रांतेततोयज्ञेसंज्ञानप्रत्यभात्सुरान् ॥ नष्टसंज्ञेषुदेवेषुनप्राज्ञायत किंचन ॥ १५ ॥ त्र्यंबकःसवितुर्बाहूभगस्यनयनेतथा ॥ पूष्णश्चदशनान्क्रुद्धोधनुःकोट्याव्यशातयत् ॥ १६ ॥ प्राद्रवंततोदेवायज्ञांगानिचसर्वशः ॥ केचित्तत्रैवघूर्णंतोगतासवइवाभवन् ॥ १७ ॥ सतुविद्राव्यतत्सर्वंशितिकंठोऽवहस्यच ॥ अवष्टभ्यधनुष्कोटिंरुरोधविबुधांस्ततः ॥ १८ ॥ ततोवागमरैरुक्ताज्यांतस्यधनुषोच्छिनत् ॥ अथतत्सहसाराजंश्छिन्नज्यंविस्फुरद्धनुः ॥ १९ ॥ ततोविधनुषंदेवादेवश्रेष्ठमुपागमन् ॥ शरणंसहयज्ञेनप्रसादंचाकरोत्प्रभुः ॥ २० ॥ ततःप्रसन्नोभगवान्स्थाप्यकोपंजलाशये ॥ सजलंपावकोभूत्वाशोषयत्यनिशंप्रभो ॥ २१ ॥ भगस्यनयनेचैवबाहूचसवितुस्तथा ॥ प्रादात्पूष्णश्चदशनान्पुनर्यज्ञांश्चपांडव ॥ २२ ॥ ततःसुस्थमिदंसर्वंबभूवपुनरेवहि ॥ सर्वाणिचहवींष्यस्यदेवाभागमकल्पयन् ॥ २३ ॥ तस्मिन्क्रुद्धेऽभवत्सर्वमसुस्थंभुवनंप्रभो ॥ प्रसन्नेचपुनःसुस्थंप्रसन्नोस्यचवीर्यवान् ॥ २४ ॥ ततस्तेनिहताःसर्वेतवपुत्रामहारथाः ॥ अन्येचबहवःशूराःपांचालस्यपदानुगाः ॥ २५ ॥ नतन्मनसिकर्तव्यंनहितद्द्रौणिनाकृतं ॥ महादेवप्रसादेनकुरुकार्यमनंतरं ॥ २६ ॥ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांसौप्तिकैषीकपर्वणिअष्टादशोऽध्यायः ॥ १८ ॥ ऐषीकंपर्वसमाप्तं पर्वद्वयमिदंसंलग्नं ॥ ९ ॥ ॥ ९ ॥ अस्यानंतरंस्त्रीपर्वभविष्यति तस्यायमाद्यःश्लोकः जनमेजयउवाच • हतेदुर्योधनेचैवहतेसैन्येचसर्वशः ॥ धृतराष्ट्रोमहाराजश्रुत्वाकिमकरोन्मुने ॥ १ ॥

पूर्वोक्तयालोकेषणयादेहेषणयाव्यशातयत् ॥ १६ ॥ १७ ॥ एवंयज्ञेनष्टेपिधनुष्कोटिमपिपुण्याभावात्पूर्वोक्तांरुरोधततोलोकदेहयोरपिरंजनंकुंठितमभूदित्यर्थः ॥१८॥ ततोऽमरैरुक्तावाक् विविदिषंतियज्ञेनेतिपूर्वोक्तादेववाणी ज्यांश्रौतयज्ञरूपां धनुषःपूर्वोक्तवासनाद्वयात्मकात् अच्छिनत् दूरीचकार निष्कामंईश्वरप्रीत्यर्थंयज्ञंकारितवतीत्यर्थः ॥१९॥ विधनुषंकाम्यकर्महीनंदेवंआत्मानंदेवाइंद्रियाणिउपागमन् चित्तशुद्ध्यतिशयात्आत्मवश्यान्यभूवन् ततश्चईश्वरस्तैःशरणीकृतःप्रसन्नोभूत् ॥२०॥ कोपंरजस्तमोरूपं जलाशयेमूर्छिते ॥ २१ ॥ ततःसात्विकोयज्ञःप्रवृत्तइत्याह भगस्येति पूर्ववदर्थः ॥२२॥ सर्वाणिहवींषिसर्वाणिकर्माणिईश्वरार्पितान्येवाकुर्वन्नित्यर्थः ॥ २३॥२४॥२५॥ [illegible] [illegible] ॥ २६ ॥ इतिसौप्तिकेपर्वणिनैलकंठीयेभारतभावदीपेअष्टादशोऽध्यायः ॥ १८ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥

इदं सौप्तिकपर्व मुंबय्याख्यराजधान्यां गणपतकृष्णाजीत्यभिधानां मुद्रायंत्रालये मुद्रितं शकाब्दाः १७८४



॥ इति श्रीमहाभारते सौप्तिकपर्व समाप्तं ॥

अथ श्रीमहाभारते स्त्रीपर्व प्रारभ्यते



श्रीगणेशायनमः ॥ एवंतत्त्वदृष्ट्याशोकोनकर्तव्यइत्युक्तं लोकदृष्ट्यापिसनकार्यइत्याह हतेदुर्योधनेचैवेत्यादिनाध्यायेनैकेन ॥१ ॥ २ ॥ अन्योन्यंकारितात्पांडवानांगर्भेब्रह्मशिरोस्त्रंपतत्विति अश्वत्थाम्ना
शापोदत्तः सहस्रवर्षाणिगलत्कुष्टोभविष्यसीत्यश्वत्थाम्नःकृष्णेनशापोदत्तइत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ शून्याराजभिर्हीना केवलाउपरतोत्सवा ॥ ७ ॥ आनुपूर्व्येणेति आदौहतानांआदावेवपश्चात्पश्चा

श्रीगणेशायनमः ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं ॥ देवींसरस्वतींचैवततोजयमुदीरयेत् ॥ १ ॥ जनमेजयउवाच हतेदुर्योधनेचैवहतेसैन्येचसर्व
शः ॥ धृतराष्ट्रोमहाराजश्रुत्वाकिमकरोन्मुने ॥ १ ॥ तथैवकौरवोराजाधर्मपुत्रोमहामनाः ॥ कृपप्रभृतयश्चैवकिमकुर्वततेत्रयः ॥ २ ॥ अश्वत्थाम्नःश्रुतंकर्मशा
पादन्योन्यकारितात् ॥ वृत्तांतमुत्तरंब्रूहियदभाषतसंजयः ॥ ३ ॥ वैशंपायनउवाच हतपुत्रशतेदीनंछिन्नशाखमिवद्रुमं ॥ पुत्रशोकाभिसंतप्तंधृतराष्ट्रं
महीपतिं ॥ ४ ॥ ध्यानमूकत्वमापन्नंचिंतयासमभिप्लुतं ॥ अभिगम्यमहाराजसंजयोवाक्यमब्रवीत् ॥ ५ ॥ किंशोचसिमहाराजनास्तिशोकसहायता ॥ अक्षौ
हिण्योहताश्चाष्टादशचैवविशांपते ॥ ६ ॥ निर्जनेयंवसुमतीशून्यासंप्रतिकेवला ॥ नानादिग्भ्यःसमागम्यनानादेश्यानराधिपाः ॥ ७ ॥ सहैवतवपुत्रेणसर्वेवै
निधनंगताः ॥ पितॄणांपुत्रपौत्राणांज्ञातीनांसुहृदांतथा ॥ गुरूणांचानुपूर्व्येणप्रेतकार्याणिकारय ॥ ८ ॥ वैशंपायनउवाच तच्छ्रुत्वाकरुणंवाक्यंपुत्रपौ
त्रवधार्दितः ॥ पपातभुविदुर्धर्षोवाताहतइवद्रुमः ॥ ९ ॥ धृतराष्ट्रउवाच हतपुत्रोहतामात्योहतसर्वसुहृज्जनः ॥ दुःखंनूनंभविष्यामिविचरन्पृथिवीमि
मां ॥ १० ॥ किंनुबंधुविहीनस्यजीवितेनममाद्यवै ॥ लूनपक्षस्यइवमेजराजीर्णस्यपक्षिणः ॥ ११ ॥ हृतराज्योहतबंधुर्हतचक्षुश्चवैतथा ॥ नभ्राजिष्येमहाप्राज्ञ
क्षीणरश्मिरिवांशुमान् ॥ १२ ॥ नकृतंसुहृदांवाक्यंजामदग्न्यस्यजल्पतः ॥ नारदस्यचदेवर्षेःकृष्णद्वैपायनस्यच ॥ १३ ॥ सभामध्येतुकृष्णेनयच्छ्रेयोभिहितं
मम ॥ अलंवैरेणतेराजन्पुत्रःसंगृह्यतामिति ॥ १४ ॥ तच्चवाक्यमकृत्वाहंभृशंतप्यामिदुर्मतिः ॥ नहिश्रोतास्मिभीष्मस्यधर्मयुक्तंप्रभाषितं ॥ १५ ॥ दुर्योधनस्य
चनथावृषभस्येवनर्दतः ॥ दुःशासनवधंश्रुत्वाकर्णस्यचविपर्ययं ॥ १६ ॥ द्रोणंसूर्योपरागंचहृदयंमेविदीर्यते ॥ नस्मराम्यात्मनःकिंचित्पुरासंजयदुष्कृतं ॥
॥ १७ ॥ यस्येदंफलमद्येहमयामूढेनभुज्यते ॥ नूनंव्यपकृतंकिंचिन्मयापूर्वेषुजन्मसु ॥ १८ ॥ येनमांदुःखभागेषुधाताकर्मसुयुक्तवान् ॥ परिणामश्चवयसःस
र्वबंधुक्षयश्चमे ॥ १९ ॥ सुहृन्मित्रविनाशश्चदैवयोगादुपागतः ॥ कोन्योस्तिदुःखिततरोमत्तोन्योहिपुमान्भुवि ॥ २० ॥

नांपश्चादेवेतिपौर्वापर्येणप्रेतानांपरेतानां
कार्याणिपारलौकिकानिकर्माणि ॥ ८ ॥ ९ ॥ दुःखंयथास्यात्तथाभविष्यामि ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ श्रोतास्मिश्रुतवानस्मि ॥ १५ ॥ विपर्ययंविनाशं ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

तन्मामिति अद्यैवप्राणत्यागंकरिष्यामीत्यर्थः ॥ २१ ॥ वितन्वतःविरचयतः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ अवृत्तेतिच्छेदः ॥ २६ ॥ २७ ॥ शल्यश्चमंत्रीतिपूर्वेणान्वयः ॥ २८ ॥ २९ ॥ ३० ॥ अंव

तन्मामद्यैवपश्यंतुपांडवाःसंशितव्रताः॥ विवृतंब्रह्मलोकस्यदीर्घमध्वानमास्थितं॥२१॥ वैशंपायनउवाच तस्यलालप्यमानस्यबहुशोकंवितन्वतः॥
शोकापहंनरेंद्रस्यसंजयोवाक्यमब्रवीत्॥ २२॥ शोकंराजन्व्यपनुदश्रुतास्तेवेदनिश्चयाः॥ शास्त्रागमाश्चविविधावृद्धेभ्योनृपसत्तम ॥ २३ ॥ सृंजयपुत्रशो
कार्तेयदूचुर्मुनयःपुरा॥ यथायौवनजंदर्पमास्थितेतेसुतेनृप॥ २४॥ नत्वयासुहृदांवाक्यंब्रुवतामवधारितं॥ स्वार्थश्चनकृतःकश्चिल्लुब्धेनफलगृद्धिना॥ २५॥
असिनैवैकधारेणस्वबुद्ध्यातुविचेष्टितं॥ प्रायशोऽवृत्तसंपन्नाःसततंपर्युपासिताः॥ २६॥ यस्यदुःशासनोमंत्रीराधेयश्चदुरात्मवान्॥ शकुनिश्चैवदुष्टात्माचि
त्रसेनश्चदुर्मतिः ॥ २७ ॥शल्यश्चयेनवैसर्वंशल्यभूतंकृतंजगत्॥ कुरुवृद्धस्यभीष्मस्यगांधार्याविदुरस्यच॥२८॥ द्रोणस्यचमहाराजकृपस्यचशरद्वतः॥ कृ
ष्णस्यचमहाबाहोनारदस्यचधीमतः ॥ २९ ॥ ऋषीणांचतथान्येषांव्यासस्यामिततेजसः॥ नकृतंतेनवचनंतवपुत्रेणभारत॥ नधर्मःसत्कृतःकश्चिन्नित्यंयुद्धम
भीप्सता॥ ३० ॥ अल्पबुद्धिरहंकारीनित्यंयुद्धमितिब्रुवन्॥ क्रूरोदुर्मर्षणोनित्यमसंतुष्टश्चवीर्यवान् ॥ ३१ ॥ श्रुतवानसिमेधावीसत्यवांश्चैवनित्यदा ॥ नमु
ह्यंतीदृशाःसंतोबुद्धिमंतोभवादृशाः॥ ३२ ॥ नधर्मःसत्कृतःकश्चित्तवपुत्रेणमारिष॥ क्षपिताःक्षत्रियाःसर्वेशत्रूणांवर्धितंयशः॥३३॥मध्यस्थोहित्वमप्यासी
र्नक्षमंकिंचिदुक्तवान्॥ दुर्धरेणत्वयाभारस्तुलयानसमंधृतः॥ ३४॥ आदावेवमनुष्येणवर्तितव्यंयथाक्षमं ॥ यथानातीतमर्थंवैपश्चात्तापेनयुज्यते॥ ३५॥
पुत्रगृद्ध्यात्वयाराजन्प्रियंतस्यचिकीर्षितं॥पश्चात्तापमिमंप्राप्तोनत्वंशोचितुमर्हसि॥३६॥मधुयःकेवलंदृष्ट्वाप्रपातंनानुपश्यति॥ सभ्रष्टोमधुलोभेनशोचत्ये
वंयथाभवान्॥ ३७॥ अर्थान्नशोचन्प्राप्नोतिनशोचन्विंदतेफलं॥ नशोचञ्छ्रियमाप्नोतिनशोचन्विंदतेपरं॥ ३८ ॥ स्वयमुत्पादयित्वाग्निंवस्त्रेणपरिवेष्टयन्॥
दह्यमानोमनस्तापंभजतेनसपंडितः॥ ३९ ॥ त्वयैवससुतेनायंवाक्यवायुसमीरितः॥ लोभाज्येनचसंसिक्तोज्वलितःपार्थपावकः॥४०॥तस्मिन्समिद्धेपति
ताःशलभाइवतेसुताः॥ तान्वैशराग्निनिर्दग्धान्नत्वंशोचितुमर्हसि॥ ४१ ॥ यच्चाश्रुपातात्कलिलंवदनंवहसेनृप॥अशास्त्रदृष्टमेतद्धिनप्रशंसंतिपंडिताः॥ ४२॥
विस्फुलिंगाइवह्येतान्दहंतिकिलमानवान्॥ जहीहिमन्युंबुद्ध्यावैधारयात्मानमात्मना॥ ४३॥

नृदुर्योधनआसीदितिशेषः ॥ ३१॥ ३२॥ ३३॥ ३४॥ ३५॥ ३६॥ प्रपातंपर्व
तापाद्भ्रंशं ॥ ३७॥ परंमोक्षं ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ दहंतिशोकाइत्यर्थात् मन्युर्दैन्यं मन्युर्दैन्येक्रतौक्रुधि इत्यमरः आत्मानंचित्तंआत्मनाधैर्येणधारय प्राणान्मात्याक्षीरित्यर्थः ॥ ४३ ॥

ततइति ॥ १ ॥ एषामरणांता अतउत्तिष्ठशोकंत्यज ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ भावांतरमभावोहि
॥ ४४ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेप्रथमोऽध्यायः ॥ १ ॥ ॥ ५० ॥ कयाचित्तुव्यपेक्षयेतिन्यायेनकृत्स्नप्रपंचस्याभावोब्रह्मतदादीनि भावोनामरूपात्मकतातन्मध्यानि तथाऽभावनिधनानीति तथाच आदावंतेचयन्नास्तिवर्तमानेपितत्तथेतिन्यायेनमध्येप्यभावभूतानां

वैशंपायनउवाच एवमाश्वासितस्तेनसंजयेनमहात्मना॥ विदुरोभूयएवाहबुद्धिपूर्वंपरंतप॥४४॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० विशोककरणेप्रथमोऽध्यायः॥ १॥ ॥५॥ ॥५॥ वैशंपायनउवाच ततोमृतसमैर्वाक्यैर्ह्लादयन्पुरुषर्षभं ॥ वैचित्रवीर्यंविदुरोयदुवाचनिबोधतत् ॥ ॥ १॥ विदुरउवाच उत्तिष्ठराजन्किंशेषेधारयात्मानमात्मना॥एषावैसर्वसत्वानांलोकेश्वरपरागतिः॥ २॥ सर्वेक्षयांतानिचयाःपतनांताःसमुच्छ्रयाः॥ संयोगाविप्रयोगांतामरणांतंचजीवितं ॥ ३ ॥ यदाशूरंचभीरुंचयमःकर्षतिभारत ॥ तत्किंनयोत्स्यंतिहितेक्षत्रियाःक्षत्रियर्षभ ॥ ४॥ अयुध्यमानोम्रियते युध्यमानश्चजीवति ॥ कालंप्राप्यमहाराजनकश्चिदतिवर्तते ॥ ५ ॥ अभावादीनिभूतानिभावमध्यानिभारत॥ अभावनिधनान्येवतत्रकापरिदेवना ॥ ६ ॥ नशोचन्मृतमन्वेतिनशोचन्म्रियतेनरः॥ एवंसांसिद्धिकेलोकेकिमर्थमनुशोचसि॥ ७॥ कालःकर्षतिभूतानिसर्वाणिविविधान्युत॥ नकालस्यप्रियःकश्चिन्न द्वेष्यःकुरुसत्तम॥ ८॥ यथावायुस्तृणाग्राणिसंवर्तयतिसर्वशः॥ तथाकालवशंयांतिभूतानिभरतर्षभ॥ ९ एकसार्थप्रयातानांसर्वेषांतत्रगामिनां ॥ यस्यकालःप्रयात्यग्रेतत्रकापरिदेवना॥ १०॥ नचाप्येतान्हतान्युद्धेराजन्शोचितुमर्हसि॥ प्रमाणंयदिशास्त्राणिगतास्तेपरमांगतिं ॥ ११ ॥ सर्वेस्वाध्यायवंतोहिसर्वे चचरितव्रताः॥ सर्वेचाभिमुखाःक्षीणास्तत्रकापरिदेवना॥ १२॥ अदर्शनादापतिताःपुनश्चादर्शनंगताः॥ नैतेतवनतेषांत्वंतत्रकापरिदेवना ॥ १३ ॥हतोपि लभतेस्वर्गंहत्वाचलभतेयशः॥ उभयंनोबहुगुणंनास्तिनिष्फलतारणे॥ १४॥ तेषांकामदुघान्लोकानिंद्रःसंकल्पयिष्यति ॥ इंद्रस्यातिथयोह्येतेभवंतिभरत र्षभ॥ १५॥ नयज्ञैर्दक्षिणावद्भिर्नतपोभिर्नविद्यया॥ स्वर्गंयांतितथामर्त्यायथाशूरारणेहताः॥ १६॥ शरीराग्निषुशूराणांजुहुवुस्तेशराहुतीः॥ हूयमानान्शरां श्चैवसेहुस्तेजस्विनोमिथः॥ १७॥ एवंराजंस्तवाचक्षेस्वर्ग्यंपंथानमुत्तमं॥ नयुद्धादधिकंकिंचित्क्षत्रियस्येहविद्यते॥ १८॥

संवर्तयतिस्ववशंनयति ॥ ९ ॥ तत्रगामिनांपरत्रगमनशीलानांयस्यकालउपस्थितःसोग्रेप्रयाति तेषांस्वमेषुप्रतीयमानानामिवनाशेव्यर्थःशोकइत्यर्थः ॥ ६ ॥ सांसिद्धिकेस्वभावसिद्धे ॥ ७ ॥ ८ ॥ ॥ १० ॥ ११ ॥ १२ ॥ अदर्शनादज्ञानात् ॥ १३ ॥ नोऽस्माकंक्षत्रियाणां ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ आचक्षेकथयामि ॥ १८ ॥

॥ १९ ॥ दीर्घमध्वानमास्थितंमांपांडवाअद्यैवपश्यंतुइत्युक्तं तत्राह आत्मानमिति कायंदेहं कार्यमित्यपिपाठः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ जानपदिकंसर्वसाधारणं अभावेनमरणेन

॥ १९ ॥ आत्मानमात्मनाश्वास्यमाशुचःपुरुषर्षभ ॥ नाद्यशोकाभि

क्षत्रियास्तेमहात्मानःशूराःसमितिशोभनाः॥ आशिषःपरमाःप्रामानशोच्याःसर्वएवहि॥ १९॥ आत्मानमात्मनाश्वास्यमाशुचःपुरुषर्षभ ॥ नाद्यशोकाभि
भूतस्त्वंकायमुत्स्रष्टुमर्हसि॥ २०॥ मातापितृसहस्राणिपुत्रदारशतानिच॥ संसारेष्वनुभूतानिकस्यतेकस्यवावयं ॥ २१ ॥ शोकस्थानसहस्राणिभयस्थान
शतानिच॥ दिवसेदिवसेमूढमाविशंतिनपंडितं॥ २२॥ नकालस्यप्रियःकश्चिन्नद्वेष्यःकुरुसत्तम ॥ नमध्यस्थःक्वचित्कालःसर्वकालःप्रकर्षति ॥ २३ ॥ का
लःपचतिभूतानिकालःसंहरतेप्रजाः॥ कालःसुप्तेषुजागर्तिकालोहिदुरतिक्रमः॥ २४ ॥ अनित्यंयौवनंरूपंजीवितंद्रव्यसंचयः ॥ आरोग्यंप्रियसंवासोगृध्येदे
पुनपंडितः॥ २५॥ नजानपदिकंदुःखमेकःशोचितुमर्हसि॥ अप्यभावेनयुज्येततच्चास्यननिवर्तते॥ २६॥ अशोचन्प्रतिकुर्वीतयदिपश्येत्पराक्रमं ॥ भैषज्य
मेतद्दुःखस्ययदेतन्नानुचिंतयेत्॥ २७॥ चिंत्यमानंहिनव्येतिभूयश्चापिप्रवर्धते॥ अनिष्टसंप्रयोगाच्चविप्रयोगात्प्रियस्यच॥ २८ ॥ मानुषामानसैर्दुःखैर्दह्यं
तेचाल्पबुद्धयः॥ नार्थोनधर्मोनसुखंयदेतदनुशोचसि॥ २९॥ नचनापैतिकार्यार्थात्त्रिवर्गाच्चैवहीयते ॥ अन्यामन्यांधनावस्थांप्राप्यवैशेषिकींनराः॥ असं
तुष्टाःप्रमुह्यंतिसंतोषंयांतिपंडिताः॥ ३०॥ प्रज्ञयामानसंदुःखंहन्याच्छारीरमौषधैः॥ एतद्विज्ञानसामर्थ्यंनबालैःसमतामियात्॥ ३१ ॥ शयानंचानुशेतेहि
तिष्ठंतंचानुतिष्ठति॥ अनुधावतिधावंतंकर्मपूर्वकृतंनरं॥ ३२॥ यस्यांयस्यामवस्थायांयत्करोतिशुभाशुभं॥तस्यांतस्यामवस्थायांतत्फलंसमुपाश्नुते॥३३॥
येनयेनशरीरेणयद्यत्कर्मकरोतियः॥ तेनतेनशरीरेणतत्फलंसमुपाश्नुते ॥ ३४ ॥ आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मनः ॥ आत्मैवह्यात्मनःसाक्षीकृतस्या
पकृतस्यच॥ ३५॥ शुभेनकर्मणासौख्यंदुःखंपापेनकर्मणा॥ कृतंभवतिसर्वत्रनाकृतंविद्यतेक्वचित्॥ ३६ ॥ नहिज्ञानविरुद्धेषुबह्वपायेषुकर्मसु॥ मूलघाति
पुसज्जंतेबुद्धिमंतोभवद्विधाः॥ ३७॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० धृतराष्ट्रविशोककरणेद्वितीयोऽध्यायः॥ २॥ ॥५॥ ॥५॥

धृतराष्ट्रउवाच सुभाषितैर्महाप्राज्ञशोकोयंविगतोमम॥ भूयएवतुवाक्यानिश्रोतुमिच्छामितत्त्वतः॥ १॥

तत्त्वदुःखंच ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ कार्यार्थान्नापैतीतिनअपित्वपैत्येव ॥ ३० ॥ ३१॥३२ ॥ अवस्थायांयौवनादिरूपायां ॥ ३३ ॥ येनेति स्थूलेनदेहेनकृतंतत्तेनैवभुज्यते मनःकृतंचेत्तेनैवभु
ज्यतेस्वप्नादौ ॥ ३४ ॥ अपक्वंतस्यायथार्थस्य ॥३५ ॥ ३६ ॥ मूलंशरीरं ॥ ३७ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेद्वितीयोऽध्यायः ॥ २ ॥ ॥५॥ सुभाषितैरिति॥ १ ॥

॥ २ ॥ शांतिंचित्तस्योपरतिं ॥ ३ ॥ शांतौहेतुर्लोकस्यअशाश्वतत्वज्ञानमित्याह अशाश्वतमिति ॥ ४ ॥ यदेति पितृवनंमृत्युं ॥ ५ ॥ यदिमरणमात्राद्विमुच्यतेतर्हिदेहशोषणंकिमर्थंक्रियतइत्याह निर्मां
सैरिति तत्रपरलोके तेषांमृतानां परेतपस्विनः तस्मान्मरणानंतरमपिविषमगतिरस्त्येवेत्यर्थः ॥ ६ ॥ येनहेतुनाअदृष्टरूपेणकुलेनरूपेणचविशेषणंप्राप्नोतिसोदृष्टरूपोहेतुःसर्वत्रकार्येस्तीतिपूर्वकर्माधीने

विदुरउवाच यतोयतोमनोदुःखात्सुखाद्वापिप्रमुच्यते ॥ त
अनिष्टानांचसंसर्गादिष्टानांचविसर्जनात् ॥ कथंहिमानसैर्दुःखैःप्रमुच्यंतेतुपंडिताः ॥ २ ॥
तस्ततोनियम्यैतच्छांतिंविंदेतवैबुधः ॥ ३ ॥ अशाश्वतमिदंसर्वंचिंत्यमानंनरर्षभ ॥ कदलीसन्निभोलोकःसारोह्यस्यनविद्यते ॥ ४ ॥ यदाप्राज्ञाश्चमूढाश्चधन
वंतोथनिर्धनाः ॥ सर्वेपितृवनंप्राप्यस्वपंतिविगतज्वराः ॥ ५ ॥ निर्मांसैरस्थिभूयिष्ठैर्गात्रैःस्नायुनिबंधिभिः ॥ किंविशेषंप्रपश्यंतितत्रतेपांपरेजनाः ॥ ६ ॥ येन
प्रत्यवगच्छेयुःकुलरूपविशेषणं ॥ कस्मादन्योन्यमिच्छंतिविप्रलब्धधियोनराः ॥ ७ ॥ गृहाणीवहिमर्त्यानामाहुर्देहानिपंडिताः ॥ कालेनविनियुज्यंतेसत्वमे
कंतुशाश्वतं ॥ ८ ॥ यथाजीर्णमजीर्णंवावस्त्रंत्यक्त्वातुपूरुषः ॥ अन्यद्रोचयतेवस्त्रमेवंदेहाःशरीरिणां ॥ ९ ॥ वैचित्रवीर्यसाध्यंहिदुःखंवायदिवासुखं ॥ प्राप्नुवंती
हभूतानिस्वकृतेनैवकर्मणा ॥ १० ॥ कर्मणाप्राप्यतेस्वर्गःसुखंदुःखंचभारत ॥ ततोवहतितंभारमवशःस्ववशोपिवा ॥ ११ ॥ यथाचमृन्मयंभांडंचक्रारूढंविप
द्यते ॥ किंचित्प्रक्रियमाणंवाकृतमात्रमथापिवा ॥ १२ ॥ छिन्नंवाप्यवरोप्यंतमवतीर्णमथापिवा ॥ आर्द्रंवाप्यथवाशुष्कंपच्यमानमथापिवा ॥ १३ ॥ उत्तार्य
माणमापाकादुद्धृतंचापिभारत ॥ अथवापरिभुज्जंतमेवंदेहाःशरीरिणां ॥ १४ ॥ गर्भस्थोवाप्रसूतोवाप्यथवादिवसांतरः ॥ अर्धमासगतोवापिमासमात्रगतो
पिवा ॥ १५ ॥ संवत्सरगतोवापिद्विसंवत्सरएववा ॥ यौवनस्थोथमध्यस्थोवृद्धोवापिविपद्यते ॥ १६ ॥ प्राक्कर्मभिस्तुभूतानिभवंतिनभवंतिच ॥ एवंसांसिद्धि
केलोकेकिमर्थमनुतप्यसे ॥ १७ ॥ यथातुसलिलंराजन्क्रीडार्थमनुसंतरत् ॥ उन्मज्जेच्चनिमज्जेच्चकिंचित्सत्वंनराधिप ॥ १८ ॥ एवंसंसारगहनेउन्मज्जननिम
ज्जने ॥ कर्मभोगेनबध्यंतेक्लिश्यंतेचाल्पबुद्धयः ॥ १९ ॥ येतुप्राज्ञाःस्थिताःसत्वेसंसारेस्मिन्हितैषिणः ॥ समागमज्ञाभूतानांतेयांतिपरमांगतिं ॥ २० ॥ इति
श्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० विशोककरणेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ अवरोप्यंतंअवरोप्यमाणं ॥ १३ ॥ आपाकात्कुलालक
पुपुत्रादिसंयोगवियोगेषुनशोकादिकंयुक्तमितिभावः ॥ ७ ॥ सत्वंलिंगशरीरं शाश्वतंमोक्षपर्यंतंस्थायित्वात् ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥
तान्पात्रपाककूटात् ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

कथमिति ॥ १ ॥ जन्मप्रभृतिशुक्रशोणितसंयोगादारभ्य क्रियागर्भवृद्धिरूपाउपलक्ष्यते कलिलंशुक्रशोणितसंयोगः एकरात्रोषितंकलिलंभवतिपंचरात्राद्बुद्बुदइत्यादिशास्त्रादवगम्यते तत्रकलिलेवसनेजीवइति शेषः किंचिदंतरंपूर्वदिनापेक्षयावृत्त्यवस्थाभेदेनअल्पेनपरिमाणांतरेण ॥ २ ॥ पंचमेमासेअतीतेअवयवाभिवृद्धेपिंडेवासंचैतन्यस्याविर्भावंअकल्पयत् पूर्वंचैतन्यसत्तामात्रंपंचमेतीतेतुषष्ठेआविर्भावइतिविशेषः ततःसदशमासाभ्यंतरेसंपूर्णांगगर्भोजायते ॥ ३ ॥ ४ ॥ ५ ॥ तस्माद्योनिद्वारात् संसारात्संसारंप्राप्य ॥ ६ ॥ ७ ॥ संगःविषयसंगःस्वादुर्येषांतैः ॥ ८ ॥ ९ ॥ यद्यपिमूढःपापंनावैतितथापिध्यानपरिनिष्ठितास्ततस्तथैव

धृतराष्ट्रउवाच कथंसंसारगहनंविज्ञेयंवदतांवर ॥ एतदिच्छाम्यहंश्रोतुंतत्त्वमाख्याहिपृच्छतः ॥ १ ॥ विदुरउवाच . जन्मप्रभृतिभूतानांक्रियांसर्वोप
लक्ष्यते ॥ पूर्वमेवेहकलिलेवसतेकिंचिदंतरं ॥ २ ॥ ततःसपंचमेऽतीतेमासेवासमकल्पयत् ॥ ततःसर्वांगसंपूर्णोगर्भोवैसतुजायते ॥ ३ ॥ अमेध्यमध्येवसतिमां
सशोणितलेपने ॥ ततस्तुवायुवेगेनऊर्ध्वपादोह्यधःशिराः ॥ ४ ॥ योनिद्वारमुपागम्यबहून्क्लेशान्समृच्छति ॥ योनिसंपीडनाच्चैवपूर्वकर्मभिरन्वितः ॥ ५ ॥ तस्मा
न्मुक्तःससंसारादन्यान्पश्यत्युपद्रवान् ॥ ग्रहास्तमनुगच्छंतिसारमेयाइवामिषं ॥ ६ ॥ ततःप्राप्तोत्तरेकालेव्याधयश्चापितंतथा ॥ उपसर्पंतिजीवंतंबध्यमानंस्व
कर्मभिः ॥ ७ ॥ तंबद्धमिंद्रियैःपाशैःसंगस्वादुभिरावृतं ॥ व्यसनान्यपिवर्तंतेविविधानिनराधिप ॥ ८ ॥ बध्यमानश्चतैर्भूयोनैवतृप्तिमुपैतिसः ॥ तदानावैतिचै
वायंप्रकुर्वन्साध्वसाधुवा ॥ ९ ॥ तथैवपरिरक्षंतियेध्यानपरिनिष्ठिताः ॥ अयंनबुध्यतेतावद्यमलोकमथागतं ॥ १० ॥ यमदूतैर्विकृष्यंश्चमृत्युंकालेनगच्छति ॥
वाग्घीनस्यचयन्मात्रमिष्टानिष्टंकृतंमुखे ॥ भूयएवात्मनात्मानंबध्यमानमुपेक्षते ॥ ११ ॥ अहोविनिकृतोलोकोलोभेनचवशीकृतः ॥ लोभक्रोधभयोन्मत्तो
नात्मानमवबुध्यते ॥ १२ ॥ कुलीनत्वेचरमतेदुष्कुलीनान्विकुत्सयन् ॥ धनदर्पेणदृप्तश्चदरिद्रान्परिकुत्सयन् ॥ १३ ॥ मूर्खानितिपरानाहनात्मानंसमवेक्षते ॥ दो
षान्क्षिपतिचान्येषांनात्मानंशास्तुमिच्छति ॥ १४ ॥ यदाप्राज्ञाश्चमूर्खाश्चधनवंतश्चनिर्धनाः ॥ कुलीनाश्चाकुलीनाश्चमानिनोथाप्यमानिनः ॥ १५ ॥ सर्वे
पितृवनंप्राप्ताःस्वपंतिविगतत्वचः ॥ निर्मांसैरस्थिभूयिष्ठैर्गात्रैःस्नायुनिबंधनैः ॥ १६ ॥ विशेषंनप्रपश्यंतितत्रतेषांपरेजनाः ॥ येनप्रत्यवगच्छेयुःकुलरूपवि
शेषणं ॥ १७ ॥

यथाशास्त्रंआत्मानंपरिरक्षंत्येव ॥ १० ॥ तस्यैवंयमदूतैर्नीयमानस्यवाग्घीनस्यसर्वेंद्रियविकलस्ययन्मात्रंयत्किंचिदिष्टानिष्टंपु
ण्यंपापंतन्मुखेप्रथमंकृतंभवति तत्रापिपुण्यफलंभुंजानोविषयेषुयोगात्आत्मानंबध्यमानंगर्भवासादिनायात्यमानंउपेक्षतेनतुस्वहितंकामयते ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ विगतत्वचःआच्छाद
नहीनाः ॥ १६ ॥ तस्यनास्तिक्यमनुवदति येनेत्यादिना ॥ १७ ॥

यदेतिसार्धःपरमतानुवादः प्रत्यक्षादितःसर्वेसर्वाणिभूतानिसमंतुल्यंस्वपंतिकृमिविट्भस्मभावंगच्छंतिततदान्योन्यंप्रलब्धुंविप्रलब्धुंकृत्विग्यजमानंदेहिअमुंलोकंप्राप्स्यसीतिप्रतारयितुंदुर्बुधाःदुष्पंडिताइच्छंति
.देहरूपस्यात्मनोनष्टत्वात् आमुष्मिकफलवचनमनर्थकंस्यादितिभावः ॥१८॥ वर्तेतपरमार्थसाधनव्यापारंकुर्यात्॥१९॥पंथानोमार्गान्द्वितीयार्थेप्रथमा अन्यान्गतिमार्गान्मोक्षयतेकिंतुऊर्ध्वमार्गमेवप्रापय.
ति ॥ २० ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ५ ॥ यदिदंधर्मगहनमित्यध्यायस्यविवरणंउत्तराध्यायेनक्रियतेअहोखलुमहद्दुःखमित्यादिना ॥ १ ॥ २ ॥

यदासर्वेसमंन्यस्ताःस्वपंतिधरणीतले॥कस्मादन्योन्यमिच्छंतिप्रलब्धुमिहदुर्बुधाः॥ १८॥ प्रत्यक्षंचपरोक्षंचयोनिशम्यश्रुतिंत्विमां॥अध्रुवेजीवलोकेस्मि
न्योधर्ममनुपालयन्॥जन्मप्रभृतिवर्तेतप्राप्नुयात्परमांगतिं॥ १९॥ एवंसर्वंविदित्वावैयस्तत्त्वमनुवर्तते॥सप्रमोक्षयतेसर्वान्पंथानोमनुजेश्वर॥ २०॥ इ
तिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० विशोककरणेचतुर्थोऽध्यायः॥४॥ ॥५॥ धृतराष्ट्रउवाच यदिदंधर्मगहनंबुद्ध्यासमनुगम्यते॥तद्विविस्तर
तःसर्वंबुद्धिमार्गंप्रशंसमे॥ १॥ विदुरउवाच अत्रतेवर्तयिष्यामिनमस्कृत्वास्वयंभुवे॥यथासंसारगहनंवदंतिपरमर्षयः॥ २॥ कश्चिन्महतिकांतारेव
र्तमानोद्विजःकिल॥महद्दुर्गमनुप्राप्तोवनंक्रव्यादसंकुलं॥ ३॥ सिंहव्याघ्रगजर्क्षौघैरतिघोरंमहास्वनैः॥पिशितादैरतिभयैर्महोग्राकृतिभिस्तथा॥ ४ ॥समं
तात्संपरिक्षिप्तंयत्स्मदृष्ट्वात्रसेद्यमः॥तदस्यदृष्ट्वाहृदयमुद्वेगमगमत्परं॥ ५॥ अभ्युच्छ्रयंचरोम्णांवैविक्रियाश्चपरंतप॥सतद्वनंव्यनुसरन्संप्रधावन्नितस्ततः
॥ ६॥ वीक्षमाणोदिशःसर्वाःशरणंक्वभवेदिति॥सतेषांछिद्रमन्विच्छन्प्रद्रुतोभयपीडितः॥ ७॥ नचनिर्यातिवैदूरंनवातैर्विप्रमोच्यते॥अथापश्यद्वनंघोरंस
मंताद्वागुरावृतं॥ ८॥ बाहुभ्यांसंपरिक्षिप्तंस्त्रियापरमघोरया॥पंचशीर्षधरैर्नागैःशैलैरिवसमुन्नतैः॥ ९॥ नभःस्पृशैर्महावृक्षैःपरिक्षिप्तंमहावनं॥वनमध्येच
तत्राभूदुदपानःसमावृतः॥ १०॥ वल्लीभिस्तृणच्छन्नाभिर्दृढाभिरभिसंवृतः॥पपातसद्विजस्तत्रनिगूढसलिलाशये॥ ११॥ विलग्नश्चाभवत्तस्मिन्लतासंता
नसंकुले॥पनसस्ययथाजातंवृंतबद्धंमहाफलं॥ १२॥ सतथालंबतेतत्रह्यूर्ध्वपादोह्यधःशिराः॥अथतत्रापिचान्योस्यभूयोजातउपद्रवः॥ १३॥ कूपमध्ये
महानागमपश्यतमहाबलं॥कूपवीनाहवेलायामपश्यतमहागजं॥ १४॥

द्वाभ्यामविद्याकर्मभ्यांजायतइतिद्विजःजंतुः वनंसंसारः क्रव्यादाव्याधयः ॥ ३ ॥ महानुस्वनोदुःखशब्दोयैस्तैः सिंहादिभिर्व्याधिभिः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ वागुराःविषयतृष्णादिवासनाः ॥ ८ ॥ ९ ॥
॥ १० ॥ ११ ॥ विलग्नःतत्रैवाभिमानवान् ॥ १२ ॥ ऊर्ध्वपादोह्यधःशिराःस्वर्गच्युतःसंसारमनुसृतः ॥ १३ ॥ नागंकालसर्पं वीनाहोमुखबंधनं तस्यस्वदेहकूपप्रच्छादकस्यमरणकारणस्यक्रोधलोभादेर्वे
लायांसंवत्सराख्यःकालगजःपरिवर्तते तंतिरोधातुंसहायोभवति ॥ १४ ॥

षट्कृतवःवक्त्राणियस्यतं कृष्णशुक्लंकृष्णशुक्लपक्षमयं द्विषट्काःद्वादशपादामासायस्य वल्लीजीविताशा वृक्षआयुर्जीवितकाङ्क्षः ॥ १५ ॥ प्रशाखासुबाल्ययौवनाद्यवस्थासु मधुकराःकामरसार्थिनइंद्रियगणाः ॥ १६ ॥ मधुकामान्संवृत्यसंगृह्य निकेताःसंधिगृहास्तज्जाः समीहंतेइंद्रियमधुकराः ॥ १७ ॥ इंद्रियतृष्णयाजीवोपिनल्दप्यतीत्याह तेषामिति ॥ १८ ॥ १९ ॥ २० ॥ तत्रैवकामसुखे कृष्णाःश्वेता

षड्वक्त्रंकृष्णशुक्लंचद्विषट्कपदचारिणं ॥ क्रमेणपरिसर्पंतंवल्लीवृक्षसमावृतं ॥ १५ ॥ तस्यचापिप्रशाखासुवृक्षशाखावलंबिनः ॥ नानारूपामधुकराघोररूपाभयावहाः ॥ १६ ॥ आसतेमधुसंवृत्यपूर्वमेवनिकेतजाः ॥ भूयोभूयःसमीहंतेमधूनिभरतर्षभ ॥ १७ ॥ स्वादनीयानिभूतानांयैर्बालोविप्रकृष्यते ॥ तेषांमधूनांबहुधाधाराप्रस्रवतेतदा ॥ १८ ॥ आलंबमानःसपुमान्धारांपिबतिसर्वदा ॥ नचास्यतृष्णाविरतापिबमानस्यसंकटे ॥ १९ ॥ अभीप्सतितदानित्यमतृप्तःसपुनःपुनः ॥ नचास्यजीवितेराजन्निर्वेदःसमजायत ॥ २० ॥ तत्रैवचमनुष्यस्यजीविताशाप्रतिष्ठिता ॥ कृष्णाःश्वेताश्चतंवृक्षंकुट्टयंतिचमूषिकाः ॥ २१ ॥ व्यालैश्चवनदुर्गांतेस्त्रियाचपरमोग्रया ॥ कूपाधस्ताच्चनागेनवीनाहेकुंजरेणच ॥ २२ ॥ वृक्षप्रपाताच्चभयंमूषिकेभ्यश्चपंचमं ॥ मधुलोभान्मधुकरैःषष्ठमाहुर्महद्भयं ॥ २३ ॥ एवंसवसतेतत्रक्षिप्तःसंसारसागरे ॥ नचैवजीविताशायांनिर्वेदमुपगच्छति ॥ २४ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० विशोककरणेपंचमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ धृतराष्ट्रउवाच अहोखलुमहद्दुःखंकृच्छ्रवासश्चतस्यह ॥ कथंतस्यरतिस्तत्रतुष्टिर्वावदतांवर ॥ १ ॥ सदेशःक्वनुयत्रासौवसतेधर्मसंकटे ॥ कथंवासविमुच्येतनरस्तस्मान्महाभयात् ॥ २ ॥ एतन्मेसर्वमाचक्ष्वसाधुचेष्टामहेतदा ॥ कृपामेमहतीजातातस्याभ्युद्धरणेनहि ॥ ३ ॥ विदुरउवाच उपमानमिदंराजन्मोक्षविद्भिरुदाहृतं ॥ सुकृतंविंदतेयेनपरलोकेपुमानवः ॥ ४ ॥ उच्यतेयत्तुकांतारंमहासंसारएवसः ॥ वनंदुर्गंह्यदयच्चैतत्संसारगहनंहितत् ॥ ५ ॥ येचतेकथिताव्यालाव्याधयस्तेप्रकीर्तिताः ॥ यासानारीबृहत्कायाअध्यतिष्ठततत्रवै ॥ ६ ॥ तामाहुस्तुजरांप्राज्ञारूपवर्णविनाशिनीं ॥ यस्तत्रकूपोनृपतेसतुदेहःशरीरिणाम् ॥ ७ ॥ यस्तत्रवसतेधस्तान्महाहिःकालएवसः ॥ अंतकःसर्वभूतानांदेहिनांसर्वहार्यसौ ॥ ८ ॥ कूपमध्येचयाजातावल्लीयत्रसमानवः ॥ प्रतानेलंबतेलग्नोजीविताशाशरीरिणां ॥ ९ ॥ सयस्तुकूपवीनाहेतंवृक्षंपरिसर्पति ॥ षड्वक्त्रःकुंजरोराजन्सतुसंवत्सरःस्मृतः ॥ १० ॥

श्चमूषिकाःरात्र्यहानि वृक्षंकुट्टयंतिआयुःक्षिण्वंति ॥ २१ ॥ व्यालैःदुष्टमतंगजादितुल्यैर्व्याधिभिः स्त्रियाजरया नागेनमृत्युसर्पेण कुंजरेणसंवत्सराख्येनकालेन ॥ २२ ॥ वृक्षप्रपातोमरणं मधुलोभाद्विषयसुखासक्तेः ॥ २३ ॥ २४ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेपंचमोऽध्यायः ॥ ५ ॥ अहोखल्वितिस्पष्टार्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

अहोभिहितमिति ॥ १ ॥

॥ ११ ॥ १२ ॥ १३ ॥ येनेति येननिर्वेदेनपाशांश्छिंदंति ॥ १४ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेषष्ठोऽध्यायः ॥ ६ ॥ ॥७॥ ॥ ७ ॥

॥ १२ ॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ निधयःकालस्यकर्तव्यार्थसाधकाः अभिलिखितानिसर्वतःवयसाआयुषासुखदुःखजराव्याधिभिःकर्मणाअदृष्टरूपेणन्यस्तानि

॥ ११ ॥ रात्र्यहानितुतान्याहुर्भूतानांपरिचिंतकाः ॥ येतेमधुकरास्तत्र मुखानिकृतवोमासाःपादाद्वादशकीर्तिताः ॥ येतुवृक्षंनिकृंततिमूषिकाःपन्नगास्तथा ॥ ११ ॥ कामास्तेपरिकीर्तिताः ॥ १२ ॥ यास्तुताबहुशोधाराःस्रवंतिमधुनिस्रवं ॥ तांस्तुकामरसान्विद्याद्यत्रमज्जंतिमानवाः ॥ १३ ॥ एवंसंसारचक्रस्यपरिवृत्तिंविदु र्बुधाः ॥ येनसंसारचक्रस्यपाशांश्छिंदंतिवैबुधाः ॥ १४ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० विशोककरणेषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥७॥

धृतराष्ट्रउवाच अहोभिहितमाख्यानंभवतातत्त्वदर्शिना ॥ भूयएवतुमेहर्षःश्रुत्वावागमृतंतव ॥ १ ॥ विदुरउवाच शृणुभूयःप्रवक्ष्यामिमार्गस्यैतस्य विस्तरं ॥ यच्छ्रुत्वाविप्रमुच्यंतेसंसारेभ्योविचक्षणाः ॥ २ ॥ यथातुपुरुषोराजन्दीर्घमध्वानमास्थितः ॥ क्वचित्क्वचिच्छ्रमाच्छ्रांतःकुरुतेवासमेववा ॥ ३ ॥ एवंसं सारपर्यायेगर्भवासेषुभारत ॥ कुर्वंतिदुर्बुधावासंमुच्यंतेतत्रपंडिताः ॥ ४ ॥ तस्मादध्वानमेवैतमाहुःशास्त्रविदोजनाः ॥ यत्तुसंसारगहनंवनमाहुर्मनीषिणः ॥ ५ ॥ सोयंलोकसमावर्तोमर्त्यानांभरतर्षभ ॥ चराणांस्थावराणांचनगृध्येत्तत्रपंडितः ॥ ६ ॥ शारीरामानसाश्चैवमर्त्यानांयेतुव्याधयः ॥ प्रत्यक्षाश्चपरोक्षाश्चते व्यालाःकथिताबुधैः ॥ ७ ॥ क्लिश्यमानाश्चतैर्नित्यंवार्यमाणाश्चभारत ॥ स्वकर्मभिर्महाव्यालैर्नोद्विजंत्यल्पबुद्धयः ॥ ८ ॥ अथापितैर्विमुच्येतव्याधिभिःपुरुषो नृप ॥ आवृणोत्येवतंपश्चाज्जरारूपविनाशिनी ॥ ९ ॥ शब्दरूपरसस्पर्शैर्गंधैश्चविविधैरपि ॥ मज्जमांसमहापंकेनिरालंबेसमंततः ॥ १० ॥ संवत्सराश्चमासाश्च पक्षाहोरात्रसंधयः ॥ क्रमेणास्योपयुंजंतिरूपमायुस्तथैवच ॥ ११ ॥ एतेकालस्यनिधयोनैतान्जानंतिदुर्बुधाः ॥ धात्राभिलिखितान्याहुःसर्वभूतानिकर्मणा ॥ १२ ॥ रथःशरीरंभूतानांसत्वमाहुस्तुसारथिं ॥ इंद्रियाणिहयानाहुःकर्मबुद्धिस्तुरश्मयः ॥ १३ ॥ तेषांहयानांयोवेगंधावतामनुधावति ॥ सतुसंसारचक्रेस्मिं श्चक्रवत्परिवर्तते ॥ १४ ॥ यस्तान्संयमतेबुद्ध्यासंयतोननिवर्तते ॥ येतुसंसारचक्रेस्मिंश्चक्रवत्परिवर्तिते ॥ १५ ॥

सत्वंबुद्धिः कर्मबुद्धिर्मनः मनःप्रग्रहमेवचेतिश्रुतेः ॥ १३ ॥ यःसंधानाभिमानीभोक्ता वेगंअनुधावतिकर्ममार्गप्रवृत्तिअनुसरति परिवर्ततेभ्रमति ॥ १४ ॥ यःसंयतःसंयमी तानइंद्रियाणांनुसंयमनेसंयच्छते सननिवर्तते संसारेस्मृतःसन्नपुनरावर्तते ॥ १५ ॥

जीवंतोपितादृशानमुक्तं निन भ्रमंतियोनिचक्रे ॥ १६ ॥ शतशाखःसंसारवृक्षः ॥ १७ ॥ क्रोधलोभौनिराकृतौयेनसः यास्यंयमलोकप्रापकंसंसारगहनं ॥ १९ ॥ अनुतर्षुलंतृष्णाशीलंलक्ष्मीकृत्य ॥ २० ॥

भ्रममाणानमुत्यंतिसंसारेनभ्रमंतिते ॥ संसारेभ्रमतांराजन्दुःखमेतद्धिजायते ॥ १६ ॥ तस्मादस्यनिवृत्त्यर्थंयत्नमेवाचरेद्बुधः ॥ उपेक्षानात्रकर्तव्याशतशाखःप्रवर्धते ॥ १७ ॥ यतेंद्रियोनरोराजन्क्रोधलोभनिराकृतः ॥ संतुष्टःसत्यवादीयःसशांतिमधिगच्छति ॥ १८ ॥ याम्यमाहूरथंत्येनंमुत्यंतेयेनदुर्बुधाः ॥ संचैतत्प्राप्नुयाद्राजन्यत्त्वंप्राप्तोनराधिप ॥ १९ ॥ अनुतर्षुलमेवैतद्दुःखंभवतिमारिष ॥ राज्यनाशंसुहृन्नाशंसुतनाशंचभारत ॥ साधुःपरमदुःखानांदुःखभैषज्यमाचरेत् ॥ २० ॥ ज्ञानौषधमवाप्येहदूरपारंमहौषधं ॥ छिंद्याद्दुःखमहाव्याधिंनरःसंयतमानसः ॥ २१ ॥ नविक्रमोनचाप्यर्थोनमित्रंनसुहृज्जनः ॥ तथोन्मोचयतेदुःखाद्यथात्मास्थिरसंयमः ॥ २२ ॥ तस्मान्मैत्रंसमास्थायशीलमापद्यभारत ॥ दमस्त्यागोप्रमादश्चतेत्रयोब्रह्मणोहयाः ॥ २३ ॥ शीलरश्मिसमायुक्तःस्थितोयोमानसेरथे ॥ त्यक्त्वामृत्युभयंराजन्ब्रह्मलोकंसगच्छति ॥ २४ ॥ अभयंसर्वभूतेभ्योयोददातिमहीपते ॥ सगच्छतिपरंस्थानंविष्णोःपदमनामयं ॥ २५ ॥ नतत्क्रतुसहस्रेणनोपवासैश्चनित्यशः ॥ अभयस्यचदानेनयत्फलंप्राप्नुयान्नरः ॥ २६ ॥ नह्यात्मनःप्रियतरंकिंचिद्भूतेषुनिश्चितं ॥ अनिष्टंसर्वभूतानांमरणंनामभारत ॥ २७ ॥ तस्मात्सर्वेषुभूतेषुदयाकार्याविपश्चिता ॥ नानामोहसमायुक्ताबुद्धिजालेनसंवृताः ॥ २८ ॥ असूक्ष्मदृष्टयोमंदाभ्राम्यंतेतत्रतत्रह ॥ सुसूक्ष्मदृष्टयोराजन्व्रजंतिब्रह्मशाश्वतं ॥ २९ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० विशोककरणेसप्तमोऽध्यायः ॥ ७ ॥ ॥ ७ ॥ वैशंपायनउवाच विदुरस्यतुतद्वाक्यंनिशम्यकुरुसत्तमः ॥ पुत्रशोकाभिसंतप्तःपपातभुविमूर्छितः ॥ १ ॥ तंतथापतितंभूमौनिःसंज्ञंप्रेक्ष्यबांधवाः ॥ कृष्णद्वैपायनश्चैवक्षत्ताचविदुरस्तथा ॥ २ ॥ संजयःसुहृदश्चान्येद्वास्थायेचास्यसंमताः ॥ जलेनसुखशीतेनतालवृंतैश्चभारत ॥ ३ ॥ पस्पर्शुश्चकरैर्गात्रंवीज्यमानश्चयत्नतः ॥ आश्वास्यतुचिरंकालंधृतराष्ट्रंतथागतं ॥ ४ ॥ अथदीर्घस्यकालस्यलब्धसंज्ञोमहीपतिः ॥ विललापचिरंकालंपुत्राधिभिरभिप्लुतः ॥ ५ ॥ धिगस्तुखलुमानुष्यंमानुषेषुपरिग्रहे ॥ यतोमूलानिदुःखानिसंभवंतिमुहुर्मुहुः ॥ ६ ॥ पुत्रनाशेर्थनाशेचज्ञातिसंबंधिनामथ ॥ प्राप्यतेसुमहद्दुःखंविषाग्निप्रतिमंविभो ॥ ७ ॥

दूरपारंब्रह्मज्ञानं ॥ २१ ॥ स्थिरःपुनर्निवर्तितुमसमर्थः संयमस्तुच्छविषयेभ्यइंद्रियपरावृत्तिर्यस्यतादृशः आत्मास्वयं ॥ २२ ॥ ब्रह्मणःब्रह्मलोकस्यप्रापकाइतिशेषः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेसप्तमोऽध्यायः ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ विदुरस्येति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

येनदह्यंतिगात्राणियेनप्रज्ञाविनश्यति॥ येनाभिभूतःपुरुषोमरणंबहुमन्यते॥ ८॥ तदिदंव्यसनंप्राप्तंमयाभाग्यविपर्ययात्॥ तस्यांतंनाधिगच्छामि ऋतेप्रा
णविमोक्षणात्॥ ९॥ तथैवाहंकरिष्यामि अद्यैवद्विजसत्तम॥ इत्युक्त्वातुमहात्मानंपितरंब्रह्मवित्तमं॥ १०॥ धृतराष्ट्रोभवन्मूढःसशोकंपरमंगतः ॥ अभूच्चतू
ष्णींराजासौध्यायमानोमहीपते॥ ११॥ तस्यतद्वचनंश्रुत्वाकृष्णद्वैपायनःप्रभुः॥ पुत्रशोकाभिसंतप्तंपुत्रंवचनमब्रवीत्॥ १२॥ व्यासउवाच धृतराष्ट्र
महाबाहोयत्त्वांवक्ष्यामितच्छृणु॥ श्रुतवानसिमेधावीधर्मार्थकुशलःप्रभो॥ १३॥ नतेस्त्यविदितंकिंचिद्वेदितव्यंपरंतप॥ अनित्यतांहिमर्त्यानांविजानासिन
संशयः॥ १४॥अध्रुवेजीवलोकेचस्थानेवाशाश्वतेसति॥ जीवितेमरणांतेचकस्माच्छोचसिभारत॥ १५॥ प्रत्यक्षंतवराजेंद्रवैरस्यास्यसमुद्भवः॥ पुत्रंतेका
रणंकृत्वाकालयोगेनकारितः॥ १६॥ अवश्यंभवितव्येचकुरूणांवैशसेनृप॥ कस्माच्छोचसितान्शूरान्गतान्परमिकांगतिं ॥ १७॥ जानताचमहाबाहोविदु
रेणमहात्मना॥ यतितंसर्वयत्नेनशमंप्रतिजनेश्वर॥ १८॥ नचदैवकृतोमार्गःशक्योभूतेनकेनचित्॥ घटतापिचिरंकालंनियंतुमितिमेमतिः॥ १९॥ देवता
नांहियत्कार्यंमयाप्रत्यक्षतःश्रुतं॥ तत्तेहंसंप्रवक्ष्यामिथथास्थैर्यंभवेत्तव॥ २०॥ पुराहंत्वरितोयातःसभामैंद्रींजितक्लमः॥ अपश्यंतत्रचतदासमवेतान्दिवौक
सः॥ २१॥ नारदप्रमुखाश्चापिसर्वेदेवर्षयोनघ॥ तत्रचापिमयादृष्टाःपृथिवीपृथिवीपते॥ २२॥ कार्यार्थमुपसंप्राप्तादेवतानांसमीपतः॥ उपगम्यतदाधात्री
देवानाहसमागतान्॥ २३॥ यत्कार्यंममयुष्माभिर्ब्रह्मणःसदनेतदा॥ प्रतिज्ञातंमहाभागास्तच्छीघ्रंसंविधीयतां॥ २४॥ तस्यास्तद्वचनंश्रुत्वाविष्णुर्लोकनम
स्कृतः॥ उवाचवाक्यंप्रहसन्पृथिवींदेवसंसदि॥ २५॥ धृतराष्ट्रस्यपुत्राणांयस्तुज्येष्ठःशतस्यवै॥ दुर्योधनइतिख्यातःसतेकार्यंकरिष्यंति॥ २६॥ तंचप्राप्यमं
हीपालंकृतकृत्याभविष्यसि॥ तस्यार्थेपृथिवीपालाःकुरुक्षेत्रंसमागताः॥ २७॥ अन्योन्यंघातयिष्यंतिदृढैःशस्त्रैःप्रहारिणः॥ ततस्तेभविनादेविभारस्ययुधि
नाशनं॥ २८॥ गच्छशीघ्रंस्वकंस्थानंलोकान्धारयशोभने॥ यएषतेसुतोराजन्लोकसंहारकारणात्॥ २९॥ कलेरंशःसमुत्पन्नोगांधार्याजठरेनृप॥ अमर्षी
चपलश्चापिक्रोधनोदुष्प्रसाधनः॥ ३०॥ दैवयोगात्समुत्पन्नाभ्रातरश्चास्यतादृशाः॥ शकुनिर्मातुलश्चैवकर्णश्चपरमःसखा॥ ३१॥ समुत्पन्नाविनाशार्थंपृ
थिव्यांसहितान्नृपाः॥ यादृशोजायतेराजातादृशोस्यजनोभवेत्॥ ३२॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ इतिस्त्रीपर्वणिनैलकंठीये

अधर्मोधर्मतांयातिस्वामीचेद्धार्मिकोभवेत् ॥ स्वामिनोगुणदोषाभ्यांभृत्याःस्युर्नात्रसंशयः ॥३३॥ दुष्टंराजानमासाद्यगतास्तेतनयान्नृप ॥ एतमर्थंमहाबाहो नारदोवेदतत्त्ववित् ॥ ३४॥ आत्मापराधात्पुत्रास्तेविनष्टाःपृथिवीपते ॥ मातान्शोचस्वराजेंद्रनहिशोकेस्तिकारणं ॥ ३५ ॥ नहितेपांडवाःस्वल्पमपराध्यंतिभा रत॥पुत्रास्तवदुरात्मानोयैरियंघातितामही॥३६॥नारदेनचभद्रंतेपूर्वमेवनसंशयः॥युधिष्ठिरस्यसमितौराजसूयेनिवेदितं॥३७॥पांडवाःकौरवाःसर्वेसमासा द्यपरस्परं॥ नभविष्यंतिकौंतेययत्तेकृत्यंतदाचर॥ ३८॥ नारदस्यवचःश्रुत्वातदाशोऽचंतपांडवाः ॥ एवंतेसर्वमाख्यातंदेवगुह्यंसनातनं ॥३९॥कथंतेशोकना शःस्यात्प्राणेषुचदयाप्रभो॥ स्नेहश्चपांडुपुत्रेषुज्ञात्वादैवकृतंविधिं ॥४०॥ एषचार्थोमहाबाहोपूर्वमेवमयाश्रुतः॥ कथितोधर्मराजस्यराजसूयेक्रतूत्तमे ॥४१॥ यतितंधर्मपुत्रेणमयागुह्येनिवेदिते॥ अविग्रहेकौरवाणांदैवंतुबलवत्तरं॥ ४२॥ अनतिक्रमणीयोहिविधीराजन्कथंचन ॥ कृतांतस्यतुभूतेनस्थावरेणचरेण च॥ ४३॥ भवान्धर्मपरोयत्रबुद्धिश्रेष्ठश्चभारत ॥ मुह्यतेप्राणिनांज्ञात्वागतिंचागतिमेवच ॥ ४४ ॥ त्वांतुशोकेनसंतप्तंमुह्यमानंमुहुर्मुहुः ॥ ज्ञात्वायुधिष्ठि रोराजाप्राणानपिपरित्यजेत् ॥ ४५ ॥ कृपालुर्नित्यशोवीरस्तिर्यग्योनिगतेष्वपि॥ सकथंत्वयिराजेंद्रकृपांनैवकरिष्यति ॥ ४६ ॥ ममचैवनियोगेनविधेश्चाप्य निवर्तनात् ॥ पांडवानांचकारुण्यात्प्राणान्धारयभारत ॥ ४७॥ एवंतेवर्तमानस्यलोकेकीर्तिर्भविष्यति॥ धर्मार्थःसुमहांस्तातततंस्याच्चतपश्चिरात् ॥ ४८ ॥पुत्र शोकंसमुत्पन्नंहुताशंज्वलितंयथा ॥ प्रज्ञांभसामहाभागनिर्वापयसदासदा ॥ ४९॥ वैशंपायनउवाच तच्छ्रुत्वातस्यवचनंव्यासस्यामिततेजसः ॥ मु हूर्तंसमनुध्यायन्धृतराष्ट्रोभ्यभाषत ॥ ५० ॥ महताशोकजालेनप्रणुन्नोस्मिद्विजोत्तम ॥ नात्मानमवबुध्यामिमुह्यमानोमुहुर्मुहुः ॥५१ ॥ इदंतुवचनंश्रुत्वातव दैवनियोगजं॥ धारयिष्याम्यहंप्राणान्घटिष्येनतुशोचितुं॥ ५२ ॥ एतच्छ्रुत्वातुवचनंव्यासःसत्यवतीसुतः॥धृतराष्ट्रस्यराजेंद्रतत्रैवांतरधीयत ॥ ५३ ॥ इ तिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० धृतराष्ट्रविशोककरणेअष्टमोऽध्यायः॥८॥ ॥छ॥ जनमेजयउवाच गतेभगवतिव्यासेधृतराष्ट्रोमही पतिः॥ किमचेष्टतविप्रर्षेतन्मेव्याख्यातुमर्हसि॥ १ ॥ तथैवकौरवोराजाधर्मपुत्रोमहामनाः॥ कृपप्रभृतयश्चैवकिमकुर्वतत्रयः॥२॥ अश्वत्थाम्नःश्रुतंकर्मशा पश्चान्योन्यकारितः॥ वृत्तांतमुत्तरंब्रूहियदभाषतसंजयः॥ ३॥

भारतभावदीपेअष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ गतेइति॥ १ ॥ २ ॥ ३ ॥

विगताप्रज्ञाव्यासदत्तंदिव्यज्ञानंयस्यसविगतप्रज्ञः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ शोकस्यातिगाढत्वात्पुनर्विदुरेणोक्तं अभावादीनीत्यादि ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ संवर्तयतिवर्तुलय

वैशंपायनउवाच हतेदुर्योधनेचैवहतेसैन्येचसर्वशः ॥ संजयोविगतप्रज्ञोधृतराष्ट्रमुपस्थितः ॥ ४ ॥ संजयउवाच आगम्यनानादेशेभ्योनानाजनपदेश्वराः ॥ पितृलोकंगताराजन्सर्वेतवसुतैःसह ॥ ५ ॥ याच्यमानेनसततंतवपुत्रेणभारत ॥ घातितापृथिवीसर्वावैरस्यांतंविधित्सता ॥ ६ ॥ पुत्राणामथपौत्राणांपितृणांचमहीपते ॥ आनुपूर्व्येणसर्वेषांप्रेतकार्याणिकारय ॥ ७ ॥ वैशंपायनउवाच तच्छ्रुत्वावचनंघोरंसंजयस्यमहीपतिः ॥ गतासुरिवनिश्चेष्टोन्यपतत्पृथिवीतले ॥ ८ ॥ तंशयानमुपागम्यपृथिव्यांपृथिवीपतिम् ॥ विदुरःसर्वधर्मज्ञइदंवचनमब्रवीत् ॥ ९ ॥ उत्तिष्ठराजन्किंशेषेमाशुचोभरतर्षभ ॥ एषावैसर्वसत्वानांलोकेश्वरपरागतिः ॥ १० ॥ अभावादीनिभूतानिभावमध्यानिभारत ॥ अभावनिधनान्येवतत्रकापरिदेवना ॥ ११ ॥ नशोचन्मृतमन्वेतिनशोचन्म्रियतेनरः ॥ एवंसांसिद्धिकेलोकेकिमर्थमनुशोचसि ॥ १२ ॥ अयुध्यमानोम्रियतेयुध्यमानस्तुजीवति ॥ कालंप्राप्यमहाराजनकश्चिदतिवर्तते ॥ १३ ॥ कालःकर्षतिभूतानिसर्वाणिविविधानिच ॥ नकालस्यप्रियःकश्चिन्नद्वेष्यःकुरुसत्तम ॥ १४ ॥ यथावायुस्तृणाग्राणिसंवर्तयतिसर्वतः ॥ तथाकालवशंयांतिभूतानिभरतर्षभ ॥ १५ ॥ एकसार्थप्रयातानांसर्वेषांतत्रगामिनाम् ॥ यस्यकालःप्रयात्यग्रेतत्रकापरिदेवना ॥ १६ ॥ यांश्चापिनिहतान्युद्धेराजंस्त्वमनुशोचसि ॥ नशोच्याहिमहात्मानःसर्वेतेत्रिदिवंगताः ॥ १७ ॥ नयज्ञैर्दक्षिणावद्भिर्नतपोभिर्नविद्यया ॥ तथास्वर्गमुपायातियथाशूरस्तनुत्यजः ॥ १८ ॥ सर्वेवेदविदःशूराःसर्वेसुचरितव्रताः ॥ सर्वेचाभिमुखाःक्षीणास्तत्रकापरिदेवना ॥ १९ ॥ शरीराग्निषुशूराणांजुहुवुस्तेशराहुतीः ॥ हूयमानान्शरांश्चैवसेहुरुत्तमपूरुषाः ॥ २० ॥ एवंराजंस्तवाचक्षेस्वर्ग्यंपंथानमुत्तमम् ॥ नयुद्धादधिकंकिंचित्क्षत्रियस्येहविद्यते ॥ २१ ॥ क्षत्रियास्तेमहात्मानःशूराःसमितिशोभनाः ॥ आशिषंपरमांप्राप्तानशोच्याःसर्वएवहि ॥ २२ ॥ आत्मनात्मानमाश्वास्यमाशुचःपुरुषर्षभ ॥ नाद्यशोकाभिभूतस्त्वंकार्यमुत्स्रष्टुमर्हसि ॥ २३ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० विदुरवाक्येनवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ वैशंपायनउवाच विदुरस्यतुतद्वाक्यंश्रुत्वातुपुरुषर्षभः ॥ युज्यतांयानमित्युक्त्वापुनर्वचनमब्रवीत् ॥ १ ॥ धृतराष्ट्रउवाच शीघ्रमानयगांधारींसर्वाश्चभरतस्त्रियः ॥ वधूंकुंतीमुपादाययाश्चान्यास्तत्रयोषितः ॥ २ ॥

ति कंपयतिवा ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ आचक्षेकथयामि ॥ २१ ॥ २२ ॥ कार्यंअवश्यकर्तव्यमुदकदानादि ॥ २३ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेनवमोऽध्यायः ॥ ९ ॥ विदुरस्येति ॥ १ ॥ २ ॥

॥ २ ॥ ४ ॥ ५ ॥ समारोप्यवाहनेष्विति शेषः॥६ ॥ ७ ॥ ८ ॥ ९ ॥ पृश्नर्याश्वत्रहरिण्यः ॥ १० ॥ किशोरीणांअश्वशावकीनां किशोरोऽश्वशावकइतिमेदिनी अंगमेनृत्यशिक्षाभूमौ ॥ ११ ॥

एवमुक्त्वासधर्मात्माविदुरंधर्मवित्तमम् ॥ शोकविप्रहतज्ञानोयानमेवान्वपद्यत ॥ ३ ॥ गांधारीपुत्रशोकार्ताभर्तुर्वचननोदिता ॥ सहकुंत्यायतोराजासहस्त्री भिरुपाद्रवत् ॥ ४ ॥ ताःसमासाद्यराजानंभृशंशोकसमन्विताः ॥ आमंत्र्यान्योन्यमीयुःस्मभृशमुच्चुक्रुशुस्ततः ॥ ५ ॥ ताःसमाश्वासयत्क्षत्ताताभ्यश्चार्ततरः स्वयम् ॥ अश्रुकंठीःसमारोप्यततोसौनिर्ययौपुरात् ॥ ६ ॥ ततःप्रणादःसंजज्ञेसर्वेषुकुरुवेश्मसु ॥ आकुमारंपुरंसर्वमभवच्छोककर्शितम् ॥ ७ ॥ अदृष्टपूर्वायाः नार्यःपुरादेवगणैरपि ॥ पृथग्जनेनदृश्यंतेतास्तदानिहतेश्वराः ॥ ८ ॥ प्रकीर्यकेशान्सुशुभान्भूषणान्यवमुच्यच ॥ एकवस्त्रधरानार्यःपरिपेतुरनाथवत् ॥ ९ ॥ श्वेतपर्वतरूपेभ्योगृहेभ्यस्तास्त्वपाक्रमन् ॥ गुहाभ्यइवशैलानांपृपत्योहतयूथपाः ॥ १० ॥ तान्युदीर्णानिनारीणांतदावृंदान्यनेकशः ॥ शोकार्तान्यद्रवन्राजन्किशोरीणामिवांगने ॥ ११ ॥ प्रगृह्यबाहून्क्रोशंत्यःपुत्रान्भ्रातॄन्पितॄनपि ॥ दर्शयंतीवताहस्मयुगांतेलोकसंक्षयम् ॥ १२ ॥ विलपंत्योरुदंत्यश्चधावमानास्ततस्ततः ॥ शोकेनोपहतज्ञानाःकर्तव्यंनप्रजज्ञिरे ॥ १३ ॥ व्रीडांजग्मुःपुरायाःस्मसखीनामपियोषितः ॥ ताएकवस्त्रानिर्लज्जाःश्वश्रूणांपुरतोऽभवन् ॥ १४ ॥ परस्परंसुसूक्ष्मेषुशोकेष्वाश्वासयंस्तदा ॥ ताःशोकविह्वलाराजन्नवैक्षंतपरस्परम् ॥ १५ ॥ ताभिःपरिवृतोराजारुदतीभिःसहस्रशः ॥ निर्ययौनगराद्दीनस्तूर्णमायोधनंप्रति ॥ १६ ॥ शिल्पिनोवणिजोवैश्याःसर्वकर्मोपजीविनः ॥ तेपार्थिवंपुरस्कृत्यनिर्ययुर्नगराद्बहिः ॥ १७ ॥ तासांविक्रोशमानानामार्तानांकुरुसंक्षये ॥ प्रादुरासीन्महान्शब्दोव्यथयन्भुवनान्युत ॥ १८ ॥ युगांतकालेसंप्राप्तेभूतानांदह्यतामिव ॥ अभावःस्यादयंप्राप्तइतिभूतानिमेनिरे ॥ १९ ॥ भृशमुद्विग्नमनसस्तेपौराःकुरुसंक्षये ॥ प्राक्रोशंतमहाराजस्वनुरक्तास्तदाभृशम् ॥ २० ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० धृतराष्ट्रनिर्गमनेदशमोऽध्यायः ॥ १० ॥

वैशंपायनउवाच क्रोशमात्रंततोगत्वाददृशुस्तान्महारथान् ॥ शारद्वतंकृपंद्रौणिंकृतवर्माणमेवच ॥ १ ॥ तेतुदृष्ट्वैवराजानंप्रज्ञाचक्षुषमीश्वरम् ॥ अश्रुकंठाविनिःश्वस्यरुदंतमिदमब्रुवन् ॥ २ ॥ पुत्रस्तवमहाराजकृत्वाकर्मसुदुष्करम् ॥ गतःसानुचरोराजन्शक्रलोकंमहीपते ॥ ३ ॥ दुर्योधनबलान्मुक्तावयमेवत्रयोरथाः ॥ सर्वमन्यत्परिक्षीणंसैन्यंतेभरतर्षभ ॥ ४ ॥ इत्येवमुक्त्वाराजानंकृपःशारद्वतस्ततः ॥ गांधारींपुत्रशोकार्तामिदंवचनमब्रवीत् ॥ ५ ॥

॥१२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेदशमोऽध्यायः ॥ १० ॥ ॥ ९ ॥ क्रोशमात्रमिति ॥१॥२ ॥३॥४॥५ ॥

अभीतायुध्यमानास्तेघ्नंतःशत्रुगणान्बहून् ॥ वीरकर्माणिकुर्वाणाःपुत्रास्तेनिधनंगताः ॥ ६ ॥ ध्रुवंसंप्राप्यलोकांस्तेनिर्मलान्शस्त्रनिर्जितान् ॥ भास्वरंदेहमास्थायविहरंत्यमराइव ॥ ७ ॥ नहिकश्चिद्धिशूराणांयुध्यमानःपराङ्मुखः ॥ शस्त्रेणनिधनंप्राप्तोनचकश्चित्कृतांजलिः ॥ ८ ॥ एवंतांक्षत्रियस्याहुःपुराणाःपरमांगतिम् ॥ शस्त्रेणनिधनंसंख्येतन्नशोचितुमर्हसि ॥ ९ ॥ नचापिशत्रवस्तेषामृध्यंतेराज्ञिपांडवाः ॥ शृणुयत्कृतमस्माभिरश्वत्थामपुरोगमैः ॥ १० ॥ अधर्मेणहतंश्रुत्वाभीमसेनेनतेसुतम् ॥ सुप्तंशिबिरमासाद्यपांडूनांकदनंकृतम् ॥ ११ ॥ पंचालानिहताःसर्वेधृष्टद्युम्नपुरोगमाः ॥ द्रुपदस्यात्मजाश्चैवद्रौपदेयाश्चपातिताः ॥ १२ ॥ तथाविशसनंकृत्वापुत्रशत्रुगणस्यते ॥ प्राद्रवामरणेस्थातुंनहिशक्यामहेत्रयः ॥ १३ ॥ तेहिशूरामहेष्वासाःक्षिप्रमेष्यंतिपांडवाः ॥ अमर्षवशमापन्नावैरंप्रतिजिहीर्षवः ॥ १४ ॥ तेहतानात्मजान्श्रुत्वाप्रमत्ताःपुरुषर्षभाः ॥ निरीक्षंतःपदंशूराःक्षिप्रमेवयशस्विनि ॥ १५ ॥ तेषांतुकदनंकृत्वासंस्थातुंनोत्सहामहे ॥ अनुजानीहिनोराज्ञिमाचशोकेमनःकृथाः ॥ १६ ॥ राजंस्त्वमनुजानीहिधैर्यमातिष्ठचोत्तमम् ॥ दिष्टांतंपश्यचापित्वंक्षात्रंधर्मंचकेवलम् ॥ १७ ॥ इत्येवमुक्त्वाराजानंकृत्वाचाभिप्रदक्षिणम् ॥ कृपश्चकृतवर्माचद्रोणपुत्रश्चभारत ॥ १८ ॥ अवेक्षमाणाराजानंधृतराष्ट्रंमनीषिणम् ॥ गंगामनुमहाराजतूर्णमश्वानचोदयन् ॥ १९ ॥ अपक्रम्यतुतेराजन्सर्वएवमहारथाः ॥ आमंत्र्यान्योन्यमुद्विग्नास्त्रिधातेप्रययुस्तदा ॥ २० ॥ जगामहास्तिनपुरंकृपःशारद्वतस्तदा ॥ स्वमेवराष्ट्रंहार्दिक्योद्रौणिर्व्यासाश्रमंययौ ॥ २१ ॥ एवंतेप्रययुर्वीरावीक्षमाणाःपरस्परं ॥ भयार्ताःपांडुपुत्राणामागस्कृत्वामहात्मनाम् ॥ २२ ॥ समेत्यवीराराजानंतदात्वनुदितेरवौ ॥ विप्रजग्मुर्महात्मानोयथेच्छकमरिंदमाः ॥ २३ ॥ समासाद्याथवैद्रौणिंपांडुपुत्रामहारथाः ॥ व्यजयंस्तेरणेराजन्विक्रम्यतदनंतरम् ॥ २४ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० कृपद्रौणिभोजदर्शनेएकादशोऽध्यायः ॥ ११ ॥ वैशंपायनउवाच हतेषुसर्वसैन्येषुधर्मराजोयुधिष्ठिरः ॥ शुश्रुवेपितरंवृद्धंनिर्यातंगजसाह्वयात् ॥ १ ॥ सोऽभ्ययात्पुत्रशोकार्तःपुत्रशोकपरिप्लुतम् ॥ शोचमानंमहाराजभ्रातृभिःसहितस्तदा ॥ २ ॥ अन्वीयमानोवीरेणदाशार्हेणमहात्मना ॥ युयुधानेनचतथातथैवचयुयुत्सुना ॥ ३ ॥ तमन्वगात्सुदुःखार्ताद्रौपदीशोककर्शिता ॥ सहपांचालयोषिद्भिर्यास्तत्रासन्समागताः ॥ ४ ॥

॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ आक्षिप्य निवार्य अयः लोह

॥५॥ प्रियाप्रियैः पांडवानांप्रियाःअभिमन्युप्रभृतयः अप्रियाःदुर्योधनादयः तैर्हेतुभिःक्रोशंतीभिरितिसंबंधः ॥ ऊर्ध्वबाहुभिरार्ताभीरुदती

सगंगामनुद्वंद्वानिस्त्रीणांभरतसत्तम॥ कुररीणामिवार्तानांक्रोशंतीनांददर्शह॥५॥ ताभिःपरिवृतोराजाक्रोशंतीभिःसहस्रशः॥ ऊर्ध्वबाहुभिरार्ताभीरुदती

भिःप्रियाप्रियैः॥६॥ क्वनुधर्मज्ञताराज्ञःक्वनुसाद्यानृशंसता ॥ यच्चावधीत्पितृन्भ्रातॄन्गुरुपुत्रान्सखीनपि ॥ ७॥ घातयित्वाकथंद्रोणंभीष्मंचापिपितामह

म्॥ मनस्तेभून्महाबाहोहत्वाचापिजयद्रथम्॥८॥ किंनुराज्येनतेकार्यंपितॄन्भ्रातॄनपश्यतः॥ अभिमन्युंचदुर्धर्षंद्रौपदेयांश्चभारत॥ ९॥ अतीत्यतामहाबाहुः

क्रोशंतीःकुररीरिव॥ ववंदेपितरंज्येष्ठंधर्मराजोयुधिष्ठिरः॥ १०॥ ततोऽभिवाद्यपितरंधर्मेणामित्रकर्षणाः॥ न्यवेदयंतनामानिपांडवास्तेपिसर्वशः॥ ११॥त

मात्मजांतकरणंपितापुत्रवधार्दितः॥ अप्रीयमाणःशोकार्तःपांडवंपरिषस्वजे॥ १२॥ धर्मराजंपरिष्वज्यसांत्वयित्वाचभारत ॥ दुष्टात्माभीममन्वैच्छद्दिधक्षु

रिवपावकः॥ १३॥ सकोपपावकस्तस्यशोकवायुसमीरितः॥ भीमसेनमयंदावंदिधक्षुरिवदृश्यते॥ १४॥तस्यसंकल्पमाज्ञायभीमंप्रत्यशुभंहरिः ॥ भीममा

क्षिप्यपाणिभ्यांप्रददौभीममायसम्॥ १५॥ प्रागेवतुमहाबुद्धिर्बुध्वातस्येंगितंहरिः॥ संविधानंमहाप्राज्ञस्तत्रचक्रेजनार्दनः॥ १६ ॥ तंगृहीत्वैवपाणिभ्यांभी

मसेनमयस्मयम्॥ बभंजबलवान्राजामन्यमानोवृकोदरम्॥ १७॥ नागायुतबलप्राणःसराजाभीममायसम्॥ भंक्त्वाविमथितोरस्कःसुस्रावरुधिरंमुखा

त्॥ १८॥ ततःपपातमेदिन्यांतथैवरुधिरोक्षितः॥ प्रपुष्पिताग्रशिखरःपारिजातइवद्रुमः॥ १९॥ प्रत्यगृह्णाच्चतंविद्वान्सूतोगावल्गणिस्तदा ॥ मैवमित्यब्रवी

च्चैनंशमयन्सांत्वयन्निव॥ २०॥ सतुकोपंसमुत्सृज्यगतमन्युर्महामनाः॥ हाहाभीमेतिचुक्रोशनृपःशोकसमन्वितः॥२१॥ तंविदित्वागतक्रोधंभीमसेनवधा

र्दितम्॥ वासुदेवोवरःपुंसामिदंवचनमब्रवीत्॥ २२॥ माशुचोधृतराष्ट्रत्वंनैषभीमस्त्वयाहतः॥ आयसीप्रतिमाह्येषात्वयानिष्पातिताविभो॥ २३॥ त्वांक्रो

धवशमापन्नंविदित्वाभरतर्षभ॥ मयापकृष्टःकौंतेयोमृत्योर्दंष्ट्रांतरंगतः॥ २४ ॥ नहितेराजशार्दूलबलेतुल्योस्तिकश्चन ॥ कःसहेतमहाबाहोबाह्वोर्विग्रहणं

नरः॥ २५॥ यथांतकमनुप्राप्यजीवन्कश्चिन्नमुच्यते॥ एवंबाह्वंतरंप्राप्यतवजीवेन्नकश्चन॥ २६॥ तस्मात्पुत्रेणयातेसौप्रतिमाकारितायसी ॥ भीमस्यसेयं

कौरव्यतवैवोपहतामया॥ २७॥ पुत्रशोकाभिसंतप्तंधर्मादपकृतंमनः॥ तवराजेंद्रतेनत्वंभीमसेनंजिघांससि॥ २८॥

॥ २७॥ पुत्रेति धर्मादपकृतंआलिंगनच्छलेनभीमवधःकर्तव्यइत्याशया॥२८॥

मयं॥ १५॥ संविधानंआयसस्यभीमस्यनिर्माणं॥ १६॥ १७॥ १८॥ १९॥२०॥२१॥२२॥२३॥२४॥२५॥२६॥

वृकोदरेणअहताअपिनजीवेयुः॥मतायुषांतेषांनिमित्तांतरेणापिनाशावश्यंभावादितिभावः ॥२९॥३०॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेद्वादशोऽध्यायः॥१२॥ ॥ ॥ ततइति॥१॥२॥३॥नतत्कथाः

नत्वेतत्तेक्षमंराजन्हन्यास्त्वंयद्वृकोदरम्॥ नहिपुत्रामहाराजजीवेयुस्तेकथंचन॥ २९॥ तस्माद्यत्कृतमस्माभिर्मन्यमानैःशमंप्रति॥ अनुमन्यस्वतत्सर्वंमाच
शोकेमनःकृथाः॥ ३०॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकपर्वणिआयसभीमभंगेद्वादशोऽध्यायः॥ १२॥ ॥ ॥ वैशंपायनउवाच त
तएनमुपातिष्ठन्शौचार्थंपरिचारकाः॥ कृतशौचंपुनश्चैनंप्रोवाचमधुसूदनः॥ १॥ राजन्नधीतावेदास्तेशास्त्राणिविविधानिच॥ श्रुतानिचपुराणानिराजध
र्माश्चकेवलाः॥ २॥ एवंविद्वान्महाप्राज्ञःसमर्थःसन्बलाबले॥ आत्मापराधात्कस्मात्त्वंकुरुषेकोपमीदृशं॥ ३॥ उक्तवांस्त्वांतदैवाहंभीष्मद्रोणौचभारत॥ वि
दुरःसंजयश्चैववाक्यंराजन्नतत्कृथाः॥ ४॥ सवार्यमाणोनास्माकमकार्षीर्वचनंतदा॥ पांडवानधिकान्जानन्बलेशौर्येचकौरव॥ ५॥ राजाहियःस्थिरप्रज्ञः
स्वयंदोषानवेक्षते॥ देशकालविभागंचपरंश्रेयःसविंदति॥ ६॥ उच्यमानस्तुयःश्रेयोगृह्णीतेनोहिताहिते॥ आपदःसमनुप्राप्यसशोचत्यनयेस्थितः॥ ७॥ त
तोन्यवृत्तमात्मानंसमवेक्षस्वभारत॥ राजंस्त्वंह्यविधेयात्मादुर्योधनवशेस्थितः॥ ८॥ आत्मापराधादापन्नस्तत्किंभीमंजिघांससि॥ तस्मात्संयच्छकोपंत्वं
स्वमनुस्मरदुष्कृतं॥ ९॥ यस्तुतांस्पर्धयाक्षुद्रःपांचालीमानयत्सभां॥ सहतोभीमसेनेनवैरंप्रतिजिहीर्षता॥ १०॥ आत्मनोतिक्रमंपश्यपुत्रस्यचदुरात्मनः॥य
दनागसिपांडूनांपरित्यागस्त्वयाकृतः॥ ११॥ वैशंपायनउवाच एवमुक्तःसकृष्णेनसर्वंसत्यंजनाधिप॥ उवाचदेवकीपुत्रंधृतराष्ट्रोमहीपतिः॥ १२॥
एवमेतन्महाबाहोयथावदसिमाधव॥ पुत्रस्नेहस्तुबलवान्धैर्यान्मांसमचालयत्॥ १३॥ दिष्ट्यातुपुरुषव्याघ्रोबलवान्सत्यविक्रमः॥ त्वद्गुप्तोनागमत्कृष्णभीमो
बाह्वंतरंमम॥ १४॥ इदानींत्वहमव्यग्रोगतमन्युर्गतज्वरः॥ मध्यमंपांडवंवीरंद्रष्टुमिच्छामिमाधव॥ १५॥ हतेषुपार्थिवेंद्रेषुपुत्रेषुनिहतेषुच॥ पांडुपुत्रेषुवैशर्म
प्रीतिश्चाप्यवतिष्ठते॥ १६॥ ततःसभीमंचधनंजयंचमाद्र्याश्चपुत्रौपुरुषप्रवीरौ॥ पस्पर्शगात्रैःप्ररुदन्सुगात्रानाश्वास्यकल्याणमुवाचचैतान्॥ १७॥ इ
तिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० धृतराष्ट्रकोपविमोचनेपांडवपरिष्वंगोनामत्रयोदशोऽध्यायः॥ १३॥ ॥ ॥ ॥ ॥ वैशंपायनउवा
च धृतराष्ट्राभ्यनुज्ञातास्ततस्तेकुरुपांडवाः॥ अभ्ययुर्भ्रातरःसर्वेगांधारींसहकेशवाः॥ १॥ तान्मत्तवानसि अडभावआर्षः॥ ४॥ ५॥ ६॥ श्रेयोहिताहितेउच्यमानोनगृह्णीतइत्य

न्वयः॥ ७॥ ८॥ ९॥ १०॥ अनागसिअपराधाभावे परित्यागोराज्याप्रदानेनतिरस्कारः॥ ११॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेत्रयोदशोऽध्यायः ॥ १३॥ धृतराष्ट्रेति॥ १॥

॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ कल्यवादीहितवादी ॥ ६ ॥ एतत्तूवचःपांडवानुशंमुमुद्यतंवाक्यं ॥७॥८॥९॥ नचास्यलंतामितिपाठे अस्यएनंदुर्योधनंतोषमाणायाआशीर्वचनेनतोषयंत्यास्तेतवृत्तांवाचावितथान

ततोज्ञात्वाहतामित्रंयुधिष्ठिरमुपागतं ॥ गांधारीपुत्रशोकार्ताशप्तुमैच्छदनिंदिता ॥ २ ॥ तस्याःपापमभिप्रायंविदित्वापांडवान्प्रति ॥ ऋषिःसत्यवतीपुत्रःप्रागे वसमबुध्यत ॥ ३ ॥ सगंगायामुपस्पृश्यपुण्यगंधिपयःशुचि ॥ तंदेशमुपसंपेदेपरमर्षिर्मनोजवः ॥ ४ ॥ दिव्येनचक्षुषापश्यन्मनसातद्गतेनच ॥ सर्वप्राणभृतां भावंसतत्रसमबुध्यत ॥ ५ ॥ सस्नुषामब्रवीत्कालेकल्यवादीमहातपाः ॥ शापकालमवाक्षिप्यशमकालमुदीरयन् ॥ ६ ॥ नकोपःपांडवेकार्योगांधारिशममा प्नुहि ॥ वचोनिगृह्यतामेतच्छृणुचेदंवचोमम ॥ ७ ॥ उक्तास्यष्टादशाहानिपुत्रेणजयमिच्छता ॥ शिवमाशास्वमेमातर्युध्यमानस्यशत्रुभिः ॥ ८ ॥ सातथायाच्य मानात्वंकालेकालेजयैषिणा ॥ उक्तवत्यसिगांधारियतोधर्मस्ततोजयः ॥ ९ ॥ नचाप्यतीतांगांधारिवाचंतेवितथामहं ॥ स्मरामितोषमाणायास्तथाप्रणिहि तात्यसि ॥ १० ॥ विग्रहेतुमुलेराज्ञांगत्वापारमसंशयं ॥ जितंपांडुसुतैर्युद्धेनूनंधर्मस्ततोऽधिकः ॥ ११ ॥ क्षमाशीलापुराभूत्वासाद्यनक्षमसेकथं ॥ अधर्मंजहि धर्मज्ञेयतोधर्मस्ततोजयः ॥ १२ ॥ स्वंचधर्मंपरिस्मृत्यवाचंचोक्तांमनस्विनि ॥ कोपंसंयच्छगांधारिमैवंभूःसत्यवादिनि ॥ १३ ॥ गांधार्युवाच. भगव न्नाभ्यसूयामिनैतानिच्छामिनश्यतः ॥ पुत्रशोकेनतुबलान्मनोविह्वलतीवमे ॥ १४ ॥ यथैवकुंत्याकौंतेयारक्षितव्यास्तथामया ॥ तथैवधृतराष्ट्रेणरक्षितव्यामयायथा ॥ १५ ॥ दुर्योधनापराधेनशकुनेःसौबलस्यच ॥ कर्णदुःशासनाभ्यांचकृतोऽयंकुरुसंक्षयः ॥ १६ ॥ नापराध्यतिबीभत्सुर्नचपार्थोवृकोदरः ॥ नकु लःसहदेवश्चनैवजातुयुधिष्ठिरः ॥ १७ ॥ युध्यमानाहिकौरव्याःकृतमानाःपरस्परं ॥ निहताःसहिताश्चान्यैस्तत्रनास्त्यप्रियंमम ॥ १८ ॥ किंतुकर्माकरोद्भीमो वासुदेवस्यपश्यतः ॥ दुर्योधनंसमाहूयगदायुद्धेमहामनाः ॥ १९ ॥ शिक्षयाभ्यधिकंज्ञात्वाचरंतंबहुधारणे ॥ अधोनाभ्याःप्रहृतवांस्तन्मेकोपमवर्धयत् ॥ २० ॥ कथंनुधर्मंधर्मज्ञैःसमुद्दिष्टंमहात्मभिः ॥ त्यजेयुराहवेशूराःप्राणहेतोःकथंचन ॥ २१ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० गांधारीसांत्वनायांचतु र्दशोऽध्यायः ॥ १४ ॥ ॥छ॥ वैशंपायनउवाच तच्छ्रुत्वावचनंतस्याभीमसेनोथभीतवत् ॥ गांधारींप्रत्युवाचेदंवचःसानुनयंतदा ॥ १ ॥ अ धर्मोयदिवाधर्मस्त्रासात्तत्रमयाकृतः ॥ आत्मानंत्रातुकामेनतन्मेत्वंक्षंतुमर्हसि ॥ २ ॥

स्मरामीत्यन्वयः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ कृतमानाः कृताहंकाराः १८ ॥ १९ ॥ २० ॥ २१ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥छ॥ तदिति ॥ १ ॥ २ ॥

॥ ३ ॥ ४ ॥५॥ उक्तवान् नहितेपतयःसंतीत्यादि ॥ ६ ॥ असंगृह्यअनुपसंहृत्य ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ अंतोष्ठात् अधरोष्ठात्उपरिनिगतमित्यर्थः दंतोष्ठादित्य

नहियुद्धेनपुत्रस्तेधर्म्येणसमहाबलः ॥ नशक्यःकेनचिद्धंतुमतोविषममाचरं ॥ ३ ॥ अधर्मेणजितःपूर्वंतेनचापियुधिष्ठिरः ॥ निकृताश्चसदैवस्मततोविषमम
माचरं ॥ ४ ॥ सैन्यस्यैकोऽवशिष्टोऽयंगदायुद्धेनवीर्यवान् ॥ मांहत्वानहरेद्राज्यमितिवैतत्कृतंमया ॥ ५ ॥ राजपुत्रींचपांचालीमेकवस्त्रांरजस्वलां ॥ भवत्या
विदितंसर्वमुक्तवान्यत्सुतस्तव ॥ ६ ॥ सुयोधनमसंगृह्यनशक्याभूःससागरा ॥ केवलाभोक्तुमस्माभिरतश्चैतत्कृतंमया ॥ ७ ॥ तथाप्यप्रियमस्माकंपुत्रस्ते
समुपाचरत् ॥ द्रौपद्यायत्सभामध्येसव्यमूरुमदर्शयत् ॥ ८ ॥ तदैववध्यःसोऽस्माकंदुराचारश्चतेसुतः ॥ धर्मराजाज्ञयाचैवस्थिताःस्मसमयेतदा ॥ ९ ॥ वैरमुद्दी
पितंराज्ञिपुत्रेणतवतन्महत् ॥ क्लेशिताश्चवनेनित्यंततएतत्कृतंमया ॥ १० ॥ वैरस्यास्यगताःपारंहत्वादुर्योधनंरणे ॥ राज्यंयुधिष्ठिरःप्राप्तोवयंचगतमन्यवः ॥
॥ ११ ॥ गांधार्युवाच नतस्यैपवधस्तातयत्प्रशंससिमेसुतं ॥ कृतवांश्चापितत्सर्वंयदिदंभाषसेमयि ॥ १२ ॥ हताश्वेनकुलेयत्तुवृषसेनेनभारत ॥ अ
पिवःशोणितंसंख्येदुःशासनशरीरजम् ॥ १३ ॥ सद्भिर्विगर्हितंघोरमनार्यजनसेवितम् ॥ क्रूरंकर्माकृथास्तस्मात्तदयुक्तंवृकोदर ॥ १४ ॥ भीमसेनउवा
च अन्यस्यापिनपातव्यंरुधिरंकिंपुनःस्वकम् ॥ यथैवात्मातथाभ्राताविशेषोनास्तिकश्चन ॥ १५ ॥ रुधिरंनव्यतिक्रामदंतोष्ठादंबमाशुचः ॥ वैवस्वतस्तुत
द्वेदहस्तौमेरुधिरेरोक्षितौ ॥ १६ ॥ हताश्वंनकुलंदृष्ट्वावृषसेनेनसंयुगे ॥ भ्रातॄणांसंप्रहृष्टानांत्रासःसंजनितोमया ॥ १७ ॥ केशपक्षपरामर्शेद्रौपद्याद्यूतकारिते ॥
क्रोधाद्यदब्रुवंचाहंतच्चमेहृदिवर्तते ॥ १८ ॥ क्षत्रधर्माच्च्युतोराज्ञिभवेयंशाश्वतीःसमाः ॥ प्रतिज्ञांतामनिस्तीर्यततस्तत्कृतवानहम् ॥ १९ ॥ नमामर्हसिगांधा
रिदोषेणपरिशंकितुम् ॥ अनिगृह्यपुरापुत्रानस्मास्वनपकारिषु ॥ अधुनाकिंनुदोषेणपरिशंकितुमर्हसि ॥ २० ॥ गांधार्युवाच वृद्धस्यास्यशतंपुत्रा
न्निघ्नंस्त्वमपराजितः ॥ कस्मान्नशेषयःकिंचिद्येनाल्पमपराधितं ॥ २१ ॥ संतानमावयोस्तातवृद्धयोर्हृतराज्ययोः ॥ कथमंधद्वयस्यास्ययष्टिरेकानवर्जिता ॥ २२ ॥
शेषेत्त्यवस्थितेतातपुत्राणामंतकेत्वयि ॥ नमेदुःखंभवेदेतद्यदित्वंधर्ममाचरेः ॥ २३ ॥ वैशंपायनउवाच एवमुक्त्वातुगांधारीयुधिष्ठिरमपृच्छत ॥ क्वस
राजेतिसक्रोधापुत्रपौत्रवधार्दिता ॥ २४ ॥ तामभ्यगच्छद्राजेंद्रोवेपमानःकृतांजलिः ॥ युधिष्ठिरस्त्विदंतत्रमधुरंवाक्यमब्रवीत् ॥ २५ ॥

पपाठः ॥ १६ ॥ वृषसेनेनकर्णपुत्रेण ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ किंचित्कमपिनशेषयेः शेषमेकमपिनरक्षितवानसि ॥ २१ ॥ नवर्जितावधकालेनत्यक्ता ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ कुनखीभूतोहस्तदेशइतिशेषः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ वांआवां ॥ ४४ ॥ इतिस्त्री

पुत्रहंतानृशंसोऽहंतवदेवियुधिष्ठिरः ॥ शापार्हःपृथिवीनाशेहेतुभूतःशपस्वमां ॥ २६ ॥ नहिमेजीवितेनार्थोनराज्येनधनेनवा ॥ तादृशान्सुहृदोहत्वामूढस्या
स्यसुहृद्द्रुहः ॥ २७ ॥ तमेवंवादिनंभीतंसंनिकर्षगतंतदा ॥ नोवाचकिंचिद्गांधारीनिःश्वासपरमाभृशं ॥ २८ ॥ तस्यावनम्यदेहस्यपादयोर्निपतिष्यतः ॥ युधि
ष्ठिरस्यनृपतेर्धर्मज्ञादीर्घदर्शिनी ॥ २९ ॥ अंगुल्यग्राणिददृशेदेवीपट्टांतरेणसा ॥ ततःसकुनखीभूतोदर्शनीयनखोनृपः ॥ ३० ॥ तंदृष्ट्वाचार्जुनोऽगच्छद्वासुदेव
स्यपृष्ठतः ॥ एवंसंचेष्टमानांस्तानितश्चेतश्चभारत ॥ ३२ ॥ गांधारीविगतक्रोधासांत्वयामासमातृवत् ॥ तयातेसमनुज्ञातामातरंवीरमातरं ॥ ३३ ॥ अभ्यग
च्छंतसहिताःपृथांपृथुलवक्षसः ॥ चिरस्यदृष्ट्वापुत्रान्सापुत्राधिभिरभिप्लुता ॥ ३४ ॥ बाष्पमाहारयद्देवीवस्त्रेणावृत्यवैमुखं ॥ ततोबाष्पंसमुत्सृज्यसहपुत्रैस्तदा
पृथा ॥ ३४ ॥ अपश्यदेतान्शस्त्रौघैर्बहुधाक्षतविक्षतान् ॥ सातानेकैकशःपुत्रान्संस्पृशंतीपुनःपुनः ॥ ३५ ॥ अन्वशोचतदुःखार्ताद्रौपदींचहतात्मजां ॥ रुदतीम
थपांचालींददर्शपतितांभुवि ॥ ३६ ॥ द्रौपद्युवाच आर्येपुत्राःक्वतेसर्वेसौभद्रसहितागताः ॥ नत्वांतेऽद्याभिगच्छंतिचिरंदृष्ट्वातपस्विनीं ॥ ३७ ॥ किंनुरा
ज्येनवैकार्यंविहीनायाःसुतैर्मम ॥ तांसमाश्वासयामासपृथापृथुललोचना ॥ ३८ ॥ उत्थाप्ययाज्ञसेनींतुरुदतींशोककर्शितां ॥ तयैवसहिताचापिपुत्रैरनुगतां
नृप ॥ ३९ ॥ अभ्यगच्छतगांधारीमार्तामार्ततरास्वयं ॥ वैशंपायनउवाच तामुवाचाथगांधारीसहवध्वायशस्विनीं ॥ ४० ॥ मैवंपुत्रीतिशोकार्तापश्य
मामपिदुःखितां ॥ मन्येलोकविनाशोऽयंकालपर्यायनोदितः ॥ ४१ ॥ अवश्यभावीसंप्रामःस्वभावाल्लोमहर्षणः ॥ इदंतत्समनुप्राप्तंविदुरस्यवचोमहत् ॥ ४२ ॥
असिद्धानुनयेकृष्णेयदुवाचमहामतिः ॥ तस्मिन्नपरिहार्येऽर्थेव्यतीतेचविशेषतः ॥ ४३ ॥ माशुचोनहिशोच्यास्तेसंग्रामेनिधनंगताः ॥ यथैवाहंतथैवत्वंकोवा
माश्वासयिष्यति ॥ ममैवह्यपराधेनकुलमग्र्यंविनाशितं ॥ ४४ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिजलप्रदानिकप० पृथापुत्रदर्शनेपंचदशोऽध्यायः ॥ १५ ॥ ॥
समाप्तंजलप्रदानिकंपर्व ॥ अथस्त्रीविलापपर्व ॥ वैशंपायनउवाच एवमुक्त्वातुगांधारीकुरूणामवकर्तनं ॥ अपश्यत्तत्रतिष्ठंतीसर्वंदिव्येनचक्षुषा ॥ १ ॥
पतिव्रतामहाभागासमानव्रतचारिणी ॥ उग्रेणतपसायुक्तासततंसत्यवादिनी ॥ २ ॥

पर्वणिनैलकंठीयेभारतभावदीपेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ ॥ ७ ॥ एवमिति अवकर्तनंयुद्धस्थानं ॥ १ ॥ २ ॥

॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ११॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ १८॥ १९॥ २०॥ २१॥ २२॥ २३॥ २४॥ २५॥ पचानांभूतानांपृथिव्यादीनांकुरुपं

वरदानेनकृष्णस्यमहर्षेःपुण्यकर्मणः॥ दिव्यज्ञानबलोपेताविविधंपर्यदेवयत्॥ ३॥ ददर्शसाबुद्धिमतीदूरादपियथांतिके॥ रणाजिरंनृवीराणामद्भुतंलोमहर्ष-
णं॥ ४॥ अस्थिकेशवसाकीर्णंशोणितौघपरिप्लुतं॥ शरीरैर्बहुसाहस्रैर्विनिकीर्णंसमंततः॥ ५॥ गजाश्वरथयोधानामावृतंरुधिराविलैः॥ शरीरैरशिरस्कैश्च
विदेहैश्च शिरोगणैः॥ ६॥ गजाश्वनरनारीणांनिःस्वनैरभिसंवृतं॥ सृगालबककाकोलकंककाकनिषेवितं॥ ७॥ रक्षसांपुरुषादानांमोदनंकुरराकुलं॥ अशि-
वाभिःशिवाभिश्चनादितंगृध्रसेवितं॥ ८॥ ततोव्यासाभ्यनुज्ञातोधृतराष्ट्रोमहीपतिः॥ पांडुपुत्राश्चतेसर्वेयुधिष्ठिरपुरोगमाः॥ ९॥ वासुदेवंपुरस्कृत्यहतबंधुंच
पार्थिवं॥ कुरुस्त्रियःसमासाद्यजग्मुरायोधनंप्रति॥ १०॥ समासाद्यकुरुक्षेत्रंतास्त्रियोनिहतेश्वराः॥ अपश्यंतहतांस्तत्रपुत्रान्भ्रातॄन्पितॄन्पतीन्॥ ११॥ क्र-
व्यादैर्भक्ष्यमाणान्वैगोमायुबलवायसैः॥ भूतैःपिशाचैरक्षोभिर्विविधैश्चनिशाचरैः॥ १२॥ रुद्राक्रीडनिभंदृष्ट्वातदाविशसनंस्त्रियः॥ महार्हेभ्योऽथयानेभ्यो
विक्रोशंत्योनिपेतिरे॥ १३॥ अदृष्टपूर्वंपश्यंत्योदुःखार्ताभरतस्त्रियः॥ शरीरेष्वस्खलन्नन्याःपतंत्यश्चापराभुवि॥ १४॥ श्रांतानांचाप्यनाथानांनासीत्काचन
चेतना॥ पांचालकुरुयोषाणांकृपणंतदभून्महत्॥ १५॥ दुःखोपहतचित्ताभिःसमंतादनुनादितं॥ दृष्ट्वायोधनमत्युग्रंधर्मज्ञासुबलात्मजा॥ १६॥ ततःसापुं-
डरीकाक्षमामंत्र्यपुरुषोत्तमं॥ कुरूणांवैशसंदृष्ट्वाइदंवचनमब्रवीत्॥ १७॥ पश्यैताःपुंडरीकाक्षस्नुषामेनिहतेश्वराः॥ प्रकीर्णकेशाःक्रोशंतीःकुररीरिवमाधव
॥ १८॥ अमूस्त्वभिसमागम्यस्मरंत्योभर्तृजान्गुणान्॥ पृथगेवाभ्यधावंत्यःपुत्रान्भ्रातॄन्पितॄन्पतीन्॥ १९॥ वीरसूभिर्महाराजहतपुत्राभिरावृतं॥ क्वचिच्चवी-
रपत्नीभिर्हतवीराभिरावृतं॥ २०॥ शोभितंपुरुषव्याघ्रैःकर्णभीष्माभिमन्युभिः॥ द्रोणद्रुपदशल्यैश्चज्वलद्भिरिवपावकैः॥ २१॥ कांचनैःकवचैर्निष्कैर्मणि-
भिश्चमहात्मनां॥ अंगदैर्हस्तकेयूरैःस्रग्भिश्चसमलंकृतं॥ २२॥ वीरबाहुविसृष्टाभिःशक्तीभिःपरिघैरपि॥ खड्गैश्चविविधैस्तीक्ष्णैःसशरैश्चशरासनैः॥ २३॥
क्रव्यादसंघैर्मुदितैस्तिष्ठद्भिःसहितैःक्वचित्॥ क्वचिदाक्रीडमानैश्चशयानैश्चापरैःक्वचित्॥ २४॥ एतदेवंविधंवीरसंपश्यायोधनंविभो॥ पश्यमानाहिदंत्यामि
शोकेनाहंजनार्दन॥ २५॥ पंचालानांकुरूणांचविनाशंमधुसूदन॥ पंचानामपिभूतानामहंवधमचिंतयं॥ २६॥

चालवधात्कुलंपांचभौतिकंजगन्नष्टमितिभावः॥ २६॥

॥२४॥२८॥२९॥३०॥ रुक्मानिआस्तीर्यैतिशेष॥३१॥३२॥३३॥३४॥३५॥३६॥३७॥३८॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥४६॥४७॥ एतंः शीचंतीरभिलक्ष्येतिशेषः॥४८॥४९॥५०॥५१॥

तास्सुवर्णाश्चगृध्राश्चकर्षयंत्यसृगुक्षिताः ॥ विगृह्यचरणैर्गृध्राभक्षयंतिसहस्रशः ॥ २७ ॥ जयद्रथस्यकर्णस्यतथैवद्रोणभीष्मयोः ॥ अभिमन्योर्विनाशंचक श्चिंतयितुमर्हति ॥ २८ ॥ अवध्यकल्पान्निहतान्गतसत्वानचेतसः ॥ गृध्रकंकवटश्येनश्वसृगालादनीकृतान् ॥ २९ ॥ अमर्षवशमापन्नान्दुर्योधनवशेस्थि तान् ॥ पश्येमान्पुरुषव्याघ्रान्संशांतान्पावकानिव ॥ ३० ॥ शयानायेपुरासर्वेमृदूनिशयनानिच ॥ विपन्नास्तेऽद्यवसुधांविवृतामधिशेरते ॥ ३१ ॥ वंदिभिःस ततंकालेस्तुवद्भिरभिनंदिताः ॥ शिवानामशिवाघोराःशृण्वंतिविविधागिरः ॥ ३२ ॥ येपुराशेरतेवीराःशयनेषुयशस्विनः ॥ चंदनागुरुदिग्धांगास्तेद्यपांसुषु शेरते ॥ ३३ ॥ तेषामाभरणान्येतेगृध्रगोमायुवायसाः ॥ आक्षिपंतिशिवाघोराविनदंत्यःपुनःपुनः ॥ ३४ ॥ बाणान्विनिशितान्पीतान्निस्त्रिंशान्विमलागदाः ॥ युद्धाभिमानिनःसर्वेजीवंतइवबिभ्रति ॥ ३५ ॥ सुरूपवर्णाबहवःक्रव्यादैरवघट्टिताः ॥ ऋषभप्रतिरूपाश्चशेरतेहरितस्रजः ॥ ३६ ॥ अपरेपुनरालिंग्य[illegible] घबाहवः ॥ शेरतेऽभिमुखाःशूरादयिताइवयोषितः ॥ ३७ ॥ बिभ्रतःकवचान्यन्येविमलान्यायुधानिच ॥ नधर्षयंतिक्रव्यादाजीवंतीतिजनार्दन ॥ ३८ ॥ क्र व्यादैःकृष्यमाणानामपरेषांमहात्मनां ॥ शातकौंभ्यःस्रजश्चित्राविप्रकीर्णाःसमंततः ॥ ३९ ॥ एतेगोमायवोभीमानिहतानांयशस्विनां ॥ कंठांतरगतान्हारा नाक्षिपंतिसहस्रशः ॥ ४० ॥ सर्वेष्वपररात्रेषुयाननंदंतबंदिनः ॥ स्तुतिभिश्चपरार्ध्याभिरुपचारैश्चशिक्षिताः ॥ ४१ ॥ तानिमाःपरिदेवंतिदुःखार्ताःपरमांगनाः ॥ कृपणंवृष्णिशार्दूलदुःखशोकार्दिताभृशं ॥ ४२ ॥ रक्तोत्पलवनानीवविभांतिरुचिराणिच ॥ मुखानिपरमस्त्रीणांपरिशुष्काणिकेशव ॥ ४३ ॥ रुदितादुपरताह्येताध्यायंत्यःसपरिच्छदाः ॥ कुरुस्त्रियोऽभिगच्छंतितेनतेनैवदुःखिताः ॥ ४४ ॥ एतान्यादित्यवर्णानितपनीयनिभानिच ॥ रोषरोदनताम्राणिवक्त्राणिकुरुयोषि तां ॥ ४५ ॥ श्यामानांवरवर्णानांगौरीणामेकवाससां ॥ दुर्योधनवरस्त्रीणांपश्यवृंदानिकेशव ॥ ४६ ॥ आसामपरिपूर्णार्थंनिशम्यपरिदेवितं ॥ इतरेतरसंक्रंदा न्नविजानंतियोषितः ॥ ४७ ॥ एतादीर्घमिवोच्छ्वस्यविक्रुश्यचविलप्यच ॥ विस्पंदमानादुःखेनवीराजहतिजीवितं ॥ ४८ ॥ बह्व्योदृष्ट्वाशरीराणिक्रोशंतिविलपं तिच ॥ पाणिभिश्चापराघ्नंतिशिरांसिमृदुपाणयः ॥ ४९ ॥ शिरोभिःपतितैर्हस्तैःसर्वांगैर्यूथशःकृतैः ॥ इतरेतरसंपृक्तैराकीर्णाभातिमेदिनी ॥ ५० ॥ विशिरस्कान थोकायान्दृष्ट्वाघ्येतानमिंदितान् ॥ मुह्यंत्यनुगतानार्योविदेहानिशिरांसिच ॥ ५१ ॥

॥ ५२ ॥ ५३ ॥ विजग्धान्भक्षितान् ॥ ५४ ॥ ५५ ॥ ५६॥५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ॥

शिरःकायेनसंधायप्रेक्षमाणाविचेतसः ॥ अपश्यंत्योपरंतत्रनेदमस्येतिदुःखिताः ॥ ५२ ॥ बाहूरुचरणानन्यान्विशिखोन्मथितान्पृथक् ॥ संदधत्योऽसुखाविष्टामूर्छंत्येताःपुनःपुनः ॥ ५३ ॥ उत्कृत्तशिरसश्चान्यान्विजग्धान्मृगपक्षिभिः ॥ दृष्ट्वाकाश्चिन्नजानंतिभर्तॄन्भरतयोषितः ॥ ५४ ॥ पाणिभिश्चापराघ्नंतिशिरांसिमधुसूदन ॥ प्रेक्ष्यभ्रातॄन्पितॄन्पुत्रान्पतींश्चनिहतान्परैः ॥ ५५ ॥ बाहुभिश्चसखड्गैश्चशिरोभिश्चसकुंडलैः ॥ अगम्यकल्पापृथिवीमांसशोणितकर्दमा ॥ ॥ ५६ ॥ बभूवभरतश्रेष्ठप्राणिभिर्गतजीवितैः ॥ नदुःखेषूचिताःपूर्वंदुःखंगाहंत्यनिंदिताः ॥ ५७ ॥ भ्रातृभिःपतिभिःपुत्रैरुपाकीर्णांवसुंधरां ॥ यूथानीवकिशोरीणांसुकेशीनांजनार्दन ॥ ५८ ॥ स्नुषाणांधृतराष्ट्रस्यपश्यवृंदान्यनेकशः ॥ इतोदुःखतरंकिंनुकेशवप्रतिभातिमे ॥ ५९ ॥ यदिमाःकुर्वतेसर्वारूपमुच्चावचंस्त्रियः ॥ नूनमाचरितंपापंमयापूर्वेषुजन्मसु ॥ ६० ॥ यापश्यामिहतान्पुत्रान्पौत्रान्भ्रातॄंश्चमाधव ॥ एवमार्ताविलपतीसमाभाष्यजनार्दनम् ॥ गांधारीपुत्रशोकार्तादद्दर्शनिहतंसुतं ॥ ६१ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीविलापप० आयोधनदर्शनेषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ वैशंपायनउवाच ॥ दुर्योधनंहतंदृष्ट्वागांधारीशोककर्शिता ॥ सहसान्यपतद्भूमौछिन्नेवकदलीवने ॥ १ ॥ सातुलब्ध्वापुनःसंज्ञांविक्रुश्यचविलप्यच ॥ दुर्योधनमभिप्रेक्ष्यशयानंरुधिरोक्षितं ॥ २ ॥ परिष्वज्यचगांधारीकृपणंपर्यदेवयत् ॥ हाहापुत्रेतिशोकार्ताविललापाकुलेंद्रिया ॥ ३ ॥ सुगूढजत्रुविपुलंहारनिष्कविभूषितं ॥ वारिणानेत्रजेनोरःसिंचंतीशोकतापिता ॥ ४ ॥ समीपस्थंहृषीकेशमिदंवचनमब्रवीत् ॥ उपस्थितेऽस्मिन्संग्रामेज्ञातीनांसंक्षयेविभो ॥ ५ ॥ मामयंप्राहवार्ष्णेयप्रांजलिर्नृपसत्तमः ॥ अस्मिन्ज्ञातिसमुद्धर्षेजयमंबाब्रवीतुमे ॥ ६ ॥ इत्युक्तेजानतीसर्वमहंस्वव्यसनागमं ॥ अब्रुवंपुरुषव्याघ्रयतोधर्मस्ततोजयः ॥ ७ ॥ यथाचयुध्यमानस्त्वंनवैमुह्यसिपुत्रक ॥ ध्रुवंशस्त्रजितान्लोकान्प्राप्स्यस्यमरवत्प्रभो ॥ ८ ॥ इत्येवमब्रुवंपूर्वंनैनंशोचामिवैप्रभो ॥ धृतराष्ट्रंतुशोचामिकृपणंहतबांधवं ॥ ९ ॥ अमर्षणंयुधांश्रेष्ठंकृतास्त्रंयुद्धदुर्मदं ॥ शयानंवीरशयनेपश्यमाधवमेसुतं ॥ १० ॥ योऽयंमूर्धावसिक्तानामग्रेयातिपरंतपः ॥ सोयंपांसुषुशेतेऽद्यपश्यकालस्यपर्ययं ॥ ११ ॥ ध्रुवंदुर्योधनोवीरोगतिंनसुलभांगतः ॥ तथात्यभिमुखःशेतेशयनेवीरसेविते ॥ १२ ॥

दुर्योधनमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ पंचशाखाभ्यांपंचांगुलिभ्यांपाणिभ्यां ॥ ३० ॥ ३१ ॥ ३२ ॥

यंपुरापर्युपासीनारमयंतिवरस्त्रियः॥ तंवीरशयनेसुप्तंरमयंत्यशिवाःशिवाः॥ १३॥ यंपुरापर्युपासीनारमयंतिमहीक्षितः॥ महीतलस्थंनिहतंगृध्रास्तंपर्युपास
ते॥ १४॥ यंपुराव्यजनैरग्र्यैरुपवीजंतियोषितः॥ तमद्यपक्षव्यजनैरुपवीजंतिपक्षिणः॥ १५॥ एषशेतेमहाबाहुर्बलवान्सत्यविक्रमः॥ सिंहेनेवद्विपःसंख्ये
भीमसेनेनपातितः॥ १६॥ पश्यदुर्योधनंकृष्णशयानंरुधिरोक्षितं॥ निहतंभीमसेनेनगदांसंमृज्यभारत॥ १७॥ अक्षौहिणीर्महाबाहुर्दशचैकांचकेशव॥ आ
नयद्यःपुरासंख्येसोऽनयान्निधनंगतः॥ १८॥ एषदुर्योधनःशेतेमहेष्वासोमहाबलः॥ शार्दूलइवसिंहेनभीमसेनेनपातितः॥ १९॥ विदुरंह्यवमन्यैषपितरंचै
वमंदभाक्॥ बालोवृद्धावमानेनमंदोमृत्युवशंगतः॥ २०॥ निःसपत्नामहीयस्यत्रयोदशसमाःस्थिता॥ सशेतेनिहतोभूमौपुत्रोमेपृथिवीपतिः॥ २१॥ अप
श्यंकृष्णपृथिवींधार्तराष्ट्रानुशासितां॥ पूर्णांहस्तिगवाश्वैश्चवार्ष्णेयनतुतच्चिरं॥ २२॥ तामेवाद्यमहाबाहोपश्याम्यन्यानुशासितां॥ हीनांहस्तिगवाश्वेनकिंनु
जीवामिमाधव॥ २३॥ इदंकष्टतरंपश्यपुत्रस्यापिवधान्मम॥ यदिमाःपर्युपासंतेहतान्शूरान्रणेस्त्रियः॥ २४॥ प्रकीर्णकेशांसुश्रोणींदुर्योधनभुजांकगां॥
रुक्मवेदीनिभांपश्यकृष्णलक्ष्मणमातरं॥ २५॥ नूनमेषापुराबालाजीवमानेमहीभुजे॥ भुजावाश्रित्यरमतेसुभुजस्यमनस्विनी॥ २६॥ कथंतुशतधानेदं
हृदयंममदीर्यते॥ पश्यंत्यानिहतंपुत्रंपुत्रेणसहितंरणे॥ २७॥ पुत्रंरुधिरसंसिक्तमुपजिघ्रत्यनिंदिता॥ दुर्योधनंतुवामोरूःपाणिनापरिमार्जती॥ २८॥ किंनुशो
चतिभर्तारंपुत्रंचैषमनस्विनी॥ तथाह्यवस्थिताभातिपुत्रंचाप्यभिवीक्ष्यसा॥ २९॥ स्वशिरःपंचशाखाभ्यामभिहत्यायतेक्षणा॥ पतत्युरसिवीरस्यकुरुराज
स्यमाधव॥ ३०॥ पुंडरीकनिभाभातिपुंडरीकांतरप्रभा॥ मुखंविमृज्यपुत्रस्यभर्तुश्चैवतपस्विनी॥ ३१॥ यदिसत्यागमाःसंतियदिवैश्रुतयस्तथा॥ ध्रुवंलोका
नवाप्तोयंनृपोबाहुबलार्जितान्॥ ३२॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीविलापप॰ दुर्योधनदर्शनेसप्तदशोऽध्यायः॥ १७॥ ॥ ७॥ ॥ ७॥
गांधार्युवाच पश्यमाधवपुत्रान्मेशतसंख्यान्जितक्लमान्॥ गदयाभीमसेनेनभूयिष्ठंनिहतान्रणे॥ १॥ इदंदुःखतरंमेद्ययदिमामुक्तमूर्धजाः॥ हतपुत्रार
णेबालाःपरिधावंतिमेस्नुषाः॥ २॥ प्रासादतलचारिण्यश्चरणैर्भूषणान्वितैः॥ आपन्नायत्स्पृशंतीमांरुधिरार्द्रांवसुंधरां॥ ३॥

इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेसप्तदशोऽध्यायः॥ १७॥ ॥ ७॥ ॥ ७॥ पश्येति॥ १॥ २॥ ३॥

॥ ४ ॥ करसंमितमध्यमामुष्टिप्रमितमध्या ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ [illegible] ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

कृच्छ्रादुत्सारयंतिस्मगृध्रगोमायुवायसान्॥ दुःखेनार्ताविघूर्णंत्योमत्ताइवचरंत्युत ॥ ४ ॥ एषान्यात्वनवद्यांगीकरसंमितमध्यमा ॥ घोरमायोधनंदृष्ट्वानिप
तत्यतिदुःखिता ॥ ५ ॥ दृष्ट्वामेपार्थिवसुतामेतांलक्ष्मणमातरं॥ राजपुत्रींमहाबाहोमनोनत्युपशाम्यति॥ ६ ॥ भ्रातॄंश्चान्याःपितॄंश्चान्याःपुत्रांश्चनिहतान्भुवि॥
दृष्ट्वापरिपतंत्येताःप्रगृह्यसुमहाभुजान्॥ ७ ॥ मध्यमानांतुनारीणांवृद्धानांचापराजित॥ आक्रंदंहतबंधूनांदारुणंवैशसेशृणु॥ ८ ॥ रथनीडानिदेहांश्चहतानां
गजवाजिनां॥ आश्रित्यश्रममोहार्ताःस्थिताःपश्यमहाभुज॥ ९ ॥ अन्यांचापहृतंकायाच्चारुकुंडलमुन्नसं॥ स्वस्यबंधोःशिरःकृष्णगृहीत्वांपश्यतिष्ठतीं॥ १० ॥
पूर्वजातिकृतंपापंमन्येनाल्पमिवानघ॥ एताभिरनवद्याभिर्मयाचैवाल्पमेधया ॥ ११ ॥ यदिदंधर्मराजेनपातितंनोजनार्दन ॥ नहिनाशोस्तिवार्ष्णेयकर्म
णोःशुभपापयोः॥ प्रत्यग्रवयसःपश्यदर्शनीयकुचाननाः॥ १२ ॥ कुलेषुजाताह्रीमत्यःकृष्णपक्ष्माक्षिमूर्धजाः ॥ १३ ॥ हंसगद्गदभाषिण्योदुःखशोकप्रमो
हिताः॥ सारस्यइववाशंत्यःपतिताःपश्यमाधव॥ १४ ॥ फुल्लपद्मप्रकाशानिपुंडरीकाक्षयोषितां॥ अनवद्यानिवक्त्राणितापयंत्येपरश्मिवान्॥ १५ ॥ ईर्षूणां
ममपुत्राणांवासुदेवावरोधनं॥ मत्तमातंगदर्पाणांपश्यंत्यद्यपृथग्जनाः ॥ १६ ॥ शतचंद्राणिचर्माणिध्वजांश्चादित्यवर्चसः॥ रौक्माणिचैववर्माणिनिष्का
नपिचकांचनान्॥ १७ ॥ शीर्षत्राणानिचैतानिपुत्राणांमेमहीतले॥ पश्यदीप्तानिगोविंदपावकान्सुहुतानिव॥ १८ ॥ एषदुःशासनःशेतेशूरेणामित्रघातिना॥
पीतशोणितसर्वांगोयुधिभीमेनपातितः॥ १९ ॥ गदयाभीमसेनेनपश्यमाधवमेसुतं॥ द्यूतक्लेशाननुस्मृत्यद्रौपद्यानोदितेनच ॥ २० ॥ उक्ताह्यनेनपांचाली
सभायांद्यूतनिर्जिता॥ प्रियंचिकीर्षताभ्रातुःकर्णस्यचजनार्दन॥ २१ ॥ सहैवसहदेवेननकुलेनार्जुनेनच॥ दासीभूतासिपांचालिक्षिप्रंप्रविशनोगृहान्॥ २२ ॥
ततोऽहमब्रुवंकृष्णतदादुर्योधनंनृपं॥ मृत्युपाशपरिक्षिप्तंशकुनिंपुत्रवर्जय॥ २३ ॥ निबोधैनंसुदुर्बुद्धिंमातुलंकलहप्रियं ॥ क्षिप्रमेनंपरित्यज्यपुत्रशाम्यस्वपां
डवैः॥ २४ ॥ नबुध्यसेत्वंदुर्बुद्धेभीमसेनममर्षणं॥ वाङ्नाराचैस्तुदंस्तीक्ष्णैरुल्काभिरिवकुंजरं॥ २५ ॥ तानेवरहसिक्रुद्धोवाक्शल्यानवधारयन् ॥ उत्ससर्ज
विषंतेषुसर्पोगोवृषभेष्विव॥ २६ ॥ एषदुःशासनःशेतेविक्षिप्यविपुलौभुजौ ॥ निहतोभीमसेनेनसिंहेनेवमहागजः॥ २७ ॥

एषमाधवेतिस्पष्टार्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

॥ २८ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेअष्टादशोऽध्यायः ॥ १८ ॥ ॥ ७ ॥

अत्यर्थमकरोद्रौद्रंभीमसेनोऽत्यमर्षणः ॥ दुःशासनस्ययत्क्रुद्धोऽपिबच्छोणितमाहवे ॥ २८ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीविलाप० गांधारीवाक्येअष्टादशोऽध्यायः ॥ १८ ॥ ॥ ७ ॥ गांधार्युवाच एषमाधवपुत्रोमेविकर्णःप्राज्ञसंमतः ॥ भूमौविनिहतःशेतेभीमेनशतधाकृतः ॥ १ ॥ गजमध्येहतःशेतेविकर्णोमधुसूदन ॥ नीलमेघपरिक्षिप्तःशरदीवनिशाकरः ॥ २ ॥ अस्यचापग्रहेणैवपाणिःकृतकिणोमहान् ॥ कथंचिच्छिद्यतेगृध्रैरत्तुकामैस्तलत्रवान् ॥ ३ ॥ अस्यभार्यामिषप्रेप्सून्गृध्रकाकांस्तपस्विनी ॥ वारयत्यनिशंबालानचशक्नोतिमाधव ॥ ४ ॥ युवावृंदारकःशूरोविकर्णःपुरुषर्षभ ॥ सुखोचितःसुखार्हश्चशेतेपांसुषुमाधव ॥ ५ ॥ कर्णिनालीकनाराचैर्भिन्नमर्माणमाहवे ॥ अद्यापिनजहात्येनंलक्ष्मीर्भरतसत्तमं ॥ ६ ॥ एषसंग्रामशूरेणप्रतिज्ञांपालयिष्यता ॥ दुर्मुखोऽभिमुखःशेतेहतोऽरिगणहारिणा ॥ ७ ॥ तस्यैतद्वदनंकृष्णश्वापदैरर्धभक्षितं ॥ विभात्यभ्यधिकंतातसप्तम्यामिवचंद्रमाः ॥ ८ ॥ शूरस्यहिरणकृष्णपश्यैवंनमथेदृशं ॥ सकथंनिहतोऽमित्रैःपांसून्ग्रसतिमेसुतः ॥ ९ ॥ यस्याहवमुखेसौम्यस्थातानैवोपपद्यते ॥ सकथंदुर्मुखोऽमित्रैर्हतोविबुधलोकजित् ॥ १० ॥ चित्रसेनंहतंभूमौशयानंमधुसूदन ॥ धार्तराष्ट्रमिमंपश्यप्रतिमानंधनुष्मतां ॥ ११ ॥ तंचित्रमाल्याभरणंयुवत्यःशोककर्शिताः ॥ क्रव्यादसंघैःसहितारुदत्यःपर्युपासते ॥ १२ ॥ स्त्रीणांरुदितनिर्घोषःश्वापदानांचगर्जितं ॥ चित्ररूपमिदंकृष्णविचित्रंप्रतिभातिमे ॥ १३ ॥ युवावृंदारकोनित्यंप्रवरस्त्रीनिषेवितः ॥ विविंशतिरसौशेतेध्वस्तःपांसुषुमाधव ॥ १४ ॥ शरसंकृत्तवर्माणंवीरंविशसनेहतं ॥ परिवार्यासतेगृध्राःपश्यकृष्णविविंशतिं ॥ १५ ॥ प्रविश्यसमरेशूरःपांडवानामनीकिनीं ॥ सवीरशयनेशेतेपरःसत्पुरुषोचिते ॥ १६ ॥ स्मितोपपन्नंसुनसंसुभ्रुताराधिपोपमं ॥ अतीवशुभ्रंवदनंकृष्णपश्यविविंशतेः ॥ १७ ॥ एनंहिपर्युपासतेबहुधावरयोषितः ॥ क्रीडंतमिवगंधर्वंदेवकन्याःसहस्रशः ॥ १८ ॥ हंतारंपरसैन्यानांशूरंसमितिशोभनं ॥ निबर्हणममित्राणांदुःसहंविषहेतकः ॥ १९ ॥ दुःसहस्यैतदाभातिशरीरंसंवृतंशरैः ॥ गिरिरात्मगतैःफुल्लैःकर्णिकारैरिवाचितः ॥ २० ॥ शातकौंभ्यास्रजाभातिकवचेनचभास्वता ॥ अग्निनेवगिरिःश्वेतोगतासुरपिदुःसहः ॥ २१ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीविलापप० गांधारीवाक्येएकोनविंशोऽध्यायः ॥ १९ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेएकोनविंशोऽध्यायः ॥ १९ ॥ ॥ ७ ॥ ॥ ७ ॥

गांधार्युवाच   अध्यर्धगुणमाहुर्यंबलेशौर्येचकेशव ॥ पित्रात्वयाचदाशार्हदृप्तंसिंहमिवोत्कटं ॥ १ ॥ योविभेदचमूमेकोममपुत्रस्यदुर्भिदां ॥ सभूत्वामृत्युर
न्येषांस्वयंमृत्युवशंगतः ॥ २ ॥ तस्योपलक्षयेकृष्णकार्ष्णेरमिततेजसः ॥ अभिमन्योर्हतस्यापिप्रभानैवोपशाम्यति ॥ ३ ॥ एषाविराटदुहितास्नुषागांडीवधन्व
नः ॥ आर्ताबालंपतिंवीरंदृष्ट्वाशोचत्यनिंदिता ॥ ४ ॥ तमेषाहिसमागम्यभार्याभर्तारमंतिके ॥ विराटदुहिताकृष्णपाणिनापरिमार्जति ॥ ५ ॥ तस्यवक्रमुपाघ्रा
यसौभद्रस्यमनस्विनी ॥ विबुद्धकमलाकारंकंबुवृत्तशिरोधरं ॥ ६ ॥ काम्यरूपवतीचैषापरिष्वजतिभामिनी ॥ लज्जमानापुराचैनंमाध्वीकमदमूर्छिता ॥ ७ ॥
तस्यक्षतजसंदिग्धंजातरूपपरिष्कृतं ॥ विमुच्यकवचंकृष्णशरीरमभिवीक्षते ॥ ८ ॥ अवेक्षमाणातंबालाकृष्णत्वामभिभाषते ॥ अयंतेपुंडरीकाक्षसदृशाक्षो
निपातितः ॥ ९ ॥ बलेवीर्येचसदृशस्तेजसाचैवतेऽनघ ॥ रूपेणचतथाऽत्यर्थंशेतेभुविनिपातितः ॥ १० ॥ अत्यंतंसुकुमारस्यरांकवाजिनशायिनः ॥ कच्चिदद्य
शरीरंतेसंतापंनपरितप्यते ॥ ११ ॥ मातंगभुजवर्ष्माणौज्याक्षेपकठिनत्वचौ ॥ कांचनांगदिनौशेतेनिक्षिप्यविपुलौभुजौ ॥ १२ ॥ व्यायम्यबहुधानूनंसुखंसु
मःश्रमादिव ॥ एवंविलपतीमार्तांनहिमामभिभाषसे ॥ १३ ॥ नस्मराम्यपराधंतेकिंमांनप्रतिभाषसे ॥ ननुमांत्वंपुरादूरादभिवीक्ष्याभिभाषसे ॥ १४ ॥ नस्मरा
म्यपराधंमेकिंमांनप्रतिभाषसे ॥ आर्यामार्यसुभद्रांत्वमिमांश्वत्रिदशोपमान् ॥ १५ ॥ पितृन्मांचैवदुःखार्तांविहायक्वगमिष्यसि ॥ तस्यशोणितदिग्धानकेशा
शानुद्यम्यपाणिना ॥ १६ ॥ उत्संगेवक्रमाधायजीवंतमिवपृच्छति ॥ स्वस्रीयंवासुदेवस्यपुत्रंगांडीवधन्वनः ॥ १७ ॥ कथंत्वांरणमध्यस्थंजघ्नुरेतेमहारथाः ॥ धि
गस्तुक्रूरकर्तॄंस्तान्कृपकर्णजयद्रथान् ॥ १८ ॥ द्रोणद्रौणायनीचोभौयैरहंविधवाकृता ॥ रथर्षभाणांसर्वेषांकथमासीत्तदामनः ॥ १९ ॥ बालंत्वांपरिवार्यै
कंममदुःखायजघ्नुषां ॥ कथंनुपांडवानांचपंचालानांतुपश्यतां ॥ २० ॥ त्वंवीरनिधनंप्राप्तोनाथवान्सन्ननाथवत् ॥ दृष्ट्वाबहुभिराक्रंदेनिहतंत्वामपिनाथव ॥
॥ २१ ॥ वीरःपुरुषशार्दूलःकथंजीवतिपांडवः ॥ नराज्यलाभोविपुलःशत्रूणांचपराभवः ॥ २२ ॥ प्रीतिंधास्यतिपार्थानांत्वामृतेपुष्करेक्षण ॥ तवशस्त्रजितांल्लो
कान्धर्मेणचदमेनच ॥ २३ ॥ क्षिप्रमन्वागमिष्यामितत्रमांप्रतिपालय ॥ दुर्मरंपुनरप्राप्तेकालेभवतिकेनचित् ॥ २४ ॥ यदहंत्वांरणेदृष्ट्वाहतंजीवामिदुर्भगा ॥
कामिदानींनरव्याघ्रश्लक्ष्णयास्मितयागिरा ॥ २५ ॥ पितृलोकेसमेत्यान्यांमामिवामंत्रयिष्यसि ॥ नूनमप्सरसांस्वर्गेमनांसिप्रमथिष्यसि ॥ २६ ॥

२७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ क्षुःशलाकृतिः वृकुःक्षीवंतनौशस्त्राकृतात्रपातिमेदिनी॥ ३४ ॥ ३५ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभारतभावदीपेविंशतितमोऽध्यायः ॥ २० ॥

परमेणचरूपेणगिराचस्मितपूर्वया ॥ प्राप्यपुण्यकृतांल्लोकानप्सरोभिःसमेयिवान् ॥ २७॥ सोभद्रविहरन्कालेस्मरेथाःसुकृतानिमे ॥ एतावानिहसंवासोवि
हितस्तेमयासह ॥ २८ ॥ षण्मासान्सप्तमेमासित्वंवीरनिधनंगतः ॥ इत्युक्तवचनामेतामपकर्षंतिदुःखितां ॥ २९ ॥ उत्तरांमोघसंकल्पांमत्स्यराजकुलस्त्रियः ॥
उत्तरामपकृष्यैनामार्तामार्ततराःस्वयं ॥ ३० ॥ विराटंनिहतंदृष्ट्वाक्रोशंतिविलपंतिच ॥ द्रोणास्त्रशरसंकृत्तंशयानंरुधिरोक्षितं ॥ ३१ ॥ विराटंवितुदंत्येतेगृध्रगो
मायुवायसाः ॥ वितुद्यमानंविहगैर्विराटमसितेक्षणाः ॥ ३२ ॥ नशक्नुवंतिविहगान्निवारयितुमातुराः ॥ आसामातपतप्तानामायासेनचयोषितां ॥ ३३ ॥ श्र
मेणचविवर्णानांवक्राणांविप्लुतंवपुः ॥ उत्तरंचाभिमन्युंचकांबोजंचसुदक्षिणं ॥ ३४ ॥ शिशूनेतान्हतान्पश्यलक्ष्मणंचसुदर्शनं ॥ आयोधनशिरोमध्येशया
नंपश्यमाधव ॥ ३५ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीविला० गांधारीवाक्येविंशतितमोऽध्यायः ॥ २० ॥ ॥छ॥ ॥छ॥ गांधार्युवाच
एषवैकर्तनःशेतेमहेष्वासोमहारथः ॥ ज्वलितानलवत्संख्येसंशांतःपार्थतेजसा ॥ १ ॥ पश्यवैकर्तनंकर्णंनिहत्यप्रतिरथान्बहून् ॥ शोणितौघपरीतांगंशयानंप
तितंभुवि ॥ २ ॥ अमर्षीदीर्घरोषश्चमहेष्वासोमहाबलः ॥ रणेविनिहतःशेतेशूरोगांडीवधन्वना ॥ ३ ॥ यंस्मपांडवसंत्रासान्ममपुत्रामहारथाः ॥ प्रायुध्यंतपुरः
स्कृत्यमातंगाइवयूथपं ॥ ४ ॥ शार्दूलमिवसिंहेनसमरेसव्यसाचिना ॥ मातंगमिवमत्तेनमातंगेननिपातितं ॥ ५ ॥ समेताःपुरुषव्याघ्रनिहतंशूरमाहवे ॥ प्रकीर्ण
मूर्धजाःपत्न्योरुदत्यःपर्युपासते ॥ ६ ॥ उद्विग्नःसततंयस्माद्धर्मराजोयुधिष्ठिरः ॥ त्रयोदशसमानिद्रांचिंतयन्नाध्यगच्छत ॥ ७ ॥ अनाधृष्यःपरैर्युद्धेशत्रुभिर्मघ
वानिव ॥ युगांताग्निरिवार्चिष्मान्हिमवानिवनिश्चलः ॥ ८ ॥ सभूत्वाशरणंवीरोधार्तराष्ट्रस्यमाधव ॥ भूमौविनिहतःशेतेवातभग्नइवद्रुमः ॥ ९ ॥ पश्यकर्णस्य
पत्नींत्वंवृषसेनस्यमातरं ॥ लालप्यमानांकरुणंरुदतींपतितांभुवि ॥ १० ॥ आचार्यशापोऽनुगतोध्रुवंत्वांयदग्रसच्चक्रमिदंधरित्री ॥ ततःशरेणापहृतंशिरस्तेध
नंजयेनाहवशोभिनायुधि ॥ ११ ॥ हाहाधिगेषापतिताविसंज्ञासमीक्ष्यजांबूनदबद्धकक्षं ॥ कर्णंमहाबाहुमदीनसत्वंसुषेणमातारुदतीभृशार्ता ॥ १२ ॥ अल्पा
वशेषोऽपिकृतोमहात्माशरीरभक्षैःपरिभक्षयद्भिः ॥ द्रष्टुंननःप्रीतिकरःशशीवकृष्णस्यपक्षस्यचतुर्दशाहे ॥ १३ ॥

एषवैकर्तनइतिआवंत्यंभीमसेनेनेतिचस्पष्टार्थौएकविंशद्वाविंशौ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

सावर्तमानापतितापृथिव्यामुत्थायदीनापुनरेवचैषा ॥ कर्णस्यवक्त्रंपरिजिघ्रमाणारोरूयतेपुत्रवधाभितप्ता ॥ १४ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीवि
लापपर्वणिकर्णदर्शनोनामैकविंशतितमोऽध्यायः ॥ २१ ॥ गांधार्युवाच आवंत्यंभीमसेनेनभक्षयंतिनिपातितं ॥ गृध्रगोमायवःशूरंबहुबंधुमबंधुवत् ॥
॥ १ ॥ तंपश्यकदनंकृत्वाशूराणांमधुसूदन ॥ शयानंवीरशयनेरुधिरेणसमुक्षितं ॥ २ ॥ तंसृगालाश्चकंकाश्चक्रव्यादाश्चपृथग्विधाः ॥ तेनतेनविकर्षंतिपश्य
कालस्यपर्ययं ॥ ३ ॥ शयानंवीरशयनेशूरमाक्रंदकारिणं ॥ आवंत्यमभितोनार्योरुदत्यःपर्युपासते ॥ ४ ॥ प्रातिपेयंमहेष्वासंहतंभल्लेनबाह्लिकं ॥ प्रसुप्तमिवशा
र्दूलंपश्यकृष्णमनस्विनं ॥ ५ ॥ अतीवमुखवर्णोऽस्यनिहतस्यापिशोभते ॥ सोमस्येवाभिपूर्णस्यपौर्णमास्यांसमुद्यतः ॥ ६ ॥ पुत्रशोकाभितप्तेनप्रतिज्ञांचाभिर
क्षता ॥ पाकशासनिनासंख्येवार्धक्षत्रिर्निपातितः ॥ ७ ॥ एकादशचमूर्भित्वारक्ष्यमाणंमहात्मना ॥ सत्यंचिकीर्षतापश्यहतमेनंजयद्रथं ॥ ८ ॥ सिंधुसौवीर
भर्तारंदर्पपूर्णमनस्विनं ॥ भक्षयंतिशिवागृध्राजनार्दनजयद्रथं ॥ ९ ॥ संरक्ष्यमाणंभार्याभिरनुरक्ताभिरच्युत ॥ भीषयंत्योविकर्षंतिगहनंनिम्नमंतिकात् ॥ १० ॥
तमेताःपर्युपासंतेरक्ष्यमाणंमहाभुजं ॥ सिंधुसौवीरभर्तारंकांबोजयवनस्त्रियः ॥ ११ ॥ यदाकृष्णामुपादायप्राद्रवत्केकयैःसह ॥ तदैववध्यःपांडूनां[illegible]
जयद्रथः ॥ १२ ॥ दुःशलांमानयद्भिस्तुयदामुक्तोजयद्रथः ॥ कथमद्यनतांकृष्णमानयंतिस्मतेपुनः ॥ १३ ॥ सैषाममसुताबालाविलपंतीचदुःखिता ॥ आत्म
नाहंतिचात्मानमाक्रोशंतीचपांडवान् ॥ १४ ॥ किंनुदुःखतरंकृष्णपरंममभविष्यति ॥ यत्सुताविधवाबालास्नुषाश्चनिहतेश्वराः ॥ १५ ॥ हाहाधिग्दुःशलांप
श्यवीतशोकभयामिव ॥ शिरोभर्तुरनासाद्यधावमानामितस्ततः ॥ १६ ॥ वारयामासयःसर्वान्पांडवान्पुत्रगृद्धिनः ॥ सहत्वाविपुलाःसेनाःस्वयंमृत्युवशंग
तः ॥ १७ ॥ तंमत्तमिवमातंगंवीरंपरमदुर्जयं ॥ परिवार्यरुदंत्येताःस्त्रियश्चंद्रोपमाननाः ॥ १८ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीवि० गांधारीवाक्येद्वाविंशो
ऽध्यायः ॥ २२ ॥ ॥ ७ ॥ गांधार्युवाच एषशल्योहतःशेतेसाक्षान्नकुलमातुलः ॥ धर्मज्ञेनहतस्तातधर्मराजेनसंयुगे ॥ १ ॥ यस्त्वयास्पर्धते
नित्यंसर्वत्रपुरुषर्षभ ॥ सएषनिहतःशेतेमद्रराजोमहाबलः ॥ २ ॥ येनसंगृह्णतातातरथमाधिरथेर्युधि ॥ जयार्थंपांडुपुत्राणांतदातेजोवधःकृतः ॥ ३ ॥

॥ आस्याद्विनिःसृताजिह्वाभ
अहोधिक्पश्यशल्यस्यपूर्णचंद्रसुदर्शनं ॥ मुखंपद्मपलाशाक्षंकाकैरादष्टमव्रणं ॥ ४ ॥ अस्यचामीकराभस्यतप्तकांचनसंप्रभा ॥ आस्याद्विनिःसृताजिह्वाभ
क्ष्यतेकृष्णपक्षिभिः ॥ ५ ॥ युधिष्ठिरेणनिहतंशल्यंसमितिशोभनं ॥ रुदत्यःपर्युपासंतेमद्रराजंकुलांगनाः ॥ ६ ॥ एताःसुसूक्ष्मवसनामद्रराजंनरर्षभं ॥ क्रोशं
त्योऽथसमासाद्यक्षत्रियाःक्षत्रियर्षभं ॥ ७ ॥ शल्यंनिपतितंनार्यःपरिवार्याभितःस्थिताः ॥ वासितागृष्टयःपंकेपरिमग्नमिवद्विपं ॥ ८ ॥ शल्यंशरणदंशूरंपश्य
मंवृष्णिनंदन ॥ शयानंवीरशयनेशरैर्विशकलीकृतं ॥ ९ ॥ एषशैलालयोराजाभगदत्तःप्रतापवान् ॥ गजांकुशधरःश्रीमान्शेतेभुविनिपातितः ॥ १० ॥ य
स्यरुक्ममयीमालाशिरस्येषाविराजते ॥ श्वापदैर्भक्ष्यमाणस्यशोभयंतीवमूर्धजान् ॥ ११ ॥ एतेनकिलपार्थस्ययुद्धमासीत्सुदारुणं ॥ रोमहर्षणमत्युग्रंशक्र
स्यत्वहिनायथा ॥ १२ ॥ योधयित्वामहाबाहुरेषपार्थंधनंजयं ॥ संशयंगमयित्वाचकुंतीपुत्रेणपातितः ॥ १३ ॥ यस्यनास्तिसमोलोकेशौर्येवीर्येचकश्चन ॥
सएषनिहतःशेतेभीष्मोभीष्मकृदाहवे ॥ १४ ॥ पश्यशांतनवंकृष्णशयानंसूर्यवर्चसं ॥ युगांतइवकालेनपतितंसूर्यमंबरात् ॥ १५ ॥ एषतप्त्वारणेशत्रून्शस्त्रता
पेनवीर्यवान् ॥ नरसूर्योऽस्तमभ्येतिसूर्योऽस्तमिवकेशव ॥ १६ ॥ शरतल्पगतंभीष्ममूर्ध्वरेतसमच्युतं ॥ शयानंवीरशयनेपश्यशूरनिषेवितं ॥ १७ ॥ कर्णिनाना
लीकनाराचैरास्तीर्यशयनोत्तमं ॥ आविश्यशेतेभगवान्स्कंदःशरवणंयथा ॥ १८ ॥ अतूलपूर्णंगांगेयस्त्रिभिर्बाणैःसमन्वितं ॥ उपधायोपधानाग्र्यंदत्तंगांडीव
धन्वना ॥ १९ ॥ पालयानःपितुःशास्त्रमूर्ध्वरेतामहायशाः ॥ एषशांतनवःशेतेमाधवाप्रतिमोयुधि ॥ २० ॥ धर्मात्मातातसर्वज्ञःपारावर्येणनिर्णये ॥ अमर्त्य
इवमर्त्यःसन्नेषप्राणानधारयत् ॥ २१ ॥ नास्तियुद्धेकृतीकश्चिन्नविद्वान्नपराक्रमी ॥ यत्रशांतनवोभीष्मःशेतेऽद्यनिहतःशरैः ॥ २२ ॥ स्वयमेतेनशूरेणपृच्छ्
मानेनपांडवैः ॥ धर्मज्ञेनाहवेमृत्युरादिष्टःसत्यवादिना ॥ २३ ॥ प्रनष्टःकुरुवंशश्चपुनर्येनसमुद्धृतः ॥ सगतःकुरुभिःसार्धंमहाबुद्धिःपराभवं ॥ २४ ॥ धर्मेषुकु
रवःकंनुपरिप्रक्ष्यंतिमाधव ॥ गतेदेवव्रतेस्वर्गंदेवकल्पेनरर्षभे ॥ २५ ॥

निर्णयेपारावर्येण परावरौपरलोकेहलोकौ तद्विषयेणज्ञानेन तत्त्वज्ञानबलेनप्राणानधारयदित्यर्थः ॥ [illegible] ॥ २१ ॥ २२ ॥ २५ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

अर्जुनस्यविनेतारमाचार्यसात्यकेस्तथा ॥ तंपश्यपतितंद्रोणंकुरूणांगुरुमुत्तमं ॥ २६ ॥ अस्त्रंचतुर्विधंवेदयथैवत्रिदशेश्वरः ॥ भार्गवोवामहावीर्यस्तथाद्रोणो पिमाधव ॥ २७ ॥ यस्यप्रसादाद्बीभत्सुःपांडवःकर्मदुष्करं ॥ चकारसहतःशेतेनैनमस्त्राण्यपालयन् ॥ २८ ॥ यंपुरोधायकुरवआह्वयंतिस्मपांडवान् ॥ सोयंश स्त्रभृतांश्रेष्ठोद्रोणःशस्त्रैःपरिक्षतः ॥ २९ ॥ यस्यनिर्दहतःसेनांगतिरग्नेरिवाभवत् ॥ सभूमौनिहतःशेतेशांतार्चिरिवपावकः ॥ ३० ॥ धनुर्मुष्टिरशीर्णश्चहस्तावा पश्यमाधव ॥ द्रोणस्यनिहतस्याजौदृश्यतेजीवतोयथा ॥ ३१ ॥ वेदायस्माच्चचत्वारःसर्वाण्यस्त्राणिकेशव ॥ अनपेतानिवैशूराद्यथैवादौप्रजापतेः ॥ ३२ ॥ वं दनार्हाविमौतस्यबंदिभिर्वंदितौशुभौ ॥ गोमायवोविकर्षंतिपादौशिष्यशतार्चितौ ॥ ३३ ॥ द्रोणंद्रुपदपुत्रेणनिहतंमधुसूदन ॥ कृपीकृपणमन्वास्तेदुःखोपहत चेतना ॥ ३४ ॥ तांपश्यरुदतीमार्तामुक्तकेशीमधोमुखीं ॥ हतंपतिमुपासंतींद्रोणंशस्त्रभृतांवरं ॥ ३५ ॥ बाणैर्भिन्नतनुत्राणंधृष्टद्युम्नेनकेशव ॥ उपास्तेवैमृधेद्रो णंजटिलाब्रह्मचारिणी ॥ ३६ ॥ प्रेतकृत्येचयततेकृपीकृपणमातुरा ॥ हतस्यसमरेभर्तुःसुकुमारीयशस्विनी ॥ ३७ ॥ अग्नीनाधायविधिवच्चितांप्रज्वाल्यसर्वतः ॥ द्रोणमाधायगायंतित्रीणिसामानिसामगाः ॥ ३८ ॥ कुर्वंतिचचितामेतेजटिलाब्रह्मचारिणः ॥ धनुर्भिःशक्तिभिश्चैवरथनीडैश्चमाधव ॥ ३९ ॥ शरैश्चविविधै स्त्यैर्धक्ष्यतेभूरितेजसं ॥ इतिद्रोणंसमाधायशंसंतिचरुदंतिच ॥ ४० ॥ सामभिस्त्रिभिरंतस्थैरनुशंसंतिचापरे ॥ अग्नावग्निंसमाधायद्रोणंहुत्वाहुताशने ॥ ४१ ॥ गच्छंत्यभिमुखागंगांद्रोणशिष्याद्विजातयः ॥ अपसव्यांचितिंकृत्वापुरस्कृत्यकृपींचते ॥ ४२ ॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्रीवि० गांधारीवचनेत्रयोवि शोऽध्यायः ॥ २३ ॥ ॥ ७ ॥ गांधार्युवाच सोमदत्तसुतंपश्ययुयुधानेनपातितं ॥ वितुद्यमानंविहगैर्बहुभिर्माधवांतिके ॥ १ ॥ पुत्रशोकाभिसं तप्तःसोमदत्तोजनार्दन ॥ युयुधानंमहेष्वासंगर्हयन्निवदृश्यते ॥ २ ॥ असौहिभूरिश्रवसोमाताशोकपरिप्लुता ॥ आश्वासयतिभर्तारंसोमदत्तमनिंदिता ॥ ३ ॥ दिष्ट्यानैनंमहाराजदारुणंभरतक्षयं ॥ कुरुसंक्रंदनंघोरंयुगांतमनुपश्यसि ॥ ४ ॥ दिष्ट्यायूपध्वजंपुत्रंवीरंभूरिसहस्रदं ॥ अनेकक्रतुयज्वानंनिहतंनानुपश्यसि ॥ ॥ ५ ॥ दिष्ट्यास्नुषाणामाक्रंदेघोरंविलपितंबहु ॥ नशृणोपिमहाराजसारसीनामिवार्णवे ॥ ६ ॥

ध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥ ७ ॥ सोमदत्तसुतमिति स्पष्टार्थश्चतुर्विंशः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ छिन्नबाहुर्नरस्याग्रमर्जुने
एकवस्त्रार्धसंवीताः प्रकीर्णासितमूर्धजाः॥ स्नुषास्तेपरिधावंतिहतापत्याहतेश्वराः॥ ७॥ श्वापदैर्भक्ष्यमाणंत्वमहोदिष्ट्यानपश्यसि॥ विनि
ननिपातितं॥ ८॥ शलंविनिहतंसंख्येभूरिश्रवसमेवच॥ स्नुषाश्चविविधाः सर्वादिष्ट्यानाद्येहपश्यसि॥ ९॥ दिष्ट्यातत्कांचनंछत्रंयूपकेतोर्महात्मनः॥ विनि
कीर्णरथोपस्थेसौमदत्तेर्नपश्यसि॥ १०॥ अमूस्तुभूरिश्रवसोभार्याः सात्यकिनाहतं॥ परिवार्यानुशोचंतिभर्तारमसितेक्षणाः॥ ११॥ एताविलप्यकरुणंभर्त
शोकेनकर्शिताः॥ पतंत्यभिमुखाभूमौकृपणंबतकेशव॥ १२॥ बीभत्सुरतिबीभत्संकर्मेदमकरोत्कथं॥ प्रमत्तस्ययदच्छैत्सीद्बाहुंशूरस्ययज्वनः॥ १३॥ ततः
पापतरंकर्मकृतवानपिसात्यकिः॥ यस्मात्प्रायोपविष्टस्यप्राहार्षीत्संशितात्मनः॥ १४॥ एकोद्वाभ्यांहतःशेषेत्वमधर्मेणधार्मिक॥ किंनुवक्ष्यंतिवैसत्सुगोष्ठीषु
चसभासुच॥ १५॥ अपुण्यमयशस्यंचकर्मेदंसात्यकिःस्वयं॥ इतियूपध्वजस्यैताः स्त्रियःक्रोशंतिमाधव॥ १६॥ भार्यायूपध्वजस्यैषाकरसंमितमध्यमा
त्वोत्संगेभुजंभर्तुःकृपणंपरिदेवति॥ १७॥ अयंसहंताशूराणांमित्राणामभयप्रदः॥ प्रदातागोसहस्राणांक्षत्रियांतकरःकरः॥ १८॥ अयंसरशनोत्कर्षीपीन
स्तनविमर्दकः॥ नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनःकरः॥ १९॥ वासुदेवस्यसान्निध्येपार्थेनाक्लिष्टकर्मणा॥ युध्यतःसमरेन्येनप्रमत्तस्यनिपातितः॥ २०॥
किंनुवक्ष्यसिसंसत्सुकथासुचजनार्दन॥ अर्जुनस्यमहत्कर्मस्वयंवासकिरीटभृत्॥ २१॥ इत्येवंगर्हयित्वैषातूष्णीमास्तेवरांगना॥ तामेतामनुशोचंतिसपत्न्यः
स्वामिवस्नुषां॥ २२॥ गांधारराजःशकुनिर्बलवान्सत्यविक्रमः॥ निहतःसहदेवेनभागिनेयेनमातुलः॥ २३॥ यःपुराहेमदंडाभ्यांव्यजनाभ्यांस्मवीज्यते॥
सएषपक्षिभिःपक्षैःशयानउपवीज्यते॥ २४॥ यःस्वरूपाणिकुरुतेशतशोऽथसहस्रशः॥ तस्यमायाविनोमायादग्धाःपांडवतेजसा॥ २५॥ मायया निकृति
प्रज्ञोजितवान्योयुधिष्ठिरं॥ सभायांविपुलंराज्यंसपुनर्जीवितंजितः॥ २६॥ शकुंताःशकुनिंकृष्णसमंतात्पर्युपासते॥ कैतवंममपुत्राणांविनाशायोपशि
क्षितं॥ २७॥ एतेनैतन्महद्वैरंप्रसक्तंपांडवैःसह॥ वधायममपुत्राणामात्मनःसगणस्यच॥ २८॥ यथैवममपुत्राणांलोकाःशस्त्रजिताःशुभाः॥ एवमस्यापिदु
र्बुद्धेर्लोकाःशस्त्रेणवैजिताः॥ २९॥ कथंचनायंतत्रापिपुत्रान्मेभ्रातृभिःसह॥ विरोधयेदृजुप्रज्ञाननृजुर्मधुसूदन॥ ३०॥ इतिश्रीमहाभारतेस्त्रीपर्वणिस्त्री
वि० गांधारीवाक्येचतुर्विंशोऽध्यायः॥ २४॥ ॥ ७॥

॥ बोजमिति कांबोजास्तरणंकंबलविशेषः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

गांधार्युवाच कांबोजंपश्यदुर्धर्षंकांबोजास्तरणोचितम् ॥ शयानमृषभस्कंधंहतंपांसुषुमाधव ॥ १ ॥ यस्यक्षतजसंदिग्धौबाहूचंदनभूषितौ ॥ अवेक्ष्यकरुणं
भार्याविलपत्यतिदुःखिता ॥ २ ॥ इमौतौपरिघप्रख्यौबाहूशुभतलांगुली ॥ ययोर्विवरमापन्नांनरतिर्मांपुराजहात् ॥ ३ ॥ कांगतिंतुगमिष्यामित्वयाहीना
जनेश्वर ॥ हतबंधुरनाथाचवेपंतीमधुरस्वरा ॥ ४ ॥ आतपेक्लाम्यमानानांविविधानामिवस्रजाम् ॥ क्लांतानामपिनारीणांनश्रीर्जहतिवैतनूः ॥ ५ ॥ शयानमभि
तःशूरंकालिंगंमधुसूदन ॥ पश्यदीप्तांगदयुगप्रतिनद्धमहाभुजम् ॥ ६ ॥ मागधानामधिपतिंजयत्सेनंजनार्दन ॥ आवार्यसर्वतःपत्न्यःप्ररुदंत्यःसुविह्वलाः
॥ ७ ॥ आसामायतनेत्राणांसुस्वराणांजनार्दन ॥ मनःश्रुतिहरोनादोमनोमोहयतीवमे ॥ ८ ॥ प्रकीर्णवस्त्राभरणारुदंत्यःशोककर्शिताः ॥ स्वास्तीर्णशयनो
पतामागध्यःशेरतेभुवि ॥ ९ ॥ कोसलानामधिपतिंराजपुत्रंबृहद्बलं ॥ भर्तारंपरिवार्यैताःपृथक्प्ररुदिताःस्त्रियः ॥ १० ॥ अस्यगात्रगतान्बाणान्कार्ष्णिबाहुब
लार्पितान् ॥ उद्धरंत्यसुखाविष्टामूर्च्छमानाःपुनःपुनः ॥ ११ ॥ आसांसर्वानवद्यानामातपेनपरिश्रमात् ॥ प्रम्लाननलिनाभानिभांतिवक्राणिमाधव
॥ १२ ॥ द्रोणेननिहताःशूराःशेरतेरुचिरांगदाः ॥ धृष्टद्युम्नसुताःसर्वेशिशवोहेममालिनः ॥ १३ ॥ रथाग्न्यगारंचापार्चिशरशक्तिगदेंधनं ॥ द्रोणमासाद्यनिर्द
ग्धाःशलभाइवपावकं ॥ १४ ॥ तथैवनिहताःशूराःशेरतेरुचिरांगदाः ॥ द्रोणेनाभिमुखाःसर्वेभ्रातरःपंचकैकयाः ॥ १५ ॥ तप्तकांचनवर्माणस्तालध्वजरथव्र
जाः ॥ भासयंतिमहींभासाज्वलिताइवपावकाः ॥ १६ ॥ द्रोणेनद्रुपदंसंख्येपश्यमाधवपातितं ॥ महाद्विपमिवारण्येसिंहेनमहताहतं ॥ १७ ॥ पांचालराज्ञोवि
मलंपुंडरीकाक्षपांडुरं ॥ आतपत्रंसमाभातिशरदीवनिशाकरः ॥ १८ ॥ एतास्तुद्रुपदंवृद्धंस्नुषाभार्याश्चदुःखिताः ॥ दग्ध्वागच्छंतिपांचाल्यंराजानमपसव्यतः
॥ १९ ॥ धृष्टकेतुंमहात्मानंचेदिपुंगवमंगनाः ॥ द्रोणेननिहतंशूरंहरंतिहतचेतसः ॥ २० ॥ द्रोणास्त्रमभिहत्यैषविमर्देमधुसूदन ॥ महेष्वासोहतःशेतेनद्याहृतइ
वद्रुमः ॥ २१ ॥ एषचेदिपतिःशूरोधृष्टकेतुर्महारथः ॥ शेतेविनिहतःसंख्येहत्वाशत्रून्सहस्रशः ॥ २२ ॥ वितुद्यमानंविहगैस्तंभार्याःपर्युपाश्रिताः ॥ चेदिराज
त्पर्यंकिशंहतंसबलबांधवं ॥ २३ ॥ दाशार्हपुत्रजंवीरंशयानंसत्यविक्रमं ॥ आरोप्यांकेरुदंत्येताश्चेदिराजवरांगनाः ॥ २४ ॥ अस्यपुत्रंहृषीकेशसुवक्त्रंचारुकुं
डलं ॥ द्रोणेनसमरेपश्यनिकृत्तंबहुधाशरैः ॥ २५ ॥

॥ २३ ॥ दाशार्हपुत्रजमित्यत्रपुत्र्यामपिपुत्रशब्दः ॥ २४ ॥ २५ ॥

॥२६॥२७॥२८॥२९॥३०॥३१॥३२॥३३॥३४॥३५॥तयोर्भीष्मविदुरयोः दर्शनेअनागतावेक्षणं॥३६॥३७॥३८॥३९॥४०॥४१॥४२॥४३॥४४
पितरमिति पितृपदस्यावृत्तिः शोकाकुलत्वान्नदोषाय॥

पितरंनूनमाजिस्थंयुध्यमानंपरैःसह॥ नाजहत्पितरंवीरमद्यापिमधुसूदन॥ २८॥ एवंममापिपुत्रस्यपुत्रःपितरमन्वगात्॥ दुर्योधनंमहाबाहोलक्ष्मणःपरवीरहा॥ २७॥ विंदानुविंदावावंत्यौपतितौपश्यमाधव॥ हिमांतेपुष्पितौशालौमरुतागलिताविव॥ २८॥ कांचनांगदवर्माणौबाणखड्गधनुर्धरौ॥ ऋषभप्रतिरूपाक्षौशयानौविमलस्रजौ॥ २९॥ अवध्याःपांडवाःकृष्णसर्वएवत्वयासह॥ येमुक्ताद्रोणभीष्माभ्यांकर्णाद्वैकर्तनात्कृपात्॥ ३०॥ दुर्योधनाद्द्रोणसुतात्सैंधवाच्चजयद्रथात्॥ सोमदत्ताद्विकर्णाच्चशूराच्चकृतवर्मणः॥ ३१॥ येहन्युःशस्त्रवेगेनदेवानपिनरर्षभाः॥ तइमेनिहताःसंख्येपश्यकालस्यपर्ययं॥ ३२॥ नातिभारोऽस्तिदैवस्यध्रुवंमाधवकश्चन॥ यदिमेनिहताःशूराःक्षत्रियैःक्षत्रियर्षभाः॥ ३३॥ तदैवनिहताःकृष्णममपुत्रास्तरस्विनः॥ यदैवाकृतकामस्त्वमुपप्लव्यंगतःपुनः॥ ३४॥ शांतनोश्चैवपुत्रेणप्राज्ञेनविदुरेणच॥ तदैवोक्तास्मिमास्नेहंकुरुष्वात्मसुतेष्विति॥ ३५॥ तयोर्हिदर्शनंनैतन्मिथ्याभवितुमर्हति॥ अचिरेणैवमेपुत्राभस्मीभूताजनार्दन॥ ३६॥ वैशंपायनउवाच- इत्युक्त्वान्यपतद्भूमौगांधारीशोकमूर्छिता॥ दुःखोपहतविज्ञानाधैर्यमुत्सृज्यभारत॥ ३७॥ ततःकोपपरीतांगीपुत्रशोकपरिप्लुता॥ जगामशौरिंदोषेणगांधारीव्यथितेंद्रिया॥ ३८॥ गांधार्युवाच पांडवाधार्तराष्ट्राश्चदग्धाःकृष्णपरस्परं॥ उपेक्षितावि नश्यंतस्त्वयाकस्माज्जनार्दन॥ ३९॥ शक्तेनबहुभृत्येनविपुलेतिष्ठताबले॥ उभयत्रसमर्थेनश्रुतवाक्येनचैवह॥ ४०॥ इच्छतोपेक्षितोनाशःकुरूणांमधुसूदन॥ यस्मात्त्वयामहाबाहोफलंतस्मादवाप्नुहि॥ ४१॥ पतिशुश्रूषयायन्मेतपःकिंचिदुपार्जितं॥ तेनत्वांदुरवापेनशप्स्येचक्रगदाधरं॥ ४२॥ यस्मात्परस्परंघ्नंतोज्ञातयःकुरुपांडवाः॥ उपेक्षितास्तेगोविंदतस्माज्ज्ञातीन्वधिष्यसि॥ ४३॥ त्वमप्युपस्थितेवर्षेषट्त्रिंशेमधुसूदन॥ हतज्ञातिर्हतामात्योहतपुत्रोवनेचरः॥ ४४॥ अनाथवदविज्ञातोलोकेष्वनभिलक्षितः॥ कुत्सितेनाभ्युपायेननिधनंसमवाप्स्यसि॥ ४५॥ तवाप्येवंहतसुतानिहतज्ञातिबांधवाः॥ स्त्रियःपरिपतिष्यंतियथैताभरतस्त्रियः॥ ४६॥ वैशंपायनउवाच तच्छ्रुत्वावचनंघोरंवासुदेवोमहामनाः॥ उवाचदेवींगांधारीमीषदभ्युत्स्मयन्निव॥ ४७॥ जानेऽहमेतदप्येवंचीर्णंचरसिक्षत्रिये॥ दैवादेवविनश्यंतिवृष्णयोनात्रसंशयः॥ ४८॥ संहर्तावृष्णिचक्रस्यनान्योमद्विद्यतेशुभे॥ अवध्यास्तेनरैरन्यैरपिवादेवदानवैः॥ ४९॥

चीर्णंचरसिमदनुष्ठितमेवानुतिष्ठसि स्वतपोनाशार्थमितिभावः॥४८॥४९
॥४५॥तवापीति अनिरस्तःपरध्वंसोयातिशक्तमुपेक्षकं कुलध्वंसप्रसूतार्तिर्गांधार्याइवकेशवं॥४६॥अभ्युत्स्मयन्नीषत्ध्वंसयन्॥४७॥

॥५०॥ इतिस्त्रीपर्वणिनैल० भारतभावदीपे पंचविंशोऽध्यायः॥२५॥ ॥७॥ उत्तिष्ठेति॥१॥ दुष्कृतंदुराचरितंत्वत्कार्यं॥२॥ वैरप्रियंपुरुषंवैरपुरुषं॥३॥ द्वावनर्थौपरदुःखद्वयरूपौ॥४॥

परस्परंकृतंनाशंयतःप्राप्स्यंतियादवाः॥ इत्युक्तवतिदाशार्हेपांडवास्त्रस्तचेतसः॥ बभूवुर्भृशसंविग्नानिराशाश्चापिजीविते॥५०॥ इतिश्रीमहाभारतेस्त्रीपर्व
णिस्त्रीविलापपर्व० गांधारीशापदानेपंचविंशोऽध्यायः॥२५॥ ॥७॥ समाप्तंचस्त्रीविलापपर्व॥ अथश्राद्धपर्व॥ श्रीभगवानुवाच उत्तिष्ठोत्तिष्ठगांधा
रिमाचशोकेमनःकृथाः॥ तवैवह्यपराधेनकुरवोनिधनंगताः॥१॥ यत्त्वंपुत्रंदुरात्मानमीर्षुमत्यंतमानिनं॥ दुर्योधनंपुरस्कृत्यदुष्कृतंसाधुमन्यसे॥२॥ नि
ष्ठुरंवैरपुरुषंवृद्धानांशासनातिगं॥ कथमात्मकृतंदोषंमय्याधातुमिहेच्छसि॥३॥ मृतंवायदिवानष्टंयोऽतीतमनुशोचति॥ दुःखेनलभतेदुःखंद्वावनर्थौप्रपद्य
ते॥४॥ तपोर्थीयंब्राह्मणीधत्तगर्भंगौर्वोढारंधावितारंतुरंगी॥ शूद्रादासंपशुपालंचवैश्यावधार्थीयंक्षत्रियाराजपुत्री॥५॥ वैशंपायनउवाच तच्छ्रु
त्वावासुदेवस्यपुनरुक्तंवचोऽप्रियं॥ तूष्णींबभूवगांधारीशोकव्याकुललोचना॥६॥ धृतराष्ट्रस्तुराजर्षिर्निगृह्याबुद्धिजंतमः॥ पर्यपृच्छतधर्मात्माधर्मराजंयु
धिष्ठिरं॥७॥ जीवतांपरिमाणज्ञःसैन्यानामसिपांडव॥ हतानांयदिजानीषेपरिमाणंवदस्वमे॥८॥ युधिष्ठिरउवाच दशायुतानामयुतंसहस्राणिच
विंशतिः॥ कोट्यःषष्टिश्चषट्चैवह्यस्मिन्राजन्मृधेहताः॥९॥ अलक्षितानांवीराणांसहस्राणिचतुर्दश॥ दशचान्यानिराजेंद्रशतंषष्टिश्चपंचच॥१०॥
धृतराष्ट्रउवाच युधिष्ठिरगतिंकांतेगताःपुरुषसत्तम॥ आचक्ष्वमेमहाबाहोसर्वज्ञोह्यसिमेमतः॥११॥ युधिष्ठिरउवाच यैर्हुतानिशरीराणिहृष्टैःपरम
संयुगे॥ देवराजसमाँल्लोकान्गतास्तेसत्यविक्रमाः॥१२॥ येत्वहृष्टेनमनसामर्तव्यमितिभारत॥ युध्यमानाहताःसंख्येतेगंधर्वैःसहसंगताः॥१३॥ येचसंग्राम
भूमिष्ठायाचमानाःपराङ्मुखाः॥ शस्त्रेणनिधनंप्राप्तागतास्तेगुह्यकान्प्रति॥१४॥ पाल्यमानाःपरैर्येतुहीयमानानिरायुधाः॥ ह्रीनिषेवामहात्मानःपरानभिमु
खारणे॥१५॥ छिद्यमानाःशितैःशस्त्रैःक्षत्रधर्मपरायणाः॥ गतास्तेब्रह्मसदनंनमेऽत्रास्तिविचारणा॥१६॥ येत्वत्रनिहताराजन्नंतरायोधनंप्रति॥ यथाकथंचि
त्पुरुषास्तेगताह्युत्तरान्कुरून्॥१७॥ धृतराष्ट्रउवाच केनज्ञानबलेनैवंपुत्रपश्यसिसिद्धवत्॥ तन्मेवदमहाबाहोश्रोतव्यंयदिवैमया॥१८॥ युधिष्ठिरउवाच
निदेशाद्भवतःपूर्ववनेविचरतामया॥ तीर्थयात्राप्रसंगेनसंप्राप्तोऽयमनुग्रहः॥१९॥

तपोरूपायार्थायउत्पन्नंतपोऽर्थीयं त्वद्विधावधार्थीयमेवगर्भंधत्ते अन्यातुजयार्थीयंकोऽत्यादयर्थीयमपीतिभावः॥५॥६॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ सुधर्माणंद्रुयाधनपुरोहितं ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८॥२९॥३०॥३१॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

देवर्षिर्लोमशोदृष्टस्ततःप्राप्तोस्म्यनुस्मृतिं ॥ दिव्यंचक्षुरपिप्राप्तंज्ञानयोगेनवैपुरा ॥ २० ॥ धृतराष्ट्रउवाच अनाथानांजनानांचसनाथानांचभारत॥ कच्चित्तेषांशरीराणिधक्ष्यसेविधिपूर्वकं॥ २१ ॥ नयेषामस्तिसंस्कर्त्तानचयेऽत्राहिताग्नयः ॥ वयंचकस्यकुर्यामोबहुत्वाचातकर्मणां॥ २२॥ यान्सुपर्णाश्चगृध्राश्चविकर्षंतियतस्ततः॥ तेषांतुकर्मणालोकाभविष्यंतियुधिष्ठिर ॥ २३ ॥ वैशंपायनउवाच एवमुक्तोमहाराजकुंतीपुत्रोयुधिष्ठिरः॥ आदिदेशसुधर्माणंधौम्यंसूतंचसंजयं॥ २४ ॥ विदुरंचमहाबुद्धिंयुयुत्सुंचैवकौरवं ॥ इंद्रसेनमुखांश्चैवभृत्यान्सूतांश्चसर्वशः ॥ २५ ॥ भवंतःकारयंत्वेषांप्रेतकार्याण्यशेषतः॥ यथाचानाथवत्किंचिच्छरीरंनविनश्यति॥ २६॥ शासनाद्धर्मराजस्यक्षत्तासूतश्चसंजयः ॥ सुधर्माधौम्यसहितइंद्रसेनादयस्तथा ॥ २७॥ चंदनागुरुकाष्ठानितथाकालीयकान्युत॥ घृतंतैलंचगंधांश्चक्षौमाणिवसनानिचं॥ २८ ॥ समाहृत्यमहार्हाणिदारुणांचैवसंचयान्॥ रथांश्चमृदितांस्तत्रनानाप्रहरणानिच॥ २९ ॥ चिताःकृत्वाप्रयत्नेनयथामुख्यान्नराधिपान्॥ दाहयामासुरव्यग्राःशास्त्रदृष्टेनकर्मणा ॥ ३० ॥ दुर्योधनंचराजानंभ्रातॄंश्चास्यशताधिकान्॥ शल्यंशलंचराजानंभूरिश्रवसमेवच॥ ३१ ॥ जयद्रथंचराजानमभिमन्युंचभारत ॥ दौःशासनिंलक्ष्मणंचधृष्टकेतुंचपार्थिवं ॥ ३२॥ बृहंतंसोमदत्तंचसृंजयांश्चशताधिकान्॥ राजानंक्षेमधन्वानंविराटद्रुपदौतथा॥ ३३॥ शिखंडिनंचपांचाल्यंधृष्टद्युम्नंचपार्षतं॥ युधामन्युंचविक्रांतमुत्तमौजसमेवच॥ ३४॥ कौसल्यंद्रौपदेयांश्चशकुनिंचापिसौबलं॥ अचलंवृषकंचैवभगदत्तंचपार्थिवं॥ ३५ ॥ कर्णंवैकर्तनंचैवसहपुत्रममर्षणं॥ केकयांश्चमहेष्वासांस्त्रिगर्तांश्चमहारथान्॥ ३६॥ घटोत्कचंराक्षसेंद्रंबकभ्रातरमेवच॥ अलंबुषंराक्षसेंद्रंजलसंधंचपार्थिवं॥ ३७॥एतांश्चान्यांश्चसुबहून्पार्थिवांश्चसहस्रशः॥ घृतधाराहुतैर्दीप्तैःपावकैःसमदाहयन्॥ ३८॥ पितृमेधाश्चकेषांचित्प्रावर्तंतमहात्मनाम् ॥ सामभिश्चाप्यगायंतनेऽन्वशोचंतचापरैः॥ ३९॥ साम्नामृचांचनादेनस्त्रीणांचरुदितस्वनैः॥ कश्मलंसर्वभूतानांनिशायांसमपद्यत॥ ४० ॥ तेविधूमाःप्रदीप्ताश्चदीप्यमानाश्चपावकाः॥ नभसीवान्वदृश्यंतग्रहास्तन्वभ्रसंवृताः॥ ४१ ॥ येचाप्यनाथास्तत्रासन्नानादेशसमागताः॥ तांश्चसर्वान्समानाय्यराशीन्कृत्वासहस्रशः॥ ४२॥ चित्वादारुभिरव्यग्रैःप्रभूतैःस्नेहपाचितैः॥ दाहयामासतान्सर्वान्विदुरोराजशासनात्॥ ४३॥

स्नेहपाचितैःस्नेहसंयुक्तैः ॥ ४३ ॥

तेसमासाद्येति ॥ १ ॥ वेष्टनानिउष्णीषकटिबंधनादीनि ॥ २ ॥ ३ ॥

॥ ४४ ॥ इतिस्त्रीपर्वणिनैलकंठीयेभा०षड्विंशोऽध्यायः ॥ २६ ॥ ॥ ५ ॥

इतिश्रीमहाभा०स्त्री०श्राद्धपर्वणिकुरूणामौर्ध्वदेहिकेषड्विंशो ॥ ४४ ॥ धृतराष्ट्रंपुरस्कृत्यगंगामभिमुखोऽगमत् ॥ ४४ ॥

ऽध्यायः ॥ २६ ॥ ॥ ७ ॥ वैशंपायनउवाच ते समासाद्यगंगांतुशिवांपुण्यजलोचितां ॥ ह्रदिनींचप्रसन्नांचमहारूपांमहाबलां ॥ १ ॥ भूषणान्युत्तरीयाणि वेष्टनान्यवमुच्यच ॥ ततःपितॄणांभ्रातॄणांपौत्राणांस्वजनस्यच ॥ २ ॥ पुत्राणामार्यकाणांचपतीनांचकुरुस्त्रियः ॥ उदकंचक्रिरेसर्वारुदंत्योभृशदुःखिताः ॥ ३ ॥ सुहृदांचापिधर्मज्ञाःप्रचक्रुःसलिलक्रियाः ॥ उदकेक्रियमाणेतुवीराणांवीरपत्निभिः ॥ ४ ॥ सूपतीर्थाभवद्गंगाभूयोविप्रससारच ॥ तन्महोदधिसंकाशंनिरानं दमनुत्सवं ॥ ५ ॥ वीरपत्नीभिराकीर्णंगंगातीरमशोभत ॥ ततःकुंतीमहाराजसहसाशोककर्शिता ॥ ६ ॥ रुदतीमंदयावाचापुत्रान्वचनमब्रवीत् ॥ यःसवीरोमहे ष्वासोरथयूथपयूथपः ॥ ७ ॥ अर्जुनेनजितःसंख्येवीरलक्षणलक्षितः ॥ यंसूतपुत्रंमन्यध्वंराधेयमितिपांडवाः ॥ ८ ॥ योव्यराजच्चमूमध्येदिवाकरइवप्रभुः ॥ प्रत्ययुध्यतवःसर्वान्पुरायःसपदानुगान् ॥ ९ ॥ दुर्योधनबलंसर्वंयःप्रकर्षन्व्यरोचत ॥ यस्यनास्तिसमोवीर्येपृथिव्यामपिपार्थिवः ॥ १० ॥ योवृणीतयशःशू रःप्राणैरपिसदाभुवि ॥ कर्णस्यसत्यसंधस्यसंग्रामेष्वपलायिनः ॥ ११ ॥ कुरुध्वमुदकंतस्यभ्रातुरक्लिष्टकर्मणः ॥ सहिवःपूर्वजोभ्राताभास्करान्मय्यजायत ॥ १२ ॥ कुंडलीकवचीशूरोदिवाकरसमप्रभः ॥ श्रुत्वातुपांडवाःसर्वेमातुर्वचनमप्रियं ॥ १३ ॥ कर्णमेवानुशोचंतोभूयःक्लांततराभवन् ॥ ततःसपुरुषव्याघ्रः कुंतीपुत्रोयुधिष्ठिरः ॥ १४ ॥ उवाचमातरंवीरोनिःश्वसन्निवपन्नगः ॥ यःशरोर्मिर्ध्वजावर्तोमहाभुजमहाग्रहः ॥ १५ ॥ तलशब्दानुनदितोमहारथमहाह्रदः ॥ यस्येषुपातमासाद्यनान्यस्तिष्ठेद्धनंजयात् ॥ १६ ॥ कथंपुत्रोभवत्याःसदेवगर्भःपुराऽभवत् ॥ यस्यबाहुप्रतापेनतापिताःसर्वतोवयं ॥ १७ ॥ तमग्निमिववस्त्रेण कथंछादितवत्यसि ॥ यस्यबाहुबलंनित्यंधार्तराष्ट्रैरुपासितं ॥ १८ ॥ उपासितंयथास्माभिर्बलंगांडीवधन्वनः ॥ भूमिपानांचसर्वेषांबलंबलवतांवरः ॥ १९ ॥ नान्यंकुंतीसुतात्कर्णादगृह्णाद्रथिनांरथी ॥ सनःप्रथमजोभ्रातासर्वशस्त्रभृतांवरः ॥ २० ॥ असूततंभवत्यग्रेकथमद्भुतविक्रमं ॥ अहोभवत्यामंत्रस्यगूहनेनव यंहताः ॥ २१ ॥ निधनेनहिकर्णस्यपीडितास्तुसबांधवाः ॥ अभिमन्योर्विनाशेनद्रौपदेयवधेनच ॥ २२ ॥

॥ ४ ॥ सूपतीर्थाशोभनजलावतरणमार्गा ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ अभवत्अभवत् अडभावआर्षः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

॥ २३ ॥ नेहस्मेति कर्णभ्रातृत्वेनज्ञातेसतितदनुसारिणामस्माकमपिदुर्लभंतदंतर्भविष्यन्नापिकौरवाणांक्षयोभविष्यतीत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ इतिश्रीमहाभारतेशत

पंचालानांविनाशेनकुरूणांपतनेनच ॥ ततःशतगुणंदुःखमिदंमामस्पृशद्भृशं ॥ २३ ॥ कर्णमेवानुशोचामिदह्याम्यग्नाविवाहितः ॥ नेहस्मकिंचिदप्राप्यंभवे
दपिदिविस्थितं ॥ २४ ॥ नचेदंवैशसंघोरंकौरवान्तकरंभवेत् ॥ एवंविलप्यबहुलंधर्मराजोयुधिष्ठिरः ॥ २५ ॥ व्यरुदच्छनकैराजंश्चकारास्योदकंप्रभुः ॥ ततो
विनेदुःसहसास्त्रियस्ताःखलुसर्वशः ॥ २६ ॥ अभितोयाःस्थितास्तत्रतस्मिन्नुदककर्मणि ॥ ततआनाययामासकर्णस्यसपरिच्छदाः ॥ २७ ॥ स्त्रियःकुरुपति
र्धीमानभ्रातुःप्रेम्णायुधिष्ठिरः ॥ सताभिःसहधर्मात्माप्रेतकृत्यमनंतरं ॥ २८ ॥ चकारविधिवद्धीमान्धर्मराजोयुधिष्ठिरः ॥ पापेनासौमयाश्रेष्ठोभ्राताज्ञातिर्नि
पातितः ॥ २९ ॥ अतोमनसियद्गुह्यंस्त्रीणांतन्नभविष्यति ॥ इत्युक्त्वासतुगंगायाउत्तताराकुलेंद्रियः ॥ भ्रातृभिःसहितःसर्वैर्गंगातीरमुपेयिवान् ॥ ३० ॥ इति
श्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासक्यांस्त्रीपर्वणिकर्णगूढजत्वकथनेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ७ ॥ समाप्तमिदंस्त्रीपर्व ॥ अतः
परंशांतिपर्वभविष्यति तस्यायमाद्यःश्लोकः वैशंपायनउवाच कृतोदकास्तेसुहृदांसर्वेषांपांडुनंदनाः ॥ विदुरोधृतराष्ट्रश्चसर्वाश्चभरतस्त्रियः ॥ १ ॥ ॥ ७ ॥

साहस्र्यांसंहितायांवैयासक्यांश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठकृतौभारतभावदीपेस्त्रीपर्वार्थप्रकाशेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ अस्मिन्पर्वणिआदिपर्वोक्ताध्यायपर्वश्लोकसंख्यावैषम्यंलिपिकरप्रमादादिनाबोध्यं ॥

इदंस्त्रीपर्व मुंबय्याख्यराजधान्यांगणपतकृष्णाजीत्यभिधानांमुद्रायंत्रालयेमुद्रितं शकाब्दाः १७८५

इति श्रीमहाभारते स्त्रीपर्व समाप्तम्

